मिताक्षरायामाचाराध्यायप्रारंभः

मि॰

॥श्रीगणेशाय नमः श्रीभवान्यै नमः धर्माधर्मौ तद्विपाकास्त्रयोऽपि क्लेशाः पंच प्राणिनामाययंते। यस्मिन्नेते नोपराम
ष्टं द्रष्टा यस्तं वंदे विष्णुमोंकारवाच्यं १ याज्ञवल्क्यमुनिभाषितं मुहुर्विश्वरूपविकटोक्तिविस्तृतं। धर्मशास्त्रमृजु विश्वरूपाचार्यस्य
२ मिता॰ मितिताक्षरैर्बालबुद्धिविधये विविच्यते २ याज्ञवल्क्यशिष्यः कश्चित्प्रश्नोत्तररूपं याज्ञवल्क्यप्रणीतं धर्मशास्त्रं
संक्षिप्य कथयामास यथा मनुप्रोक्तं भृगुः तस्यायमाद्यः श्लोकः योगीश्वरं याज्ञवल्क्यं [illegible] संपूज्य मुनयोऽब्रुवन्॥
वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः॥ योगीनां सनकादीनामीश्वरः श्रेष्ठस्तं याज्ञवल्क्यं संपूज्य मनोवाक्काय
कर्मभिः पूजयित्वा मुनयः सोमश्रवःप्रभृतयः श्रवणधारणयोग्याः अब्रुवन्नुक्तवंतः धर्मान्नोऽस्मभ्यं ब्रूहीति कथं
अशेषतः कार्त्स्न्येन केषां वर्णाश्रमेतराणां वर्णा ब्राह्मणादयः आश्रमा ब्रह्मचारिप्रभृतयः इतरेऽनुलोमप्रतिलो
मजा मूर्धावसिक्तादयः इतरशब्दस्य द्वंद्वे चेति सर्वनामसंज्ञानिषेधः अत्र च धर्मशब्दः षड्विधस्मार्तधर्मविषयः त धर्मे
था। वर्णधर्मः आश्रमधर्मो वर्णाश्रमधर्मो गुणधर्मो निमित्तधर्मः साधारणधर्मश्चेति। तत्र वर्णधर्मो नित्यमद्य
दिया ब्राह्मणो वर्जयेदिः आश्रमधर्मोऽग्नींधनभैक्षचर्यादिः वर्णाश्रमधर्मः पालाशो दंडो ब्राह्मणस्येत्येवमादिः॥ गुणध
र्मः शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापरिपालनादिः॥ निमित्तधर्मो विहिताकरणप्रतिषिद्धसेवननि १
मित्तं प्रायश्चित्तं॥ साधारणधर्मः अहिंसादिः॥ न हिंस्यात्सर्वभूतानीत्याचांडालं साधारणधर्मः॥ शौचाचारांश्चशि
५ चोदनालक्षणोऽर्थो धर्मः॥ चोदनाविधिः लक्षणं प्रमाणं यस्य तादृशोऽर्थः॥ बलवदनिष्टाननुबंधीष्टसाधनं यः स धर्मः। ५ न्यायविदोऽप्रतिपा[illegible]दितं

धर्मविषयिणीच्छा स्मार्तादयः

क्षयेदित्याचार्यकरणविधिप्रयुक्तत्वाद्धर्मशास्त्राध्ययनस्य प्रयोजनादिकथनं नातीवोपयुज्यते। तत्र चायं क्रमः प्राग्
पनयनात्कामचारकामवादकामभक्षाः ऊर्ध्वमुपनयनात्सावित्र्यध्ययनोपक्रमाद्धर्मशास्त्राध्ययनं ततो धर्मशास्त्रवि
हितयमनियमोपेतस्य वेदस्याध्ययनं ततस्तदर्थजिज्ञासा ततस्तदर्थानुष्ठानमिति। तत्र यद्यपि धर्मार्थकाममोक्षाः शा
स्त्रेणानेन प्रतिपाद्यंते तथापि धर्मस्य प्राधान्याद्धर्मग्रहणं। प्राधान्यं च धर्ममूलत्वादितरेषां। न चैवमुक्तं। धर्मे
मूलोऽर्थोऽर्थमूलो धर्म इत्यविरोधदर्शनात्। यतोऽर्थमंतरेणापि जपतीर्थयात्रादिना धर्मनिष्पत्तिरर्थलेशोऽपि न धर्म
मंतरेणेति। एवं काममोक्षावपि। एवं पृष्टः मिथिलास्थः स योगींद्रः क्षणं ध्यात्वाऽब्रवीन्मुनीन्। यस्मिन्देशे मृगः
कृष्णस्तस्मिन्धर्मान्निबोधत। मिथिलाख्या नाम नगरी तत्र स्थितः स याज्ञवल्क्यो योगीश्वरः क्षणं ध्यात्वा कंचित्का
लं मनः समाधाय॥ एतेश्रवणाधिकारिणो विनयेन पृष्टवंतीति युक्तमेतेभ्यो वक्तुमिति उक्तवान्मुनीन्। किं यस्मिन्देशे
मृगः कृष्णस्तस्मिन्धर्मान्निबोधतेति। कृष्णसारो मृगो यस्मिन्देशे स्वच्छंदं विहरति तस्मिन्देशे वक्ष्यमाणलक्ष
णा धर्मा अनुष्ठेयाः नान्यत्रेत्यभिप्रायः। शौचाचारांश्च शिक्षयेदित्याचार्यस्य धर्मशास्त्राध्यापनविधिः। शिष्येण
तदध्ययनं कर्तव्यमिति कुतोऽवगम्यतइत्यत आह॥ पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाः स्थानानि
विद्यानां धर्मस्य च चतुर्दश। पुराणं ब्राह्मादि न्यायस्तर्कविद्या। मीमांसा वेदवाक्यविचारः। धर्मशास्त्रं मान

नामेकदेशे नामग्रहणं न्यायेन मृगजातिविशेषपरं मृगपदं तत्रैव तात्पर्यग्रहणं॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

उभयत्रस्थानपदार्थमाह हेतवः। धर्मस्य। प्रमाणानि।

मि० वादि। अंगानि व्याकरणादीनि षट्। एतैरुपेताश्चत्वारो वेदाः विद्याः पुरुषार्थसाधनानि ज्ञानानि तानि स्थानानि चतुर्दश। धर्म[redacted] साधनानि
साधकानि स्य च स्थानानि हेतवः एतानि चत्रैवर्णिकैरध्येतव्यानि। तदन्तर्भूतत्वाद्धर्म[redacted]शास्त्रमध्येतव्यं॥ तत्रतानि ब्राह्मणेनवि
२ द्याप्राप्तये धर्मानुष्ठानाय चाधिगंतव्यानि। क्षत्रियवैश्याभ्यां धर्मानुष्ठानाय। तथा च शंखेन विद्यास्थानान्यनुक्रम्योक्तं।
एतानि ब्राह्मणोधिकुरुते स च वृत्तिं दर्शयती तरेषामिति। मनुरपि द्विजातीनां धर्मशास्त्राध्ययनेधिकारो ब्राह्मणस्य प्र
वचनेनान्यस्येति दर्शयति। निषेकादिश्मशानांतो मंत्रैर्यस्योदितो विधिः। तस्य शास्त्रेधिकारोस्मिन् ज्ञेयो नान्यस्य कस्य
चिदिति। विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः। शिष्येभ्यश्च प्रवक्तव्यं सम्यङ्नान्येन केनचिदिति। अस्तु धर्मशास्त्रम
ध्येतव्यं याज्ञवल्क्यप्रणीतस्यास्य शास्त्रस्य किमायातमित्यत आह। मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः॥
यमापस्तंबसंवर्ताः कात्यायनबृहस्पती। पराशरव्याससंख्यलिखिता दक्षगौतमौ॥ शातातपो वसिष्ठश्च धर्मशास्त्र
प्रयोजकाः॥ ४॥ उशनःशब्दपर्यंतो द्वंद्वैकवद्भावः॥ याज्ञवल्क्यप्रणीतमिदं शास्त्रं अध्येतव्यमित्यभिप्रायः। नैषां परिसं
ख्या। किंतु प्रदर्शनार्थमेतत्। अतो बौधायनादेरपि धर्मशास्त्रत्वमविरुद्धं। एतेषां प्रत्येकं प्रामाण्येपि साकांक्षाणामा
परि कांक्षापूरणमन्यतः क्रियते विरोधे विकल्पः। इदानीं धर्मस्य कारकहेतूनाह। देशे काल उपायेन द्रव्यं श्रद्धासमन्वितं। पा
त्रे प्रदीयते यत्तत्सकलं धर्मलक्षणं। देशो यस्मिन्देशे मृगः कृ स्सदृस्साधुक लक्षणः। कालः संक्रान्त्यादिः उपायः शास्त्रोक्तेति २

कर्तव्यताकलापः। द्रव्यं प्रतिग्रहादिना लब्धं गवादि। श्रद्धा आस्तिक्यबुद्धिः तद्युक्तेन यथा भवति तथा। पात्रे न विषये सर्वस्य वमादि
मा एल लक्षणं। प्रदीयते यथा न प्रत्यावर्तते तथा परस्वत्वापत्तवसानं ज्यते एतद्धर्मस्योत्पादकं। किमेतावदेवनेत्याह। सक
लमिति। अन्यदपि शास्त्रोक्तं जातिगुणहोमयागादि। तत्सकलं धर्मस्य कारणं। जातिगुणद्रव्यभावार्थात्मकं चतुर्विधमपि
धर्मस्य कारकमित्युक्तं भवति। तच्च समस्तं व्यस्तं वा यथाशास्त्रं द्रष्टव्यं। श्रद्धा सर्वत्रानुवर्तत एव। इदानीं धर्मस्य ज्ञापकहेतू
नाह। श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतं। श्रुतिर्वेदः स्मृतिधर्मशा
स्त्रं। तथा च मनुः श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिरिति। सदाचारः सतां शिष्टानामाचारोनुष्ठानं। स्वस्य चात्मनः
प्रियं वैकल्पिके विषये यथा गर्भाष्टमेष्टमे वा इत्यादिषु आत्मेच्छैव नियामिका। सम्यक्संकल्पाज्जातः शास्त्राऽवि
रुद्धः कामो यथा मया भोजनव्यतिरेकेणोदकं न पातव्यमिति। एते धर्मस्य मूलं प्रमाणं। एतेषां विरोधे पूर्वपूर्वस्य बल
लीयस्त्वं। देशादिकारकहेतूनामपवादमाह। इज्याचारदमाहिंसादानस्वाध्यायकर्मणां। अयं तु परमो धर्मो यद्योगेना
त्मदर्शनं। इज्यादीनां कर्मणामयमेव परमो धर्मः यद्योगेन बाह्यचित्तवृत्तिनिरोधेनात्मनो दर्शनं याथात्म्यज्ञानं। योगेना
त्मज्ञाने देशादिनियमो नास्तीत्यर्थः तदुक्तं। यत्रैकाग्रता तत्राविशेषादिति। कारकहेतुषु ज्ञापकहेतुषु वा संदेहे निर्णयहेतुमा
ह। चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा। सा ब्रूते यं स धर्मः स्यादेको वाध्यात्मवित्तमः। चत्वारो ब्राह्मणा वेदधर्मशास्त्रज्ञाप

निमित्तं प्रतिपादकाः

वेदत्रयं

यावंतो वर्णास्तावंतः सर्वे नयनार्थः॥

प्रतिपाद्यमर्थं बुद्धौ संगृह्य प्रागेव तदर्थमर्थांतरवर्णनमुपोद्घातः॥२

मि० र्वन्तिस्त्रो विद्या अधीयंत इति त्रैविद्यास्तेषां समूहस्त्रैविद्यं धर्मज्ञास्त्वत्तत्त्वमन्वाद्यनुवर्त्तते न हापयति सा पूर्वोक्ता पर्षत् यं
ब्रूते स धर्मः आत्मज्ञाने निपुणतमो धर्मज्ञास्त्वज्ञश्च एको वा यं ब्रूते सोपि धर्मः। इत्युपोद्घातः। एतैर्नवभिः श्लोकैः सकल
१ शास्त्रोपोद्घातमुक्त्वा इदानीं वर्णादीनां धर्मान्वक्तुं प्रथमं तावद्वर्णानाह ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः॥
निषेकाद्याः श्मशानांतास्तेषां वै मंत्रतः क्रियाः॥ ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो वर्णा वक्ष्यमाणलक्षणास्तेषामा
द्यास्त्रयो ब्राह्मणक्षत्रियवैश्याः द्विजाः द्विर्जायंत इति द्विजाः तेषां द्विजानामेव न शूद्रस्य निषेको गर्भाधानमाद्यो यासां
तास्तथोक्ताः श्मशानं पितृवनं तत्संबंधि कर्म अंतो यासां ताः क्रियामंत्रैर्भवंति। इदानीं ताः क्रिया अनुक्रामति। गर्भाधा
नमृतौ पुंसः सवनं स्पंदनात्पुरा। षष्ठेऽष्टमे वा सीमंतो मास्येते जातकर्म च। अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः। ष
ष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलं गर्भाधानमित्यनुगतार्थकर्मनामधे यमेवं वक्ष्यमाणान्यपि तद्गर्भाधान
मृतौ ऋतुकाले वक्ष्यमाणलक्षणे कार्यं पुंसवनाख्यं कर्म गर्भचलनात्पूर्वं षष्ठे वाष्टमे वा मासि सीमंतोन्नयनं। एते च द्वे
पुंसवसीमंतोन्नयने क्षेत्रसंस्कारकर्मत्वात्सकृदेव कार्ये न प्रतिगर्भं। यथाह देवलः सकृत्सुसंस्कृता नारी सर्वगर्भेषु
संस्कृतेति। एते आवृत्ते आगर्भकोशात्कुमारे जाते जातकर्म एकादशेऽहनि नामकरणं तच्च पितामहमातामहादि
संबंधदेवतासंबद्धं वा। यथाह शंखः। कुलदेवतासंबद्धं पितानाम कुर्यादिति। चतुर्थे मासि निष्क्रमलक्षणं कर्म० षष्ठे ३

२ इदं च गर्भाधानादि गते त्रितयपरमेवेति टीकायां॥२

मास्यन्नप्राशनं कर्म। चूडालक्षणं तु यथाकुलं कार्यमिति प्रत्येकं संबध्यते। एतेषां नित्यत्वेप्यानुषंगिकं फलमाह। एवमे
नः शमं याति बीजगर्भसमुद्भवं। एवमुक्तेन प्रकारेण गर्भाधानादिभिः संस्कारकर्मभिः कृतैरेनः पापं शमं याति किंभूतं बी
जगर्भसमुद्भवं शुक्रशोणितसंबद्धं गोत्रव्याधिसंक्रांतिनिमित्तं। न तु पतितोत्पन्नत्वादि। स्त्रीणां विशेषमाह। तूष्णीमेताः
क्रियाः स्त्रीणां विवाहस्तु समंत्रकः। एता जातकर्मादिक्रियाः स्त्रीणां तूष्णीं विनैव मंत्रैर्यथाकालं कार्याः। विवाहः पुनः समं
त्रकः। गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनं॥ राज्ञामेकादशे सैके विशामेके यथाकुलं। गर्भाधानमवधिं कृत्वा जन्म
तो वाष्टमे वर्षे ब्राह्मणस्योपनायनं। उपनयनमेवोपनायनं स्वार्थेण्। वृत्तानुसारात्॥ अत्रेच्छया विकल्पः। राज्ञामेकादशे वैश्य
स्य सैके एकादशे द्वादशे इत्यर्थः। गर्भग्रहणं सर्वत्रानुवर्तते० समासे गुणभूतस्यापि गर्भशब्दस्य बुद्ध्या विभज्योभयत्रानु
वर्तनं कार्यं। गर्भैकादशे राज्ञां गर्भद्वादशे विशामिति स्मृत्यंतरदर्शनात्। यथा। अथ शास्त्रानुशासनं केषांचिद्दर्शनामिति।
अत्रापि कार्यमित्यनुवर्तते। कुलस्थित्या केचिदुपनयनमिच्छंति। उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकं। वेदमध्यापये
देनं शौचाचारांश्च शिक्षयेत्। स्वगृह्योक्तविधिना उपनीय शिष्यं गुरुर्महाव्याहृतिपूर्वकं वेदमध्यापयेत्। महाव्याहृतयश्च
भूरादिसत्यांताः सप्त पंच वा गौतमाभिप्रायेण। किंच शौचाचारान्वक्ष्यमाणलक्षणान् शिक्षयेत्। उपनीय शौचाचारांश्च शि
क्षयेदित्यनेन प्रागुपनयनात्कामचारो दर्शितः। वर्णधर्मान्वर्जयित्वा स्त्रीणाममंत्रकत्वमानं विवाहादर्वाक् उपनयनस्थानी

मि·
४

षत्वाद्विवाहस्य। शौचाचारानाह॥ दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः॥ कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः॥ क
र्णस्थं ब्रह्मसूत्रं यस्य स तथोक्तः कर्णश्च दक्षिणः। पवित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेदिति लिंगात्। असावहनि सं
ध्ययोश्च उदङ्मुखो मूत्रपुरीषे कुर्यात्। चकारान्मध्याह्नादिरहिते देशे रात्रौ तु दक्षिणामुखः॥ गृहीतशिश्नश्चोत्थाय मृद्भि
रभ्युद्धृतैर्जलैः। गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः॥ अनंतरं शिश्नं गृहीत्वोत्थायोद्धृताभिरद्भिर्वक्ष्यमाणलक्षणाभिर्मृ
द्भिश्च गंधलेपयोः क्षयकरं शौचं कुर्यादनलसः। उद्धृताभिरिति जलांतःशौचनिषेधः। अत्र गंधलेपक्षयकरमिति सर्वाश्र
मिणां साधारणं शौचमिदं। मृत्संख्यानियमस्त्वदृष्टार्थः। अंतर्जानुः शुचौ देशे उपविष्ट उदङ्मुखः। प्राग्वा ब्राह्मेण तीर्थेन
द्विजो नित्यमुपस्पृशेत्। शुचौ अशुचिद्रव्यासंस्पृष्टे देशे तूपानच्छयनासनादिनिषेधः उपविष्टो न स्थितः न शयानः प्र
कब्ब: ह्वो गत्वा उदङ्मुखः प्राङ्मुखो वेति दिगंतरनिवृत्तिः शुचौ देशे इत्येतस्मात् पादप्रक्षालनमपि ब्राह्मेण तीर्थेन वक्ष्यमा
णलक्षणेन द्विजो न शूद्रादिः। नित्यं सर्वकालं॥ आश्रमांतरगतोऽपि उपस्पृशेदाचामेत्। कथं अंतर्जानु जानुनोर्मध्ये हस्तौ
कृत्वा दक्षिणेन हस्तेनेति। कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च प्राजापत्यपितृब्रह्मदेवतीर्थान्यनुक्रमात्। कनिष्ठायास्त सरपि:
र्जन्याश्च अंगुष्ठस्य च मूलानि कराग्रं च प्राजापत्यपितृब्रह्मदेवतीर्थानि यथाक्रमं वेदितव्यानि। त्रिः प्राश्यापो द्विरुन्मृज्य
खान्यद्भिः समुपस्पृशेत्। अद्भिस्तु प्रकृतिस्थाभिः हीनाभिः फेनबुद्बुदैः। वारत्रयमपः पीत्वा मुखमंगुष्ठमूलेन द्विरु ४

न्मृज्य खानि छिद्राणि ऊर्ध्वकायगतानि घ्राणादीनि अद्भिरुपस्पृशेत्। अद्भिर्दृष्ट्यांतरसंस्पृष्टाभिः पुनरद्भिरिति ग्रहणं
प्रतिछिद्रमुदकस्पर्शनार्थं पुनः स्नान एव विधिर्न हि। प्रकृतिस्थाभिर्गंधरूपरसस्पर्शांतरमप्राप्ताभिः फेनबुद्बुदरहिता
भिः तु शूद्राद्दूषं धारागतानां शूद्राद्यावर्जितानां च निषेधः॥ हृत्कंठतालुगाभिस्तु यथासंख्यं द्विजातयः॥ शुद्ध्येरन् स्त्री
च शूद्रश्च सकृत्स्पृष्टाभिरंततः। हृत्कंठतालुगाभिरद्भिर्यथाक्रमेण द्विजातयः शुद्ध्यंति। स्त्री च शूद्रश्च ततः अंतेन ता
लुनास्पृष्टाभिः सकृदिति वेश्या द्विजोषः च शूद्रादनुपनीतोऽपि। स्नानमब्दैवतैर्मंत्रैर्मार्जनं प्राणसंयमः सूर्यस्य चाप्युपस्था
नं गायत्र्याः प्रत्यहं जपः॥ प्रातः स्नानं यथा शास्त्रं। अब्दैवतैर्मंत्रैरापो हि ष्ठेत्येवमादिभिः मार्जनं प्राणसंयमः प्राणायामो व
क्ष्यमाणलक्षणः ततः सूर्यस्य चाप्युपस्थानं सौरमंत्रेण। गायत्र्याः तत्सवितुर्वरेण्यमित्यादि। प्रतिदिवसं जपः कार्य इ
त्यपि अर्थात्। लिंगं प्रत्येकमभिसंबध्यते। गायत्रीं शिरसंयुक्तां जपेद्व्याहृतिपूर्विकां॥ प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः।
गायत्रीपूर्वोक्ता आपो ज्योतिरित्यादिना शिरसा संयुक्ता उक्तव्याहृतिपूर्विकां प्रतिव्याहृतिप्रणवेन संयुक्ता मो भूर्भुवरिति
त्रिवारं मुखनासिकासंचारिवायुं निरुध्य मनसा जपेत् स्वयं सर्वत्र प्राणायामः॥ प्राणानायम्य संप्रोक्ष्य तृचेनाब्दैवतेन तु।
जपन्नासीत सावित्रीं प्रत्यगातारकोदयात्। संध्यां प्राक् प्रातरेवं हि तिष्ठेदा सूर्यदर्शनात्। प्राणायामं पूर्वोक्तं कृत्वा तृचेना
ब्दैवतेन पूर्वोक्तेनात्मानमद्भिः संप्रोक्ष्य सावित्रीं जपन् प्रत्यक् संध्यामुपासीत। पश्चान्मुख उदङ्मुख इति लभ्यते आतारकोद

त्रिविधं पूरककुंभकरेचकप्राणायामं कर्तव्यः।

यावत्तारकोदयावधि। प्राक्संध्यां प्रातः समये एवं पूर्वोक्तं विधिमाचरन् प्राङ्मुखः सूर्योदयावधि तिष्ठेत्। अहोरात्रयोः संधौ
या विधीयते सा संध्या। तत्राह। संपूर्णादित्यमंडलदर्शनयोग्यः कालः तद्विपरीता रात्रिः यस्मिन्काले मंडलखंडस्योपलब्धिः स
संधिः॥ अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपि। ततोऽभिवादयेद्वृद्धानसावहमिति ब्रुवन्। ततः संध्योपासनानंतरं द्वयोः
संध्ययोरग्निकार्यं अग्नौ समित्प्रक्षेपादि यत्तत्कुर्यात् स्वगृह्योक्तेन विधिना। तदनंतरं वृद्धाननुक्रमशोऽभिवादयेत्। क
थम् असौ देवदत्तनामाहमिति स्वनामकीर्तयन्। गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः। आहूतश्चाप्यधीयीत लब्धं चास्मै
निवेदयेत्॥ हितं तस्याचरेन्नित्यं मनोवाक्कायकर्मभिः॥ तथा गुरुं वक्ष्यमाणलक्षणं उपासीत तत्परिचर्यापरः तदधीनस्ति
ष्ठेत्। स्वाध्यायार्थम् अध्ययनसिद्ध्ये समाहितोऽविक्षिप्तचित्तो भवेत्। आहूतश्चाप्यधीयीत गुर्वाह्वानेनैवाधीयीत न स्वयं प्रेर
येत्॥ यच्च लब्धं तत्सर्वं गुरवे निवेदयेत्। नित्यं सदा मनोवाक्कायकर्मभिः प्रतिकूलं कुर्यात्। अपि तु हितं तत्र गुरुदर्शने नोत्तमो
क्तं कंठप्रावृतादि विवर्जयेत्॥ कृतज्ञोऽद्रोहि मेधावी शुचिः कल्योऽनसूयकः। अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः॥ कृ
तमुपकारं न विस्मरतीति कृतज्ञः। अद्रोहो दयावान्। मेधावी ग्रंथग्रहणधारणशक्तः। शुचिर्बाह्याभ्यंतरशौचवान्। कल्यः
आधिव्याधिरहितः। अनसूयको दोषानाविष्कारेण गुणाविष्करणशीलः। साधुर्वृत्तवान्। शक्तः शुश्रूषायां। आप्तो बंधुः।
ज्ञानदो विद्याप्रदः। वित्तदोऽर्पणपूर्वमर्थप्रदाता। एते गुणाः समस्ता व्यस्ता वा यथासंभवं द्रष्टव्याः। एते च धर्मशास्त्रानुसारे ५

डाक्टर भाऊदाजी स्मारक
Dr BHAU DAJI MEMORIAL

णाध्याप्याः॥ दंडाजिनोपवीतानि मेखलां चैव धारयेत्। तत्र यथास्वं तत्र प्रसिद्धपालाशादिदंडं। अजिनं च कार्ष्णादि। उपवीतं का
र्पासादिनिर्मितं। मेखलां च मुंजादिनिर्मितां ब्राह्मणादिर्ब्रह्मचारी धारयेत्। ब्राह्मणेषु चरेद्भैक्ष्यमनिंद्येष्वात्मवृत्तये। आ
दिमध्यावसानेषु भवच्छब्दोपलक्षिता। ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमं॥ पूर्वोक्तदंडादियुक्तो ब्रह्मचारी ब्राह्मणे
षु अभिशस्तादिव्यतिरिक्तेषु स्वकर्मनिरतेषु भैक्षं चरेत् आत्मवृत्तये आत्मनो जीवनापनपरार्थं आचार्यतद्भार्यापुत्रव्यति
रेकेण। निवेद्य गुरुणाऽनुज्ञातो भुंजीत तद्भावेन त्वन्यदापदीति नियमात्। अत्र च ब्राह्मणग्रहणं संभवे सति नियमार्थं।
यत्तु सार्ववर्णिकं भैक्षचरणमिति तत्त्रैवर्णिकपराभ्यर्थं। यत्तु चातुर्वर्ण्यं चरेद्भैक्षमिति तदापद्विषयं कथं भैक्षचर्या
कार्या। ~~आदिमध्यावसानेषु भवच्छब्दोपलक्षिता~~॥ भवति भिक्षां देहि। भिक्षां भवति देहि। भिक्षां देहि भवतीत्येवं वर्णक्र
मेण भैक्षचर्या कार्या। कृताग्निकार्यो भुंजीत वाग्यतो गुर्वनुज्ञया। आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन्॥ पूर्वो
क्तेन विधिना भिक्षामाहृत्य गुरवे निवेद्य तदनुज्ञया कृताग्निकार्यो वाग्यतो मौनी अन्नं सत्कृत्य संपूज्य अकुत्सयन्
अनिंदन्नापोशानक्रियापूर्वम् अमृतोपस्तरणमसीत्यादिकं पूर्वं कृत्वा भुंजीत। अत्र पुनरग्निकार्यग्रहणं संध्याका
ले कथंचिदकृताग्निकार्यस्य कालांतरविधानार्थं न पुनरुक्ततीयप्राभ्यर्थं॥ ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि। ब्रा
ह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन्॥ ब्रह्मचर्ये स्थितः एकान्नं नाद्यादनापदि व्याध्याद्यभावे। ब्राह्मणः पुनः श्रा

मि. ६

द्धे अभ्यर्थितः सन्कामम श्नीयाद्व्रतमपीडयन्। मधुमांसपरिहारेण। अत्र ब्राह्मणग्रहणं क्षत्रियादेः श्राद्धभोजनव्युदासार्थं।
राजन्यवैश्ययोश्चैव नैतत्कर्म प्रचक्षत इति स्मरणात्॰ मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं। भास्करालोकनाश्ली
लपरिवादादि वर्जयेत्। मधु क्षौद्रं न मद्यं तस्य नित्यमद्यं ब्राह्मण इति निषेधात्। मांसं छागादेरपि। अंजनं घृतादिना
गात्रस्य। कज्जलादिना चाक्ष्णोः। उच्छिष्टं अगुरोः। शुक्तं निष्ठुरवाक्यं। नाम्लरसस्यास्य भक्ष्यप्रकरणे निषेधात्॥ स्त्रिय
युपभोगे। प्राणिहिंसनं जीववधः। भास्करस्य चोदयास्तमयादावालोकनं। अश्लीलमसभ्यभाषणं। परिवादः सद्
सद्रूपस्य परदोषस्य ख्यापनं। आदिग्रहणान्नृत्यं नरोक्तगंधमाल्यादि गृह्यते। एतानि ब्रह्मचारी वर्जयेत्। गुर्वादि
लक्षणमाह। स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति। उपनीय दद्द्वेदमाचार्यः स उदाहृतः॥ योसौ गर्भाधाना
द्या उपनयनपर्यंताः क्रियायथाविधिं कृत्वा वेदमस्मै ब्रह्मचारिणे प्रयच्छति स गुरुः॥ यः पुनरुपनयनमात्रं कृ
त्वा वेदं प्रयच्छति स आचार्यः॥ एकदेशमुपाध्यायं ऋत्विग्यज्ञकृदुच्यते। एते मान्या यथापूर्वमेभ्यो माता गरी
यसी। वेदस्यैकदेशं मंत्रब्राह्मणयोरेकं अंगानि च योऽध्यापयति स उपाध्यायः॥ यः पुनः पाकयज्ञादिकं वृ
तः करोति स ऋत्विक्। एते च गुर्वाचार्योपाध्यायर्त्विजो यथापूर्वं यथाक्रमेण मान्याः पूज्याः एभ्यः सर्वेभ्यो
माता गरीयसी पूज्यतमा। वेदग्रहणार्थं ब्रह्मचर्यावधिमाह। प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पंच वा। ग्रहणां ६

तिकमित्येके केशांतश्चैव षोडशे। यदा विवाहासंभवेन वेदानधीत्य वेदौ वेदं वेति प्रवर्तते तदा प्रतिवेदं वेदं वेदं
प्रतिब्रह्मचर्यं पूर्वोक्तं द्वादशवर्षाणि कार्यं। अशक्तौ पंच॥ ग्रहणांतिकमित्येके वर्णयंति। केशांतः पुनः गोदाना
ख्यं कर्म॥ गर्भादारभ्य षोडशे वर्षे ब्राह्मणस्य कार्यं। एतच्च द्वादशवार्षिके वेदव्रते बोद्धव्यं। इतरस्मिन्पक्षे यथासं
भवं द्रष्टव्यं। राजन्यवैश्ययोस्तूपनयनकाले द्वाविंशे वा चतुर्विंशे वा द्रष्टव्यं। उपनयनकालस्य परमावधिमाह।
आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात्। ब्रह्मक्षत्रविशां काल औपनायनिकः परः॥ अत ऊर्ध्वं पतंत्येते सर्वध
र्मबहिष्कृताः॥ सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः॥ आषोडशाद्वर्षात् षोडशवर्षं यावत् आद्वाविं
शाद्दाचतुर्विंशाद्वर्षात्। ब्राह्मणक्षत्रियविशां औपनायनिकः उपनयनसंबंधी परः कालो नातः परमुपनयनका
लोस्ति किंतु पतंत्येते सर्वधर्मबहिष्कृताः सर्वधर्मेष्वनधिकारिणो भवंति सावित्रीपतिताः पतितसावित्रीका
भवंति। सावित्रीदानायोग्या भवंति। व्रात्याः संस्काररहिताः व्रात्यस्तोमात् क्रतोर्विना। कृते तु तस्मिन्नुपन
यनाधिकारिणो भवंति। आद्यास्त्रयो द्विजा त्युक्तं तत्र हेतुमाह। मातुर्यदग्रे जायंते द्वितीयं मौंजिबंधनात्।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः॥ मातुः सकाशात्प्रथमं तावज्जायंते मौंजीबंधनाच्च द्वितीयं जन्म
यस्मात्तस्मादेते ब्राह्मणक्षत्रियवैश्या द्विजा उच्यंते॥ वेदग्रहणाध्ययनफलमाह। यज्ञानां तपसां चैव शुभा

मि.
८

नांचैवकर्मणां।वेदएवद्विजातीनांनिःश्रेयसकरःपरः॥यज्ञानांश्रौतस्मार्तानांतपसांकाम्यसंतापरूपाणां
चांद्रायणादीनांशुभानांचकर्मणांउपनयनादिसंस्काराणांअवबोधकत्वेनवेदएवद्विजातीनांपरोनिःश्रे
यसकरोनान्यः वेदएवेतितन्मूलत्वेनस्मृतेरप्युपलक्षणार्थं।ग्रहणाध्ययनफलमुक्त्वेदानींकाम्यब्रह्मय
ज्ञाध्ययनफलमाह।मधुनापयसाचैवसदेवांस्तर्पयेद्द्विजः॥पितॄन्मधुघृताभ्यांचऋचोधीतेहियोन्वहं।य द्वि
जूंषिशक्तितोधीतेयोन्वहंसघृतामृतैः।प्रीणातिदेवानाज्येनमधुनाचपितॄंस्तथा।सतुसोमघृतैर्देवांस्त
र्पयेद्योन्वहंपठेत्।सामानितृप्तिंकुर्याच्चपितॄणांमधुसर्पिषा।योन्वहमृचोधीतेसमधुनापयसाचदेवान् पितॄंश्च
मधुघृताभ्यांतर्पयति।यःपुनःशक्तितोन्वहंयजूंष्यधीतेसघृतामृतैर्देवान्पितॄंश्चमधुघृताभ्यांप्रीणयतियस्तु
सामान्यन्वहमधीतेससोमघृतैर्देवान्पितॄंश्चमधुसर्पिर्भ्यांप्रीणाति।ऋग्गादिग्रहणंसामान्येनऋगादिमात्रप्रा शक्ति
प्त्यर्थं॥मेदसातर्पयेद्देवानथर्वांगिरसःपठन्।पितॄंश्चमधुसर्पिर्भ्यामन्वहंशक्तितोद्विजः॥वाकोवाक्यंपुराणंचना
राशंसीश्चगाथिकाः।इतिहासांस्तथाविद्याःशक्त्याधीतेतुयोन्वहं।मांसक्षीरौदनमधुतर्पणंसदिवौकसां।करोति
तृप्तिंकुर्याच्चपितॄणांमधुसर्पिषा।तेतृप्तास्तर्पयंत्येनंसर्वकामफलैःशुभैः।यःपुनःशक्तितोन्वहमथर्वांगिरसो
धीतेसदेवान्मेदसापितॄंश्चमधुसर्पिर्भ्यांतर्पयति।यस्तुवाकोवाक्यंप्रश्नोत्तररूपंवेदवाक्यंपुराणंब्राह्मादिचकारा ८

न्मानवादिधर्मशास्त्रं।नाराशंसीश्चरुद्रदैवत्यान्मंत्रान्।गाथाश्चयज्ञगाथेंद्रगाथाद्याः।इतिहासान्महाभारतादीन्।विद्याश्च
वारुण्याद्याःशक्तितोन्वहमधीतेसमांसक्षीरौदनमधुभिर्देवान्पितॄंश्चमधुसर्पिर्भ्यांतर्पयतितेपुनस्तृप्ताःसंतोदेवाः
पितरश्चएनंस्वध्यायकारिणंसर्वकामफलैःशुभैःअनन्योपघातलक्षणैस्तर्पयंति।मखांशार्थमाह॥यंयंक्रतुमधीयी
ततस्यतस्याप्नुयात्फलं।त्रिर्वित्तपूर्णपृथिवीदानस्यफलमश्नुते।तपसश्चपरस्येहनित्यंस्वाध्यायवान्द्विजः॥यस्ययस्यक्र
तोःप्रतिपादकंवेदैकदेशमन्वहमधीतेतस्यतस्यक्रतोःफलमाप्नोति।तथावित्तपूर्णायाःपृथिव्याःत्रिः त्रिवारंदानस्य
यत्फलंपरस्यचतपसश्चांद्रायणादेर्यत्फलंतदपिनित्यस्वाध्यायवानाप्नोति।नित्यग्रहणंकाम्यस्यापिसतोनित्य विद्यमानस्य
त्वज्ञापनार्थं॰एवंसामान्येनब्रह्मचारिधर्मानभिधायअधुनानैष्ठिकस्यविशेषमाह।नैष्ठिकोब्रह्मचारीतुवसेदा
चार्यसन्निधौ।तदभावेस्यतनयेपत्न्यांवैश्वानरेपिवा।अनेनविधिनादेहंसाधयन्विजितेंद्रियः।ब्रह्मलोकमवाप्नोति
नचेहजायतेपुनः॥उक्तेनप्रकारेणात्मानंनिशामुत्क्रांतिकालंनयतीतिनैष्ठिकःसयावज्जीवमाचार्यसमीपेतु॥भवे वसेत्
दग्रहणोनरकालंस्वतंत्रोभवेत्।तदभावेतत्पुत्रसमीपेतदभावेतद्भार्यासमीपेवसेत्तदभावेवैश्वानरेपिअनेनउ
क्षपयन् क्तेनविधिनादेहंसाधयन्विजितेंद्रियइंद्रियजयेविशेषप्रयत्नवान्ब्रह्मचारीब्रह्मलोकममृतत्वमाप्नोतिनकश्चि
दिहपुनर्जायते॥इतिब्रह्मचारिप्रकरणं॥यःपुनर्वैवाह्यस्तस्यविवाहार्थंस्नानमाह।गुरवेतुवरंदत्त्वास्नायीततदनु

पित्रा यच्छते ९

मि ८

तूया। वेदव्रतानि वा पारं नीत्वा ह्युभयमेव वा। पूर्वोक्तेन न्यायेन वेदं मंत्रब्राह्मणात्मकं व्रतानि ब्रह्मचारिधर्माननुक्रांता
न्वोभयं वा पारं नीत्वा समाप्य गुरवे पूर्वोक्ताय वरमभिलषितं यथाशक्ति दत्वा स्नायादशक्तो तदनुज्ञया दत्तवरोपि॥ ए
षां च पक्षाणां शक्तिकालाद्यपेक्षया व्यवस्था। स्नानानंतरं किं कुर्यादित्यत आह॥ अवि[illegible]तब्रह्मचर्यो लक्ष[illegible]ण्यां
स्त्रियमुद्वहेत्। अनन्यपूर्विकां कांतामसपिंडां यवीयसीं। अविप्लुतब्रह्मचर्यः स्खलितब्रह्मचर्यो लक्षण्यां बाह्याभ्यं पु
तरलक्षणैर्युक्तां। बाह्यानि तनुलोमकेशदशनादीनि मनुप्रोक्तानि। आभ्यंतराण्यष्टौ पिंडान्कृत्वेत्याश्वलायनोक्त
विधिना ज्ञातव्यानि॥ [illegible] पूर्वस्यां रात्रौ उर्वरागोध्वरवेदिकाकितवस्थानह्रदेरणक्षेत्रचतुष्पथश्मशानेभ्यो
मृत्तिकां गृहीत्वा पिंडाष्टकं कर्तव्यं तत्रानुक्रमेण प्रथमे पिंडे स्पृष्टे धान्यवती भवतीति द्वितीये स्पृष्टे पशुमती भव
वे ती। तृतीये अग्निहोत्रशुश्रूषणपरा भवती। चतुर्थे वि[illegible]नी [illegible] चतुरा सर्वजनार्जनपरा भवति। पंचमे रो
गिणी षष्ठे वंध्या सप्तमे व्यभिचारिणी। अष्टमे विधवा भवेत्यादित्याश्वलायनस्मरणात्। स्त्रियं नपुंसकत्वनिवृत्तये।
स्त्रीत्वेन परीक्षितां। अनन्यपूर्विकां दानेनोपभोगेन वा पुरुषांतरापरिगृहीतां। कांतां कमनीयां वोढुर्मनोनयना
नंददायिनीं। यस्यां मनश्चक्षुषोर्निबंधस्तस्यामृद्धिरित्यापस्तंबस्मरणात्। एतच्चान्यूनाधिकांगादिवाक्यदोषाभावे।
असपिंडां। समानः एकः पिंडो देहो यस्याः सा सपिंडा। न सपिंडा असपिंडा तां। सपिंडता चैकशरीरावयवान्वये ८

न भवति। तथाहि पुत्रस्य पितृशरीरावयवान्वयेन पित्रा सह एवं पितामहादिभिरपि पितृद्वारेण तच्छरीरावयवान्वया
त्। एवं मातृशरीरावयवान्वयेन मात्रा। तथा मातामहादिभिरपि मातृद्वारेण। तथा मातृष्वसृमातुलादिभिरप्येक
शरीरावयवान्वयात्। तथा पितृव्यपितृष्वस्रादिभिरपि॥ तथा पत्न्या सह पत्न्या एकशरीरारंभकतया॥ एवं भ्रा
तृभार्याणामपि परस्परमेकशरीरारब्धैः सहैकशरीरारंभकत्वेन। एवं यत्र यत्र सपिंडशब्दः तत्र तत्र साक्षात्परंप
रया वा एकशरीरावयवान्वयो वेदितव्यः। यद्येवं मातामहानामपि दशाहं शावमाशौचं सपिंडेषु विधीयत इति दी
परिणीता अविशेषेण प्राप्नोति॥ स्यादेतत् यदि तत्र प्रत्तानामितरे कुर्युरित्यादि विशेषवचनं न स्यात् तस्य सपिंडेषु यत्र वि
शेषवचनं नास्ति तत्र दशाहमित्येतद्वचनं भवतीत्युच्यते। अवश्यं चैकशरीरावयवान्वयेन साविंडं वर्णनीयं। आ
त्मा हि जज्ञे आत्मनः इत्यादिश्रुतेः तथा प्रजामनु प्रजायसे इति च। स एवायं विरूढप्रत्यक्षेणोपलभ्यत इति
आपस्तंबवचनाच्च। तथा गर्भोपनिषदि। एतत्षाट्कोशिकं शरीरं त्रीणि पितृतः त्रीणि मातृतः अस्थिस्नायुमज्जा
नः पितृतस्त्वङ्मांसरुधिराणि मातृत इति। नन्वत्रावयवान्वयप्रतिपादनात्। निर्वाप्यपिंडान्वयेन तु सापिंड्ये
मातृसंताने भ्रातृपितृव्यादिषु च सापिंड्यं न स्यात्। समुदायशक्त्यंगीकारेण रूढिपरिग्रहे अवयवशक्तिस्तत्र
तत्रावगम्यमाना परित्यक्ता स्यात्। परंपरयैकशरीरावयवान्वयेन सापिंड्ये यथातिप्रसंगस्तथा वक्ष्यामः। य

पितृसपिंडोऽथः [illegible] सपिंडाः दशाहं पंचमात्सप्तमाद्ध्वं [illegible]

गोत्रस्याप्यात्मवंशयोः।　　　　त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥ ७

मि. ९ वीयसीं वयसा प्रमाणतश्च न्यूनां उद्वहेत्। परिणयेत् स्वगृह्योक्तविधिना। विशेषांतरमाह। अरोगिणीं भ्रातृमतीमसमा
नार्षगोत्रजां। अरोगिणीमाचिकित्स्यमहाव्याध्यनुपसृष्टां। भ्रातृमतीं पुत्रिकाकरणशंकानिवृत्तये अनेनापरि
भाषिताऽपि पुत्रिका भवतीति गम्यते। असमानार्षगोत्रजां। ऋषेरिदमार्षं नाम प्रवर इत्यर्थः। गोत्रं वंशपरंपराप्रसि
द्धं। आर्षं च गोत्रं च आर्षगोत्रे समाने आर्षगोत्रे यस्यासौ समानार्षगोत्रस्तस्माज्जाता समानार्षगोत्रजा न समाना
र्षगोत्रजा असमानार्षगोत्रजा तां। गोत्रप्रवरौ च पृथक् पृथक् पर्युदासे निमित्तं। तेन समानार्षजाम् समानगोत्रजा
मिति। तथा चासमानप्रवरैर्विवाह इति गौतमः। तथा असपिंडा च या मातुरसगोत्रा च या पितुरिति मनुः। तथा मा
८ तृगोत्रामप्यपरिणेयां केचिदिच्छंति। मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च। समानप्रवरां चैव त्यक्त्वा चांद्रायणं च
रेदिति प्रायश्चित्तस्मरणात्। अत्र चासपिंडामित्यनेन पितृव्यस्मातृष्वस्रादिदुहितृनिषेधः। तथा असगोत्रामि
प्रायायाः त्यनेन असपिंडा या अपि भिन्नसंतानजायाः समानगोत्राया निषेधः। असमानप्रवरामित्यनेनापि असपिंडाया स
असगोत्राया अपि समानप्रवराया निषेधः। तथा असपिंडामित्येतत् सार्ववर्णिकं सर्वत्र सापिंड्यसद्भावात्॥ अ
समानार्षगोत्रजामित्येतत् त्रैवर्णिकविषयं। यद्यपि राजन्यविशां प्रातिस्विकगोत्राभावात् प्रवराभावः तथापि पुरो
हितगोत्रप्रवरौ वेदितव्यौ। तथा च यजमानस्यार्षेयान्प्रवृणीतेत्युक्त्वा पौरोहित्यान्राजन्यविशां प्रवृणीतेत्या

पितृव्यदत्तकस्यकंन्याप्रि　असगोत्रा च या पितुरित्यनेन दत्तकस्य बीजगोत्रात्तन्न यास हि विवाहो नोचितः॥
हेतुर्गर्भ[illegible]

दत्तकस्यापि[illegible]गोत्रसंबंधाभावात्

तथा च मातरमारभ्य तत्पितृपितामहादिगणनायां पंचमसंतानवर्तिनी मातृतः पंचमी सुपरवर्तिनी। एवं पितरमारभ्य तत्पित्रादिगणनायां सप्तमपुरुषसंतानवर्तिनी पितृतः सप्तमीति। तथा च भ
गिन्यो भगिनीनां भ्रातरो भ्रातृपुत्री पितृव्ययोः। विवाहे प्याद्भिन्नतन्त्वाभेदो गम्यते।

ह्याश्वलायनः सपिंडासु समानगोत्रासु समानप्रवरासु भार्यात्वमेव नोत्पद्यते रोगिण्यादिषु च भार्यात्वे उत्पन्ने परित्य
विरोधएव। असपिंडामित्यत्र एकशरीरावयवद्वारेण साक्षात्पारंपर्येण वा सापिंड्यमुक्तं तच्च सर्वत्र सर्वस्य यथाकथं
चिदनादौ संसारे संभवतीत्यतिप्रसंग इत्यत आह। पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा॥ मातृतः मातुः संताने पं
चमादूर्ध्वं पितृतः पितुः संताने सप्तमादूर्ध्वं॥ सापिंड्यं निवर्त्तत इति शेषः। अतश्चायं सपिंडशब्दो अवयवशक्त्या वर्त
१० मानोऽपि निर्मंथ्य पंकजादिशब्दवन्नियत एव। तथा च पित्रादयः षट् सपिंडाः पुत्रादयश्च षट् आत्मा च सप्तमः संतान विषय
भेदेऽपि यतः संतानभेदस्तमारभ्य गणयेद्यावत्सप्तम इति सर्वत्र योजनीयं यद्यपि वसिष्ठेनोक्तं पंचमीं सप्तमीं चै
व मातृतः पितृतस्तथेति। त्रीनतीत्य मातृतः पंचातीत्य पितृत इति चपैठीनसिनानतदप्यवाङ्निषेधार्थं न पुनस्तत्स्ना
त्यर्थमिति सर्वस्मृतीनामविरोधः। एतच्च समानजातीयेष्वविज्ञानीयेतु विशेषः यथाह शंखः यद्येकजा
ता बहवः पृथक्क्षेत्राः पृथग्जनाः एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्तते त्रिषु। एकस्माद्ब्राह्मणादेर्जाताः
पृथक्क्षेत्रा भिन्नजातीयासु स्त्रीषु जाताः पृथग्जनाः समानजातीयासु भिन्नासु स्त्रीषु जातास्ते एकपिंडाः
सपिंडाः किंतु पृथक्शौचाः पृथक्शौचमाशौचप्रकरणे वक्ष्यामः पिंडस्त्वावर्तते त्रिषु त्रिपुरुषमेव सापिंड्य
मिति। दशपूरुषविख्यातात् श्रोत्रियाणां महाकुलात्। पुरुषत्वात् पूरुषः दशभिः पुरुषैर्मातृतः पंचभिः पितृतः

मि·
१०

पंचभिर्विख्यातं यत्कुलं तस्मात् श्रोत्रियाणामधीतवेदानां अध्ययनमुपलक्षणं श्रुताध्ययनसंपन्नानां महत्त्व
न्तु कुलं च महाकुलं पुत्रपौत्रपशुदासीग्रामादिसमृद्धं तस्मात्कन्या आहर्तव्येति नियम्यते। एवं सर्वतः प्राप्तो
स्त्वामपवादमाह। स्फीतादपि न संचारिरोगदोषसमन्वितात्। संचारिणो रोगाः कुष्ठापस्मारप्रभृतयः शुक्र
शोणितद्वारेणानुप्रविशन्तो दोषाः पुनर्हीनक्रियानिष्पुरुषत्वादयो दोषाः मनुनोक्ताः॥ एतैः समन्वितात्स्फीता
दपि पूर्वोक्तान्महाकुलादपि नाहर्तव्या। एवं कन्याग्रहणे नियममुक्त्वा कन्यादाने वरनियममाह। एतैरेव गुणै
र्युक्तः सवर्णः श्रोत्रियो वरः। यत्नात्परीक्षितः पुंस्त्वे युवा धीमान् जनप्रियः॥ एतैरेव पूर्वोक्तैर्गुणैर्युक्तो दोषैश्च वर्जि
तो वरो भवति। तस्यायमपरो विशेषः सवर्ण उत्कृष्टो वा न हीनवर्णः स्वयं च श्रुताध्ययनसंपन्नः यत्नात्पुंस्त्वे परी
क्षितः परीक्षोपायश्च नारदेन दर्शितः। यस्याप्सु प्लवते बीजं ह्लादि मूत्रं च फेनिलं। पुमान्स्याल्लक्षणैरेतैर्विपरीतस्तु
षंढकः इति। युवा तरुणः धीमान् लौकिकवैदिकव्यवहारेषु निपुणमतिः जनप्रियः स्मितमृदुपूर्वाभिभाषणादि
भिरनुरक्तजनः इति पुत्रधर्मार्थत्वेन विवाहस्त्रिविधः तत्र पुत्रार्थो द्विविधो नित्यः काम्यश्च तत्र नित्ये प्रजार्थे सव
र्णः श्रोत्रियो वर इत्यनेन सवर्णा मुख्या दर्शिता इदानीं काम्ये नित्यसंयोगे चानुकल्पो वक्तव्य इत्यत आह। यदुच्य १·
ते द्विजातीनां शूद्रादारोपसंग्रहः। नैतन्मम मतं यस्मात्तत्रायं जायते स्वयं। यदुच्यते कामतस्तु प्रवृत्तानामिमाः स्युः

श्रोत्रियः।५

संतानार्थी नातु

धर्मार्थविवाह

क्रमशो वरा इत्युपक्रम्य ब्राह्मणस्य चतस्रो भार्याः क्षत्रियस्य तिस्रो वैश्यस्य द्वे इति द्विजातीनां शूद्रावेदनमिति तेन
याज्ञवल्क्यस्य मतं यस्मादयं द्विजातिस्तत्र स्वयं जायते। तज्जाया जाया भवति यदस्यां जायते पुनरिति श्रुतेः अ
त्र च तत्रायं जायत इत्यस्य यमिति निर्देशं तु वदता नैत्यकपुत्रोत्पादनाय काम्यपुत्रोत्पादनाय वा प्रवृत्तस्य शूद्रापरिण
यननिषेधं कुर्वता नैत्यकपुत्रोत्पादनानुकल्पे काम्ये च पुत्रोत्पादने ब्राह्मणस्य क्षत्रियवैश्ये क्षत्रियस्य च वैश्या
भ्यनुज्ञाता भवति। इदानीं रतिकामस्योत्पन्नपुत्रस्य वा विनष्टभार्यस्याश्रमान्तरानधिकारिणो गृहस्थाश्रमावस्था
मात्राभिकांक्षिणः परिणयनक्रममाह। तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमं। ब्राह्मणक्षत्रियविशां भा
र्याः स्वा शूद्रजन्मनः॥ वर्णक्रमेण ब्राह्मणस्य तिस्रः क्षत्रियस्य द्वे वैश्यस्यैका शूद्रस्य स्वैव भार्या भवति सवर्णा
पुनः सर्वेषां मुख्या स्थितैव। पूर्वस्याः पूर्वस्या अभावे उत्तरोत्तरा भवति। अयमेव क्रमो नैत्यकानुकल्पे का
म्ये च पुत्रोत्पादनविधौ अतश्च यच्छूद्रापुत्रस्य पुत्रमध्ये परिगणनं विभागसंकीर्तनं च। तथा विप्रान्मूर्द्धाव
विवाहितस्य सिक्तो हीत्युपक्रम्य विन्नास्वेष विधिः स्मृत इति चेत् तत्कामतः स्यात्समानाभिकांक्षिणो वानान्तरीयकतयो
त्पन्नस्य। विवाहो नाहो ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता। तज्जः पुनात्युभयतः पुरुषानेकविंशतिं।
स ब्राह्माभिधानो विवाहः यस्मिन्नुक्तलक्षणाय वराय आहूय यथाशक्त्यलंकृता कन्या दीयते उदकपूर्वं तस्यां

तत

उभयतः मायासपुत्रस्य

चतुरो ब्राह्मणस्याद्याः प्रशस्ताः कवयो विदुः॥ राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः॥ इति। अविशेषं द्वाकयोर्थे वेनशंकितः। कन्याप्रदाने [illegible] द्यादासुं धर्म उच्यते॥

मि· ११ जातः पुत्र उभयतः पित्रादीन्दश पुत्रादीन्दश आत्मानं चैकविंशतिं पुनाति सहधर्मेण। यज्ञस्थ ऋत्विजे दैव आदायार्ष
स्तु गोद्वयं। चतुर्दश प्रथमजः पुनात्युत्तरजश्च षट्। स दैवो विवाहः यस्मिन्यज्ञानुष्ठाने वितते ऋत्विजे शक्त्यलंकृत्य कन्या दीय
ते। यत्र पुनर्गोमिथुनमादाय कन्या दीयते स आर्षः। प्रथमजो दैवविवाहजः चतुर्दश पुनाति सप्तावरान्सप्त परान्।
उत्तरज आर्षविवाहजः षट् पुनाति त्रीन्पूर्वांस्त्रीन परान्। इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने। स कायः पावयेत्त
ज्जः षट् षड्वंश्यान्सहात्मना॥ सह धर्मं चरतामिति परिभाष्य कन्यादानं स प्राजापत्यः। तज्जः षट् पूर्वान्षट् परान् आ
त्मना सह इत्येवं त्रयोदश पुनाति। आसुरो द्रविणादानात् गांधर्वः समयान्मिथः। राक्षसो युद्धहरणात्पैशाचः कन्यका
छलात्। आसुरः पुनर्द्रविणादानात्। गांधर्वस्तु परस्परानुरागेण भवति। राक्षसो युद्धेनापहरणात्। पैशाचस्तु कन्य
काछलात् छलेन स्वापाद्यवस्थायामपहरणात्। सवर्णादिपरिणयने विशेषमाह॥ पाणिर्ग्राह्यः सवर्णासु गृह्णीया
त्क्षत्रिया शरं॥ वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः॥ सवर्णासु विवाहेषु स्वोक्तविधिना पाणिरेव ग्राह्यः। क्षत्रि
यकन्या तु शरं गृह्णीयाद्वैश्या प्रतोदमादद्यादुत्कृष्टवेदने। शूद्रा पुनर्वसनदशां। यथाह मनुः वसनस्य दशा ग्राह्या
शूद्रयोत्कृष्टवेदने इति। दातृक्रममाह। पिता पितामहो भ्राता सकुल्यो जननी तथा। कन्याप्रदः पूर्वनाशे प्रकृति
स्थः परः परः॥ अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ। गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरं। एतेषां पित्रादी ११

नां पूर्वपूर्वस्याभावे परः परः कन्याप्रदः प्रकृतिस्थश्चेद्युन्मादादिदोषवान्न भवति। अतो यस्याधिकारः सोऽप्रयच्छन् भ्रू
णहत्यामृतावृतावाप्नोति॥ एतच्चोक्तलक्षणवरसंभवे वेदितव्यं। यदा पुनर्दातॄणामभावस्तदा कन्यैव गम्यं गमनार्हमुक्त
लक्षणं स्वयमेव वरयेत्। सकृत्प्रदीयते कन्या हरंस्तां चोरदंडभाक्। सकृदेव कन्या प्रदीयत इति शास्त्रनियमः। अतस्तां द
त्वा अपहरन्कन्यां चोरवद्दंड्यः एवं सर्वत्र निषेधे प्राप्तेऽपवादमाह। दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत्। पूर्व
स्माद्वराच्छ्रेयान्विद्याभिजनाद्यतिशययुक्तो वर आगच्छति पूर्वस्य च पातकयोगो दुर्वृत्तत्वं वा तदा दत्तामपि हरेदेतच्च स
प्तमपदात्प्राक् द्रष्टव्यं॥ अनाख्याय ददद्दोषं दंड्य उत्तमसाहसं। अदुष्टां च त्यजन्दंड्यो दूषयंस्तु मृषा शतं। यः पुनश्चक्षुर्ग्रा
ह्यं दोषमनाख्याय कन्यां प्रयच्छति असौ उत्तमसाहसं दंड्यः उत्तमसाहसं वक्ष्यति। अदुष्टां तु प्रतिगृह्य त्यजन्नुत्तमसाह
समेव दंड्यः। यः पुनर्विवाहात्प्रागेव द्वेषादिना असद्भिर्दोषैः कन्यां दीर्घरोगादिभिर्दूषयति स पणानां वक्ष्यमाणलक्षणा
नां शतं दंड्यः। अनन्यपूर्विकामित्यत्रानन्यपूर्वा परिणेयोक्ता तत्रान्यपूर्वा कीदृशीत्याह। अक्षता च क्षता चैव पुनर्भूः सं
स्कृता पुनः। स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत्। अन्यपूर्वा द्विविधा पुनर्भूः स्वैरिणी चेति। पुनर्भूरपि द्विविधा
क्षताक्षता च। तत्र क्षता संस्कारात्प्रागेव पुरुषसंबंधदूषिता। अक्षता पुनः संस्कारदूषिता॥ या पुनः कौमारं पतिं त्य
क्त्वा कामतः सवर्णमाश्रयति सा स्वैरिणीति। एवं सर्वप्रकारेणान्यपूर्वापर्युदासे प्राप्ते विशेषमाह। अपुत्रां गुर्वनुज्ञा

तोदेवरःपुत्रकाम्यया।सपिंडोवासगोत्रोवाघृताभ्यक्तऋतावियात्॥आगर्भसंभवाद्गच्छेत्पतितस्त्वन्यथाभवेत्।अनेन
विधिनाजातःक्षेत्रजोस्यभवेत्सुतः॥अपुत्रामल्पपुत्रांपित्रादिभिःपुत्रार्थमनुज्ञातोदेवरोभर्तुःकनीयान्भ्रातासपिं
डोवाउक्तलक्षणःसगोत्रोवाएतेषांपूर्वस्यपूर्वस्याभावेपरःपरोघृताभ्यक्तसर्वांगःऋतौवक्ष्यमाणलक्षणेइयाद्गच्छेत्।
आगर्भोत्पत्तेःऊर्ध्वंपुनर्गच्छन्नन्येनवाप्रकारेणपतितोभवतिअनेनविधिनोत्पन्नःपूर्वपरिणेतुःक्षेत्रजःपुत्रो
भवेत्।एतच्चवाग्दत्ताविषयमित्याचार्यः॥यस्याम्रियेतकन्यायावाचासत्येकृतेपतिः॥तामनेनविधानेननिजोविंदे
तदेवरइतिमनुस्मरणात्।व्यभिचारिणींप्रत्याह।हृताधिकारांमलिनांपिंडमात्रोपजीविनीं।परिभूतामधःशय्यां
वासयेद्व्यभिचारिणीं।याव्यभिचरतितांहृताधिकारांभृत्यभरणाद्यधिकाररहितांमलिनांअंजनाभ्यंजनशुभ्रवस्त्रा
भरणशून्यांप्राणयात्रामात्र भोजनां॥धिक्कारादिभिःपरिभूतांभूतलशायनींस्ववेश्मन्येववासयेत्॥वैराग्यजन
नार्थंनपुनःशुद्ध्यर्थं।यस्तुसःपरदारेषुनचैनांरमेद्घृतमितिपृथक्प्रायश्चित्तोपदेशात्।तस्याअल्पप्रायश्चित्तार्थ
मर्थवादमाह।सोमःशौचंददौस्त्रीणांगंधर्वश्चशुभांगिरं॥पावकःसर्वमेध्यत्वंमेध्यावैयोषितोह्यतः॥परिणयना
त्पूर्वंसोमगंधर्ववन्हयःस्त्रियोभुक्त्वायथाक्रमंतासांशौचमधुरवचनसर्वमेध्यत्वानिदत्तवंतःतस्मात्स्त्रियःस
र्वत्रस्पर्शनालिंगनादिषुमेध्याःशुद्धाःस्मृताःनचतस्यास्पर्शेदोषोनास्तीत्याशंकनीयमित्याह।व्यभिचाराद्दतौशु १२

या

द्धिर्गर्भेत्यागोविधीयते।गर्भभर्तृवधादौचतथामहतिपातके।अप्रकाशितान्मनोव्यभिचारात्पुरुषांतरसंभोगसंक
ल्पाद्यदपुण्यंतस्यऋतौरजोदर्शनेनशुद्धिःशूद्रकृतेतुगर्भेत्यागः॥ब्राह्मणक्षत्रियविशांभार्याःशूद्रेणसंगताः॥अ
प्रजाःताविशुद्ध्यंतिप्रायश्चित्तेननेतराइति।तथागर्भवधेभर्तृवधेमहापातकेचब्रह्महत्यादावादिग्रहणाच्छिष्या
दिगमनेचत्यागः॥चतस्रस्तुपरित्याज्याःशिष्यगागुरुगातुया।पतिघ्नीचविशेषेणजुंगितोपगताचयेतिव्या
सस्मरणात्।जुंगितःप्रतिलोमजःचर्मकारादिःत्यागश्चोपभोगधर्मकार्ययोर्नतुनिष्कासनंगृहात्तस्याः॥निरुं
ध्यादेकवेश्मनीतिनियमात्।द्वितीयपरिणयनेहेतुमाह।सुरापीव्याधिताधूर्ताबंध्यार्थघ्न्यप्रियंवदा।स्त्रीप्रसू
श्चाधिवेत्तव्यापुरुषद्वेषिणीतथा।सुरांपिबतीतिसुरापीशूद्रापि।पतत्यर्द्धंशरीरस्ययस्यभार्यासुरांपिबेदितिसा
मान्येनप्रतिषेधात्॥व्याधितादीर्घरोगग्रस्ता।धूर्ताविसंवादिनी॥वंध्यानिष्फला।अर्थघ्नीअर्थनाशिनी॥अप्रि
यंवदानिष्ठुरभाषिणी।स्त्रीप्रसूःस्त्रीजननी।पुरुषद्वेषिणीसर्वत्राहितकारिणीअधिवेत्तव्येतिप्रत्येकमभिसं
बध्यते।अधिवेदनंभार्यांतरपरिग्रहः।किंच।अधिविन्नातुभर्तव्यामहदेनोन्यथाभवेत्।यत्रानुकूल्यंदंपत्यो
स्त्रिवर्गस्तत्रवर्द्धते।साऽधिविन्नापूर्ववदेवदानमानसत्कारैर्भर्तव्या।अन्यथाअभरणेमहदपुण्यंवक्ष्यमा
णोदंडश्च।नचभरणेसतिकेवलापुण्यपरिहारःयतोयत्रदंपत्योरानुकूल्यंचित्तैक्यंतत्रधर्मार्थकामानांप्र

मि· १३

तिरिनमभिरद्धिःस्त्रियंप्रत्याह। मृतेजीवतिवापत्यौयानान्यमुपगच्छति सेहकीर्तिमवाप्नोतिमोदतेचोमयासह॥
भर्तरिजीवतिमृतेवायाचापत्यादन्यंपुरुषंनैवोपगच्छतिसेहलोकेविपुलांकीर्तिमवाप्नोतिउमयाचसहमोदतेनाकेउत्ति
पुण्यप्रभावात्। अधिवेदनकारणाभावेअधिवेत्तारंप्रत्याह। आज्ञासंपादिनींदक्षांवीरसूंप्रियवादिनीं। त्यजन्दाप्य
स्तृतीयांशमद्रव्योभरणंस्त्रियाः॥ आज्ञासंपादिनीं०दक्षांशीघ्रकारिणींवीरसूंपुत्रवतींप्रियवादिनींमधुरभाषि
णींपरित्यजन्नधिविंदन्नितिराज्ञास्वधनस्यतृतीयांशंदाप्यः। निर्धनस्तुभरणंग्रासाच्छादनादिभिर्दाप्यः। स्त्रीधर्मम
ह॥ स्त्रीभिर्भर्तृवचःकार्यमेषधर्मःपरःस्त्रियाः॥ आशुद्धेःसंप्रतीक्ष्योहिमहापातकदूषितः॥ स्त्रीभिःसदाभर्तृवचनं
कार्यं। यस्मादयमेवपरउत्कृष्टःस्त्रीणांस्वर्गादिहेतुत्वात्। यदातुमहापातकादिदूषितःतदाआशुद्धेःसंप्रतीक्ष्योन
तत्पारतंत्र्यं। उत्तरकालेतुपूर्ववदेवपारतंत्र्यं। शास्त्रीयदारसंग्रहस्यफलमाह। लोकानंत्यंदिवःप्राप्तिःपुत्रपौत्रप्र
पौत्रकैः॥ यस्मात्तस्मात्स्त्रियःसेव्याःकर्तव्याश्चसुरक्षिताः॥ लोकेआनंत्यंवंशस्याविच्छेदः लोकानंत्यंदिवःप्राप्तिश्चदार
संग्रहस्यप्रयोजनंकथमित्याह। पुत्रपौत्रप्रपौत्रकैःलोकानंत्यंअग्निहोत्रादिभिश्चस्वर्गप्राप्तिरित्यन्वयः यस्मा
त्स्त्रीभ्यएतद्द्वयंभवतितस्मात्स्त्रियःसेव्याःउपभोग्याःप्रजार्थं। रक्षितव्याश्चधर्मार्थं॥ तथाचापस्तंबेनधर्मप्रजा
संपत्तिःप्रयोजनंदारसंग्रहस्योक्तं। धर्मप्रजासंपन्नेदारेनान्यांकुर्वीतितिवदतारतिफलंतुलौकिकमेव। पुत्रोत्प १३

DR. BHAU DAJI MEMORIAL

त्यर्थंस्त्रियःसेव्याइत्युक्तंतत्रविशेषमाह। षोडशर्तुनिशाःस्त्रीणांतस्मिन्युग्मासुसंविशेत्। ब्रह्मचार्येवपर्वाण्याद्याश्चत
स्रस्तुवर्जयेत्॥ स्त्रीणांगर्भधारणयोग्यावस्थोपलक्षितःकालऋतुःसचरजोदर्शनदिवसादारभ्यषोडशाहोरा
त्रास्तिअतस्तस्मिन्नृतौयुग्मासुसमासुरात्रिषुरात्रिग्रहणाद्दिवसप्रतिषेधःसंविशेद्गच्छेत्पुत्रार्थी। युग्मास्विति
बहुवचनंसमुच्चयार्थं। अतश्चैकस्मिन्नपिऋतौअप्रतिषिद्धासुयुग्मासुसर्वासुरात्रिषुगच्छेत्। एवंगच्छन्ब्रह्मचा
र्येवभवतिअतोयत्रब्रह्मचर्यंश्राद्धादिषुचोदितंतत्रगच्छतोपितद्ब्रह्मचर्यस्खलनदोषोस्ति। किंचपर्वाण्याद्याश्चत
स्रश्चवर्जयेत्। पर्वाणीतिबहुवचनादाद्यर्थावगमात्अष्टमीचतुर्दश्योर्ग्रहणं। यथाहमनुःअमावास्यामष्टमीं
चपौर्णमासींचतुर्दशीं। ब्रह्मचारीभवेन्नित्यमप्यृतौस्नातकोद्विजइति। अतोमावास्यादिनिरजोदर्शनादारभ्यच
तस्रोरात्रीश्चवर्जयेत्। किंच। एवंगच्छन्स्त्रियंक्षामांमघांमूलंचवर्जयेत्। सुस्थइंदौसकृत्पुत्रंलक्षण्यंजनयेत्पु
मान्॥ एवमुक्तेनप्रकारेणस्त्रियंक्षामांगच्छेत्। क्षामत्वंचतस्मिन्कालेरजस्वलाव्रतेनैवभवति॥ अथवानेननभ
वतितदाक्षामताकर्तव्यापुत्रोत्पत्त्यर्थंअस्याःस्निग्धभोजनादिना। पुमान्पुंसोधिकेशुक्रेस्त्रीभवत्यधिकेस्त्रि
याइतिवचनात्। यदायुग्मायामपिरात्रौशोणिताधिक्यंतदास्त्रीएवभवतिपरंपुरुषाकृतिः अयुग्मायाम
पिशुक्राधिक्येपुमानेवभवतिस्त्र्याकृतिःकालस्यनिमित्तत्वात्। शुक्रशोणितयोश्चोपादानकारणत्वेनप्राब

५ ऋतुः प्राप्तोस्य ऋत्वियं पुष्पं॥ समयस्तदस्य प्राप्तमित्यधिकारे छंदसि घस् इति घस्॥ ऋतोरण् इत्यतो ऋतोरित्यनुवर्तते ५

मि. १४ स्यानस्माल्लामा कर्तव्या। मघामूलनक्षत्रे वर्जयेत्। चंद्रे चैकादशादिषु भस्थानगते। चकारात् पुन्नक्षत्रेषु भयो
गलग्नादिसपतौ सकृदेकस्यां रात्रौ। न द्विस्त्रिर्वा। तनोलक्षणेर्युक्तं पुत्रं जनयति पुमान् प्रतिष्ठितं पुंस्त्वं॥ एवम
तोनियममुक्त्वेदानीमनृतोनियममाह। यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्। स्वदारनिरतश्चैव स्त्रि
योरक्ष्याः यतः स्मृताः॥ भार्यायाः ऋतावनतिक्रमेण प्रवृत्तिरन्यत्र स्त्रीनिषेधाकामी भवेत्। वा शब्दो नियमांतरपरिग्रहार्थ य४
श्च पूर्वनियमनिवृत्त्यर्थः स्त्रीणां वरमिंद्रदत्तमनुस्मरन्। यथाता अब्रुवन् वरं वृणीमहे ऋत्वियात् प्रजां विंदा
मिथुनीभवाम महै कामम आविजनितोः संभवामेति तस्मादृत्वियात् स्त्रियः प्रजां विंदंते कामम आविजनितोः संभवंतिव रेरतं आप्रसूतिं ७
स्यासामिति। अपि च। स्वदारे चैव निरतः रतः तन्मनस्को भवेदित्यनुषज्यते एवकारेण स्त्र्यंतरगमनं निवर्त
यति॥ प्रायश्चित्तस्मरणात्। उभयत्रापि दृष्टं प्रयोजनमाह। स्त्रियो रक्ष्या यतः स्मृताः इति यस्मात् स्त्रियो रक्ष्या
स्मृताः उक्ताः कर्तव्याश्च सुरक्षिता इति तत्र सुरक्षणं यथाकामित्वेन स्त्र्यंतरगमने च भवति॰ अत्राह। तस्मि
न्नृत्ये सुसंविज्ञेति किमयं अपूर्वविधिर्नियमः परिसंख्या वा उच्यते तेन तावद्विधिः प्राप्तार्थत्वात्। नापि प
रिसंख्या दोषत्रयसमासक्तेः अतो नियमं प्रतिपेदिरे न्यायविदः। कः पुनरेषां भेदः विधिरत्यंतमप्राप्तो नि
यमः पाक्षिके सति। तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते। अत्यंताप्राप्त • प्रापणं विधिः यथाग्निहो १४

त्रं जुहुयादित्यकाः कर्तव्या इति प्रसक्तस्य अप्राप्त पक्षांतरप्रापणं नियमः॥ यथा समे यजेतेति। दर्शपौर्णमासाभ्यां यजे
तेति यागः कर्तव्यतया विहितः स च देशमंतरेण कर्तुमशक्य इत्यर्थाद्देशः प्राप्तः॥ स च समो विषमश्चेति द्विविधा॥ यदा
यजमानः समे विषमे ते तदा समे यजेतेति शब्दवचनमुदासीनार्थस्य प्राप्तत्वान्न यदा नु विषमे देशे प्रवृत्तेन तदा समे यजे
तेति स्वार्थविधत्ते स्वार्थस्य तदानीमप्राप्तत्वात् विषमदेशनिवृत्तिश्चार्थात्॥ स्वार्थबोधितदेशोपादानेनैव यागानुष्ठानसि समः
तदे द्धेरचोदिशोपादानेन यथाशास्त्रं यागो नानुष्ठितः स्यात् तथा प्राङ्मुखोन्नानि भुंजीतेति इदमपि स्मार्तमुदाहरणं पूर्वेण
व्याख्यातं। एकस्यानेकत्र प्राप्तस्यान्यतो निवृत्त्यर्थमेकत्र पुनर्वचनं परिसंख्या॥ यथा इमामगृभ्णन् रशनामृतस्येत्यश्वा
भिधानीमादत्त इत्यत्र मंत्रः स्वसामर्थ्यादश्वाभिधान्या गर्दभाभिधान्याश्च रशनयोर्ग्रहणे नियुक्तः पुनरश्वाभिधानीमाद
त्त इति वचनेनाश्वाभिधान्यां विनियुज्यमानो गर्दभाभिधान्या विनिवर्तते। तथा पंच पंचनखा भक्ष्या इति अत्र हि यदृच्छ
याश्वादिषु शशादिषु च भक्षणे प्राप्ते पुनः शशादिषु श्रूयमाणं श्वादिभ्यो निवर्तते॥ किं पुनरत्र युक्तं परिसंख्येत्याह। तथा
हि कृतदारसंग्रहस्य स्वेच्छयैव तद्गमनं प्राप्तमिति न विधेरयं विषयः॥ नापि नियमस्य गत्यंतरमिति विरोधात्। एवं हि
स्मरंति गत्युकाः॥ दारसंग्रहानंतरं त्रिरात्रं द्वादशरात्रं संवत्सरं वा ब्रह्मचारी स्यादिति॥ तत्र द्वादशरात्रात् संवत्स
राद्वा पूर्वमेव ऋतुसंभवे ऋतौ गच्छेदेवेति नियमात्॥ ब्रह्मचर्यव्रतां ध्येत अपि च। प्राप्ते भार्यार्थवचनं विशेषणपरं स्मु ऋतुदर्शे
स्मरणं

५ तथा। पंच पंचनखा भक्ष्या इति। अत्र हि यदृच्छया शशादिषु श्वादिषु च भक्षणं प्राप्तं पुनः शशादिषु श्रूयमाणं श्वा
दिभ्यो निवर्तत इति॥ ५

क्रमप्राप्तं चर्तौ भार्यागमनमिच्छयैवातो यदि गच्छेत्तदा वेदेनैव वचनव्यक्तिर्युक्ता। किंनैयमिकात्पुत्रोत्पत्तिविधेरेव ऋतौ च
गमनं नित्यप्राप्तमेवेति ऋतौ गच्छेदेवेति नियमोऽनर्थकः स्यात्। नियमे चादृष्टं कल्पनीयं। किंच ऋतौ गंतव्यमेवेति नि
यमे असंनिहितस्य व्याध्यादिनाऽसमर्थस्यानिच्छोऽप्याशक्योऽर्थ उपदिष्टः स्यात्। विध्यनुवादविरोधश्च नियमे॥ तथाहि
कः शब्दः सकृदुच्चरितस्तमेवार्थं पक्षे अनुवदति पक्षे विधत्ते चेति तस्मात्तदा वै गच्छेत्वान्यत्रेति परिसंख्यैव युक्ता। न हि
दं भागुरिविश्वरूपादयो नानुमन्यंते यतो नियम एव युक्तः। पक्षे स्वार्थविधिसंभवात्। अगमने दोषश्रवणाच्च॥ ऋतु पराशरः
स्नातां तु यो भार्यां संनिधौ नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशय इति न च विध्यनुवादविरोधः अनुवा
दाभावाद्विध्यर्थत्वात्तद्वचनस्य। तत्र हि विध्यनुवादविरोधोऽपत्रविधेयावधित्यानदेवानुवेदितव्यं॰ अप्राप्तत्वान्नो
देशेन विधातव्यं च॥ यथा वाजपेयाधिकरणपूर्वपक्षे वाजपेयेन स्वाराज्यकामो यजेतेति वाजपेयलक्षणगुणविधा
नावधित्वेन यागोऽनुवेदितव्यः स एव स्वाराज्यलक्षणफलोद्देशेन विधातव्यश्चेति। न चानुवादेनेदृक्त्वमस्ति। यत्तु नि
यमे त्वदृष्टकल्पनमित्युक्तं। तत्परिसंख्यायामपि समानं ऋतौ गच्छतो दोषकल्पनात्। यत्तु नैयमिकपुत्रोत्पादनवि
ध्याक्षेपेणैव ऋतौ नित्यगमनप्राप्तेर्न नियम इति। तदसत्। स एवापूर्वनैयमिकपुत्रोत्पादनविधिः स्यान्न तु ऋतौ गच्छन् १५
स्त्रियं क्षामां लक्षण्यं पुत्रं जनयेदिति स्त्र्यभिगमनातिरिक्तपुत्रोत्पादनविधिरिति। तत्र गमनकरणिका या भावना

स्मृतस्योपेक्षा नद्वैतं प्रसंगः

पा एव पुत्रोत्पत्तिकर्मतां दर्शयति एवं गच्छन् लक्षण्यं पुत्रं जनयेदित्यनेन यथाग्निहोत्रं जुहुयात् स्वर्गं भावयेदिति। न चा
संनिहितादेः शक्यार्थविधिप्रसंगः संनिहितशक्तयोरेवोपदेशात्। ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छतीति॥
ता यः स्वदारान् ऋतुस्नातान् स्वस्थः सन्नोपगच्छति इति विशेषोपादानात्॰ अनिच्छानिवृत्तिस्तु नियमविधानादेव न च वि
शेषणपरतापि पक्षे भावार्थविधिसंभवात्। नापि गत्यंतरस्मृतिविरोधः संवत्सरात्पूर्वमेव ऋतुदर्शने संविज्ञातोऽन
ब्रह्मचर्यस्खलनदोषो यावच्छ्राद्धादिषु तस्मात्स्वार्थहानिपरार्थकल्पनाप्राप्तबाधलक्षणदोषत्रयवती परिसं
ख्या न युक्ता। पंच पंचनखा भक्ष्या इत्यत्र यद्यपि शशादिषु भक्षणस्य पक्षे प्राप्ते नियमः श्वादिषु श्वादिषु च
प्राप्तेः परिसंख्यैव संभवः तथापि नियमपक्षे शशाद्यभक्षणे दोषप्रसंगः श्वादिभक्षणे वा दोषप्रसंगेन
प्रायश्चित्तविरोध इति परिसंख्यैवाश्रिता एतेन सायंप्रातर्द्विजातीनामशनं श्रुतिचोदितमित्यत्रापि निय
मो व्याख्यातो नांतरा भोजनं कुर्यादिति पुनरुक्तं स्यात्परिसंख्यायां। एवं च नियमे सत्यर्तावृतौ विनिवीप्सा
लभ्यते निमित्तावृत्तौ नैमित्तिकमप्यावर्तत इति न्यायात्। यथाकामी भवेदित्यपि नियम एव अनृतावपि स्त्री
यमभिरमयेदेवेति। ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जमित्येतदपि गौतमीयं सन्निधये नियमपरमेव। ऋ
देवा तावुपेयादनृतावपि स्त्रीकामनायां प्रतिषिद्धवर्जमुपेयादित्यर्थम् इति प्रसंगेन। किंच। भर्तृभ्रातृपितृज्ञाति

कामनायां सत्यां स्त्री २ स्वार्थहानिः। यथा श्रुते प्रतीयमाने स्वार्थे तात्पर्याभावात्स्वार्थहानिः।

मि· १६ श्वश्रूश्वशुरदेवरैः॥ बंधुभिश्च स्त्रियः पूज्याः भूषणाच्छादनाशनैः॥ भर्तृप्रभृतिभिः संमाननीयाः यस्मात्ताः पू
जिताः धर्मार्थकामान् संवर्द्धयंति तस्मात् पुनः समर्पितगृहव्यापारया किंभूतया भवितव्यमित्याह संय
तोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी॥ कुर्याच्छ्वशुरयोः पादवंदनं भर्तृतत्परा। संयतः स्वस्थाने निवेशितः उ
पस्करः गृहोपकरणवर्गो यया सा संयतोपस्करा यथोलूखलमुसलशूर्पादिः कंडनस्थाने दृषदुपलयोरवियोगेन
पेषणस्थाने इत्यादि। दक्षा गृहव्यापारकुशला। हृष्टा सदैव प्रहसितानना। व्ययपराङ्मुखी नव्ययशीला। आदि
ति सर्वत्र शेषः। किंच श्वशुरश्च श्वश्रूश्च श्वशुरौ श्वशुरः श्वश्र्वा इत्येकशेषः तयोः पादवंदनं नित्यं कुर्यात्। श्वशु
रग्रहणं मान्यान्तरोपलक्षणार्थं॥ भर्तृतत्परा भर्तृवशवर्तिनी सती पूर्वोक्तं कुर्यात्। भर्तृसन्निधावुक्तं। प्रोषिते
भर्तरि तया किं कर्तव्यमित्याह। क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनं। हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका
। देशांतरोपगतभर्तृका क्रीडां कंदुकादिभिः शरीरसंस्कारमुद्वर्तनादिभिः समाजो जनसमूहः उत्सवो विवाहा
दिस्तयोर्दर्शनं। हास्यं विस्रंभेण परगृहगमनं त्यजेदिति प्रसंगेन संबध्यते। किंच रक्षेत्कन्यां पिता विन्नां पतिः पुत्रा
स्तु वार्द्धके। अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क्वचित्स्त्रियः। पाणिग्रहणात्प्राक् पिता कन्यां अकार्यकरणाद्रक्षेत् १६
ऊढां भर्ता। तदभावे पुत्राः। तेषामुक्तानामभावे ज्ञातयो ज्ञातीनामभावे राजा। पक्षद्वयावसाने तु राजा भर्त्ता

न भजेत्स्त्रियाः इति वचनात्। अतः क्वचिदपि स्त्रीणां नैव स्वातंत्र्यं। किंच पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः ही
ना न स्याद्विना भर्त्रा गर्हणीयान्यथा भवेत्। भर्त्रा विना भर्तृरहिता पित्रादिरहिता न स्यात्। यस्मात्तद्रहिता गर्हणीया
निंद्या भवेत्। एतच्च ब्रह्मचर्यपक्षे भर्तरि प्रेते ब्रह्मचर्यं तदन्वारोहणं वेति विष्णुस्मरणात्। अन्वारोहणे महान
भ्युदयः तथा च व्यासः कपोतिकाख्यानव्याजेन दर्शितवान्। पतिव्रता संप्रदीप्तं प्रविवेश हुताशनं। तत्र चित्रांगद
धरं भर्तारं सान्वपद्यत। ततः स्वर्गगतः पक्षी भार्यया सह संगतः। कर्मणा पूजितस्तत्र रेमे च सह भार्ययेति। तथा च शं
खांगिरसौ। तिस्रः कोट्योर्द्धकोटी च यानि लोमानि मानुषे। तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छतीति प्रतिपाद्य
यो तपोरविंग दर्शयतः व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्। तद्वदुद्धृत्य सा नारी सह तेनैव मोदते। तत्र सा
भर्तृपरमा स्तूयमानाप्सरोगणैः। क्रीडते पतिना सा [illegible] यावदिंद्राश्चतुर्दशेति। तथा। ब्रह्मघ्नो वा कृतघ्नो वा मि
त्रघ्नो वा भवेत्पतिः। पुनात्यविधवा नारी तमादाय मृता तु या। तथा हारीतः। मृते भर्तरि या नारी समारोहेद्धुता
शनं। सारुंधती समाचारा स्वर्गलोके महीयते। यावच्चाग्नौ मृते पत्यौ स्त्री नात्मानं प्रदाहयेत्। तावन्न मुच्यते सा
हि स्त्रीशरीरात्कदाचनेति। हारीतोपि। मातृकं पैतृकं वा पि यत्र चैव प्रदीयते। कुलत्रयं पुनात्येषा भर्तारं यानु
गच्छतीति। तथा आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा। मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रतेति। अयं

२ अन्यासामेव नारीणां धर्मोयं परमः स्मृतः॥ इतरेषु तु वर्णेषु तपः परममुच्यते॥ जीवंती तद्धितं कुर्यान्मरणादात्मघातिनी॥

मि. १७ सर्वासां स्त्रीणां अगर्भिणीनामबालापत्यानामाचांडालं साधारणो धर्मः भर्तारं यानुगच्छतीत्यविशेषोपादानात् यत्
निवृत्तब्राह्मण्यनुगमननिषेधपराणि वाक्यानि। मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात्। या स्त्री ब्राह्मणजाती
प यामृतं तमनुव्रजेत् सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेदित्येवमादीनि तानि पृथक्चित्यधिरोहणविषया
णि। पृथक्चितिं समारुह्य न विप्रा गंतुमर्हति इति विशेषस्मरणात्॥ अनेन क्षत्रियादिस्त्रीणां पृथक्चि[illegible]त्यनु १प
गमनं गम्यते। यत्तु केश्चिदुक्तं। पुरुषाणामिव स्त्रीणामपि आत्महननस्य प्रतिषिद्धत्वात् अति प्रवृद्धस्वर्गाभिला
षायाः प्रतिषेधशास्त्रमतिक्रामंत्याः अयमनुगमनोपदेशः श्येनवत्। यथा तीव्रक्रोधाक्रांतस्वांतस्य प्रति
षेधशास्त्रमतिक्रामतः श्येनोपदेश इति। तदयुक्तं। श्येनावत्। श्येनकरणिकाया भावनाया भाव्यभूतहिंसा
यां विधिसंस्पर्शाभावेन प्रतिषेधसंस्पर्शात् फलद्वारेण श्येनस्यानर्थत्वं वर्णयंति तेषां मते हिंसाया एव स्वर्गा
र्थतया अनुगमनशास्त्रेण विधीयमानत्वात्। प्रतिषेधसंस्पर्शाभावात् अग्नीषोमीयवत्स्य धर्मेवानुगमनस्य
श्येनवैषम्यं। यत्तु मतं। हिंसा नाम मरणानुकूलो व्यापारः श्येनस्य परमरणानुकूलव्यापारत्वाद्धिंसैव। कामाधि
कारत्वकरणांशे रागतः प्रवृत्तिसंभवेन विधिविधेरप्रवर्तकत्वाद्रागप्रयुक्तहिंसारूपत्वाच्छ्येनः प्रतिषिद्ध
स्वरूपेणैवानर्थ इति न त्वाप्यनुगमनशास्त्रे यामरणस्यैव स्वर्गसाधनतया विधानात् मृणेय घपिरागतः। १७

श्येनेनाभिचरन्यजेतेति इ

श्येनेनाभिचरन्यजेतेति। अभिचरन्वैरिमरणं कामयन्। न चैवं तदीयपुरुषहिंसाया अपि प्रत्ययनायजनकत्वापत्तिरिति वाच्यं। अनुपदिष्टप्रायश्चित्तहिंसेतर
हिंसापरत्वात्। मा हिंस्यादिति निषेधः॥ अभिचारमहीनं त्रिभिः कल्पेर्यपादेतीति। तत्र प्रायश्चित्तोपदेशः। सा हिंसा न कर्तव्या॥

प्रवृत्तिस्तथापि मरणानुकूले व्यापारे अग्निप्रवेशादाविति कर्तव्यतारूपे विधिरत एव प्रवृत्तिरिति तत्र निषेधस्यावकाशः
वायव्यं श्वेतमालभेत भूतिकाम इतिवत्। तस्मात् स्पष्टमेवानुगमनस्य श्येनवैषम्यं। यत्तु तस्मादुह न पुरायुषः स्वःका
मी प्रेयादिति श्रुतिविरोधादनुगमनमयुक्तमिति। तत्र। तस्याः काम्यायुषः प्राक् न प्रेयादिति स्वर्गफलोद्देशेनायुषः प्रा
गायुर्व्ययो न कर्तव्यो मोक्षार्थिना यस्मादायुषः शेषे सति नित्यनैमित्तिककर्मानुष्ठानक्षपितांतःकरणकलंकस्य श्रव
णमनननिदिध्यासनसंपत्तौ सत्यामात्मज्ञानेन नित्यनिरतिशयानंदब्रह्मप्राप्तिलक्षणमोक्षसंभवः॥ तस्मादनित्या
ल्पस्वर्गार्थमायुषो व्ययो न कर्तव्य इत्यर्थः। अतश्च मोक्षमनिच्छंत्या अनित्याल्पसुखरूपस्वर्गार्थिन्या अनुगमनं यु
क्तमितरकाम्यानुष्ठानवदिति सर्वमनवद्यं॥ किंच। पतिप्रियहिते युक्ता स्वाचारा विजितेंद्रिया। सेह कीर्तिमवाप्नोति प्रे
त्य चानुत्तमां गतिं॥ प्रियमनवद्यत्वेन मनोनुकूलं। आपत्त्यां पश्चाद्युक्तकरं हितं। प्रियं च हितं च प्रियहितं पत्युः प्रिय
हितं पतिप्रियहितं तस्मिन्युक्ता निरता स्वाचारा शोभनआचारो यस्याः सा तथोक्ता। शोभनश्च आचारो दर्शितः शं
खेन। नानुक्त्वा गृहान्निर्गच्छेन्नानुत्तरीया न त्वरितं व्रजेत् न परपुरुषं भाषेतान्यत्र वणिक्प्रव्रजितवृद्धवैद्येभ्यो
न नाभिं प्रदर्शयेदा गुल्फाद्वासः परिदध्यान्न स्तनौ विवृतौ कुर्यान्न हसेदपावृतं न भर्तारं तद्बंधून्वा द्विष्यान्न गणिका
धूर्ताभिसारिणीप्रव्रजिताप्रेक्षणिकामायामूलकुहककारिकादुःशीलादिभिः सहैकत्र तिष्ठेत् संसर्गेण हि चा

३६ नीलिनी

मि. रिष्यं दुष्यतीति। विजितेंद्रिया विजितानि संयमितानि इंद्रियाणि श्रोत्रादीनि वागादीनि च मनःसहितानि यया सेह
१८ हलोके कीर्तिमित्याति परलोके चोत्तमां गतिं प्राप्नोति। अयं च सकल एव स्त्रीधर्मो विवाहादूर्ध्वं वेदितव्यः प्राग्
पतनपतनात्कामचारकामवादकामभक्षा इति स्मरणात्। वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृत इति। अने
कभार्यत्वप्रसक्त्याह। सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत्। सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा। सवर्णायां
सत्यां अन्यामसवर्णां नैव धर्मकार्यं कारयेत्। सवर्णास्वपि बह्वीषु धर्म्ये विधौ धर्मानुष्ठाने ज्येष्ठया ज्येष्ठां मुक्त्वा
इतरा मध्यमा कनिष्ठा वा न नियोक्तव्या। प्रमीतपतिका या विधिमुक्ता इदानीं प्रमीतभार्यं प्रत्याह। दाहयित्वा
ग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः। आहरेद्विधिवद्दारानग्नींश्चैवाविलंबयन्। पूर्वोक्तां वृत्तवतीं आचारवतीं विप
न्नां अग्निहोत्रेण श्रौतेनाग्निना। तदभावे स्मार्तेन दाहयित्वा पतिर्भर्ता मृत्यादित पुत्रो निष्पन्नो वा आश्रमांत
रेष्वनधिकृतो वा स्वं न राग्नींश्च विधिवदाहरेद् विलंबयन्नुत्री घ्रमेव। अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजइ
ति दक्षस्मरणात्। एतच्चाधाने सदाधिकृता या एवं नाम्नः स्याः पुत्रवृद्धिनी यो चैव योभार्यां दहेद्वैतानिकाग्निभिः
जीवंत्यां प्रथमायां तु सुरापानसमं हि तदिति। तथा॥ मृतायां तु द्वितीयायां योग्निहोत्रं समुत्सृजेत्। ब्रह्मघ्नं तं विजानी
याद्यश्च कामात्समुत्सृजेदिति एवमादितदाधाने सहानधिकृताया अग्निदाने वेदितव्यं॥ इति विवाहप्रकरणं॥ १८

भांवपुनदीरा

Dr. BHAU DAJI MEMORIAL

ब्राह्मणस्य च न स्त्री भार्या भवेत् क्षत्रियस्य तिस्रो वैश्यस्य द्वे शूद्रस्यैकैकेत्युक्तानां सुवर्ण पुत्रानुत्पादयितव्यानित्युक्तं इदानी
कस्यां कस्मात्कः पुत्रो भवतीति विवेकमाह। सवर्णेभ्यः सवर्णासु जायंते हि सजातयः। अनिंद्येषु विवाहेषु पुत्राः संतान
वर्द्धनाः। सवर्णेभ्यो ब्राह्मणादिभ्यः सवर्णासु ब्राह्मण्यादिषु सजातयो मातापितसमानजातीयाः पुत्रा भवंतीति विज्ञा
त्वेष विधिः स्मृत इति सर्वशेषत्वेनोपसंहृत्य एतद् द्विजातिषु सवर्णासु इति संबध्यते विन्नतावृत्तस्य संबंधितावृत्त्वा द्वृत्तस्य
:सवर्णेभ्य इति लभ्यते। एकः सवर्णशब्दः स्वस्थार्थः अतश्चायमर्थः संपन्नः॥ उक्तेन विधिना ऊढायां सवर्णायां वो
ढुः सवर्णादुत्पन्नस्तत्समनाजातीयो भवति। अतश्च कुंडगोलककानीनसहोढादीनामसवर्णत्वमुक्तं भवतीति।
ते च सवर्णेभ्योनुलोमप्रतिलोमेभ्यश्च भिद्यमानाः साधारणधर्मैरहिंसादिभिरधिक्रियंते। शूद्राणां तु सधर्माणः
सर्वेपध्वंसजाः स्मृता इति स्मरणात् अपध्वंसजाः व्यभिचारजाः शूद्रधर्मैरपि द्विजशुश्रूषादिभिरधिक्रियंते। ननु
कुंडगोलकयोर्ब्राह्मणत्वे श्राद्धे प्रतिषेधोनुपपन्नः न्यायविरोधश्च यो यज्जातीयात् यज्जातीयायामुत्पन्नः स तज्जा
तीय एव यथा गोर्गवि गौः अश्वाद्वडवायामश्वः तस्माद्ब्राह्मणात् ब्राह्मण्यामुत्पन्नो न ब्राह्मण इति विरुद्धं। तथा का
नीनपौनर्भवादीननुक्रम्य सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिरिति वचनविरोधश्च। नैतत्सारं। ब्राह्मणो
न ब्राह्मण्यामुत्पन्नो ब्राह्मण इति भ्रमनिवृत्त्यर्थः श्राद्धे प्रतिषेधः॥ यथा त्वं तमप्राप्तस्य पतितस्य श्राद्धे प्रतिषे

तपःश्रुतं च योनिश्च एतद्ब्राह्मणकारकं॥ तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः॥ त्रीण्यस्य कारणानि विद्यायोनिश्च कर्म च॥ एतच्छिवेन विज्ञानेन ब्राह्मणाग्र्य
स्य लक्षणं। महाभाष्ये॥

मि· १८ धः न चान्याय विरोधोऽयत्र प्रत्यक्षगम्या जातिर्भवति तत्र तथा ब्राह्मण्यादिजातिस्तु स्मृतिलक्षणा यथा स्मरणं भव
तितथा। समानेपि चाक्षुण्ये कुण्डिनो वसिष्ठो त्रिगोत्रो न मर इति स्मरणलक्षणं गोत्रं। तथा मनुष्यत्वे समानेपि ब्राह्म
ण्यादिजातिः स्मरणलक्षणं। मातापित्रोश्चैतदेव जातिलक्षणं॥ न चानवस्था अनादित्वात्संसारस्य॥ शब्दा
र्थव्यवहारवत्॥ सजातीये क्षेत्रे उत्पन्नेषु मया विधिरिति चरक्तानुवादत्वात् यथा संभवं व्याख्यास्यते। क्षे
त्रजस्तु मातृसमानजातीयो नियोगस्मरणात्। क्षेत्रसमाचाराच्च तथा च धृतराष्ट्रपाण्डुविदुराः क्षेत्रजाः सं
तोमातृसजातीयादृत्यल्पमतिप्रसंगेन। किंच। अनिंद्येषु ब्राह्मादिषु विवाहेषु पुत्राः संतानवर्द्धनाः अरोगिणो दी
र्घायुषो धर्मप्रजासंपन्ना भवंति। सवर्णानुत्केदानीमनुलोमानाह। विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः
स्त्रियां। अंबष्ठः शूद्र्यां निषादो जातः पारशवोपि वा। ब्राह्मणात्क्षत्रियायां विन्नायामुत्पन्नो मूर्द्धावसिक्तो नाम
पुत्रो भवति। वैश्यकन्यायां विन्नायां अंबष्ठो नाम भवति शूद्रायां विन्नायां निषादो नाम पुत्रो भवति निषादो
नाम कश्चित्प्रत्यघाती प्रतिलोमजः स माभूदिति पारशवोयं निषाद इति संज्ञाविकल्पः विप्रादिति सर्व
त्रानुवर्त्तते। यत्तु ब्राह्मणेन क्षत्रियायामुत्पादितः क्षत्रिय एव भवति। क्षत्रियेण वैश्यायां वैश्य एव। वैश्ये १८
न शूद्रायां शूद्र इति शंखस्मरणं। तत् क्षत्रियादिधर्मप्राप्त्यर्थं न पुनर्मूर्द्धावसिक्तादिजातिनिराकरणा

विप्रोदशविधः॥ देवो मुनिर्द्विजो राजा वैश्य शूद्र बिडालकाः॥ पशुर्म्लेच्छश्च चांडालो दश विप्राः प्रकीर्तिताः॥

र्थं क्षत्रियादिजातिप्राप्त्यर्थं वा। अतश्च मूर्द्धावसिक्तादीनां क्षत्रियादेरुक्तैरेव दंडाजिनोपवीता[illegible]दिभिरुप
नयनादिकार्यं प्रागुपनयनात्कामचारादि पूर्ववदेदितव्यं। वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ। वै
श्री श्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः॥ वैश्यायां शूद्रायां च विन्नायां राजन्यान्माहिष्योग्रो यथाक्रमं पुत्रो भ
वतः। वैश्येन शूद्रायां विन्नायां करणो नाम पुत्रो भवति एष सवर्णमूर्द्धावसिक्तादिसंज्ञाविधिः विन्नासूढासु स्मृत
उक्तो वेदितव्यः। एते च मूर्द्धावसिक्तांबष्ठनिषादमाहिष्योग्रकरणाः षडनुलोमजाः पुत्रा वेदितव्याः प्रतिलोमजा
नाह। ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा। शूद्राज्जातस्तु चंडालः सर्वधर्मबहिष्कृतः॥ ब्राह्मण्यां क्षत्रियवै
श्यशूद्रैरुत्पादिताः यथाक्रमं सूतवैदेहचंडालाख्याः पुत्रा भवंति। तत्र चंडालः सर्वधर्मबहिष्कृतः॥ किंच क्षत्रियं
दा मागधं वैश्यात् शूद्रात्क्षत्तारमेव च। शूद्रादायोगवं वैश्या जनयामास वै सुतं। क्षत्रिया योषिद्वैश्यान्मागधं नाम पुत्रं ज
नयति सैव शूद्रात्क्षत्तारं। वैश्ययोषिच्छूद्रात् आयोगवं पुत्रं जनयति। एते च सूतवैदेहकचांडालमागधक्षत्तायो दा
गवाख्याः प्रतिलोमजाः एतेषां च वृत्तयः औशनसे मानवे च द्रष्टव्याः संकीर्णसंकरे जातं नरमाहुर्माहिष्येण
करण्यां तु रथकारः प्रजायते। असत्संतस्तु विज्ञेयाः प्रतिलोमानुलोमजाः॥ क्षत्रियेण वैश्यायामुत्पादितो मा
हिष्यो वैश्येन शूद्रायामुत्पादिता करणी तस्यां माहिष्येणोत्पादितो रथकारो नाम जात्या भवति तस्य चोपनयना

मि.
२०

दिसर्वकार्यवचनाद्यथाह शंखः। क्षत्रियवैश्यानुलोमानन्तरोत्पन्नजो रथकारस्तस्येज्यादानोपनयनसंस्कारक्रि
याश्वप्रतिष्ठा रथसूत्रवास्तुविद्याध्ययनवृत्तितां चेति। एवं ब्राह्मणक्षत्रियोत्पन्नमूर्द्धावसिक्तमाहिष्याद्यनुलोमसं
करेजात्यन्तरत्वादुपनयनादिप्राप्तिश्च वेदितव्या। तयोर्द्विजातित्वात्। संज्ञास्तु स्मृत्यन्तरोक्ताद्रष्टव्याः। एतच्च प्रदर्श
नमात्रमुक्तं। संकीर्णसंकरजातीनामानन्त्याद्वक्तुमशक्यत्वादत एतावदत्र विवक्षितं असन्तः प्रतिलोमजाः सन्तश्चा
नुलोमजाः ज्ञातव्या इति। सवर्णेभ्यः सवर्णासु जायन्त इत्यादिना वर्णप्रभेदकारणमुक्तमिदानीं कारणान्तरमाह। जा
त्युत्कर्षो युगे ज्ञेयः सप्तमे पंचमेपि वा। व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरं। जातयो मूर्द्धावसिक्तादयस्तासामुत्कर्षो
ब्राह्मणत्वादिजातिप्राप्तिर्जात्युत्कर्षो युगे जन्मनि सप्तमे पंचमे अपिशब्दात् षष्ठे वा बोद्धव्यो व्यवस्थितश्चायं वि
कल्पः व्यवस्था च ब्राह्मणेन शूद्रायामुत्पादिता निषादी सा ब्राह्मणेनोढा दुहितरं कांचिज्जनयति सापि ब्राह्मणेनो
ढान्यामित्यनेन प्रकारेण षष्ठी सप्तमं ब्राह्मणं जनयति। ब्राह्मणेन वैश्यायामुत्पादितां षष्ठी साप्यनेन प्रकारेण पं
चमी षष्ठं ब्राह्मणं जनयति मूर्द्धावसिक्ताप्यनेन प्रकारेण चतुर्थी पंचमं ब्राह्मणं जनयति। एवमुग्रा क्षत्रियेणोढा
माहिष्या च यथाक्रमं क्षत्रियं षष्ठं पंचमं च जनयति। तथा करणी वैश्येनोढा पंचमं वैश्यमित्येवमन्यत्राप्यूह्यं। किं
च। कर्मणां व्यत्यये वृत्त्यर्थानां कर्मणां व्यत्यये विपर्यासे यथा ब्राह्मणो मुख्यवृत्त्या अजीवन् क्षात्रेण कर्मणा जीव २·

न्नेदित्यनुकल्पः तेनाप्यजीवन् वैश्यवृत्त्या। तेनाप्यजीवन् शूद्रवृत्त्या। क्षत्रियोपि स्वकर्मणाजीवनार्थेनाजीवन् वैश्य
५ वृत्त्या शूद्रवृत्त्या वा। वैश्योपि स्ववृत्त्या अजीवन् शूद्रवृत्त्येति। एवं कर्मणां व्यत्यये तस्मिन् व्यत्यये सति यद्यापद्विगमे स्व
पितां वृत्तिं न परित्यजति तदा सप्तमे षष्ठे पंचमे वा जन्मनि वा साम्यं यस्य हीनवर्णस्य कर्मणा जीवति तत्समानजाति
त्वं भवति। तद्यथा ब्राह्मणः शूद्रवृत्त्याजीवन् तामपरित्यजन् यदि पुत्रमुत्पादयति सोपि तयैव वृत्त्याजीवन् पुनरप्येवं
परंपरया सप्तमे जन्मनि शूद्रमेव जनयति। वैश्यवृत्त्यानुजीवन् षष्ठे वैश्यं क्षत्रियवृत्त्याजीवन् पंचमे क्षत्रियं क्षत्रियो
पि शूद्रवृत्त्याजीवन् षष्ठे शूद्रं। वैश्यवृत्त्या जीवन् पंचमे वैश्यं। वैश्योपि शूद्रवृत्त्या जीवंस्तामपरित्यजन् पुत्रपरंप
रया पंचमे जन्मनि शूद्रं जनयति। पूर्ववच्चाधरोत्तरं अस्यार्थः वर्णसंकरे अनुलोमजाः प्रतिलोमजाश्च दर्शिताः
संकीर्णसंकरजाश्च रथकारनिदर्शनेन दर्शिताः इदानीं वर्णसंकीर्णसंकरजातीः प्रदर्शयति। अधरे चोत्तरे चाधरो
त्तरं यथा मूर्द्धावसिक्तायां क्षत्रियवैश्यशूद्रैरुत्पादिता अंबष्ठायां वैश्यशूद्राभ्यां निषाद्यां शूद्रेणोत्पादिता
अधराः प्रतिलोमजाः तथा मूर्द्धावसिक्तांबष्ठनिषादीषु ब्राह्मणोत्पादिताः माहिष्योग्रयोर्ब्राह्मणेन क्षत्रियेणो
त्पादिताः करण्यां ब्राह्मणेन क्षत्रियेण वैश्येन चोत्पादिताः उत्तरे अनुलोमजाः एवमन्यत्राप्यूहनीयं। एतदध
रोत्तरं पूर्ववदसत्सदिति बोद्धव्यं॥ ॥ इति वर्णजातिविवेकप्रकरणं॥ अतोनन्तरं कर्माणि अग्निसाध्यानि

मि॰ २१

दर्शयिष्यन् कस्मिन्नग्नौ किं कर्तव्यमित्याह ॥ कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही । दायकालाहृते वापि श्रौतं
वैतानिकाग्निषु । स्मृत्युक्तं वैश्वदेवादिकं कर्म लौकिकं च यत्प्रतिदिनं पाकलक्षणं तदपि गृहस्थो विवाहाग्नौ विवा
हसंस्कृते कुर्वीत विभागकालाहृते वा वैश्यकुलादेर्ग्निमानीयेत्यादिनोक्तसंस्कारसंस्कृते अपि त्राज्ञाले नेवाम्
हृपनावाहृते संस्कृते एव नूनः स्वकालत्रयातिक्रमे प्रायश्चित्तीयते । श्रुत्युक्तमग्निहोत्रादिकं कर्म वैतानिका
ग्निषु आहवनीयादिषु कुर्वीत गृहस्थधर्मानाह । शरीरचिंतां निर्वर्त्य कृतशौचविधिर्द्विजः । प्रातः संध्यामुपासी
त दंतधावनपूर्वकं ॥ शरीरचिंतामावश्यकीं दिवासंध्यासु कर्णस्थब्रह्मसूत्र इत्याद्युक्तविधिना निर्वर्त्य गं
धलेपक्षयकरमित्यादिनोक्तेन विधिना कृतशौचविधिर्द्विजो दंतधावनपूर्वकं प्रातः संध्यामुपासीत । दंतधा
पि॰ वनविधिः । कंटकिक्षीरवृक्षोत्थं द्वादशांगुलसंमितं । कनिष्ठिकाग्रवत्स्थूलं पर्वार्द्धकृतकूर्चकं । दंतधावनमुद्दि
त्र॰ श्य जिह्वोल्लेखनिकां तथेति । अत्र क्षीरोत्थमित्यनेन तालतालगुल्मादिनिषेधः पालाशाश्वत्थादिनिषेधश्च
स्मृत्यंतरे द्रष्टव्यः । दंतधावनमंत्रश्च आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि
वनस्पते इति । ब्रह्मचारिप्रकरणोक्तस्यापि संध्यावंदनस्य पुनर्वचनं दंतधावनपूर्वकत्वप्रतिपादनार्थं दंतधा २१
वनं त्वगीतादि ब्रह्मचारी वर्जयेदिति तन्निषेधात् । हुत्वाग्नीन्सूर्यदैवत्यान् जपेन्मंत्रान्समाहितः । वेदार्थानधि

गच्छेच्च शास्त्राणि विविधानि च । प्रातः संध्यावंदनानंतरं अग्नीनाहवनीयादीन् स्वयोक्तेन विधिना हुत्वा औपासनाग्निं वा
तदनंतरं सूर्यदैवत्यान् उदुत्यं जातवेदसमित्यादीन्मंत्रान्जपेत्समाहितः विक्षिप्तचित्तः तदनंतरं वेदार्थान् निरुक्तव्या
करणादिश्रवणेनाधिगच्छेत् जानीयात् चकारादधीतं चाभ्यसेत् अध्यापयीत । विविधानि शास्त्राणि मीमांसाप्रभृती
नीतिशास्त्रं नि धर्मार्थोपयोग्यप्रतिपादकानि अधिगच्छेत् । उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये ॥ स्नात्वा देवान्पितृंश्चैव तर्पयेद
र्चयेत्तथा । तदनंतरमभिषेकादिगुणयुक्तं अथवान्यं श्रीमंतं योगक्षेमार्थं अलब्धलाभो योगः लब्धपरिपालनं क्षेमं तं अकुत्सितमपि॰
दर्थमुपासीत उपेयादित्यनेन सेवा प्रतिषेधः इति वेतनग्रहणे नाज्ञाकरणं सेवा तस्याः श्ववृत्तित्वेन निषेधात् । ततो म
ध्याह्ने शास्त्रोक्तेन विधिना नद्यादिषु स्नात्वा देवादीन्सगर्ग्नापितॄंश्च कारादर्षींश्च देवादितीर्थेन तर्पयेत् । त
दनंतरं गंधकुसुमाक्षतैर्हरिहरहिरण्यगर्भप्रभृतीनामन्यतमं यथावासनं ऋक्यजुःसाममंत्रैस्तत्प्रकाशकैः स्वना
मभिर्वा चतुर्थ्यंतैर्नमस्कारयुक्तैराराधयेद्यथोक्तविधिना । वेदाथर्वपुराणानि सेतिहासानि शक्तितः ॥ जपयज्ञप्र
उपनिषद् सिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत् । तदनंतरं उपनिषद्वेदाथर्वपुराणेतिहासादीनि समस्तानि व्यस्तानि वा आध्या
त्मिकीं च विद्यां जपयज्ञसिद्ध्यर्थं यथोक्तविधिना यथाशक्ति जपेत् । बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः ॥
भूतपितृमरब्रह्ममनुष्याणां महामखाः ॥ बलिकर्म भूतयज्ञः ॥ स्वधा पितृयज्ञः होमो देवयज्ञः ॥ स्वाध्यायो ब्रह्मय

नि॰ त्तः॥ अनिथि संक्रियामनुष्ययज्ञः॥ एते पंचमहायज्ञा अहरहः कर्तव्याः नित्यत्वात्। पशुनरेषां फलश्रवणं। तदेषां
२२ यावनत्वरव्यापनार्थं न काम्यत्वप्रतिपादनाय। देवेभ्यस्तु हुतादन्नाच्छेषात् भूतबलिं हरेत्। अन्नं भूमौ श्वचांडालवायसेभ्यश्च निक्षिपेत्। स्वगृह्योक्तेन विधिना वैश्वदेवहोमं कृत्वा नन्तरमृषिशेनान्नेन भूतेभ्यो बलिं हरेत्। अन्नग्रहणमपक्व
व्युदासार्थं तदनंतरं यथाशक्ति भूमौ श्वभ्यः चांडालवायसेभ्यो बलिं हरेत्। चशब्दात्पक्ष्यादिभिपापरोगी पतितेभ्यः यथाह निक्षिपेत्
चयत मनुः शुनां च पतितानां च श्वपचां पापरोगिणां। वायसानां कृमीणां च शनकैर्निक्षिपेद्भुवीति। एतच्च सायं प्रातः कर्तव्यं।
अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्याश्वलायनस्मरणात्॥ इह केचिद्वैश्वदेवाख्यस्य कर्मणः पुरुषार्थ
त्वमन्नसंस्कारकर्मत्वं चेच्छंति। अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्यन्नसंस्कारकर्मताप्रतीयते॥ अ
थातः पंचयज्ञाः इत्युपक्रम्य तानेतान् अहरहः कुर्वीतेति नित्यत्वविधानात् पुरुषार्थत्वं चावगम्यते। तदयु स्वस्य
क्तं। पुरुषार्थत्वे संस्कारकर्मत्वानुपपत्तेः तथाहि द्रव्यसंस्कारकर्मत्वपक्षे अन्यार्थता वैश्वदेवाख्यकर्मणः पुरुषा वर्चसीनी
र्थत्वे वैश्वदेवकर्मार्थता द्रव्यस्येति परस्परविरोधात् पुरुषार्थत्वमेव युक्तं। महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनु
नुरिति। तथा। वैश्वदेवे तु निर्वृत्ते यद्यन्योतिथिराव्रजेत्। तस्मै अन्नं यथाशक्ति प्रदद्यान्न बलिं हरेदिति मनुस्म २२
रणात्। पुरुषार्थत्वे वैश्वदेवाख्यं कर्म न प्रतिपाकमावर्तनीयं। तस्माद्यथासायं प्रातरित्यादिनोत्पत्तिप्रयोगौ दर्शि

तौ ना नेतानहरहर्यज्ञान्कुर्वीतेति अधिकारविधिरिति सर्वमनवद्यं। अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलं। स्वाध्या
यं चान्वहं कुर्यान्न पचेदन्नमात्मने। प्रत्यहमन्नं पितृभ्यो मनुष्येभ्यश्च यथाशक्ति देयं। अन्नाभावे कंदमूलफलादि। तस्याप्य
भावे जलं देयं। अपि स्वाध्यायं सततं कुर्याद्विस्मरणार्थं। न पचेदन्नमात्मन इति। अन्नग्रहणं सकलादनीयद्रव्यप्र
दर्शनार्थं। आत्मार्थं चान्नं न पचेत्। कथं तर्हि। देवताद्युद्देशेनैव॥ बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः संभोज्यातिथि
२३ भृत्यांश्च दंपत्योः शेषभोजनं। परिणीता पितृगृहे स्थिता स्ववासिनी। शेषाः प्रसिद्धाः बालादीनतिथिभृत्यांश्च संभोज्य भोज
यित्वा दंपत्योः शेषभोजनं कर्तव्यं। आपोशानेनोपरिष्टादधस्तादश्नता तथा। अनग्नममृतं चैव कार्यमन्नं द्विजन्मना। भुंजा
नेन द्विजन्मना उपरिष्टादधस्ताच्चापोशानाख्येन कर्मणा अन्नमनग्नममृतं च कार्यं द्विजन्मग्रहणमुपनयनप्रभृति सर्वा
श्रमसाधारणार्थं। अतिथित्वे न वर्णानां देयं शक्त्यानुपूर्वशः अप्रणोद्योतिथिः सायमपि वाग्भूतृणोदकैः। वैश्वदेवानंतरं व
र्णानां ब्राह्मणादीनामतिथित्वेन युगपत्प्राप्तानां ब्राह्मणाद्यनुपूर्वेण यथाशक्ति देयं सायंकालेपि यद्यतिथिरागच्छति न तदासौ न
प्रणोद्यः अप्रत्याख्येय एवं यद्यपि भक्ष्यं किमपि नास्ति तथापि वाग्भूतृणोदकैरपि सत्कारं कुर्यात्। सत्कृत्य भिक्षवे भिक्षा दात
व्या सुव्रताय च। भोजयेच्चागतान् कालेसखिसंबंधिबांधवान्। भिक्षवे सामान्येन भिक्षा दातव्या सुव्रताय ब्रह्मचारिणे यतये च
सत्कृत्य स्वस्तिवाच्य भिक्षादानमप्पूर्वमित्यनेन विधिना भिक्षा दातव्या। भिक्षा च ग्रासः सम्मिता मयूरांडप्रमाणो ग्रासः। ग्रास

॥ तथा च मनुः। तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता। एतान्यपि सतां गेहे नोच्छिद्यंते कदाचनेति॥

मि॰आ॰
२३

मात्रं भवेद्भिक्षा पुष्कलं तच्चतुर्गुणं। हंतं ते(सु) चतुर्भिः स्यादग्रं तत्त्रिगुणं भवेदिति शातातपस्मरणात्। भोजनकाले चागता
नुसखिसंबंधिबांधवान्भोजयेत्। सखा मित्रं। संबंधिनो येभ्यः कन्या दत्ता गृहीता वा। मातृपितृसंबंधिनो बांधवाः॥ महोक्षं
वा महाजं वा श्रोत्रियायोपकल्पयेत्। सत्क्रियान्वासनं स्वादु भोजनं सूनृतं वचः॥ महांतमुक्षाणं धौरेयं महाजं वा श्रोत्रिया
योक्तलक्षणायोपकल्पयेत् ददत्यर्थमयमस्माभिः परिकल्पित इति तत्प्रीत्यर्थं। न तु दानाय व्यापादनाय वा यथा सर्वमेतत्त्व
दीयमिति प्रतिश्रोत्रियमुक्षासंभवात्। अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न त्विति निषेधाच्च। तस्मात्सत्क्रियादि क
र्तव्यं। सत्क्रिया स्वागतवचनासनपाद्यार्घ्यमनादिदानं। तस्मिन्नुपविष्टे पश्चादुपवेशनमन्वासनं। स्वादु भोजनं मिष्टमन्नं।
सूनृतं वचः धन्या वयमद्य भवदागमनादित्येवमादि। अश्रोत्रिये पुनरश्रोत्रियस्यासनोदके इति गौतमोक्तं वेदितव्यं।
प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः॥ प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः॥ स्नातको विद्यास्नातको व्रत
स्नातको विद्याव्रतस्नातक इति। आचार्य उक्तलक्षणः पार्थिवो वक्ष्यमाणलक्षणः प्रियो मित्रं विवाह्यो जामाता। चका
राच्छ्वशुरपितृव्यमातुलादीनां ग्रहणं। ऋत्विजो वृत्वा मधुपर्कमाहरेत् स्नातकायोपस्थिताय राज्ञे चाचार्यश्वशुरपितृ
व्यमातुलादीनां चेत्याश्वलायनस्मरणात्। एते स्नातकादयः प्रतिसंवत्सरं गृहमागता अर्घ्या मधुपर्केण संपूज्याः। अ
र्घशब्दो मधुपर्कं लक्षयति। ऋत्विजस्तूक्तलक्षणाः संवत्सरादर्वागपि प्रतियज्ञं मधुपर्केण संपूज्याः। अध्वनीनोऽतिथिर्ज्ञे २३

यः श्रोत्रियो वेदपारगः। मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः॥ अध्वनि वर्तमानोऽतिथिर्वेदितव्यः श्रोत्रियवेदपा
रगावध्वनि वर्तमानौ ब्रह्मलोकमभीप्सतो गृहस्थस्य मान्यावतिथी वेदितव्यौ। यद्यप्यध्ययनमात्रेण श्रोत्रियस्तथापि
श्रुताध्ययनसंपन्नोऽत्र श्रोत्रियोऽभिधीयते। एकशाखाध्यापनक्षमो वेदपारगः॥ परपाकरुचिर्न स्यादनिंद्यामंत्रणा
दृते। वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनं॥ परपाके रुचिर्यस्यासौ न तथोक्तः नैव परपाकरुचिः स्यादनिंद्या
मंत्रणं विना। अनिंद्येनामंत्रितो नापक्रामेदिति स्मरणात्। वाक्पाणिपादचापल्यं वाक् पादौ च वाक्पाणिपादं तस्य चा पाणीच
ग्रहणं पल्यं वर्जयेत्। वाक्चापल्यमसत्यादिभाषणं। पाणिचापल्यं वृलनस्फोटनादि। पादचापल्यं लंघनोत्प्लवनादि। च नखसंस्फोटन
पाणि कारान्नेत्रादिचापल्यं वर्जयेत्। न शिश्नोदरपाणिपादचक्षुर्वाक्चापल्यानि कुर्यादिति गौतमस्मरणात्। अतिभोजनं च व
र्जयेदनारोग्यहेतुत्वात्। अतिथिं श्रोत्रियं तृप्तमासीमान्तादनुव्रजेत्। अहःशेषं सहासीत शिष्टैरिष्टैश्च बंधुभिः॥ पू
र्वोक्तं श्रोत्रियातिथिं वेदपारगातिथिं च भोजनादिना तृप्तं सीमांतं यावदनुव्रजेत् ततो भोजनानंतरं अहःशेषं शिष्टै
रितिहासपुराणादिवेदिभिरिष्टैश्च काव्यकथायमपंचचतुरैर्बंधुभिश्चानुकूलोपकुशलैः सहासीत। उपास्य पश्चि ला
मां संध्यां हुत्वाग्नींस्तानुपास्य च। भृत्यैः परिवृतो भुक्त्वा नातितृप्त्याथ संविशेत्॥ ततः पूर्वोक्तेन विधिना पश्चिमां संध्या
मुपास्याग्नीनग्निं वा हुत्वा तानुपास्योपस्थाय भृत्यैः पूर्वोक्तैः स्ववासिन्यादिभिः परिवृतो नातितृप्त्या भुक्त्वा चकारा

MEMORIAL

चो

मि. २४ दायव्ययादिगृह्यादि चिंतां निवर्त्यानंतरं संविशेत् स्वप्यात् । ब्राह्मे मुहूर्ते उत्थाय चिंतयेदात्मनो हितं । धर्मार्थकामान् स्वे
काले यथाशक्ति न हापयेत् । ततो ब्राह्मे मुहूर्ते उत्थाय पश्चिमार्द्धप्रहरे प्रबुध्य आत्मनो हितं कर्त्तं करिष्यमाणं च वे [illegible]
दार्थसंशयांश्च चिंतयेत् । तदानीं चित्तस्याव्याकुलत्वेन तत्त्वप्रतिभासयोग्यत्वात् । ततो धर्मार्थ स्वोचिते काले प कामा
याशक्ति न परित्यजेत् । यथासंभवं सेवेतेत्यर्थः पुरुषार्थत्वात् । यथाह गौतमः न पूर्वाह्णमध्यंदिनापराह्णान् फल्गू ह्मान
न्कुर्याद्धर्मार्थकामेभ्यस्तेषु धर्मोत्तरः स्यादिति । अत्रच धर्मे तेषां सामान्येन सेवनमुक्तं न यापि कामार्थयोर्धर्म
विरोधेनानुष्ठानं ॥ न यो धर्ममूलत्वादेवं प्रतिदिनमनुष्ठेयं । विद्याकर्मवयोबंधुवित्तैर्मान्या यथाक्रमं । एतैः प्र
भूतैः शूद्रोपि वार्द्धके मानमर्हति । विद्या पूर्वोक्ता कर्म श्रौतं स्मार्तं वा । वय आत्मनो तिरिक्तं सम्यक् वाऊर्ध्वं बंधुर्व
द्धस्वजनसंपत्तिः वित्तं ग्रामरत्नादिकं एतैर्युक्ताः क्रमेण मान्याः पूजनीयाः एतैः कर्मबंधुवित्तैः प्रभूतैः प्रत्येकं
समस्तैर्व्यस्तैर्वा युक्तः शूद्रोपि वार्द्धके भवत्यीते रूर्ध्वं मानमर्हति · शूद्रोप्यशीतिको वर इति गौतमस्मरणात् । वृ
द्धभारि नृपस्नातस्त्रीरोगिवरचक्रिणां । पंथा देयो नृपस्तेषां मान्यः स्नातश्च भूपतेः वृद्धः प्रसिद्धः भारी भाराक्रांतः
नृपो भूपतिर्न क्षत्रियमात्रं । स्नातो विद्याव्रतोभयस्नातकः स्त्री प्रसिद्धा । रोगी व्याधितः वरो विवाहोद्यतः चक्री शा
कटिकः चक्रारात्मत्तादीनां ग्रहणं · बालवृद्धमत्तोन्मत्तोपहतदेहभाराक्रांतस्त्रीस्नातकप्रव्रजितेभ्य इति शांख २४

तोन्म

स्मरणात् । एतेभ्यः पंथा देयः एते यदि मुख्याः आगतेषु स्वयं पंथोपक्रामेत् । वृद्धादीनां राज्ञा सह पथि समवाये राजा मान्य इति
न तस्मै पंथा देयो भूपतेरपि स्नातको मान्यः स्नातकग्रहणं स्नातकमात्रप्राप्त्यर्थं न ब्राह्मणाभिप्रायेण तस्य सर्वदैव गुरुत्वा
त् । यथाह शंखः अथ ब्राह्मणाय पंथा देयो राज्ञ इत्येके न त्वाहितस्य गुरुर्ह्येष ब्राह्मणो राजानमभिशेनेन तस्मै पं
या इति ॥ वृद्धादीनां पथि परस्परसमवाये तु गुरुलाघवापेक्षया विद्यादिभिर्वा विशेषो द्रष्टव्यः । इज्याध्ययनदानानि
वैश्यस्य क्षत्रियस्य च । प्रतिग्रहोधिको विप्रे याजनाध्यापनेन यावैश्यस्य क्षत्रियस्य च कार्यं ब्राह्मणस्य द्विजानुलो
मानां च याग अध्ययन दानानि साधारणानि कर्माणि । ब्राह्मणस्याधिकानि प्रतिग्रहयाजनाध्यापनानि न यीति स्मृत्यं
तरोक्तत्वसुपसंग्रहो यथाह गौतमः कृषिवाणिज्ये वा स्वयंकृते कुसीदं चेति । अध्यापनं तु क्षत्रियवैश्ययोर्ब्राह्मण
प्रेरितयोर्भवति नस्वेच्छया आपत्कल्पो ब्राह्मणस्याब्राह्मणाद्विद्योपयोगोनुगमनं शुश्रूषा समाप्ते ब्राह्मणो गुरुरिति
गौतमस्मरणात् । एतान्यनापदि ब्राह्मणस्य षट् कर्माणि · तत्र त्रीणि ज्यादीनि धर्मार्थानि प्रतिग्रहादीनि त्रस्यर्था
नि · षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति मनुस्मरणात् अन
इज्यादीनि अवश्यं कर्त्तव्यानि न प्रतिग्रहादीनि · द्विजातीनामध्ययनमिज्या दानं ॥ ब्राह्मणस्याधिकाः प्रवचनया
जनप्रतिग्रहाः पूर्वेषु नियम इति गौतमस्मरणात् । प्रधानं क्षत्रिये कर्म प्रजानां परिपालनं । कुसीदकृषिवाणि

मि॰ २५ ज्यं पाशुपाल्यं विशः स्मृतं। क्षत्रियस्य प्रजापरिपालनं प्रधानं कर्म धर्मार्थं वृत्त्यर्थं च। वैश्यस्य कुसीदकृषिवाणिज्य
पाशुपाल्यानि वृत्त्यर्थानि कर्माणि। कुसीदं वृद्ध्यर्थं द्रव्यप्रयोगः। लाभार्थं क्रयविक्रयो वाणिज्यं शेषं प्रसिद्धं। शास्त्रान्तरे
क्षत्रस्य वणिक्पशुकृषी विशः आजीवनार्थं धर्मस्तु दानमध्ययनं यजिरिति मनुस्मरणात्। शूद्रस्य द्विजशुश्रूषा त
याऽजीवन्वणिक् भवेत्॥ शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन्। शूद्रस्य द्विजशुश्रूषा प्रधानं कर्म धर्मार्थं वृत्त्य
र्थं च। तत्र ब्राह्मणस्य शुश्रूषा परमो धर्मः॥ विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यत इति मनुस्मरणात्। यदा पुनर्द्विजशु
श्रूषया जीवितुं न शक्नोति तदा वणिग्वृत्त्या जीवेत्। नानाविधैर्वा शिल्पैर्द्विजातीनां हितं कुर्वन्। यादृशैः कर्मभिर्द्विजा
तिशुश्रूषायामयोग्यो न भवति तादृशानि कुर्वन्नित्यर्थः। तानि च देवलेनोक्तानि शूद्रधर्मो द्विजशुश्रूषा पापवर्जनं क
लत्रादिपोषणं कर्षणपशुपालनभारोद्वहनपण्यव्यवहारचित्रकर्मनृत्यगीतवेणुवीणामुरजमृदंगवादनानीति। किं
च। भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियारतः॥ नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेत्। भार्यायामेव न साधारणस्त्रीषु
परस्त्रीषु वा रतिरभिगमनं यस्य स तथोक्तः। शुचिर्बाह्याभ्यंतरशौचयुक्तो द्विजवत्। भृत्यादिभर्ता। श्राद्धक्रियारतः। श्राद्धानि
नित्यनैमित्तिककाम्यानि क्रियास्नानकर्तनान्यविरुद्धानि तेषु रतः। नम इति मंत्रेण पूर्वोक्तान्पंचयज्ञानहरहर्न हाप २५
येदनुतिष्ठेत्। नमस्कारमंत्रं केचिद्देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नम

इति वर्णयन्ति। नमस्कारमन्त्रे। तत्र वैश्वदेवं लौकिकेऽग्नौ कर्तव्यं न वैवाहिकेऽग्नावित्याचार्याः। इदानीं साधारणधर्मानाह।
अहिंसा सत्यमस्तेयं शौचमिंद्रियनिग्रहः॥ दानं दमो दया क्षांतिः सर्वेषां धर्मसाधनं। हिंसा प्राणिपीडनं तस्या अकरणमहिं
सा। सत्यमप्राणिपीडाकरं यथार्थवचनं। अस्तेयमदत्तानुपादानं। शौचं बाह्यमाभ्यंतरं च। बुद्धिकर्मेंद्रियाणां नियतवि
षयवृत्तित्वमिंद्रियनिग्रहः। यथाशक्ति प्राणिनामन्नोदकादिदानेनाप्यपहारो दानं। अंतःकरणसंयमो दमः। आपन्नर
क्षणं दया॥ अपकारेऽपि चित्तस्याविकारः क्षांतिरिति। एते सर्वेषामेव पुरुषाणां धर्मसाधनं। वयोबुद्ध्यर्थवाग्वेषश्रु
ताभिजनकर्मणां। आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथा। वयो बाल्ययौवनादि। बुद्धिर्नैसर्गिकी लौकिकवैदिक स्वाभाविकी
व्यवहारेषु। अर्थो वित्तं गृहक्षेत्रादि॥ वाक्कथनं। वेषो वस्त्रमाल्यादिविन्यासः। श्रुतं पुरुषार्थशास्त्रश्रवणं। अभि
जनं कुलं। कर्म च स्वर्थप्रतिग्रहादि। एतेषां वयःप्रभृतीनां सदृशीं सुचितां वृत्तिं आचरणं आचरेत्कुर्यात्। यथावृद्धः
स्वोचितां तपोवनोचितां एवं बुद्ध्यादिष्वपि योज्यं। अजिह्मामशठां। अवक्राममत्सरां। एवं स्मार्तानि कर्माण्युपक्र
म्येदानीं श्रौतान्यनुक्रामति। त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेद्द्विजः॥ प्राक्सौमिकीः क्रियाः कुर्याद्यस्यान्नं वा
र्षिकं भवेत्॥ त्रिवर्षजीवनपर्याप्तं अधिकं वान्नं यस्य स एव सोमयागं कुर्यान्नान्योल्पधनः अन्नस्त्वल्पीयसि द्रव्ये यः
सोमं पिबति द्विजः॥ स पीतसोमपूर्वोऽपि न तस्याप्नोति तत्फलमिति दोषश्रवणात्। एतच्च काम्याभिप्रायेण नित्य

मि. २६ स्यावश्यं कर्तव्यत्वान्न नियमः यस्य वर्षजीवनपर्याप्तमन्नं भवति स प्राक्सौमिकीः सोमात्प्राक् प्राक्सोमं प्राक्सो
मं भवाः प्राक्सौमिक्यः कास्ताः अग्निहोत्रदर्शपौर्णमासपशुचातुर्मास्यानि कर्माणि निर्वाहिका शश्वतीः क्रियाः कुर्या काम्यानि
त्। एवं काम्यानिष्टीर्नानि कर्माण्यभिधायेदानीं नित्यान्याह। प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा। कर्तव्याग्रयणे
ष्टिश्च चातुर्मास्यानि चैव हि। संवत्सरे संवत्सरे सोमयागः कार्यः प्रत्ययने अयने दक्षिणोत्तरसंज्ञिते निरूढपशुयागः
कार्यः तथा प्रतिसंवत्सरं चा पशुना संवत्सरे यजेत षट्सु षट्सु मासेष्विति श्रवणात्। आग्रयणेष्टिश्च सस्योत्प
त्तौ कर्तव्या। चातुर्मास्यानि च प्रतिसंवत्सरं कर्तव्यानि। एषामसंकुर्यादिष्टिं वैश्वानरीं द्विजः। एषां सोमप्रभृतीनां पू भवे॰
र्वोक्तानां नित्यानां कथंचिदसंभवे तत्काले वैश्वानरीमिष्टिं कुर्यात्। किंच हीनकल्पं न कुर्वीत सति द्रव्ये फलप्रदं।
यो यं हीनकल्प उक्तः सति द्रव्ये सोऽन कर्तव्यः यत्फलप्रदं काम्यं कर्म तत्तद्धीनकल्पं न कर्तव्यमेव। चंडालो जायते
यज्ञकरणाच्छूद्रभिक्षितात्। यज्ञार्थलब्धमददद्भासः काकोपि वा भवेत्। यज्ञार्थं शूद्रधनयाचनेन जन्मांतरे चंडा
लो जायते। यः पुनर्यज्ञार्थं याचितं न सर्वं परित्यजति स भासः काकोपि वा भवेत्। वर्षशतं। यथाह मनुर्यज्ञार्थमर्थ
भिक्षित्वा यो न सर्वं प्रयच्छति। स याति भासतां विप्रः काकतां वा शतं समा इति। भासः शकुंतविशेषः काकः प्रसि २६
द्धः कुसूलकुंभीधान्यो वा त्र्याहिकोश्वस्तनोपि वा। कुसूलं कोष्ठकं कुंभी उष्ट्रिका कुसूलं च कुंभी च कुसूलकुंभ्यौ ता

भ्यां परिमितं धान्यं यस्य स तथोक्तः कुसूलधान्यः स्यात्कुंभीधान्यो वा। तत्र स्वकुटुंबपोषण द्वादशाहमात्रपर्याप्तधा
न्यः कुसूलधान्यः कुंभीधान्यस्तु स्वकुटुंबपोषणे षडहमात्रपर्याप्तधान्यः त्र्यहपर्याप्तं धान्यमस्यास्तीति त्र्यैहिकः
श्वो भवं धान्यादि श्वस्तनं तन्न विद्यते यस्यासौ अश्वस्तनः॥ कुसूलधान्यादिसंचयोपायमाह। जीवेद्वापि शि
लोंछेन श्रेयानेषां परः परः। शाल्यादीनि पतितानि परित्यक्तवल्लरीग्रहणं शिलं॥ एकैकस्य कणस्योपादानं रित्य
उंछः॥ शिलं च उंछं च शिलोंछं तेन शिलोंछेन शिलेनोंछेन वा कुसूलधान्यादिश्चतुर्विधो गृहस्थो जीवेदेषां कुसू
लधान्यादीनां ब्राह्मणानां गृहस्थानां चतुर्णां परः परः पश्चात्पठितः श्रेयान्प्रशस्ततरः एतच्चयपि द्विजः प्रकृ
तत्वात्तथापि ब्राह्मणस्यैव भवितुमर्हति विघोपशमादियोगात् तथा च मनुना॥ अद्रोहेणैव भूतानामल्पद्रोहेण
वा पुनः॥ या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदीति विप्रमेव प्रस्तुत्य कुसूलधान्यको वा स्यादित्यभिहितं। एत
च्चातिसंचयं तथा यावरं प्रस्तुच्य नैनविप्रमात्राभिप्रायेण। तथा सति त्रैवर्षिकाधिकान्नोयः स हि सोमं पिबेदित्य
नेन न विरोधः तथा च गृहस्थानां द्वैविध्यं तत्रतत्रोक्तं। यथाह देवलः द्विविधो गृहस्थो यायावरः शालीनश्च
तयोर्यायावरः प्रवरो याजनाध्यापनप्रतिग्रहरिक्थसंचयवर्जनात्। षट्कर्माधिष्ठितः श्रेयश्चतुष्पदगृहग्रा पशु॥
म धन धान्ययुक्तो लोकानुवृत्तिः शालीनः इति। शालीनोपि चतुर्विधः। याजनाध्यापनप्रतिग्रहकृषिवाणि

मि. २७ न्यपाप्युपात्तैर्जीवेत्स्वैकः याजनादिभिस्त्रिभिरन्यो याजनाध्यापनाभ्यामपरश्चतुर्थस्त्वध्यापनेनैव। यथाह मनुः ष
ट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते। द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवतीति। अत्र च प्रतिग्रहोपि कोविप्रइत्यादि
नोऽशालीनस्य वृत्तयो दर्शिताः। यायावरस्य जीवेद्वापि शिलोञ्छेनेति॥ इति गृहस्थप्रकरणं॥ एवं श्रौतस्मार्तानि कर्माणि
गृहस्थस्याभिधायेदानीं स्नानादारभ्य ब्राह्मणस्यावश्यकर्तव्यानि विधिप्रतिषेधात्मकानि मानससंकल्परूपाणि स्नात नि
कव्रतान्याह न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः॥ न विरुद्धप्रसंगेन संतोषी च भवेत्सदा। ब्राह्मणस्य प्रतिग्र
हादयोऽर्थप्राप्त्युपाया दर्शिताः तत्र विशेष उच्यते स्वाध्यायविरोधिनमर्थं अप्रतिषिद्धमपि नेहेत नाभिलषेत् न य
तस्ततोऽनयतः कुतश्चिदविदिताचारात् न विरुद्धप्रसंगेन विरुद्धमयाज्ययाजनादि प्रसंगो गीतादिर्विरुद्धस्तत्प्रसं नृत्य
गश्च विरुद्धप्रसंगस्तेनेनार्थमीहेतेति संबध्यते नञ आवृत्तिः प्रत्येकं पर्युदासार्था सर्वत्रापि अस्मिन्स्नातकप्रकर
णे नञ् शब्दः पर्युदासार्थ एव किंच अर्थलाभेपि संतोषी परितृप्तो भवेत् चकारात् संयतश्च संतोषं परमास्थाय सु
सम खार्थी संयतो भवेदिति मनुस्मरणात्। कुतस्तर्हि धनमिच्छेदित्याह॥ राजांतेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा।
दंभिहैतुकपाषंडिबकवृत्तींश्च वर्जयेत्॥ क्षुधा सीदन्पीड्यमानः स्नातको राज्ञो विदितवृत्तान्तात् अंतेवासिनो वश्यमा २७
णलक्षणात् याज्याच्च जनादेश्च धनमाददीत क्षुधा सीदन्नित्यनेन विभागादिप्राप्त कुटुंबपोषणपर्याप्तधनोऽन

२८ कुतश्चिदर्थमन्विच्छेदिति गम्यते। किंच दंभिहैतुकादीन् सर्वेषु कार्येषु लौकिकवैदिकशास्त्रीयेषु वर्जयेत्। चकाराद्विक
र्मस्थबैडालव्रतिकान् शठान्। यथाह मनुः पाखंडिनो विकर्मस्थान् बैडालव्रतिकान् शठान्। हैतुकान्बकवृत्तींश्च
वाङ्मात्रेणापि नार्चयेत् इति। लोकरंजनार्थमेव कर्मानुष्ठायी दंभी। युक्तिबलेन सर्वत्र संशयकारी हैतुकः। त्रैविद्यवि
रुद्धापरिगृहीताश्रमिणः पाखंडिनः बकवदस्य वर्तनमिति बकवृत्तिः यथाह मनुः अधोदृष्टिर्नैष्कृतिकः स्वार्थसा
धनतत्परः। शठो मिथ्याविनीतश्च बकव्रतिरुदाहृतः इति। प्रतिषिद्धसेविनो विकर्मस्थाः बिडालो मार्जारस्तस्य
स्वभावो व्रतं तद्यस्यास्ति स बैडालव्रतिकः धर्मध्वजी सदालुब्धश्छाद्मिको लोकदंभकः बैडालव्रतिको ज्ञेयो हिंस्रः
सर्वाभिसंधकः इति मनुस्मरणात्। शठः सर्वत्र वक्रः एतैः संसर्गनिषेधादेव स्वयमेवं विधो न भवेदिति गम्यते।
किंच। शुक्लांबरधरो नीचकेशश्मश्रुनखः शुचिः॥ न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः॥ शुक्ले धौते अंबरे
वाससी धारयतीति शुक्लांबरधरः केशाश्च श्मश्रूणि च नखाश्च केशश्मश्रुनखं नीचं कृतं केशश्मश्रुनखं येन स्या
सौ नीचकेशश्मश्रुनखः शुचिरंतर्बहिश्च स्नानानुलेपनधूपस्नगादिभिः सुगंधिश्च भवेत् यथाह गौतमः स्नातको नित्यं शुचिः
सुगंधिः स्नानशील इति सुगंधत्वविधानादेव निर्गंधमाल्यनिषेधः तथा च गोभिलः नागंधां स्रजं धारयेदन्य
त्र हिरण्यस्रजः इति। सदा स्नातक एवं विधो भवेत् इतरेन च समतिसंभवे न जीर्णमलवद्वासा भवेच्च विभवे सतीति स्म

मि.
२८

रणात्। नचभार्यायादर्शनेनस्यांपुरतोवस्थितायामश्नीयाद्वीर्यवदपत्योत्पत्तिभयात्तथाचश्रुतिः जायायां अं
तेनाश्नीयाद्वीर्यवदपत्यंभवतीति अतः स्त्रियासहभोजनंदूरादेवनिरस्तं। नचैकवासाः नापिसंस्थितउचि
तोश्नीयादितिसंबध्यते। किंचानसंशयंप्रपद्येतनाकस्मादप्रियंदैसंबध्यते। एतच्चपरिहासादिव्यतिरेकेणागु
रुणापिसमंहास्यंकर्तव्यंकुटिलंविनेतिस्मरणात्। नचस्तेनः अन्यदीयस्य+ त्वनादितंनान्तंनैवस्तेनःस्यान्नवा
र्धुषी। कदाचिदपिसंशयंप्राणविपत्तिसंशयावहंकर्मनप्रपद्येतनकुर्यात्। यथाव्याघ्रचौराद्युपद्रुतदेशाक्रम
णादि। अकस्मान्निःकारणंकिंचिदपिअप्रियंउद्वेगकरंवाक्यंनवदेत्। नचाहितंअनृतंवाप्रियमपि। चकारादस
नवदेदिति भ्यबिभत्साकरंच। अकस्मो +४ दन्तस्यच्छीनानस्यात्नवार्धुषीस्यात्प्रतिषिद्धवृत्त्युपजीवीवार्धुषी। किं
चदशापणीशुक्लवस्त्रीवेणुमान्सकमण्डलुः कुर्यात्प्रदक्षिणंदेवमृद्गोविप्रवनस्पतीन्। दशापणंसुवर्णंतदस्यास्ती
तिदशापणी। यत्रसूत्रंयज्ञोपवीतंतदस्यास्तीतिशुक्लवस्त्रीवैणवयष्टिमान्कमण्डलुमान्स्यादितिसर्वत्रसंबं
धनीयं। अत्रब्रह्मचारिप्रकरणोक्तस्यापियज्ञोपवीतस्यपुनर्वचनंद्वितीयप्राप्त्यर्थं। यथाहवसिष्ठः स्नातकानां
द्वितीयेस्यादन्तर्वासस्तथोत्तरं। यज्ञोपवीतेद्वेयष्टिःसोदकंचकमण्डलुरिति। अत्रदशापणीतिसामान्याभिधा २८
नेपिकुण्डलधारणमेवकार्यं। वैणवींधारयेद्यष्टिंसोदकंचकमण्डलुं। यज्ञोपवीतंवेदंचशुभेरौक्मेचकुण्डले

तिमनुस्मरणात्। तथादेवंतत्प्रतिमां। मृदंमृद्धृतांगांब्राह्मणंचवनस्पतिंचाश्वत्थादिंप्रदक्षिणंकुर्यात्। एतान्प्रदक्षिण
नःकृत्वाव्रजेदेवंचतुष्पथादीनपि। मृदंगांदैवतंविप्रंघृतंमधुचतुष्पथं। प्रदक्षिणानिकुर्वीतप्रज्ञातांश्चवनस्पतीनि
तिमनुस्मरणात्॥ नतुमेहेन्नदीछायावर्त्मगोष्ठाम्बुभस्मसु। नप्रत्यग्न्यर्कगोसोमसंध्याम्बुस्त्रीद्विजन्मनः॥ नद्यादिषुन
मेहेत्मूत्रपुरीषोत्सर्गंनकुर्यात्एवंस्मशानादावपि। यदाहशंखः॥ नगोमयकृष्टोप्तशाड्वलचितिश्मशानवल्मीकखलप
र्वतपुलिनेषुमेहेतमूत्रादिधारयेदिति। तथाग्न्यादीन्प्रतिअग्न्यादीनामभिमुखंनमेहेन्नाप्येतान्पश्येत्। यथाहगौत
वी मः। नवाय्वग्निविप्रादित्यापोदेवतागाश्चप्रतिपश्यन्मूत्रपुरीषामेध्यान्युदस्येत्नचदेवताःप्रतिपादौप्रसारयेदिति
एतद्देशव्यतिरेकेणभूमिमयज्ञियैस्तृणैरन्तर्धायमेहनंकार्यं। यथाहवसिष्ठः॥ परिवेष्टितशिराभूमिमयज्ञियैस्तृ
णैरन्तर्धायमूत्रपुरीषेकुर्यादिति। नेक्षेतार्कंननग्नांस्त्रींनचसंसृष्टमैथुनां। नचमूत्रंपुरीषंवानाशुचीराहुतारकाः॥
नैवार्कमीक्षेतयत्तु अन्यत्रसामान्येनोक्तंतथाप्युद्यास्तमयराहुग्रस्तोदकप्रतिबिंबमध्याह्नवर्तिनएवादित्यस्या
वेक्षणंनिषिद्ध्यतेनसर्वदा। यथोक्तंमनुना नेक्षेतोद्यन्तमादित्यंनास्तंयन्तंकदाचन। नोपरक्तंनवारिस्थंनमध्यंनभ
सोगतमिति उपभोगादन्यत्रनग्नांस्त्रियंनेक्षेतनग्नांस्त्रियमीक्षेतान्यत्रमैथुनादित्याश्वलायनः। संसृष्टमैथु
नांकृतोपभोगांउपभोगान्तेअनग्नामपिनेक्षेत। चकाराद्भोजनादिकमाचरन्तीं। तथाचमनुः नाश्नीयाद्भार्यया

सिंक् जाभायि

मि· २९ सार्द्धं नेनामीक्षेत चाश्नतीं॥ क्षुवतीं जृंभमाणां वा न चासीनां यथासुखं। नांजयंतीं स्वके नेत्रे न चाभ्यक्तामनावृतां। न पश्येत्प्र
सवंतीं च तेजस्कामो द्विजोत्तम इति। न मूत्रपुरीषे च पश्येत्। अशुचिः सन् राहुनारकाः न पश्येच्च कारादुदके स्वप्रतिबिंबं
न पश्येत्। न चोदके निरीक्षेत स्वरूपमिति धारणेनिवचनात्। अयं मे वज्र इत्येवं सर्वं मंत्रमुदीरयन्। वर्षत्यप्रावृतो गच्छेत्
स्वपेत्प्रत्यक्शिरा न च। वर्षति सति अयं मे वज्रः पाप्मानमपहंत्विति मंत्रमुच्चारयन् अप्रावृतः अनाच्छादितो गच्छेन्न धावेत्।
न प्रधावेच्च वर्षति सतीति निषेधात्। न च प्रत्यक्शिराः स्वप्यात्। चकारान्नग्नो न शयीत नैकश्च शून्यगृहे। न चानग्नः शयीते
ति। नैकः स्वप्याच्छून्यगृह इति च मनुस्मरणात्। ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सु न निक्षिपेत्। पादौ प्रतापयेन्नाग्नौ न चैनम
भिलंघयेत्। ष्ठीवनमुद्गिरणं असृक् रक्तं शकृत् पुरीषं अस्थिश्लेष्मनखलोमान्यप्सु न निक्षिपेत् पादेन पाणिना वा
जलमभिहन्यादिति। अग्नौ च पादौ न प्रतापयेत् नाप्यग्निं लंघयेत्। चकारात् ष्ठीवनादीन्यग्नौ न क्षिपेत्। मुखोपधमना
दि चाग्नौ न कुर्यात्। तथा च मनुः नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियं। नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्।
अधस्तान्नोपदध्याच्च न चैनमभिलंघयेत्। न चैनं पादतः कुर्यान्न प्राणाबाधमाचरेदिति। जलं पिबेन्नांजलिना शयानं न प्र
बोधयेत्। नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैर्वा न संविशेत्। जलमंजलिना संहताभ्यां हस्ताभ्यां न पिबेत् लं उद्दृणं चेय मात्रो
पलक्षणो। विद्यादिभिरात्मनोधिकं शयानं न प्रबोधयेत् नोत्थापयेत् श्रेयांसं न प्रबोधयेदिति विशेषात् अक्षादिभिर्न २९

BHAU DAJI MEMORIAL
तस्माद्रक्षेत्

क्रीडेत् धर्मघ्नैः पशुलंघनादिभिः कर्मभिर्न क्रीडेत्। व्याधितैर्ज्वराद्यभिभूतैः सहैकत्र न संविशेत् न शयीत। विरुद्धं वर्जयेत्क
र्म प्रेतधूमं नदीतरं। केशभस्मतुषांगारकपालेषु च संस्थितिं। जनपदग्रामकुलाचारविरुद्धं कर्म वर्जयेत् प्रेतधूमं बाहुभ्यां
नदीतरणं च वर्जयेदिति संबध्यते। केशादिषु च संस्थितिं वर्जयेत्। चकारादस्थिकार्पासादिष्वमेध्येषु। नाचक्षीत धयंतीं गां ना स्थ्या
द्वारेण विशेत्क्वचित्। न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः॥ परस्य स्वीयादि पिबंतीं गां परस्मै नाचक्षीत न च निवर्त
येत्। अद्वारेण पथेन क्वापि नगरे ग्रामे मंदिरे वा न प्रविशेत्। न च कृपणस्य शास्त्रातिक्रमकारिणो राज्ञः सकाशात्
प्रतिगृह्णीयात्। प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः॥ दुष्टा दशगुणं पूर्वात्पूर्वादेते यथाक्रमं। प्रतिग्रहे सूना ध्येस
न्यादयः पंच पूर्वस्मात्परः परो दशगुणं दुष्टः। सूना प्राणिहिंसास्थानं सास्तीति सूनी प्राणिहिंसाकरः॥ चक्री तैलिकः॥ ध्व
जी सुराविक्रयी॥ वेश्या पण्यस्त्री नराधिपः अनंतरोक्तः॥ अध्ययनधर्मानाह। अध्यायानामुपाकर्म श्रावण्यां श्रवणेन
वा हस्तेनौषधिभावे वा पंचम्यां श्रावणस्य तु। अधीयंत इत्यध्याया वेदास्तेषामुपाकर्म उपक्रमः ओषधीनां प्रादुर्भावे
सति श्रावणमासस्य पौर्णमास्यां श्रवणनक्षत्रयुक्ते वा दिने हस्तेन युक्तायां पंचम्यां वा स्वगृह्योक्तविधिना कुर्यात्। य
दा तु श्रावणमासे ओषधयो न प्रादुर्भवंति तदा भाद्रपदमासस्य श्रवणनक्षत्रे कुर्वीत। तत ऊर्ध्वं सार्द्धांश्चतुरो मासा
न्वेदानधीयीत। तथा च मनुः श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि। युक्तश्छंदांस्यधीयीत मासान्विप्रोर्द्धपंच

अथातोध्यायोपाकरणं। अध्ययनमध्यायस्तस्य उपाकरणं प्रारंभो येन कर्मणा तदध्यायोपाकरणं॥ उक्तोर्थः। अतः शब्दो हेत्वर्थः। यस्माद्ब्रह्मयज्ञो नित्यः अतोध्यायस्योपाकरणं ब्रूमः इति
अध्येष्यमाणो ध्यायिष्यन्वा ... ताभ्यां ... वासो विहृत्य ... मासे ... अध्यापयितव्यैरित्यर्थः। अध्यायिष्यन्वा ... अध्येष्यमाण इति वचनमध्यापकाभावे
ष्यध्येष्यमाणः स्वयमेव कुर्यादित्यर्थः। वर्षासु छंदांस्युपाकृत्याधीयीरन्निति श्रुतेः।

अस्मिन्देशे प्रादुर्भवंति तद्विषये।
या ओषधीः पूर्वा॰ सूक्तं प्रमाणं गृह्णाण

मि॰
३०

मानिति। पौषमासस्य रोहिण्यामष्टकायामथापि वा। जलांते छंदसां कुर्यादुत्सर्गं विधिवद्द्विजः॥ पौषमासस्य रोहिण्या
मष्टकायां वा ग्रामाद्बहिर्जलसमीपे छंदसां वेदानां स्वगृह्योक्तविधिनोत्सर्गं कुर्यात्। यदा पुनर्भाद्रमासे उपाकर्म न दा
माघशुक्लप्रथमदिवसे उत्सर्गं कुर्यात्। यथोक्तं मनुना। पुष्ये तु छंदसां कुर्याद्बहिरुत्सर्जनं द्विजः। माघशुक्लस्य वा प्राप्ते
पूर्वाह्ने प्रथमेऽहनीति। तदनंतरं पक्षिणीमहोरात्रं वा विरम्य शुक्लपक्षेषु वेदान् कृष्णेषु वेदांगान्यधीयीत। तथाह मनुः। य
थाशास्त्रं तु कृत्वैवमुत्सर्गं छंदसां बहिः। विरमेत्पक्षिणीं रात्रिं यद्वाप्येकमहर्निशं। अत ऊर्ध्वं तु छंदांसि शुक्लेषु नियतः पठे
त्। वेदांगानि तु सर्वाणि कृष्णपक्षेषु संपठेदिति। अनध्यायानाह। त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु। उपाकर्म
णि चोत्सर्गे स्वशाखाश्रोत्रिये तथा। उक्तेन मार्गेणाधीयानस्य शिष्यर्त्विग्गुरुबंधुषु प्रेतेषु मृतेषु त्र्यहमनध्यायस्त्री
ण्यहोरात्राण्यध्ययनं वर्जयेत्। उपाकर्मण्युत्सर्गाख्ये च कर्मणि कृते त्र्यहमनध्यायः॥ उत्सर्गे तु मनूक्तपक्षिण्यहोरात्रा
भ्यां सह त्र्यहस्य विकल्पः॥ स्वशाखाश्रोत्रिये स्वशाखाध्यायिनि च प्रेते त्र्यहमनध्यायः॥ संध्यागर्जितनिर्घातभूकंपोल्का
निपातने। समाप्य वेदं द्युनिशमारण्यकमधीत्य च। संध्यायां मेघध्वनौ निर्घाते आकाशोत्पातध्वनौ भूमिचलने उल्का
पतने मंत्रस्य ब्राह्मणस्य वा समाप्तौ आरण्यकाध्ययने च द्युनिशमहोरात्रमनध्यायः॥ पंचदश्यां चतुर्दश्यामष्टम्यां रा
हुसूतके। ऋतुसंधिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च॥ पंचदश्याममावास्यायां पौर्णमास्यां चतुर्दश्यामष्टम्यां राहुसू ३०

तके चंद्रसूर्योपरागे च द्युनिशमनध्यायः यत्तु त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतक इति तद्भुक्तात्मसमयविषयं॥ ऋतु राज्ञो
संधिगतासु च प्रतिपत्सु श्राद्धिकभोजने तत्प्रतिग्रहे च द्युनिशमनध्यायः एतच्चैकोद्दिष्टव्यतिरिक्तविषयं॥ तत्र तु
त्रिरात्रं॥ प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनं। त्र्यहं न कीर्तयेद्ब्रह्मेति स्मरणात्। पशुमंडूकनकुलश्वाहिमार्जार
मूषकैः कृतेंऽतरे त्वहोरात्रं शक्रपाते तथोच्छ्रये॥ अध्येतॄणां पश्वादिभिरंतरागमने कृते शक्रध्वजस्यावरोपणदिवसे
उच्छ्रयदिवसे चाहोरात्रमनध्यायः द्युनिशमिति प्रकृते पुनरहोरात्रग्रहणं संध्यागर्जितनिर्घातभूकंपोल्कानिपात
नेष्वाकालिकत्वज्ञापनार्थं। आकालिकं निर्घातभूकंपराहुदर्शनोल्काः इति गौतमस्मरणात्। निमित्तकालादारभ्यापरे
द्युर्यावत्स एव कालस्तावत्कालमाकालं तत्र भवः आकालिकोऽनध्यायः एतच्च प्रातःसंध्यास्तनिते सायंसंध्यास्त
निते तु रात्रिमेव। सायंसंध्यास्तनिते रात्रिं। प्रातःसंध्यायामहोरात्रमिति हारीतस्मरणात्। यत्पुनर्गौतमेनोक्तं श्व
कुलसर्पमंडूकमार्जाराणां अंतरे सति त्र्यहमुपवासो विप्रवासश्चेति तत्प्रथमाध्ययनविषयमेव। श्वक्रोष्टुगर्दभो
लूकसामबाणार्तनिःस्वने। अमेध्यशवशूद्रांत्यश्मशानपतितांतिके। क्रोष्टा सृगालः बाणो वंशः उलूको घूकः आर्तो
दुःखितः एषामेतादीनां निःस्वने तावत्कालमनध्यायः एवं वीणादिशब्दे चोदितो अमुचावान्ताभिनयाविच्छन्नस्तनित
संप्लवे। पुनः पुनर्विद्योतमानायां विद्युति पुनःपुनर्मेघघोषे नाकालिकोऽनध्यायः॥ स्वनेऽपि वेणुवीणाभेरीमृ

मि.
३१

देशगर्जितशब्दे विनिर्गोन मस्मरणान्नागर्दः शकटं। अमेध्यादीनां संनिधाने तात्कालिकोऽनध्यायः। देशेऽशुचावात्म
निच विद्युत्स्तनितसंप्लवे। भुक्त्वार्द्रपाणिरंभोंऽतरर्द्धरात्रेऽतिमारुते॥ भुक्त्वार्द्रपाणिर्नाधीयीत जलमध्ये च। अर्द्धरा
त्रे महानिशाख्ये मध्यमप्रहरद्वये। अतिमारुते ऽप्यनध्यायस्तावत्कालं नाधीयीत। पांसुप्रवर्षे दिग्दाहे संध्यानीहारभी
तिषु। धावतः पूतिगंधे च शिष्टे च गृहमागते। औत्पातिकेऽर्नाववर्षे। दिग्दाहे यत्र ज्वलिता इव दिशो दृश्यंते। संध्य
भूमा योः नीहारे धूमिकायां। भीतिषु चोरराजादिकृतासु तावत्कालमनध्यायः। धावतः त्वरितं गच्छतोऽनध्यायः। पूतिगं
धे कुत्सितगंधे अमेध्यगंधादिगंधे च। शिष्टे च श्रोत्रियादौ गृहं प्राप्ते तदनुज्ञावधिरनध्यायः॥ खरोष्ट्रयानहस्त्य
श्वनौवृक्षेरिणरोहणे। सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः॥ यानं रथादि। ईरिणमूखरं मरुभूमिर्वा॥
खरादीनामारोहणे तात्कालिकोऽनध्यायः। एवं श्वक्रोष्टुगर्दभेत्यस्मादारभ्य सप्तत्रिंशदनध्यायांस्तात्कालिकान्
निमित्तसमकालान्विदुरध्ययनविधिज्ञाः। विदुरित्यनेन स्मृत्यंतरोक्तानध्यायानन्यानपि संगृह्णाति। यथाह
मनुः॥ शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकां। नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव चेत्यादि। एवमनध्या वद्धोंधां
यानुक्त्वा प्रकृतानि स्नातकव्रतान्याह॥ देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियाः। नाक्रामेद्रक्तविण्मूत्र ३१
ष्ठीवनोद्वर्तनानि च॥ देवानामृत्विक्स्नातकाचार्यराज्ञां परस्त्रियाश्च छायां नाक्रमेत् नाधितिष्ठेत् लंघयेद्बभ्रु
दि

द्धिपूर्वं। यथाह मनुः देवतानां गुरो राज्ञः स्नातकाचार्ययोरपि। नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य चेति। बभ्रुणो
नकुलवर्णस्य यस्य कस्यचित्कपिलस्य वा सोमादेर्वा बभ्रुणो इति नपुंसकलिंगनिर्देशात्। रक्तादीनि च नाधितिष्ठेत्। आ
दिग्रहणात्स्नानोदकादेर्ग्रहणं। उद्वर्तनमपस्नानं विण्मूत्रे रक्तमेव च। श्लेष्मनिष्ठ्यूतवांतानि नाधितिष्ठेत्तु कामत
इति। विप्राहिक्षत्रियात्मानो नावज्ञेयाः कदाचन। आमृत्योः श्रियमाकांक्षेन्न कंचिन्मर्मणि स्पृशेत्॥ विप्रो बहुश्रु
तो ब्राह्मणः अहिः सर्पः क्षत्रियो नृपतिः एते कदाचिदपि नावमंतव्याः आत्मा च स्वयं नावमंतव्यः आमृत्योर्याव
ज्जीवं श्रियमिच्छेत् कंचिदपि मर्मणि न स्पृशेत्। कस्यचिदपि मर्म दुश्चरितं न प्रकाशयेत्। दूरादुच्छिष्टविण्मू
त्रपादांभांसि समुत्सृजेत्। श्रुतिस्मृत्युदितं सम्यङ्नित्यमाचारमाचरेत्॥ भोजनाद्युच्छिष्टं विण्मूत्रे पादप्रक्षा
लनोदकं च गृहाद्दूरात्समुत्सृजेत्। श्रौतं स्मार्तं चाचारं नित्यं सम्यगनुतिष्ठेत्। गोब्राह्मणानलान्नानि नोच्छि
ष्टेन पदा स्पृशेत्। न निंदाताडने कुर्यात्पुत्रं शिष्यं च ताडयेत्। गोब्राह्मणमग्निमन्नमदनीयं विशेषतः पक्व
मशुचिर्न स्पृशेत् पादेनाशुचिश्चेदपि। यदा प्रमादात्स्पृशति तदा आचमनोत्तरकालं मनूक्तं कार्यं। स्पृष्ट्वैतान
शुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्। गात्राणि चैव सर्वाणि नाभिं पाणितलेन त्विति। एवं प्राणादीनुपस्पृशेत्। क
स्यचिदपि निंदाताडने न कुर्यात्। एतच्चानपकारिणि। अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगंगतः दुःखं

मि॰ ३२ सुमहदाप्नोति॥ प्रैष्यान्नपानयानरश्मिः। पुत्रः शिष्यो शिष्यः स्वार्थमेव ताडयेत् चकाराद्दासादीनपि· ताडनं च रज्वादिनाउन
मांगस्य निरेके एकार्थं शिष्यशिष्टिरवधेनाशक्तौ रज्जुवेणुविदलाभ्यां तनुभ्यामन्येन घ्नन् शास्ता शास्यस्य इति गौतम
वचनात् स्पृष्टतस्तु शारीरस्य नोत्तमांगे कथंचनेति मनुस्मरणात्। कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्।
अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु। कर्मणा कायेन यथाशक्ति धर्ममनुतिष्ठेत् मेवं मनसा ध्यायेद्वाचा वदेत्
धर्मविहितमपि लोकविद्विष्टं अस्वर्ग्यं विहितमपि लोकाभिशस्तजननं मधुपर्के गोवधादिकं नाचरेत् यस्मा
दस्वर्ग्यमग्नीषोमीयवत् स्वर्गसाधनं न भवति। मातृपितृतिथिभ्रातृजामिसंबंधिमातुलैः वृद्धबालातुराचा
र्यवैद्यसंश्रितबांधवैः ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः विवादं वर्जयित्वा तु सर्वांल्लोकान् जये
द्गृही। माता जननी पिता जनकः अतिथिरध्वनीनः भ्राता सोदरोऽभिन्नोदरः अपि जामयो विद्यमानभर्तृकाः स्त्रियः
संबंधिनो वैवाह्याः मातुलो मातुर्भ्राता वृद्धः सप्तत्यधिकवरवयस्कः बाल आषोडशाद्वर्षात् आतुरो रोगी आ
चार्य उपनेता वैद्यो विद्वान् भिषग्वा संश्रित उपजीवी बांधवाः पितृपक्षा मातृपक्षाश्च मातुलस्वसृश्वशुरपादान
मादरार्थं ऋत्विक् याजकः पुरोहितः शांत्यादेः कर्त्ता अपत्यं पुत्रादि भार्या सहधर्मचारिणी दासः कर्मकरः सना ३२
भयः सोदराः भ्रातृभ्यः श्वशुरपादानमजामिभगिनीप्राप्त्यर्थं एतैर्मातृआदिभिः सह वाक्कलहं परित्यज्य सर्वा

ल्लोकान् प्राजापत्यादीन्लोकान्प्राप्नोति। पंचपिंडाननुद्धृत्य न स्नायात् परवारिषु। स्नायान्नदीदेवखातह्रदप्रस्रवणेषु
च। परवारिषु परसंबंधिषु जलेषु सर्वसत्वोद्देशेनात्यक्तेषु तडागादिषु पंचपिंडाननुद्धृत्य न स्नायात् अनेना
लीयोत्सर्गाभ्यनुज्ञातेषु पिंडोद्धरणमंतरेणापि स्नानमभ्यनुज्ञातं। नद्यादिषु कथं तर्हि स्यादित्याह स्नायान्नदीति।
साक्षात्परंपरया वा समुद्रगाः स्रवंत्यो नद्यः देवखातं देवनिर्मितं पुष्करादि। उदकप्रवाहाभिघातकृतमज्ज
लो महान्निम्नप्रदेशो ह्रदः पर्वताद्युच्चप्रदेशात् प्रस्तुतमुदकं प्रस्रवणं· एतेषु पंचपिंडानुद्धरणेनैव स्नायात्।
एतच्च नित्यस्नानविषयं सति संभवे॥ नदीषु देवखातेषु तडागेषु सरस्सु च। स्नानं समाचरेन्नित्यं गर्त्तप्रस्र
वणेषु चेति नित्यग्रहणात् शौचाद्यर्थं तु यथासंभवं परवारिषु पिंडानुद्धरणे न सर्वस्य निषेधः॥ परशय्यास
नोद्यानगृहयानानि वर्जयेत्। अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि। शय्या कशिपुः आसनं पीठादि॥ उद्या
नमाम्रवनादि॥ गृहं प्रसिद्धं॥ यानं रथादि॥ परसंबंधीन्येतानि अदत्तान्यननुज्ञातानि वर्जयेन्नोपयुंजीत॥
अभोज्यान्नान्याह· अग्निहीनस्येति· अग्निहीनस्य श्रौतस्मार्ताग्न्यधिकाररहितस्य शूद्रस्य प्रतिलोमस्य
च अधिकारवतोप्यग्निरहितस्यान्नमनापदि न भुंजीत न प्रतिगृह्णीयाच्च॥ तस्मात्प्रशस्तानां स्वकर्मशुद्धि
ज्ञानिनां ब्राह्मणो भुंजीत प्रतिगृह्णीयाच्चेति गौतमवचनात्। कदर्यबद्धचौराणां क्लीबरंगावतारिणां॥ वैणा

निशस्तवार्धुष्यगणिकागणदीक्षिणां ॥ कदर्यो लुब्धः । आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत् । लोभाद्यः पितरौ भृत्यान् स कदर्य इति स्मृतः ॥ बद्धो निगडादिना वाचा संरुद्धश्च । चौरो ब्राह्मणसुवर्णव्यतिरिक्तपरस्वापहारी । क्लीबो नपुंसकः । रंगावतारी नटचारणमल्लादिः । वेणुच्छेदजीवी वैणः । अभिशस्तः पतनीयैः कर्मभिरभियुक्तः । वार्धुष्यो निषिद्धवृद्ध्युपजीवी । गणिका पण्यस्त्री । गणदीक्षी बहुयाजकः । एतेषामन्नं नाश्नीयादित्यनुवर्तते ॥ चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषां । क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनां ॥ चिकित्सको भिषग्वृत्त्युपजीवी । आतुरो महारोगोपसृष्टः । वातव्याध्यश्मरीकुष्ठमूत्रकृच्छ्रमेहोदरभगन्दराः । अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्तिताः ॥ क्रुद्धः कुपितः । पुंश्चली व्यभिचारिणी । मत्तो विद्यादिना गर्वितः । विद्विट् शत्रुः । क्रूरो दृढाभ्यन्तरकोपः ॥ वाक्कायव्यापारेणोद्वेजक उग्रः ॥ पतितो ब्रह्महादिः ॥ व्रात्यः पतितसावित्रीकः ॥ दाम्भिको वञ्चकः । उच्छिष्टभोजी परभुक्तावशिष्टाशी । एतेषां चिकित्सकादीनामन्नं नाश्नीयात् । अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनां । शस्त्रविक्रयिकर्मारतन्तुवायश्ववृत्तिनां । अवीरा स्त्री स्वतन्त्रा व्यभिचारमन्तरेण पतिपुत्ररहितेत्यन्ये । स्वर्णकारः सुवर्णस्य विकारान्तरकृत् । स्त्रीजितः सर्वत्र स्त्रीवशवर्ती । ग्रामस्य शान्त्यादिकर्ता बहूनां चोपनेता । शस्त्रविक्रयी शस्त्रविक्रयोपजीवी । कर्मारो लोहकारस्तक्षादिश्च । तन्तुवायः सूचीशिल्पोपजीवी । [illegible]श्वभिर्वृत्तिर्जीवनमस्यास्तीति श्ववृत्ती । एतेषामन्नं नाश्नीयात् । नृशंसराजरजककृतघ्नवधजीविनां ।

चैलधावसुराजीविसहोपपतिवेश्मनां । पिशुनानृतिनोश्चैव तथा चाक्रिकबन्दिनां । एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ॥ निर्दयो नृशंसः । राजा भूपतिः । तत्साहचर्यात्पुरोहितश्च । यथाह शंखः । भीतावगीतरुदिताक्रन्दितावघुष्टक्षुधितपरिभुक्तविस्मितोन्मत्तान्नं तथा राजपुरोहितान्नानि वर्जयेदिति । रजको वस्त्रादीनां नीलादिरागकरः ॥ कृतघ्न उपकृतस्य हन्ता । वधजीवी प्राणिनां वधेन वर्तकः ॥ चैलधावो वस्त्रनिर्णेजनकृत् ॥ सुराजीवी मद्यविक्रयी ॥ उपपतिर्जारः सहोपपतिना वेश्म यस्यासौ सहोपपतिवेश्मा । पिशुनः परदोषस्य ख्यापकः । अनृती मिथ्यावादी । चाक्रिकस्तैलिकः शाकटिकश्च । अभिशस्तपतितेन चाक्रिकतैलिक इति भेदेनाभिधानात् । बन्दिनः स्तावकाः । सोमविक्रयी सोमलताविक्रेता । एतेषामन्नं न भोक्तव्यं । सर्वे चैते कदर्यादयो द्विजा एव । कदर्यत्वादिदोषदुष्टा अभोज्यान्नाः । इतरेषां प्राप्त्यभावात् प्राप्तिपूर्वकत्वाच्च प्रतिषेधस्य । अग्निहीनस्य नान्नमद्यादनापदीत्यत्र शूद्रस्याभोज्यान्नत्वमुक्तं । तत्र प्रतिप्रसवार्थमाह ॥ शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः । भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् । दासो गर्भदासादयः । गोपालो गवां पालनेन यो जीवति । कुलमित्रं पितृपितामहादिक्रमायातः । अर्धसीरी हलपर्यायसीरोपलक्षितकृषिफलभागग्राही ॥ नापितः कारयिता । यश्च वाङ्मनःकायकर्मभिरात्मानं निवेदयति तवाहमिति । एते दासादयः शूद्राणां मध्ये भोज्यान्नाः । चकारात्कुम्भकारश्च । गोपनापितकुम्भकारकुलमित्रार्धिकनिवेदितात्मा

कर्मस्थयी

मि.
३४ नोभोज्यान्याहरिति वचनात्॥ इति स्नातकव्रतप्रकरणं॥ नत्वाध्यायविरोधमर्थमित्यन आरभ्य ब्राह्मणस्य स्नातकव्रता
न्यभिधायेदानीं द्विजातिधर्मानाह। अनर्चितं वृथामांसं केशकीटसमन्वितं। शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षि
तं उदक्यास्पृष्टं संघुष्टं पर्यायान्नं च वर्जयेत्॥ गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः॥ अनर्चितं अर्चार्हाय यदवज्ञ
यादीयते। वृथामांसं वक्ष्यमाणप्राणात्ययादिव्यतिरेकेण देवाद्यर्चनशेषं च यन्न भवति आत्मार्थमेव यत्सा
धितं। केशकीटादिभिश्च संयुक्तं। शुक्तं यत्स्वयमनम्लं केवलं कालपरिवासेन द्रव्यान्तरसंसर्गकालपरिवासाभ्यां
वा अम्लीभवति तच्छुक्तं॥ दध्यादिव्यतिरेकेण। न पापीयसोन्नमश्नीयात्। द्विःपक्वं न शुक्तं न पर्युषितमन्यत्र राग
तक्र खाण्डवचुक्रदधिगुडगोधूमयवपिष्टविकारेभ्य इति शंखस्मरणात्। पिप्पलीशुण्ठियुक्तस्तक्रमुद्गयूषस्तु खाण्डवः॥ राग
खाण्डवनां यानि शर्करासहितं चेत्॥ पर्युषितं रात्र्यन्तरितं। भुक्तोज्झितमुच्छिष्टं॥ श्वस्पृष्टं शुना स्पृष्टं। पतितेक्षितं
पतितादिभिरीक्षितं उदक्या रजस्वला तया स्पृष्टं उदक्याग्रहणं चाण्डालाद्युपलक्षणार्थं अमेध्यपतितचण्डालपु
ल्कसरजस्वलाकुनखिकुष्ठिसंस्पृष्टान्नं वर्जयेदिति शंखस्मरणात्। को भुक्त इति यदाघुष्य दीयते तत्संघुष्टान्नं।
अन्यसंबन्ध्यन्यव्यपदेशेन दीयते तत्पर्यायान्नं यथा ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्। उभावेतावभोज्यान्नौ
भुक्त्वा चान्द्रायणं चरेदिति। पर्याचान्तमिति पाठे परिगतमाचान्तं गण्डूषग्रहणं यस्मिंस्तत्पर्याचान्तं नं तन्न भोक्तव्यं एत ३४

दुक्तं भवति गण्डूषग्रहणादूर्ध्वमाचमनात्प्राक् न भोक्तव्यं। पार्श्वाचान्तमिति पाठे एकस्यां पंक्तौ पार्श्वस्थ आचान्ते न भो
क्तव्यं। भस्मोदकादिविच्छेदेन विना वर्जयेदिति प्रचेतसं वचनं। तथा गोघ्रातं गवा आघ्रातं। शकुनेन काकादिना
आस्वादितं शकुनोच्छिष्टं। पदा स्पृष्टं बुद्धिपूर्वं पादेन स्पृष्टं वर्जयेत्। पर्युषितस्य प्रतिप्रसवमाह। अन्नं पर्युषितं भोज्यं
स्नेहाक्तं चिरसंस्थितं। अस्नेहा अपि गोधूमयवगोरसविक्रियाः॥ अन्नमदनीयं पर्युषितमपि घृतादिस्नेहसंयु
क्तं चिरकालसंस्थितमपि भोज्यं। गोधूमयवगोरसविक्रियाः मण्डकसक्तुकिलाटकूर्चिकाद्याः अस्नेहा अपि चिर भाषायां रत्नो वा ५
संस्थिता भोज्याः॥ यदि विकारान्तरमनापन्नाः अपूपधानाकरम्भसक्तुयावकतैलपायसशाकानि नाशुक्तानि
वर्जयेदिति वसिष्ठस्मरणात्। संधिन्यनिर्दशावत्सागोपयः परिवर्जयेत्। औष्ट्रमैकशफं स्त्रैणमारण्यकम
याविकं याच्ञषेण संधीयते सा संधिनी। वशां वृषाक्रान्तां विजानीयाद्वृषाक्रान्ता च संधिनीमिति त्रिकाण्डस्मरणात्।
याचैकां वेलामतिक्रम्य दुह्यते या च वत्सान्तरेण धीयते सा संधिनी। प्रसूता अनतिक्रान्तदशाहा अनिर्दशा। मृतव
त्सा अवत्सा। संधिनी च अनिर्दशा च अवत्सा च संधिन्यनिर्दशावत्साः तासां गावस्तासां पयः क्षीरं परिवर्ज
येत्। संधिनीग्रहणं स्यन्दिनीयमसूविरूपलक्षणार्थं। यथाह गौतमः। स्यन्दिनीयमसूसंधिनीनां चेति। स्रवत्स
यः स्तनी स्यन्दिनी। यमसूर्यमलप्रसविनी एवमजामहिष्योरनिर्दशायोः पयः परिवर्जयेत्। गोमहिष्यजानाम

जलासंसृष्टं वस्त्रगालितं हि ८

मि. ३५ निर्देशान्नामिनिवसिष्ठस्मरणात्। पयोग्रहणात्तद्विकाराणां दध्यादीनां निषेधः न हि मांसनिषेधे तद्विकाराणामनिषेधो मुख्य।
युक्तः विकारनिषेधे तु प्रकृतेरनिषेधः पयोनिषेधात्तच्छकृन्मूत्रयोरनिषेधः उष्ट्राज्जातमौष्ट्रं पयोमूत्रादि। एकशफाव
डवादयः तत्प्रभवमैकशफं स्त्रीप्रभवं स्त्रैणं स्त्रीग्रहणमजाव्यतिरिक्तसकलद्विस्तनीनामुपलक्षणार्थं सर्वासां द्वि
स्तनीनां क्षीरमभोज्यमजावर्जमिति शंखस्मरणात्। अरण्ये भवा आरण्याः तदीयमारण्यकं क्षीरं माहिषव्यतिरे
केण आरण्यानां च सर्वेषां मृगाणां माहिषं विनेति वचनात्। अवेर्जातमाविकं वर्जयेदिति प्रत्येकमभिसंबध्यते।
औष्ट्रमिति विकारप्रत्ययनिर्देशात्तद्विकारमात्रस्य पयोमूत्रादेः सर्वदा निषेधः नित्यमाविकमपेयमौष्ट्रमैकश
फं चेति गौतमस्मरणात्। देवतार्थं हविः शिग्रुः लोहितान्व्रश्चनांस्तथा॥ अनुपाकृतमांसानि विड्जानि कवकानि
च। देवतार्थं बल्युपहारनिमित्तं साधितं हविर्देवतार्थसिद्धं प्राग्घोमात् शिग्रुः सौभांजनः लोहितान्वृक्षनिर्या शेग्वा
सान्॥ व्रश्चनप्रभवान् वृक्षच्छेदजातान् लोहितानपि यथाह मनुः लोहितान्वृक्षनिर्यासान्व्रश्चनप्रभवांस्तथेति
। लोहितग्रहणाद्धिंगुकर्पूरादीनामनिषेधः अनुपाकृतमांसानि यज्ञे अहुतस्य पशोर्मांसानि। विड्जानि मनुष्यादिज
ग्धबीजपुरीषोत्पन्नानि पुरीषस्थाने उत्पन्नानि च तंदुलीयकप्रभृतीनि। कवकानि छत्राकाराणि वर्जयेदिति प्रत्ये ३५
कमभिसंबध्यते। क्रव्यादपक्षिदात्यूहशुकप्रतुदटिट्टिभान्। सारसैकशफान्हंसान्सर्वांश्च ग्राम्यवासिनः॥ क्रव्या

तादुकजा इति भाषायां।

अपक्वमांसं

दाः आममांसादनशीलाः पक्षिणो गृध्रादयः॥ दात्यूहश्चातकः॥ शुकः कीरः॥ चंच्वा प्रतुद्य भक्षयंतीति प्रतुदाः श्येना
दयः॥ टिट्टिभः स्वरशब्दानुकारी सारसो लक्ष्मणः॥ एकशफाश्वादयः हंसाः प्रसिद्धाः ग्रामवासिनः पारावतप्रभृतयः
एतान्क्रव्यादादीन्वर्जयेत्। कोयष्टिप्लवचक्राह्वबलाकाबकविष्किरान्। वृथाकृशरसंयावपायसापूपशष्कुलीः॥
कोयष्टिः क्रौंचकः॥ प्लवो जलकुक्कुटः॥ चक्राह्वश्चक्रवाकः॥ बलाकाबकौ प्रसिद्धौ नखैर्विकीर्य भक्षयंतीति विष्कि
राश्चकोरादयः एते गृह्यंते। लावकमयूरादीनां भक्ष्यत्वात् ग्रामकुक्कुटस्य ग्रामवासित्वादेव निषेधाच्च। एतान्कोय
ष्ट्यादीन्वर्जयेत्। वृथा देवताद्युद्देशमंतरेण साधिताः कृशरसंयावपायसापूपशष्कुलीर्वर्जयेत्। कृशरस्तिलमु
द्गसिद्ध ओदनः संयावः क्षीरगुडघृतादिकृत उत्कारिकाख्यः पायसं पयसा संपन्नमन्नं अपूपः अस्नेहकपक्वो गो
धूमविकारः स्नेहपक्वो गोधूमविकारः शष्कुली न पचेदन्नमात्मन इति कृशरादीनां निषेधे सिद्धे पुनरभिधानं प्रा
यश्चित्तगौरवार्थं। कलविंकं सकाकोलं कुररं रज्जुदालकं। जालपादान्खंजरीटानज्ञातांश्च मृगद्विजान्॥ कल
विंको ग्रामचटकः ग्रामनिवासित्वेन प्रतिषेधे सत्युभयचरत्वात्पुनर्वचनं काकोलो द्रोणकाकः कुररः उत्क्रो
शः रज्जुदालकः वृक्षकुट्टकः जालपादाः जालाकारपादाः अजालपादा अपि हंसाः संतीति हंसानां पृथग्वचनं।
खंजरीटाः खंजनाः अज्ञातानि नो ये ज्ञाता मृगाः पक्षिणश्च एतान्कलविंकादीन्वर्जयेत्॥ चाषांश्च रक्तपादांश्च सौनं

मि· वज्जूरमेव चामत्स्यांश्च कामतोजग्ध्वा सोपवासस्त्र्यहं वसेत्। चाषाः किकिदीवयः॥ रक्तपादाः कादंबमत्तपः॥ सोनं
३६ घातस्थाने भवं मांसं भक्ष्याणामपि। वल्लूरं शुष्कमांसं मत्स्यामीनाः एतान् चाषादीन्वर्जयेत्। चकाराल्लालिकाश
णां छत्राककुसंभादीनि। लालिकाशाण छत्राककुसुंभालांबु विड्जवान्। कुंभीककेलुर्दनाककोविदारांश्च वर्जयेत्।
तथाः कालप्ररूढानि पुष्पाणि च फलानि च। विकारवच्च यत्किंचिन्मथ्यत्वेन विवर्जयेत्। तथा वटाप्लक्षाश्वत्थद
कदंब धित्थनीप[illegible]मातुलुंगफलानि वर्जयेदित्यादिस्मरणात्। एतान्संधिनीक्षीरप्रभृतीननुक्रांतान्कामतो भक्षयित्वा
त्रिरात्रमुपवसेत् अकामतस्त्वहोरात्रं शेषेषूपवसेदहरिति मनुस्मरणात्। यत्तु नः शोरवेनोक्तं॥ बकबलाकाहंस
पू. [illegible]वचक्रवाककारंडवगृह्चटककपोतपारावतपांडुशुकसारिकासारसटिट्टिभोलूककंकरक्तपादचाषभास
वायसकोकिलशार्ङ्गलिककुक्कुटहारीतभक्षणे द्वादशरात्रमनाहारः पिबेद्गोमूत्रयावकमिति तद्बुकालाभ्या
सेमतिपूर्वे समस्तभक्षणे वा वेदितव्यं। पलांडुं विड्वराहं च छत्राकं ग्रामकुक्कुटं लशुनं गृंजनं चैव जग्ध्वा चांद्राय
णं चरेत्। पलांडुः स्थूलकंदनालो लशुनानुकारी। विड्वराहो ग्रामसूकरः छत्राकं सर्पछत्रं। ग्रामकुक्कुटः प्रसिद्धः
लशुनं रसोनं सूक्ष्मश्वेतकंदनालं। गृंजनं लशुनानुकारी लोहितसूक्ष्मकंदः एतानि षट् सकृत्कामतो जग्ध्वा भ ३६
क्षयित्वा चांद्रायणं वक्ष्यमाणलक्षणं चरेत्। ग्रामकुक्कुटछत्राकयोः पूर्वप्रतिषिद्धयोरिहाभिधानं पलांड्वादि

समानप्रायश्चित्तार्थं· मतिपूर्वं चिरतराभ्यासे तु· छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं। पलांडुं गृंजनं चैव मत्या जग्ध्वा प
तेद्द्विज इति मनूक्तं। अमतिपूर्वाभ्यासे। अमत्यैतानि षड्जग्ध्वा कृच्छ्रं सांतपनं चरेत्। यतिचांद्रायणं वापी तिद्रष्टव्यं॥ अ
मतिपूर्वानभ्यासे तु शंखेनोक्तं। लशुनपलांडुगृंजनविड्वराहग्रामकुक्कुटकुंभीकभक्षणे द्वादशरात्रं पयः पिबेदिति। भ
क्ष्याः पंचनखाः सेधागोधाकच्छपशल्लकाः॥ शशश्च मत्स्येष्वपि हि सिंहतुंडकरोहिताः॥ तथा पाठीनराजीवसश
ल्काश्च द्विजातिभिः सेधाश्वाविद् गोधा कृकलासानुकारिणी महती· कच्छपः कूर्मः शल्लकः शल्लकीः शशाः प्रसिद्धः पंचनखानां
श्वमार्जीरवानरादीनां मध्ये एते सेधादयो भक्ष्याः चकारात् खङ्गोपि यथा गौतमः पंचनखाश्च शल्लकशशकश्वाविङ्गो
धाखड्गकच्छपा इति। तथा च मनुरपि। श्वाविधं शल्लकं गोधां खड्गकूर्मशशांस्तथा। भक्ष्यान्पंचनखेष्वाहुरनुष्ट्रांश्चैक
तोदतः इति। यत्तु नर्वसिष्ठेन। खड्गे तु विवदंतः इत्यभक्ष्यत्वमुक्तं तच्छ्राद्धादन्यत्र॥ खड्गमांसेन भवेदनंतमक्षय्यं पितृकर्म
णीति श्राद्धे फलश्रुतिदर्शनात्। तथा च मत्स्यानां मध्ये सिंहतुंडादयो भक्ष्याः सिंहतुंडः सिंहमुखः रोहितो लोहितव
र्णः पाठीनश्चंद्रकाख्यं राजीवः पद्मवर्णः सहशल्कैः शुक्तयाकारैर्वर्त्तत इति सशल्काः एते च सिंहतुंडादयो नियुक्ता
एव भक्ष्याः पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः राजीवाः सिंहतुंडाश्च सशल्काश्चैव सर्वत इति मनुस्मरणात्।
द्विजातिग्रहणं शूद्रव्युदासार्थं। अनर्चितं वृथा मांसमित्यादावपि द्विजातिधर्मानुक्त्वेदानीं चातुर्वर्ण्ये प्रस्यादः। अतः

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

शृणुध्वं मांसस्य विधिं भक्षणवर्जने। मांसस्य प्रोक्षितादेर्भक्षणे तद्व्यतिरिक्तस्य च निषिद्धस्य वर्जने प्रोक्षितादिव्यतिरेकेण
मांसं न भक्षयामीत्येवं संकल्परूपे विधिं सामश्रवःप्रभृतयो हे मुनयः शृणुध्वं तत्र भक्षणे विधिं दर्शयति। प्राणात्यये श्राद्धे प्रो यथेतथा
क्षितं द्विजकाम्यया॥ देवान्पितॄन्समभ्यर्च्य खादन्मांसं न दोषभाक्। अन्नाभावेन व्याध्यभिभवेन वा मांसभक्षणमंतरेण
यदा प्राणबाधा भवति तदा नियमेन मांसं भक्षयेत्। सर्वत एवात्मानं गोपायेदित्यात्मरक्षणविधानात्। तस्मादुद्दनपुरापुषः
स्वकामी प्रेप्यादिनिमरणं निषेधाच्च। तथा श्राद्धे मांसं निमंत्रितो नियमेन भक्षयेत्। अभक्षणे दोषश्रवणात्। यथाविधि
नियुक्तस्तु यो मांसं नात्ति मानवः। स प्रेत्य पशुतां याति संभवानेकविंशतिमिति। प्रोक्षणाख्येन संस्कारेण संस्कृतस्य यज्ञो
पयोगार्थस्याग्नीषोमीयादेर्हुतावशिष्टं मांसं प्रोक्षितं तद्भक्षयेत्। अभक्षणे यागानिष्पत्तेः। द्विजकाम्यया ब्राह्मणभोजनार्थं
देवपित्रर्थं च यत्साधितं तेन तदानभ्यर्च्यावशिष्टं भक्षयन्न दोषभाग्भवति। एवं भृत्यभरणावशिष्टमपि। यज्ञार्थं ब्राह्मणै
र्वध्याः प्रशस्ता मृगपक्षिणः। भृत्यानां चैव वृत्त्यर्थमगस्त्यो ह्याचरत्पुरेति मनुस्मरणात्। न दोषभागिति दोषाभावमात्रं
वदता अतिथ्याद्यर्चनावशिष्टस्याभ्यनुज्ञामात्रं न प्रोक्षितादिवन्नियम इति दर्शितं। एवमप्रतिषिद्धानामपि श्रा
दीनां प्राणात्ययादिव्यतिरेकेण भक्ष्यत्वावगमात् शूद्रस्यापि मांसप्रतिषिद्धवर्ज्यं सर्वविधिनिषेधाधिकारो गम्यते। १ ३७
इदानीं प्रोक्षितादिव्यतिरिक्तस्य वृथामांसमित्यनेन प्रतिषिद्धस्य भक्षणे निंदार्थवादमाह। वसेत्स नरके घोरे दिना

नि पशुरोमभिः। संमितानि दुराचारो यो हंत्यविधिना पशून्। अविधिनादेवाद्युद्देशमंतरेण यः पशून्हंति स तस्य पशोर्यावं
ति रोमाणि तावंति दिनानि घोरे नरके वसति। हंतीत्यत्र विधोघातकोपलक्ष्यते। यथाह मनुः। अनुमंता विशसिता निहंता
क्रयविक्रयी। संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः। इदानीं। वर्जने विधिमाह। सर्वान्कामानवाप्नोति हयमेधफ
लं तथा। गृहेऽपि निवसन्विप्रो मुनिर्मांसविवर्जनात्। यः प्रोक्षितादिव्यतिरेकेण मया मांसं न भक्षितव्यमिति स संकल्पो स्य
भवति स सर्वान्कामान् तत्तत्साधने प्रवृत्तो निर्विघ्नं प्राप्नोति विशुद्धात्मत्वात्। यथाह मनुः। यद्ध्यायति यत्कुरुते रतिं बध्ना
ति यत्र च। तदवाप्नोत्ययत्नेन यो हिनस्ति न किंचनेति। एतच्चानुषंगिकं फलं। मुख्यं फलमाह। हयमेधफलं तथेति
। एतच्च सांवत्सरिकसंकल्पस्य। वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः। मांसानि च न खादेद्यस्तयोः पुण्यफलं स
मनिति मनुस्मरणात्। तथा गृहेऽपि निवसन्ब्राह्मणादिस्त्रैवर्णिको मुनिवन्माननीयो भवति मांसस्य त्यागात्।
एतच्च न प्रतिषिद्धमांसविषयं नापि प्रोक्षितादिविषयं। यादिरोध्यादतिथ्याद्यर्चनशिष्टाभ्यनुज्ञानद्विषयमि
ति॥ इति भक्ष्याभक्ष्यप्रकरणं॥ इदानीं द्रव्यशुद्धिमाह। सौवर्णराजताब्जानामूर्ध्वपात्रग्रहाश्मनां। शाकरज्जुमू
लफलवासोविदलचर्मणां। पात्राणां चमसानां च वारिणा शुद्धिरिष्यते। सौवर्णं सुवर्णकृतं। राजतं रजतकृतं। अब्ज
तं अब्जं मुक्ताफलशंखशुक्त्यादि। ऊर्ध्वपात्रं पात्रीयोलूखलादि॥ ग्रहादिसाहचर्यात्॥ ग्रहाः सोऽग्निप्रभृतयः

नयथा मि. ३८
अश्मादृषदादि॥ शाकं वास्तुकादि। रज्जुर्वल्वजादिनिर्मिता॥ मूलमार्द्रकादि। फलमाम्रादि। वासो वस्त्रं। विदलं वैणवादि। च
र्मोजारीनां॥ विदलचर्मणोर्ग्रहणं तद्विकाराणां छत्रशूर्पवर्वरकादीनामुपलक्षणार्थं। पात्राणि प्रोक्षणीपात्रप्रभृतीनि। चर्मरज्जुः
चमसाद्योत्चमसादयः एतेषां सौवर्णादीनां लेपरहितानामुच्छिष्टस्पर्शमात्रे वारिणा प्रक्षालनेन शुद्धिः। चरुस्रुक्स्रु
वसस्नेहपात्राण्युष्णेन वारिणा। चरुश्चरुस्थाली। स्रुक्स्रुवौ प्रसिद्धौ सस्नेहानि पात्राणि प्राशित्रहरणादीनि एतानि
चलेपरहितानि उष्णेन वारिणा शुध्यन्ति। निर्लेपं कांचनं भाण्डमद्भिरेव विशुध्यति। अब्जमश्ममयं चैव राजतं चानुपस्कृत
मिति मनुस्मरणात्। अनुपस्कृतमरवातपूरितं। सलेपानां तु तैजसानां मणीनां तु सर्वस्याश्ममयस्य च। भस्मनाद्भिर्मृदा
चैव शुद्धिरुक्ता मनीषिभिरिति मनूक्तं द्रष्टव्यं। स्रुचस्रवनोरेककार्यत्वाद्विकल्पः आपस्तु समुच्चीयंते। काकादिमुखोप
घातेतु रूस्नशकुनिमुखावमर्षं संपात्रं निर्लिखेत्। श्वापदमुखावमर्षं पात्रं न प्रयुंजीतेति द्रष्टव्यं। एतच्च मार्जारादन्य
त्र। मार्जारश्चैव दर्वी च मारुतश्च सदाशुचिरिति मनुस्मरणात्। स्फ्यशूर्पाजिनधान्यानां मुसलोलूखलानसां। स्फ्यो
वज्रायज्ञांगं। अनः शकटं शेषं प्रसिद्धं। एतेषामुष्णेन वारिणा शुद्धिः पुनरजिनग्रहणं यज्ञांगाजिनप्राप्त्यर्थं। प्रोक्षणं
संहतानां च बहूनां धान्यवाससां। संहतानां मुक्तशुद्धिद्रव्याराशावयविनां बहूनां वाससां। वासोग्रहणमुक्तशुद्धीनामु ३८
पलक्षणं। उक्तशुद्धीनां धान्यवासः प्रभृतीनां बहूनां राशीकृतानां प्रोक्षणेनैव शुद्धिः बहुत्वं च स्पृश्यापेक्षया। एतदु

क्तं भवति॥ यदा धान्यानि वस्त्रादीनि वा राशीकृतानि तत्र चांडालादिभिः स्पृष्टान्यल्पानि बहूनि वा स्पृष्टानि तत्र स्पृ
ष्टानामुक्तैव शुद्धिरितरेषां प्रोक्षणमिति। तथा च स्मृत्यंतरे। वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे। तावन्मा
त्रं समुद्धृत्य शेषं प्रोक्षणमर्हतीति। यदा पुनः स्पृष्टानां बहुत्वमस्पृष्टानां चाल्पत्वं तदा सर्वेषामेव क्षालनं। यथा
ह मनुः अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससां। प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयत इति॥ स्पृष्टानां
मस्पृष्टानां च समत्वेपि प्रोक्षणमेव। बहूनां प्रोक्षणविधाने नाल्पानां क्षालने सिद्धे पुनरल्पानां क्षालनवचनस्य स
मेषु क्षालननिवृत्त्यर्थत्वात्। ईषत्स्पृष्टमीषदस्पृष्टमित्यविवेके तु क्षालनमेव पाक्षिकस्यापि दोषस्य परिहार्यत्वात्
अनेकपुरुषोद्धार्याणां तु धान्यवासः प्रभृतीनां स्पृष्टानामस्पृष्टानां च प्रोक्षणमेवेति निबंधकृतः॥ निर्लेपानां स्प
र्शमात्रदुष्टानां शुद्धिमुक्त्वेदानीं सलेपानां शुद्धिमाह। तक्षणं दारुशृंगास्थ्नां गोवालैः फलसंभुवां। मार्जनं यज्ञपा
त्राणां पाणीना यज्ञकर्मणि। दारूणां मेषमहिषादिशृंगाणां॥ करिवराहादास्थ्नां अस्थिग्रहणेन दंतानामपि ग्र
हणं उच्छिष्टस्नेहादिलिप्तानां मद्यमूत्रोदकादिभिरनपगतलेपानां। यावन्मात्रे पैत्यमेध्याक्तांगं धोलेपश्चनकृत
ः॥ तावन्मात्रापरिचारेयं सर्वा सुद्रव्यशुद्धिरिति साम्यशुद्धिविधानात्। तक्षणं तावन्मात्रावयवापनयनं शुद्धि
ः॥ फलसंभुवां बिल्वालाबुनालिकेरादिफलसंभूतानां पात्राणां गोवालैरुद्घर्षणं शुद्धिः॥ यज्ञपात्राणां स्रुक्स्रुवादी

मि· ३९ नौयज्ञकर्मणिप्रयुज्यमानानांदक्षिणेनहस्तेनदर्भेणपवित्रेणवा।यथाशास्त्रंकर्मांगतयामार्जनंकर्तव्यं॥एतच्च सुवर्णे
श्रौतमुदाहरणमन्येषामपिसौवर्णादीनांपात्राणांस्मार्तेलौकिकेकर्मसुरूक्षशौचानामेवांगत्वमितिदर्शयितुंय
ज्ञांगानांपुनःरूक्षशौचानामिदंदर्भपवित्रादिभिर्मार्जनंसंस्कारार्थमितिविशेषः॥इदानींसलेपानामेवकेषांचिल्लेपा
सोष्णै पकर्षणेविशेषहेतूनाह॥सोषैरुदकगोमूत्रैःशुध्यत्याविककौशिकं।सश्रीफलैरंशुपट्टंसारिष्टैःकुतपंतथा॥ऊषर उत्तर
मृत्तिकासहितेनगोमूत्रेणोदकेनवालेपापेक्षयाआविकमूर्णामयंकौशिकंकोशप्रभवंनसरीसृपादिप्रक्षालितंशु प
ध्यति।उदकगोमूत्रैरितिबहुवचनंपश्चादप्युदकप्राप्त्यर्थं।अंशुपट्टंवल्कलतंतुकृतंसश्रीफलैर्बिल्वफलसहितैः॥
कुतपंपार्वतीयछागरोमनिर्मितंकंबलंरिष्टफलसहितैःफेनकसहितैरुदकगोमूत्रैःशुध्यतीत्यनुवर्तते।एत
च्चोच्छिष्टस्नेहादियोगेसतिवेदितव्यं।अल्पोपघातेतुप्रोक्षणादिःक्षालनासंभवात्सर्वत्रद्रव्यविनाशेनैवशुद्धेरि
ष्टत्वात्।तथाचदेवलः।और्णकौशेयकुतपपट्टक्षौमदुकूलजाः।अल्पशौचाभवंत्येतेशोषणप्रोक्षणादिभिरित्यभि
धायाह।तान्येवामेध्ययुक्तानिक्षालयेच्छोधनैःस्वकैः।धान्यकल्कैस्तुफलजैःरसैःक्षारानुगैरपीति।क्षौमवद्देवत्राण
स्यसमानयोनित्वात्।और्णादिग्रहणंनहारधनूलिकादिप्राप्त्यर्थंअतस्तस्याल्पोपघातेनैवक्षालनंकार्यममेध्यले ३९
पाद्यन्यत्र॥तूलिकाद्युपधानंचपुष्परक्तांबरंतथा।शोषयित्वातपेकिंचित्करैःसंमार्जयेन्मुहुः।पश्चाच्चवारिणा

प्रोक्ष्यविनियुंजीतकर्मणि।तान्यप्यभिमलिष्टानियथावत्परिशोधयेदितिदेवलस्मरणात्।पुष्परक्तानिकुंकुमकुसुं
मादिरक्तानि।पुष्परक्तग्रहणमन्यस्यापिहरिद्रादिरक्त[illegible]स्यक्षालनासहस्यप्राप्त्यर्थं।नमांजिष्ठादेःतस्यक्षालनस
हत्वात्।शंखेनाप्युक्तं।रागद्रव्याणिप्रोक्षितानिशुचीनीति।सगौरसर्षपैःक्षौमंपुनःपाकान्महीमयं।गौरसर्ष
पसहितैरुदकगोमूत्रैःक्षौमं॥क्षुमाअतसीतत्सूत्रनिर्मितंक्षौमंशुध्यति।पुनःपाकेनचमृन्मयंघटादिःएत
च्चोच्छिष्टस्नेहलिप्तेवेदितव्यं।चंडालाद्युपघातेतुत्यागएव।यथाहपराशरः।चंडालाद्यैस्तुसंस्पृष्टंधान्यंवस्त्रम
थापिवा।प्रक्षालनेनशुध्येतपरित्यागान्महीमयमिति।कारुहस्तःशुचिःपण्यंभैक्ष्यंयोषिन्मुखंतथा।कारवोरज
कचेलधावकसूपकारादयस्तेषांहस्तःशुचिःशुचित्वंचतत्साध्येकर्मणिवस्त्रधावनादौसूतकादिसंभवेपि।तथाच
स्मृत्यंतरं।कारवःशिल्पिनोवैद्यादासीदासास्तथैवच।राजानोराजभृत्याश्चसद्यःशौचाःप्रकीर्तिताइति।पण्यं॥ ५८
कर हिविक्रेयंयवव्रीह्यादिअनेकक्रेतृजनैःपरिघृहीतमप्यविद्धंभवतिसूतकादिनिमित्तेचवणिजां॥भिक्षायांसमु प्रयतं
द्दोभैक्ष्यंतद्ब्रह्मचर्यादिगतंअनाचांतस्त्रीप्रदानाद्युच्छिष्टाक्रमणादिनापिनदुष्यति।तथायोषितांमुखंसंभोगका
लेशुचिस्त्रियश्चरतिसंसर्गइतिस्मरणात्॥इदानींभूशुद्धिमाह॥भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा॥सेका
दुल्लेखनाल्लेपाद्गृहंमार्जनलेपनात्।मार्जन्यापांसुतृणादीनांप्रोत्सारणंमार्जनं।दाहस्तृणकाष्ठाद्यैःकालोयाव

मि·
४०

ताकालेनलेपक्षयो भवति नावान्न। गोक्रमणं गवां पादपरिघट्टनं। सेकः क्षीरगोमूत्रगोमयवारिभिः॥ प्रवर्षणं वा। उल्ले
खनं तक्षणं। खननं वा॥ लेपो गोमयादिभिः॥ एतैर्मार्जनादिभिः समस्तैर्व्यस्तैर्वा अमेध्या दुष्टा मलिना च भूमिः शुध्य
ति। तथा च देवलः। यत्र प्रसूयते नारी म्रियते दह्यतेपि वा। चंडालाध्युषितं यत्र यत्र विष्ठादिसंगतिः। एवं कश्मलभू पावन
यिष्ठा भूरमेध्या प्रकीर्तिता। श्वसूकरखरोष्ट्रादिसंस्पृष्टा दुष्टतां व्रजेत्। अंगारतुषकेशास्थिभस्माद्यैर्मलिना भ
वेदित्यमेध्या दुष्टा मलिना चेति त्रैविध्यमभिधाय शुद्धिविभागं दर्शयति। पंचधा वा चतुर्धा वा भूरमे
ध्या विशुध्यति। दुष्टा त्रिविधा त्रिधा शुध्यते मलिना कथेति। यत्र मनुष्याः प्रसूयन्ते यत्र चंडालैरध्युषितं तयोः
पंचभिर्दहनकालगोक्रमणसेकोल्लेखनैः शुद्धिः॥ यत्र मनुष्या जायंते यत्र च म्रियंते यत्र चास्थिनं विष्ठादिसंगति
स्तासां च दाहवर्जितैरेव चतुर्भिः॥ श्वसूकरखरैश्चिरकालमध्युषिताया गोक्रमणसेकोल्लेखनैस्त्रिभिः उष्ट्रग्रा
मकुक्कुटादिभिश्चिरकालमधिवासितायाः सेकोल्लेखनाभ्यां शुद्धिः अंगारतुषादिभिश्चिरकालमधिवासितायाः
उल्लेखनेन शुद्धिः मार्जनानुलेपने तु सर्वत्र समुच्चीयेते॥ एवं गृहं मार्जनानुलेपनाभ्यां शुध्यति। गृहस्य स्पष्टगुपाद
नं संमार्जनलेपनयोः प्रतिदिवसं प्राप्त्यर्थं। गोघ्रातेन्नं तथा केशमक्षिकाकीटदूषिते। सलिलं भस्म मृद्वापि प्रक्षेप ४०
व्यं विशुद्धये। गोघ्राते गोनिश्वासोपहते अन्ने ओदनीयमात्रे तथा केशमक्षिकाकीटदूषिते। केशग्रहणं लोमा

दिप्राप्त्यर्थं। कीटाः पिपीलिकादयः उदकं भस्म मृद्वा यथासंभवं प्रक्षेप्तव्यं शुद्ध्यर्थं। यत्तु गौतमेनोक्तं नित्यमभोज्यं केशकीटा
वपन्नमिति॥ तत्केशकीटादिभिः सहपक्वं तद्विषयं। त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः॥ भस्माद्भिः कांस्यलो
हानां शुद्धिः प्लावो द्रवस्य तु। त्रपुप्रभृतीनि प्रसिद्धानि तेषां क्षारोदकेनाम्लोदकेन वारिणा चोपघातापेक्षया समस्तैर्व्यस्तै
[illegible] र्वा शुद्धिः कार्या। कांस्यलोहानां भस्मोदकेन। ताम्रग्रहणं रीतिकायाः लोहयोर्ग्रहणं एकयोनित्वात्। एतच्च ताम्रादीनाम पीतल
म्लोदकादिभिः शुद्ध्यभिधानं नियमार्थं॥ मलसंयोगजं तज्जं यस्य येनोपहन्यते। तस्य तच्छोधनं प्रोक्तं सामान्यं द्रव्य
शुद्धिकृदित्यविशेषस्मरणात्। अतो न ताम्रादेरुच्छिष्टोदकादिलेपस्यान्येनापगमसंभवे नियमेनाम्लादिना शुद्धिः कार्या
। अत एव मनुना सामान्येनैवोक्तं। ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च। शौचं यथार्हं कर्तव्यं क्षारा[illegible]म्लोदकवा
रिभिरिति। यत्तु भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यतीति। तत्ताम्रादेः शौचस्य परां काष्ठां प्रतिपादयितुं। नान्यनिषे
धाय। यदा तूपघातातिशयस्तदाम्लोदकादीनामावृत्तिः। गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च। शुध्यंति दश
भिः क्षारैः श्वकाकोपहतानि चेति स्मरणात्। शुद्धिः प्लावो द्रवस्य तु इति। द्रवद्रव्यस्य घृतादेः प्रस्थप्रमाणाधिकस्य श्वका तीव
काद्युपहतस्य अमेध्यसंस्पृष्टद्रव्यस्पृष्टस्य च प्लावः प्लवनं समानजातीयेन द्रव्येण भांडस्यातिपूरणं यावन्निस्सरणं
शुद्धिरित्यनुवर्तते। ततोल्पस्य त्यागः बहुत्वमल्पत्वं च देशकालापेक्षया प्रतिदिनव्यापियादवोधायनः। देशकाले तथा

मि॰
४१

त्मानं द्रव्यं द्रव्यप्रयोजनं। उपपत्तिमवस्थां चज्ञात्वा शौचं प्रकल्पयेदिति। कीटाद्युपहतस्य तूत्पवनं। यथाह मनुः। द्रवाणां
चैव सर्वेषां शुद्धिरुत्पवनं स्मृतमिति। उत्पवनं चात्र वस्त्रोत्तरितेन पात्रे प्रक्षेपः अन्यथा कीटापगमस्यासंभवात्। शूद्र
भांडस्थितस्य तु मधूदकादेः पात्रांतरानयनाच्छुद्धिः मधूदके पयसि विकाराश्च पात्रात्पात्रांतरानयनाच्छुद्धा इति बौ हीनवर्णस्थात
धायनस्मरणात्। मधुघृतादेर्हीनवर्णोपहतस्यापि पात्रांतरानयनं पुनः पवनं च कार्यं। यथाह शंखः। अन्यवर्ण
र्यो घृतादीनाभिघारितानां पुनः पवनमेव स्नेहानां स्नेहवद्रसानामिति। एवं सौवर्णराजतादीनामेतत्प्रकरणप्र
तिपादितानां सर्वेषामुच्छिष्टस्नेहाद्युपघाते शुद्धिमुक्त्वेदानीं तेषामेवामेध्योपहतानां शुद्धिमाह। अमेध्याक्तस्य
मत्तोयैः शुद्धिर्गंधापकर्षरणात्॥ अमेध्याः शरीरजा मलाः वसासृक्छुक्रादयः वसा शुक्रमसृङ्मज्जा मूत्रविट्कर्णवि वसुमत
विण्नखाः श्लेष्मास्थिदूषिकास्वेदो द्वादशैते नृणां मलाः तथा मानुषास्थिशवं विष्ठा रेतो मूत्रार्तवं वसा। स्वेदा
श्रुदूषिकाश्लेष्ममद्यं चामेध्यमुच्यत इति मनुदेवलादिप्रभृतिप्रतिपादिताः तैर्वसादिभिरक्तं लिप्तममेध्या
क्तं तस्य मृदा तोयेन शुद्धिः कर्तव्या॥ गंधापकर्षणेन लेपस्यापि ग्रहणं। यथाह गौतमः लेपगंधापकर्षणे शौच
ममेध्यलिप्तस्येति। सर्वशुद्धिषु मयं मत्तोयैरेव लेपगंधापकर्षणं कार्यं। अशक्तावन्येन॥ तदद्भिः पूर्वं मृदा ४१
चेति गौतमवचनात्। वसादिग्रहणं च सर्वेषाममेध्यत्वं प्रतिपादयितुं न स मान्यापघातापाः मद्यमूत्रपुरीष

श्लेष्मपूयाश्रुशोणितैः॥ संसृष्टं नैव शुद्ध्येत पुनः पाकेन मृन्मयमित्युपघातविशेषाभिधानात्। अमेध्यत्वं चैषां देहा
च्चैव मलाश्च्युता इति वचनात् देहच्युतानामेव न स्वस्थानावस्थितानां। पुरुषस्य नाभेरूर्ध्वं करव्यतिरिक्तानामंगा
नाममेध्यस्पर्शे स्नानं। यथाह देवलः मानुषास्थि वसां विष्ठामार्तवं मूत्ररेतसी। मज्जानं शोणितं स्पृष्ट्वा परस्य स्ना
नमाचरेत्। तान्येव स्वानि संस्पृश्य प्रक्षाल्याचम्य शुध्यतीति॥ तथा ऊर्ध्वं नाभेः करौ मुक्त्वा यदंगमुपहन्यते। तत्र स्नान
मधस्तात्तु प्रक्षाल्याचम्य शुध्यति। वाकुशस्तमंबु निर्णिक्तमज्ञातं च सदा शुचि। कृतेपि यथोक्ते शौचे मनसः परितो
षाय त्र शुद्धिसंदेहो भवति तद्वाकुशस्तं शुचि। शुद्धमेतदस्त्विति ब्राह्मण वचनेन शुद्धं भवतीत्यर्थः। अंबुनिर्णिक्तं य
स्य प्रतिपदोक्ता शुद्धिर्नोक्ता तस्य प्रक्षालनेन शुद्धिः प्रक्षालनासहस्य प्रोक्षणेन। अज्ञातं च सदा यत्काकाद्युपहतमु
पयुक्तं न कदाचिदपि ज्ञापते। तच्छुचि॥ तदुपभोगाददृष्टदोषो नास्तीत्यर्थः। नन्वेतद्विरुध्यते। संवत्सरस्यैकमपि
चरेत्कृच्छ्रं द्विजोत्तमः अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः इत्यदृष्टदोषेपि प्रायश्चित्तप्रतिपादनात्। नैतत्।
प्रायश्चित्तस्य ज्ञात्विविषयत्वात्। दोषाभावस्य चान्योपयोगविषयत्वात्। शुचिगोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतं। त
यामांसं श्वचंडालक्रव्यादादिनिपातितं॥ महीगतं भूमिष्ठं उदकं॥ एकगवीतृप्तिजननसमर्थं चंडालादिभिरसंस्पृष्टं
प्रकृतिस्थं रूपरसगंधस्पर्शांतरमनापन्नं शुचि॥ आचमनादियोग्यं भवति। महीगतमिति भूम्युद्धृतस्याशुचित्व

मि॰
४१

मानं द्रव्यं द्रव्यप्रयोजनं। उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति। कीटाद्युपहतस्य तूत्प्लवनं। यथाह मनुः द्रवाणां
चैव सर्वेषां शुद्धिरुत्प्लवनं स्मृतमिति। उत्प्लवनं चात्र वस्त्रान्तरितेन पात्रे प्रक्षेपः अन्यथा कीटाद्यपगमस्यासंभवात्। शूद्र
भांडस्थितस्य तु मधूदकादेः पात्रान्तरानयनाच्छुद्धिः मधूदके पयसि विकारे च पात्रात्पात्रान्तरानयनाच्छुद्धिरिति बौ
धायनस्मरणात्। मधुघृतादेर्वर्णापसदहस्तान्प्राप्तस्य पात्रान्तरानयनं पुनः पवनं च कार्यं। यथाह शंखः अभ्यवहा
र्याणां घृतेनाभिघारितानां पुनः पवनमेव स्नेहानां स्नेहवद्रसानामिति। एवं सौवर्णराजतादीनामेतत्प्रकरणप्र
तिपादितानां सर्वेषामुच्छिष्टस्नेहाद्युपघाते शुद्धिमुक्त्वेदानीं तेषामेवामेध्योपहतानां शुद्धिमाह। अमेध्याक्तस्य
मृत्तोयैः शुद्धिर्गंधापकर्षणात्॥ अमेध्याः शरीरजा मलाः वसाशुक्रादयः "वसा शुक्रमसृङ्मज्जा मूत्रविट्कर्ण
विण्नखाः" श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः" तथा मानुषास्थि शवं विष्ठा रेतो मूत्रार्तवं वसा। स्वेदा
श्रु दूषिका श्लेष्म मद्यं चामेध्यमुच्यत इति मनुदेवलादिप्रभृतिप्रतिपादिताः तैर्वसादिभिरक्तं लिप्तममेध्या
क्तं तस्य मृदा तोयेन शुद्धिः कर्तव्या॥ गंधापकर्षणेन त्रेपस्यापि प्रहरणं। यथाह गौतमः लेपगंधापकर्षणे शौच
ममेध्यलिप्तस्येति। सर्वशुद्धिषु प्रथमं मृत्तोयैरेव लेपगंधापकर्षणं कार्यं। अशक्तावन्येन॥ तदद्भिः पूर्वं मृदा
चेति गौतमवचनात्। वसादिग्रहणं च सर्वेषाममेध्यत्वं प्रतिपादयितुं न समान्योपघातापा॥ मद्यैर्मूत्रपुरीषैः ४१

श्लेष्मपूयाश्रुशोणितैः॥ संस्पृष्टं नैव शुद्ध्येत पुनः पाकेन मृन्मयमित्युपघातविशेषाभिधानात्। अमेध्यत्वं चैषां देहा
च्चैव मला श्च्युता इति वचनात् देहच्युतानामेव न स्वस्थानावस्थितानां। पुरुषस्य नाभेरूर्ध्वं करव्यतिरिक्तानामंगा
नाममेध्यस्पर्शे स्नानं। यथाह देवलः मानुषास्थि वसां विष्ठामार्तवं मूत्ररेतसी। मज्जानं शोणितं स्पृष्ट्वा परस्य स्ना
नमाचरेत्। तान्येव स्वानि संस्पृश्य प्रक्षाल्याचम्य शुद्ध्यतीति॥ तथा ऊर्ध्वं नाभेः करौ मुक्त्वा यदंगमुपहन्यते। तत्र स्नान
मधस्तात्तु प्रक्षाल्याचम्य शुध्यति। बाकुशाक्तं तु निर्णिक्तमज्ञानं च सदा शुचि। कृतेऽपि यथोक्ते शौचे मनसोऽपरितो
षाद्यत्र शुद्धिसंदेहो भवति तद्वाक्कुशस्तं शुचि। शुद्धमेतदस्त्विति ब्राह्मण वचनेन शुद्धं भवतीत्यर्थः। अंबुनिर्णिक्तं य
स्य प्रति परोक्षा शुद्धिर्नास्ति तस्य प्रक्षालनेन शुद्धिः प्रक्षालनासहस्य प्रोक्षणेन। अज्ञातं च सदा यत्काकाद्युपहतमु
पयुक्तं न कदाचिदपि ज्ञायते। तच्छुचि॥ तदुपभोगाद्दृष्टदोषो नास्तीत्यर्थः नन्वेतद्विरुध्यते। संवत्सरस्यैकमपि
चरेत्कृच्छ्रं द्विजोत्तमः" अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषत इत्यदृष्टदोषेपि प्रायश्चित्तप्रतिपादनात्। नैतत्।
प्रायश्चित्तस्य जन्यिविषयत्वात्। दोषाभावस्य चान्योपयोगिविषयत्वात्। शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतं। त
था मांसं श्वचंडालक्रव्यादादिनिपातितं॥ महीगतं भूमिष्ठं उदकं॥ एकगवीतृप्तिजनन समर्थं चंडालादिभिरसंस्पृष्टं
प्रकृतिस्थं रूपरसगंधस्पर्शांतरमनापन्नं शुचि॥ आचमनादियोग्यं भवति। महीगतमिति भूमिगतस्य शुचित्व

Dr. Bhau Daji Memorial

मि·
४२
निषेधार्थं न चांतरिक्षोदकस्य शुद्धत्वव्याहत्यर्थं। नाप्युद्धृतस्य। उद्धृताश्चापि शुद्ध्यंति शुद्धैः पात्रैः समुद्धृताः॥ एकरात्रो
षितास्त्वापस्त्याज्याः शुद्धा अपि स्वयमिति देवलवचनात्। तथा चांडालादिकृतेन तडागादौ न दोषः। अंत्यैरपि कृते कू
पे सेतौ वाप्यादिके तथा। तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यत इति शातातपस्मरणात्। तथा मांसं श्वचांडाल
क्रव्यादादिनिपातितं शुचि॥ आदिग्रहणात् पुल्कसादेरपि ग्रहणं। निपातितग्रहणं भक्षितस्य निराकरणार्थं। रश्मि
रग्नी रजश्छाया गौरश्वो वसुधानिलः। विप्रुषो मक्षिकाः स्पर्शे वत्सः प्रस्रवने शुचिः॥ रश्मयः सूर्यादिः प्रकाशद्रव्यस्य।
अग्निः प्रसिद्धः रजः अजादिसंबंधिव्यतिरेकेण। तत्र श्वकाकोष्ट्रखरोलूकसूकरग्राम्यपक्षिणां। अजाविरेणुसं
स्पर्शादायुर्लक्ष्मीश्च हीयत इति दोषश्रवणात् संमार्जनादिकार्यं। छाया वृक्षादेः गौः अश्वः वसुधा भूमिः अनिलो वा
युः विप्रुषो वक्त्रात् बिंदवः॥ मुखजानां वक्ष्यमाणत्वात्। मक्षिकाश्चैते चांडालादिस्पृष्टा अपि स्पर्शे शुचयः वत्सः प्रस्र य
वने दुग्धाकर्षणे शुचिः वत्सग्रहणं बालस्योपलक्षणार्थं। बालैरनुपरिक्रांतं नित्यं मेध्यमिति स्थितिरिति
ति वचनात्। अजाश्वं मुखतो मेध्यं न गौर्न नरजा मलाः। पंथानश्च विशुद्ध्यंति सोमसूर्यांशुमारुतैः॥ अजाश्वयोर्मु
खं मेध्यं। न गौर्न नरजा मलाः॥ नरशब्दो लक्षणया देहमभिधत्ते तज्जा मला वसाद्या मेध्या न भवंति॥ पंथानो ४२
मार्गाश्चांडालादिस्पृष्टा अपि रात्रौ सोमांशुभिर्मारुतेन च शुद्ध्यंति दिवा तु सूर्यांशुभिर्मारुतेन च। मुखजा

श्रु विप्रुषो मेध्यास्तथाचमनबिंदवः॥ श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा ततः शुचिः॥ मुखे जाता मुखजाः श्लेष्मविप्रुषो मेध्याः॥
नोच्छिष्टं कुर्वंति॥ अनिपतिताश्चेदंगे न मुख्या विप्रुष उच्छिष्टं कुर्वंति॥ न चेदंगे निपतंतीति गौतमवचनात्। तथा
आचमनतोये बिंदवः पादौ स्पृशंति तेपि मेध्याः॥ श्मश्रु चास्यप्रविष्टमुच्छिष्टं न करोति। दंतसक्तं चान्नादिकं स्व
यमेव च्युतं त्यक्त्वा शुचिर्भवति अच्युतं तु दंतसमं। तथा च गौतमः दंतश्लिष्टेषु दंतवदन्यत्र जिह्वाभिमर्शनात् प्रा
क्च्युतेरित्येके च्युतेष्वास्राववद्विद्यान्निगिरन्नेव तच्छुचिरिति। निगीरणं पुनरनेन प्रागुक्तेन त्यागेन विक
ल्पते। निगिरन्नेवेत्येवकारः। चर्वणे त्वाचमेन्नित्यं मुक्त्वा तांबूलचर्वणं॥ ओष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरि
धाय चेति विस्मृत्याचमननिषेधार्थः तांबूलग्रहणं फलाद्युपलक्षणार्थं। यथाह शातातपः तांबूले च फले चैव
भुक्तस्नेहावशिष्टके। दंतलग्नस्य संस्पर्शे नोच्छिष्टो भवति द्विज इति। स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे॥
आचांतः पुनराचामेद्वासो विपरिधाय च। स्नानपानक्षुतस्वप्नभोजनरथ्योपसर्पणवासोविपरिधानेषु कृतेषु आचां
तः पुनराचामेद् द्विराचमेदित्यर्थः चकाराद्रोदनाध्ययनारंभाल्यानृतोक्त्यादिषु। तथा च वसिष्ठः सुप्त्वा भुक्त्वा क्षुत्वा स्नात्वा
पीत्वा रुदित्वाचांतः पुनराचामेदिति। मनुरपि। सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतं वचः। पीत्वापोऽध्येष्यमाणश्च आ
चामेत्प्रयतोपि सन्निति। भोजने त्वादावपि द्विराचमनं। भोक्ष्यमाणस्तु प्रयतोपि द्विराचामेदित्यापस्तंबस्मरणात्। स्ना

शरीरस्य
क्षेत्रज्ञस्यात्मविज्ञानाद्विशुद्धिः परमा मता।

मि० ४३ पि नपानयोरादेस्मृतः अध्ययने त्वारंभेन्ते द्विः शेषं नैव यथोक्तं द्विराचमनं। रथ्याकर्दमतोयानि स्पृष्टान्यंत्यश्ववायसैः। मा
रुतेनैव शुद्ध्यंति पक्वेष्टकचितानि च॥ रथ्यामार्गमात्रं कर्दमपंकतोयमुदकं रथ्यास्थितानि कर्दमतोयानि अंत्येश्वचंडाला
दिभिः श्वभिर्वायसैश्च स्पृष्टानि मारुतेनैव शुद्धिमुपयांति वहुवचनं तृणगोमयशर्करादिप्राप्त्यर्थं। पक्वेष्टकादिभिः
चितानि धवलगृहादीनि चंडालादिभिर्वायसैश्च स्पृष्टानि मारुतेनैव शुद्ध्यंति। एतच्च प्रोक्षणसंहतानामित्युक्तप्रोक्ष
णनिषेधार्थं। तृणकाष्ठपर्णादिमयानां तु प्रोक्षणमेवेति॥ ॥इति द्रव्यशुद्धिप्रकरणं॥ इदानीं दानधर्मप्रतिपाद
यिष्यंस्तदंगभूतपात्रप्रतिपादनार्थं तत्प्रशंसामाह। तपस्तप्त्वासृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये। तृप्त्यर्थं पितृदेवानां धर्म
संरक्षणाय च। ब्रह्मा हिरण्यगर्भः कल्यादौ तपस्तप्त्वा ध्यानं कृत्वा कथमनुतिष्ठामीति पूर्वं ब्राह्मणान्सृष्टवान्। किमर्थं
वेदगुप्तये वेदरक्षणार्थं। पितॄणां देवानां च तृप्त्यर्थं। अनुष्ठानोपदेशद्वारेण धर्मरक्षणार्थं च॥ अतस्तेभ्यो दत्तमक्ष
य्यफलं भवतीत्यभिप्रायः॥ सर्वस्य प्रभवो विप्राः श्रुताध्ययनशालिनः। तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योप्यध्यात्मवित्तमा
:॥ सर्वस्य क्षत्रियादेर्विप्राः प्रभवः श्रेष्ठाः जात्या कर्मणा च। ब्राह्मणेष्वपि श्रुताध्ययनशालिनः श्रुताध्ययनसंपन्नाः
उत्कृष्टाः॥ तेभ्योपि क्रियापराः विहितानुष्ठानशीलाः॥ तेभ्योप्यध्यात्मवित्तमाः॥ वक्ष्यमाणयोगेण शमदमादियोगे ४३
न आत्मतत्त्वज्ञाननिरतः श्रेष्ठा इत्यनुषज्यते। एवं जातिविद्यानुष्ठानतपःसंपन्नांसामुख्येनैकैकयोगेन पात्रतामभिधा

तदनुष्ठानकरणेन लक्षणेन

याधुना तेषां समुच्चये संपूर्णपात्रतामाह॥ न विद्यया केवलया तपसा वापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितं
॥ केवलया विद्यया श्रुताध्ययनसंपत्त्या नैव संपूर्णपात्रत्वं॥ नापि केवलेन तपसा शमदमादिना॥ अपि शब्दात्केवलेना
नुष्ठानेन॥ केवलजात्या वा नैव संपूर्णपात्रता॥ कथं तर्हि यत्र पुरुषे वृत्तमनुष्ठानमिमे चोभे विद्यातपसी स्तः॥ चशब्दाद्ब्रा
ह्मणजातिश्च तदेवमन्वादिभिः संपूर्णपात्रं प्रकीर्तितं। हि यस्मादतः परमुत्कृष्टं पात्रं नास्ति॥ अत्र च जातिविद्यानुष्ठान
तपःसमुच्चयानामुत्तरोत्तरप्राशस्त्येन फलतारतम्यं द्रष्टव्यं। गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितं। नापात्रे वि
दुषा किंचिदात्मनः श्रेय इच्छता। पूर्वोक्तपात्रे गवादिकमर्चितं दातव्यमिति॥ शास्त्रोक्तोदकदानादीतिकर्तव्यतास
हितं देयं। अपात्रे क्षत्रियादौ ब्राह्मणे च पतितादौ विदुषा पात्रविशेषेण फलविशेषं जानता श्रेयः संपूर्णफलमिच्छ
ता किंचिदल्पमपि न दातव्यं। श्रेयो ग्रहणादपात्रदाने पि किमपि नाम संफलमस्तीति सूचितं। यथाह कृष्णद्वैपा
यनः॥ अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमवज्ञातं तत्तामसमुदाहृतमिति। अपात्रे न दातव्यमिति
वदता विशिष्टदेशकालद्रव्यसंनिधौ पात्रस्यासन्निधाने द्रव्यस्य वा तदुद्देशेन त्यागस्तस्मै प्रतिश्रवणं वा कृत्वा समर्पयि
तव्यं पात्रे दातव्यमिति सूचितं। तथा प्रतिश्रुतमपि पश्चात्पातकादिसंयोगे ज्ञाते न देयं। प्रतिश्रुत्याप्यधर्मसंयुक्ताय
न दद्यादिति निषेधात्। अपात्रे दातुर्निषेधमुक्त्वा प्रतिग्रहीतारं प्रत्याह। विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः॥

मि०
४४

गृह्णन्प्रदातारमधोनयत्यात्मानमेव च॥ विद्यातपोभ्यां हीनेन प्रतिग्रहः सुवर्णादि न ग्राह्यः यस्माद्विद्यादिहीनः प्रतिग
ह्णन् दातारमात्मानं चाधो नरकं प्रापयति। गवादि पात्रे दातव्यमित्युक्तं॥ तत्र विशेषमाह। दातव्यं प्रत्यहं पात्रे निमित्तेषु वि
शेषतः। याचितेनापि दातव्यं श्रद्धापूतं तु शक्तितः॥ प्रतिदिवसं शक्त्यनुसारेण यथोक्तविधिना पात्रे गवादिकं स्वकुटुंबावि
रोधेन दातव्यं। निमित्तेषु चंद्रोपरागादिषु विशेषतोऽधिकं प्रयत्नेन दातव्यं। याचितेनापि श्रद्धापूतं अनसूयापवित्रीकृतं शक्त्या [illegible]
दातव्यं। याचितेनापि दातव्यमिति वदता यथोक्तपात्रं स्वयमेव गत्वा आहूय वा प्रदानं तन्महाफलमुक्तं। तथा च स्मरणं॥ ग
त्वा यद्दीयते दानं तदनंतफलं स्मृतं। सहस्रगुणमाहूय याचिते तु तदर्द्धकमिति॥ गवादिकं देयमित्युक्तं॥ तत्र गोदाने विशे [illegible]
षमाह। हेमशृंगी शफै रौप्यैः सुशीला वस्त्रसंयुता॥ सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा। हेममये शृंगे यस्याः सा
हेमशृंगी। शफैरौप्यैः राजतैः खुरैः संपन्ना वस्त्रेण च संयुता। कांस्यपात्रसहिता बहुक्षीरा गौर्यथाशक्ति दक्षिणासहि
ता दातव्या। गोदानस्य फलमाह। दातास्याः स्वर्गमाप्नोति वत्सरान् रोमसंमितान्॥ कपिला चेत्तारयति भूयश्चासप्तमं
कुलं। अस्याः गोः रोमसंमितान् रोमसंख्याकान्वत्सरान् स्वर्गमाप्नोति दाता॥ सा यदि कपिला तदा न केवलं दातारं तार
यति किंतु कुलमपि॥ आसप्तमं सप्तममभिव्याप्य पित्रादीन् षट् पुत्रादीन् षट् आत्मानं च सप्तमं। अप्यर्थे भूयः शब्दः॥ सव ४४
त्सारोमतुल्यानि युगान्युभयतोमुखीं। दातास्याः स्वर्गमाप्नोति पूर्वेण विधिना ददत्। संवत्सारोमतुल्यानि वत्सेन सह

वर्त्तन इति सवत्सा तस्या रोमतुल्यानि वत्सस्य गोश्च यावंति रोमाणि तावत्संख्याकानि युगानि कृतत्रेतादीनि उभयतोमुखीं द
दत्स्वर्गमवाप्नोति अनुभवति। पूर्वेण विधिना दाता चेत्। का पुनरुभयतोमुखी कथं वा तद्दानं महाफलमित्यत आह। याव
द्वत्सस्य पादौ द्वौ मुखं योन्यां च दृश्यते। तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुंचति। गर्भान्निर्गच्छतो वत्सस्य द्वौ पादौ मुखं च यथा
वत्कालं योन्यां दृश्यते तावत्कालमुभयतोमुखमस्या अस्तीत्युभयतोमुखी यावत्कालं गर्भं निर्गतं न मुंचति तावत्सा
गौः पृथिवीसमा विज्ञेया॥ अतः फलातिशयोप्युक्तः॥ यथाकथंचिद्दत्वा गां धेनुं वाधेनुमेव वा। अरोगामपरिक्लिष्टां दाता
स्वर्गे महीयते। यथाकथंचिद्धेमशृंगाद्यसंभवेपि यथासंभवं पूर्वोक्तेन विधिना धेनुं दोग्ध्रीमधेनुं वा अवंध्यामरोगां रोग
रहितां अपरिक्लिष्टां। अशक्तां दुर्बलां गां दत्वा दाता स्वर्गे महीयते पूज्यते। गोदानसमान्याह। श्रांतसंवहनं रोगीपरिचर्या
सुरार्चनं॥ पादशौचं द्विजोच्छिष्टमार्जनं गोप्रदानवत्। श्रांतस्यासनशयनादिदानेन श्रमापनयनं श्रांतसंवाहनं। रोगिणां
परिचर्या यथाशक्त्यौषधादिदानेन रोगापनयनं॥ सुरार्चनं हरिहरहिरण्यगर्भादीनां गंधमाल्यादिभिराराधनं॥ पाद
शौचं द्विजानां समानामधिकानां च। तेषामेवोच्छिष्टस्य संमार्जनं। एतान्यनंतरोक्तेन गोदानेन समानि। भूदीपाश्चान्नव
स्त्राम्भस्तिलसर्पिः प्रतिश्रयान्। नैवेशिकं स्वर्णधुर्यं दत्वा स्वर्गे महीयते। भूः फलप्रदा दीपो देवायतनादिषु। प्रतिश्रयः
प्रवासिनामाश्रयः॥ निवेशार्थं गार्हस्थ्यार्थं यत्कन्यादीयते तन्नैवेशिकं। स्वर्णं सुवर्णं। धुर्यो भारसहो बलीवर्दः। शेषं प्र

मि० ४५ सिद्धं॥ एतान् भूदीपादीन् दत्वा स्वर्गलोके पूज्यते॥ स्वर्गफलत्वं भूमिदानादीनां न फलांतरव्युदासार्थं। यत्किंचित्कुरुते पापं
ज्ञानतोऽज्ञानतोपि वा। अपि गोचर्ममात्रेण भूमिदानेन शुध्यति। तथा। वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः। तिलप्रदः
प्रजामिष्टां दीपदश्चक्षुरुत्तमं। वासोदश्चंद्रसालोक्यमश्विसालोक्यमश्वद इत्यादिफलांतरश्रवणात्। गोचर्मलक्षणं च
वृहस्पतिना दर्शितं। सप्तहस्तेन दंडेन त्रिंशद्दंडं निवर्तनं। दश तान्येव गोचर्म दत्वा स्वर्गे महीयत इति। गृहधान्याभयोपान
च्छत्रमाल्यानुलेपनं। यानं वृक्षं प्रियं शय्यां दत्वात्यंतं सुखी भवेत्॥ गृहं प्रसिद्धं। धान्यानि च। शालिगोधूमादीनि। अभयं
भीतत्राणं। उपानहौ। छत्रं। माल्यं मल्लिकादेः अनुलेपनं कुंकुमचंदनादि। यानं रथादि। वृक्षमुपजीव्यमाम्रादिकं। प्रियं
यद्यस्य प्रियं धर्मादिकं॥ शय्यां च दत्वा अत्यंतमतिशयेन सुखी भवति। न च हिरण्यादिवद्दातुमशक्यत्वाद्धर्मस्य दा
नासंभवः भूमिदानादावपि समानत्वात्। अत्यंतनरेपि धर्मदानश्रवणात्। देवतानां गुरूणां च मातापित्रोस्तथैव च। पुण्यं
देयं प्रयत्नेन नापुण्यं चोदितं क्वचिदिति। अपुण्यदानेन देववर्द्धने। प्रतिग्रहातुरपि लोभादिना प्रवृत्तस्य। यः पापमत्व
लं ज्ञात्वा प्रतिगृह्णाति दुर्मतिः॥ गर्हिताचरणात्तस्य पापं तावत्समाश्रयेत्। समद्विगुणसाहस्रमानंत्यं च प्रदात्तदिति
स्मरणात्॥ इह च सर्वत्र देशकालपात्रविशेषाद्देयविशेषाद्दानविशेषात्प्रतिगृहीतृविशेषाच्च दातृप्रतिग्रहीत्रोः फ ४५
लतारतम्यं द्रष्टव्यं। सर्वधर्ममयं ब्रह्मप्रदानेभ्योधिकं यतः। तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतं। यस्मात्सर्वधर्म

मिषं महाशल्कं कालशाकं वाध्रीणसो वृद्धः श्वेतश्छागलस्तामिषं। त्रिपिबं त्विंद्रियक्षीणं श्वेतं वृद्धमजापतिं। वाध्रीणसं तु
तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि निष्पात्तिकप्रसिद्धः॥ त्रिपिबः पिबतः कर्णौ जिह्वा यस्य जलं स्पृशंति त्रिभिः पिबतीति त्रिपि
बः तस्य वाध्रीणसस्य मांसं यद्ददाति गयायामथ यत्किंचित् शाकादिकमपि गयायां ददाति वर्षासु मघासु गंगाद्वारादिषु च॥
गंगाद्वारे प्रयागे च नैमिषे पुष्करेर्बुदे। सन्निहत्यां गयायां च श्राद्धमक्षय्यतां व्रजेदिति। आनंत्यमश्नुते अनंतफलहेतुत्वं प्रा
प्नोति। आनंत्यमश्नुत इति प्रत्येकमभिसंबध्यते। तथा वर्षात्रयोदश्यां भाद्रपदकृष्णत्रयोदश्यां विशेषतो मघायुक्तायां
यत्किंचिद्दीयते तत्सर्वमानंत्यमश्नुत इति गतेन संबंधः॥ अत्र यद्यपि मुन्यन्नमांसमध्वादीनि सर्ववर्णानां सामान्येन श्राद्धयो
ग्यानि दर्शितानि तथापि पुलस्त्योक्ता व्यवस्थाऽऽदरणीया। मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः॥ मधुप्रधानं शूद्रस्य
सर्वेषां चाविरोधि यत्। अस्यार्थः मुन्यन्नं नीवारादि यच्छ्राद्धयोग्यमुक्तं॥ तद्ब्राह्मणस्य प्रधानं। समग्रफलदं। यच्च मांसं तत्
क्षत्रियवैश्ययोः प्रधानं। यत्क्षौद्रमुक्तं तच्छूद्रस्य। एतत्त्रितयव्यतिरिक्तं परविरोधि यदप्रतिषिद्धं वास्तुकादि यच्च विहि
तं हविष्यकालशाकादि तत्सर्वेषां सम्यक्फलदमिति॥ तिथिविशेषमाह॥ कन्यां कन्यावेदिनश्च पशून्वै सत्सुतान
पि। द्यूतं कृषिं वाणिज्यं च द्विशफैकशफांस्तथा। ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरूप्ये सकुप्यके। ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति
श्राद्धदः सदा॥ प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीं। शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते। कन्यारूपलक्षणशी

PAGE(S)MISSING

NOT AVAILBLE

FF NO:-
46-60

मि०
६१

ळवती। कन्यावेदिनो जामातारो रूपलक्षणसंपन्नाः पशवः क्षुद्रा अजादयः। सत्सुताः सन्मार्गवर्तिनः। द्यूतं द्यूतवि
जयः॥ कृषिफलं। वणिज्यां वाणिज्यलाभः॥ द्विशफा गवादयः एकशफा अश्वादयः॥ ब्रह्मवर्चस्विनः पुत्राः॥ वेदाध्य
यनतदर्थानुष्ठानजनिततेजो ब्रह्मवर्चसं तद्युक्ताः॥ स्वर्णरूप्ये हेमरजते। तद्व्यतिरिक्तं त्रपुसीसादि कुप्यकं। ज्ञातिश्रै
ष्ठ्यं ज्ञातिषूत्कृष्टत्वं। सर्वकामाः काम्यंत इति कामाः॥ स्वर्गपुत्रपश्वादयः एतानि कन्यादीनि चतुर्दशफलानि कृ
ष्णपक्षप्रतिपत्प्रभृतिषु अमावास्यापर्यंतासु चतुर्दशीं वर्जितासु चतुर्दशसु तिथिषु श्राद्धदो यथाक्रमं आप्नोति।
ये केचन शस्त्रेण हतास्तेभ्यः कृष्णपक्षचतुर्दश्यामेकोद्दिष्टविधानेन श्राद्धं दद्यात्। यदि ब्राह्मणादिहता न भवंति। स
मत्वमागतस्यापि पितुः शस्त्रहतस्य वै॥ एकोद्दिष्टं सुतैः कार्यं चतुर्दश्यां महालये इति स्मरणात्। समत्वमागतस्य
सपिंडीकृतस्य महालये भाद्रपदकृष्णपक्षे चतुर्दश्यां शस्त्रहतस्यैव नान्यस्य इति नियम्यते न पुनः शस्त्रहतस्य चतु
र्दश्यामेवेति अतश्च क्षयाहादौ शस्त्रहतस्यापि यथाप्राप्तमेव श्राद्धं। न च भाद्रपदकृष्णपक्ष एवायं विधिरिति मंतव्यं।
प्रोष्ठपद्यामपरपक्षे मासि चैवमिति शौनकस्मरणात्। नक्षत्रविशेषात्फलविशेषमाह॥ स्वर्गं ह्यपत्यमोजश्च शौर्यं
क्षेत्रं बलं तथा। पुत्रं श्रैष्ठ्यं ससौभाग्यं समृद्धिं मुख्यतां शुभं। प्रवृत्तचक्रतां चैव वाणिज्यप्रभृतीनपि। अरोगित्वं यशो
वीतशोकतां परमां गतिं। धनं वेदान्भिषक्सिद्धिं कुप्यं गा अप्यजाविकं। आश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छ

सपिंडीकरणे न विरुद्धप्राप्तस्य

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ। दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू॥ इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः।
बाणबाणासनधरः कर्तव्योऽर्कसुतः सदा। करालवदनः खड्गचर्मशूली वरप्रदः॥ नीलः सिंहासनस्थश्च राहुरत्र प्रशस्य
ते। धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः॥ गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः॥ सर्वे किरीटिनः कार्या ग्रहा
लोकहितावहाः॥ स्वांगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा। स तेषां स्थापनदेशश्च तंत्रे उक्तः॥ मध्ये तु भास्करं वि
द्याल्लोहितं दक्षिणेन तु। उत्तरेण गुरुं विद्याद्बुधं पूर्वोत्तरेण तु। पूर्वेण भार्गवं विंद्यात्सोमं दक्षिणपूर्वके। पश्चिमे च श
निं विद्याद्राहुं दक्षिणपश्चिमे। पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतंदुलैः। पूजाविधिमाह॥ यथावर्णं प्रदेयानि वासांसि
कुसुमानि च। गंधाश्च बलयश्चैव धूपो देयश्च गुग्गुलुः॥ कर्तव्या मंत्रवंतश्च चरवः प्रतिदैवतं। यथावर्णं यस्य ग्रहस्य यो
वर्णस्तद्वर्णानि गंधवस्त्रपुष्पाणि देयानि। बलयश्च। धूपश्च सर्वेभ्यो गुग्गुलुर्देयः चरवश्च प्रतिदैवतमग्निप्रतिष्ठाप
नान्वाधानादिपूर्वकं चतुरश्चतुरो मुष्टीन्निर्वपत्यमुष्मै त्वा जुष्टं निर्वपामीत्यादिविधिना कार्याः। अनंतरं सुसमिद्धेऽग्नौ
विध्माधानाद्याघारांतं कर्म कृत्वा आदित्याद्युद्देशेन यथाक्रमं वक्ष्यमाणमंत्रैः वक्ष्यमाणाः समिधो वक्ष्यमाणप्रका
रेणाहुत्वा चरवो होतव्याः। मंत्रानाह॥ आकृष्णेनइमंदेवा अग्निर्मूर्द्धा दिवः ककुत्। उद्बुध्यस्वेति ऋचो यथासंख्य
मकीर्तिताः॥ बृहस्पते अतियदर्यस्तथैवान्नात्परिस्रुतः॥ शन्नोदेवीस्तथा कांडात्केतुं कृण्वन्निमांस्तथा॥ आकृष्णे

PAGE(S)MISSING

NOT AVAILBLE

F.F. NO.
62-65

मि० ६६ नरजसावर्नसानइत्यादयोनवमंत्रयथाक्रममादित्यादीनांवेदितव्याः इदानींसमिधआह। अर्कः पलाशः खदिरस्त्वपा
मार्गोथपिप्पलः॥ उदुंबरः शमीदूर्वाः कुशाश्वसमिधः क्रमात्। अर्कपलाशादयोयथाक्रमंसूर्यादीनांसमिधोभवंति।
ताश्च आर्द्राअभग्नाः सत्वचः प्रादेशमात्राः कर्तव्याः। किंच एकैकस्यत्वष्टशतमष्टाविंशतिरेववा। होतव्यामधुसपि
र्भ्यांदध्नाक्षीरेणवायुताः॥ आदित्यादीनामेकैकस्याष्टशतसंख्यांवाथयासंभवंमधुनासर्पिषादध्नाक्षीरेणवायुता
: अक्ताः अर्कादिसमिधोहोतव्याः॥ इदानींभोजनमाह। गुडौदनंपायसंचहविष्यंक्षीरषाष्टिकं। दध्योदनंहविश्चू
र्णंमांसंचित्रान्नमेवचादद्यात्क्रमादेवद्विजेभ्योभोजनंबुधः॥ शक्तितोवायथालाभंसत्कृत्यविधिपूर्वकं। गुडमि
श्र ओदनो गुडौदनः पायसंपायसान्नं हविष्यंमुन्यन्नादि क्षीरषष्टिकं क्षीरमिश्रः षाष्टिकोदनः। दध्योदनः दधिमि
श्र ओदनः हविर्घृतौदनः चूर्णंतिलचूर्णमिश्र ओदनः। मांसंभक्ष्यमांससमिश्र ओदनः। चित्रौदनोनानावर्ण ओद
नः। एतानिगुडौदनादीनियथाक्रममादित्याद्युद्देशेनभोजनार्थंद्विजेभ्योब्राह्मणेभ्योदद्यात्। ब्राह्मणसंख्याचयथा
विभवंद्रष्टव्या। गुडौदनाद्यभावेतुयथालाभमोदनादिपादप्रक्षालनादिविधिपूर्वकंसत्कृत्यसन्मानपुरःसरंदद्या
त्। दक्षिणामाह। धेनुः शंखस्तथानड्वान्हेमवासोहयः क्रमात्। कृष्णागौरायसंछागएतावैदक्षिणाः स्मृताः॥ धे ६६
नुर्दोग्ध्री॥ शंखः प्रसिद्धः। अनड्वान्भारसहोबलीवर्दः॥ हेमसुवर्णं। वासः पीतांहयः पांडुरः कृष्णागौः। आयसम

स्त्रा दि। छागः प्रसिद्धः। एताधेन्वादयोयथाक्रमंआदित्याद्युद्देशेनब्राह्मणानांदक्षिणाः स्मृताउक्तामन्वादिभिः॥ एत
च्चसंभवेसति असंभवेतुयथालाभंशक्तितोन्यदेवकिंचिद्देयं। शांतिकामेनाविशेषेणसर्वेग्रहाःपूजयितव्याइत्युक्तं।
तत्रविशेषमाह। यश्चयस्ययदादुस्थः सतंयत्नेनपूजयेत्। ब्रह्मणैषांवरोदत्तः पूजिताः पूजयिष्यथ॥ यस्यपुरुषस्य
[redacted] योग्रहोयदादुस्थोष्टमादिदुष्टस्थानस्थितः सत्तंग्रहंयत्नेनविशेषेणपूजयेत्॥ यस्मादेषांग्रहाणांब्रह्मणापूर्वं
वरोदत्तः पूजिताः संतोयूयमिष्टप्रापणेनानिष्टनिरसनेनचपूजयितारंपूजयिष्यथेति॥ अविशेषेण द्विजानधि
कृत्यशांतिकपौष्टिकादीनिकर्माण्यनुक्रांतानि। तत्राभिषिक्तादिगुणयुक्तस्यराज्ञोविशेषेणाधिकारइतिदर्शयिति
। ग्रहाधीनानरेंद्राणामुच्छ्रायाः पतनानिच। भावाभावौचजगतस्तस्मात्पूज्यतमाग्रहाः॥ नरेंद्राणामभिषिक्तक्षत्रिया स
णां ग्रहाः सत्पूज्यतमाः अनेनान्येषामपिपूज्याइतिगम्यते। उभयत्रकारणमाह। प्राणिनामभ्युदयविनिपाताग्रहा
धीनायस्मात्तस्मादधिकाभिः पूज्याः। किंच जगतः स्थावरजंगमात्मकस्यभावाभावावुत्पत्तिनिरोधौग्रहाधीनौतत्र
पर्येतेपूजितास्तदास्वकालउत्पत्तिनिरोधौभवतः अन्यथोत्पत्तिसमयेनोत्पादोनिरोधकालेनिरोधश्च॥ जगदी
श्वरत्वाच्चनरेंद्राणांतद्योगक्षेमकारिणांपूज्यतमाग्रहाइतितेषांविशेषेण शांतिकादिष्वधिकारः। तथाचगौत
मेन। राजासर्वस्येष्टेब्राह्मणवर्जमिति। राजानमधिकृत्यवर्णानाश्रमांश्चन्यायतोभिरक्षेच्चलतश्चैतान्स्वधर्मे

मि० ६७ स्थापयेदित्यादीन्कांश्चिद्धर्मानुक्त्वायानिचंदेवोत्थानचिंतकाःप्रवृत्युक्तान्याद्रियेत।तदधीनमपित्यक्तेयोगक्षेमं
प्रतिज्ञानतइतिशांतिकपौष्टिकाचनुष्ठानहेतुमभिधायशांतिपुण्याहस्वस्त्ययनायुष्यमंगलसंयुक्तान्याभ्युद
का यिकानिविद्वेषणस्तंभनाभिचारद्विषद्वृद्धियुक्तानिचशालाग्नौकुर्यादितिशांतिकादीनिदर्शितानि।इतिशांतिप्रक
रणं॥साधारणान्नरहस्यधर्मानुक्त्वेदानींराज्याभिषेकादिगुणयुक्तस्यरहस्यस्यविशेषधर्मानाह।महोत्साहःस्थू
ललक्षःकृतज्ञोवृद्धसेवकः।विनीतःसत्वसंपन्नःकुलीनःसत्यवाक्शुचिः॥अदीर्घसूत्रःस्मृतिमानक्षुद्रोपरु
षस्तथा।धार्मिकोऽव्यसनश्चैवप्राज्ञःशूरोरहस्यवित्॥स्वरंध्रगोप्तान्वीक्षिक्यांदंडनीत्यांतथैवच।विनीतस्त्वथ
वार्तायांत्रय्यांचैवनराधिपः॥पुरुषार्थसाधनकर्मारंभाध्यवसायउत्साहः।महानुत्साहोयस्यासौमहोत्सा
हः॥बहुदेयार्थदर्शीस्थूललक्षःपरकृतोपकारापकारौनविस्मरतीतिकृतज्ञः।तपोज्ञानादिवृद्धानांसेवकः।वि
नययुक्तोविनीतः।विनयशब्देनाविरुद्धःपूर्वोक्तःस्नानकर्मकलापउच्यते।नसंशयंप्रपद्येतनाकस्मादपि
पंचदेस्मादिनोक्तः।संपदापदोर्हर्षविषादरहितः।मातृतःपितृतश्चाभिजनवान्कुलीनः॥सत्यवाक्सत्यवचनशी
लः।शुचिर्बाह्याभ्यंतरशौचयुक्तः।अवश्यकर्मणामारंभेप्रारब्धानांचसमापनेयोनविलंबतेअसावदीर्घसू
अधि त्रः।अवगतार्थाविस्मरणशीलःस्मृतिमान्।अक्षुद्रोऽसद्गुणद्वेषी।अपरुषःपरदोषाकीर्तिः।धार्मिकोवर्णाश्र ६७

मधर्मान्वितः।नविद्यंतेव्यसनानियस्यासावव्यसनः।व्यसनानिचाष्टादशयथाहमनुः।मृगयाक्षादिवास्वप्नःपरि
वादःस्त्रियोमदः।तौर्यत्रिकंवृथात्यागःकामजोदशकोगणः॥पैशून्यंसाहसंद्रोहईर्ष्यासूयार्थदूषणं।वाग्दंडजं
चपारुष्यंक्रोधजोपिगणोऽष्टकइति।तत्रचसप्तकष्टतमानि।यथाहमनुः।पानमक्षाःस्त्रियश्चैवमृगयाचयथा
का क्रमं।एतत्कष्टतमंविद्याच्चतुष्कंकामजेगणे।दंडस्यपातनंचैववाक्पारुष्यार्थदूषणे।क्रोधजेपिगणेविद्यात्क
ष्टमेतत्त्रिकंसदेति।प्राज्ञोगंभीरार्थावधारणक्षमः॥शूरोनिर्भयः॥रहस्यवित्गोपनीयार्थगोपनचतुरः।स्वरंध्र
गोप्तास्वस्यसप्तसुराज्यांगेषुयत्परप्रवेशद्वारंशैथिल्यंतत्स्वरंध्रंतस्यगोप्ताप्रच्छादयिता।आन्वीक्षिक्यामात्म
विद्यायांदंडनीत्यामर्थयोगक्षेमोपयोगिन्यांवार्तायांकृषिवाणिज्यपशुपालनरूपायांधनोपचयहेतुभूतायां
त्रय्यामृग्यजुःसामाख्यायांचविनीतस्तदभिज्ञैःप्रावीण्यंनीतः॥यथाहमनुः।त्रैविद्येभ्यस्त्रयींविद्यांदंडनीतिंच
तद्विदः।आन्वीक्षिकींचात्मविद्यांवार्तारंभांश्चलोकतइति।नराधिपोराज्येभिषिक्तःस्यादितिसर्वत्रसंबंधः।एव
मभिषेक्तुःस्यांतरंगधर्मानभिधायेदानींबहिरंगानाह।समंत्रिणःप्रकुर्वीतप्राज्ञान्मौलान्स्थिरान्शुचीन्।
तैःसार्द्धंचिंतयेद्राज्यंविप्रेणाथततःस्वयं॥महोत्साहादिगुणैर्युक्तोराजामंत्रिणःप्रकुर्वीत।कथंभूतान्।प्रा
ज्ञान्हिताहितविवेककुशलान्।मौलान्स्ववंशपरंपरायातान्।स्थिरान्महत्यपिहर्षविषादस्थानेविका

मि०
६८

रेण रहितान्। शुचीन् धर्मार्थकामभयोपधाशुद्धान्। ते च सप्ताष्टौ वा कार्याः॥ यथाह मनुः॥ मौलान् शास्त्रविदः अरूपदप्रमात्र
शूरान् लब्धलक्षान् कुलोद्भवान्। सचिवान्सप्त वाष्टौ वा कुर्वीत सुपरीक्षितानिति। एवं मंत्रिणः पूर्वं कृत्वा तैः सा
र्द्धं राज्यं संधिविग्रहादि कार्यं चिंतयेत्। समस्तैर्व्यस्तैश्च। अनंतरं तेषामभिप्रायं ज्ञात्वा सकलशास्त्रार्थविचारकुश
लेन ब्राह्मणेन पुरोहितेन सह कार्यं विचिंत्य ततः स्वयं बुद्ध्या कार्यं विचिंतयेत्। कीदृशं पुरोहितं कुर्यादित्याह॥ पु
रोहितं च कुर्वीत दैवज्ञमुदितोदितं। दंडनीत्यां च कुशलमथर्वांगिरसे तथा॥ तथा पुरोहितं सर्वेषु दृष्टार्थेषु कर्मसु
पुरतो विहितः दानमानसत्कारैरात्मसंबद्धं कुर्यात्। कथंभूतं दैवज्ञं ग्रहोत्पातनक्षत्रमनादेर्वेदितारं। उदितोदितो दि
तं विद्याभिजनानुष्ठानादिभिरुदितेनाद्यैरुक्तैरुदितं समृद्धं दंडनीत्यामर्थशास्त्रे कुशलं। अथर्वांगिरसे च शांत्यादि
कर्मणि॥ श्रौतस्मार्तक्रियाहेतोर्वृणुयादेव चर्त्विजः॥ यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान्॥ श्रौतमग्निहोत्रा
दिस्मार्तमौपासनादिक्रियानुष्ठानसिद्ध्यर्थं ऋत्विजो वृणुयात्। यज्ञांश्च राजसूयादीन्विधिवद्यथाविधानं भूरिदक्षिणा
न्बहुदक्षिणानेव कुर्यात्। किंच। भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च। अक्षयोयं निधी राज्ञां यद्विप्रेषूपपादितं
। ब्राह्मणेभ्यो भोगान्सुखानि तत्साधनदानद्वारेण दद्यात्। वसूनि च सुवर्णरजतप्रभृतीनि विविधानि नानाप्रकारा ६८
णि। यस्माद्देव राज्ञामक्षयो यो निधिः शेवधिः यद्ब्राह्मणेभ्यो दीयते। साधारणधर्मत्वेन दानस्य प्राप्तस्यापि राज्ञां दानप्राधान्य

प्रतिपादनार्थं पुनर्वचनं॥ किंच॥ अस्कन्नमव्यथं चैव प्रायश्चित्तैरदूषितं। अग्नेः सकाशाद्विप्राग्नौ हुतं श्रेष्ठमिहोच्य
ते। अग्नेः सकाशादग्निसाध्याद्भूरिदक्षिणाद्राजसूयादेरपि विप्राग्नौ हुतं श्रेष्ठमुच्यते। यत एतदस्कन्नं क्षरणरहि
तं। अव्यथं पशुहिंसारहितं प्रायश्चित्तैश्चादूषितं प्रायश्चित्तायासरहितं। वसूनि विप्रेभ्यो दद्यादित्युक्तं कया परिपाट्या॥
दद्यादित्याह। अलब्धमीहेद्धर्मेण लब्धं यत्नेन पालयेत्। पालितं वर्द्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत्। अलब्धं लाभाय
यतेत। धर्मशास्त्रानुसारेण यत्नेन लब्धं च स्वयमेवेक्षमाणः रक्षेत्। रक्षितं नीत्या वणिक्पथादिकया वृद्धिं नयेत्। वृद्धं च पात्रे
षु धर्मार्थकामयुक्तेषु त्रिविधेषु पात्रेषु निक्षिपेद्दद्यात्॥ पात्रे निक्षिप्य किं कुर्यादित्याह। दत्वा भूमिं निबंधं वा कृत्वा
लेख्यं तु कारयेत्। आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः॥ यथोक्तविधिना भूमिं दत्वा स्वत्वनिवृत्तिं कृत्वा निबंधं
वा एकस्य भांडभरकस्येयंतो रूपका एकस्य पर्णभरकस्येयंति पर्णानीति वा निबंधं कृत्वा दत्वा लेख्यं कारयेत्। किम
र्थं आगामिन एष्यंतो ये भद्राः साधवो नृपतयो भूपतयस्तेषां अनेन दत्तमनेन प्रतिगृहीतमिति परिज्ञानाय पा
र्थिवो भूपतिरनेन भूपतेरेव भूमिदाने निबंधदाने वाधिकारो न भोगपतेरिति दर्शितं॥ लेख्यं कारयेदित्युक्तं कथं
कारयेदित्याह। पटे वा ताम्रपट्टे वा स्वमुद्रोपरि चिन्हितं। अभिलेख्यात्मनो वंश्यानात्मानं च महीपतिः। प्रतिग्रह
परीमाणं दानछेदोपवर्णनं। स्वहस्तकालसंपन्नं शासनं कारयेत्स्थिरं। कार्पासिके पटे ताम्रपट्टे ताम्रफलके वा

व्यवहारपारावारव्यवहारको सुभव्यवहारं दैमाद्रिषुद्रव्यं॥
माधवकी व्यवहिती यसंगेद्दशशतात११२ श्लोकव्याख्यायां स्फष्टं

मि० ६९ आत्मनो वंश्यान् प्रपितामहपितामहपितॄन् बहुवचनस्यार्थवत्त्वात् तत्र यं वंशवीर्यश्रुतादिगुणोपवर्णनपूर्वकम
भिलिख्यात्मानं च शब्दात्मनिग्रहीतारं प्रति ग्रहपरिमाणं दानच्छेदोपवर्णनं चाभिलिख्य प्रतिलेखप्रतिग्रहेत्यत इति
प्रतिग्रहीतारं निबंधस्य स्वरूपकादिपरिमाणं दीयत इति दानं स्वेत्रादि तस्य छेदः छिद्यते अनेनेति छेदः। नघाघाटोनि
वर्तनपरिमाणं च तस्योपवर्णनं। अमुकनघाद्दक्षिणतोयं ग्रामः क्षेत्रं वा पूर्वतोमुकग्रामस्यैतावन्निवर्तनमित्यादि
निवर्तनपरिमाणं च लेख्यमेव आघाटस्य नदीनगरवर्त्मादेः संचारित्वेन भूमेर्न्यूनाधिकभावसंभवात्तन्निश्चयार्थं
स्वहस्तेन स्वहस्तलिखितेन मतं मे अमुकनाम्न अमुकपुत्रस्य यदत्रोपरि लिखितमित्यनेन संपन्नं संयुक्तं का
लेन च द्विविधेन शकनृपातीतसंवत्सररूपेण दानकालेन चंद्रसूर्योपरागादिना संपन्नं स्वमुद्रया गरुडवराहा
५ लिखते दिरूपयोपरि बहिश्चिह्नितमंकितं स्थिरं दृढं शासनं शिष्यं ते भविष्यंतो नृपतयो नेन दानात् श्रेयोनुपालनमिति शा आहा ५
सनं कारयेत् महीपतिर्न भोगपतिः। संधिविग्रहाधिकारिणा न येन केनचित्। संधिविग्रहकारी तु भवेद्यस्तस्य लेख
कः स्वयं राज्ञा समादिष्टः संलिखेद्राजशासनमिति स्मरणात्। दानमात्रेणैव दानफले सिद्धे शासनकरणं तत्रैव भो
गामिव स्याफलानि शब्दार्थं।। इदानीं राज्ञो निवासस्थानमाह।। रम्यं पशव्यमाजीव्यं जांगलं देशमावसेत्। तत्र दु
र्गाणि कुर्वीत जनकोशात्मगुप्तये। रम्यं रमणीयमशोकचंपकादिभिः।। तथा पशव्यं पशुभ्यो हितं पशुवृद्धिकरा ६९

अमुकस्य हस्तपुत्राय मेदत्तोपरिलिखितं

राजकर्तृकं शासनं नृपतीन् प्रति दानात् श्रेयोनुपालनमिति शिक्ष्यं ते
दानपालनीयं

ते। तं देशमावसे

आजीव्यमुपजीव्यं कंदमूलपुष्पफलादिभिः।। जांगलं। पथप्यल्पोदकतरुपर्वतो देशो जांगलस्तथाप्यत्र सजलत
तरुपर्वतो देशो जांगलशब्देनाभिधीयते। अधिवसेत्। तत्र एवंविधे देशे जनानां कोशस्य सुवर्णादेरात्मनश्च रक्षणार्थं दु
र्गं कुर्वीत। दुर्गं षड्विधं। यथाह मनुः धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च। नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेत्पुरमि
ति। किंच। तत्र तत्र च निस्मातानध्यक्षान् कुशलान् शुचीन्। प्रकुर्यादायकर्मान्तव्ययकर्मसु चोद्यतान्। तत्र त
त्र च धर्मार्थस्त्र्यादिषु अध्यक्षान् योग्यानधिकारिणः प्रकुर्यान्नियुंजीत। यथाहुः धर्मकृत्येषु धर्मस्थान् अर्थकृ
त्येषु पंडितान्। स्त्रीषु क्लीबान्नियुंजीत नीचान्नीचेषु कर्मस्विति। कीदृशान् निस्मातानन्यव्यापारान्। कुशला
न् तत्तद्व्यापारचतुरान्। शुचीन् चतुर्विधोपधाशुद्धान्। आयकर्मसु सुवर्णाद्युत्पत्तिस्थानेषु। व्ययकर्मसु सुवर्णा
दिव्ययस्थानेषु च उद्यतान् अनलसान्। चशब्दात् प्राज्ञत्वादिगुणयुक्तान्। उक्तं च। प्राज्ञत्वमुपधाशुद्धिरप्रमादोभि
युक्तता। कार्येषु व्यसनाभावः स्वामिभक्तिश्च योग्यता इति। भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि चेति सामान्ये
न स्वस्य दानमुक्तमिदानीं नृपाणां विक्रमार्जितस्य दाने फलातिशयमाह।। नातः परतरो धर्मो नृपाणां यद्रणा
र्जितं। विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा।। नास्मादुत्कृष्टतरो नृपाणां धर्मो विद्यते यद्रणार्जितं द्रव्यं विप्रे
भ्यो दीयते तथा प्रजाभ्योऽभयदानं। रणार्जितं द्रव्यं देयमित्युक्तं द्रव्यार्जनाय रणप्रवृत्तस्य विपत्तिरपि संभवतीति

मि०
७०

नधर्मीनाप्यर्थश्रितिततोनिश्रितिरेवश्रेयसीयत आह। ये आहवेषु युध्यंते भूम्यर्थमपराङ्मुखाः अकूटैरायुधैर्यांति
ते स्वर्गं योगिनो यथा। ये भूम्याद्यर्थं आहवेषु युध्यंते अपराङ्मुखा अभिमुखा बध्यंते मार्यंते ते स्वर्गं यांति· योगा
भ्यासरता यथा। यद्यकूटैरविषदिग्धादिभिरायुधैर्योद्धारो भवंति।। किंच· पदाभिक्रतुमुल्यानि भग्ने चविनिव
र्तिनां। राजा सुकृतमादत्ते हतानां विपलायिनां। स्वबलेषु करितुरंगरथपदातिषु भग्नेषु विनिवर्तिनां· परबला
भिमुखस्थायिनां पदानि क्रतुतुल्यान्यश्वमेधतुल्यानि। विपर्यये दोषमाह। विपलायिनां पराङ्मुखानां हतानां रा
जा सुकृतान्यादत्ते। अपि च। नवाहं वादिनं क्लीबं निर्हेतिं परसंगतं। न हन्यादिनिवृत्तं च युद्धप्रेक्षणकादिकं। त
वाहमिति यो वदति तं क्लीबं· नपुंसकं· निर्हेतिं निरायुधं। परसंगतं अन्येन सह युध्यमानं। निवृत्तं युद्धादिनिवृ
त्तं। युद्धप्रेक्षणको युद्धदर्शी तं न हन्यादिति सर्वत्र संबंधः आदिग्रहणादश्वसारथ्यादीनां ग्रहणं।। यथाह गौ
तमः नदोषो हिंसायामाहवे ऽन्यत्र व्यश्वाः सारथ्यः नायुधकृतांजलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षा
रूढदूतगोब्राह्मणवादिभ्य इति। तथा शंखोप्याह। नपानीयं पिबंतं न भुंजानं नोपानहौ प्रमुंचंतं नावर्माणं सव
र्मानं स्त्रियं न करेणुं न वाजिनं न सारथिनं न दूतं न ब्राह्मणं न राजानं अराजा हन्यादिति। कृतरक्षः समुत्थाय ७०
पश्येदायव्ययौ स्वयं। व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुंजीत कामतः।। कृतरक्षः पुरस्तात्मनश्चरक्षां विधाय प्रति

दिनं प्रातः काल उत्थाय स्वयमेवायव्ययौ पश्येत् ततो व्यवहारान् दृष्ट्वा मध्याह्नकाले स्नात्वा कामतो यथारुचिं भुंजीत।।
रक्षकान् हिरण्यं व्याप्तरत्नानि तं भांडागारेषु निक्षिपेत्। पश्येच्चारांस्ततो दूतान्प्रेषयेन्मंत्रिसंगतः। तदनंतरं हिरण्यादिकं व्याप
तैर्हिरण्याद्यानयननियुक्तैरानीतं स्वयमेव निरीक्ष्य भांडागारेषु निक्षिपेत्। ततश्चारान् विश्वस्तान् प्रत्यागतान् पश्ये
वृत्तांत त्। ये परराष्ट्रे परिज्ञानाय परिव्राजकतापसादिरूपेण गूढचारिणः प्रेषिताः तान् स्वदृष्ट्या चिन्हैर्वेत्तायेत्। तदनंतरं
दूतांश्च पश्येत्।। दूतास्तु ये प्रकटमेव राजांतरं प्रति गतागतमाचरंति ते च त्रिविधाः निसृष्टार्थाः संदिष्टार्थाः शास
नहस्ताश्चेति। तत्र निसृष्टार्था राजकार्याणि देशकालोचितानि स्वयमेव कथयितुं क्षमाः।। उक्तमात्रं ये परस्मै निवेद
यंति ते संदिष्टार्थाः शासनहस्तास्तु राजलेख्यहारिणस्तान्पूर्वप्रेरितानागतान्। मंत्रिसंगतः पश्येत् दृष्ट्वा तदानीमा
कलय्य पुनः प्रेषयेत्। ततः स्वैरं विहारी स्यान्मंत्रिभिर्वा समागतः।। बलानां दर्शनं कृत्वा सेनान्या सह चिंतयेत्।। तदनं
तरमपराह्णे स्वैरं यथेष्टमेकोंतःपुरविहारी स्यान्मंत्रिभिर्वा विश्वासिभिः कलाकुशलैः परिहासवेदिभिः परिवृतः स्त्री विनोद
चातुर्य भिश्च रूपयौवनवैदग्ध्यशालिनीभिः। भुक्त्वा विहरेच्चैव स्त्रीभिरंतःपुरे सह। विहृत्य च यथाकामं पुनः कार्याणि
चिंतयेदितिमनुस्मरणात्।। ततो विशिष्टैर्वस्त्रकुसुमविलेपनालंकारैरलंकृतो हस्त्यश्वरथपदातिबलानि दृ रे
ष्ट्वा सेनान्या सेनापतिना सह तद्रक्षणादिदेशकालोचितं चिंतयेत्।। संध्यामुपास्य [illegible] चाराणां गूढभा

षितं। गीतनृत्यैश्च भुंजीत पठेत्स्वाध्यायमेव च। ततः सायंकाले संध्यामुपास्य सामान्येन प्राप्तस्यापि पुनर्वचनं कार्या॥
कुलत्वाद विस्मरणार्थं॰ अनंतरं पूर्वैर्ये दृष्टाः क्वचित्स्थानेनिवेशिताः तेषां चारणां गृहभाषितं अंतर्वेश्म निशस्त्र
पाणिः शृणुयात्। तत्कं च संध्यां चोपास्यां शृणुयादंतर्वेश्मनिशस्त्रभृत्। रहस्यख्यापिनां चैव प्रणिधीनां च चेष्टित
मिति। ततोनृत्यगीतादिभिः कंचित्कालं क्रीडित्वा कक्षांतरं प्रविश्य भुंजीत॥ गत्वा कक्षांतरं त्वन्यत्समनुज्ञाप्य तं
जनं। प्रविश्य भोजनार्थं तु स्त्रीभिरंतःपुरं सहेति। ततो विस्मरणार्थं यथाशक्ति स्वाध्यायं पठेत्॥ संविशेत्तूर्यघोषे
ण प्रतिबुद्धेत्तथैव च। शास्त्राणि चिंतयेद्बुद्ध्या सर्वकर्तव्यतास्तथा। तदनंतरं तूर्यशंखादिघोषेण संविशेत् स्वप्या
त्। तथैव तूर्यादिघोषेण प्रतिबुद्ध्येत्प्रतिबुद्ध्य च शास्त्रविद्भिर्विप्रासिभिः सह एकाकी वा पश्चिमे यामे शास्त्राणि
चिंतयेत्। सर्वकर्तव्यताः सर्वकार्याणी चरेद्वा स्वयं प्रतिउच्यते। अस्वस्थः पुनः सर्वकार्येष्वन्यं नियोजयेत्। यथाह म
नुः एतत्सर्वं समातिष्ठेदरोगः पृथिवीपतिः अस्वस्थः सर्वमेतत्तु मंत्रिमुख्ये निवेशयेत् इति॥ प्रेषयेच्च ततश्चारा
न्स्वेष्वन्येषु च सादरात्। ऋत्विक्पुरोहिताचार्यैराशीर्भिरभिनंदितः॥ दृष्ट्वा ज्योतिर्विदो वैद्यान्दद्या द्गां कांचनं मही। नै
वेशिकानि च तथा श्रोत्रियाणां गृहाणि च। अनंतरं तत्रस्थ एव विश्वस्तांश्चारान्दानमानसत्कारैः पूजितान्स्वेषु सा
मंतादिषु विकारिषु चान्येषु च महीपतिषु प्रेषयेत्तच्चिकीर्षित परिज्ञानाय। ततः प्रातः संध्यामुपास्याग्निहोत्रं हुत्वा पु

Dr. BHAU DAJI MEMORIAL

रोहितर्त्विगाचार्यादिभिराशीर्भिरभिनंदितो ज्योतिर्विदो दृष्ट्वा तेभ्यः स्वग्रहादिस्थितिं विदित्वा शांतिकादीनि च पुरोहि
ताद्यादिश्य वैद्यांश्च दृष्ट्वा तेभ्यश्च स्वशरीरस्थितिं निवेद्य प्रतिविधानं चादिश्य गां दद्यात् भूमिं कांचनं मही नैवेशिकानि विवा
होपयोगीनि कन्यालंकारादीनि गृहाणि च सुधाधवलितादीनि श्रोत्रियेभ्योधीतवेदेभ्यो ब्राह्मणेभ्यो दद्यादिति प्र
त्येकं संबध्यते॥ किंच॥ ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनो रिपुः स्याद्राजा भृत्यवर्गे च प्रजासु च यथा पिता॥
ब्राह्मणेष्वधिक्षिपत्स्वपि क्षमी क्षमावान्। स्निग्धेषु स्नेहवत्सु मित्रादिष्वजिह्मः अवक्रः अरिषु क्रोधनः भृत्यव
र्गे प्रजासु च हिताचरणेनाहितनिवर्तनेन च पितेव दयावान्स्यादिति प्रत्येकं संबध्यते॥ प्रजापरिपालनफलमा
ह॥ पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन्। सर्वदानाधिकं यस्मात्प्रजानां परिपालनं॥ यस्मान्न्यायेन धर्मशास्त्रो
क्तेन मार्गेण प्रजाः परिपालयन् परिपालितप्रजोपचितपुण्यात्षड्भागं षष्ठंभा गमादत्ते॥ यस्मात्सर्वेभ्यो भूम्या
दिदानेभ्यः प्रजानां परिपालनमधिकफलं तस्मात्प्रजासु पयापिता तथैव स्यादिति गतेन संबंधः॥ चाटतस्क
रदुर्वृत्तमहासाहसिकादिभिः॥ पीड्यमानाः प्रजा रक्षेत्कायस्थैश्च विशेषतः॥ चाटाः प्रतारकाः विश्वस्य ये परध
नमपहरंति। पटच्चरापहारिणस्तस्कराः दुर्वृत्ता ऐंद्रजालिककितवादयः सहोबलं तेन सह साकं तं साहसं। म
हच्च तत्साहसं च महासाहसं तेन वर्तत इति महासाहसिकाः प्रसत्यापहारिणः आदिशब्देन मौलिक कुंहक

मि० वृत्तयः एतैः पीड्यमाना बाध्यमानाः प्रजा रक्षेत्। कायस्था लेखकाः गणकाश्च तैः पीड्यमाना विशेषतो रक्षेत्। तेषां राजा
७२ वल्लभतया तिमायाविनया दुर्निवारत्वात्। अरक्ष्याः कुर्वंति यत्किंचित्किल्बिषं प्रजाः॥ तस्मात्तु नृपतेरर्थे यस्माद्
दृप्तास्सो वराना। अरक्ष्यमाणाः प्रजा यत्किंचित्किल्बिषं चौर्यपरदारगमनादि कुर्वंति तस्मात्पापादर्द्धं नृपतेर्भवति
। यस्मादसौ राजा रक्षणार्थं प्रजाभ्यः करान् आप्नोति॥ ये राष्ट्रे अधिकृतास्तेषां चारैः ज्ञात्वा विचेष्टितं। साधून्संमानये
श्लो८ द्राजा विपरीतांस्तु घातयेत्॥ तैस्को वजी विनोद्रव्यहीनां कृत्वा विवासयेत्। सदानमानसत्कारान् श्रोत्रियान्वा
सयेत्सदा। राज्ञा राज्याधिकारेषु ये नियुक्तास्तेषां विचेष्टितं चरितं चारैः कृत्कलक्षणैः सम्यक् ज्ञात्वा साधून्सुचरि
तान् संमानयेत्। दानमानसत्कारैः पूजयेत्। विपरीतान् दुश्चरितान् सम्यग्विदित्वा घातयेदपराधानुसारेण
। येपुनस्तस्को वजी विनः तान्द्रव्यरहितान्कृत्वा स्वराष्ट्रान्निःप्रवासयेत्। श्रोत्रियान् दानमानसत्कारैः सहितान्
कृत्वा स्वराज्ये सदैव वासयेत्। अन्यायेन नृपो राष्ट्रात्स्वकोशं यो भिवर्द्धयेत्। सोचिराद्विगतश्रीको नाशमेति
सबंधुभिः॥ असौ राजा राष्ट्राद् न्यायेन धनमादाय स्वकोशं वर्द्धयति सोचिरात् शीघ्रमेव विगतश्रीको विगतलक्ष्मी
कोबंधुभिः सह विनाशं प्राप्नोति। प्रजापीडनसंतापात्समुद्भूतो हुताशनः॥ राज्ञः श्रियं कुलं प्राणान्नादग्ध्वा विनिव
र्तते। प्रजानां तस्करादि पीडनेन यः संतापः तस्मादुद्भूतो हुताशनः रवसंतापकारित्वादपुण्यराशिर्हुताशन शब्दे ७२

नोच्यते। स राज्ञः श्रियं कुलं प्राणांश्चादग्ध्वा नाशमनीत्वा न निवर्तते नोपशाम्यति॥ य एव नृपतेर्धर्मः स्वराष्ट्र
परिपालने। तमेव कृत्स्नमाप्नोति परराष्ट्रं वशं नयन्॥ न्यायतः स्वराष्ट्रपरिपालने राज्ञो यो धर्मस्तं सकलं च समा
णान्यायेन परराष्ट्रं वशं नयन्। आत्मसात्कुर्वन्नाप्नोति धर्मषड्भागं च। किंतु यस्मिन्देशे यः आचारो व्यवहारः कु
लस्थितिः तथैव परिपाल्यो सौ यदा वशमुपागतः। यदा परदेशो वशमुपागतः दौतेन स्वदेशाचारादि संकरः का
र्यः किंतु यस्मिन्देशे य आचारः कुलस्थितिर्व्यवहारो वा यथैव प्रागासीत्तथैवासौ परिपालनीयो पदिशास्त्र वि
रुद्धो न भवति यदा वशमुपागत इत्यनेन वशोपगमात्प्रागनियमद्वृति दर्शितं॥ यथोक्तं॥ उपरुध्यारिमासीत
राष्ट्रं चास्योपपीडयेत्। दूषयेच्चास्य सततं यवसान्नोदकेंधनमिति॥ मंत्रमूलं यतो राज्यमतो मंत्रं सुरक्षितं
। कुर्याद्यथास्य न विदुः कर्मणामाफलोदयात्॥ यस्मात्तेः साद्धं चिंतयेद्राज्यमित्याद्युक्तं मंत्रमूलं राज्यं। तस्मा
त्मंत्रं यत्नेन तथा सुरक्षितं कुर्यात् यथास्य राज्ञः कर्मणां संधिविग्रहादीनामाफलोदयात् फलनिष्पत्तेः प्राग
न्ये मंत्रं न जानंति। किंच॥ अरिर्मित्रमुदासीनोऽनंतरस्तत्परः परः॥ क्रमशो मंडलं चिंत्यं सामादिभिरुपक्रमैः
॥ अरिः शत्रुर्मित्रं सुहृत्। उभयविलक्षण उदासीनस्ते च त्रयस्त्रिविधाः सहजाः कृत्रिमाः प्राकृताश्चेति। तत्र
सहजोरिः सापत्नपितृव्यतत्सुतादि। कृत्रिमोरिर्यस्यापकृतं येन चापकृतं। प्राकृतश्चानंतरदेशाधिपतिः॥

मि० सहजं मित्रं भागिनेयपैतृष्वस्रीयमातृष्वस्रीयादि। कृत्रिमं मित्रं येनोपकृतं यस्य चोपकृतं। प्राकृतं मित्रमेकां
७३ तरितदेशाधिपतिः। सहजकृत्रिमशत्रुमित्रलक्षणरहितो सहजकृत्रिमोदासीनो॥ प्राकृतोदासीनो ह्यंतरदे
शाधिपतिः॥ अरिः पुनश्चतुर्विधः॥ यातव्योच्छेत्तव्यं पीडनीयं कर्शनीयभेदेन। तत्र यातव्यो अनंतरभूमिपतिः
विरक्त ॥व्यसनी हीनबलोपि विरुद्धप्रकृतिः विदुर्गो मित्रहीनो दुर्बलश्चोच्छेतव्यः पीडनीयो मंत्रबलहीनः। प्रबल
मंत्रबलयुक्तः कर्शनीयः। निर्मूलनात्समुच्छेदं पीडनं बलनिग्रहं। कर्शनं तु पुनः प्राहुः कोशदंडापकर्शनादिति
।मित्रं च द्विविधं वर्द्ध णीयं कर्शनीयमिति कोशबलहीनं वर्द्धणीयं कोशबलाधिकं कर्शनीयं अनंतरस्तस्य
रः परइति। प्राकृतारिर्मित्रोदासीनानाह। अनंतरः प्राकृतो रिस्तत्परः प्राकृतं मित्रं। तस्मात्परः प्राकृतउदासी
नः शेषाः पुनः प्रसिद्धत्वान्नोक्ताः एतद्राजमंडलं क्रमशः पूर्वादिक्रमेण चिंत्यं। तेषां चेष्टितं ज्ञातव्यं। ज्ञात्वा च सा
मादिभिरुपायैर्वक्ष्यमाणैरभिसंधेयं। एवं पुरतः पृष्ठतः पार्श्वतश्च त्रयस्त्रय आत्मा चैकः इति त्रयोदशराजकमि
दं राजमंडलं पद्माकारं। पार्ष्णिग्राहाक्रंदासारादयस्त्वरिमित्रोदासीनेष्वेवांतर्भवंतीति संज्ञाभेदमात्रं तंत्रांतरे
दर्शितमिति योगीश्वरेण न पृथगुक्ताः सामादिभिरुपक्रमेरित्युक्तमिदानीं तानुपायानाह। उपायाः साम दानं च
भेदो दंडस्तथैव च। सम्यक्प्रयुक्ताः सिद्ध्येयुर्दंडस्त्वगतिका गतिः॥ साम प्रियभाषणं। दानं सुवर्णादेः। भेदो दनं। ७३

नं। तत्सामंतादीनां परस्परतो वैरस्योत्पादनेन दंडउपांशुप्रकाशाभ्यां धनापहारादिवधपर्यंतो प्रकारः॥ एते सा
मादयः परिपंथ्यादिसाधनोपायाः एते च देशकालाद्यनुसारेणैव सम्यक्प्रयुक्ताः सिद्ध्येयुः॥ तेषां च मध्ये दंडस्त्वग
तिका गतिः उपायांतरस्यासंभवे न प्रयोक्तव्यः एतच्च पीडनीयकर्शनीयाभिप्रायेण। यातव्योच्छेत्तव्यश्च दंड एव मु
ख्यः। एते च सामा दयो न केवलं राजव्यवहारविषया अपि तु सकललोकव्यवहारविषयाः यथा॥ अधीष्व पु
त्रकाधीष्व सदा स्यामितवमोदकान्। यद्वान्यस्मै प्रदास्यामि कर्णमुत्पाटयामि ते इति॥ किंच संधिं च विग्रहं या
नमासनं संश्रयं तथा॥ द्वैधीभावं गुणानेतान्यथावत्परिकल्पयेत्। संधिर्व्यवस्थाकरणं विग्रहो प्रकारः या
नं परं प्रति यात्रा। आसनमुपेक्षा। संश्रयो बलवदाश्रयणं द्वैधीभावः स्वबलस्य द्विधाकरणं एतान्संधिप्रभृ
तीन्गुणान्यथावद्देशकालशक्तिमित्रादिविशेषेण कल्पयेत्॥ यानकालमाह यदा सस्यगुणोपेतं परराष्ट्रं त
दाभिजेत्। परश्च हीन आत्मा च हृष्टवाहनपूरुषः॥ यदा परराष्ट्रं सस्यैर्धान्यादिभिर्गुणैश्च समजलैर्धनतृणादि
भिरुपेतं संपन्नं शत्रुश्च हीनो बलादिभिरात्मा च हृष्टवाहनपूरुषः वाहनानि हस्त्यश्वादीनि तानि च पुरुषाश्च
वाहनपुरुषाः हृष्टवाहनपुरुषा यस्य स तथोक्तः तदा परराष्ट्रमात्मसात्कर्तुं व्रजेत्॥ प्राणिनामभ्युदयविनि
पातानां दैवायत्तत्वात्। यदि दैवमस्ति तदा स्वयमेव परराष्ट्रादि वश्यं भविष्यत्यन्यथा न तत्कृतेपि पौरुषेन भवि

मि० ष्यत्यतोऽयमर्थ एवायं यात्राप्रयास इत्यत आह। दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता। तत्र दैवमभिव्यक्तं पौरु
७४ पृ षं पौर्वदेहिकं। कर्मसिद्धिः फलप्राप्तिरिष्टानिष्टलक्षणा सा न केवलं दैवे व्यवस्थिता। अपि तु पुरुषकारेऽपि लोके
तथादर्शनात्। चिकित्सादिशास्त्रे चैवं पर्यालोच्य। अपि च पुरुषकाराभावे दैवमेव नास्तीत्याह। तत्र दैवमिति।
यतः पूर्वदेहार्जितं पौरुषमेव दैवमुच्यते अल्पपुरुषकारानंतरमहाफलोदयाभिव्यक्तं। तस्मात्पुरुषकारा
भावेन दैवमस्तीति पुरुषकारे यत्नो विधातव्यः॥ इदानीं मतांतराण्याह। केचिद्दैवात्स्वभावाच्च कालात्पु
रुषकारतः। केचिदिष्टानिष्टलक्षणं फलं दैवादेवेच्छंति। केचित्स्वभावात् स्वयमेव भवति न कारणमपेक्षत
इति केचित्कालात्। केचित्पुरुषकारादेवेति॥ स्वमतमाह॥ संयोगे केचिदिच्छंति फलं कुशलबुद्धयः। दैवादी
नां संयोगे समुच्चये फलं भवतीति कुशलबुद्धयो मन्वादयो मन्यंते। एकैकस्मात्फलं न भवतीत्यत्र दृष्टांतमा
ह। यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत्। एवं पुरुषकारेण विना दैवं न सिध्यति। नात्र तिरोहितमस्ति॥ ला
भाय परराष्ट्रं गंतव्यमित्युक्तं लाभश्च त्रिविधः हिरण्यलाभो भूमिलाभो मित्रलाभश्चेति तेषु मित्रलाभो ज्याया
नतस्तत्प्राप्त्युपाये यत्नो विधातव्यः तत्प्राप्त्युपायश्च सत्यवचनमित्याह। हिरण्यभूमिलाभेभ्यो मित्रलब्धि ७४
र्वरा यतः। अतो यतेत तत्प्राप्तौ रक्षेत्सत्यं समाहितः। यस्माद्धिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा उत्कृष्टा त

स्मात्तत्प्राप्तौ यत्नेन तत्फलं कुर्यात्सामादिभिः सत्यं च रक्षेत्समाहितः सावधानः सत्यमूलत्वान्मित्रलाभस्य। इदा
नीं राज्यांगान्याह। स्वाम्यमात्यजनो दुर्गं कोशो दंडस्तथैव च। मित्राण्येताः प्रकृतयो राज्यं सप्तांगमुच्यते। महो
त्साहेत्याद्युक्तलक्षणो महीपतिः स्वामी। अमात्यो मंत्रिपुरोहितादयः जनो ब्राह्मणादिप्रजाः दुर्गं धन्व
दुर्गादि। कोशः सुवर्णादिद्रव्यराशिः दंडो हस्त्यश्वरथसंपत्तिलक्षणं चतुरंगबलं। मित्राणि सहजकृत्रिमप्रा
कृतानि। एताः स्वाम्याद्याः राज्यस्य प्रकृतयो मूलकारणानि एवं राज्यं सप्तांगमुच्यते। तदवाप्य नृपो दंडं दुर्वृ
त्तेषु निपातयेत्। धर्मो हि दंडरूपेण ब्रह्मणा निर्मितः पुरा। तदेवंविधं राज्यं प्राप्य दुर्वृत्तेषु वंचकशठधूर्तपर
दारपरद्रव्यापहारिहिंसकादिषु नृपो दंडं पातयेत् प्रयोजयेत्। हि यस्माद्धर्म एव दंडरूपेण पूर्वं ब्रह्मणा निर्मि
तः। अस्य च दंड इति यौगिकी संज्ञा दंडो दमनादित्याहुस्तेनादांतान्दमयेदित्यादि गौतमवचनात्। स नेतुं न्या
यतो शक्यो लुब्धेनाकृतबुद्धिना। स पूर्वोक्तो दंडो लुब्धेन कृपणेन अकृतबुद्धिना चंचलबुद्धिना न्यायतो न्याया
नुसारेण नेतुं प्रयोक्तुं शक्यो न भवति॥ कीदृशेन तर्हि शक्य इत्याह। सत्यसंधेन शुचिना सुसहायेन धीमता।
सत्यसंधेनाप्रतारकेण शुचिना जितारिषड्वर्गेण सुसहायेन पूर्वोक्तसहायसहितेन धीमता नयविनय
कुशलेन स दंडो न्यायतो धर्मानुसारेण नेतुं शक्यः। यथाशास्त्रं प्रयुक्तः सन् सदेवासुरमानुषं जगदानंदयेत्स

मि० ७५ र्वमन्यथा नत्प्रकोपयेत्। स दंडः शास्त्रोक्तमार्गेण प्रयुज्यमानः सन् देवासुरमानुषैः सहितं मिदं सर्वं जगदानंदयेत्
अन्यथा शास्त्रातिक्रमेण प्रयुक्तश्चेज्जगत्प्रकोपयेत्॥ न केवलमधर्मदंडेन जगत्प्रकोपनमपि तु प्रयोक्तुर्दृष्टादृ
ष्टहानिरपीत्याह। अधर्मदंडनं स्वर्गकीर्तिलोकविनाशनं। सम्यक् दंडनं राज्ञः स्वर्गकीर्तिजयावहं। प्रयुनः शा
स्त्रातिक्रमेण लोभादिना दंडः कृतः स पापहेतुत्वात् स्वर्गकीर्तिलोकांश्च विनाशयति। शास्त्रोक्तमार्गेण तु कृतः
स्वर्गकीर्तिजयानां हेतुर्भवति॥ अपि भ्राता सुतोर्घ्यो वा श्वशुरो मातुलोपि वा। नादंड्यो नाम राज्ञोस्ति धर्माद्वि
चलितः स्वकात्। अर्घ्यो अर्घार्हः आचार्यादिः शेषं प्रसिद्धं। एते भ्रातसुतप्रभृतयोपि स्वधर्माद्विचलिता दंड्याः
किमुतान्ये यतः स्वधर्माच्चलितो दंड्यो नाम राज्ञः कोपि नास्ति। एतच्च मातापित्रादिव्यतिरेकेण। तथा च स्मृ
त्यंतरं। अदंड्यौ मातापितरौ स्नातकपुरोहितपरिव्राजकवानप्रस्थाः श्रुतशीलशौचाचारवंतस्ते हि धर्मा
धिकारिण इति। किंच॥ यो दंड्यान्दंडयेद्राजा सम्यग्वध्यांश्च घातयेत्। इष्टं स्यात्क्रतुभिस्तेन समाप्तवरदक्षि
णैः॥ यस्तु राजा दंड्यान्स्वधर्मचलनादिना दंडयोग्यान्सम्यक् शास्त्रदृष्टमार्गेण धिक्कुधनदंडादिना दंडयति वि
ध्यांश्च वधार्हान् घातयति तेन राज्ञा भूरिदक्षिणैः क्रतुभिरिष्टं भवति। बहुदक्षिणक्रतुफलं प्राप्नोतीत्यर्थः। न ७५
च फलश्रवणाद्दंडप्रणयनं काम्यमिति मंतव्यं। अकरणे प्रायश्चित्तस्मरणात्। यथाह वसिष्ठः। दंड्योत्सर्गे राजे

करात्रमुपवसेत् त्रिरात्रं पुरोहितः॥ कृच्छ्रमदंड्यदंडने पुरोहितः त्रिरात्रं राजेति॥ दुष्टेषु सम्यग्दंडः प्रयोक्तव्य इत्युक्तं
दुष्टपरिज्ञानं व्यवहारदर्शनमंतरेण न भवतीति तत्परिज्ञानार्थं व्यवहारदर्शनमहरहः स्वयं कर्तव्यमित्याह॥
इति संचिंत्य नृपतिः क्रतुतुल्यफलं पृथक्। व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतोन्वहं। एवमुक्तेन प्रकारेण
क्रतुतुल्यफलं दंड्यदंडने स्वर्गादिनाशं चादंड्यदंडने न सम्यग्विचिंत्य पृथक् पृथक्। वर्णादिक्रमेण सभ्यैर्व
क्ष्यमाणलक्षणैः परिवृतः प्रतिदिनं व्यवहारान् वक्ष्यमाणेन मार्गेण दुष्टादुष्टपरिज्ञानार्थं राजा स्वयं पश्येत्
। कुलानि जातीः श्रेणीश्च गणान् जानपदानपि। स्वधर्माच्चलितान् राजा विनीय स्थापयेत्पथि। कुलानि ब्राह्म
णादीनां जातयो मूर्धावसिक्तप्रभृतयः श्रेणयस्तांबूलिकादीनां गणा हैतुकादीनां जानपदाः कारुकादयः। ए हेलाबु
तान् स्वधर्माच्चलितान् प्रच्युतान् राजा विनीय यथापराधं दंडयित्वा पथि धर्मे स्थापयेत्॥ दंडं दुर्वृत्तेषु निपात
येदित्युक्तं स च दंडो द्विविधः शारीरोर्थदंडश्चेति॥ यथाह नारदः॥ शारीरोर्थदंडश्च दंडश्च द्विविधः स्मृ
तः। शारीरस्ताडनादिस्तु मारणांतः प्रकीर्तितः॥ काकिण्यादिस्त्वर्थदंडः सर्वस्वांतस्तथैव चेति। द्विविधोप्यप
राधानुसारेणानेकधा भवति। आहस्म। शारीरो दशधाप्रोक्तोप्यर्थदंडस्तथैव चेति। तत्र कृष्णलमाषसुव
र्णपलादिशब्दैरर्थदंडो वक्तव्यस्ते च प्रतिदेशं भिन्नपरिमाणा यास्त्वेकरूपापराधत्वेपि देशभेदेन न्यूनाधि

मि० कदंडो मा भूदिति कृष्णलादिशब्दानां नियतपरिमाणादिविषयत्वं दंडव्यवहारे दर्शयितुमाह। जालसूर्यमरीचि
७६ स्थं त्रसरेणू रजः स्मृतं। तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते। गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः॥ कृ
ष्णलः पंच ते माषस्ते सुवर्णस्तु षोडश। पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तितं। जालकांतरप्रविष्टादित्यरश्मि
स्थितं यद्रजः तत्त्रसरेणुरित्युक्तं योगीश्वरादिभिः तत्त्वदर्शिभिः ते च त्रसरेणवोऽष्टौ लिक्षा स्वेदजं यूकांडं ता
लिक्षास्तिस्रो राजसर्षपो राजिका। ते राजसर्षपास्त्रयो गौरसर्षपः सिद्धार्थः ते गौरसर्षपाः षट् यवो मध्यो
मध्यमः न स्थूलो न सूक्ष्मः एतेन गौरसर्षपो अपि मध्यम इति गम्यते। तथा राजसर्षपा अपि मध्यशब्दादे
व सर्षपादिशब्दान् केवलमुन्मानवचनाः किंतु तदुन्मितद्रव्यवचना गम्यंते यथा प्रस्थपरिमिता यवाः प्रस्था
इत्युच्यंते। एवं सर्षपाद्युन्मितं द्रव्यं सर्षपादिशब्दैः। सर्षपादिशब्दानां केवलोन्मानवचनत्वे त्रसरेणूनुपसंहृ ता
त्योन्मातुमशक्यत्वात् तद्द्वारेण कृष्णलादिव्यवहारो न स्यात्। तत्र स्थूलतरस्थूलतमसूक्ष्मतरसूक्ष्मतममध्य सूक्ष्म
सर्षपाद्युन्मानभेदेन प्रतिदेशं व्यवहारभेदे स्थिते दंडव्यवहारे मध्यम इति नियम्यते मध्यमाय वास्त्रय
एक कृष्णलः ते कृष्णलाः पंचैको माषः ते माषाः षोडशैकः सुवर्णाश्चत्वारः पलं पंच वापि पलं प्रकीर्तितं ना ७६
रदादिभिः॥ तत्र स्थूलैस्त्रिभिर्यवैः कृष्णलपरिकल्पनायां व्यावहारिकनिष्कस्य षोडशांशः कृष्णलो भवति ते

स्थूल

व्यावहारिके द्वौ माषौ

DR. BHAU DAJI MEMORIAL

पंचभिर्माषो माषैः षोडशभिः सुवर्णः स च व्यावहारिकैः पंचभिर्निष्कैरेकः सुवर्णो भवति ते चत्वारः पलमिति निष्काणां
विंशतिः पलं॥ यदा तु सूक्ष्मैस्त्रिभिर्यवैः कृष्णलः परिकल्प्यते तदा व्यावहारिकनिष्कस्य द्वात्रिंशत्तमो भागः कृ
ष्णलो भवति तस्मिन्पक्षे सुवर्णः सार्द्धनिष्कद्वयं भवति पलं च दशनिष्कं॥ यदा तु मध्यमयवैः कृष्णलपरिकल्प
ना तदा निष्कस्य विंशतितमो भागः कृष्णलः सुवर्णश्चतुर्निष्कः षोडशनिष्कं पलं स्वसुवर्णपलमिति पक्षे विंश पं
तिनिष्कं पलं। एवमन्यदपि निष्कस्य चत्वारिंशो भागः कृष्णलो द्विनिष्कः सुवर्णो दशनिष्कं पलमित्यादि लोकव्य
वहारानुसारेणास्मात्सूत्राच्चोहनीयं॥ एवं सुवर्णस्योन्मानं प्रतिपाद्येदानीं रजतस्याह। द्वे कृष्णले रूप्यमाषो
धरणं षोडशैव ते। शतमानं तु दशभिर्धरणैः पलमेव तु। निष्कं सुवर्णाश्चत्वारः। द्वे कृष्णले पूर्वोक्ते रूप्यमाषो
रूप्यसंबंधी माषो ते रूप्यमाषाः षोडश धरणं पुराण इत्यस्यैव संज्ञांतरं। ते षोडश रूप्यद्धरणं पुराणश्चैव राजत इ
ति स्मरणात्। दशधरणैः शतमानं पलमिति चाभिधीयते। पूर्वोक्ताश्चत्वारः सुवर्णा एको राजतो निष्को भवति।
ईदानीं ताम्रस्योन्मानमाह। कार्षिकस्ताम्रिकः पणः॥ पलस्य चतुर्थांशः कर्ष इति लोकप्रसिद्धिः॥ कर्षेणोन्मि
तः कार्षिकः ताम्रस्य विकारः ताम्रिकः कर्षकसम्मितः ताम्रविकारः पणसंज्ञो भवति कार्षापणसंज्ञश्च का
र्षापणस्तु विज्ञेयः कार्षिकस्ताम्रिकः पण इति मनुवचनात्। पंचसुवर्णपक्षे विंशतिमाषः पणो भवति। त

मि० ७७ यासतिमाषो विंशतिमो भागः पणस्य च मूकीर्तितः इत्यादिव्यवहारसिद्धो भवति। चतुःसुवर्णपलपक्षे तु षोड
शमाषः पणो भवत्यस्मिन्पक्षे सुवर्णकार्षापणपलशब्दानां समानार्थत्वेपि पणकार्षापणशब्दौ नान्नविषया
वेवा। एवं तावद्धेमरूप्यताम्राणामुन्मानमुक्तं दंडव्यवहारोपयोगी कांस्यरीतिकादीनामपि लोकव्यवहारांगभू ताम्र।
तानामेवोन्मानं द्रष्टव्यं। स्वशास्त्रपरिभाषामाह। साशीतिः पणसाहस्रो दंड उत्तमसाहसः। तदर्द्धं मध्यमः प्रोक्त
स्तदर्द्धमधमः स्मृतः॥ पणानां साहस्रं पणसाहस्रं। तत्परिमाणमस्येति पणसाहस्रः अशीत्या सह वर्त्तत इति
साशीतिः॥ अशीत्यधिकपणसहस्रपरिमितो यो दंडः स उत्तमसाहससंज्ञको वेदितव्यः तदर्द्धं मध्यमः तस्य
साशीतिपणसाहस्रस्यार्द्धं चत्वारिंशदधिकपणपंचशतपरिमितो मध्यमसाहससंज्ञितः तस्य मध्यमस्य त्वा तदर्धमधमः
रिंशदधिकपंचशतस्यार्धं सप्तत्यधिकपणशतद्वयपरिमितो दंडोऽधमसाहससंज्ञितः स्मृत उक्तो मन्वादि
भिः॥ यत्तु पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः॥ मध्यमः पंच विज्ञेयः साहस्रं त्वेव चोत्तम इति मनूक्तं
तत्स्वल्पान्तरमतिपूर्वापराधविषयं द्रष्टव्यं। दंडभेदानाह। धिग्दंडस्त्वथ वाग्दंडो धनदंडो वधस्तथा॥ यो
ज्या व्यस्ताः समस्ता वाप्यपराधवशादिमे। धिग्दंडो धिगिति कुत्सनं। वाग्दंडः परुषशापवचनात्मकः॥ ध ७७
नदंडो धनापहारात्मकः॥ वधदंडः शरीरो बंधनादिर्जीवितांतः॥ एते चतुर्विधा दंडा व्यस्ताः एकैकशः सम
ऽवरोधादि

मि० ७८ स्ता वा द्वित्रास्त्रिचतुरो वा अपराधानुसारेण प्रयोक्तव्या इति उक्तक्रमेण पूर्वपूर्वासाध्येषूत्तरउत्तरः प्रयोक्तव्यः यथा
ह मनुः धिग्दंडं प्रथमं कुर्याद्वाग्दंडं तदनंतरं तृतीयं धनदंडं तु वधदंडमतः परमिति॥ दंडव्यवस्थानिमित्तान्या
ह। ज्ञात्वापराधं देशं च कालं बलमथापि वा। वयः कर्म च वित्तं च दंडं दंड्येषु पातयेत्। यथापराधं ज्ञात्वा तदनुसा
रेण दंडप्रणयनं कुर्यात्। एवं देशकालबलवयः कर्मवित्तानि ज्ञात्वा तदनुसारेण दंड्येषु दंडार्हेषु दंडप्रणयनं
कुर्यात्। तथा बुद्धिपूर्वाबुद्धिपूर्वसकृदावृत्त्यनुसारेण च। यद्यपि राजानमधिकृत्यायं राजधर्मकलापः उक्तः
तथापि वर्णान्तरस्यापि विषयमंडलादिपरिपालनाधिकृतस्यायं धर्मो वेदितव्यः राजधर्मान्प्रवक्ष्यामि यथा
वृत्तो भवेन्नृप इति पृथक्कृन्नृपग्रहणात्। करग्रहस्य रक्षार्थत्वात् रक्षणस्य च दंडप्रणयनायत्तत्वात्॥ ॥
॥ ॥ इति श्रीमत्पद्मनाभभट्टोपाध्यायात्मजस्य परमहंसपरिव्राजकविज्ञानेश्वरभट्टारकस्य कृतौ मि
ताक्षरायां याज्ञवल्क्यधर्मशास्त्रविवृतौ प्रथम आचाराध्यायः समाप्तम् संपूर्णं॥ ॥
उपोद्घातप्रकरणं। ब्रह्मचारिप्र० गृहस्थप्र० वर्णजातिप्र० गृहस्थ। स्नातकप्र। भक्ष्याभक्ष्यप्र० द्रव्यशुद्धिः दानधर्मप्र०। श्राद्धप्र०। गणपतिकल्पप्र० ७८
ग्रहशांतिप्र०। राजधर्मप्र

इति मितात्क्षरायामाचाराध्यायः समाप्तः

२८
१२
७७

मिताक्षरायां व्यवहाराध्यायप्रारंभः

॥श्रीगणेशाय नमः॥ ॥अभिषेकादिगुणयुक्तस्य प्रजापालनं परमो धर्मस्तच्च दुष्टनिग्रहमंतरेण न संभवति दु
१ ष्टपरिज्ञानं च न व्यवहारदर्शनेन विनेति व्यवहारदर्शनमहरहः कर्त्तव्यमित्युक्तं व्यवहारान्स्वयं पश्येत्सभ्यैः प
रिवृतोन्वहमिति स व्यवहारः कीदृशः कतिविधः कथं चेतीतिकर्त्तव्यताकलापो नाभिहितस्तदभिधानाय द्विती
योध्याय आरभ्यते॥ ॥व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह। धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः॥
व्यवहारान् अन्यविरोधेन स्वात्मसंबंधितया कथनं व्यवहारः॥ यथा कश्चिदिदं क्षेत्रादि मदीयमिति अन्योपि त तिङ्क्षथय
द्विरोधेन मदीयमिति॥ तस्यानेकविधत्वं दर्शयति बहुवचनेन॥ नृप इति न क्षत्रियमात्रस्यायं धर्मः किंतु प्रजा
पालनेऽधिकृतस्यान्यस्यापीति दर्शयति पश्येदिति पूर्वोक्तस्यानुवादो धर्मविशेषविधानार्थः॥ विद्वद्भिर्वेदव्या
करणधर्मशास्त्राभिज्ञैर्ब्राह्मणैर्न क्षत्रियादिभिः। ब्राह्मणैः सहेति तृतीयानिर्देशात्तेषामप्राधान्यं॥ सहयुक्ते
अप्रधान इति स्मरणात्॥ अतश्चादर्शनेऽन्यथादर्शने च राज्ञो दोषो न ब्राह्मणानां॥ यथाह मनुः॥ अदंड्यान्दं
डयन्राजा दंड्यांश्चैवाप्यदंडयन्॥ अयशो महदाप्नोति नरकं चैव गच्छतीति॥ धर्मशास्त्रानुसारेण नार्थशास्त्रा १
नुसारेण॥ देशादिसमयधर्मस्यापि धर्मशास्त्राविरुद्धस्य धर्मशास्त्रविषयत्वान्न पृथगुपादानं। यथा च वक्ष्य

ति॥ निजधर्माविरोधेन यस्तु सामयिको भवेत्। सोपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च य इति। क्रोधलोभविव
र्जित इति धर्मशास्त्रानुसारेणेति सिद्धे पुनः क्रोधलोभविवर्जित इति वचनमादरार्थं। क्रोधोऽमर्षः। लोभो लि
प्सातिशयः॥ ॥श्रुताध्ययनसंपन्ना धर्मज्ञाः सत्यवादिनः। राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः॥ श्रुते
न मीमांसाव्याकरणादिश्रवणेनाध्ययनेन च संपन्नाः। धर्मज्ञा धर्मशास्त्रज्ञाः सत्यवादिनः सत्यवदनशीलाः
रिपौ मित्रे च ये समाः द्वेषरागरहिताः॥ एवंभूताः सभासदः सभायां संसदि यथासीदंत्युपविशंतीति तथा दानमान
सत्कारैः राज्ञा कर्त्तव्याः। यद्यपि श्रुताध्ययनसंपन्ना इत्यविशेषेणोक्तं। तथापि ब्राह्मणा एव। यथाह कात्याय
नः। स तु सभ्यैः स्थिरैर्युक्तः प्राज्ञैर्मौलैर्द्विजोत्तमैः। धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैरिति। ते च त्रयः क
र्त्तव्याः बहुवचनस्यार्थवत्त्वात्॥ यस्मिन्देशे निषीदंति विप्रा वेदविदस्त्रय इति मनुस्मरणात्॥ बृहस्पतिस्तु स
प्त पंच त्रयो वा सभासदो भवंतीत्याह। लोकवेदज्ञधर्मज्ञाः सप्त पंच त्रयोपि वा। यत्रोपविष्टा विप्राः स्युः सा यज्ञस
दृशी सभेति। न च ब्राह्मणैः सहेति पूर्वश्लोकोक्तानां ब्राह्मणानां श्रुताध्ययनसंपन्ना इत्यादि विशेषणमिति मंतव्यं
। तृतीयाप्रथमांतनिर्दिष्टानां विशेषणविशेष्यभावासंभवात् विद्वद्भिरित्यनेन पुनरुक्तिप्रसंगाच्च। तथा च का

स्यायनेन ब्राह्मणानां सभासदां च स्वरूपभेदो दर्शितः। स प्राड्विवाकः सामात्यः स ब्राह्मणपुरोहितः। स सभ्यः प्रेक्ष
को राजा स्वर्गे तिष्ठति धर्मतः इति। तत्र ब्राह्मणा अनियुक्ताः सभासदश्च नियुक्ता इति भेदः। अत एवोक्तं। नि
२ युक्तो वानियुक्तो वा धर्मज्ञो वक्तुमर्हति। इति। तत्रानियुक्तानां यथावस्थितार्थकथनेपि यदि राजान्यथा करोति
। तदासौ निवारणीयोऽन्यथा दोषः। उक्तं च कात्यायनेन। अन्यायेनापि तं यान्तं येनुयान्ति सभासदः। तेपि तद्भा
गिनस्तस्माद्बोधनीयः स तैर्नृप इति। अनियुक्तानां पुनरन्यथाभिधानेऽनभिधाने वा दोषो न तु राज्ञोऽनिवारणे
वा ॥ सभायां न प्रवेष्टव्यं वक्तव्यं वा समंजसं। अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी इति मनुस्मरणात्। रिपौ मि
त्रे चेति चन्द्राल्लोकरंजनार्थं कतिपयैर्वणिग्भिरप्यधिष्ठितं सदः कर्तव्यं। यथाह कात्यायनः। कुलशीलवयोवृत्त
वित्तवद्भिरमत्सरैः। वणिग्भिः स्यात्कतिपयैः कुलभूतैरधिष्ठितमिति॥ ॥व्यवहारान्नृपः पश्येदित्युक्तं तत्रानुकल्प
माह। अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु। सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्। कार्यानरव्याकु
लतया व्यवहारान पश्यता नृपेण पूर्वोक्तैः सभ्यैः सह सर्वधर्मवित् सर्वान् धर्मान् शास्त्रोक्तान् सामयिकांश्च ध २
र्मान् वेत्ति विचारयतीति सर्वधर्मवित्। ब्राह्मणो न क्षत्रियादिर्नियोक्तव्यो व्यवहारदर्शने तं च कात्यायनोक्त

गुणविशिष्टं कुर्यात्॥ यथाह। दान्तं कुलीनं मध्यस्थमनुद्वेगकरं परं॥ परत्र भीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितमिति।
एवं च तत्र ब्राह्मणासंभवे क्षत्रियं वैश्यं वा नियुंजीत न शूद्रं। यथाह कात्यायनः। ब्राह्मणो यत्र न स्यात्तु क्षत्रियं तत्र यो
जयेत्। वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेदिति। नारदेन त्वयमेव मुख्यो दर्शितः। धर्मशास्त्रपुरस्कृत्य प्रा
ड्विवाकमते स्थितः। समाहितमतिः पश्येद्व्यवहाराननुक्रमादिति। प्राड्विवाकमते स्थितः। न स्वमते स्थितः॥ राजा
चारचक्षुषा परसैन्यं पश्यतीतिवत्। तस्य चेयं यौगिकी संज्ञा। अर्थिप्रत्यर्थिनौ पृच्छतीति प्राट्॥ तयोर्वचनं विरुद्धं
अविरुद्धं च सभ्यैः सह विविनक्ति विवक्तीति वा विवाकः। प्राट् चासौ विवाकश्चेति प्राड्विवाकः। उक्तं च। विवादा
नुगतं पृष्ट्वा स सभ्यस्तत्प्रयत्नतः। विचारयति येनासौ प्राड्विवाकस्ततः स्मृत इति। अपि च। रागाल्लोभाद्भया
द्वापि स्मृत्यपेतादिकारिणः। सभ्याः पृथक्पृथग्दण्ड्या विवादाद्विगुणं दमं। पूर्वोक्ताः सभ्या रजसो निरंकुश
त्वेन तदभिमतारागात्स्नेहातिशयाल्लोभाद्धालिप्सातिशयात् भयात्संत्रासात् स्मृत्यपेतं स्मृतिविरुद्धं आदि
शब्दाद्दाचाराद्पेतं कुर्वन्तः पृथक् पृथगेकैकशो विवादाद्विवादपराजयनिमित्तात् दमात् द्विगुणं दमं दण्ड्याः।
न पुनर्विवादास्पदीभूतात् द्रव्यात्॥ तथा सति परस्त्रीसंग्रहणादिषु दण्डाभावप्रसंगः। रागलोभभयानामुप

दानंरागादिद्वेषवद्दिगुणोदमोनाज्ञानमोहादिक्षितिनियमार्थं॥नचराजासर्वस्येष्टेब्राह्मणवर्ज्जमितिगौतमवच
३ नान्नूनंब्राह्मणादंड्यइतिमंतव्यं।तस्यप्रशंसार्थत्वात्।यत्तुषड्भिःपरिहार्य्योराज्ञाअवंध्यश्चअदंड्यश्चादंड्यश्चा
वहिष्कार्य्यश्चापरिवाद्यश्चापरिहार्य्यश्चेति।तदपिसएववहुश्रुतोभवति॥लोकवेदवेदांगविद्वाकोवाक्येति
हासपुराणकुशलस्तदपेक्षस्तद्वृत्तिश्चाष्टाचत्वारिंशतासंस्कारैःसंस्कृतस्त्रिषुकर्मस्वभिरतःषट्सुवासामया
चारिकेष्वभिविनीतइतिप्रतिपादितंवहुश्रुतविषयंनब्राह्मणमात्रविषयं।व्यवहारविषयमाह॥स्मृत्याचार
व्यपेतेनमार्गेणाधर्षितःपरैः॥आवेदयतिचेद्राज्ञेव्यवहारपदंहितत्।धर्मशास्त्रसमाचारविरुद्धेनमार्गेण
परेणाधर्षितोभिभूतोयद्राज्ञेप्राड्विवाकायवाआवेदयतिविज्ञापयतिचेद्यदितदावेद्यमानंव्यवहारपदं
प्रतिज्ञोत्तरसंशयहेतुपरामर्शप्रमाणनिर्णयप्रयोजनात्मकोव्यवहारस्तस्यपदंविषयस्तस्यचेदंसामान्यल
यथार्थं क्षणं॥सचद्विविधःशंकाभियोगस्तत्वाभियोगश्चेति॥यथाहनारदः॥अभियोगस्तुविज्ञेयःशंकातत्वाभियो
गतः।शंकाऽसतांतुसंसर्गात्तत्वंहोढाभिदर्शनादिति॥होढालोप्त्रलिंगमितियावत्॥तेनदर्शनंसाक्षाद्दर्श ३ नं
सत्वा नंहोढाभिदर्शनंतस्मात्।तत्वाभियोगोद्विविधः॥प्रतिषेधात्मकोविध्यात्मकश्चेति।यथामत्तोहिरण्यादिकंगृ

चौरेणधनंनीतं

DR. BHAU DAJI MEMORIAL
भाऊदाजी

हीत्वानप्रयच्छतिक्षेत्रादिकंममापहरतीतिवा।उक्तंचकात्यायनेन।न्याय्यंस्वंनेच्छतेकर्तुमन्यायंवाकरोतियइति।
पुनश्चाष्टादशधाभिद्यते।यथाहमनुः।तेषामाद्यमृणादानंनिक्षेपोस्वामिविक्रयः।संभूयचसमुत्थानंदत्तस्यान
पकर्मच।वेतनस्यैवचादानंसंविदश्चव्यतिक्रमः।क्रयविक्रयानुशयोविवादःस्वामिपालयोः।सीमाविवादधर्मं
श्चपारुष्येदंडवाचिके।स्तेयंचसाहसंचैवस्त्रीसंग्रहणमेवच॥स्त्रीपुंधर्मोविभागश्चद्यूतमाह्वयएवच।पदान्यष्टा
दशैतानिव्यवहारस्थितावि(?)हेति।एतान्यपिसाध्यभेदेनपुनर्बहुत्वंगतानि।यथाहनारदः॥एषामेवप्रभेदोन्यःशता
तमष्टोत्तरंस्मृतं।क्रियाभेदान्मनुष्याणांशतशाखोनिगद्यतइति।आवेदयतिचेद्राज्ञेत्यनेनस्वयमेवागत्यावेद
यतिनराजप्रेरितस्तत्पुरुषप्रेरितोवेतिदर्शयति।यथाहमनुः।नोत्पादयेत्स्वयंकार्य्यंराजानाप्यस्यपुरुषः।नच
प्रापितमन्येनग्रसेतार्थंकथंचनेति।परैरितिपरेणपराभ्यांपरैरित्येकस्यैकेनद्वाभ्यांबहुभिर्वाव्यवहारोभव
तीतिदर्शयति।यस्तुनरेकस्यबहुभिःसार्द्धंस्त्रीणांप्रेष्यजनस्यच॥अनादेयोभवेद्वादोधर्मविद्भिरुदाहृतइति
नारदवचनेतद्भिन्नसाध्यविषयं।आवेदयतिराज्ञइत्यनेनैवराज्ञाप्रष्टोविनीतवेषआवेदयेत्।आवेदितंचयु
क्तंचेन्मुद्रादिनाप्रत्यर्थ्याह्वानमकल्यादीनांचानाह्वानमित्याद्यर्थसिद्धमितितन्नोक्तं।स्मृत्यंतरेतुस्पष्टार्थमुक्तं॥

यथा। काले कार्य्यार्थिनं पृच्छेत्प्रणतं पुरतः स्थितं। किं कार्य्यं का च ते पीडा मा भैषीर्ब्रूहि मानव। केन कस्मिन्कदा
४ कस्मात्पृच्छेदेवं सभागतं। एवं पृष्टः स यद्ब्रूयात्सभ्यैर्ब्राह्मणैः सह। विमृश्य कार्य्यं न्याय्यं चेदाह्वानार्थमतः परं
। मुद्रां वा निक्षिपेत्तस्मिन् पुरुषं वा समादिशेत्। अकल्यबालस्थविरविषमस्थक्रियाकुलान्। कार्य्यातिया
तिव्यसनिन्स्त्रयकार्य्योत्सवाकुलान्। मत्तोन्मत्तप्रमत्तार्त्तभृत्यान्नाह्वानयेन्नृपः। न हीनपक्षां युवतिं कुले जा
तां प्रसूतिकां। सर्ववर्णोत्तमां कन्यां तां ज्ञातिप्रभुकाः स्मृताः। तदधीनकुटुंबिन्यः स्वैरिण्यो गणिकाश्च याः। नि
ष्कुला याश्च पतितास्तासामाह्वानमिष्यते। कालं देशं च विज्ञाय कार्य्याणां च बलाबलं। अकल्यादीनपि शनै
र्यानैराह्वानयेन्नृपः। ज्ञात्वाभियोगं येपि स्युर्वने प्रव्रजितादयः। तानप्याह्वानयेद्राजा गुरुकार्येष्वकोपयन्निति।
आसेधव्यवस्थाप्यर्थे सिद्धे वा नारदेनोक्ता। वक्तव्येर्थे स्वतिष्ठंतमुत्क्रामंतं च तद्वचः। आसेधयेद्विवादार्थी यावत्साह्वानं
दर्शनं। स्थानासेधः कालकृतः प्रवासात्कर्म्मणस्तथा। चतुर्विधः स्यादासेधो नासिद्धस्तं विलंघयेत्। आसेध
कालआसिद्धआसेधं योतिवर्त्तते। स विनेयोन्यथा कुर्वन्नासेद्धा दंडभाग्भवेत्। नदीसंतारकांतार[redacted] ४
दुर्द्देशोपप्लवादिषु। आसिद्धस्तं परासेधमुत्क्रामन्नापराध्नुयात्। निर्वेष्टुकामो रोगार्त्तो यियक्षुर्व्यसने स्थि

इदं कार्यं न कर्तव्यं   आश्रमांतरभिक्षुर्विवाहार्थी

६था। अन्य

ते
तः। अभियुक्तश्चान्येन राजकार्य्योद्यतस्तथा॥ गवां प्रचारे गोपालाः सस्यावापे कृषीवलाः। शिल्पिनश्चापि तत्कालमा
युधीयाश्च विग्रह इति। आसेधो राजाज्ञयाऽवरोधः। अकल्यादयः पुत्रादिकमन्यं वा सुहृदं प्रेषयिष्यंतीति च तेन परार्थ
वादिनः। योन भ्राता न च पिता न पुत्रो न नियोगकृत्। परार्थवादी दंड्यः स्याद्व्यवहारेषु विब्रुवन्निति नारदवचनात्॥
॥ प्रत्यर्थिनि मुद्रालेख्यपुरुषाणामन्यतमेनानीते किं कुर्य्यादित्याह॥ ॥प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थि
ना। समामासतदर्द्धाहर्नामजात्यादिचिह्नितं॥ अर्थ्यत इत्यर्थः साध्यः सोऽस्यास्तीत्यर्थी॥ तत्प्रतिपक्षः प्रत्यर्थी॥ तस्या
ग्रतः पुरतो लेख्यं लेखनीयं। यथा येन प्रकारेण पूर्वमावेदनकाले आवेदितं तथा। न पुनरन्यथावादित्वेन भंगप्र व्यवहारस्य
[redacted] धर्म संगात्॥ अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः। आहूतः प्रपलायी च हीनः पंचविधः स्मृत इति॥ आवेदनकाल ए
वार्थिवचनस्य लिखितत्वात्पुनर्लेखनमनर्थकमित्यत आह। समामासेत्यादि॥ संवत्सरमासपक्षतिथिवारादि
ना अर्थिप्रत्यर्थिनामब्राह्मणादिजात्यादिचिह्नितं। आदिग्रहणात् द्रव्यतत्संख्यास्थानवेलाक्षमालिंगादीनि गृ बाल्यादीनि
ह्यंते॥ ॥यथोक्तं। अर्थवद्धर्म्मसंयुक्तं परिपूर्णमनाकुलं। साध्यवद्वाचकपदं प्रकृतार्थानुबंधि च। प्रसिद्धमविरुद्धं च
निश्चितं साधनक्षमं। संक्षिप्तं निखिलार्थं च देशकालाविरोधि च। वर्षर्तुमासपक्षाहो वेलादेशप्रदेशवत्। स्थाना

वसथसाध्याख्याजात्याकारवयोयुतं। साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनामवत्॥ परात्मपूर्वजानेकराजनामभि
५ रंकितं। क्षमालिंगात्मपीडावत्कथिताहर्तृदायकं। यदावेदयते राज्ञे तद्भाषेत्यभिधीयत इति। भाषाप्रतिज्ञापक्षइत्य
नर्थांतरं। आवेदनसमये कार्यमात्रं लिखितं। प्रत्यर्थिनोऽग्रतः समांसादि विशिष्टं लिख्यत इति विशेषः। संव मा
त्सरविशेषणं यद्यपि सर्वव्यवहारेषु नोपयुज्यते तथाप्याधिप्रतिग्रहक्रयेषु निर्णयार्थमुपयुज्यते। आधौ प्र
तिग्रहे क्रीते पूर्वा तु बलवत्तरा इति वचनात्। अर्थव्यवहारेपि एकस्मिन्वत्सरे यत्संख्याकं यत् द्रव्यं यतो येन गृ
हीतं प्रत्यर्पितं च पुनरन्यस्मिन्वत्सरे तद्द्रव्यं तत्संख्याकं ततस्तेन गृहीतं याच्यमानो यदि ब्रूयात्सत्यं गृहीतं प्र
त्यर्पितं चेति वत्सरांतरे गृहीतं प्रत्यर्पितं नास्मिन्वत्सर इत्युपयुज्यते। एवं मासाद्यपि योज्यं। देशस्थानादयः पु २५
नः स्थावरेष्वेवोपयुज्यंते। देशश्चैव तथा स्थानं संनिवेशस्तथैव च॥ जातिः संज्ञाधिवासश्च प्रमाणं क्षेत्रनाम च। पि
तृपैतामहं चैव पूर्वराजानुकीर्तनं। स्थावरेषु विवादेषु दशैतानि निवेशयेदिति स्मरणात्॥ देशो मध्यदेशादिः।
स्थानं वाराणस्यादि॥ संनिवेशः तत्रैव पूर्वापरदिग्विभागपरिच्छिन्नः सम्यग्निविष्टो गृहक्षेत्रादिः। जातिरर्थिप्र ५
त्यर्थिनो ब्राह्मणत्वादिः। संज्ञा च देवदत्तादिः। अधिवासः समीपदेशनिवासी जनः। प्रमाणं निवर्तनादिभूमि

परिमाणं। क्षेत्रनाम नंद्यालिक्षेत्रं कमुकक्षेत्रं कृष्णभूमः पांडुभूमः इति। पितुः पितामहस्य च नामार्थिप्रत्यर्थिनोः पूर्वे
सा षां त्रयाणां राज्ञां नामकीर्तनं चेति। समामासादीनां यस्मिन्व्यवहारे यावदुपयुज्यते तत्र तावल्लेखनीयमिति तात्पर्या
र्थः। एवं पक्षलक्षणे स्थिते पक्षलक्षणरहितानां पक्षवदाभासमानानां पक्षाभासत्वं सिद्धमेवेति योगीश्वरेण न पृ २५
थक् पक्षाभासा उक्ताः। अन्यैस्तु विस्पष्टार्थमुक्तं। अप्रसिद्धं निराबाधं निरर्थं निःप्रयोजनं। असाध्यं वा विरुद्धं वा प
क्षाभासं विवर्जयेदिति। अप्रसिद्धं मदीयं शशविषाणं गृहीत्वा न प्रयच्छतीत्यादि। निराबाधं अस्मद्गृहप्रदीप प्र
काशेनायं स्वगृहे व्यवहरतीत्यादि। निरर्थं अभिधेयरहितं कचटतपं गजडदबमित्यादि॥ निःप्रयोजनं यथा अयं
देवदत्तोऽस्मद्गृहसन्निधौ सुस्वरमधीत इत्यादि। असाध्यं यथाहं देवदत्तेन सभ्रूभंगमुपहसित इत्यादि। एतत्साधना
संभवादसाध्यं॥ अल्पकालत्वान्न साक्षिसंभवो लिखितं दूरतोऽल्पत्वान्न दिव्यमिति। विरुद्धं यथाहं मूकेन शप्त इ
त्यादि॥ पुरराष्ट्रादिविरुद्धं वा। राज्ञा च वर्जितो यश्च यश्च पौरविवर्जितः। राष्ट्रस्य वा समस्तस्य प्रकृतीनां तथैव च। प्रजानां
अन्ये वा ये पुरग्राममहाजनविरोधकाः। अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्तिताः। इति। यत्वनेकपदसंकीर्णः पूर्वप
क्षो न सिध्यतीति तत्र यद्यनेकवस्तुसंकीर्ण इत्युच्यते तदा न दोषः। मदीयमनेन हिरण्यं वासो रूपकादि चापहृतमि

स्येवंविधस्यादुष्टत्वात्। ऋण दानादिपदसंकरे पक्षाभास इति चेन्न। यथा। मदीया रूपका अनेन गृहीताः सुवर्णं चा
६ स्य हस्ते निक्षिप्तं मदीयं क्षेत्रमपहरति चेत्यादीनां पक्षत्वमिष्यत एव। किंतु क्रियाभेदात्क्रमेण व्यवहारो न युगपदिति ये
तावत्। तथाह कात्यायनः॥ बहुप्रतिज्ञं यत्कार्यं व्यवहारेषु निश्चितं। कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सयेति। त
स्मादनेकपदसंकीर्णः पूर्वपक्षो युगपन्न सिध्यतीति तस्यार्थः॥ अर्थिग्रहणात्सुतपित्रादीनां ग्रहणं तेषामेकार्यत्वात्।
नियुक्तस्यापि नियोगेनैव तदेकार्थत्वाक्षेपात्। अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहितोपि वा। यो यस्यार्थे विवदते तयो
र्जयपराजयाविति स्मरणात्॥ नियुक्त जयपराजयो मूलस्वामिनोरेव। एतच्च भूमौ फलके वा पांडुलेखेन लिखित्वा
आवापोद्धारेण शोधितं पश्चात्पत्रे निवेशयेत्॥ पूर्वपक्षं स्वभावोक्तं प्राड्विवाकोभिलेखयेत्॥ पांडुलेखेन फलके
ततः पत्रे विशोधितमिति कात्यायनस्मरणात्। शोधनं च यावदुत्तरदर्शनं कर्त्तव्यं नातः परमनवस्थाप्रसंगात्। अत
एव नारदेनोक्तं। शोधयेत्पूर्ववादं तु यावन्नोत्तरदर्शनम्। अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेदिति। पूर्वपक्षमशो
धयित्वैव यद्युत्तरं दापयंति सभ्यास्तदा रागाल्लोभादित्युक्तदंडेन सभ्यान्दंडयित्वा पुनः प्रतिज्ञापूर्वकं व्यवहारः प्रव ६
र्त्तयितव्यो राज्ञेति॥ ॥एवं शोधिते पत्रारूढे च पूर्वपक्षे किं कर्त्तव्यमित्याह॥ श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसंनि

धौ। श्रुतो भाषार्थो येन प्रत्यर्थिना सो श्रुतार्थः। तस्योत्तरं पूर्वपक्षादुत्तरं भवतीत्युत्तरं लेख्यं लेखनीयं पूर्वावेदकस्या
र्थिनः संनिधौ समीपे। उत्तरं तु पूर्वोक्तस्य निराकरणं तदुच्यते। यथाह॥ पक्षस्य व्यापकं सारमसंदिग्धमनाकुलं। अव्या
ख्यागम्यमित्येतदुत्तरं तद्विदो विदुरिति। पक्षस्य व्यापकं निराकरणसमर्थं। सारं न्याय्यं न्यायादनपेतं। असंदिग्धं संदे
हरहितं। अनाकुलं पूर्वापराविरुद्धं। अव्याख्यागम्यं अप्रसिद्धपदप्रयोगेण दुश्लिष्टविभक्तिसमाससाध्याहाराभिधा
नेन वा अन्यदेशभाषाभिधानेन वा यद्व्याख्येयार्थं न भवति तत्सदुत्तरं। तच्चतुर्विधं संप्रतिपत्तिर्मिथ्या प्रत्यवस्कंदनं पू
र्वन्यायश्चेति। तथाह कात्यायनः॥ सत्यं मिथ्योत्तरं चैव प्रत्यवस्कंदनं तथा। पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधमि
ति। तत्र सत्योत्तरं यथा। रूपकशतं मत्तो धारयतीत्युक्ते सत्यं धारयामीति। यथाह। साध्यस्य सत्यवचनं प्रतिपत्तिरुदा
हृतेति। मिथ्योत्तरं तु नाहं धारयामीति। तथा च कात्यायनः॥ अभियुक्तोभियोगस्य यदि कुर्यादपह्नवं। मिथ्या तत्तु विजा
नीयादुत्तरं व्यवहारत इति। तच्च मिथ्योत्तरं चतुर्विधं। मिथ्यैतन्नाभिजानामि तदा तत्र न संनिधिः। अजातश्चास्मि
तत्काल इति मिथ्या चतुर्विधमिति॥ ॥प्रत्यवस्कंदनं नाम सत्यं गृहीतं प्रतिदत्तं। प्रतिग्रहेण लब्धमिति वा। यथा
ह नारदः। अर्थिना लेखितो योर्थः प्रत्यर्थी यदि तं तथा। प्रपद्य कारणं ब्रूयात्प्रत्यवस्कंदनं स्मृतमिति। प्राङ्न्यायोत्त

रं तु॥ यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थे अनेनाहमभियुक्तस्तत्र चायं व्यवहारमार्गेण पराजित इति। उक्तं च कात्या
यनेन। आचारेणावसन्नोऽपि पुनर्लेखयते यदि॥ सोऽभिधेयो जितः पूर्वं प्राङ्न्यायस्तु स उच्यते। एवमुत्तरलक्षणे
स्थिते उत्तरलक्षणरहितानां उत्तरवदवभासमानानामुत्तराभासत्वमर्थसिद्धं स्पष्टीकृतं च स्मृत्यन्तरे। संदिग्धम
न्यत्प्रकृतादत्यल्पमतिभूरि च। पक्षैकदेशव्याप्यन्यत्तथा नैवोत्तरं भवेत्॥ यद्व्यस्तपदमव्यापि निगूढार्थं तथाकु
लं। व्याख्यागम्यमसारं च नोत्तरं स्वार्थसिद्धये इति। तत्र संदिग्धं। सुवर्णशतमनेन गृहीतमित्युक्ते सत्यं गृहीत
सुवर्णशतं माषशतं वेति। प्रकृतादन्यद्यथा सुवर्णशताभियोगे पणशतं धारयामीति। अत्यल्पं। सुवर्णशताभियो
शतं गे पंच धारयामीति। अतिभूरि। सुवर्णशताभियोगे द्विशतं धारयामीति। पक्षैकदेशव्यापि यथा हिरण्यवस्त्रा
द्यभियोगे हिरण्यं गृहीतं नान्यदिति। व्यस्तपदं। ऋणादानाभियोगे पदांतरेणोत्तरं॥ यथा सुवर्णशताभियोगे अ
नेनाहं ताडित इति। अव्यापि। देशस्थानादिविशेषणाव्यापि। यथा मध्यदेशे वाराणस्यां पूर्वस्यां दिशि क्षेत्रमनेन
नापहृतमिति॥ पूर्वपक्षे लिखिते क्षेत्रमपहृतमिति। निगूढार्थं॥ सुवर्णशताभियोगे किमहमेवं धारयामीत्यत्र अस्मै
ध्वनिना प्राड्विवाकः सभ्यो वार्थी वाऽन्यस्मै धारयतीति निगूढार्थं। आकुलं। पूर्वापरविरुद्धं यथा सुवर्णशताभि
सूचयतीति

योगे कृते सत्यं गृहीतं न धारयामीति। व्याख्यागम्यं॥ दुःश्लिष्टविभक्तिसमाससाध्याहाराभिधानेन व्याख्याग
अन्य म्यं। अदेशभाषाभिधानेन वा। यथा। सुवर्णशतविषये पितृऋणाभियोगे गृहीतशत वचनात्सुवर्णानां पितु
र्न जानामीति। अत्र गृहीतशतस्य पितुर्वचनात्सुवर्णानां शतं गृहीतमिति न जानामीति। असारं न्यायविरुद्धं। यथा
। सुवर्णशतमनेन वृद्ध्या गृहीतं वृद्धिरेव दत्ता न मूलमित्यभियोगे॥ सत्यं वृद्धिर्दत्ता न मूलं गृहीतमिति। उत्तरमित्ये
कवचननिर्देशादुत्तराणां संकरो निरस्तः॥ यथाह कात्यायनः॥ पक्षैकदेशे यत्सत्यमेकदेशे च कारणं। मिथ्या चैवैक
देशे च संकरात्तदनुत्तरमिति। अनुत्तरत्वे च कारणं तेनैवोक्तं॥ न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोः। न चार्थ
सिद्धिरुभयोर्न चैकत्र क्रियाद्वयमिति। मिथ्याकारणोत्तरयोः संकरे अर्थिप्रत्यर्थिनोर्द्वयोरपि क्रियाप्राप्नोति॥ मिथ्या
क्रिया पूर्ववादे कारणे प्रतिवादिनीति स्मरणात्। तदुभयमेकस्मिन्व्यवहारे विरुद्धं॥ यथा सुवर्णरूपकशतं चाने
न गृहीतमित्यभियोगे सुवर्णशतं न गृहीतं रूपकशतं गृहीतं प्रतिदत्तं चेति॥ कारणप्राङ्न्यायसंकरे तु प्रत्यर्थिन एव क्रि
याद्वयं। प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियामिति॥ यथा सुवर्णशतं गृहीतं प्रतिदत्तं रूपकशते व्यवहा
रमार्गेण पराजित इति। अत्र प्राङ्न्याये जयपत्रेण वा प्राङ्न्यायदर्शिभिर्वा भावितव्यं। कारणोत्तरे तु साक्षिलेख्यादिभि

८ वर्तयितव्यमितिविरोधः।एवमुत्तरत्रयसंकरेपिद्रष्टव्यं।यथा अनेनसुवर्णंरूपकशतंवस्त्राणिचगृहीतानिइत्यभि
योगेसत्यंसुवर्णंगृहीतंप्रतिदत्तं।रूपकशतंनगृहीतं।वस्त्रविषयेपूर्वन्यायेनपराजितइति।एवंचतुःसंकरेपि।ए
तेषांचानुत्तरत्वंयोगपद्येन।तस्यतस्यांशस्यतेनतेनविनासिद्धेः।क्रमेणोत्तरत्वमेव।क्रमश्चार्थिनःप्रत्यर्थिनःस
भ्यानांचेच्छयाभवति।यत्रपुनरुभयोःसंकरस्तत्रयस्यप्रभूतार्थविषयत्वंतत्क्रियोपादानेनपूर्वंव्यवहारःप्रव
र्तयितव्यः।पश्चादल्पविषयोत्तरोपादानेनव्यवहारोद्रष्टव्यः।यत्रचसंप्रतिपत्तेरुत्तरांतरस्यचसंकरस्तत्रोत्तरांतरो
पादानेनव्यवहारोद्रष्टव्यः।संप्रतिपत्तौक्रियाभावात्।यथाहारीतेन।मिथ्योत्तरंकारणंचस्यातामेकत्रचेदुभे।सत्यं
वापिसहान्येनतत्रग्राह्यंकिमुत्तरमिति॥उक्तोक्तं।यत्प्रभूतार्थविषयंयत्रवास्यात्क्रियाफलं।उत्तरंतत्रतज्ज्ञेयम्
संकीर्णमतोन्यथा।संकीर्णंभवतीतिशेषः।ऐच्छिकक्रमोभवतीत्यर्थः।तत्रप्रभूतार्थे।यथा।अनेनसुवर्णंरूपक
शतंवस्त्राणिचगृहीतानीत्यभियोगे[illegible]सुवर्णंरूपकशतंचनगृहीतंवस्त्राणिगृहीतानिप्रतिदत्तानिचेति।
अत्रमिथ्योत्तरस्यप्रभूतविषयत्वात्अर्थिनःक्रियामादायप्रथमंव्यवहारःप्रवर्तयितव्यः॥पश्चादल्पविषयो
व्यवहारः।एवंमिथ्याप्राङ्न्यायसंकरेकारणप्राङ्न्यायसंकरेचयोजनीयं।तथातस्मिन्नेवाभियोगेसत्यंसुव

MEMORIAL

र्णंरूपकशतंचगृहीतंप्रतिदास्यामिवस्त्राणितुनगृहीतानि।गृहीतानिप्रतिदत्तानीतिवा।वस्त्रविषयेपूर्वंपराजित
इतिचोत्तरेसंप्रतिपत्तेर्भूरिविषयत्वेपितत्क्रियाभावान्मिथ्योत्तरक्रियामादायव्यवहारःप्रवर्तयितव्यः।यत्रतु
मिथ्याकारणोत्तरयोःकृत्स्नपक्षव्यापित्वं।यथाशुंगगवाहिकयाकश्चिद्वदति।इयंगौर्मदीयामुकस्मिन्काले
नष्टास्यगृहेदृष्टेति।अन्यस्तुमिथ्यैतत्एतस्माद्दर्शितकालात्पूर्वमेवास्मद्गृहेस्थितामम गृहेजातावेतिवद
ति।इदंतावत्पक्षनिराकरणसमर्थत्वान्नानुत्तरं।नापिमिथ्यैव।कारणोपन्यासात्।नापिकारणं।एकदेशस्याभ्यु
पगमाभावात्।तस्मात्सकारणंमिथ्योत्तरमिदं।अत्रचप्रतिवादिनःक्रिया।कारणेप्रतिवादिनीतिवचनात्।ननुमि
थ्याक्रियापूर्ववादवत्इतिपूर्ववादिनःकस्मात्क्रियानभवति।तस्यशुद्धमिथ्याविषयत्वादिति।कारणेप्रतिवादिनी
त्येतदपिकस्माच्छुद्धकारणविषयेनभवति।नैतत्।सर्वस्यापिकारणोत्तरस्यमिथ्यासहचरितरूपत्वाच्छुद्धकारणोत्तर
स्याभावात्।प्रसिद्धकारणोत्तरेप्रतिज्ञार्थैकदेशस्याभ्युपगमेनैकदेशस्यमिथ्यात्वं।यथासत्यंरूपकशतंगृहीतंनधा
रयामिप्रतिदत्तत्वादिति।प्रकृतोदाहरणेतुप्रतिज्ञातार्थैकदेशस्याभ्युपगमोनास्तीतिविशेषः।एतच्चहारीतेनस्पष्टमु
क्तं।मिथ्याकारणयोर्वापिग्राह्यंकारणमुत्तरमिति।यत्रमिथ्याप्राङ्न्याययोःपक्षव्यापित्वं॥यथारूपकशतंधार

एकदेशस्यसत्यत्वं।

यतीत्यभियोगे मिथ्येतदस्मिन्नर्थे पूर्वमयं मया पराजित इति। अत्रापि प्रतिवादिन एव क्रिया॥ प्राङ्न्यायकारणोक्तौ तु
९ प्रत्यर्थी निर्दिशेत्क्रियामिति वचनात्॥ छुंद्रस्य प्राङ्न्यायस्याभावादनुत्तरत्वप्रसंगात्। संप्रतिपत्तेरपि साध्यत्वेनो
पदिष्टस्य पक्षस्य सिद्धत्वोपन्यासेन साध्यत्वनिराकरणादेवोत्तरत्वं। यदा तु कारणप्राङ्न्यायसंकरः यथा ज्ञातमनेन
गृहीतमित्यभियुक्तः प्रतिवदति सत्यं गृहीतं प्रतिदत्तं चेत्यस्मिन्नेवार्थे प्राङ्न्यायेनायं पराजित इति। तत्र प्रतिवादि
नो यथारुचीति नक्वचिद्वादिप्रतिवादिनोरेकस्मिन्व्यवहारे क्रियाप्रसंग इति निर्णयः॥ ॥एवमुत्तरे पत्रे निवेशिते सा
ध्यसिद्धेः साधनायत्तत्वात्साधननिर्देशं कः कुर्यादित्यत आह॥ ॥ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनं॥
ततउत्तरानंतरमर्थी साध्यवान्सद्य एवानंतरमेव लेखयेत्। प्रतिज्ञातः साध्यः स चासावर्थश्चेति प्रतिज्ञातार्थ
स्तस्य साधनं। साध्यतेऽनेनेति साधनं प्रमाणं। अत्र सद्यो लेखयेदिति वदतोत्तराभिधाने कालविलंबनमप्यंगी
कृतमिति गम्यते। तच्चोत्तरत्र विवेचयिष्यते। अर्थी प्रतिज्ञातार्थसाधनं लेखयेदिति वदता यस्य साध्यमस्ति स प्रतिज्ञा
तार्थसाधनं लेखयेदित्युक्तमतश्च प्राङ्न्यायोत्तरे प्राङ्न्यायस्यैव साध्यत्वात्प्रत्यर्थ्येवार्थी जात इति स एव साधनं लेख ९
येत्॥ कारणोत्तरेपि कारणस्यैव साध्यत्वात्कारणवाद्येवार्थीति स एव लेखयेत्॥ मिथ्योत्तरे तु पूर्ववाद्येवार्थीति स ए

व साधनं निर्दिशेत्॥ तथा अर्थी लेखयेदिति वदता अर्थ्येव लेखयेन्नान्य इत्युक्तं। अतश्च संप्रतिपत्त्युत्तरे साध्या
भावेन भाषो(त्त)रवादिनो द्वयोरप्यर्थित्वाभावात्साधननिर्देश एव नास्तीति तावतैव व्यवहारः परिसमाप्यत इति गम्य
ते। एतदेव हारीतेन स्पष्टमुक्तं। प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियां। मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भ
वेदिति। ततः किमित्याह॥ तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा। तस्य साधनस्य प्रमाणस्य वक्ष्यमाणलि
खि(त)साक्ष्यादिलक्षणस्य सिद्धौ निर्णीतो सिद्धिं साध्यस्य जयलक्षणं प्राप्नोति। अतोऽस्मात्प्रकारादन्यथा प्रका
रांतरेण साधनासिद्धौ विपरीतं साध्यस्यासिद्धिं पराजयलक्षणं प्राप्नोतीति संबंधः॥ ॥एवं व्यवहारस्वरूपमभि
धायोपसंहरति॥ चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः॥ व्यवहारान्नृपः पश्येदित्युक्तो व्यवहारः सोयमित्थं
चतुष्पाच्चतुरंशः कल्पनया विवादेष्वृणादानादिषूपदर्शितो वर्णितः। तत्र प्रत्यर्थिनोऽग्रतो लेख्यमिति भाषापादः
प्रथमः। श्रुतार्थस्योत्तरं लेख्यमित्युत्तरपादो द्वितीयः। ततोऽर्थी लेखयेत्सद्य इति क्रियापादस्तृतीयः। तत्सिद्धौ
सिद्धिमाप्नोतीति साध्यसिद्धिपादश्चतुर्थः। यथोक्तं। परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु॥ वाक्यान्न्यायाद्व्यव
स्थानं व्यवहार उदाहृतः। भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः। आक्षिप्तं चतुरंशस्तु चतुष्पादभिधीय

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नो वादः। विस्तरस्तु मधुसूदन्यां

तदृति। सप्रतिपत्तस्तु उत्तरे तु साधनानिर्देशाद्वापार्थस्यासाध्यत्वाच्चन साध्यसिद्धिलक्षणः पादोऽस्तीति द्विपादत्वमेव। उ
१० त्तराभिधानानन्तरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रिया स्यादितिपरामर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण पौनःपुन्ये
व्यवहारपादत्वेनानभिधानान्न्यूनत्वेऽप्यसंबंधाभावाच्चन व्यवहारपादत्वमिति स्थितं। इति व्यवहारमातृका॥ ॥ए
वं सर्वव्यवहारोपयोगिनीं व्यवहारमातृकामभिधायाधुना कंचिद्व्यवहारविशेषं कंचिद्विशेषं दर्शयितुमाह। अ
भियोगमनिस्तीर्यैनं प्रत्यभियोजयेत्। अभियुक्तं चनान्येननोक्तं विप्रकृतिं नयेत्। युज्यतदृत्यभियोगोऽपराध अभि
स्तमनिस्तीर्यापरिहृत्य एनमभियोक्तारं न प्रत्यभियोजयेदपराधेनन संयोजयेत्। यद्यपि प्रस्थवस्कंदनं प्रत्यभियो
गरूपं तथापि स्वापराधपरिहारात्मकत्वान्नास्य प्रतिषेधस्य विषयः। अतः स्वाभियोगानुपमर्दनरूपस्य प्रत्यभियो
गस्यायं निषेधः। इदं प्रत्यर्थिनमधिकृत्योक्तं॥ अथार्थिनं प्रत्याह। अभियुक्तं चनान्येनेति। अन्येनाभियुक्तमनि
स्तीर्णाभियोगमन्योऽर्थी नाभियोजयेत्। किं च। उक्तमावेदनसमये यदुक्तं तद्विप्रकृतिं विरुद्धस्वभावं नन येन्न प्रापये
त्। एतदुक्तं भवति। यद्रूपकं येन रूपेणावेदनसमये निवेदितं तद्रूपकं तथैव भाषाकालेऽपि लेखनीयं नान्यथेति। ननु १०
प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिनेत्यत्रैवेदमुक्तं किमर्थं पुनरुच्यते। नोक्तं विप्रकृतिं नयेदिति। उच्यते। यथा

वेदितमर्थिनेत्यनेनावेदनसमये यद्रूपकं निवेदितं तदेव भाषासमयेऽपि लेखनीयमेकस्मिन्नपि पदे न वस्त्वंतरमित्युक्तं।
यथा रूपकशतमनेन वृद्ध्या गृहीतमित्यावेदनसमये प्रतिपाद्य प्रत्यर्थिसंनिधौ भाषासमये वस्त्रशतं वृद्ध्या गृहीत
मिति न वक्तव्यं। तथा सति पदांतरगमने पि वस्त्वंतरगमना द्धीनवादी दंड्यः स्यादिति। नोक्तं विप्रकृतिं नयेदित्यनेनै
कवस्तुत्वेऽपि पदांतरगमनं निषिध्यते। यथा रूपकशतं वृद्ध्या गृहीत्वायं न प्रयच्छतीत्यावेदनकालेऽभिधीय भाषाका
साहस्यंले रूपकशतं बलादपहृतवानिति वदतीति॥ तत्र वस्त्वंतरगमनं निषिद्धं। इह तु पदांतरगमनं निषिध्यत इति न पौ
नरुक्त्यं। एतदेव स्पष्टीकृतं नारदेन। पूर्वपदं परित्यज्य योन्यदालंबते पुनः। पदसंक्रमणात् ज्ञेयो हीनवादी स वै नर इ
ति॥ हीनवादी दंड्यो भवति न प्रकृतादर्थाद्धीयते। अतः प्रत्यर्थिनोऽर्थिनश्च प्रमादपरिहारार्थं एवायमभियोगमनि
स्तीर्येत्याद्युपदेशो न प्रकृतार्थ [illegible] सिद्धिविषयः। अत एव वक्ष्यति। छलं निरस्य भूतेन व्यवहारान्नयेन्नृप इति। अनवधानता
एतत्सार्थव्यवहारेद्रष्टव्यं। मन्युकृते तु व्यवहारे प्रमादाभिधाने प्रकृतादपि व्यवहाराद्धीयत एव। यथाह नारदः। स
र्वेष्वर्थविवादेषु वाक्छले नावसीदति। न परा जीयते। न प्रकृतादर्थाद्धीयत इत्यर्थः। अत्रोदाहरणं। परस्त्री स्यादि।
परस्त्रीभूम्यृणादाने शास्यो प्यर्थान्न हीयत इति। अस्यार्थः। सर्वेष्वर्थविवादेषु न मन्युकृते वाक्छले प्रमादाभिधा

परत्री

नेपिनावसीदति १ मन्यूरणादाने प्रमादाभिधानेन दण्डोपि यथाप्रकृतादर्थान्न हीयते। एवं सर्वेष्वर्थविवादे
११ ष्विति। अर्थविवादग्रहणान्मन्युकृतविवादेषु प्रमादाभिधानेन प्रकृतादप्यर्थाद्धीयत इति गम्यते। यथाहमनेनासि
रसि पादेन ताडित इत्यावेदनसमये अभिधाय भाषाकाले हस्तेन पादेन ताडित इति वदन्न केवलं दण्ड्यः पराजीयते
च॥ ॥अभियोगमनिस्तीर्य्यैनं प्रत्यभियोजयेदित्यस्यापवादमाह। कुर्य्यात्प्रत्यभियोगं च कलहे साहसेषु च।
कलहे वाग्दण्डपारुष्यात्मके साहसेषु विषशस्त्रादिनिमित्तप्राणव्यापादनादिषु प्रत्यभियोगसंभवेऽस्याभियोग
मनिस्तीर्य्याप्यभियोक्तारं प्रत्यभियोजयेत्। नन्वत्रापि पूर्वपक्षानुपमर्द्दनरूपत्वेनानुत्तरत्वात् प्रत्यभियोगस्य प्र
तिज्ञान्तरत्वे युगपद्व्यवहारासंभवः समानः। सत्यं नात्र युगपद्व्यवहाराय प्रत्यभियोगोपदेशः। अपितु न्यूनदण्ड
प्राप्तये अधिकदण्डनिवृत्तये वा। तथाहि। अनेनाहं ताडितः क्रोशो वेति अभियोगे पूर्वमहं अनेन ताडितः क्रोशो वे
ति प्रत्यभियोगे दण्डाल्पत्वं। यथाह नारदः॥ पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषभाक्। पश्चाद्यः सोप्यसत्कारी पूर्वे तु
विनयो गुरुरिति। यदा पुनर्युगपद्द्वयोस्ताडनादिप्रवृत्तिः न तत्राधिकदण्डनिवृत्तिः। पारुष्ये साहसे वापि युगपत्संप्रवृत्त ११
योः। विशेषश्चेन्न लभ्येत विनयः स्यात्समस्तयोरिति। एवं युगपद्व्यवहारप्रवृत्त्यसंभवेपि कलहादौ प्रत्यभियो

गोर्थवान् ऋणादिषु तु निरर्थक एव॥ अर्थिप्रत्यर्थिनोर्विधिमुक्त्वा सभ्यस्य सभापतेः कर्त्तव्यमाह॥ ॥उभयोः
प्रतिभूर्ग्राह्यः समर्थः कार्य्यनिर्णये। उभयोः अर्थिप्रत्यर्थिनोः सर्वेषु विवादेषु निर्णयस्य कार्य्यं कार्य्यनिर्णयः। आहि
ताग्न्यादिषु पाठात्कार्य्यशब्दस्य पूर्वनिपातः। निर्णयस्य च कार्य्यं साधितधनदानं दण्डदानं च॥ तस्मिन् प्रतिभूः
प्रतिभवति तत्कार्य्ये तद्वद्भवतीति प्रतिभूर्ग्राह्यः सभ्येन सभापतिना। तस्यासंभवेऽर्थिप्रत्यर्थिनो रक्षणे पुरु
षा नियोक्तव्यास्तेभ्यश्च ताभ्यां प्रतिदिनं वेतनं देयं। यथाह कात्यायनः। अथ चेत्प्रतिभूर्नास्ति कार्य्ययोग्यस्तु वा
दिनः। स रक्षितो दिनस्यान्ते दद्याद्भृत्याय वेतनमिति॥ ॥अर्थिप्रत्यर्थिनो निर्णयकार्थे सभ्येन सभापतिना प्रतिभू
र्ग्राह्य इत्युक्तं किं तन्निर्णयकार्य्यं यस्मिन् प्रतिभूर्ग्राह्य इत्यपेक्षित आह। निह्नवे भावितो दद्याद्धनं राज्ञे च तत्स
मं। मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत्॥ अर्थिनाभिवेदितस्याभियोगस्य प्रत्यर्थिनाऽपह्नवे कृते यद्यर्थिना
साक्ष्यादिभिर्भावितोऽङ्गीकारितः प्रत्यर्थी तदा दद्याद्धनं प्रकृतमर्थिने राज्ञे च तत्सममपलापदण्डं। अथार्थी भावयितुं
न शक्नोति तदा मिथ्याभियोगी जानन्नप्यभियोगादभियुक्तधनात् द्विगुणं धनं दद्याद्राज्ञे। प्राड्न्याये प्रत्यवस्कन्दने चै
दमेव योजनीयं। तत्रार्थ्येवाऽपह्नववादीति॥ प्रत्यर्थिना भावितो राज्ञे प्रकृतधनसमं दण्डं दद्यात्। अथ प्रत्यर्थी प्राड्न्या

यं कारणं भावयितुं न शक्नोति तदा स एव मिथ्याभियोगीति राज्ञे द्विगुणं धनं दद्यादर्थिने च प्रकृतं धनं। संप्रतिपत्तु
१२ त्तरे तु दंडाभाव एव। एतच्च ऋणादानविषयमेव। पदांतरेषु तत्रतत्र दंडाभिधानात् धनव्यवहारेष्वस्यासंभवाच्च न सर्व
विषयत्वं। राज्ञाऽधमर्णको दाप्य इत्यस्य ऋणादानविषयत्वेपि तत्रैव विशेषं वक्ष्यामः। एतदेव सर्वव्यवहारविषयत्वे
न्नापि योजनीयं। कथं। अभियोगस्य निह्नवे नियुक्तेन कृते यद्यभियोक्त्रा साक्ष्यादिभिर्भावितो नियुक्तस्तदा न
त्समं तत्रतत्र प्रतिपदोक्तमेव। चतुष्पाद्व्यवहारणे धनं दंडं दद्याद्राज्ञ इत्यस्यानुवादः॥ अथाभियोक्ता अभियोगं भाव
यितुं न शक्नोति तदा मिथ्याभियोगीति प्रतिपदोक्तं धनं दंडं द्विगुणं दद्यादिति विधीयते। अत्रापि प्राङ्न्यायेनास्य च
ता स्कंदने च पूर्ववदेव योजनीयं॥ ॥ततोर्थी लेखयेत्सद्यः प्रतिज्ञार्थसाधनमिति वदतोत्तरपादलेखने कालप्रति
क्षणं दर्शितं तत्रापवादमाह॥ ॥साहसस्तेयपारुष्यगोभिशापात्यये स्त्रियां। विवादयेत्सद्य एव कालोन्यत्रेच्छ
या स्मृतः॥ साहसं विषशस्त्रादिनिमित्तं प्राणव्यापादनादि। स्तेयं चौर्यं। पारुष्यं वाग्दंडपारुष्यं वक्ष्यमाणलक्ष
णं। गोदोग्ध्री अभिशापः पातकाभियोगः। अत्ययः प्राणधनातिपातः। तस्मिन् द्वंद्वैकवद्भावादेकवचनं। स्त्रि
यां कुलस्त्रियां दास्यां च। कुलस्त्रियां चारित्रविवादे। दास्यां स्वत्वविवादे॥ विवादयेदुत्तरं दापयेत्सद्य एव १२

न कालप्रतिक्षणं कुर्यात्॥ अन्यत्र विवादांतरेषु कालउत्तरदानकालः इच्छया अर्थिप्रत्यर्थिसभ्यसभापतीनां स्मृ
तः उक्तः॥ दुष्टलक्षणमाह। देशाद्देशांतरं याति सृक्किणी परिलेढि च। ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च।
परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते॥ वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि। स्वभावाद्विकृतिं गच्छेत्
मनोवाक्कायकर्मभिः॥ अभियोगे च साक्ष्ये वा दुष्टः स परिकीर्तितः॥ मनोवाक्कायकर्मभिर्यः स्वाभाविकं भया
दिनिमित्ताद्विकृतिं विकारं यातिगच्छति। असौ अभियोगे साक्ष्ये वा दुष्टः परिकीर्तितः॥ तां विकृतिं विभज्य दर्शय
ति। देशाद्देशांतरं याति न क्वचिदवतिष्ठते। सृक्किणी ओष्ठपर्यंतौ परिलेढि जिह्वाग्रेण घट्टयतीति कर्मणो वि
कृतिः। अस्य ललाटं स्विद्यते स्वेदबिंदुचितं भवति॥ मुखं वैवर्ण्यं विवर्णत्वं पांडुत्वं कृष्णत्वं वा एति गच्छतीति का
यस्य विकृतिः। परिशुष्यत्स्खलद्वाक्यः परिशुष्यत्सगद्गदं। स्खलद्युक्तं वाक्यं यस्य स तथोक्तः॥ विरुद्धं पूर्वा
परविरुद्धं बहु भाषत इति वाचो विकृतिः॥ परोक्तां वाचं प्रतिवचनदानेन न पूजयति चक्षुर्वा प्रतिवीक्षणेन
न पूजयति इति मनसो विकृतेर्लिंगं। तथा ओष्ठौ निर्भुजति वक्रयतीत्यपि कायस्य विकृतिः। एतच्च दोषसंभावना
मात्रमुच्यते। न दोषनिश्चयाय। स्वाभाविकनैमित्तिकविकारयोर्विवेकस्य दुर्ज्ञानत्वात्। अथ कश्चित् निपुणा

सत्योत्तरं

मतिर्विवेकं प्रतिपद्येत॥ तथापि न पराजनिमित्तं कार्य्यं भवति। न हि मरिष्यतो लिंगदर्शनेन मृतकार्य्यं कुर्वंत्येवम
१३ स्य पराजयो भविष्यतीति लिंगादवगतेपि न पराजयनिमित्तकार्य्यप्रसंगः॥ ॥किंच॥ संदिग्धार्थं स्वतंत्रो यः साधूक्तांतरमाह
साधयेद्यश्च निष्पतेत्॥ न चाहूतो वदेत्किंचिद्धीनो दंड्यश्च स स्मृतः॥ संदिग्धमर्थमधमर्णेनानंगीकृतमेव यः
स्वतंत्रः साधननिरपेक्षः साधयत्यासेधादिना स हीनो दंड्यश्च भवति। यश्च स्वयं संप्रतिपन्नं साधनेन वासा निरोधादिना
धितं याच्यमानो निष्पतेत्पलायेत। यश्चाभियुक्तो राज्ञा चाहूतः सदसि न किंचिद्वदति सोपि हीनो दंड्यश्च स्मृत
इति संबध्यते। अभियोगेथ साक्ष्ये वा दुष्टः स परिकीर्तित इति प्रस्तुतत्वाद्धीनपरिज्ञानमात्रमेव माभूदिति दंड्य
ग्रहणं। दंड्यस्यापि शास्त्रोप्यर्थोन्न हीयत इत्यर्थादहीनत्वदर्शनादत्र तन्माभूदिति हीनग्रहणं॥ ॥अथ य
त्र द्वावपि युगपद्धर्म्माधिकरणं प्राप्तौ भाषावादिनौ। तद्यथा। कश्चित्प्रतिग्रहेण क्षेत्रं लब्ध्वा कंचित्कालमुप
भुज्य कार्य्यवशात्स कुटुंबो देशांतरं गतः। अन्योपि तदेव क्षेत्रं प्रतिग्रहेण लब्ध्वा कंचित्कालमुपभुज्य देशां
तरं गतः। ततो द्वावपि युगपदागत्य मदीयमिदं क्षेत्रं मदीयमिदं क्षेत्रमिति परस्परं विवदमानौ धर्म्माधिक
रणं प्राप्तौ तत्र कस्य क्रियेत्याकांक्षित आह॥ साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः। पूर्वपक्षेधरीभू १३

MEMORIAL

तेभवंत्युत्तरवादिनः॥ उभयतः उभयोरपि वादिनोः साक्षिषु संभवत्सु साक्षिणः पूर्ववादिनः॥ पूर्वस्मिन्काले मया
प्रतिगृहीतं उपभुक्तं चेति यो वदत्यसौ पूर्ववादी। न पुनर्यः पूर्वं निवेदयति तस्यासौ क्षिणः प्रष्टव्याः॥ यदा त्वन्य
एवं वदति सत्यमनेन पूर्वं प्रतिगृहीतमुपभुक्तं च किं तु राज्ञेदमेव क्षेत्रमस्मादेव क्रयेण लब्ध्वा मह्यं दत्तम
न्येन वा प्रतिग्रहेण लब्धो मह्यं दत्तमिति तत्र पूर्वपक्षोऽसाध्यतयाधरीभूतः तस्मिन्पूर्वपक्षेधरीभूते भवं
त्युत्तरवादिनः। उत्तरकालं प्रतिगृहीतमुपभुक्तं चेति वादिनः साक्षिणः प्रष्टव्या भवंति॥ इदमेव व्याख्या
नेयुक्ततरं। मिथ्योत्तरे पूर्ववादिनः साक्षिणो भवंति। प्राङ्न्यायकारणोक्तौ पूर्वपक्षेधरीभूते उत्तरवादिनः
साक्षिणो भवंतीति व्याख्यानमयुक्तं। अस्यार्थस्य ततोपकृ(?)लेखयेत्सद्यः प्रतिज्ञातार्थसाधनमित्यनेनो
क्तत्वात्पुनरुक्तिप्रसंगात्। पूर्वव्याख्यानमेव स्पष्टीकृतं नारदेन। मिथ्याक्रियापूर्ववादे कारणे प्रतिवादिनि
। प्राङ्न्यायविधिसिद्धौ तु जयपत्रं क्रिया भवेदित्युक्त्वा द्वयोर्विवदतोरर्थे द्वयोः सत्सु च साक्षिषु पूर्वपक्षो
भवेद्यस्य भवेयुस्तस्य साक्षिण इति वदता। एतस्य च सर्वव्यवहारविलक्षणत्वाद्भेदेनोपन्यासः॥ ॥अपि च॥
सपणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत्॥ दंडं च स्वपणं चैव धनिने धनमेव च। यदि व्यवहारः सपणः पण

नं पणः। तेन सह वर्त्तत इति सपणः स्यात् तदा तत्र तस्मिन् सपणव्यवहारे हीनं पराजितं पूर्वोक्तं दंडं स्वकृतं च पणं
१४ राज्ञे अर्थिने च विवादास्पदीभूतं धनं दापयेद्राजा। यत्र पुनरेकः कोपावेशवशात् यद्यहमत्र पराजितो भवामि त
दा पणशतं दास्यामीति प्रतिजानीते अन्यस्तु न किंचिदस्तीति जानीते तत्रापि व्यवहारः प्रवर्त्तते। तस्मिंश्च प्रवृत्ते प
णप्रतिज्ञावादी यदि हीयते तदा स एव सपणं दंडं दाप्यः। अन्यस्तु पराजितो दंडं दाप्यो न पणं स्वपणं चेति विज्ञे
यो पादानात्। यत्र त्वेकः शतमन्यस्तु पंचाशतं प्रतिजानीते तत्रापि पराजयः स्वकृतमेव पणं दाप्यो। सपणश्चे [redacted]
द्विवादः स्यादिति वदता पणरहितोपि विवादो दर्शितः॥ ॥किंच। छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः। भूत
उक्तं मप्यनुपन्यस्तं हीयते व्यवहारतः॥ छलं प्रमादाभिहितं निरस्य परित्यज्य भूतेन वस्तुतत्त्वानुसरणेन व्यवहा यथार्थ
रान्नयेन्नृपः। यस्माद्भूतमपि वस्तुतत्त्वमपि अनुपन्यस्तमनभिहितं हीयते हानिमुपगच्छति। व्यवहारतो व्य
वहारेण साक्ष्यादिभिस्तस्माद्भूतानुसरणं कर्त्तव्यं। यथार्थिप्रत्यर्थिनौ सत्यमेव वदतस्तथा सभ्यैः सभापति
ना तथैव यतितव्यं सामादिभिरुपायैस्तथा सति साक्ष्यादिनैरपेक्ष्येणैव निर्णयो भवति। अथ सर्वथापि भूता
नुसरणं न शक्यते कर्तुं तथा सति साक्ष्यादिभिर्निर्णयं कार्यः। इत्यनुकल्पः। अयोक्तं। भूतछलानुसारित्वाद्विगतिः १४

साध्यनिष्पत्ति[redacted]ता

समुदाहृतः॥ भूतं तत्त्वार्थसंयुक्तं यत्प्रमादाभिहितं छलमिति। तत्र भूतानुसारी व्यवहारो मुख्यः छलानुसारी त्वनुकल्पः।
साक्षिलेख्यादिभिर्व्यवहारनिर्णये कदाचिद्भूतानुसरणं भवति। कचिन्न भवति साक्ष्यादीनां व्यभिचारस्यापि संभ
वात्॥ ॥भूतमप्यनुपन्यस्तं हीयते व्यवहारत इत्यस्योदाहरणमाह॥ निह्नुते लिखितं नैकमेकदेशविभावितः। दा
प्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः॥ नैकमनेकं सुवर्णरजतवस्त्रादि लिखितमभियुक्तमर्थिना प्रत्यर्थी यदि स
र्वमेव निह्नुतेऽपजानीते॥ तदार्थिनैकादशो हिरण्ये साक्ष्यादिभिः प्रत्यर्थी भावितोंगीकारितः सर्वं रजताद्यर्थं पूर्वलि
खितं दाप्योऽर्थिने नृपेण। न ग्राह्यस्त्वनिवेदितः। पूर्वं भाषाकाले अनिवेदितः पश्चादर्थिना पूर्वं मया विस्मृतं इति नि
वेद्यमानो न ग्राह्यो नाहर्त्तव्यो नृपेण। एतच्चानेकेवलं वाचनिकं एकदेशे प्रत्यर्थिनो मिथ्यावादित्वनिश्चयादेकदे
शांतरेपि मिथ्यावादित्वसंभवात्। अर्थिनश्चैकदेशे सत्यवादित्वनिश्चयादेकदेशांतरेपि सत्यवादित्वसंभवादेवं
तर्कोऽपरनाम संभावनाप्रत्ययानुगृहीतादस्मादेव योगीश्वरवचनात्सर्वं दापनीयं नृपेणेति निर्णयः। एवं च तर्कवा युक्ति
क्यानुसरणेन निर्णये क्रियमाणे वस्तुनोऽन्यथात्वेपि व्यवहारद्रष्टॄणां न दोषः। तथा च गौतमः। न्यायाधिगमे तर्को
ऽभ्युपायस्तेनाभ्यूह्य यथास्थानं गमयेदिति। स्मृतौ तस्माद्राजाचार्यावनिंद्याविति उपसंहरति। न चैकदेशविभावितो

तर्कमार्गेण कृत्वा लिखितस्य ज्ञानस्य पुष्टत्वात् ॥

नुपादेयवचनः प्रत्यर्थी स्येतावदिह गम्यते। एकदेशविभावितो नृपेण सर्वं दाप्य इति वचनात्॥ यत्तु कात्यायनेनोक्तं।
अनेकार्थाभियोगेपि यावत्संसाधयेद्धनी। साक्षिभिस्तावदेवासौ लभ्यते साधितं धनमिति। तत्सुत्रादिदेयपित्राद्यृ
१५ णविषयं॥ तत्र हि बहूनर्थानभियुक्तः पुत्रादिर्न जानामीति प्रतिवदन्निह्नववादी न भवतीत्येकदेशविभावितो
(पुत्रादिः पि न कश्चिद् संत्यवादीति॥ निह्नुते लिखितं नैकमिति शास्त्रं तत्र न प्रवर्त्तते निह्नवाभावादपेक्षितं तर्काभावाच्च। अ आकांक्षित
नेकार्थाभियोगेपीति कात्यायनवचनं सामान्यविषयं॥ विशेषशास्त्रस्य विषये निह्नवोत्तरं परिहृत्यान्योत्तरेप्र सका
वर्त्तते। ननु ऋणादिषु विवादेषु स्थिरप्रायेषु निश्चितं। ऊने वाप्यधिके वापि प्रोक्ते साध्यं न सिद्ध्यतीति वदता कात्या
यनेनानेकार्थाभियोगे साक्षिभिरेकदेशे विभाविते अधिके वा भाविते साध्यं सर्वमेव न सिध्यतीत्युक्तं। तथा
सत्येकदेशे भाविते आभाविते कदेशासिद्धिः कुतं स्यात् उच्यते। लिखितसर्वार्थसाधनतयोपन्यस्तैः साक्षिकैः
ह्यादिभिरेकदेशाभिधाने धिकाभिधाने वा कृत्स्नमेव साध्यं न सिध्यतीति॥ तस्यार्थः। तत्रापि निश्चितं न सिध्य
तीति वचनात्पूर्ववत्संशय एवेति प्रमाणान्तरस्यावसरो स्त्येव कृत्स्नं निरस्यतीति नियमात्। साहसादौ तु सकलसा १५
ध्यसाधनतयोद्दिष्टैः साक्षिभिरेकदेशेपि साधिते कृत्स्नसाध्यसिद्धिर्भवत्येव। तावतैव साहसादेः सिद्धत्वात्कात्या

यनवचनाच्च॥ साध्यार्थांशेपि गदिते साक्षिभिः सकलं भवेत्। स्त्रीसंगे साहसे चौर्ये यत्साध्यं परिकीर्त्तितमिति॥ ॥ननु
निह्नुते लिखितं नैकमितीयं स्मृतिस्तथा ऽनेकार्थाभियोगेपीतीयमपि स्मृतिरेवं तत्रानयोः स्मृत्योः परस्परविरोधे स
तीतरेतरबाधनादप्रामाण्यं कस्मान्न भवति विषयव्यवस्था किमित्याश्रीयत इत्यत आह॥ स्मृत्योर्विरोधे न्यायस्तु ब
लवान्व्यवहारतः। यत्र स्मृत्योः परस्परतो विरोधस्तत्र विरोधपरिहाराय विषयव्यवस्थापनादावुत्सर्गापवादादि
लक्षणो न्यायो बलवान् समर्थः। स च न्यायः कुतः प्रत्येतव्य इत्यत आह॥ व्यवहारत इति॥ व्यवहाराद् वृद्धव्यवहा
राद् अन्वयव्यतिरेकलक्षणादवगम्यते॥ अतश्च॥ प्रकृतोदाहरणे विषयव्यवस्थैव युक्ता एवमन्यत्रापि विषयव्य
वस्थाविकल्पादिं यथासंभवं योज्यं॥ ॥एवं सर्वत्र प्रसंगेपवादमाह॥ अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थि
तिः। धर्मशास्त्रानुसारेण त्वनेनैवोशनसाद्यर्थशास्त्रस्य निरस्तत्वाद्धर्मशास्त्रान्तर्गतमेव राजनीतिलक्षणम
र्थशास्त्रमिह विवक्षितं। अर्थशास्त्रधर्मशास्त्रस्मृत्योर्वि रोधे ऽर्थशास्त्राद्धर्मशास्त्रं बलवदिति स्थितिर्मर्या
दा। यद्यपि समानकर्त्तृकतयार्थशास्त्रयोः स्वरूप तो विशेषो नास्ति तथापि प्रमेयस्य धर्मस्य प्राधान्यादर्थस्य
चाप्राधान्याद् र्मशास्त्रं बलवदित्य स्याभिप्रायः। धर्मस्य च प्राधान्यं शास्त्रादौ दर्शितं। तस्माद्धर्मशा

प्रबलप्रमाणविरोधेऽर्थवादत्वमाश्रित्य यथोचितं न्यायानुसारेण योज्यं। प्रमातुं नामानुभावितुं योग्यः प्रमेयः

स्मार्थशास्त्रयोर्विरोधे ऽर्थशास्त्रबाध एव। न विषयव्यवस्था। नापि विकल्पः। किमत्रोदाहरणं। न तावत् गुरुं वा बाल
वृद्धौ वा ब्राह्मणं वा बहुश्रुतं। आततायिनमायांतं हन्यादेवाविचारयन्। नाततायिवधे दोषो हंतुर्भवति कश्चन। प्र
छन्नं वा प्रकाशं वा मन्युस्तं मन्युमृच्छति। तथा। आततायिनमायांतमपि वेदांतगं रणे। जिघांसंतं जिघांसीयान्न ते
न ब्रह्महा भवेत्॥ इत्याद्यर्थशास्त्रं। इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजं। कामतो ब्राह्मणवधे निष्कृतिर्न विधी
यते। इत्यादि धर्मशास्त्रं॥ तयोर्विरोधे धर्मशास्त्रं बलवदिति युक्तं। अनयोरेकविषयत्वासंभवेन विरोधाभावात्र भ
बलाबलचिंतावतरति। तथाहि॥ शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते। इत्युपक्रम्य। आत्मनश्च परित्राणे
दक्षिणानां च संगरे। स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न दुष्यतीति। आत्मरक्षणे दक्षिणादीनां यज्ञोपकरणा
नां रक्षणे युद्धे च स्त्रीब्राह्मणहिंसायां वा ऽततायिनमकूटशस्त्रेण घ्नन्दंडभागित्युक्तं तस्यार्थवादार्थमिद
मुच्यते। गुरुं वा बालवृद्धौ चेत्यादि। गुर्वादीनत्यंतावध्यानप्याततायिनो हन्यात्किमुतान्यानिति। वाँशब्दश्रवणा
दपि वेदांतगमित्यत्राप्यपिशब्दश्रवणाच्च गुर्वादीनां वध्यत्वप्रतीतिः। नाततायिवधे दोषोन्यत्र गोब्राह्मणवधा
दिति सुमंतुवचनाच्च। आचार्यं च प्रवक्तारं पितरं मातरं गुरुं। न हिंस्याद्ब्राह्मणान्गाश्च सर्वांश्चैव तपस्विन इति

वायुर्वै क्षेपिष्ठा प्रतितिष्ठंति द्ववायद्याल्लाइत्यादौ वैशब्दवाशब्दादीनां
विधिशक्तिप्रतिबंधकत्वस्य दर्शनेन।

मनुवचनाच्च। आचार्यादीनामाततायिनां हिंसाप्रतिषेधे नेदं वचनमर्थवत्स्यान्यथा॥ हिंसामात्रप्रतिषेधस्य सामा
न्यशास्त्रेणैव सिद्धत्वात्। नाततायिवधे दोषो हंतुर्भवति कश्चनेत्येतदपि ब्राह्मणादिव्यतिरिक्तविषयमेव। यतो
ग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारहरश्चैव षडेते आततायिनः। तथा। उद्यतासिर्विषाग्निश्च शापोद्य
तकरस्तथा। आथर्वणेन हंता च पिशुनश्चापि राजनि। भार्यातिक्रमकारी च रंध्रान्वेषणतत्परः। एवमाद्यान्विजा
नीयात्सर्वानेवाततायिन इति सामान्येनाततायिनो दर्शिताः। अतश्च ब्राह्मणादय आततायिन आत्मादित्राणा
र्थं हिंसाः नभिसंधिना निवार्यमाणाः प्रमादाद्यदि विपद्येरंस्तत्र लघु प्रायश्चित्तं राजदंडाभावश्चेति निश्चयः। त
स्मादन्यदिहोदाहरणं वक्तव्यं। तदुच्यते। हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः। अतो यतेत तत्प्राप्तावित्यर्थशा
स्त्रं धर्मशास्त्रानुसारेण क्रोधलोभविवर्जित इति धर्मशास्त्रं। तयोः क्वचिद्विषये विरोधो भवति। यथा॥ चतुष्पा
द्व्यवहारे प्रवर्त्तमाने एकस्य जये ऽवधार्यमाणे मित्रलब्धिर्भवति। न धर्मशास्त्रमनुसृतं भवति। अन्यस्य जये
ऽवधार्यमाणे धर्मशास्त्रमनुसृतं भवति। मित्रलब्धिर्विपरीता। तत्रार्थशास्त्राद्धर्मशास्त्रं बलवदत एव धर्मा १६
र्थसंनिपाते ऽर्थग्राहिण एतदेवेति प्रायश्चित्तस्य गुरुत्वं दर्शितमौपरुंवेन। एतदेवेति द्वादशवार्षिकं प्राय

मी०ता० श्चित्तं परामृश्यते॥ ॥ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनमित्युक्तं किं तत्साधनमित्यपेक्षायामाह॥ प्रमाणं लि
खितं भुक्तिः साक्षिणश्चेति कीर्तितं। एषामन्यतमाभावे दिव्यान्यतममुच्यते। प्रमीयते परिच्छिद्यतेऽनेनेति प्रमाणं।
१२ तच्च द्विविधं मानुषं दैविकं चेति। तत्र मानुषं प्रमाणं त्रिविधं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितं महर्षिभिः। तत्र लिखि
तं द्विविधं। शासनं चीरकं चेति। शासनमुक्तलक्षणं। चीरकं वक्ष्यमाणलक्षणं चेति भुक्तिः उपभोगः। साक्षिणो वक्ष्यमा लेख्यप्रकरणे
णस्वरूपप्रकाराः। ननु लिखितस्य साक्षिणां च शब्दाभिव्यक्तिद्वारेण शब्देऽन्तर्भावाद्युक्तं प्रामाण्यं भुक्तेस्तु कथं प्रामा
ण्यं। उच्यते। भुक्तिरपि केश्चिद्दृश्यापणैर्युक्ता स्वत्वहेतुभूतक्रयादिकमव्यभिचारादनुमापयन्त्यनुपपद्यमाना वा कल्प आसेधरहितत्व चिरकालत्वादिविशे
यन्तीत्यनुमानेऽर्थापत्तौ वान्तर्भवतीति प्रमाणमेव। एषां लिखितादीनां च त्रयाणामन्यतमस्याप्यभावे दिव्यानां वक्ष्यमा षणैः।
णस्वरूपभेदानामन्यतमं जातिदेशकालद्रव्याद्यपेक्षया प्रमाणमुच्यते। मानुषाभाव एव दिव्यस्य प्रामाण्यमस्मा
देव वचनादवगम्यते। दिव्यस्य स्वरूपप्रामाण्ययोरागमगम्यत्वात्। अत एव यत्र परस्परविवादेन युगपद्धर्माधि
करणं प्राप्तयोरेको मानुषीं क्रियामपरस्तु दैवीमवलंबते तत्र मानुष्येव ग्राह्या। तथा च कात्यायनः॥ यद्येको मानुषीं १७
ब्रूयादन्यो ब्रूयात्तु दैविकीं। मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृपः। इति। यत्रापि प्रधानैकदेशसाधनं मानुषं संभव

क्षेत्रादि पक्षः। क्रयादि प्राप्तं साध्यं आसेधरहितत्वे सति चिरकालोपभुक्तत्वात् तदीयगृहादिवद् इत्यनुमानप्रयोगः।

ति तत्रापि न दैवमाश्रयणीयं। यथा रूपकशतमनया वृद्ध्या गृहीतं न प्रयच्छतीत्यभियोगापह्नवे ग्रहणे साक्षिणः सं
ति नो संख्यायां वृद्धिविशेषे वा ततो दिव्येन भावयामीत्युक्ते तत्रैकदेशविभावितन्यायेनापि संख्यावृद्धिविशेष
सिद्धेर्न दिव्यस्यावकाशः। उक्तं च कात्यायनेन। यद्येकदेशव्याप्तापि क्रिया विद्येत मानुषी। सा ग्राह्या न तु पूर्णापि दै
विकी वदतां नृणामिति। यत्तु गूढसाहसिकानां तु प्राप्तं दिव्यैः परीक्षणमिति। तदपि मानुषासंभवकृतनियमा
र्थं॥ यदपि नारदेनोक्तं। अरण्ये निर्जने रात्रावंतर्वेश्मनि साहसे। न्यासापह्नवने चैव दिव्या संभवति क्रियेति। त देव
दपि मानुषासंभव एव। तस्मान्मानुषाभाव एव दिव्येन निर्णय इत्यौत्सर्गिकमस्य चापवादो दृश्यते। प्रक्रांते साहसे
वादे पारुष्ये दंडवाचिके। बलोद्भवेषु कार्येषु साक्षिणो दिव्यमेव च। तथा लेख्यादीनामपि कचिन्नियमो दृश्यते
। यथा। पूगश्रेणिगणादीनां या स्थितिः परिकीर्तिता। तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिणः। तथा। द्वारमा
र्गक्रियाभोगजलवाहादिषु क्रिया। भुक्तिरेव तु गुर्वी स्यान्न दिव्यं न च साक्षिणः। तथा दत्तादत्ते च भृत्यानां स्वामिनां
निर्णये सति। विक्रयादानसंबंधे क्रीत्वा धनमनिच्छति। द्यूते समाह्वये चैव विवादे समुपस्थिते। साक्षिणः साध
नं प्रोक्तं न दिव्यं न च लेख्यकमिति॥ ॥उभयत्र प्रमाणसद्भावे प्रमाणगतबलाबलविवेके चासति पूर्वापरयोः

कार्य्ययोः कस्य बलीयस्त्वमित्यत आह। सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया। ऋणादिषु सर्वेष्वर्थविवादेषु उत्तरा क्रि
१८ या क्रियत इति क्रिया कार्य्यं बलीयसी। उत्तरकार्य्यसाधिनेत ह्यादी विजयी भवति। पूर्वकार्ये सिद्धेपि तेनासौ पराजीयते।
तद्यथा। कश्चिद्ग्रहणेन धारणं साधयति। कश्चित्प्रतिदानेनाधारणं॥ तत्र ग्रहण प्रतिदानयोः प्रमाणसिद्धयोः प्रति
दानं बलवदिति। प्रतिदानवादी जयति। तथा। पूर्वं द्विकशतं गृहीत्वा कालांतरे त्रिकशतमंगीकृतवान्। तत्रोभय
त्र प्रमाणसद्भावेपि त्रिकशते ग्रहणं बलवत् पूर्वाबाधे नोत्पत्तेः॥ पूर्वाबाधेनानुपपत्तेः। उक्तं च। पूर्वाबाधेन नोत्प
त्तिरुत्तरस्य हि सेत्स्यतीति॥ ॥अस्यापवादमाह॥ आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा। आध्यादिषु त्रिषु पूर्वमेव
कार्य्यं बलवत्। तद्यथा। एकमेव क्षेत्रमेकस्याधिं कृत्वा किमपि गृहीत्वा पुनरन्यस्याप्याधाय किमपि गृह्णाति। तत्र
पूर्वस्यैव तद्भवति नोत्तरस्य। एवं प्रतिग्रहे क्रये च। ननु। आहितस्य तदानीमस्वत्वात्पुनराधानमेव न संभवति। ए
वं दत्तस्य च क्रीतस्य च दानक्रयौ नोपपद्येते। तस्मादिदं वचनमनर्थकं। उच्यते। अस्वत्वेपि मोहाल्लोभाद्वा पुन
राधानादिकं करोति तत्र पूर्वं बलवदिति न्यायमूलमेवेदं वचनमित्यदोषः॥ ॥भुक्तेः कैश्चिद्विशेषणैर्युक्तायाः
प्रामाण्यं दर्शयिष्यन् कस्याश्चिद्भुक्तेः कार्य्यांतरमाह॥ ॥पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी॥ परेण भु

ज्यमानाया धनस्य दशवार्षिकी। परेण संबंधेन भुज्यमानां भुवं धनं वा पश्यतः अब्रुवतः मदीयेयं भूस्त्वया न भोक्तव्येत्य
प्रतिषेधतस्तस्या भूमेर्विंशतिवार्षिकी अप्रतिरवं विंशतिवर्षोपभोगनिमित्ता [illegible] हानिर्भवति। धनस्य तु हस्त्य
श्वादेर्दशवार्षिकी हानिः। नन्वेतदनुपपन्नं। न ह्यप्रतिषेधात्स्वत्वमपगच्छति। अप्रतिषेधस्य दानविक्रयादिवत्स्व
त्वनिवृत्तिहेतुत्वस्य लोके शास्त्रे वाप्रसिद्धत्वात्। नापि विंशतिवर्षोपभोगात्स्वत्वं। उपभोगस्य स्वत्वे प्रमाणत्वात्प्रमा
णस्य च प्रमेयं प्रत्यनुत्पादकत्वात्। रिक्थक्रयादिषु स्वत्वकारकहेतुष्वपाठाच्च। तथा हि। स्वामी रिक्थक्रयसंविभागपरि
ग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोरित्यत्रापि स्वत्वकारकहेतुषु गौतमः
पठति न भोगं। न चेदमेव वचनं विंशतिवर्षोपभोगस्य स्वत्वापत्तिहेतुत्वं प्रतिपादयतीति युक्तं। स्वत्वस्य स्वत्वहेतूनां
च लोकप्रसिद्धत्वेन शास्त्रैकसमधिगम्यत्वाभावात्। एतच्च विभागप्रकरणे निपुणतरमुपपादयिष्यते। गौतमवच
नं तु नियमार्थं। अपि च। अनागमं तु यो भुंक्ते बहून्यब्दशतान्यपि। चौरदंडेन तं पापं दंडयेत्पृथिवीपतिः। इति एतदनाग
मोपभोगस्य स्वत्वहेतुत्वे विरुध्यते। न च। अनागमं तु यो भुंक्ते इत्येतत्परोक्षभोगविषयं। पश्यतोऽब्रुवत इति प्रत्यक्ष
विषयमिति युक्तं। अनागमं तु यो भुंक्ते इत्यविशेषाभिधानात्। नोपभोगे बलं कार्य्यमाहर्त्रा तत्सुतेन वा। पशुस्त्रीपुरु

आगमं नाम पत्रं

निर्विशो भरति भोगौ मौरित्यमरः

DR. BHAU DAJI MEMORIAL

स्वत्वविशिष्टमवसी

षादीनामिति धर्मो व्यवस्थित इति कात्यायनवचनाच्च। समक्षभोगे च हानिकारणाभावेन हानेरसंभवात्। न चैतत्मे
१९ तव्यं। आधिप्रतिग्रहक्रयेषु पूर्वस्याः क्रियायाः प्राबल्यापवादेन भूविषये विंशतिवर्षोपभोगयुक्तायाधनविष
ये दशवर्षोपभोगयुक्ताया उत्तरस्याः क्रियायाः प्राबल्यमनेनोच्यत इति। यतस्तत्पूर्वत्र क्रियात्वेनोपपद्यते। स्व
मेवस्याधेयं देयं विक्रेयं च भवति। न चाहितस्य दत्तस्य विक्रीतस्य वा स्वत्वमस्ति। अस्वस्य दाने प्रतिग्रहे च दंडः स्मर्यते।
अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति। उभौ तौ चौरवच्छास्यौ दाप्यौ चोत्तमसाहसमिति। तथाध्यादीनां त्रयाणामपवा
दत्वेऽस्य श्लोकस्याधिसीमादीनामुत्तरश्लोके पवादो नोपपद्यते॥ तस्माद्भूम्यादीनां हानिरनुपपन्नेवेनापि व्यवहारहा
निः॥ यतः। उपेक्षां कुर्वतस्तस्य तूष्णींभूतस्य तिष्ठतः। काले विपन्ने पूर्वोक्ते व्यवहारो न सिध्यतीति नारदेनोपेक्षालिंगाभा अउवाल्यासीति
वकृता व्यवहारहानिरुक्ता न वस्त्वभावकृता। तथा मनुनापि। अजडश्चेदपोगंडो विषये चास्य भुज्यते। भग्नं तद्व्यवहारेणाभो
क्ता तद्धनमर्हतीति व्यवहारतो भंगो दर्शितः न वस्तुतः। व्यवहारभंगश्चैवं भोक्ता किल वदति॥ अजडोऽयमपोगंडो। बालोस्य
सन्निधौ विंशतिवर्षाण्यप्रतिरवं मया भुक्तं तत्र बहवः साक्षिणः संति। यद्यस्य स्वमन्यायेन मया भुज्यते तदायं किमित्येता
वंतं कालमुदास्त इति। तत्र चायं निरुत्तरो भवतीति। एवं निरुत्तरस्यापि वास्तवो व्यवहारो भवत्येवाछलं निरस्य भूते १९

अस्यान्यथाव्याख्यानमाह

विंशतीत्यस्य श्लोकमानर्थक्यं निराचष्टे

न व्यवहारान्नयेन्नृपः इति नियमात्। अयमर्थः। यद्यपि न वस्तुहानिर्नापि व्यवहारहानिस्तथापि पश्यतोऽप्रतिषेधतो व्यव
हानिशंका भवतीति तन्निवृत्तये तल्लीनस्यात्व्यमित्युपदिश्यत इति। तच्च न। स्मार्तकालाया भुक्तेर्हानिशंकाकारणत्वाभा
वात्॥ तल्लीनस्यात्व्यमित्येतावन्मात्राभिधित्सायां विंशतिग्रहणमविवक्षितं स्यात्॥ अथोच्यते॥ विंशतिग्रहणमूर्ध्वं
पत्रदोषोद्भावननिराकरणात्। यथाह कात्यायनः॥ त्रात्रस्य संनिधावर्थो यस्य लेख्येन भुज्यते। विंशद्वर्षाण्यतिक्रांतं त
त्पत्रं दोषवर्जितमिति। तदपि न। आध्यादिष्वपि विंशतेरूर्ध्वं पत्रदोषोद्भावननिराकरणस्य समत्वेनापवादासंभवा
त्। यथाह कात्यायनः। अपि विंशतिवर्षाणि आधिर्भुक्तः सुनिश्चितः। तेन लेख्येन तत्सिद्धिर्लेख्यदोषविवर्जिता। तथा
। सीमाविवादे निर्णीते सीमापत्रं विधीयते। तस्य दोषाः प्रवक्तव्याः यावद्वर्षाणि विंशतिरिति। एतेन धनस्य दशवार्षिकी
त्येतदपि प्रत्युक्तं। तस्मादस्य श्लोकस्य सम्यगर्थो वक्तव्यः। उच्यते। भूमेर्धनस्य च फलहानिरिह विवक्षिता। न वस्तुहानिर्ना
पि व्यवहारहानिः॥ तथा हि। निराक्रोशो विंशतिवर्षोपभोगादूर्ध्वं यद्यपि स्वामी। न्यायतः क्षेत्रं लभते तथापि फलानुस
रणं न लभते। अप्रतिषेधलक्षणात्स्वापराधात् स्माच्च वचनात्। परोक्षभोगे तु विंशतेरूर्ध्वमपि फलानुसरणं लभते
एव। पश्यत इति वचनात्। प्रत्यक्षभोगे च साक्रोशो अशृण्वन् इति वचनात्। विंशतेः प्राक् प्रत्यक्षे निराक्रोशोश्च लभते वि

२० ज्ञातिग्रहणात्। ननु तदुत्पन्नस्यापि फलस्य स्वत्वात्तद्धानिरनुपपन्नैव। बाढं। तस्य स्वरूपाविनाशेन तथैवावस्थानेऽप
या तदुत्पन्नपूगपनसादीनां वृक्षादीनां च तत्पुनस्तदुत्पन्नमुपभोगान्नष्टं तत्र स्वरूपनाशादेव स्वत्वनाशः। अनागमं
तु यो भुंक्ते बहून्यब्दशतान्यपि। चौरदंडेन तं पापं दंडयेत्पृथिवीपति रित्यनेन वचनेन निष्क्रयरूपेण गणयित्वा चौरव
त्समं द्रव्यदानं प्राप्तं। हानिर्विंशतिवार्षिकीत्यनेनापोद्यते। राजदंडः पुनरस्येव विंशतेरूर्ध्वमपि। अनागमोपभो बाध्यते
गादपवादाभावाच्च। तस्मात्स्वाम्युपेक्षालक्षणस्यापराधादस्माद्वचनाद्विंशतेरूर्ध्वं नष्टं फलं न लभत इति स्थितं।
एतेन धनस्य दशवार्षिकीत्येतदपि व्याख्यातं॥ ॥अस्यापवादमाह। आधिसीमोपनिक्षेपजडबालधनैर्विना। तथो
पनिधिराजस्त्रीश्रोत्रियाणां धनैरपि। आधिश्च सीमा च उपनिक्षेपश्च आधिसीमोपनिक्षेपाः। जडश्च बालश्च ज
डबालौ तयोर्द्धनं जडबालधनं आधिसीमोपनिक्षेपाश्च जडबालधनं च। आधिसीमोपनिक्षेपजडबालधनानि
तैर्विना। उपनिक्षेपो नाम रूपसंख्याप्रदर्शनेन रक्षणार्थं परस्य हस्ते निहितं द्रव्यं। यथाह नारदः। स्वं द्रव्यं यत्र विश्र
म्भान्निक्षिपत्यविशंकितः। निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैरिति। उपनिधानमुपनिधिः। आध्यादिषु पश्य २०
तोऽनुभवतो भूमेर्विंशतेर्धनस्य च दशभ्यो वर्षेभ्य ऊर्ध्वमपि उपचयहानिर्न भवति। पुरुषापराधस्य तथाविधस्या

भावात् उपेक्षाकारणस्य तत्र तत्र संभवात्। तथाहि। आधेराधिस्वोपाधिक एव भोग इत्युपेक्षायामपि न पु
रुषापराधः। सीम्नश्चिरकृततुषांगारादिचिह्नैः सुसाध्यत्वादुपेक्षा संभवति। उपनिक्षेपोपनिध्योर्भुक्तेः प्रति
षिद्धत्वात्प्रतिषेधातिक्रमोपभोगे च सोदयलाभादुपेक्षोपपत्तिः। जडबालयोर्जडत्वाद्बालत्वादुपेक्षा युक्तैव।
राज्ञो बहुकार्याकुलत्वात्। स्त्रीणामज्ञानादप्रागल्भ्याच्च श्रोत्रियस्याध्ययनाध्यापनतदर्थविचारानुष्ठान
व्याकुलत्वादुपेक्षा युक्तैव। तस्मादाध्यादिषु सर्वत्रोपेक्षाकारणसंभवात्। समक्षभोगे निराक्रोशेऽत्र च न कदाचि
दपि फलहानिः॥ ॥आध्यादिषु दंडविशेषप्रतिपादनार्थमाह। आध्यादीनां विहर्त्तारं धनिने दापयेद्धनं। दंडं
च तत्समं राज्ञे शक्त्यपेक्ष्यमथापि वा। यः आध्यादीनां श्रोत्रियद्रव्यपर्यन्तानां चिरकालोपभोगबलेनापहर्त्ता तं विवा
दास्पदीभूतं द्रव्यं स्वामिने दापयेदित्यनुवादः। दंडं च तत्समं विवादास्पदीभूतद्रव्यसमं राज्ञे दापयेदिति विधिः। यद्य
पि गृहक्षेत्रादिषु तत्समो दंडो न संभवति तथापि मर्यादायाः प्रभेदे च सीमातिक्रमणे तथेत्यादिना वक्ष्यमाणो दंडो द्र
ष्टव्यः। अथ तत्समदंडेनापहर्त्तुर्दमनं न भवति बहुधनत्वेन तदा शक्त्यपेक्षं धनं दापयेत्। यावता तस्य दर्पोपशमो
भवति तावद्दापयेत्। दंडो दमनादित्याहुस्तेनादांतान् दमयेदिति दंडग्रहणस्य दमनार्थत्वात्। यस्य तु तत्समम

पिद्रव्यं नास्ति सोपि यावता पीड्यते तावद्दाप्यः। यस्य पुनः किमपि धनं नास्ति असौ धिग्दंडादिना दमनीयः। तथा च
२१ मनुः। धिग्दंडं प्रथमं कुर्याद्वाग्दंडं तदनंतरं॥ तृतीयं धनदंडं तु वधदंडमतः परमिति। वधदंडोपि क्षत्रियादेर्ब्राह्मणव्यति
रिक्तानां। ब्राह्मणस्य तु न वधो दर्शितः। यथाह मनुः। दश स्थानानि दंडस्य मनुः स्वायंभुवोब्रवीत्। त्रिषु वर्णेषु यानि स्यु
रक्षतो ब्राह्मणो व्रजेत्। उपस्थमुदरं जिह्वा हस्तौ पादौ च पंचमं॥ चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च। एतेषां च यत्
स्मिन्नपराधस्तत्रैवोपस्थादौ निग्रहः कार्य्य इति द्रष्टव्यं॥ कर्म वा कारयितव्यो बंधनागारं वा प्रवेशयितव्यः। यथो
क्तं कात्यायनेन। धनदानासहं बुद्ध्वा स्वाधीनं कर्म कारयेत्। अशक्तौ बंधनागारं प्रवेश्यो ब्राह्मणादृत इति। ब्राह्मणस्य
पुनर्द्रव्याभावे कर्मवियोगादीनि प्रयोज्यानि। यथाह गौतमः। कर्मवियोगविख्यापननिर्वासनांककरणान्यवृत्ता
विति। नादेरनापि॥ वधः सर्वस्वहरणं पुरान्निर्वासनांकने। तदंगच्छेद इत्युक्तो दंड उत्तमसाहसे। अविशेषेण सर्वेषा
मेष दंडविधिः स्मृतः इत्युक्तः। वधादृते ब्राह्मणस्य न वधं ब्राह्मणोर्हति॥ शिरसो मुंडनं दंडः तस्य निर्वासनं पुरात्। ल
लाटे चाभिशस्तांकः प्रयाणं गर्दभेन चेति। अंकने च व्यवस्था दर्शिता। गुरुतल्पे भगः कार्य्यः सुरापाने सुराध्वजः।
स्तेये तु श्वपदं कार्य्यं ब्रह्मण्यशिराः पुमानिति। यत्तु॥ चक्षुर्निरोधो ब्राह्मणस्येत्यापस्तंबवचनं ब्राह्मणस्य २१

पुरान्निर्वासनसमय एव स्त्र्यादिना चक्षुर्निरोधः कर्त्तव्यः इति तस्यार्थो न चक्षुषोरुद्धरणं। अक्षतो ब्राह्मणो व्रजेत्॥ ॥न
शारीरो ब्राह्मणे दंड इत्यादिमनुगौतमादिवचनविरोधात् स्वत्वं प्रसंगेन॥ ॥स्वत्वाव्यभिचारित्वेन भोगस्य स्वत्वे प्रामा
ण्यमुक्तं। भोगमात्रस्य स्वत्वव्यभिचारित्वात् कीदृशो भोगः प्रमाणमित्यत आह। आगमोभ्यधिको भोगाद्विना पूर्वक्र
मागतात्। स्वत्वहेतुः प्रतिग्रहक्रयादिरागमः स भोगादभ्यधिको बलीयान् स्वत्वबोधने भोगस्यागमसापेक्षत्वा
त्॥ यथाह नारदः॥ ॥आगमेन विशुद्धेन भोगो याति प्रमाणतां। अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छतीति। न च
भोगमात्रात् स्वत्वावगमः परकीयस्याप्यपहारादिनोपभोगसंभवात्। अत एव॥ भोगं केवलतो यस्तु कीर्त्तयेन्नाग
मं क्वचित् भोगच्छलापदेशेन विज्ञेयः स तु तस्करः इति स्मर्य्यते॥ ॥अतश्च सागमो दीर्घकालो निरंतरो निराक्रोशः यवहारेण
प्रत्यर्थिप्रत्यक्षश्चेति पंचविशेषणयुक्तो भोगः प्रमाणमित्युक्तं भवति। तथा च स्मर्य्यते। सागमो दीर्घकालश्चा
विच्छेदोपरवोज्झितः॥ प्रत्यर्थिसन्निधानश्च परिभोगोपि पंचधेति॥ क्वचिदागमनिरपेक्षस्यापि भोगस्य प्रामाण्य
मित्याह॥ विना पूर्वक्रमागतादिति। पूर्वेषां पित्रादीनां त्रयाणां क्रमः पूर्वक्रमः तेनागतो यो भोगस्तस्माद्विना आग
मोभ्यधिक इति संबंधः। स पुनरागमादभ्यधिकः आगमनिरपेक्षः प्रमाणमित्यर्थः। तत्राप्यागमज्ञाननिरपेक्षो न सत्ता

दीपि

कालमाधवे॥ आयुर्दायेतुनाक्षत्रोबार्हस्पत्योध्रुवत्सरे॥ वचनात्। आयुर्विभागादौगणनायां नाक्षत्रसंवत्सरोग्राह्यः॥ आयुर्दायादौउपयोगोद्रष्टव्यः॥

२२ निरपेक्षःसन्तानुतेनैवावगम्यतइतिबोद्धव्यं। विनापूर्वक्रमागतादित्येतच्चास्मार्तकालप्रदर्शनार्थं आगमोऽप्यधि
कोभोगादितिचस्मार्तकालविषयं। अतश्चस्मरणयोग्येकालेयोग्यानुपलब्ध्या आगमाभावनिश्चयसंभवादाग
मज्ञानसापेक्षस्यैवभोगस्यप्रामाण्यं। अस्मार्तेतुकालेयोग्यानुपलब्ध्यभावेनागमाभावनिश्चयासंभवादाग
मज्ञाननिरपेक्षएवसंततोभोगःप्रमाणं। एतदेवस्पष्टीकृतंकात्यायनेन। स्मार्तकालेक्रियाभूमेःसागमाभुक्ति
रिष्यते। अस्मार्तेनुगमाभावात्क्रमात्त्रिपुरुषागतेति। स्मार्तश्चकालोवर्षशतपर्यंतः शतायुर्वैपुरुषइतिश्रुतेः॥ अ
नुगमाभावादितियोग्यानुपलब्ध्यभावेनागमाभावनिश्चयाभावादिति। अतश्चवर्षशताधिकोभोगःसंततोप्र
तिरवःप्रत्यर्थिप्रत्यक्षश्चागमाभावेचानिश्चितेअव्यभिचारादाक्षिप्तागमःस्वत्वंगमयति। अस्मार्तेपिकालेनाग
मस्मृतिपरंपराभ्यांसत्यांनभोगःप्रमाणमतएवानागमंतुयोभुंक्तेबहून्यब्दशतान्यपि। चौरदंडेनतंपापंदंडयेत्पृथि
वीपतिरित्युक्तं। नचानागमंतुयोभुंक्तेइत्येकवचननिर्देशाद्बहून्यब्दशतान्यपीत्यपिशब्दप्रयोगाच्चप्रथमस्यपुरु
षस्यनिरागमेचिरकालोपभोगेपिदंडविधानमितिमंतव्यं। द्वितीयेतृतीयेवापुरुषेनिरागमस्यभोगस्यप्रामाण्य
प्रसंगात्तच्चैतदिष्यते। आदौतुकारणं दानंमध्येभुक्तिस्तुसागमेतिनारदस्मरणात्। तस्मात्सर्वत्रनिराग २२

शतशब्दोदशसंख्यापरः
विंशति

पादाभिधानादित्यर्थः॥५

मोपभोगे। नागमंतुयोभुंक्तेइत्येतद्द्रष्टव्यं। यदप्यन्यायेनापियद्भुक्तंपित्रापूर्वतरैस्त्रिभिः। नतच्छक्यमपाहर्तुंक्रमात्त्रिपु
रुषागतमिति। पित्रासहपूर्वतरैस्त्रिभिरितियोज्यं। तत्रापिक्रमात्त्रिपुरुषागतमित्यस्मार्तकालोपलक्षणं। त्रिपुरुषविव
क्षायामेकवर्षाभ्यंतरेपिपुरुषत्रयातिक्रमसंभवाद्द्वितीयवर्षेनिरागमस्यभोगस्यप्रामाण्यप्रसंगस्तथासतिस्मार्तेका
लेक्रियाभूमेःसागमाभुक्तिरिष्यतइतिस्मृतिविरोधः। अन्यायेनापियद्भुक्तमित्येतच्चान्यायेनापिभुक्तमपहर्तुंनश
किंतुन्याय्य क्यंकिंपुनरन्यायानिश्चयइतिव्याख्येयमपिशब्दश्रवणात्॥ यच्चोक्तं॥ यद्विनागममत्यंतंभुक्तंपूर्वैस्त्रिभिर्भवेत्। न
तच्छक्यमपाहर्तुंक्रमात्त्रिपुरुषागतमितितत्राप्यत्यंतमागमंविनेत्यत्यंतमुपलभ्यमानमागमंविनेतिव्याख्येयं। नपु
नआगमस्वरूपं(प्रमाण)विनेतिआगमस्वरूपाभावेभोगशतेनापिनस्वत्वंभवतीत्युक्तं। क्रमात्त्रिपुरुषागतमित्येतदुक्तार्थं। न
नुस्मरणयोग्यकालेभोगस्यागमसापेक्षस्यप्रामाण्यमनुपपन्नं। तथाहि॥ यद्यागमःप्रमाणांतरेणावगतस्तदातेनैव न्यायेन
स्वत्वागमान्नभोगस्यस्वत्वेआगमेवाप्रामाण्यं। अथप्रमाणांतरेणागमोनावगतःकथंतद्विशिष्टोभोगःप्रमाणं। उच्य
अशीतिवर्षाणि ते। प्रमाणांतरेणावगतागमसहितएवनिरंतरोभोगःकालांतरेस्वत्वंगमयति। अवगतोप्यागमोभोगरहितोनकालां अशीतिवर्षांतरे
कलौचतुर्गुणंप्रोक्तं तरेस्वत्वंगमयितुमलंमध्येदानविक्रयादिनास्वत्वापगमसंभवादितिसर्वमनवद्यं॥ ॥आगमसापेक्षोभोगःप्रमाण
[illegible]विंशतिवा
[illegible] अशीतिवर्षपर्यंतअविच्छिन्नभोगस्तदापाहारोनभवति॥ एतेःत्रिपुरुषानुकं षष्टिवर्षपर्यंतभोगो॥३

षष्टिवर्षपर्यंतभोगो माधवकृतव्यवहाराध्याये उक्तः। ततएवज्ञेयः। रघुवंशे द्वितीयसर्गे ३८ सिंहत्वमंकागतसत्त्ववृत्ति
विंशतिनिवर्षपर्यवसाने
हिं

मित्युक्तं। आगमस्तर्हि भोगनिरपेक्षएव प्रमाणमित्यत आह। आगमोपि बलं नैव भुक्तिस्तोकापि यत्र नो। यस्मिन्नागमेस्तो
२२ कापि भुक्तिर्नो नास्ति। तस्मिन्नागमे बलं संपूर्णता नैवास्ति। अयमभिसंधिः स्वत्वनिवृत्तिः परस्वत्वापादनं च दानं। परस्वत्वा
पादनं च परो यदि स्वीकरोति तदा संपद्यते नान्यथा। स्वीकारश्च त्रिविधो मानसो वाचिकः कायिकश्चेति। तत्र मानसो
ममेदमिति संकल्परूपः। वाचिकस्तु ममेदमित्याद्यभिव्याहारोल्लेखी सविकल्पकः प्रत्ययः। कायिकः पुनरुपादा
नाभिमर्शनादिरूपोऽनेकविधः। तत्र च नियमः स्मर्यते। दद्यात्कृष्णाजिनं पुच्छे गां पुच्छे करिणं करे। केसरेषु तथैवाश्वं
दासीं शिरसि दापयेदिति। आश्वलायनोप्याह। अनुमंत्रयेत प्राण्यभिमृश्य द्विपाणि कन्यां चेति। तत्र हिरण्यवस्त्रा
दावुदकदानानंतरमेवोपादानादिसंभवात्त्रिविधोपि स्वीकारः संपद्यते। क्षेत्रादौ पुनः फलोपभोगव्यतिरेकेण का
यिकस्वीकारासंभवात्स्वल्पेनाप्युपभोगेन भवितव्यं। अन्यथा दानक्रियायाः संपूर्णता न भवतीति फलोपभोग
लक्षणकायिकस्वीकारविकल आगमः दुर्बलो भवति। तत्सहितादागमात्। एतच्च द्वयोः पूर्वापरकालापरिज्ञाने
॥पूर्वापरकालपरिज्ञाने तु विगुणोपि पूर्वकालागम एव बलवानिति। अथवा लिखितं भुक्तिः साक्षिण इति प्रमाणमित्यु २३
क्तं एतेषां समवाये कुत्र कस्य प्राबल्यमित्यत्रेदमुपतिष्ठति। आगमोभ्यधिको भोगाद्विना पूर्वक्रमागतान्। आग

मेपि बलं नैव भुक्तिस्तोकापि यत्र नो इति। अयमर्थः। आद्ये पुरुषे साक्षिभिर्भावितश्चागमो भोगादभ्यधिको बल
वान् पूर्वक्रमागताद्भोगाद्विना। स पुनः पूर्वक्रमागतो भोगश्चतुर्थपुरुषे लिखितेन भावितादागमाद्बलवान्। मध्य
मे तु भोगरहितादागमात्स्तोकभोगसहितोप्यागमो बलवानिति। एतदेव नारदेन स्पष्टीकृतं। आदौ तु कारणं दानं
मध्ये भुक्तिस्तु सागमा॥ कारणं भुक्तिरेवैका संतता या चिरंतनीति॥ ॥पश्यतो ब्रुवत इत्यत्र विंशतिवर्षभोगा
दूर्ध्वं भूमेर्हानस्यापि दशवर्षभोगादूर्ध्वं फलानुसरणं न भवतीत्युक्तं तत्र फलानुसरणवद्दंडानुसरणमपि न भवि
ष्यतीत्याशंक्य पुरुषव्यवस्थया प्रमाणव्यवस्थया च दंडव्यवस्थां दर्शयितुमाह॥ आगमस्तु कृतो येन सोभि
युक्तस्तमुद्धरेत्। न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी॥ येन पुरुषेण भूम्यादेरागमः स्वीकारः कृतः स पुरुषः कुतस्ते
क्षेत्रादिकमित्यभियुक्तस्तमागमं प्रतिग्रहादिकं लिखितादिभिरुद्धरेद्भावयेत् अनेन चाद्यस्य पुरुषस्यागममनुद्धर
तो दंड इत्युक्तं भवति। तत्सुतो द्वितीयोभियुक्तो नागममुद्धरेत् किंतु अविच्छिन्नाप्रतिरवसमक्षभोगं। अनेन चाग
ममनुद्धरतो द्वितीयस्य न दंडोपि तु विशिष्टभोगमनुद्धरतो दंड इति प्रतिपादितं। तत्सुतस्तृतीयो नागमं नापि वि
शिष्टं भोगमुद्धरेदपि तु क्रमागतं भोगमात्रं। अनेनापि तृतीयस्य क्रमायातभोगानुद्धरणे दंडो नागमानुद्धरणेन

गा
विक्रीयभोगानुद्धरणे चेत्यभिहितं। तत्र तयोर्द्वितीयतृतीययोर्भुक्तिरेव गरीयसी। तत्रापि द्वितीये गुरुस्तृतीये गरी
२४ यसीति विवेक्तव्यं। त्रिपुरुष्यागमानुद्धरणेर्थहानिः समाने वदंरेतु विक्रोषइति तास्य यार्थः। उक्तं च। आगमस्तु कृ
तो येन सदंड्यस्तमनुद्धरन्। न तत्सुतस्तत्सुतो वा भोग्यहानिस्तयोरपीति॥ ॥अस्मात्तु कालोपभोगस्यागम
ज्ञाननिरपेक्षस्य प्रामाण्यमुक्तं विना पूर्वक्रमागतादित्यत्र तस्यापवादमाह॥ योभियुक्तः परेतः स्यात्तस्य रिक्थी
तमुद्धरेत्। न तत्र कारणं भुक्तिरागमेन विना कृता। यदा पुनराहर्त्रादिरभियुक्तोऽकृतव्यवहारनिर्णय एव परेतः
स्यात्स्वर्लोकं गतो भवेत्तदा तस्य रिक्थी पुत्रादिस्तमागममुद्धरेत्। यस्मात्तत्र तस्मिन्व्यवहारे भुक्तिरागमं हि
ता साक्ष्यादिभिः साधितापि न प्रमाणं। पूर्वाभियोगेन भोगस्य सापवादत्वात्। नारदेनाप्युक्तं। तथारूढविवादस्य
प्रेतस्य व्यवहारिणः। पुत्रेण सोर्थः संशोध्यो न तं भोगो निवर्तयेदिति। अनिर्णीते व्यवहारे व्यवहर्त्तरि प्रेते व्यवहा
रो न निवर्त्तत इति स्थितं। निर्णीतेपि व्यवहारे स्थिते च व्यवहर्त्तरि व्यवहारः क्वचित्प्रवर्त्तते क्वचिन्न प्रवर्त्तत इति य
त्स्यासिद्धये व्यवहारदर्शिनां बलाबलमाह॥ नृपेणाधिकृताः पूगाः श्रेणयोथ कुलानि च। पूर्वं पूर्वं गुरु ज्ञेयं २४
व्यवहारविधौ नृणां॥ नृपेणाधिकृता व्यवहारदर्शने नियुक्ताः। राज्ञा सभासदः कार्या इत्यादिनोक्ताः पूगाः

MEMORIAL

समूहाः भिन्नजातीनां भिन्नवृत्तीनामेकस्थाननिवासिनां। यथा ग्रामनगरादयः। श्रेणयो नानाजातीनामेकजातीना
मप्येकजातीयकर्मोपजीविनां संघाताः॥ यथा हैडुबुकानां तांबूलिककुविंदकचर्मकारादीनां च। कुलानि ज्ञाति अभ्यक्रेतारः
दी संबंधिबंधूनां समूहाः। एतेषां नृपाधिकृतानां चतुर्णां पूर्वं पूर्वं यद्यत्पूर्वं पठितं तत्तद्गुरु बलवद्वेदितव्यं। नृणां व्य
वहर्तॄणां व्यवहारविधौ व्यवहारदर्शने कार्ये एतदुक्तं भवति। नृपाधिकृते निर्णीते व्यवहारे पराजितस्य यद्यप्यसंतो
षः कुदृष्टबुद्ध्या भवति॥ तथापि न पूगादिषु पुनर्व्यवहारो भवत्येवं पूगनिर्णीतेपि न श्रेण्यादिगमनं। तथा। श्रेणिनिर्णी
ते कुलगमनं न भवति। कुलनिर्णीते तु श्रेण्यादिगमनं श्रेणिनिर्णीते पूगादिगमनं। पूगनिर्णीते नृपाधिगमनं भवती
ति। नारदेन पुनर्नृपाधिकृते निर्णीते व्यवहारे नृपगमनं भवतीत्युक्तं। कुलानि श्रेणयश्चैव गणाश्चाधिकृता नृपाः।
स्था नं प्रतिष्ठा व्यवहाराणां गुर्वेषामुत्तरोत्तरमिति। तत्र च नृपगमने सोत्तरसभ्येन राज्ञा पूर्वैः सभ्यैः सह सपणव्यवहारे नि अन्यसभ्यैः
र्णीयमाणे यद्यसौ कुदृष्टवादी पराजितस्तदासौ दंड्यः। अथासौ जयति तदाधिकृताः सभ्याः दंड्याः॥ ॥दुर्बलैर्व्यव
हारदर्शिभिर्दृष्टो व्यवहारः प्रवर्त्तते। प्रबलदृष्टस्तु न निवर्त्तत इत्युक्तं। इदानीं प्रबलदृष्टोपि व्यवहारः कश्चिन्निवर्त्त
त इत्याह। बलोपाधिविनिर्वृत्तान्व्यवहारान्निवर्तयेत्। स्त्रीनक्तमंतरागारबहिः शत्रुकृतांस्तथा॥ बलेन बलात्कारे

ण।उपाधिनाभयेनविनिर्दिष्टान्निष्पन्नान्व्यवहारान्निवर्त्तयेत्।तथा॥स्त्रीभिःनक्तंरात्रावस्त्रीभिरपि।अंतरागारेग
२५ हाभ्यंतरेवहिर्ग्रामादिभ्यःशत्रुभिश्चकृतान्।व्यवहारान्निवर्त्तयेदितिसंबंधः॥ ॥अपिच॥मत्तोन्मत्तार्त्तव्यसनिबा
लभीतादियोजितः।असंबद्धकृतश्चैवव्यवहारोनसिध्यति।मत्तोमदनीयद्रव्येण।उन्मत्तउन्मादेनपंचविधेन।वा
तपित्तश्लेष्मसंनिपातग्रहसंभवेनोपसृष्टः।आर्त्तोव्याधिना।व्यसनमिष्टवियोगःऽनिष्टप्राप्तिजनितंदुःखंतद्वा
न्व्यसनी।बालोव्यवहारायोग्यः।भीतोऽरातिभ्यः।आदिग्रहणात्पुरराष्ट्रादिविरुद्धः॥पुरराष्ट्रविरुद्धश्चयश्चराज्ञा
विवर्जितः।अनादेयोभवेद्वादोधर्मविद्भिरुदाहृतः।इतिस्मरणात्।तैर्योजितःकृतोव्यवहारोनसिध्यति।अ
नियुक्तासंबद्धकृतोपिव्यवहारोनसिध्यतीतिसंबंधः।अनुस्मरणं।गुरोःशिष्येपितुःपुत्रेदंपत्योःस्वामिभृत्ययोः।
विरोधेतुमिथस्तेषांव्यवहारोनसिध्यतीति।तदपिगुरुशिष्यादीनामात्यंतिकव्यवहारप्रतिषेधपरंनभवति।तेषाम
पिकथंचिद्व्यवहारस्येष्टत्वात्।तथाहि।शिष्यशिष्टिरवधेनाशक्तौरज्जुवेणुविदलाभ्यांतनुभ्यामन्येनघ्नन्राज्ञा
शास्यइतिगौतमस्मरणान्नोत्तमांगेकथंचनेतिमनुस्मरणाच्च।यदिगुरुःकोपावेशात्तावत्तात्महतादंडेनोत्तमांगेना २५
डयतितदास्मृतिव्यपेतेनमार्गेणाधर्षितःशिष्योयदिराज्ञेनिवेदयतितदाभवत्येवव्यवहारपदं।तथा।भर्त्तापि

दातुमतिपुत्रेन्नादद्यादित्यर्थः॥

तामहोपात्तेस्यादिवचनात्पितामहोपात्तेभूम्यादौपितापुत्रयोःस्वाम्येसमानेयदिपिताविक्रयादिनापितामहोपात्तं
भूम्यादिनाशयति।तदापुत्रोयदिधर्माधिकरणंप्रविशति।तदापितापुत्रयोरपिभवत्येवव्यवहारः॥तथा॥दुर्भिक्षे
धर्मकार्येचव्याधौसंप्रतिरोधके।गृहीतंस्त्रीधनंभर्त्तानाकामोदातुमर्हतीतिस्मरणात्।दुर्भिक्षादिव्यतिरेकेण
यदिस्त्रीधनंभर्त्ताव्ययीकृत्यविद्यमानधनोपियाच्यमानोनददाति॥तदादंपत्योरपीष्यतएवव्यवहारः।तथाभृ अन्तं
त्तंदासस्यस्वामिनासहव्यवहारंदर्शयिष्यति।गर्भदासस्यापि।गर्भदासादीनाधिकृत्य।यश्चैषांस्वामिनंकश्चित्मो
नारदोक्तेच चयेत्प्राणसंशयात्।दासत्वात्सविमुच्येतपुत्रभागंलभेतचेति।नारदेनोक्तत्वात्।तदमोचनेपुत्रभागादानेचस्वामि
नासहव्यवहारोनवार्यते।तस्मात्दृष्टादृष्टयोःश्रेयस्करोनभवतिगुर्वादिभिर्व्यवहारइति॥प्रथमंशिष्यादयो
निवारणीयाराज्ञासभ्येनेति।गुरोःशिष्यइत्यादेःश्लोकस्यतात्पर्यार्थः।अत्यंतनिर्बंधेतुशिष्यादीनामप्युक्तरी आग्रहे
त्याप्रवर्त्तनीयोव्यवहारः।यदप्येकस्यबहुभिःसार्द्धंस्त्रीणांप्रेष्यजनस्यच।अनादेयोभवेद्वादोधर्मविद्भिरुदाहृतः।
इतिनारदवचनं।तत्रैकस्यापि॥गणाद्व्यवहरेद्यस्तुसंविदंलंघयेत्तुयः।तथा॥एकंघ्नतांबहूनांचेत्यादिस्मरणादेका राजादिमर्यादा
र्थेबहुभिःसार्द्धंव्यवहारइष्यतएवेति।भिन्नार्थेबहुभिरेकस्ययुगपद्व्यवहारोनभवतीतिद्रष्टव्यं।स्त्रीणामप्यपिगो

मधिकृता पद्रोंडिकादिस्त्रीणां स्वातंत्र्याद्व्यवहारो भवत्येवेति। तदन्यासां कुलस्त्रीणां पतीपुजीवत्सु तत्पारतंत्र्यादनादेयो व्य
२६ वहार इति व्याख्येयं प्रेष्यजनस्य चेत्येतदपि प्रेष्यजनस्य स्वामिपारतंत्र्यात् स्वार्थव्यवहारेऽपि स्वाम्यनुज्ञयैव व्यहा
रो नान्यथेति योजनीयं॥ ॥परावर्त्यं व्यवहारमुक्त्वेदानीं परावर्त्यं द्रव्यमाह॥ प्रनष्टाधिगतं देयं नृपेण धनिने ध
मदं नं। विभावयेन्न चेल्लिंगैस्तत्समं दंडमर्हति। प्रनष्टं हिरण्यादिकं शौल्किकस्थानपालादिभिरधिगतं राज्ञे समर्पि चौकी
तं यद्राज्ञा धनिनि निवेदितव्यं यदि धनी रूपसंख्यादिभिर्लिंगैर्विभावयति। यदि न विभावयति तदा तत्समं दंड्यः प्रमाणे
असत्यवादित्वात्। अधिगमस्य स्वत्वनिमित्तत्वात् स्वत्वे प्राप्ते न स राज्ञ इति रनेनोक्तं। अत्र च कालावधिं वक्ष्यति। शौ
ल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतं॥ अर्वाक्संवत्सरात्स्वामी हरेत परतो नृपः। इति मनुना॥ पुनः संवत्सरत्रयम
विभक्तत्वेन निर्दिष्टं। प्रनष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत्। अर्वाक् त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्हरेत् इति
। तत्र वर्षत्रयपर्यंतमवश्यं रक्षणीयं। तत्र यदि संवत्सरादर्वाक् स्वामी आगच्छेत्तदा कृत्स्नमेव दद्यात् यदा पुनः सं
वत्सरादूर्ध्वमागच्छति तदा कंचिद्भागं रक्षणमूल्यं गृहीत्वा शेषं स्वामिने दद्यात्। यथाह। आददीताथ षड्भागं २६
प्रनष्टाधिगतान्नृपः। दशमं द्वादशं वापि सतां धर्ममनुस्मरन् इति। तत्र प्रथमे वर्षे कृत्स्नमेव दद्यात् द्विती

ये द्वादशो भागः। तृतीये दशमं चतुर्थादिषु षड्भागं गृहीत्वा शेषं दद्यात्। राज्ञा भागस्य चतुर्थांशोऽधिगंत्रे दातव्यः। स्वाम्य
नागमे तु कृत्स्नस्य चतुर्थमंशमधिगंत्रे दत्त्वा शेषं राजा गृह्णीयात्। यथाह गौतमः। प्रनष्टस्वामिकमधिगम्य संवत्स
रं राज्ञा रक्ष्यमूर्ध्वमधिगंतुश्चतुर्थो राज्ञः शेष इति॥ अत्र संवत्सरमित्येकवचनमविवक्षितं राजा त्र्यब्दं निधापयेदि
ति स्मरणात्। हरेत परतो नृप इत्येतदपि स्वामिन्यनागते त्र्यब्दादूर्ध्वं व्ययीकरणाभ्यनुज्ञानपरं आगते तु स्वामिनि
व्ययीभूतेऽपि द्रव्ये राजा स्वांशमवतार्य तत्समं दद्यादेतच्च हिरण्यादिविषयं। गवादिविषये वक्ष्यति। पणानेकश
फे दद्यादित्यादिना॥ ॥रथ्याशुल्कशालादिनिपतितस्य सुवर्णादेर्नष्टस्याधिगमे एवं विधिमुक्त्वा अधुना भूमौ चि
रनिखातस्य सुवर्णादेर्निधिरूपस्य वान्यस्याधिगमे विधिमाह। राजा लब्ध्वा निधिं दद्याद्द्विजेभ्योऽर्धं द्विजः पुनः। वि
द्वानशेषमादत्ते स सर्वस्य प्रभुर्यतः॥ इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत्। अनिवेदितविज्ञातो दाप्यस्तं दंडमे
व च। उक्तलक्षणं निधिं राजा लब्ध्वार्धं ब्राह्मणेभ्यो दत्त्वा शेषं कोशे निवेशयेत्। ब्राह्मणस्तु विद्वान् श्रुताध्ययनसं
पन्नः सदाचारो यदि निधिं लभेत तदा सर्वमेव गृह्णीयात्॥ यस्मादसौ सर्वस्य जगतः प्रभुः। इतरेण तु राजविद्व
द्ब्राह्मणव्यतिरिक्तेन अविद्वद्ब्राह्मणक्षत्रियादिना निधौ लब्धे राजा षष्ठांशमधिगंत्रे दत्त्वा शेषं निधिं स्वयमाहरेत्।

यथाह वसिष्ठः। अप्रज्ञायमानं वित्तं योऽधिगच्छेद्राजा तद्धरेदधिगंत्रे षष्ठमंशं प्रदद्यादिति। गौतमोऽपि निध्यधिगमो रा
२७ विदुषः जधनं न ब्राह्मणस्याभिरूपस्य अब्राह्मणोऽप्याख्याता षष्ठमंशं लभेतेत्येक इति। अनिवेदितइतिक र्तरि निष्ठा॥
॥अनिवेदितश्चासौ विज्ञातश्च राज्ञे त्वनिवेदितविज्ञातः यः कश्चिन्निधिं लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च
राज्ञा स सर्वं निधिं दाप्यो दंडं च [illegible]स्य या। अथ निधेरपि स्वाम्यागत्य रूपसंख्यादिभिः स्वत्वं भावयति तदा न
स्मै राजा निधिं दत्वा षष्ठं द्वादशं वांशं स्वयमाहरेत्। यथाह मनुः। ममायमिति यो ब्रूयान्निधिं सत्येन मानवः। तस्या
ददीत षड्भागं राजा द्वादशमेव वेति अंशविकल्पस्तु वर्णकालाद्यपेक्षया वेदितव्यः॥ ॥चोरहृतं प्रत्याह॥ देयं चो
रहृतं द्रव्यं राज्ञा जानपदाय तु। अददद्धि समाप्नोति किल्विषं तस्य यस्य तत्॥ देयं चोरहृतं द्रव्यं चोरेभ्यो विजित्य
जानपदाय स्वदेशनिवासिने यस्य तद्द्रव्यं तस्मै राज्ञा तद्दातव्यं। हि यस्मात् अददत् अप्रयच्छन्यस्य तदपहृतं द्रव्यं
तस्य किल्विषमाप्नोति तस्य चोरस्य च। यथाह मनुः। दातव्यं सर्ववर्णेभ्यो राज्ञा चोरहृतं धनं। राजा तदुपयुंजानश्चौ
रस्याप्नोति किल्विषमिति॥ यदि चोरहस्तादादायमुपभुंक्ते तदा चोरस्य किल्विषमाप्नोति। अथ चोरहृतमुपे २७
क्षते तदा जानपदस्य किल्विषमयं चोरहृताहरणाय यत्नमानोऽपि न शक्नुयादाहर्त्तुं तदा तावद्धनं स्वकोशाद्दद्या

त्। यथाह गौतमः॥ चोरहृतमवजित्य यथास्थानं गमयेत्स्वकोशाद्वा दद्यादिति॥ कृष्णद्वैपायनोऽपि॥ प्रत्याहर्त्तुमशक्त
स्तु धनं चौरैर्हृतं यदि। स्वकोशात्तद्धि देयं स्यादशक्तेन महीक्षितेति॥ ॥साधारणासाधारणरूपां व्यवहारमातृका
मभिधायाधुनाष्टादशानां व्यवहारपदानामाद्यमृणादानपदं दर्शयति॥ अशीतिभागो वृद्धिः स्यादित्यादिना। मो
च्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने इत्ययमंतेन। तच्चर्णादानं सप्तविधं॥ ईदृशमृणं देयं ईदृशमदेयं अनेनाधिका
रिणा देयं अस्मिन्समये देयमनेन प्रकारेण देयमित्यधमर्णे पंचविधं। उत्तमर्णे दानविधिरादानविधिश्चेति द्विवि
धमिति। एतच्च नारदेन स्पष्टीकृतं। ऋणं देयमदेयं च येन यत्र यथा च यत्। दानग्रहणधर्माश्च ऋणादानमिति
स्मृतमिति॥ तत्र प्रथममुत्तमर्णस्यादानविधिमाह॥ तत्पूर्वकत्वादितरेषां इति व्यवहारमातृकाप्रकरणं॥ अशीति
भागो वृद्धिः स्यान्मासि मासि सबंधके। वर्णक्रमाच्छतं द्वित्रिचतुःपंचकमन्यथा। मासि मासि प्रतिमासं बंधकं वि
श्वासार्थं यदाधीयते आधिरिति यावत्। बंधकेन सह वर्त्तत इति सबंधकः प्रयोगस्तस्मिन्सबंधके प्रयोगे प्रयुक्त
स्य द्रव्यस्याशीतितमो भागो वृद्धिर्धर्म्या भवति। अन्यथा बंधकरहिते प्रयोगे वर्णानां ब्राह्मणादीनां क्रमेण द्वि
त्रिचतुःपंचकं शतं धर्म्यं भवति। ब्राह्मणे धमर्णे द्विकं शतं। क्षत्रिके त्रिकं शतं। वैश्ये चतुष्कं शतं। शूद्रे पंचकं श

तमासिमासीत्येवंद्वौवात्रयोवाचत्वारोवापंचवाद्वित्रिचतुःपंचाः॥ द्वित्रिचतुःपंचा अस्मिन्शते वृद्धिर्दीयत इति द्वित्रि
२९ चतुःपंचकं। तदस्मिन्वृद्ध्यायलाभशुल्कोपदादीयइतिकन् वृद्धेः ई द्विश्चक्रवृद्धिः प्रतिमासंतु कालिका। इच्छाकृता
कारितास्यात्कायिकापणकर्मणा। इयंचवृद्धिर्मासिमासिगृह्यतइतिकालिका। इयमेववृद्धिर्दिवसगणनया विभ
ज्य प्रतिदिवसंगृह्यमाणा कायिका भवति। तथा च नारदेन। कायिका कालिका चैव कारिता च तथापरा। चक्रवृद्धि
श्च शास्त्रेषु तस्य वृद्धिश्चतुर्विधेत्युक्तं। कायाविरोधिनीशश्वत्पणपादादिकाश्चिका। प्रतिमासं स्रवंती या वृ
द्धिः सा कालिका मता। वृद्धिः सा कारितानाम अधमर्णिकेन स्वयंकृता। वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता इति॥ ॥
गृहीतविशेषेण वृद्धेः प्रकारांतरमाह। कांतारगास्तु दशकं समुद्रा विंशकं शतं। कांतारमरण्यं तत्र गच्छंतीति कां
तारगाः। ये वृद्ध्या धनं गृहीत्वाऽधिकलाभार्थमतिगहनं प्राणधनविनाशशंकास्थानं प्रविशंति ते दशकं शतं दद्युः।
ये च समुद्रगास्ते विंशकं शतं। मासि मासीत्येव एतदुक्तं भवति। कांतारगेभ्यो दशकं शतं सामुद्रेभ्यश्च विंशकं शतं।
उत्तमर्ण आददीत मूलविनाशस्यापि शंकितत्वादिति॥ ॥ इदानीं कारितां वृद्धिमाह॥ दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वा २८
सुजातिषु॥ सर्वे ब्राह्मणादयोऽधमर्णाः सबंधके अबंधके वा स्वकृतां स्वाभ्युपगतां वृद्धिं सर्वासु जातिषु दद्युः। ब्र

चिदकृतापि वृद्धिर्भवति। यथाह नारदः। न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित्। अनाकारितमप्यूर्ध्वं वत्स
राद्धाद्विवर्द्धत इति। यस्तु याचितकं गृहीत्वा देशांतरं गतः तं प्रति कात्यायनेनोक्तं। यो याचितकमादाय तमदत्त्वा
दिशं व्रजेत्। ऊर्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयादिति। यश्च याचितकधनमादाय सयाचितोऽप्यदत्त्वा देशांत
रं याति॥ तं प्रति तेनैवोक्तं॥ कृतोद्धारमदत्त्वा यो याचितस्तु दिशं व्रजेत्॥ ऊर्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयादिति।
यः पुनः स्वदेशे स्थित एव याचितो याचितकं न ददाति तं याचितकालादारभ्य वृद्धिं दापयेद्राजा। यथाह। स्वदेशेऽपि स्थि
तो यस्तु न दद्याद्याचितः क्वचित्। तं ततोऽकारितां वृद्धिं अनिच्छंतं च दापयेदिति। अनाकारितवृद्धेरपवादो नारदेनो
ण्य क्तः। पण्यमूल्यं भृतिर्न्यासो दंडो यश्च प्रकल्पितः। वृथादानाक्षिकपणा वर्द्धंते नाविवक्षिताः। अविवक्षिता अनाका
रित इति॥ ॥ अधुना द्रव्यविशेषेण वृद्धिविशेषमाह॥ संततिस्तु पशुस्त्रीणां। पशूनां स्त्रीणां संततिरेव वृद्धिः॥
पशूनां स्त्रीणां पोषणासमर्थस्य तत्पुष्टिसंततिकामस्य प्रयोगः संभवति। ग्रहणं च क्षीरपरिचर्यार्थिनः॥ ॥ अधु
नाप्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणमंतरेण चिरकालावस्थितस्य कस्य द्रव्यस्य कियती परा वृद्धिरित्यपेक्षित आह।
रसस्याष्टगुणा परा। वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा। रसस्य तैलघृतादेर्वृद्धिग्रहणमंतरेण चिरका

धान्यादि

२९ लावस्थितस्यसकृतयारद्यावर्द्धमानस्याष्टगुणपरानातःपरंवर्द्धते।तथावस्त्रधान्यहिरण्यानांयथासंख्यंचतुर्गुणात्रि
गुणाद्विगुणावृद्धिःपरा।वसिष्ठेनतुरसस्याष्टगुण्यमुक्तं।द्विगुणंहिरण्यंत्रिगुणंधान्यं।धान्येनैवरसाव्याख्याताः।पुष्प
मूलफलानिचतुलाधृतंतत्तथाष्टगुणमिति।मनुनातुधान्यस्यपुष्पमूलफलादीनांचपंचगुणत्वमुक्तं।धान्येशदेलवेवा
ह्येनातिक्रामतिपंचतामिति।शदःक्षेत्रफलंपुष्पमूलफलादि।लवोमेषोर्णाचमरीकेशादि।वाह्योवलीवर्द्दतुरगादिः।धा
न्यशदलववाह्यविषयावृद्धिःपंचगुणत्वंनातिक्रामतीति।तत्राधमर्णयोग्यतावशेनदुर्भिक्षादिकालवशेनव्यवस्था
द्रष्टव्या।एतच्चसकृत्प्रयोगेसकृदाहरणेचद्रष्टव्यं।पुरुषांतरसंक्रमेणप्रयोगांतरकरणे■तस्मिन्नेववापुरुषेअनेक
शःप्रयोगांतरकरणेसुवर्णादिकंद्वैगुण्याद्यतिक्रम्यपूर्ववद्वर्द्धते।सकृत्प्रयोगेप्रतिदिनंप्रतिमासंप्रतिसंवत्सरंवावृद्ध्या पि
हरणेअधमर्णदेयस्यद्वैगुण्यासंभवात्पूर्वोक्तनरध्यासहद्वैगुण्यमतिक्रम्यवर्द्धतएव।यदाहमनुः।कुसीदवृद्धि
र्द्वैगुण्यंनात्येतिसकृदाहितेति।सकृदाहृतेत्यपिपाठोस्ति।उपचयार्थंप्रयुक्तंधनंकुसीदंतस्यवृद्धिःद्वैगुण्यंनात्येति
नातिक्रामति।यदिसकृदाहितासकृत्प्रयुक्तापुरुषांतरसंक्रमणादिनाप्रयोगांतरकरणेद्वैगुण्यमत्येति।सकृदाहृ २९
तेतिपाठेशनैःप्रतिदिनंप्रतिमासंप्रतिसंवत्सरंवाऽधमर्णदाहृताद्वैगुण्यमत्येनीतिव्याख्येयं।तथागौतमेनाप्युक्तं।

आद्यस्यप्रयुक्तहरणमाद

चिरस्थानेद्वैगुण्यंप्रयोगस्येति।प्रयोगस्येत्येकवचननिर्देशात्प्रयोगांतरकरणेद्वैगुण्यातिक्रमोभिप्रेतः।चिरस्थानइतिनिर्दे
शात्शनैःशनैःवर्द्धमानेद्वैगुण्यातिक्रमोदर्शितः।अथप्रयोगधर्माउक्ताःसांप्रतंप्रयुक्तस्यधनस्यग्रहणधर्माउच्य
ते।प्रपन्नंसाधयन्नर्थंनवाच्योनृपतेर्भवेत्।साध्यमानोनृपंगच्छन्दंड्योदाप्यश्चतद्धनं।प्रपन्नमभ्युपगतंअधमर्णेनध
नंसाक्ष्यादिभिर्भावितंवासाधयन्स्वीकुर्वन्धर्मादिभिरुपायैरुत्तमर्णोनृपतेर्नवाच्योनिवारणीयोनभवति।धर्मादय
श्चोपायामनुनादर्शिताः।धर्मेणव्यवहारेणछलेनाचरितेनच।प्रपन्नंसाधयेदर्थंपंचमेनबलेनचेति।धर्मेणप्रीतियु
क्तेनसत्यवचनेन।व्यवहारेणसाक्ष्यालेख्याद्युपन्यासेन।छलेनउत्सवादिव्याजेनभूषणादिग्रहणेन।आचरितेन
अभोजनेन।पंचमेनोपायेनबलेननिगडादिना।उपचयार्थंप्रयुक्तंधनंद्रव्यंएतैरुपायैरात्मसात्कुर्यादिति।प्रपन्नंसा
धयन्नर्थंनवाच्यइतिवदन्नप्रतिपन्नंसाधयन्वाच्योनिवारणीयइतिदर्शयति।एतदेवस्पष्टीकृतंकात्यायनेन।पीडये
द्योधनीकश्चित्ऋणिकंन्यायवादिनं।तस्मादर्थात्सहीयेततत्समंप्राप्नुयाद्दममिति।यस्तुधर्मादिभिरुपायैःप्रपन्नमर्थं
साध्यमानोयाच्यमानोनृपंगच्छेत्सराजानमभिगम्यसाधयंतमभियुक्तेसदंड्योभवति।शक्त्यनुसारेणधनिनेतद्धनंदा
प्यश्चराज्ञा।दापनेचप्रकारादर्शिताः।राजातुस्वामिनंविप्रंसांत्वेनैवप्रदापयेत्।देशाचारेणचान्यांस्तुदुष्टान्संपीड्यदा

३० पयेत्। शिल्पिनं सुहृदं वा पिण्डलेनैव प्रदापयेदिति। साध्यमानो न्यायं गच्छेदित्येतत्सत्याचारव्यपेतेनेत्यस्य प्रत्युदाहरणं बो
द्धव्यं॥ ॥बहुषूत्तमर्णेषु युगपत्प्राप्तेषु कोऽधमर्णिकः केन क्रमेण दाप्यो राज्ञेत्यपेक्षित आह। गृहीतानुक्रमाद्दाप्यो ध
निनामधमर्णिकः॥ दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनंतरं। समानजातीयेषु धनिषु येनैव क्रमेण धनं गृहीतं तेनैव क्रमेणाध
मर्णिको दाप्यो राज्ञा। भिन्नजातीयेषु तु ब्राह्मणादिक्रमेण॥ ॥यदा पुनरुत्तमर्णो दुर्बलः प्रतिपन्नमर्थं धर्मादिभिरुपा
यैः साधयितुमशक्नुवन् राज्ञा साधितार्थो भवति। तदाऽधमर्णस्य दंडमुत्तमर्णस्य भृतिदानमाह। राज्ञाधमर्णिको दाप्यः
साधिताद्दशकं शतं। पंचकं च शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः॥ अधमर्णिको राज्ञा प्रतिपन्नार्थात्साधिताद्दशकं शतं
दाप्यः। प्रतिपन्नस्य साधितार्थस्य दशमं भागं राजाऽधमर्णिकाद्दंडरूपेण गृह्णीयादित्यर्थः। उत्तमर्णिकस्तु प्राप्तार्थः
पंचकं शतं भृतिरूपेण दाप्यः। साधितस्यार्थस्य विंशतितमं भागमुत्तमर्णाद्राजा भृत्यर्थं गृह्णीयादित्यर्थः। अप्रतिपन्ना
र्थसाधने च दंडोऽदर्शि तो निह्नवे भावितो दद्यादिति॥ ॥सधनं अधमर्णिकं प्रत्युक्तं अधुना निर्धनं अधमर्णिकं प्रत्याह
॥हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्॥ ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयं। ब्राह्मणादिजातिरुत्तम
र्णो हीनजातिं क्षत्रियादिजातिं परिक्षीणं निर्धनमृणार्थमृणनिर्यातनार्थं कर्म स्वजात्यनुरूपं कारयेत्। न कुटुंबापरिरो

DR. BHAU DAJI MEMORIAL

१समजातेरप्युपलक्षणं। अतश्च समजातिमपि परिक्षीणं

धेन। ब्राह्मणः पुनः परिक्षीणो निर्धनः शनैः शनैः यथोदयं यथासंभवमृणं दाप्यः॥ अत्र च हीनजातिग्रहणं यथोचि
तं कर्म कारयेत्। ब्राह्मणग्रहणं च श्रेयो जातेरुपलक्षणार्थमतश्च क्षत्रियादिरपि परिक्षीणो वैश्यादेः शनैर्दाप्यो
यथोदयं। एतदेव मनुनापि स्पष्टीकृतं॥ कर्म्मणापि समं कुर्याद्धनिकेनाधमर्णिकः। समोऽपकृष्टजातिश्च दद्याच्छ्रेयांस्तु
तच्छनैरिति। उत्तमर्णेन समं निवृत्तोत्तमर्णाधमर्णव्यपदेशमात्मानमधमर्णः कर्म्मणा कुर्यादित्यर्थः॥ ॥किंच॥
दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनं। मध्यस्थस्थापितं तत्स्याद्वर्द्धते न ततः परं। उपचयार्थं प्रयुक्तं धनमधमर्णे
न दीयमानमुत्तमर्णो वृद्धिलोभाद्यदि न गृह्णाति तदाधमर्णेन मध्यस्थहस्ते स्थापितं यदि स्यात्ततः स्थापनादूर्द्ध्वं न व
र्द्धते। अथ स्थापितमपि याच्यमानो न ददाति ततः पूर्ववद्वर्द्धत एव॥ ॥इदानीं देयमृणं यदा येन च देयं तदाह॥ अवि अवाप्ति
भक्तैः कुटुंबार्थे यदृणं तु कृतं भवेत्। दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटुंबिनि। अविभक्तैर्बंधुभिः कुटुंबार्थमेकेके
न वा यदृणं कृतं तदृणं कुटुंबी दद्यात्तस्मिन्प्रेते प्रोषिते वा तद्रिक्थिनः सर्वे दद्युः॥ ॥येन देयमित्यत्र प्रत्युदाहरणमा
ह॥ न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता। दद्यादृते कुटुंबार्थान्न पतिः स्त्रीकृतं तथा। पत्या कृतमृणं योषित् भा
र्या नैव दद्यात् पुत्रेण कृतं योषिन्माता न दद्यात्॥ तथा पुत्रेण कृतं पिता न दद्यात्। तथा भार्याकृतं पतिः। कुटुंबार्थाद्दृते

इति सर्वत्रोपमतश्चकुटुम्बार्थं येन केनापि कृतं तत्कुटुम्बिना देयं। तदभावे तद्दायहरैर्देयमित्युक्तमेव॥ ॥पुत्रपौत्रैर्ऋणं
३९ देयमिति वक्ष्यति तस्य पुरस्तादपवादमाह॥ सुराकामद्यूतकृतं दण्डशुल्कावशिष्टकं। वृथादानं तथैवेह पुत्रो दद्यान्न
पैतृकं। सुरापानेन यत्कृतमृणं कामकृतं स्त्रीव्यसननिमित्तं। द्यूते पराजयनिमित्तं। दण्डशुल्कयोरवशिष्टं। वृथादानं धू
र्तबन्दिमल्लादिभ्यो यत्प्रतिज्ञातं। धूर्ते बन्दिनि मल्ले च कुवैद्ये कितवे शठे। चाटचारणचोरेषु दत्तं भवति निष्फलमि
ति स्मरणात्॥ एतदृणं पित्रा कृतं पुत्रादिः शौण्डिकादिभ्यो न दद्यात्। अत्र दण्डशुल्कावशिष्टकमित्यवशिष्टग्रह
णात्सर्वं दातव्यमिति न मन्तव्यं। दण्डं वा दण्डशेषं वा शुल्कं तच्छेषमेव वा। न दातव्यं तु पुत्रेण यच्च न व्यावहारिकमित्यौश
नस्मरणात्। गौतमेनाप्युक्तं। मद्यशुल्कद्यूतदण्डान्पुत्रानदाप्याभवेयुरिति। न पुत्रस्योपरि भवन्तीत्यर्थः। अनेना नाधि
देयमृणमुक्तं। न पतिः स्त्रीकृतं तदयं त्यस्यापवादमाह। गोपशौण्डिकशैलूषरजकव्याधयोषितां। ऋणं दद्यात्प
तेषां तिस्तासां यस्माद्वृत्तिस्तदाश्रया। गोपो गोपालः। शौण्डिकः सुराकारः। शैलूषो नटः। रजको वस्त्राणां रञ्जकः। व्या
धो मृगयुः। एतेषां योषिद्भिर्यदृणं कृतं तत्पतिभिर्देयं यस्मात्तेषां वृत्तिर्जीवनं तदाश्रया योषिदधीना। यस्मा ३९
द्वृत्तिस्तदाश्रयेति हेतुव्यपदेशादन्येऽपि ये योषिदधीनजीवनास्तेऽपि योषित्कृतमृणं दद्युरिति गम्यते॥ ॥पति

कृतं भार्या न दद्यादित्यस्यापवादमाह। प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतं। स्वयं कृतं वा यदृणं नान्यत्स्त्री दातु
मर्हति। मुमूर्षुणा प्रवत्स्यता वा पत्या नियुक्तया यदृणदाने यत्प्रतिपन्नं तत्पतिकृतमृणं देयं। यच्च पत्या सह भार्यया ऋणं कृतं त
दपि भर्त्रभावे भार्यया अपुत्रया देयं। यच्च स्वयमेव कृतमृणं तदपि देयं। ननु प्रतिपन्नादित्रयं स्त्रिया देयमिति न वक्तव्यं
सन्देहाभावात्। उच्यते। भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनमिति व
चनान्निर्द्धनत्वेन प्रतिपन्नादिष्वदानाशङ्कायामिदमुच्यते। प्रतिपन्नं स्त्रिया देयमित्यादि। न चानेन वचनेन स्त्र्यादी
नां निर्द्धनत्वमभिधीयते। पारतन्त्र्यमात्रप्रतिपादनपरत्वात्। एतच्च विभागप्रकरणे स्पष्टीकरिष्यति। नान्यत्स्त्री दातु
मर्हतीत्येतत्तर्हि न वक्तव्यं विधानेनैवान्यत्र प्रतिषेधसिद्धेः। उच्यते। प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतमित्य
नयोरपवादार्थमुच्यते। अन्यत्सुराकामादिवचनोपात्तं प्रतिपन्नमपि पत्या सह कृतमपि न देयमिति॥ ॥पुनरपि य
दृणं दातव्यं येन च दातव्यं यत्र च काले दातव्यं तत्त्रितयमाह॥ पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा। पुत्रपौत्रैर्ऋणं
देयं निह्नवे साक्षिभावितं। पिता यदि दातव्यमृणमदत्त्वा प्रेतो दूरदेशं गतो ऽचिकित्सनीयव्याध्याद्यभिभूतो वा तदा
तत्कृतमृणमवश्यं देयं। पुत्रेण पौत्रेण वा पितृधनाभावेऽपि पुत्रत्वेन पौत्रत्वेन च। तत्र क्रमोऽप्ययमेव पित्रभावे पुत्रः

पुत्राभावे पौत्रः इति॥ पुत्रेण पौत्रेण वा निह्नवे कृते ऽर्थिना साक्ष्यादिभिर्भावितमृणं देयं। पुत्रपौत्रैरित्यन्वयः। अत्र पित
३२ रि प्रोषित इत्येतावदुक्तं। कालविशेषस्तु नारदेनोक्तो द्रष्टव्यः। नार्वाक्संवत्सराद्विंशात्पितरि प्रोषिते सुतः। ऋणं द
द्यात्पितृव्ये वा ज्येष्ठे भ्रातर्यथापि वेति। प्रैप्यप्राप्तव्यवहारकालो न दद्यात्। प्राप्तव्यवहारकालस्तु दद्यात्॥ स च का
लस्तेनैव दर्शितः। गर्भस्थैः सदृशो ज्ञेय आष्टमाद्वत्सराच्छिशुः। बाल आषोडशाद्वर्षात्पौगण्डश्चेति शब्द्यते। परतो
व्यवहारज्ञः स्वतंत्रः पितरावृते इति। यद्यपि पितृमरणादूर्ध्वं बालोपि स्वतंत्रो जातस्तथापि नर्णभाग्भवति। यथाह।
अप्राप्तव्यवहारश्चेत्स्वतंत्रोपि हि नर्णभाक्। स्वातंत्र्यं हि स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतमिति। तथा आसेधाह्वान
निषेधश्च दृश्यते। अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती। विषमस्थाश्च नासेध्या न चैतानाह्वयेन्नृप इति।
तस्मात् अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः। ऋणात्पिता मोचनीयो यथा न नरकं व्रजेत् इति। पुत्रेण व्यवहा
रज्ञेन तथा जातेन निष्पन्नेनेति व्याख्येयं। अहेतु बालस्याप्यधिकारः॥ न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयना वेदः
दिति गौतमस्मरणात्॥ पुत्रपौत्रैरिति बहुवचननिर्देशाद्बहवः पुत्राः यदि विभक्ताः स्वांशानुरूपेणर्णं दद्युः॥ अविभक्ता ३२
श्चेत्संभूयसमुत्थानेन गुणप्रधानभावेन वर्तमानानां प्रधानभूत एव दद्यादिति गम्यते। यथाह नारदः। अत ऊ

र्ध्वं पितुः पुत्रा ऋणं दद्युर्यथांशतः। अविभक्ता विभक्ता वा यस्तां चोद्वहते धुरमिति। अत्र यद्यपि पुत्रपौत्रैर्ऋणं देयमित्य
विशेषेणोक्तं। तथापि पुत्रेण यथा पिता सवृद्धिकं ददाति तथैव देयं पौत्रेण तु समं मूलमेव दातव्यं न वृद्धिरिति विशे
षोवगन्तव्यः। ऋणमात्मीयवत्पित्र्यं पुत्रैर्देयं विभावितं। पैतामहं समं देयमदेयं तत्सुतस्य तु इति बृहस्पतिवचनात्।
विभा अत्र विभावितमित्यविशेषोपादानात्साक्षिभावितमित्यत्र साक्षिग्रहणं प्रमाणोपलक्षणं। समं यावद्गृहीतं तावद्देयं न वृ
द्धिः। तत्सुतस्य प्रपौत्रस्यादेयमगृहीतधनस्य॥ एतच्चोत्तरश्लोके स्पष्टयिष्यते॥ ॥ऋणापहरणे ऋणी तत्सुतः पौत्र
इति त्रयः कर्तारो दर्शिताः। तेषां च समवाये क्रमोपि दर्शितः। इदानीं कर्त्रन्तरसमवाये च क्रममाह। रिक्थग्राह ऋणं दा
प्यो योषिद्ग्राहस्तथैव च। पुत्रोनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः। अन्यदीयद्रव्यमन्यस्य स्वत्वापादिव्यतिरेकेणाय
त्तीभवति तद्रिक्थं विभागद्वारेण रिक्थं गृह्णातीति रिक्थग्राहः स ऋणं दाप्यः। एतदुक्तं भवति। यो यदीयं द्रव्यं रिक्थ
रूपेण गृह्णाति स तत्कृतमृणं दाप्यो न चौरादिरिति। योषितं गृह्णातीति योषिद्ग्राहः। स तथैव ऋणं दाप्यः। यदीयां योषि
तं यो गृह्णाति स तत्कृतमृणं दाप्यः। योषितोऽविभज्यद्रव्यत्वेन रिक्थव्यपदेशानर्हत्वाद्भेदेन निर्देशः। पुत्र
श्चानन्याश्रितद्रव्यः ऋणं दाप्यः। अन्यमाश्रितमन्याश्रितं मातापितृसंबंधि द्रव्यं यस्यासावनन्याश्रितद्रव्यः।

पितरि सति तदास्वातंत्र्यं

३३ न अन्याश्रितद्रव्यः । अनन्याश्रितद्रव्यः । पुत्रहीनस्य रिक्थिनः ऋणं दाप्या इति संबंधः । एतेषां समवाये क्रमश्च पाठ
क्रम एव । रिक्थग्राह ऋणं दाप्यस्तदभावे योषिद्ग्राहस्तदभावे पुत्र इति । नन्वेतेषां समवाय एव नोपपद्यते । न भ्रात
रो न पितरः पुत्रा रिक्थहराः पितुरिति पुत्रे सत्यन्यस्य रिक्थग्रहणासंभवात् । योषिद्ग्राहोपि नोपपद्यते । न द्वि
तीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यत इति स्मरणात् । तथर्णं पुत्रो दाप्य इत्यप्ययुक्तं । पुत्रपौत्रैर्ऋणं देयमिति स्म
र्तत्वात् । अनन्याश्रितद्रव्य इति विशेषणमप्यनर्थकं ॥ पुत्रे सति द्रव्यस्यान्याश्रयणासंभवात् । संभवे च रिक्थ
ग्राह इत्यनेनैव गतार्थत्वात् । पुत्रहीनस्य रिक्थिन इत्येतदपि न वक्तव्यं । पुत्रे सत्यपि रिक्थग्राह ऋणं दाप्य इ
ति स्थितं ॥ असति पुत्रे रिक्थग्राही सुतरां दाप्य इति सिद्धमेवेति । अत्रोच्यते । पुत्रे सत्यप्यन्योपि रिक्थग्राही सं
भवति । क्लीबांधबधिरादीनां पुत्रत्वेपि रिक्थहरत्वाभावात् । तथा च । क्लीबादीननुक्रम्य भर्तव्याः स्युर्निरंशका इति
वक्ष्यति । तथा सवर्णपुत्रोप्यन्यायवृत्तो न लभेतैकेषामिति गौतमवचनात् । अतश्च क्लीबादिषु पुत्रेषु सत्स्वन्यायवृ
त्ते च सवर्णपुत्रे सति रिक्थग्राही पितृव्यतत्पुत्रादिः । योषिद्ग्राहोपि यद्यपि नूनं स्त्रीविरोधेन न संभवति । तथाप्यतिक्रां ३३
तनिषेधः ॥ पूर्वपतिकृतर्णापाकरणेऽधिकारी भवत्येव । यश्चतसृणां स्वैरिणीनामंतिमां गच्छति । यश्च पुनर्भुवां

उत्पन्नव्यभिचारेण

तिसृणां प्रथमां । यथाह नारदः । परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमं । पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्वि
धा ॥ कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता । पुनर्भूः प्रथमा प्रोक्ता पुनः संस्कारकर्मणा । देशधर्मानवेक्ष्य स्त्री गुरु
भिर्या प्रदीयते । उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्तिता । असत्सु देवरेषु स्त्री बांधवैर्या प्रदीयते । सवर्णाय सपिंडा
य सा तृतीया प्रकीर्तिता ॥ स्त्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति । कामात्समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा । कौमा
रं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता । पुनः पत्युर्गृहं यायात्सा द्वितीया प्रकीर्तिता । मृते भर्तरि तु प्राप्तान्देवरादीनपा
स्य या । उपगच्छेत्परं कामात्सा तृतीया प्रकीर्तिता । प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा तु या । तवाहमित्युपगता
सा चतुर्थी प्रकीर्तिता । अंतिमा स्वैरिणीनां या प्रथमा च पुनर्भुवां । ऋणं तयोः पतिकृतं दद्याद्यस्ते उपाश्नुत इति । तथा
न्योपि योषिद्ग्राह ऋणापाकरणेऽधिकारी तेनैव दर्शितः । या तु सप्रधनैव स्त्री सापत्या वान्यमाश्रयेत् । सोस्या दद्या
दृणं भर्तुरुत्सृजेद्वा तथैव तां । प्रकृष्टेन धनेन सह वर्तत इति सप्रधना बहुधनेति यावत् ॥ तथा । अधनस्य ह्यपुत्रस्य
मृतस्योपैति यः स्त्रियं । ऋणं वोढुः स भजते सैव चास्य धनं स्मृतमिति । पुत्रस्य पुनर्वचनं क्रमार्थं ॥ अनन्याश्रितद्रव्य
इति बहुषु पुत्रेषु रिक्थाभावेपि ऋणग्रहणयोग्यस्यैव ऋणापाकरणेऽधिकारो नायोग्यस्यांधादेरित्येवमर्थं । पुत्रही

३८ नस्यऋक्थिन इत्येतदपि पुत्रपौत्रहीनस्य प्रपौत्रादयो यदि रिक्थं गृह्णन्ति तदा तदृणं दाप्याः नान्यथेत्येवमर्थं। पुत्रपौत्रौ
तु रिक्थग्रहणाभावेपि दाप्यावित्युक्तं॥ यथाह नारदः॥ क्रमादव्याहतं प्राप्तं पुत्रैर्यन्नर्णमुद्धृतं। दद्युः पैतामहं पौत्रा
स्तच्चतुर्थान्निवर्ततइति· सर्वनिरवद्यं। यद्वा योषिद्ग्राहाभावे पुत्रो दाप्य इत्युक्तं। पुत्राभावे योषिद्ग्राहो दाप्य इत्युच्य
ते। पुत्रहीनस्यऋक्थिन इति रिक्थग्राहेन योषिदेवोच्यते। सैव चास्य धनं स्मृतमिति स्मरणात्। यो यस्य हरते दारा
न्स तस्य हरते धनमिति वचनं। ननु योषिद्ग्राहाभावे पुत्रः ऋणं दाप्यः। पुत्राभावे योषिद्ग्राह इति परस्परविरुद्धं उभ
यसद्भावे न कश्चिद्दाप्य इति। नैष दोषः। अंतिमस्वैरिणीग्राहिणः प्रथमपुनर्भूग्राहिणः सप्रधनस्त्रीहारिणश्चा
भावे पुत्रो दाप्यः। पुत्राभावे तु निर्द्धनेनिरपत्यस्य योषिद्ग्राही दाप्य इति। एतदेवोक्तं नारदेन। धनस्त्रीहारिपुत्राणामृ
णभाग्यो धनं हरेत्। पुत्रोसतोः स्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोरिति॥ धनस्त्रीहारिपुत्राणां समवाये यो ध
नं हरेत स ऋणभाक्॥ स्त्री च धनं च स्त्रीधने ते विद्येते ययोः तौ स्त्रीधनिनौ। तयोः स्त्रीधनिनोरसतोः पुत्र एव ऋ
णभाक्। धनिपुत्रयोरसतोः स्त्रीहार्य्येवर्णभाक् स्त्रीहार्य्यभावे पुत्रऋणभाक् पुत्राभावे स्त्रीहारीति विरोधप्रतिभा ३८
सपरिहारः पूर्ववत्। पुत्रहीनस्य ऋक्थिन इत्यस्यान्या व्याख्या। एते धनस्त्रीहारिपुत्रा ऋणं कस्य दाप्या इति वि

सर्वाभावे अप्सु निक्षिपेदिति विधानादर्थादृणग्रहणप्रतिषेधो भवति। तथाद् ऋणग्रहणप्रतिषेधप्रसंगे ति

वक्षायामुत्तमर्णस्य दाप्यास्तदभावे तत्पुत्रादेः पुत्राद्यभावे कस्य दाप्य इत्यपेक्षायामिदमुपतिष्ठते। पुत्रहीनस्य ऋ
क्थिन इति। पुत्राद्यन्वयहीनस्य उत्तमर्णस्य यो रिक्थी ऋक्थग्रहणयोग्यः सपिंडादिस्तस्य ऋक्थिनो दाप्याः। तथा च
नारदेन॥ ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति चेत्। निर्वपेत्तत्सकुल्येषु तदभावेस्य बंधुषु॥ इत्यभिधायाभिहितं।
यदा तु न सकुल्याः स्युर्न च संबंधिबांधवाः। तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेत् इति॥ ॥अधुना पुरुषवि ऋणादि
शेषे ऋणग्रहणप्रतिषेधप्रसंगादन्यदपि प्रतिषेधति। भ्रातॄणामथ दंपत्योः पितुः पुत्रस्य चैव हि। प्रातिभाव्यमृणं प्रतिभूरिति अधिगम्य
साक्ष्यमविभक्तैर्न तु स्मृतं। प्रतिभुवो भावः प्रातिभाव्यं। भ्रातॄणां दंपत्योः पितापुत्रयोश्चाविभक्ते द्रव्ये द्रव्यविभागा
त् प्राक् प्रातिभाव्यं ऋणं साक्ष्यं च न स्मृतं मन्वादिभिः॥ अपि तु प्रतिषिद्धं। साधारणधनत्वात्। प्रातिभाव्यसाक्षित्वयोः
पक्षे द्रव्यव्ययावसानत्वात्। ऋणस्य चावश्यं प्रतिदेयत्वात्। एतच्च परस्परानुमतिव्यतिरेकेण परस्परानुमत्या त्ववि
भक्तानामपि प्रातिभाव्यं भवत्येव। विभागादूर्ध्वं परस्परानुमतिव्यतिरेकेणापि भवति। ननु दंपत्योर्विभागात् प्राति प्राक्
भाव्यादिप्रतिषेधो न युज्यते। तयोर्विभागाभावेन विशेषणानर्थक्यात्। विभागाभावश्चापस्तंबेन दर्शितः। जाया
पत्योर्न विभागो विद्यत इति॥ सत्यं। श्रौतस्मार्त्ताग्निसाध्येषु कर्मसु तत्फलेषु च विभागाभावो न पुनः सर्वकर्म

सुद्रव्येषु वा। तथा हि। जायापत्योर्न विभागो विद्यत इत्युक्ते किमिति न विद्यत इत्यपेक्षायां हेतुमुक्तवान्। पाणिग्रह
३५ णाद्धि सहत्वं कर्म्मसु तथा पुण्यफलेषु चेति हि यस्मात् पाणिग्रहणादारभ्य कर्म्मसु सहत्वं श्रूयते। जायापती अग्नी
मादधीयातामिति। तस्मादाधाने सहाधिकारादाधानसिद्धाग्निसाध्येषु कर्म्मसु सहाधिकारः। कर्म्मस्मार्त्तविवा
हाग्न्यादिस्मरणाद्विवाहसिद्धाग्निसाध्येष्वपि कर्म्मसु सहाधिकार एव। अतश्चोभयविधाग्निनिरपेक्षेषु
तडागादि कर्म्मसु पूर्त्तेषु जायापत्योः पृथगेवाधिकारः संपद्यते। तथा पुण्यानां फलेषु स्वर्गादिषु जायापत्योः सहत्वं श्रूयते।
रत्न दिवि ज्योतिरजरमारभेतामित्यादि। येषु पुण्यकर्मसु सहाधिकारस्तेषां फलेषु सहत्वमिति बोद्धव्यं। न पुनः पूर्त्तानां
भर्त्रनुज्ञयानुष्ठितानां फलेष्वपि। ननु द्रव्यस्वामित्वेपि सहत्वमुक्तं द्रव्यपरिग्रहेषु चेति न हि भर्तुर्विप्रवासे नैमित्ति
के दाने स्तेयमुपदिशन्तीति सत्यं द्रव्यस्वामित्वं पत्न्या दर्शितमनेन पुनर्विभागाभावः। यस्माद्द्रव्यपरिग्रहेषु चेत्यु
क्तात्तत्र कारणमुक्तं। भर्तुर्विप्रवासे नैमित्तिकेऽवश्यकर्त्तव्ये दानेऽतिथिभोजनभिक्षाप्रदानादौ हि यस्मान्न स्तेय
मुपदिशन्ति मन्वादयस्तस्माद्भार्याया अपि द्रव्यस्वामित्वमस्ति। अन्यथा स्तेयं स्यादिति तस्माद्भर्तुरिच्छया भार्या ३५
या अपि द्रव्यविभागो भवत्येव। न स्वेच्छया। यथा वक्ष्यति। यदि कुर्यात्समानंशान्पत्न्यः कार्याः समांशिका इति॥

DR. BHAU DAJI MEMORIAL

॥अधुना प्रातिभाव्यं निरूपयितुमाह। दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते। आद्यौ तु वितथे दाप्यावितरस्य सु
ता अपि। प्रातिभाव्यं नाम विश्वासार्थं पुरुषान्तरेण सह समयः तच्च विषयभेदात्त्रिधा भिद्यते। यथा दर्शने दर्शना
पेक्षायामेनं दर्शयिष्यामीति प्रत्यये विश्वासे मत्प्रत्ययेनास्य धनं प्रयच्छ नायं त्वां वंचयिष्यते। यतो मुकस्य पुत्रोय
सत्यवेत्याप्या मुर्वराप्रायः भूरस्य ग्रामवरोस्तीति। दाने यद्ययं न ददाति तदानीमहमेव दास्यामीति। प्रातिभाव्यं विधीयत इ
ति प्रत्येकं संबंधः। आद्यौ तु दर्शनप्रत्ययप्रतिभुवौ॥ वितथे अन्यथाभावे अदर्शने विश्वासव्यभिचारे च दाप्यौ राज्ञा
प्रस्तुतधनमुत्तमर्णस्य। इतरस्य दानप्रतिभुवः सुता अपि दाप्याः वितथ इत्येवेति न निर्धनत्वेन वाऽधमर्णोऽप्रतिकु [illegible]
र्वति। इतरस्य सुता अपीति वदता पूर्वयोः सुता न दाप्या इत्युक्तं। सुता इति वदता न पौत्रा दाप्या इति दर्शितं॥ ॥एत
देव स्पष्टीकर्तुमाह। दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोपि वा। न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय यः स्थितः। यदा दर्श
[illegible] नप्रतिभूः प्रात्ययिको वा प्रतिभूर्दिष्टं गतः। तदा तयोः पुत्राः प्रातिभाव्यायातं पैतृकमृणं न दद्युः। यस्तु दानाय स्थि
तः प्रतिभूर्दिष्टं गतः तस्य पुत्रा दद्युः। न पौत्राः। ते च मूलमेव दद्युर्न वृद्धिं। ऋणं पैतामहं पौत्रैः प्रातिभाव्यागतं सुतैः।
समं दद्यात्तत्सुतौ तु न दाप्याविति निश्चयः। इति व्यासवचनात्। प्रातिभाव्यव्यतिरिक्तं पैतामहमृणं पौत्रैः समं याव

द्गृहीतेतावदेवदद्यात्नवृद्धिंतथासुतोपिप्रातिभाव्यागतंपित्र्यमृणंसममेवदद्यान्नयोःपौत्रपुत्रयोःसुतौप्रपौत्रपौत्रा
वप्रातिभाव्यायातंचर्णयथाक्रमंगृहीतधनेनोनदाप्याविति।यदपिस्मरणं।खादकोवित्तहीनःस्याल्लग्नकोवित्तवा
न्यदि।मूलंतस्यभवेद्देयंनवृद्धिंदातुमर्हतीति।तदपिलग्नकःप्रतिभूःखादकोऽधमर्णःलग्नकोयदिवित्तवान्मृ
तस्तस्यपुत्रेणमूलमेवदातव्यंनवृद्धिरितिव्याख्येयं।यत्रदर्शनप्रतिभूःप्रत्ययप्रतिभूर्वाबंधकंपर्याप्तंगृहीत्वा
प्रतिभूर्जातस्तत्रतत्पुत्रा अपितस्मादेवबंधकात्प्रातिभाव्यायातमृणंदद्युरेव।यथाहकात्यायनः।गृहीत्वाबंध
कंयत्रदर्शनेऽस्यस्थितोभवेत्।विनापित्राधनात्तस्माद्दाप्यःस्यात्तदृणंसुतः।दर्शनग्रहणंप्रत्ययस्योपलक्षणं।वि
नापित्राइति।पितरिप्रेतेदूरदेशंगतेवेति।यस्मिन्ननेकप्रतिभूसंभवस्तत्रकथंदातव्यमित्याह।बहवःस्युर्यदि
स्वांशैर्दद्युःप्रतिभुवोधनं।एकच्छायाश्रितेष्वेषुधनिकस्ययथारुचि।यद्येकस्मिन्प्रयोगेद्वौबहवोवाप्रतिभुव
स्तदृणंविभज्यस्वांशेनदद्युः।एकच्छायाश्रितेषुप्रतिभूष्वेकस्याधमर्णस्येच्छायासादृश्यंतामाश्रिताःएकच्छा
याश्रिताः।अधमर्णोयथाकृत्स्नद्रव्यदानायस्थितस्तथादानप्रतिभुवोपिप्रत्येकंकृत्स्नदानायस्थिताः।ए
वंदर्शनेप्रत्ययेचैतेष्वेकच्छायाश्रितेषुप्रतिभूषुसत्सुधनिकस्योत्तमर्णस्ययथारुचियथाकामं।अतश्चध

निकोवित्ताद्यपेक्षयायस्त्वार्थ्यंप्रार्थयतेसएवकृत्स्नंदद्यात्।नांशतः।एकच्छायाश्रितेषुयदिकश्चिद्देशांतरंगतस्तत्पु
त्रश्चसंनिहितस्तदाधनिकेच्छयासएवसर्वंदाप्यः।मृतेतुकस्मिंश्चित्तत्पुत्रमप्यमूलमवृद्धिकंदाप्यः।यथाहकात्यायनः।एक
च्छायाप्रविष्टानांदाप्योयस्तत्रदृश्यते।प्रोषितेतत्सुतःसर्वंपित्रंशंतुमृतेसमंइति॥ ॥प्रतिभाव्यर्णदानविधिमु
क्त्वाप्रतिभूदत्तस्यप्रतिक्रियाविधिमाह॥प्रतिभूर्दापितोयत्तुप्रकाशंधनिनोधनं।द्विगुणंप्रतिदातव्यमृणिकैस्तस्य
तद्भवेत्॥यद्द्रव्यंप्रतिभूस्तत्पुत्रोवाधनिकेनोपपीडितःप्रकाशंसर्वजनप्रत्यक्षंराज्ञाधनिनोदापितोनपुनर्द्वैगुण्य
लोभेनस्वयमुपेत्यदत्तं।यथाहनारदः॥यंचार्थंप्रतिभूर्दद्याद्धनिकेनोपपीडितः।ऋणिकंतंप्रतिभुवेद्विगुणंप्रतिदा
पयेत्।ऋणिकैरधमर्णैस्तस्यप्रतिभुवस्तद्द्रव्यंद्विगुणंप्रतिदातव्यंस्यात्।तच्चकालविशेषमनपेक्ष्यसद्यएवद्विगु
णंदातव्यं।वचनारंभसामर्थ्यात्।एतच्चहिरण्यविषयं।नन्विदंवचनंद्वैगुण्यमात्रंप्रतिपादयति।नत्वपूर्वोक्तकाल
कलाक्रमाबाधेनाप्युपपद्यते।यथाजातेष्टिविधानंशुचित्वाबाधेन।अपिच॥सद्यःसवृद्धिकदानपक्षेपशुस्त्रीणां
सद्यःसंतत्यभावान्मूल्यदानमेवप्राप्नोतीतितदसत्॥वस्त्रधान्यहिरण्यानांचतुस्त्रिद्विगुणापरस्तेनैवकालकला
क्रमेणद्वैगुण्यादिसिद्धेर्द्वैगुण्यमात्रविधानइदंवचनमनर्थकंस्यात्।पशुस्त्रीणांतुकालक्रमपक्षेपिसंतत्यभावेस्व

३० रूपदानमेव। यदा प्रतिभूरपि द्रव्यदानानन्तरं कियतापि कालेनाधमर्णेन सघट्टते तदा संततिरपि संभवत्येव। यद्वा
पूर्वसिद्धसंतत्या सह पशुस्त्रियो दास्यतीति न किंचिदेतत्। अथ प्रातिभाव्यं प्रीतिकृतमतश्च प्रतिभुवा दत्तं प्रीति
दत्तमेव॥ न च प्रीतिदत्तस्य याचनास्ति कुतो वृद्धिरस्ति। यथाह। प्रीतिदत्तं च यत्किंचिद्वर्द्धते न त्वयाचितं। याच्यमान
मदत्तं चेद्वर्द्धते पंचकं शतमिति। अतश्चास्य प्रीतिदत्तस्यायाचितस्यापि दानदिवसारभ्य यावत् द्विगुणं कालक्र
मेण वृद्धिरस्यनेन वचनेनोच्यत इति। तदप्यसत्। अस्यार्थस्यास्माद्वचनादप्रतीतेर्द्विगुणं प्रतिदातव्यमित्येताव
दिह प्रतीयते। तस्मात्कालक्रममनपेक्ष्यैव द्विगुण्यं प्रतिदातव्यं। वचनारंभसामर्थ्यादिति सुष्ठूक्तं॥ प्रतिभूदत्तस्य
सर्वत्र द्वैगुण्ये प्राप्ते अपवादमाह॥ संततिः स्त्रीपशुष्वेव धान्यं त्रिगुणमेव च। वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणस्त
था॥ हिरण्यद्वैगुण्यवत्कालानादरेणैव स्त्रीपश्वादयः प्रतिपादितवृद्ध्या दाप्याः। श्लोकस्तु व्याख्यात एव। यस्य द्रव्य
स्य यावती वृद्धिः पराकाष्ठोक्ता तद्द्रव्यं प्रतिभूदत्तं स्वादकेन तथा वृद्ध्या सह कालविशेषमनपेक्ष्य सद्यो दातव्यमि
ति तात्पर्यार्थः। यदा तु दर्शनप्रतिभूः संप्रतिपन्ने कालेऽधमर्णं दर्शयितुमसमर्थस्तदा तदन्वेषणाय तस्य पक्ष ३०
त्रयं दातव्यं। तत्र यदि दर्शयति तदा मोक्तव्योऽन्यथा प्रस्तुतं धनं दाप्यः॥ नष्टस्यान्वेषणार्थं तु दाप्यं पक्षत्रयं परः। य

४ जीवन्वापि पिता यस्मात्तथैवेच्छाप्रवर्तकः। ४

द्यसो दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत्। काले व्यतीते प्रतिभूर्यदि तं नैव दर्शयेत्। निबंधं दापयेत्तं तु प्रेते चैष विधिः
स्मृतः इति कात्यायनवचनात्। लग्नकविशेषनिषेधश्च तेनैवोक्तः। न स्वामी न च वै शत्रुः स्वामिनाधिकृतस्तथा
। निरुद्धो दंडितश्चैव संदिग्धश्चैव न क्वचित्। नैव रिक्थी न मित्रं च न चैवात्यन्तवासिनः। राजकार्यनियुक्ताश्च ये च
प्रव्रजिता नराः। नाशक्तो धनिने दातुं दंडं राज्ञे च तत्समं। नाविज्ञातो ग्रहीतव्यः प्रतिभूः स्वक्रियां प्रति। संदि
ग्धोऽभिशस्तः। अत्यंतवासिनो नैष्ठिकब्रह्मचारिणः॥ ॥इति प्रतिभूविधिप्रकरणं॥ धनप्रयोगे द्वौ विश्वासहे
तू प्रतिभूराधिश्च। यथाह नारदः। विश्रंभहेतू द्वावत्र प्रतिभूराधिरेव चेति। तत्र प्रतिभूर्निरूपितः इदानीमाधिर्नि
रूप्यते। आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णेधिक्रियते आधीयत इत्याधिः स च द्वि
विधः। कृतकालोकृतकालश्च। पुनश्चैकैकशो द्विधः गोप्यो भोग्यश्च। यथाह नारदः। अधिक्रियत इत्याधिः स वि
ज्ञेयो द्विलक्षणः। कृतकालोपनेयश्च यावद्देयोद्यतस्तथा। स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव चेति॥ कृते
काले आधानकाल एवामुष्मिन्काले दीपोत्सवादौ मया यमाधिर्मोक्तव्योऽन्यथायमाधिस्तवैव भविष्यतीत्ये
वं निरूपिते काले उपनेयः आत्मसमीपं नेतव्यो मोचनीय इत्यर्थः॥ देयं दानं देयमनतिक्रम्य यावद्देयं उद्यतो

३८ निश्चतः स्थापितद्रव्यर्थः। यावद्देयमुद्यतो यावद्देयोद्यतः। गृहीतधनमस्यार्पणावधिरनिरूपितकालइत्यर्थः। गोप्योऽर
क्षणीयः। एवं चतुर्विधस्याधेर्विशेषमाह। आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते। काले कालकृतो नश्येत्फल
भोग्यो न नश्यति। प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधमर्णेन द्रव्यदानेन न मोक्ष्यते
तदा नश्यत्यधमर्णस्य धनप्रयोक्तुः स्वं भवति॥ कालकृतः कृतकालः आहिताग्न्यादिषु पाठात् कालशब्दस्य पूर्वनि
पातः। स तु काले निरूपिते प्राप्ते नश्येत्। द्वैगुण्यात् प्रागूर्ध्वं वा। फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारा
मादिः स कदाचिदपि न नश्यति। कृतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाशउक्तः। काले कालकृतो न
श्येदिति। अकृतकालस्य भोग्यस्य नाशाभाव उक्तः। फलभोग्यो न नश्यतीति। पारिशेष्यादाधिः प्रणश्येदित्येत
दकृतकालगोप्याधिविषयमवतिष्ठते। द्वैगुण्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्दशाद्दिवस
प्रतीक्षणं कर्तव्यं। बृहस्पतिवचनात्। हिरण्ये द्विगुणीभूते पूर्णे काले कृतावधेः। बंधकस्य धनी स्वामी द्विसप्ता
क्षयेत् हं प्रतीक्ष्य च। तदंतरा धनं दत्वा ऋणी बंधमवाप्नुयादिति। नन्वाधिः प्रणश्येदित्यनुपपन्नं। अधमर्णस्य स्वत्वनि ३८
वृत्तिहेतोर्दानविक्रयादेरभावात्। धनिनश्च स्वत्वहेतोः प्र ग्रहक्रयादेरभावात्। मनुवचनविरोधाच्च। न चाधेः का
ति

लसंरोधान्निसर्गोऽस्ति न विक्रय इति। कालेन संरोधः कालसंरोधः चिरकालमवस्थानं तस्मात्कालसंरोधाच्चिरका
लावस्थानादाधेर्न निसर्गोऽस्ति। नान्यत्राधीकरणमस्ति। न विक्रयः॥ एवमाधीकरणविक्रयप्रतिषेधाद्धनि
नः स्वत्वाभावोऽवगम्यत इति। उच्यते। आधिकरणमेव लोके सोपाधिकं स्वत्वनिवृत्तिहेतुः। आधिस्वीकार
श्च सोपाधिकः स्वत्वापत्तिहेतुः प्रसिद्धः। तत्र धनद्वैगुण्ये निरूपितकालप्राप्तौ च द्रव्यदानस्यासंभवे तन्निवृत्तेरने
न वचनेनाधमर्णस्यात्यंतिकी स्वत्वनिवृत्तिः उत्तमर्णस्य चात्यंतिकं स्वत्वं भवति। न च मनुवचनविरोधः। यतो न त्वे
वाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयादिति। भोग्याधिं प्रस्तुत्येदमुच्यते॥ न चाधेः कालसंरोधान्निसर्गोऽस्ति न वि
क्रय इति। भोग्यस्याधेश्चिरतरकालावस्थानेऽप्याधीकरणविक्रयनिषेधेन धनिनः स्वत्वं नास्तीति॥ इहाप्यु
क्तं फलभोग्यो न नश्यतीति। गोप्याधौ तु पृथगारब्धं मनुना। न भोक्तव्यो बलादाधिर्भुंजानो वृद्धिमुत्सृजेदि
ति। इहापि वक्ष्यति। गोप्याधिभोगे नो वृद्धिरिति आधिः प्रणश्येद्द्विगुण इति तु गोप्याधिं प्रत्युच्यत इति सर्वम
विरुद्धं॥ ॥किंच॥ गोप्याधिभोगे नो वृद्धिं सोपकारे यहापिते। नष्टो देयो विनष्टश्च दैवराजकृताद्दृते। गोप्याधेस्ताम्र
कटाहादेरुपभोगे न वृद्धिर्भवति। अल्पेऽप्युपभोगे महत्यपि वृद्धिर्हातव्या। समयातिक्रमात्। तथा सोपकारे उपका

भोग्याधाविति यावत्

३९ रकारिणि बलीवर्दताम्रकटाहादौ भोग्याधौ सवृद्धिकेपि नेहानिं व्यवहारासमर्थत्वं गमितेनो वृद्धिरिति संबंधः। न
ष्टो विकृतिं गतस्ताम्रकटाहादिः छिद्रभेदनादिना पूर्ववत्कृत्वा देयः। तत्र गोप्याधिर्नष्टश्चेत्पूर्ववत्कृत्वा देयः। उपभुक्तो
पि चेद्वृद्धिरपि हातव्या। भोग्याधिर्यदि नष्टस्तदा पूर्ववत्कृत्वा देयो वृद्धिसद्भावे वृद्धिर्हातव्या॥ विनष्टः आत्यंतिक
नाशं प्राप्तः सोपि देयो मूल्यादिद्वारेण॥ न दाने सवृद्धिकं मूल्यं लभते धनी। यदि न ददाति तदा मूलनाशः॥ वि
नष्टे मूलनाशः स्याद्दैवराजकृताद्दृत इति॥ नारदवचनात्। दैवराजकृतादृते दैवमग्न्युदकदेशोपप्लवादि दैव
कृतादृते नाशादिना॥ तथा स्वापराधरहिताद्राजकृतात्। दैवराजकृते तु विनाशे सवृद्धिकं मूलं दातव्यमधमर्णे
नाध्यंतरं वा। यथाह। स्रोतसापहृते क्षेत्रे राज्ञा चैवापहारिते। आधिरन्योपकर्त्तव्यो देयं वा धनिने धनमिति।
तत्र स्रोतसापहृत इति दैवकृतोपलक्षणं॥ ॥अपि च॥ आधेः स्वीकरणात्सिद्धिः रक्ष्यमाणोप्यसारतां। यातश्चेद
भोग्यस्य न्य आधेयो धनभाग्वा धनी भवेत्। आधेर्गोप्यस्य च स्वीकरणादुपभोगादाधिग्रहणसिद्धिर्न साक्षिलेख्यमा
त्रेण। नाप्युद्देशमात्रेण। यथाह नारदः। आधिस्तु द्विविधः प्रोक्तो जंगमः स्थावरस्तथा। सिद्धिरस्योभयस्यापि ३९
भोगो यद्यस्ति नान्यथेति। अस्य च फलं॥ आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरेति। या स्वीकारांता क्रिया सा पूर्वा

फलाद्युपभोगरहितयाबल

बलवती। स्वीकाररहिता पूर्वापि न बलवतीति। स चाधिः प्रयत्नेन रक्ष्यमाणोपि कालवशेन यद्यसारतामविकृत जीर्णवस्त्रादि
एव सवृद्धिकमूलद्रव्यापर्याप्ततां गतस्तदाधिरन्यः कर्त्तव्यो धनिने वा धनं देयं। रक्ष्यमाणोप्यसारतामिति वद
ति ताधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापितं॥ ॥आधिः प्रणश्येद्द्विगुण इत्यस्यापवादमाह॥ चरित्रबंधककृतं स
वृध्या दापयेद्धनं। सत्यंकारकृतं द्रव्यं द्विगुणं प्रतिदापयेत्॥ चरित्रं शोभनाचरितं चरित्रेण बंधकं चरित्रबंधकं।
तेन द्रव्यमात्मसात्कृतं पराधीनं वा कृतं। एतदुक्तं भवति। धनिनः स्वच्छाशयत्वेन बहुमूल्यमपि द्रव्यमाधीकृत्या
धमर्णेनाल्पमेव द्रव्यमात्मसात्कृतं। यदि वाधमर्णस्य स्वच्छाशयत्वेनाल्पमूल्यमाधिं गृहीत्वा बहु द्रव्यमेव धनि
नाधमर्णाधीनं कृतमिति। तद्धनं स वृध्या सह दापयेत्। अयमाशयः। एवं रूपं बंधकं द्विगुणीभूतेपि द्रव्ये न न
श्यति किं तु द्रव्यमेव द्विगुणं दातव्यमिति। तथा सत्यंकारकृतं करणं कारः। भावे घञ्। सत्यस्य कारः सत्यंकारः।
कारे मस्यागदस्येति मुम्। सत्यंकारेण कृतं सत्यंकारकृतं। अयमभिसंधिः। यथा बंधकार्पणसमय एवं संप
रिभाषितं द्विगुणीभूतेपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यं नाधिनाश इति। तदा तद्द्विगुणं दापयेदिति। अन्यो
र्थः। चरित्रमेव बंधकं चरित्रबंधकं। चरित्रशब्देन गंगास्नानाग्निहोत्रादिजनितमपूर्वमुच्यते। यत्र तदेवाधीकृ

४० यं यद्द्रव्यमात्मसात्कृतं तत्र तदेव द्विगुणीभूतं दातव्यं नाधिनाश इति। आधिप्रसंगादन्यदेवोच्यते। सत्यंकारकृतमि
ति। क्रयविक्रयादिव्यवस्थानिर्वाहाय यदंगुलीयकादि परहस्ते कृतं तद्व्यवस्थातिक्रमे द्विगुणं दातव्यं। तत्रापि
येनांगुलीयकाद्यर्पितं स एव चेद्व्यवस्थानिवर्ती तेन तदेव हातव्यं। इतरश्चेद्व्यवस्थानिवर्तीत दान देवांगुलीय
कादि द्विगुणं प्रतिदापयेदिति॥ ॥उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत्। प्रयोजके सति धनं कुले उत्तमर्णेऽसति यावत
न्यस्याधिमाप्नुयात्॥ धनदानेनाधिमोक्षणायोपस्थितस्याधिर्मोक्तव्यो धनिना वृद्धिलोभेन न स्थापयितव्यः। अ
न्यथा अमोक्षणे स्तेनः चौरवद्दंड्यो भवेत्। असंनिहिते पुनः प्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिकं धनं निधायाध
मर्णः स्वीयं बंधकं गृह्णीयात्॥ ॥अथ प्रयोक्ताप्यसन्निहितस्तदाप्ताश्च धनस्य ग्रहीतारो न संति यदि वाऽसं
निहिते प्रयोक्तर्याधिविक्रयेण धनदित्साधमर्णस्य तत्र किं कर्तव्यमित्यपेक्षित आह। तत्कालकृतमूल्यो वात
त्र तिष्ठेद्वृद्धिकः॥ तस्मिन्काले यत्तस्याधेर्मूल्यं तत्परिकल्प्य तत्रैव धनिनि आधिं वृद्धिरहितं स्थापयेन्न तत ऊर्ध्वं
धनं वर्द्धते। यावद्धनी धनं गृहीत्वा तमाधिं मुंचति यावद्वा तन्मूल्यद्रव्यमृणी प्रवेशयति॥ ॥यदा तु द्विगुणी ४०
भूतेपि धने द्विगुणं धनमेव ग्रहीतव्यं न त्वाधिनाश इति विचारितमृणद्रव्यग्रहणकाल एव तदा द्विगुणीभू

तेऽपि द्रव्येऽसंनिहिते चाधमर्णे धनिना किं कर्तव्यमित्यत आह। विनाधारणकाद्वापि विक्रीणीत ससाक्षिकं। धारण
कादधमर्णाद्विना अधमर्णेऽसन्निहिते साक्षिभिस्तदाप्तैश्च सह तमाधिं विक्रीय धनं गृह्णीयादृणी। वाशब्दो व्यव
स्थितविकल्पार्थः। यदर्णग्रहणकाले द्विगुणीभूतेपि धने धनमेव ग्रहीतव्यं। नाधिनाश इति न विचारितं तदाधिः
प्रणष्टे द्विगुण इत्याधिनाशः। विचारिते त्वयं पक्ष इति। भोग्याधौ विशेषमाह॥ यदा तु द्विगुणीभूतमृणमाधौ त
दा खलु मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने। यदा प्रयुक्तं धनं स्वकृतया वृद्ध्या द्विगुणीभूतं मृणं तदाधौ कृते
तदुत्पन्ने द्रव्ये द्विगुणे धनिनः प्रविष्टे धनिनाधिर्मोक्तव्यः। यदि वाऽऽदावेवाधौ दत्ते द्विगुणीभूते द्रव्ये त्वयाधिर्मोक्त
व्य इति परिभाषया कारणंतरेण वा भोग्याभावेन यदा द्विगुणीभूतमृणं तदाधौ भोगार्थं धनिनि प्रविष्टे तदुत्पन्ने द्र
व्ये द्विगुणीभूते तस्याधिर्मोक्तव्यः। अधिकोपभोगे तदपि देयं। सर्वथा सवृद्धिकमूलर्णापाकरणार्थाधिकोपभोगवि
षयमिदं वचनं। तमेनं क्षयाधिमाचक्षते लौकिकाः। यत्र तु वृद्ध्यर्थ एवाध्युपभोग इति परिभाषा तत्र द्वैगुण्याति
क्रमेपि यावन्मूल्यदानं तावदुपभुक्त एवाधिः। एतदेव स्पष्टीकृतं बृहस्पतिना। ऋणी वंधमवाप्नुयात्। फलभो
ग्यं पूर्णकालं दत्वा द्रव्यं च सामकं। यदा प्रकर्षितं तत्स्यात्तदा न धनभाग्धनी। ऋणी च न लभेद्बंधं परस्परमतं वि

नेति। अस्यार्थः। फलंभोग्यंयस्यासौफलभोग्यः। बंधः आधिः॥ सचद्विविधः सवृद्धिमूल्यापाकरणार्थो वृद्धिमात्रा
४१ पाकरणार्थश्च। तत्रसवृद्धिमूल्यापाकरणार्थंबंधंपूर्णकालंपूर्णःकालोयस्यासौपूर्णकालस्तमाप्नुयाद्धनी। यदास
वृद्धिकंमूल्यंफलद्वारेणधनिनःप्रविष्टंतदाबंधमाप्नुयादित्यर्थः। वृद्धिमात्रापाकरणार्थंतुबंधंसामकंदत्वाप्नुया
द्धनी। सममूल्यंसममेवसामकं। अस्यापवादमाह। यदिप्रकर्षितंतत्स्यात्। तद्बंधकंप्रकर्षितंअतिशयितंवृद्धेरप्य
धिकफलंयदिस्यात्तदानधनभाग्धनी। सामकंनलभेतधनीमूल्यमदत्वैवर्णीबंधमवाप्नुयादितियावत्। अथवाप्रक
र्षितंतद्बंधकंवृद्धये प्यपर्याप्तंतदासामकंदत्वापिबंधकंनलभेताधमर्णकः। वृद्धिशेषमपिदत्वैवलभेतेत्यर्थः। पुनरुभ
यत्रापवादमाह। परस्परमतंविना उत्तमर्णाधमर्णयोःपरस्परानुमत्यभावेयदिप्रकर्षितमित्याद्युक्तं। परस्परानुमतौ
तूत्कृष्टमपिबंधकंयावन्मूल्यदानमुपभुंक्तेधनीविकृष्टमपिमूल्यमात्रदानेनैवाधमर्णोलभतइति। ऋणादानप्रक
रणं। उपनिधिंप्रत्याह। वासनस्थमनाख्यायहस्तेन्यस्ययदर्प्यते। द्रव्यंतदौपनिधिकंप्रतिदेयंतथैवतत्। निक्षेप्यद्र
व्यस्याधारभूतंद्रव्यांतरंवासनंकरंडकादितत्स्थंवासनस्थंयद्द्रव्यंरूपसंख्यादिविशेषमनाख्यायाकथयित्वामुद्रि ४१
विश्वास तमन्यस्यहस्तेरक्षणार्थंविश्रंभादर्प्यतेस्थाप्यतेतद्द्रव्यमौपनिधिकमुच्यते॥ यथाहनारदः। असंख्यातमविज्ञातं

समुद्रंयन्निधीयते। तज्जानीयादुपनिधिंनिक्षेपंगणितंविदुरिति। प्रतिदेयंतथैवतत्। यस्मिन्स्थापितंतेनयथैवपूर्वंमुद्रादिचि
न्हितंअर्पितंतथैवस्थापकायप्रतिदेयंप्रत्यर्पणीयं॥ प्रतिदेयमित्यस्यापवादमाह। नदाप्योपहृतंतंतुराजदैविकतस्करैः। त
मुपनिधिंराज्ञादैवेनोदकादिनातस्करैर्वापहृतंनष्टंनदाप्योसौयस्मिन्नुपहितंधनिनएवतद्द्रव्यंनष्टंयदिजिह्मकारितंनभ कपटं
वति। यथाहनारदः॥ ग्रहीतुःसहयोर्थेननष्टोनष्टःसदायिनः॥ दैवराजकृतेतद्वन्नचेत्तज्जिह्मकारितमिति॥ ॥अस्याप्यपवा
दमाह॥ ग्रेषश्चेन्मार्गितेऽदत्तेदाप्योदंडंचतत्समं। स्वामिनामार्गितेयाचितेयदिनददातितदातदुत्तरकालंयद्यपिराजा
दिभिर्नाशोनाशःसंजातस्तथापितद्द्रव्यंमूल्यकल्पनयाधनिनेग्रहीतादाप्योराज्ञेतत्समंदंडंच॥ ॥भोक्तारंप्रतिदंडमा
ह। आजीवन्स्वेच्छयादंड्योदाप्यस्तंचापिसोदयं। यःस्वेच्छयास्वाम्यननुज्ञयोपनिहितंद्रव्यमाजीवत्युपभुंक्तेव्यवहर
तिवाप्रयोगादिनालाभार्थमसावुपभोगानुसारेणलाभानुसारेणचदंड्यस्तंचोपनिधिंसोदयमुपभोगेसवृद्धिकंव्य
वहारेसलाभंधनिनेदाप्यः। वृद्धिप्रमाणंचकात्यायनेनोक्तं। निक्षेपंवृद्धिशेषंचक्रयंविक्रयमेवच। याच्यमानंनचेद्दद्याद्वृ
द्धतेपंचकंशतमिति। एतच्चभक्षितेद्रष्टव्यं। उपेक्षाज्ञाननष्टेतुतेनैवविशेषोदर्शितः। भक्षितंसोदयंदाप्यःसमंदाप्य
मुपेक्षितं। किंचिन्न्यूनंप्रदाप्यःस्याद्द्रव्यमज्ञाननाशितमिति। किंचिन्न्यूनमितिचतुर्थांशहीनं॥ ॥उपनिधिधर्मानन्या

४२ चितादिषु अतिदिशति। याचितान्वाहितन्यासनिक्षेपादिविषयं विधिः। विवाहादिषु उत्सवेषु वस्त्रालंकारादि याचितानीतं या
चितं यदेकस्य हस्ते निहितं द्रव्यं तेनाप्यनु पश्चादन्यस्य हस्ते स्वामिने देहीति निहितं तदन्वाहितं। न्यासो नाम। गृहस्वामि
ने अदर्शयित्वा तस्य परोक्षमेव गृहजनहस्ते प्रक्षेपो गृहस्वामिने समर्पणीयमिति। समक्षं तु समर्पणं निक्षेपः। आदिशब्दा
द्वेन सुवर्णकारादिहस्ते कटकादिनिर्माणाय न्यस्तस्य सुवर्णादेः प्रतिन्यासस्य च परस्परप्रयोजनापेक्षया त्वयेदं मदीयं
रक्षणीयं मयेदं त्वदीयं रक्ष्यत इति न्यस्तस्य ग्रहणं। यथाह नारदः॥ एष एव विधिर्दृष्टो याचितान्वाहितादिषु। शिल्पिषूपनि
धौ न्यासे प्रतिन्यासे तथैव च। एतेषु याचितादिषु अयं विधिः। उपनिधेर्यः प्रतिदानादिविधिः स एव वेदितव्यः॥ ॥इति नि
क्षेपप्रकरणं॥ ॥प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितमित्युक्तं तत्र भुक्तिर्निरूपिता सांप्रतं साक्षिस्वरूपं निरूप्य
ते॥ साक्षी च॥ साक्षाद्दर्शनाच्छ्रवणाच्च भवति। यथाह मनुः। समक्षदर्शनात्साक्षी श्रवणाच्चैव सिध्यतीति। स च द्विविधः
कृतोऽकृतश्च। साक्षित्वेन निरूपितः कृतः। अनिरूपितोऽकृतः। तत्र कृतः पंचविधो ज्ञेयोऽकृतश्चैव षड्विधः। इत्येकादशविधः।
यथाह नारदः। एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः। कृतः पंचविधो ज्ञेयः षड्विधोऽकृत उच्यत इति। तेषां च भेदस्ते
नैव दर्शितः। लिखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च॥ गूढश्चोत्तरसाक्षी च साक्षी पंचविधः स्मृत इति। लिखितादीनां ४२

साक्षिदूषरसं°

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

च स्वरूपं कात्यायनेनोक्तं। अर्थिना स्वयमानीतो यो लेख्ये संनिवेश्यते। स साक्षी लिखितो नाम स्मारितः पत्रकादृत इति। स्मा
रितः पत्रकादृत इत्यस्य विवरणं तेनैव कृतं। यस्तु कार्यप्रसिद्ध्यर्थं दृष्ट्वा कार्यं पुनः पुनः। स्मार्यते ह्यर्थिना साक्षी स स्मा
रित इहोच्यत इति। यस्तु यदृच्छयागतः साक्षी क्रियते स यदृच्छाभिज्ञः। अनयोः पत्रानारूढत्वेपि भेदस्तेनैव दर्शितः। प्रयोज
नार्थमानीतः प्रसंगादागतश्च यः। द्वौ साक्षिणौ त्वलिखितौ पूर्वपक्षस्य साधकाविति। तथा अर्थिना स्वार्थसिद्ध्यर्थं प्र
त्यर्थिवचनं स्फुटं। यः श्राव्यते स्थितो गूढो गूढसाक्षी स उच्यत इति। तथा साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते
। श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञित इति। षड्विधस्याप्यकृतस्य भेदो नारदेन दर्शितः। ग्रामश्च प्राड्विवाकश्च रा
जा च व्यवहारिणां। कार्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः॥ कुल्याः कुलविवादेषु विज्ञेयास्तेपि साक्षिण इति।
प्राड्विवाकग्रहणं लेखकसभ्योपलक्षणार्थं। लेखकः प्राड्विवाकश्च सभ्याश्चैवानुपूर्वशः। नृपे पश्यति तत्कार्यं साक्षि
णः समुदाहृता इति॥ ॥साक्षिणः कीदृशाः क्रियेतश्च भवंतीत्यत आह। तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः। धर्मप्र
धाना ऋजवः पुत्रवंतो धनान्विताः। त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः। यथाजाति यथावर्णं सर्वे सर्वेषु वा
स्मृताः। तपस्विनः तपःशीलाः। दानशीलाः दाननिरताः। कुलीनाः महाकुलप्रसूताः सत्यवादिनः सत्यवादनशीलाः। धर्म

सूताः।

४२ प्रधानाः नार्थकामप्रधानाः ऋजवोऽकुटिलाः॥ पुत्रवंतः धनान्विताः बहुसुवर्णादिधनयुक्ताः। श्रौतस्मार्तक्रियापराः नि
त्यनैमित्तिकानुष्ठानरताः। एवंभूताः पुरुषाः त्र्यवराः साक्षिणो भवंति। त्रयः अवराः न्यूनाः येषां ते त्र्यवराः त्रिभ्योऽर्वाग्न भ
वंति। परतस्तु यथाकामं भवंतीत्यर्थः। जातिमनतिक्रम्य यथाजाति। जातयो मूर्द्धावसिक्तादयः। अनुलोमजाः प्रति
लोमजाश्च तत्र मूर्द्धावसिक्तानां मूर्द्धावसिक्ताः साक्षिणो भवंति। एवमंबष्ठादिष्वपि द्रष्टव्यं। वर्णमनतिक्रम्य यथाव
स्म र्णं। वर्णाः ब्राह्मणादयः। तत्र ब्राह्मणानां ब्राह्मणा एवोक्तलक्षणा उक्तसंख्यकाः साक्षिणो भवंति। एवं क्षत्रियादिष्वपि द्र
ष्टव्यं। तथा स्त्रीणां साक्ष्यं स्त्रिय एव कुर्युः। यथाह मनुः॥ स्त्रीणां साक्ष्यं स्त्रियः कुर्युरिति। सजातिवर्णासंभवे सर्वे मूर्द्धावसि
क्तादयो ब्राह्मणादयश्च सर्वेषु मूर्द्धावसिक्तादिषु ब्राह्मणादिषु च यथासंभवं साक्षिणो भवंति। उक्तलक्षणानां साक्षि
णामसंभवे प्रतिषेधरहितानामन्येषामपि साक्षित्वप्रतिपादनार्थमसाक्षिणो वक्तव्याः। ते च पंचविधाः नारदेन द
र्शिताः। असाक्ष्यपि हि शास्त्रेषु दृष्टः पंचविधो बुधैः। वचनाद्दोषतो भेदात्स्वयमुक्तेर्मृतांतरः इति। के पुनर्वचनादसा
क्षिण इत्यत आह। श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः। असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृत इति। ता
पसा वानप्रस्थाः। आदिशब्देन पित्रा विवदमानादीनां ग्रहणं। यथाह शंखः। पित्रा विवदमानगुरुकुलवासि ४२

परिव्राजकवानप्रस्थनिर्ग्रंथा असाक्षिण इति॥ दोषादसाक्षिणो दर्शिताः। स्तेनाः साहसिकाश्चंडाः कितवा वधकास्तथा।
असाक्षिणस्ते दुष्टत्वात्तेषु सत्यं न विद्यत इति। चंडाः कोपनाः कितवा द्यूतकृतः। भेदादसाक्षिणं च स्वरूपं तेनैव दर्शि
तं। साक्षिणां लिखितानां च निर्दिष्टानां च वादिनां। तेषामेकोऽन्यथावादी भेदात्सर्वेन साक्षिण इति। तथा स्वयमुक्तेः स्वरू
पं चोक्तं। स्वयमुक्तिरनिर्दिष्टः स्वयमेवेत्य यो वदेत्। सूचीत्युक्तः स शास्त्रेषु न स साक्षित्वमर्हतीति। मृतांतरस्यापि लक्ष
णमुक्तं। योऽर्थः श्रावयितव्यः स्यात्तस्मिन्नसति चार्थिनि। क्व तद्वदतु साक्षित्वमित्यसाक्षी मृतांतर इति। येनार्थिना प्र
त्यर्थिना वा साक्षिणो योऽर्थः श्रावयितव्यो भवेद्यमत्रार्थे साक्षिण इति। तस्मिन्नर्थिनि प्रत्यर्थिनि वाऽसति मृते
र्थे चानिवेदिते साक्षी कस्मिन्नर्थे कस्य वा कृते साक्ष्यं वदत्विति मृतांतरः साक्षी न भवति। यत्र तु मुमूर्षुणा स्वस्थेन
वापि त्रापुत्रादयः श्राविताः अस्मिन्नर्थे अमी साक्षिण इति तत्र मृतांतरोऽपि साक्षी। यथाह नारदः। मृतांतरोऽर्थिनि प्रे
ते मुमूर्षुश्राविताद्दते। तथा श्रावितो नातुरेणापि यस्त्वर्थो धर्मसंज्ञितः। मृतेऽपि तत्र साक्षी स्यात् षट्सु चान्वाहितादि
ष्विति॥ ॥ तानेतानसाक्षिणो दर्शयति ॥ स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः। रंगावतारिपाषंडिकूटकृद्वि
कलेंद्रियाः॥ पतिताप्तार्थसंबंधिसहायरिपुतस्कराः। साहसी दृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिणः॥ स्त्री प्रसिद्धा।

वालोऽप्राप्तव्यवहारः। वृद्धोऽशीतिकावरः। वृद्धग्रहणं वचननिषिद्धानामन्येषामपि श्रोत्रियादीनामुपलक्षणार्थं। कि
तवोऽक्षदेविकः। मत्तः पानादिना। उन्मत्तो ग्रहाविष्टः। अभिशस्तोऽभियुक्तो ब्रह्महत्यादिना। रंगावतारी चारणः। पा
षंडिनो निर्ग्रन्थप्रभृतयः। कूटकृत् कपटलेख्यादिकारी। विकलेंद्रियः श्रोत्रादिरहितः। पतितो ब्रह्महादिः। आप्तः सुहृ
त्। अर्थसंबंधी। विप्रतिपद्यमानार्थसंबंधी। सहायः एककार्यः। रिपुः शत्रुः। तस्करः स्तेनः। साहसी स्वबलावष्टंभकारी
। दृष्टदोषो दृष्टवितथवचनः। निर्धूतो बंधुभिस्त्यक्तः। आदिशब्दादन्येषामपि स्मृत्यंतरोक्तानां दोषादसाक्षिणो भेदाद
साक्षिणं स्वयमुक्तेः मृतांतरस्य च ग्रहणं। एते स्त्रीवालादयः साक्षिणो न भवंति॥ ॥अवराः साक्षिणो ज्ञेया इत्यस्यापवा
दमाह॥ उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित्। ज्ञानपूर्वकं नित्यनैमित्तिकधर्मानुष्ठायी धर्मवित्। स एको
ऽप्युभयानुमतश्चेत्साक्षी भवति। अपिशब्दात् द्वावपि यद्यपि श्रोत्रस्मार्तक्रियापरा इति त्र्यवराणामपि धर्मवि
त्वं समानं तथापि तेषामुभयानुमित्यभावेऽपि साक्षित्वं भवति एकस्य द्वयोर्वोभयानुमत्यैव साक्षित्वं भवतीत्यर्थवत् सफलं
त्र्यवरग्रहणं॥ ॥तपस्विनो दानशीला इत्यस्यापवादमाह। सर्वः साक्षी संग्रहणे चौर्यपारुष्यसाहसे। संग्रहणा
दीनि वक्ष्यमाणलक्षणानि तेषु सर्वे वचननिषिद्धास्तपःप्रभृतिगुणरहिताश्चासाक्षिणो भवंति। दोषादसाक्षिणो भे ४४

दादसाक्षिणः स्वयमुक्तिश्चात्रापि ते साक्षिणो न भवंति सत्याभावादिलिहेतोरत्रापि विद्यमानत्वात्। मनुष्यमारणं चौर्यं
स्पर्श परदाराभिमर्शनं पारुष्यमुपभयं चेति साहसं स्याच्चतुर्विधमिति वचनाद्यद्यपि स्त्रीसंग्रहणचौर्यपारुष्याणां साह
सत्वं तथापि तेषां स्वबलावष्टंभेन जनसमक्षं क्रियमाणानां साहसत्वं रहसि क्रियमाणानां तु संग्रहणादिशब्दवाच्यत्व
मिति तेषां साहसात्पृथगुपादानं॥ ॥साक्षिश्रावणमाह। साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगान्। अर्थिप्रत्यर्थिसन्नि
धौ साक्षिणः समवेतान्नासमवेताः पृष्टाः प्रब्रूयुरिति गौतमवचनात्। वक्ष्यमाणं श्रावयेत्। तत्रापि कात्यायनेन विशेषोद
र्शितः॥ सभांतः साक्षिणः सर्वानर्थिप्रत्यर्थिसन्निधौ। प्राड्विवाको नियुंजीत विधिनानेन सांत्वयन्। देवब्राह्मणसान्निध्ये
साक्ष्यं पृच्छेदृतं द्विजान्। उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे वै शुचिः शुचीन्। आहूय साक्षिणः पृच्छेन्नियम्य शपथैर्भृशं।
समस्तान्विदिताचारान्विज्ञातार्थान्पृथक्पृथगिति। तथा ब्राह्मणादिषु श्रावणे मनुना नियमो दर्शितः। सत्येन शापये
द्विप्रं क्षत्रियं वाहनायुधैः। गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैरिति। ब्राह्मणं अन्यथा ब्रुवतः सत्यं ते नश्येदिति
शापयेत्। क्षत्रियं वाहनायुधानि तव विफलानीति। गोबीजकांचनानि तव विफलानि भविष्यंतीति वैश्यं। शूद्रमन्यथा
ब्रुवतः तव सर्वाणि पातकानि भविष्यंतीति शापयेत्। अत्र चापवादस्तेनैव दर्शितः। गोरक्षकान्वाणिजिकांस्तथाका

४५ रुकुशीलवान्॥ प्रेष्यान्वा ईप्सिकांश्चैव विप्रान्शूद्रवदाचरेदिति। विप्रग्रहणं क्षत्रियवैश्ययोरुपलक्षणार्थं। कुशीलवा गा
यकाः। प्रतिवादिना साक्षिदूषणे दत्ते प्रत्यक्षयोग्यदूषणेषु प्रत्यादिषु तत्रैव निर्णयः। अयोग्येषु चानहूचनाल्लौकृतश्च
निर्णयो न साक्ष्यंतरेणेति नानवस्था। यदि साक्षिदोषमुद्भाव्य साधयितुं न शक्नोति प्रतिवादी तदाऽसौ सौ राज्ञानुसारेण दंड्यः॥ अन्यायानुसारेण
अथ यदि साधयति तदा न साक्षिणः। यथाह। असाधयन्दमं दाप्यो दूषणं साक्षिणं स्फुटं। भाविते साक्षिणो वर्ज्याः साक्षि
कर्मणि राकृता इति। उद्दिष्टेषु च सर्वेषु साक्षिषु दुष्टेषु अर्थी यदा क्रियांतरनिरपेक्षस्तदा पराजितो भवति। जितः सविनयं दा दंडसहितं
प्यः न्यास्त्रेहदृष्टेन कर्म्मणा। यदि वादी निराकांक्षः साक्षि[redacted]वस्थित इति स्मरणात्॥ साकांक्षश्चेत्क्रियांतरमवलंबेतेत्य
लेख्य६ भिप्रायः॥ ॥कथं श्रावयेदित्याह॥ ये पातककृतां लोका महापातकिनां तथा। अग्निदानां च ये लोका ये च स्त्रीबालघातिनां
॥स तान्सर्वानवाप्नोति यः साक्ष्यमनृतं वदेत्॥ सुकृतं यत्त्वया किंचिज्जन्मांतरशतैः कृतं। तत्सर्वं तस्य जानीहि यं पराजयसे
मृषा। पातकोपपातकमहापातककारिणामग्निदानां च स्त्रीबालघातिनां च ये लोकास्तान्सर्वानवाप्नोति यः साक्ष्यमनृतं
वदेदिति। तथा। जन्मांतरशतैर्यत्सुकृतं कृतं तत्सर्वं तस्य भवति। यस्तेनानृतवदनेन पराजितो भवति॥ ति श्रावयेदिति संबं
धः। एतच्च शूद्रविषयं द्रष्टव्यं। शूद्रं सर्वैस्तु पातकैरिति शूद्रे सर्वपातकश्रवणस्य विहितत्वात्। गोरक्षकादिद्विजाति ४५

विषयं च। गोरक्षकान्वाणिजकानित्युक्तत्वात्। अनेकजन्मार्जितसुकृतसंक्रमणस्य महापातकादिफलप्रा प्रापस्य
प्तेश्चानृतवदनमात्रेणानुपपत्तेः साक्षिसंत्रासार्थमिदमुच्यते। यथाह नारदः। पुराणैर्धर्मवचनैः सत्यमाहात्म्यकीर्त्तनैः।
अनृतस्यापवादैश्च भृशमुत्त्रासयेदिमानिति॥ ॥यदा तु श्राविताः साक्षिणः कथंचिन्न ब्रूयुस्तदा किं कर्त्तव्यमित्यत आह।
अब्रुवन्हि नरः साक्ष्यमृणं सदशबंधकं। राज्ञा सर्वं प्रदाप्यः स्यात्षट्चत्वारिंशके हनि॥ यः साक्ष्यमंगीकृत्य श्रावितः सन् कथंचिन्न
वदति स राज्ञा सर्वं सवृद्धिकमृणं धनिने दाप्यः। सदशबंधकं दशमांशकसहितं दशमोंशश्च राज्ञो भवति। राज्ञा धमर्णिको
दाप्यः साधितादृणात्कंशतमित्युक्तत्वात्। एतच्च षट्चत्वारिंशके हनि प्राप्ते वेदितव्यं। ततो र्वाग्वदन्न दाप्यः। इदं च व्याध्याद्युप
प्लवरहितस्य। यथाह मनुः। त्रिपक्षादब्रुवन्साक्ष्यमृणादिषु नरोऽगदः। तदृणं प्राप्नुयात्सर्वं दशबंधं च सर्वतः इति। अगद इति
राजदैवोपप्लवविरहोपलक्षणार्थं। यस्तु जानन्नपि साक्ष्यमेवं नांगीकरोति दोरान्न्यायं तं प्रत्याह। न ददाति हि यः साक्ष्यं जानन्न
पि नराधमः। स कूटसाक्षिणां पापैस्तुल्यो दंडेन चैव हि। यः पुनर्नराधमो विप्रतिपन्नमर्थं विशेषतो जानन्नपि साक्ष्यं न ददाति
नांगीकरोति स कूटसाक्षिणां तुल्यः पापैः कृत्वा दंडेन च। कूटसाक्षिणां दंडं च वक्ष्यति। कूटसाक्षिणश्च दंडयित्वा पुनर्व्यव
हारः प्रवर्त्तनीयः। कृतेपि कौटसाक्ष्ये विदिते निवर्त्तनीयः। यथाह मनुः। यस्मिन्यस्मिन्विवादे तु कौटसाक्ष्यं कृतं भवेत्। तत्त

वहूनां

त्कार्यं निवर्त्तेत कृतं चाप्यकृतं भवेदिति॥ ॥साक्षिविप्रतिपत्तौ कथं निर्णय इत्यत आह। द्वैधे वचनं समेषु गुणिनां तथा।
४६ गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तमाः॥ साक्षिणां द्वैधे विप्रतिपत्तौ बहूनां वचनं ग्राह्यं समसंख्येषु द्वैधे ये गुणिनस्तेषां
वचनं प्रमाणं। यदा पुनर्गुणिनां विप्रतिपत्तिस्तदा ये गुणवत्तमाः। श्रुताध्ययनतदर्थानुष्ठानधनपुत्रादिगुणसंपन्नास्ते
षां वचनं ग्राह्यं॥ यत्र तु गुणिनः कतिपये इतरे बहवस्तत्रापि गुणिनामेव वचनं ग्राह्यं। उभयानुमतः साक्षी भवत्येकोऽपि
धर्मविदिति॥ गुणानां न्यायस्य मुख्यत्वात्। यत्तु भेदाद साक्षिण इत्युक्तं तत्सर्वसाम्येनागृह्यमाणविशेषविषयं। साक्षि
भिश्च कथं उक्ते जयः कथं उक्ते पराजय इत्यत आह। यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत्। अन्यथावादिनो यस्य
ध्रुवस्तस्य पराजयः। यस्य वादिनः प्रतिज्ञां द्रव्यजातिसंख्यादिविशिष्टां साक्षिणः सत्यां वदंति सत्यमेवं जानीमो वयं इ
ति स जयी भवति। यस्य पुनर्वादिनः प्रतिज्ञामन्यथा वैपरीत्येन मिथ्यैतदिति वदंति। तस्य पराजयो ध्रुवो निश्चितः। यत्र
तु प्रतिज्ञार्थस्य विस्मरणादिना भावाभावौ साक्षिणो न प्रतिपादयंति। तत्र प्रमाणांतरेण निर्णयः कार्यः। न च राज्ञा साक्षि
णः पुनः पुनः प्रष्टव्याः। स्वभावोक्तमेव वचनं ग्राह्यं। यथाह। स्वभावोक्तं वचस्तेषां ग्राह्यं यद्दोषवर्जितं। उक्ते साक्षिणो निशादि
राज्ञा न प्रष्टव्याः पुनः पुनरिति॥ ॥अन्यथावादिनो यस्य ध्रुवस्तस्य पराजय इत्यस्यापवादमाह। उक्तेऽपि साक्षिभिः साक्ष्ये ४६

तुं२

यद्यन्ये गुणवत्तमाः। द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः। पूर्वोक्तलक्षणैः साक्षिभिः साक्ष्ये स्वाभिप्राये प्रतिज्ञाता
र्थवैपरीत्येनाभिहिते यद्यन्ये पूर्वेभ्यो गुणवत्तमाः द्विगुणा वा यथाप्रतिज्ञातार्थानुगुण्येन साक्ष्यं ब्रूयुः तदा पूर्वे साक्षिणः कू
टा मिथ्यावादिनो भवेयुः। नन्वेतदनुपपन्नं। अर्थिप्रत्यर्थिसभ्यसभापतिभिः परीक्षितैः प्रमाणभूतैः साक्षिभिर्निर्णीते
प्रमाणांतरान्वेषणेऽनवस्थादोषप्रसंगात्। निर्णीते व्यवहारे तु प्रमाणमफलं भवेत्। लिखितं साक्षिणो वापि पूर्वमावेदि
तं न चेत्॥ यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः। निर्णिक्तव्यवहाराणां प्रमाणमफलं तथेति नारदवचनाच्च। उच्यते
।यदार्थिप्रतिज्ञातार्थस्यांतरान्तःसाक्षित्वेनानाविष्कृतदोषाणामपि साक्षिणां वचनमर्थविसंवादित्वेनाप्रमाणं मन्यमानः विरुद्ध
साक्षिष्वपि दोषं कल्पयति तदा प्रमाणांतरान्वेषणं केन वार्यते। उक्तं च। यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एवासमी
चीन इति। यथा चक्षुरादिकरणे दोषानध्यवसायेऽप्यर्थविसंवादाज्जनितस्य ज्ञानस्याप्रामाण्येन करणदोषकल्पना तथे
हापि। साक्षिपरीक्षातिरेकेण वाक्यपरीक्षोपदेशाच्च। साक्षिभिर्भाषितं वाक्यं सह सभ्यैः परीक्षयेदिति कात्यायनेनाप्युक्तं। य
दा शुद्धा क्रियान्यायात्तदा तद्वाक्यशोधनं। शुद्धाच्च वाक्याद्यः शुद्धः स शुद्धोऽर्थ इति स्थितिरिति। क्रिया साक्षिलक्षणा नार्थसंबंधि
वचनात् नो नाप्यादिति न्यायाद्यदाऽशुद्धा न दा तद्वाक्यशोधनं साक्षिवाक्यशोधनं कर्त्तव्यं। वाक्यशुद्धिश्च सत्यार्थप्रतिपादनेन।

शुद्धस

४०

सत्येन शुद्ध्यते वाक्यमिति स्मरणात्॥ एवं शुद्धायाः क्रियायाः शुद्धाच्च वाक्याद्यः शुद्धोवगतोर्थः स शुद्धस्तथाभूतः॥ इति स्थितिरी
दृशी मर्यादान्यायविदां॥ करणदोषबाधकप्रत्ययाभावे सत्य वितथ[illegible]एवार्थः॥ ननु स्वयमर्थिना प्रमाणीकृतान्साक्षिणो निक्र
म्य कथं क्रियांतरं प्रमाणी क्रियते। नैष दोषः यतः। क्रियां बलवतीं मुक्त्वा दुर्बलां योवलंबते। स जयेवधृतः सभ्यैः पुनस्तां नाप्नु
यात्क्रियामिति कात्यायनेन॥ जयावधारणोत्तरकालक्रियांतरपरिग्रहनिषेधाज्जयावधारणात्प्राक् क्रियांतरपरिग्रहो
दर्शितः। नारदेनापि॥ निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेदिति वदता जयावधारणोत्तरकालमेव प्रमाणांतरं निषिद्धं न प्रा
गपि। तस्मादुक्तेपि साक्षिभिः साक्ष्येऽपरितुष्यता क्रियांतरमंगीकर्तव्यमिति स्थितं। एवं स्थिते यद्यभिहितवचनेभ्यः साक्षि
भ्यो गुणवत्तमा द्विगुणा वा पूर्वनिर्दिष्टा असन्निहिताः साक्षिणः संति तदा त एव प्रमाणीकर्तव्याः॥ स्वभावेनैव ह्युक्तं ह्यस्य व
व्यावहारिकं इत्यस्य सर्वव्यवहारशेषत्वात्। निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत्। लिखितं साक्षिणो वापि पूर्वमावेदि
तं न चेदिति नारदवचनात्। पूर्वनिर्दिष्टानामसंभवे त्वनिर्दिष्टा अपि तथाविधाः साक्षिण एव ग्राह्याः। न दिव्यं। संभवे साक्षिणां
प्राज्ञो दैविकीं वर्जयेत्क्रियामिति स्मरणात्। तेषामसंभवे दिव्यं प्रमाणीकर्तव्यं अतः परमपरितुष्यता प्रत्यर्थिना न प्रमाणां ४
तरमन्वेषणीयमवचनादिति परिसमापनीयो व्यवहारः। यत्र तु प्रत्यर्थिनः स्वप्रत्ययविसंवादित्वेन साक्षिवचनस्याप्रा

DR. BHAU DAJI MEMORIAL

माण्यं मन्यमानस्य साक्षिषु दोषारोपणेनापरितोषः। तत्र प्रत्यर्थिनः क्रियोपन्यासावसराभावात्सप्ताहावधिकं दैव[illegible]रा
जिकव्यसनोद्भावेन साक्षिपरीक्षणं कर्तव्यं। तत्र च दोषावधारणे साक्षिणो विवादास्पदीभूतमृणं दाप्याः सारासारानु
सारेण दंडनीयाश्च। अथ दोषानवधारणं तदा प्रत्यर्थिना तावता संतोष्टव्यं। यथाह मनुः। यस्य दृश्येत सप्ताहादुक्तवाक्यस्य
साक्षिणः। रोगोग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः इति एतच्च यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेदित्यस्याप
रितुष्यत्प्रत्यर्थिविषयमेवापवादो द्रष्टव्यः। केचिदुक्तेपि साक्षिभिः साक्ष्ये इत्येतद्वचनमर्थिना निर्दिष्टेषु साक्षिषु प्रत्यर्थ्यनु
कूलमभिहितवत्सु यदि प्रत्यर्थी गुणवत्तमान्द्विगुणान्वा साक्षिणः पूर्वोक्तविपरीतं वादयति तदा पूर्ववादिनः साक्षिणः
कूटा इति व्याचक्षते। तदसत्। प्रत्यर्थिनः क्रियानुपपत्तेः। तथाहि। अर्थी नाम साध्यस्यार्थस्य निर्देष्टा॥ तत्प्रतिपक्षस्तद
भाववादी प्रत्यर्थी। तत्राभावस्य भावसिद्धिसापेक्ष्यसिद्धित्वाद्भावस्य चाभावसिद्धिनिरपेक्ष्यसिद्धित्वाद्भावस्यैव साध्य
रव त्वं युक्तं। अभावस्य रूपेण साक्ष्यादिप्रमेयत्वाभावात्। अतश्चार्थिन एव क्रिया युक्ता॥ अपि चोत्तरानुसारेण सर्वत्रैव क्रि
यानियता स्मर्यते। प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिष्टो क्रियां॥ मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेदिति। न चैक
स्मिन्व्यवहारे द्वयोः क्रिया। न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोरिति स्मरणात्। तस्मात्प्रतिवादिनः साक्षिणो गुण

४९ वत्तमा द्विगुणा वान्यथा ब्रूयुरित्यनुपपन्नं। अत्र मतं। यत्र द्वावपि भावप्रतिज्ञावादिनौ मदीयमिदं दायादिप्राप्तं॥ मदीयमि
दं दायादिप्राप्तमिति पूर्वापरकालविभागास्त्वाकलितमेव वदतस्तत्र द्वयोः साक्षिषु सत्सु कस्य साक्षिणो ग्राह्याः इत्याकां
क्षायामाह। द्वयोर्विवदतोरर्थे द्वयोः सत्सु च साक्षिषु। पूर्वपक्षो भवेद्यस्य भवेयुस्तस्य साक्षिणः इति वचनेन यः पूर्वं निवे
दयति तस्य साक्षिणो ग्राह्याः इति स्थिते तस्यायमपवादः॥ उक्तेपि साक्षिभिः साक्ष्यमिति अतश्च पूर्वोत्तरयोर्वादिनोः स
मसंख्येषु समगुणेषु साक्षिषु सत्सु पूर्ववादिनः साक्षिणः प्रष्टव्याः यदा तूत्तरवादिनः साक्षिणो गुणवत्तमाः द्विगुणा वा त
दा प्रतिवादिनः साक्षिणः प्रष्टव्याः। एवं च नाभावस्य साध्यता। उभयोरपि भाववादित्वात्। चतुर्विधोत्तरविलक्षणत्वाच्च प्र
कृतोदाहरणे न क्रियाव्यवस्था॥ एकस्मिन्व्यवहारे यथैकस्यार्थिनः क्रियाद्वयं परमते॥ तथा वादिप्रतिवादिनोः क्रियाद्वये
प्यविरोध इति। तदप्याचार्यो नानुमन्यते। उक्तेपि साक्षिभिः साक्ष्ये इत्यतः श्लोकद्वयार्थे प्रकरणाद्याकार्थस्यानवगमादिस्य व्यंजनायाः
लं प्रसंगेन॥ ॥कूटसाक्षिणो दर्शिताः तेषां दंडमाह॥ पृथक्पृथग्दंडनीयाः कूटकृत्साक्षिणस्तथा। विवादाद्द्विगुणं दंडं वि
वास्यो ब्राह्मणः स्मृतः। यो धनदानादिना कूटान्साक्षिणः करोति स कूटकृत्साक्षिणश्च ये तथा कूटास्ते विवादपराजये ४९
यो दंडस्तत्र तत्र कृतं दंडं द्विगुणं पृथक्पृथक् एकैकशो दंडनीयाः। ब्राह्मणस्तु विवास्यो राष्ट्रान्निर्वास्यो न दंड्यः। एत

च लोभादिकारणविशेषापरिज्ञानेऽनभ्यासे च द्रष्टव्यं। लोभादिकारणविशेषपरिज्ञानेऽभ्यासे च मनुनोक्तं। लोभात्स
हस्रं दंड्यः स्यान्मोहात्पूर्वं तु साहसं॥ भयाद्द्वौ मध्यमौ दंड्यौ मैत्र्यात्पूर्वं चतुर्गुणं। कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परं।
अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव तु इति। तत्र लोभोऽर्थलिप्सा। मोहो विपर्ययज्ञानं। भयं संत्रासः। मैत्री स्नेहातिशयः। का
मः स्त्रीव्यतिकराभिलाषः। क्रोधोऽमर्षः॥ अज्ञानमस्फुटज्ञानं। बालिश्यं ज्ञानानुत्पादः। सहस्रादिपणात्मिकाः पणा गृ
ह्यंते। तथा कूटसाक्ष्यं तु कुर्वाणान् त्रीन्वर्णान् धार्मिको नृपः। प्रवासयेद्दंडयित्वा ब्राह्मणं तु विवासयेदिति। एतच्चाभ्यास
विषयं। कुर्वाणानिति वर्तमाननिर्देशात्। त्रीन्वर्णान्क्षत्रियादीन्पूर्वोक्तं दंडं दंडयित्वा प्रवासयेन्मारयेत्। अर्थशास्त्रे प्रवास
शब्दस्य मारणे प्रयोगात्। अस्य चार्थशास्त्ररूपत्वात्। तत्रापि प्रवासनमोष्ठच्छेदनजिह्वाच्छेदनप्राणवियोजनं च कौटसा
क्ष्यविषयानुसारेण द्रष्टव्यं। ब्राह्मणं दंडयित्वा विवासयेत् स्वराष्ट्रान्निष्कासयेत्। यद्वा विवासयेद्वाससो विगतो विवासाः
विवाससं करोतीति णिचि कृते णाविष्ठवत्प्रातिपदिकस्येति टिलोपे रूपं। नग्नीकुर्यादित्यर्थः। अथवा वसत्यस्मिन्निति
ण वासो गृहं विवासयेद्भग्नगृहं कुर्यादिति यावत्। ब्राह्मणस्यापि लोभादिकारणविशेषपरिज्ञानेऽनभ्यासे च तत्र तत्रोक्तो दं र्थ
ड एव। अभ्यासे त्वर्थदंडो विवासनं च। तत्रापि जातिद्रव्यानुबंधाद्यपेक्षया विवासनं नग्नीकरणं गृहभंगो देशान्निर्वा

गुणानुसारेण

४९ मनं चेति व्यवस्था द्रष्टव्या॥ लोभादिकारणविशेषापरिज्ञाने ऽनभ्यासे चाल्पविषये कौटसाक्ष्ये ब्राह्मणस्यापि क्षत्रिया
दिवदर्थदण्ड एव। महाविषये देशान्निर्वासनमेव। अत्राप्यभ्यासे सर्वेषामेवमनूक्तं द्रष्टव्यं। न च ब्राह्मणस्यार्थदण्डो ना
स्तीति मन्तव्यं। अर्थदण्डाभावे शारीरदण्डे च निषिद्धे स्वल्पे पराधे नग्नीकरणगृहभंगांककरणविप्रवासनं दण्डाभावो वा
प्रसज्येत। चतुर्णामपि वर्णानां प्रायश्चित्तमकुर्वतां। शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेदिति स्मरणाच्च। तथा सहस्रं णा
ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजेत्। इति स्मरणात्। यत्तु शंखवचनं। त्रयाणां वर्णानां धनापहारवधबंधक्रियावि
वासनांककरणं ब्राह्मणस्येति॥ तत्र धनापहारः सर्वस्वापहारो विवक्षितो वधसाहचर्यात्॥ शारीरस्त्ववरोधादिर्जी
वितान्तः प्रकीर्तितः। काकिण्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव चेति वधसर्वस्वहरणयोः सहपाठात्। यदप्युक्तं। राष्ट्रादे
नं बहिः कुर्यात्समग्रधनमक्षतमिति। तत्स्वकृतसाहसविषयं न सर्वविषयं। शारीरस्तु न कदाचिद्ब्राह्मणस्य भवति। न
त जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितमिति सामान्येनमनुस्मरणात्। तथा न ब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि
। तस्माद्स्य वधं राजा मनसापि न चिन्तयेदिति॥ ॥ अपि च॥ यः साक्ष्यं श्रावितो न्येभ्यो निह्नुते तत्तमोवृतः। स दाप्योऽष्ट ४९
गुणं दण्डं ब्राह्मणं तु विवासयेत्॥ यस्तु साक्षित्वमंगीकृत्यान्यैः साक्षिभिः सह साक्ष्यं श्रावितः सन्निगदकाले तमोवृ

तो रागाद्याक्रान्तचित्तस्तत्साक्ष्यमन्येभ्यः साक्षिभ्यो निह्नुते नाहमत्र साक्षी भवामीति स विवादपराजये यो दण्डस्तं दण्डमष्ट
गुणं दाप्यः। ब्राह्मणं पुनरष्टगुणद्रव्यदानासमर्थं विवासयेत्। विवासनं च नग्नीकरणगृहभंगदेशनिर्वासनलक्षणं विषया
नुसारेण द्रष्टव्यं। इतरेषां त्वष्टगुणद्रव्यदण्डासंभवे स्वजात्युचितकर्म्मकरणनिगडबंधनकारागृहप्रवेशादि द्रष्टव्यं।
एतच्च पूर्वश्लोकेप्यनुसर्त्तव्यं। यदा सर्वे साक्ष्यं निह्नुवते तदा सर्वे समानदोषाः। यदा तु साक्ष्यमुक्त्वा पुनरन्यथा वदंति तदा
अनुबंधाद्यपेक्षया दण्ड्याः॥ यथाह कात्यायनः। उक्त्वान्यथा ब्रुवाणाश्च दण्ड्याः स्युर्वाक्छलान्विता इति। न चान्येनोक्ताः
साक्षिणोऽन्येन रहस्यनुसर्त्तव्याः। यथाह नारदः। नपरेण समुद्दिष्टमुपेयात्साक्षिणं रहः। भेदयेन्नैव चान्येन हीयेतैवं
समाचरन्निति। साक्षिणामवचनमसत्यवचनं च सर्वत्र प्रतिषिद्धं॥ तदपवादार्थमाह॥ वर्णिनां हि वधो यत्र तत्र साक्ष्यनृ
न तं वदेत्। यत्र वर्णिनां शूद्रविट्क्षत्रियविप्राणां सत्यवचनेन वधः संभाव्यते तत्र साक्ष्यनृतं वदेत्। अनेन च सत्यवचनप्रति
षेधेन साक्षिणः पूर्वं प्रतिषिद्धमसत्यवचनमवचनं वाप्यनुज्ञायते। यत्र शौंकाभियोगादौ सत्यवचने वर्णिनो वधो ऽनृत
वचनेन कस्यापि वधः॥ तत्रानृतवचनमभ्यनुज्ञायते॥ यत्र तु सत्यवचने ऽर्थिप्रत्यर्थिनोरन्यतरस्य वधो ऽसत्यवचने चा
न्यतरस्य वधस्तत्र तूष्णींभावोभ्यनुज्ञातो राजा यद्यनुमन्यते। अथ राजा कथमप्यकथनेन मुंचति। तदा भेदाद साक्षित्वं

५० कर्त्तव्यं। तस्याप्यसंभवे सत्यमेव वेदितव्यं। असत्यवचने वर्णिवधदोषो ऽसत्यवचनदोषश्चासत्यवचने
वर्णिवधदोषएवं तत्र च यथा न्यास्त्रं प्रायश्चित्तं कर्त्तव्यं॥ ॥तत्रासत्यवचनेतस्तीभावे च यान्स्याभ्यनुज्ञा नास्त्यस्य वायाभा
वइत्यत आह॥ तस्यावनायनिर्वाप्यश्चरुः सारस्वतो द्विजैः। तस्यावनायानृतवचन अवचननिमित्तप्रत्यवायपरिहाराय सा
रस्वतश्चरुर्द्विजैरेकैकत्रो निर्वाप्यः कर्त्तव्यः। सरस्वती देवतास्येति सारस्वतः अनवस्त्राविता तरूषमपक्कऽं दने चरुशब्दः
प्रसिद्धः इहायमभिसंधिः साक्षिणामनृतवचनमवचनं च यन्निषिद्धं तदिहाभ्यनुज्ञातं। यतुनानृतं वदेदब्रुवन्विब्रुवन्वापि
नरो भवति किल्विषीति च सामान्येनानृतवचनमवचनं च निषिद्धं तदतिक्रमनिमित्तमिदं प्रायश्चित्तं। न च मंतव्यं साक्षिणा
मनृतवचनावचनाभ्यनुज्ञाने पि साधारणानृतवचनावचनप्रतिषेधातिक्रमनिमित्तप्रत्यवायस्यतादवस्थ्यादनुज्ञा
वचनमनर्थकमिति। यतः साक्ष्यनृतवचनावचनयोर्नयाप्रत्यवायः। साधारणानृतवचनावचनयोरल्यायानिस्य
र्यवदभ्यनुज्ञावचनेयद्यपिमयसः प्रत्यवायस्य निवृत्यानुषंगीकस्याल्पीयसः प्रत्यवायस्य निवृत्तिरन्यत्र तथापीहा
भ्यनुज्ञावचनात्प्रायश्चित्तविधानाच्चभूयसो निवृत्याल्पीयानप्यानुषंगिकोपि प्रत्यवायो न निवर्त्तत इति गम्यते। एत
देवान्यत्रप्रश्नेषु वर्णिवधात्रां कायां यां यादीनामनृतवचनावचनाभ्यनुज्ञातं वेदितव्यं न च तत्र प्रायश्चित्तमस्ति। प्रति ५०

वर्णी इतिपात्र विशेषेमाम्रत

षेधां रमराभावात्। निमित्तांतरेण कालांतरे र्थतत्वावगमेपि साक्षिणामन्येषां च दंडाभावो स्मादेवव चनादवगम्यत इति
॥इति साक्षिप्रकरणं॥ ॥भुक्तिसाक्षिणो निरूपितौ सांप्रतलेख्यं निरूप्यते। तत्र लेख्यं द्विविधं। शासनं जानपदं चेति। शा
सनं निरूपितं। जानपदं अभिधीयते। तच्च द्विविधं। स्वहस्तकृतमन्यकृतं चेति। तत्र स्वहस्तकृतमसाक्षिकं अन्यकृतं ससा
क्षिकं॥ अनयोश्च देशाचारानुसारेण प्रामाण्यं। यथाह नारदः। लेख्यं तु द्विविधं ज्ञेयं स्वहस्तान्यकृतं तथा। असाक्षिम
त्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोरिति। तत्र अन्यकृतमाह। यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परं। लेख्यं तु साक्षिमत्का
र्य्यं तस्मिन्धनिकपूर्वकं। धनिकाधमर्णयोः योर्थो हिरण्यादिः परस्परं स्वरुच्या इयता कालेनैतावद्देयमियती च प्रतिमा
सं वृद्धिरिति निष्णातो व्यवस्थितस्तस्मिन्नर्थे कालांतरेपि विप्रतिपत्तौ वस्तुतत्वनिर्णयार्थं लेख्यं साक्षिमदुक्तलक्षणसा
क्षियुक्तं। धनिकः पूर्वको यस्मिंस्तद्धनिकपूर्वकं धनिकनाम लेखनपूर्वमिति यावत्कार्य्यं कर्त्तव्यं उक्तलक्षणाः साक्षिणो
वा कर्त्तव्याः। कर्त्तानुयत्कृतं कार्य्यं सिद्ध्यर्थं तस्य साक्षिणः॥ प्रवर्त्तते विवादे पुस्तकृतं वाथ लेख्यकमिति स्मरणात्। अपि
च॥ समामासतदर्द्धाहर्नामजातिस्वगोत्रकैः सब्रह्मचारिकात्मीयपितृनामादिचिह्नितं। समा संवत्सरः मासः श्चैत्रादिः
तदर्द्धं पक्षः शुक्लः कृष्णो वा ऽहस्तिथिः प्रतिपदादिः नाम धनिकाधमर्णिकयोः जाति ब्राह्मणत्वादिः स्वगोत्रं वासिष्ठा

द्विगोत्रं वर्णैः समाद्विभिश्चिह्नितं। तथा। सब्रह्मचारिकं बह्वृचादित्वात्स्वात्मप्रयुक्तं गुणनाम बह्वृचः कठ इति आत्मीयपितृ
५१ नाम धनिकर्णिकपितृनाम आदिग्रहणात्तद्द्रव्यजातिसंख्याधारादेर्ग्रहणं तैश्चिह्नितं लेख्यं कार्य्यमिति गतेनसं
बंधः। समाप्तेर्थे ऋणी नाम स्वहस्तेन निवेशयेत्। मतं मेऽमुकपुत्रस्य यदत्रोपरिलेखितं। धनिकाधमर्णयोः योर्थः स्वरूपा
व्यवस्थितः तस्मिन्नर्थे समाप्ते लिखिते ऋणी अधमर्णो नामात्मीयं स्वहस्तेनास्मिन् लेख्ये यदुपरि लेखितं तन्मम अमुक
पुत्रस्य मतमभिप्रेतमिति निवेशयेत् पत्रे लिखेत्॥ ॥तथा साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकं। अत्राहममुकः सा
क्षीति लिखेयुरिति ते समाः। तस्मिन् लेख्ये ये साक्षिणो लिखितास्तेप्यात्मीयपितृनामलेखनपूर्वकमस्मिन्नर्थेऽहममुको
देवदत्तः साक्षीति स्वहस्तेनैकैकशो लिखेयुस्ते च समाः संख्यातो गुणतश्च कर्त्तव्याः। यद्यधमर्णः साक्षी वालिपिज्ञो न
भवति तदाधमर्णोऽन्येन साक्षी च साक्ष्यंतरेण सर्वसाक्षिसंनिधौ स्वमतं लेखयेत्। यथाह नारदः। अलिपिज्ञ ऋणी यः
स्यात्स्वमतं तु स लेखयेत्॥ साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः इति॥ ॥किंच॥ उभयाभ्यर्थितेनैतन्मया ह्यमुकसु
नुना। लिखितं ह्यमुकेनेति लेखकोंऽते ततो लिखेत्। ततो लेखको धनिकर्णिकाभ्याममुमाभ्यां प्रार्थितेन मयाऽमुकेन देवद
त्तेन विष्णुमित्रसूनुनैतल्लेख्यं लिखितमित्यंते लिखेत्॥ ॥संप्रतं स्वकृतं स्वलेख्यमाह। विनापि साक्षिभिर्लेख्यं स्वहस्त ५१

क्षि

लिखितं तु यत्। तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते। यत् लेख्यं स्वहस्तेन लिखितं अधमर्णेन॥ तत्साक्षिभिर्विनाप्र
माणं स्मृतं मन्वादिभिः बलोपधिकृतादृते। बलेन बलात्कारेण उपधिना लोभक्रोधमदभयादिलक्षणेन यत्कृतं तस्मा
द्विना। नारदोप्याह। मत्ताभियुक्तस्त्रीबालबलात्कारकृतं च यत्। तदप्रमाणं लिखितं भयोपधिकृतं तथेति। तच्चैतत्स्व
हस्तकृतं परहस्तकृतं च लेख्यं देशाचारानुसारेण सबंधकव्यवहार अबंधकव्यवहार युक्तमर्थक्रमापरिलोपेन लि
प्यक्षराऽपरिलोपेन च लेख्यमित्येतावन्तपुनः साधकं देशे च। प्रातिस्वकदेशभाषयापि लेखनीयं। यथाह नारदः। दे
शाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणं॥ तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरमिति। विधानं विधिः आधेर्विधिराधी
करणं तस्य लक्षणं गोप्याधिभोग्याधिकालकृतमित्यादि तद्व्यक्तं विस्पष्टं यस्मिंस्तद्व्यक्ताधिविधिलक्षणं। अर्थानां क्र
मः क्रमश्चाक्षराणि च क्रमाक्षराणि। अविलुप्तानि क्रमाक्षराणि यत्र तदविलुप्तक्रमाक्षरं। तदेवंभूतं लिखितं प्रमाणं
। राजशासनवन्न साधकं चास्य नियमोत्रेत्यभिप्रायः॥ लेख्यप्रसंगेन लेख्यारूढमप्यृणं त्रिभिरेव देयमित्याह। ऋणं लेख्य
कृतं देयं पुरुषैस्त्रिभिरेव तु। यथा साक्ष्यादिकृतमृणं त्रिभिरेव देयं। तथा लेख्यकृतमप्याहर्त्तत्पुत्रतत्पुत्रैस्त्रिभिरेव देयं। न
चतुर्थ्यादिभिरिति नियम्यते। ननु पुत्रपौत्रैः ऋणं देयं इत्यविशेषेणर्णमात्रं त्रिभिरेव देयमिति नियतमेव। बाढं। अस्यैवा

त्सर्गस्य पत्रारूढर्णविषये सत्स्वेतरप्रभवामपवादशंकामपनेतुमिदं वचनमारब्धं॥ तथाहि। पत्रलक्षणमभिधाय
५२ कात्यायनेनाभिहितं। एवं कालमतिक्रांतं पितृणं दाप्यते ऋणमिति इत्थं पत्रारूढमृणमतिक्रांतकालमपि पितृणं
संबंधि दाप्यते॥ अत्र पितृणामिति बहुवचननिर्देशात्कालमतिक्रांतमिति वचनाच्चतुर्थ्यादिर्दाप्यत इति प्रतीयते। त
थाहारीतेनापि॥ लेख्यं यस्य भवेद्धस्ते लाभं तस्य विनिर्दिशेदिति। अत्रापि यस्य हस्ते पत्रमस्ति तस्यर्णलाभ इति सामान्ये
न चतुर्थ्यादिभ्योप्यृणलाभोप्यस्तीति प्रतीयते। अत एवैतदाशंकानिरासार्थमेतद्वचनमिति युक्तं। वचनद्वये च योगी
श्वरवचनानुसारेण योजनीयं॥ ॥ अस्यापवादमाह। आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते। संबंधकेपि पत्रारू
ढऋणे त्रिभिरेव यद्देयं त्रिभिरिति पितामहादृणापकरणानधिकारे पाध्याहरणेप्यनधिकारप्राप्ताविदमुच्यते। यावच्च
तुर्थेन पंचमेन वा ऋणं न दीयते तावदेवाधिर्भुज्यत इति वदता संबंधकर्णापाकरणे चतुर्थादेरप्यधिकारो दर्शि
तः॥ नन्वेतदप्ययुक्तमेव फलभोग्यो न नश्यतीति। सत्यं। तदप्येतस्मिन्नसत्यपवादवचने पुरुषत्रयविषयमेव स्यादि
ति सर्वमनवद्यं॥ ॥प्रासंगिकं परिसमाप्य प्रकृतमनुसरति। देशांतरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा॥ भिन्ने दग्धेथ श्रीः ५२
वाच्छिन्ने लेख्यमन्यत्तु कारयेत्। व्यवहाराक्षमे पत्रे पत्रांतरं कुर्यादिति विधीयते॥ व्यवहाराक्षमत्वं चास्य तत्र

वहितदेशांतरस्थे पत्रे दुर्लेख्ये दुष्टानि संदिग्धानानार्थानि वा चकारादिवालेख्यानि लिप्यक्षराणि पदानि वा यस्मिंस्तद्दुर्लेख्यं त
नाम्हदि स्मिन् दुर्लेख्ये नष्टे कालवशेन उन्मृष्टे मषीदौर्बल्यादिना लिप्यक्षरे हृते तस्करादिना भिन्ने विदलिते दग्धे प्रज्वलिते छिन्ने
द्विधाभूते सति भवति। एतच्चार्थिप्रत्यर्थिनोः परस्परानुमतौ सत्यां॥ विमत्यां तु व्यवहारप्राप्तौ देशांतरस्थपत्रानयनायाध्वा
पेक्षया कालो दातव्यः। दुर्देशावस्थिते नष्टे वा पत्रे साक्षिभिरेव व्यवहारनिर्णयः कार्यः। यथाह नारदः। लेख्ये देशांतरन्य
स्ते शीर्णे दुर्लिखिते हृते। सतस्तत्कालकरणमसतो द्रष्टृदर्शनमिति। सतो विद्यमानस्य पत्रस्य देशांतरस्थस्यानयनाय
कालकरणं कालावधिर्दातव्यः। असतः पुनरविद्यमानस्य पूर्वं ये द्रष्टारः साक्षिणस्तैर्द्वारैर्व्यवहारपरिसमापनं कार्यं। यदा
तु साक्षिणो न संति तदा दिव्येन निर्णयः कार्यः। अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्दिशेदिति स्मरणात्। एतच्च जानपदं व्यव
स्थापत्रं। राजकीयामपि व्यवस्थापत्रमीदृशमेव भवति। इयांस्तु विशेषः। राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचिह्नितं तथा। राजकी
यं स्मृतं लेख्यं सर्वेष्वर्थेषु साक्षिमदिति। तथान्यदपि राजकीयं जयपत्रं वृद्धवसिष्ठेनोक्तं। यथोपन्यस्तसाध्यार्थसंयुक्तं सो
त्तरक्रियं। सावधारणकं चैव जयपत्रकमिष्यते। प्राड्विवाकादिहस्तांकं मुद्रितं राजमुद्रया॥ सिद्धेर्थे वादिने दद्याज्जयिने ज
यपत्रकमिति॥ तथा सभासदोपि मतं मे मुकपुत्रस्येति स्वहस्तं दद्युः सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः। यथाले

५२

ख्यविधौतद्वत्स्वहस्तंदद्युरेवनइतिस्मरणात्।सभासदांचपरस्परानुमतिव्यतिरेकेणनव्यवहारोनिःशल्योभवति।यथा
हनारदः।यत्रसभ्योजनःसर्वःसाध्वेतदितिमन्यते।सनिःशल्योविवादःस्यात्सशल्यस्त्वन्यथाभवेदिति।एतच्चतुष्पाद्व्य
वहारएव।साधयेत्साध्यमर्थंयच्चतुष्पादान्वितंचयत्।राजमुद्रांकितंचैवजयपत्रकमिष्यतइतिस्मरणात्।यत्रतुहीन
तायथा।अन्यवादीक्रियाद्वेषीनोपस्थातानिरुत्तरः।आहूतःप्रपलायीचहीनःपंचविधःस्मृतइति।तत्रनजयपत्रक
मस्तिअपितुहीनपत्रमेव॥तच्चकालांतरेदंडप्राप्त्यर्थं।जयपत्रंतुप्राङ्न्यायविधिसिद्ध्यर्थमितिविशेषः॥ ॥लेख्यसंदेहे
निर्णयनिमित्तान्याह।संदिग्धलेख्यशुद्धिःस्यात्स्वहस्तलिखितादिभिः।युक्तिप्राप्तिक्रियाचिह्नसंबंधागमहेतुभिः।
शुद्धमशुद्धंचेतिसंदिग्धस्यलेख्यस्यशुद्धिःस्वहस्तलिखितादिभिःस्यात्।स्वहस्तेनलिखितंयल्लेख्यांतरंतेनशुद्धि
र्यदिसदृशान्यक्षराणिभवंतितदाशुद्धिःस्यादित्यर्थः।आदिशब्दात्साक्षिलेखकस्वहस्तलिखितांतरसंवादाच्छुद्धि
रिति।युक्तप्राप्तिर्युक्तिप्राप्तिः।देशकालपुरुषाणांद्रव्येणसहसंबंधःप्राप्तिः।अस्मिन्देशेअस्मिन्कालेस्यपुरुषस्ये
दंद्रव्यंघटतइतियुक्तिप्राप्तिः।क्रियातत्साक्ष्युपन्यासः।चिह्नंअसाधारणंश्रीकारादि।संबंधःअर्थिप्रत्यर्थिनोःपू
र्वमपिपरस्परविश्वासेनदानग्रहणादिसंबंधः।आगमोस्यैतावतोर्थस्यसंभावितप्राप्त्युपायः।एतएवहेतवः।ए

Dr. BHAU DAJI MEMORIAL

भिर्हेतुभिःसंदिग्धलेख्यस्यशुद्धिःस्यादित्यन्वयः।यदातुलेख्यसंदेहेनिर्णयोनजायतेतदासाक्षिभिर्निर्णयःकार्यः।
यथाहकात्यायनः।दूषितेपत्रकेवादीतदारूढांस्तुनिर्दिशेदिति।साक्ष्यसंभवविषयंतु।हारीतवचनं।नमयैतत्कृतंपत्रं
कूटमेतेनकारितं।अधरीकृत्यतत्पत्रमर्थदिव्येननिर्णयइति।एवंशोधितेपत्रेऋणेचदातव्येप्राप्ते।यदाकृत्स्नमेव
र्णोदातुमसमर्थस्तदाकिंकर्तव्यमित्यतआह॥लेख्यस्यपृष्ठेभिलिखेद्दत्वादत्वर्णिकोधनं।धनीवोपगतंदद्या
त्स्वहस्तपरिचिह्नितं।यदाधमर्णिकःसर्वमेवर्णंदातुमसमर्थस्तदाशक्त्यनुसारेणदत्वापूर्वकृतस्यलेख्यस्यपृष्ठेभि
लिखेदेतावन्मयादत्तमिति।उत्तमर्णोवाउपगतंप्राप्तंधनंतस्यैवलेख्यस्यपृष्ठेदद्यात्अभिलिखेदेतावन्मयाल
ब्धमिति।कथंस्वहस्तपरिचिह्नितंस्वहस्तलिखिताक्षरचिह्नितं॥यद्वोपगतंप्रवेशपत्रंस्वहस्तलिखितचिह्नितम
धमर्णायोत्तमर्णोदद्यात्।ऋणेतुकृत्स्नेदत्तेलेख्यंकिंकर्तव्यमित्यतआह॥दत्वर्णंपाटयेल्लेख्यंशुद्ध्यैवान्यत्तुका
रयेत्॥क्रमेणसकृदेववाकृत्स्नमृणंदत्वापूर्वकृतंलेख्यंपाटयेत्।यदातुदुर्गदेशावस्थितंलेख्यंनष्टंवातदाशुद्ध्यै
अधमर्णत्वनिवृत्त्यर्थमन्यल्लेख्यंकारयेदुत्तमर्णअधमर्णःपूर्वोक्तक्रमेणोत्तमर्णोविशुद्धिपत्रमधमर्णायद
द्यादित्यर्थः॥ससाक्षिकेऋणेकृत्स्नेदातव्येकिंकर्तव्यमित्यतआह॥साक्षिमच्चभवेद्यद्वातद्दातव्यंससाक्षिकं॥

३

यत्तु ससाक्षिकमृणं तत्पूर्वसाक्षिसमक्षमेव दद्यात् इति लेख्यप्रकरणं॥ ॥लिखितसाक्षिभुक्तिलक्षणं त्रिविधं मा
५४ नुषंप्रमाणमुक्तमथावसरप्राप्तं दिव्यं प्रमाणमभिधास्यन् तुलाग्न्यापइत्यादिभिरष्टभिः पंचभिः श्लोकैर्दिव्यमातृकां क
थयति तत्र तावद्दिव्यान्युद्दिशति। तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये। तुलादीनि कोशांतानि पंच दिव्यानी
ह धर्मशास्त्रे विशुद्धये संदिग्धस्यार्थस्य संदेहनिवृत्तये दातव्यानि॥ नन्वन्यान्यपि तंडुलादीनि दिव्यानि संति। धटो
ग्निरुदकं चैव विषं कोशस्तथैव च। तंडुलाश्चैव दिव्यानि सप्तमस्तप्तमाषक इति पितामहस्मरणात्। अतः कथमेतावंत्ये
वेत्यत आह। महाभियोगेष्वेतान्यत्रेति नियम्यते। न पुनरिमान्येव दिव्यानीति। महत्त्वावधिं च वक्ष्यति नन्वल्पाभि
योगेपि कोशोस्त्येव॥ कोशमल्पेपि दापयेदिति स्मरणात्॥ सत्यं कोशस्य तुलादिषु पाठो न महाभियोगेष्वेवेति नियमा
दं३। र्थः किंतु सावष्टंभाभियोगेपि प्राप्त्यर्थः अन्यथा शंकाभियोग एव स्यात्। अवष्टंभाभियुक्तानां धटादीनि विनिर्दिशेत्। तं
डुलाश्चैव कोशश्च शंकास्वेव न संशय इति स्मरणात्॥ महाभियोगेषु शंकितेषु सावष्टंभेषु चाविशेषेण प्राप्तावपवादमा
ह॥ शीर्षकस्थेभियोक्तरि। एतानि तुलादीन्यभियोक्तरि शीर्षकस्थे भियुक्तस्य भवंति शीर्षकं शिरो व्यवहारस्य चतुर्थः पा
रणस्तेनचरं दो जयपराजयलक्ष्यते। तत्र तिष्ठतीति शीर्षकस्थः तत्प्रयुक्तदंडभागीत्यर्थः। ततोर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाध ५४
श्चौल

महाभियोगेष्वेतानि॥८

नमिति भावप्रतिज्ञावादिन एव क्रियेति व्यवस्था दर्शिता। तदपवादार्थमाह॥ रुच्या वान्यतरः कुर्यादितरो वर्तयेच्छि
रः॥ रुच्याभियोक्त्रभियुक्तयोः परस्परसंप्रतिपत्त्यान्यतरो भियुक्तोभियोक्ता वा दिव्यं कुर्यादितरोभियुक्तः॥ शिरः शारी
रमर्थदंडं वा वर्तयेदंगीकुर्यात्। अयमभिसंधिः। न मानुषप्रमाणवद्दिव्यप्रमाणं भावैकगोचरं॥ अपि तु भावाभाववि
शेषेण गोचरयति॥ अतश्च मिथ्योत्तरे प्रत्यवस्कंदे प्राङ्न्याये वार्थिप्रत्यर्थिनोरन्यतरस्येच्छया दिव्यं भवतीति। अल्पा
भियोगे महाभियोगे शंकासावष्टंभयोरपि अविशेषेण कोशो भवतीत्युक्तं। तुलादीनि विषांतानि तु महाभियोगेष्वेव
सावष्टंभेष्वेवेति च नियमो दर्शितस्तत्रावष्टंभाभियोगेष्वेवेत्यस्यापवादमाह। विनापि शीर्षकात् कुर्यान्नृपद्रोहेथ पा
तके। राजद्रोहाभिशंकायां ब्रह्महत्यादिपातकाभिशंकायां च। शिरःस्थायिनोपि तुलादीनि कुर्यात्। महाभियोगे म विना
हाचौर्याभिशंकायां च॥ यथाह॥ राजभिः शंकितानां च निर्दिष्टानां च दस्युभिः। आत्मशुद्धिपराणां च दिव्यं देयं शि
रो विनेति। तंडुला पुनरल्पचौर्याभिशंकायामेव। चौर्ये तु तंडुला देया नान्यत्रेति विनिश्चय इति पितामहवचनात्। त
प्तमाषस्तु महाचौर्याभिशंकायां॥ चौर्ये शंकाभियुक्तानां तप्तमाषो विधीयत इति स्मरणात्। अन्येपुनः शपथा अल्पा
र्थविषयाः। सत्यवाहनशस्त्राणि गोबीजकनकानि च। देवतापितृपादांश्च दत्तानि सुकृतानि च। स्पृशेच्छिरांसि पुत्रा

णां दारुणानां सुहृदां तथा। अभियोगेषु सर्वेषु कोशपानमथापि वा। इत्येते शपथाः प्रोक्ता मनुना स्वल्पकारणे इति ना
५५ दि रदस्मरणात्॥ यद्यपि मानुषप्रमाणानां निर्णयस्य निर्णायकं। यत्तद्दिव्यमिति लोकप्रसिद्ध्या शपथानामपि दिव्यत्वं त
थापि कालान्तरनिर्णयनिमित्तत्वेन समनन्तरनिर्णयनिमित्तेभ्यो धटादिभ्यो दिव्येभ्यो भेदेन व्यपदेशो ब्राह्मणपरिव्रा
जकवत्। कोशस्य तु शपथत्वेऽपि धटादिषु पाठो महाभियोगविषयत्वेनावष्टम्भाभियोगविषयत्वेन च धटादिसाम्यात्
तु समनन्तरनिर्णयनिमित्तत्वेन॥ तण्डुलानां तप्तमाषस्य च समनन्तरनिर्णयनिमित्तत्वेऽप्यल्पविषयत्वेन शङ्काविषयत्वेन
च धटादिवैलक्षण्यात् शपथा इति सन्तोष्टव्यं। एतानि च दिव्यानि शपथाश्च यथासम्भवमृणादिषु विवादेषु प्रयोक्तव्यानि·
यच्च पितामहवचनं। स्थावरेषु विवादेषु दिव्यानि परिवर्जयेदिति। तदपि लिखितसामन्तादिसद्भावे दिव्यानि परिवर्जये
दिति व्याख्येयं। ननु विवादान्तरेष्वपि प्रमाणान्तरसद्भावे दिव्यानामनवकाश एव॥ सत्यं॥ ऋणादिषु विवादेषु उक्तलक्षण
साक्ष्युपन्यासे अर्थिना कृतेऽपि प्रत्यर्थी यदि दण्डाभ्युपगमावष्टम्भेन दिव्यमवलम्बते॥ तदा दिव्यमपि भवति। साक्षिणामा
न्यायदोषसंभवाद्दिव्यस्य च निर्दोषत्वेन वस्तुतत्त्वविषयत्वात् तल्लक्षणत्वाच्च धर्मस्य। यथाह नारदः। तत्र सत्ये स्थितो धर्मो ५५
व्यवहारस्तु साक्षिणि। दैवसाध्ये पौरुषेयीं न लेख्यं वा प्रयोजयेदिति। स्थावरेषु तु विवादेषु प्रत्यर्थिना दण्डावष्टम्भे

वस्तुतत्त्वं

न दिव्यावलम्बने कृतेऽपि सामन्तादिदृष्टप्रमाणसद्भावे न दिव्यं ग्राह्यमिति विकल्पनिराकरणार्थं स्थावरेषु विवादेषु इत्या
दि पितामहवचनं नात्यन्तिकदिव्यनिराकरणार्थं लिखितसामन्ताद्यभावे स्थावरविवादेष्वनिर्णयप्रसङ्गात्॥ ॥किञ्च॥ स
चेलं स्नातमाहूय सूर्योदय उपोषितं। कारयेत् सर्वदिव्यानि नृपब्राह्मणसन्निधौ॥ पूर्वेद्युरुपोषितमुदिते सूर्ये सचेलं
स्नातं दिव्यग्राहिणमाहूय नृपस्य सभ्यानां च ब्राह्मणानां सन्निधौ सर्वाणि दिव्यानि कारयेत् प्राड्विवाकः॥ त्रिरात्रोपो
षिताः स्युरेकरात्रोषिता यथा। नित्यं दिव्यानि देयानि शुचये चार्द्रवासस इत्युपवासविकल्पः पितामहेनोक्तः। बलवद
बलवन्महाकार्य्याल्पकार्य्यविषयत्वेन व्यवस्थितो द्रष्टव्यः। उपवासनियमश्च कारयितुः प्राड्विवाकस्यापि। दिव्येषु
सर्वकार्य्याणि प्राड्विवाकः समाचरेत्। अध्वरेषु यथाध्वर्युः सोपवासो नृपाज्ञयेति पितामहवचनात्। अत्र यद्यपि
सूर्योदय इत्यविशेषेणोक्तं तथापि शिष्टसमाचाराद्भानुवारे दिव्यानि देयानि। तत्रापि पूर्वाह्णेऽग्निपरीक्षा स्यात् पूर्वा
ह्णे च धटो भवेत्। मध्याह्ने तु जलं देयं धर्म्मतत्त्वमभीप्सता॥ दिवसस्य तु पूर्वाह्णे कोशशुद्धिर्विधीयते। रात्रौ तु पश्चिमे या
मे विषं देयं सुशीतले। इति पितामहोक्तो विशेषो द्रष्टव्यः। अनुक्तवेलाविशेषाणां तण्डुलतप्तमाषप्रभृतीनां पूर्वाह्ण
एव प्रदानं पूर्वाह्णे सर्वदिव्यानां प्रदानं परिकीर्त्तितमिति सामान्येन नारदस्मरणात्। अहनि त्रिधा विभक्ते पूर्वो भागः

५६ पूर्वाह्णो मध्यमो मध्याह्न उत्तमो पराह्णः॥ तथा परोपि कालविशेषो विधिप्रतिषेधमुखेनोक्तः। विधिमुखस्तावत्।
अग्नेः शिशिरहेमंतौ वर्षाश्चैव प्रकीर्तितः। शरद्ग्रीष्मे तु सलिलं हेमंते शिशिरे विषं। चैत्रो मार्गशिरश्चैव वैशाखश्च ख
तथैव च। एते साधारणा मासा दिव्यानामविरोधिनः। कोशस्तु सर्वदा देयः तुला स्यात्सार्वकालिकी। कोशग्र
हणं सर्वशपथानामुपलक्षणं। तुलाया अपि पुनर्विशेषानभिधानात्सार्वकालिकत्वं॥ प्रतिषेधमुखोपि। न शीते तो
ये शुद्धिः स्यान्नोष्णकालेग्निशोधनं। न प्रावृषि विषं दद्यात्प्रवाते न तुलां तथा। नापराह्णे न संध्यायां न मध्याह्ने
कदाचनेति। न शीते तोये शुद्धिः स्यादित्यत्र शीतशब्देन हेमंतशिशिरवर्षाणां ग्रहणं। नोष्णकाले अग्निशोधनमित्य
त्र उष्णकालशब्देन वसंतग्रीष्मशरदोः विधानलब्धस्यापि पुनर्निषेध आदरार्थः। प्रयोजनं तु वक्ष्यते॥ ॥अधिकारव्यवस्था
माह। तुला स्त्रीबालवृद्धांधपंगुब्राह्मणरोगिणां। अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा। स्त्री स्त्रीमात्रं। जातिवयोवस्था
विशेषानादरेण। बाल आषोडशाद्वर्षात् जातिविशेषानादरेण। वृद्धोशीतिकावरः। अंधो नेत्रविकलः। पंगुः पादविकलः। ब्राह्म
णो जातिमात्रं। रोगी व्याधितः। एतेषां शोधनार्थं तुलैवेति नियम्यते। अग्निः फालः सप्तमाषश्च क्षत्रियस्य। जलमेव वैश्य ५६
स्य। वा शब्दो व्यवधारणे विषस्य यवा उक्तपरिमाणाः सप्तैव शूद्रस्य शोधनार्थं भवंति। ब्राह्मणस्य तुलाविधानात्॥ शूद्रस्य

यवाः सप्त विषस्येति विधानादग्निर्जलं वेति क्षत्रियवैश्यविषयं युक्तं। एतदेव स्पष्टीकृतं पितामहेन। ब्राह्मणस्य धटो देयः क्ष
त्रियस्य हुताशनः। वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेदिति। यत्तु स्त्र्यादीनां दिव्याभावस्मरणं। सव्रतानां भृशार्तानां
व्याधितानां तपस्विनां। स्त्रीणां च न भवेद्दिव्यं यदि धर्मस्त्वपेक्ष्यत इति। तदुभया चान्यतरः कुर्यादिति विकल्पनिवृत्त्यर्थम्।
एतदुक्तं भवति। अवश्यंभाविभियोगेषु स्त्र्यादीनामभियोक्तृत्वे नियोज्यानामेव दिव्यमेतेषामभियोज्यत्वेप्यभियोक्तृणा
मेव दिव्यं। परस्पराभियोगे तु विकल्प एव। तत्रापि तुलैवेत्यनेन नियम्यते। तथा महापातकादिशंकाभियोगे स्त्र्यादीनां
तुलैवेति॥ एतच्च वचनं सर्वदिव्यसाधारणेषु मार्गशीर्षचैत्रवैशाखेषु स्त्र्यादीनां सर्वदिव्यसमवधाने नियामकतया ब
ऽर्थवत् न च सर्वकालं स्त्रीणां तुलैवेति॥ स्त्रीणां तु न विषं प्रोक्तं न चापि सलिलं स्मृतं। धटकोशादिभिस्तासामंतस्तत्त्वं विचा
रयेदिति। विषसलिलव्यतिरिक्तधटकोशाग्न्यादिभिः शुद्धिविधानात्। एवं बालादिष्वपि योजनीयं। तथा ब्राह्मणादीना
मपि न सार्वकालिकस्तुलादिनियमः। सर्वेषामेव वर्णानां कोशशुद्धिर्विधीयते। सर्वाण्येतानि सर्वेषां ब्राह्मणस्य विषं वि
नेति पितामहस्मरणात्। तस्मात्साधारणे काले बहुदिव्यसमवधाने तुलादिनियमार्थमेवेदं वचनं। कालांतरे तु तत्काल
विहितं सर्वेषां। तथा हि वर्षास्वग्निरेव सर्वेषां॥ हेमंतशिशिरयोस्तु क्षत्रियादित्रयाणामग्निविषयोर्विकल्पः। ब्राह्मणस्य

त्वग्निरेवनकदाचनविषं। ब्राह्मणस्यविषंविनेति प्रतिषेधात्। ग्रीष्मशरदोस्तु सलिलमेव। येषां तु व्याधिविशेषेणाग्न्या
५७ दितिनिषेधः॥ कुष्ठीनां वर्जयेदग्निं सलिलं श्वासकासिनां। पित्तश्लेष्मवतां नित्यं विषं तु परिवर्जयेदिति। तेषामग्न्यादि
कालेपि साधारणं तुलाद्येव दिव्यं भवति। तथा। तोयमग्निर्विषं चैव दातव्यं बलिनां नृणां। इति वचनाद्दुर्बलानामपि
सर्वथा विधिप्रतिषेधादुक्तकालानतिक्रमेण जातिवयोवस्थाश्रितानि दिव्यानि देयानि॥ महाभियोगेष्वेतानीत्यु
क्तं। तत्राभियोगस्य यदपेक्ष्यं महत्त्वं तदिदानीमाह। नासहस्राद्धरेत्फालं न विषं न तुलां तथा। पणसहस्रादर्वाक्फा
लं विषं तुलां न कारयेत्॥ मध्यवर्जितजलमपि। यथोक्तं। तुलादीनि विषान्तानि गुरुष्वर्थेषु दापयेदिति। अत्र कोशस्या
ग्रहणं। कोशमल्पेपि दापयेदिति स्वल्पाभियोगेपि तस्य स्मरणात्। एतानि चत्वारि दिव्यानि पणसहस्रादूर्ध्वमेव भ
वंति॥ नार्वागित्यस्यार्थः। नन्वर्वागप्यग्न्यादीनि पितामहेन दर्शितानि। सहस्रे तु धटं दद्यात्सहस्रार्द्धे तथायसं। अ
र्धस्यार्द्धे तु सलिलं तस्यार्द्धे तु विषं स्मृतमिति। सत्यं। तत्रेत्थं व्यवस्था॥ यद्द्रव्यापहारे पातित्यं भवति तद्विषयं पि
तामहवचनमितरद्द्रव्यविषयं योगीश्वरवचनमिति। एतच्च वचनद्वयं स्तेयसाहसविषयं। अपह्नवे तु विशे
षो दर्शितः कात्यायनेन। दत्तस्यापह्नवो यत्र प्रमाणं तत्र कल्पयेत्। स्तेयसाहसयोर्दिव्यं स्वल्पेप्यर्थे प्रकल्पयेत्। ५७

सर्वद्रव्यप्रमाणं तु ज्ञात्वा हेम प्रकल्पयेत्। हेमप्रमाणयुक्तं तु तदा दिव्यं नियोजयेत्। ज्ञात्वा संख्यां सुवर्णानां शतनाशे विषं
विस्मृतं। अशीतेस्तु विनाशे वै दद्याच्चैव हुताशनं। षष्ट्या नाशे जलं देयं चत्वारिंशति वै धटं। विंशद्दशविनाशे तु कोश
पानं विधीयते। पंचाधिकस्य वा नाशे ततोर्द्धार्द्धस्य तंडुलाः। ततोर्द्धार्द्धविनाशे हि स्पृशेत्पुत्रस्य मस्तकं। ततोर्द्धार्द्धविनाशे दि
तु लौकिक्यश्च क्रियाः स्मृताः। एवं विचारयन् राजा धर्मार्थाभ्यां न हीयते इति। ज्ञात्वा संख्यां सुवर्णानामित्यत्र सुवर्णश
ब्दः षोडशमाषाः सुवर्ण इत्युक्तप्रमाणवचनः नाशशब्दश्चापह्नववचनः॥ नासहस्रादित्यत्र तु ताम्रिकपणसहस्रं
बोद्धव्यं। ननु नृपद्रोहे पातके च एतानि दिव्यान्युक्तानि तत्कथं नासहस्राद्धरेत्फालमित्युच्यत आह। नृपार्थेष्वभिशापे च व
हेयुः शुचयः सदा। नृपद्रोहेषु महापातकाभियोगे च सदा द्रव्यसंख्यामनपेक्ष्यैव एतानि दिव्यानि कुर्युरुपवासादिना शु
चयः संतः। तथा देशविशेषोपि नारदेनोक्तः। सभाराजकुलद्वारे देवायतनचत्वरे। निधेयो निश्चलः पूज्यो धूपमाल्या
नुलेपनैरिति॥ निधेयः इत्थं व्यवस्था च कात्यायनेनोक्ता। इंद्रस्थाने अभिशस्तानां महापातकिनां नृणां। नृपद्रोहे प्रवृत्ता
नां राजद्वारे प्रयोजयेत्। प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे। अतोन्येषु सभामध्ये [redacted] विदुर्बुधाः। अस्पृश्या
धमदासानां म्लेच्छानां पापकारिणां। प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि। तत्र सिद्धानि दिव्यानि संशयेतेषु निर्दि

तुकार्येषु

५८ ञो दिनि॥ ॥इति दिव्यमातृका॥ एवं सर्वदिव्योपयोगिनीं दिव्यमातृकामभिधायेदानीं धटादिदिव्यानां प्रयोगमाह। तुला उपनी दिवे नियमं
धारणविद्वद्भिरभियुक्तस्तुलाश्रितः। प्रतिमानसमीभूतो रेखां कृत्वावतारितः। त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता। तत्सत्यं
वद कल्याणि संशयान्मां विमोचय। यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय। शुद्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमंत्रये
त्। तुलाधारणं तोलनं ये विदंति सुवर्णकारप्रभृतयस्तैः प्रतिमानेन मृदादिना समीभूतः समीकृतः स्तुलामाश्रितो
धिरूढोऽभियुक्तोऽभियोक्ता वा दिव्यकारी लेखां कृत्वा येन सन्निवेशेन प्रतिमानसमीकरणदशायां शिक्यतले वस्थितस्त
स्मिन्यां तुलेखेनां कयित्वावतारितस्तुलामभिमंत्रयेत् प्रार्थयेतानेन मंत्रेण। हे तुले त्वं सत्यस्य स्थानमसि पुरा आदिसृ
ष्टौ देवैर्हिरण्यगर्भप्रभृतिभिर्विनिर्मिता। तस्मात्सत्यं संदिग्धस्यार्थस्य स्वरूपं वद दर्शय कल्याणि शोभने अस्मात्संशया
न्मां विमोचय। हे मातः यद्यहं पापकृदसत्यवाद्यस्मि ततो मां त्वमधो नय। अथ शुद्धः सत्यवाद्यस्मि ततो मामूर्ध्वं गम
येति। प्राड्विवाकस्य तुलाभिमंत्रणमंत्राः स्मृत्यंतरोक्ताः। अयं तु दिव्यकारिणः। जयपराजयलक्षणं तु मंत्रलिंगादेवा
गम्यते॥ इति न पृथगुक्तं। धटनिर्माणं पुनरारोहणाद्यर्थसिद्धमेव पितामहनारदादिभिः स्पष्टीकृतं। तद्यथा। छित्वा तु ५८
यज्ञियं वृक्षं यूपवन्मंत्रपूर्वकं। प्रणम्य लोकपालेभ्यस्तुला कार्या मनीषिभिः। मंत्रः सौम्यो वानस्पत्यो छेदने जप्य एव च।

DR. BHAU DAJI MEMORIAL

चतुरस्रा तुला कार्या दृढा ऋज्वी तथैव च। कटकानि च देयानि त्रिषु स्थानेषु चार्थवत्। चतुर्हस्ता तुला कार्या पादौ चोप
रि तत्समौ। अंतरं तु तयोर्हस्तौ भवेदध्यर्द्धमेव वा। हस्तद्वयं निखेयं स्यात्पादयोरुभयो[redacted]रपि। तोरणे च तथा कार्ये
पार्श्वयोरुभयोरपि। धटादुच्चतरे स्यातां नित्यं दशभिरंगुलैः। अवलंबौ च कर्तव्यौ तोरणाभ्यामधोमुखौ। मृन्मयौ सूत्रसंब
द्धौ धटमस्तकचुंबिनौ। प्राङ्मुखो निश्चलः कार्यः शुचौ देशे धटस्तथा। शिक्यद्वयं समासज्य पार्श्वयोरुभयोरपि। प्राङ्मुखा
न्कल्पयेद्दर्भाञ्छिक्ययोरुभयोरपि। पश्चिमे तोलयेत्कर्तॄनन्यस्मिन्मृत्तिकां शुभां। पिटकं पूरयेत्तस्मिन्निष्टकाग्रावपां
शुभिः। अत्र च मतिके ष्टकाग्रावपांशुनां विकल्पः। परीक्षका नियोक्तव्यास्तुलामानविशारदाः। वणिजो हेमकाराश्च
कांस्यकारास्तथैव च। कार्यः परीक्षकैर्नित्यमवलंबसमो धटः। उदकं च प्रदातव्यं धटस्योपरि पंडितैः। यस्मिन्न प्लवते तो
यं स विज्ञेयः समो धटः। तोलयित्वा नरं पूर्वं पश्चात्तमवतारयेत्। धटं तु कारयेन्नित्यं पताकाध्वजशोभितं। तत आवाहये
द्देवान्विधिनानेन मंत्रवित्। वादित्रतूर्यघोषैश्च गंधमाल्यानुलेपनैः। प्राङ्मुखः प्रांजलिर्भूत्वा प्राड्विवाकस्ततो ववेत्। दे
एह्येहि भगवन्धर्म दिव्येस्मिंस्त्वं समाविश॥ सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः। आवाह्य तु धटे धर्मं पश्चा
दंगानि विन्यसेत्। इंद्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा। वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा। अग्न्यादिलोकपालं

५९ श्च कोणभागेषु विन्यसेत्। इंद्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः। कुबेरस्तु सुवर्णाभो अग्निश्चापि सुवर्णभः। तथै
व निर्ऋतिः श्यामो वायुर्धूम्रः प्रत्ययस्यते। ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमादिमान्। इंद्रस्य दक्षिणे भागे वसूनाराध
येद्बुधः। धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः। देवेन्द्रेशानयोर्मध्ये
आदित्यानां तथार्चनं। धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा। इंद्रो विवस्वान्पूषा च पर्जन्यो दशमः स्मृतः। तत
स्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः। इत्येते द्वादशादित्या नामभिः परिकीर्त्तिताः। अग्नेः पश्चिमदिग्भागे रुद्राणा
मर्चनं विदुः। वीरभद्रश्च शंभुश्च गिरिशश्च महायशाः। अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः। भुवनाधीश्वरश्चैव
कपाली च विशांपतिः। स्थाणुर्भगश्च भगवान्रुद्रा एकादश स्मृताः। प्रेतेशरक्षोमध्ये तु मातॄस्थानं प्रकल्पयेत्। ब्राह्मी
माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही चैव माहेंद्री चामुंडा गणसंयुता। निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः।
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते। गगनः स्पर्शनो वायुरनिलो मारुतस्तथा। प्राणः प्राणेशजीवौ च मरुतो
ऽष्टौ प्रकीर्त्तिताः। धरस्योत्तरभागे तु दुर्गामावाहयेद्बुधः। एतासां देवतानां तु स्वनाम्ना पूजनं विदुः। भूषावसानं धर्मा ५९
यदत्वा चार्घादिकं क्रमात्। अर्घादि पश्चादंगानां भूषानमुपकल्पयेत्। गंधादिकं निवेद्यांतां परिचर्यां प्रकल्पयेदि

ति। अत्र चतुत्स्कोपनाका ध्वजालंकृतां विधाय तस्यामेह्येहीति मंत्रेण धर्ममावाह्य धर्म्मायार्घं प्रकल्पयामि नमइ
त्यादि प्रयोगेणार्घपाद्याचमनीयमधुपर्काचमनीयस्नानयज्ञोपवीताचमनीयमुकुटकटकादिभूषानं दत्वाइं
द्रादीनां दुर्गांतानां प्रणवाद्यैः स्वनामभिश्चतुर्थ्यंतैर्नमोंतैरर्घादिभूषांतपदार्थाननुसमयेन दत्वा धर्मायगंधपु
ष्पधूपनैवेद्यानि दत्वेंद्रादीनां गंधादीनि पूर्ववद्दद्यात्। गंधपुष्पाणि च घटपूजायां रक्ताणि कार्याणि। यथाह नार
दः। रक्तैर्गंधैश्च माल्यैश्च दध्यपूपाक्षतादिभिः। अर्चयेत्तु घटं पूर्वं ततः शिष्टांश्च पूजयेदिति। इंद्रादीनां तु विशेषा
नभिधानाद्यथालाभं रक्तैरन्यैर्वा पूजनमिति पूजाक्रमः। एतच्च सर्वं प्राड्विवाकः कुर्यात्। यथोक्तं। प्राड्विवाक
स्ततो [redacted] विप्रो वेदवेदांगपारगः। श्रुतवृत्तोपसंपन्नः शांतचित्तो विमत्सरः। सत्यसंधः शुचिर्दक्षः सर्वप्राणिहि
तेरतः। उपोषितः शुद्धवासाः कृतदंतानुधावनः। सर्वासां देवतानां च पूजां कुर्याद्यथाविधि। तथाग्नौ त्विग्भिश्चतुर्भि
श्च तत्सु दिक्षु लौकिकेऽग्नौ होमः कार्यः। यथाह। प्रतिदिक्षु तथा होमः कर्त्तव्यो वेदपारगैः। आज्येन हविषा चैव स
मिद्भिर्होमसाधनैः। सावित्र्या प्रणवेनाथ स्वाहांतेनैव होमयेत्। प्रणवादिकां गायत्रीमुच्चार्य पुनः स्वाहाकारांतप्रण
वमुच्चार्य समिदाज्यचरून्प्रत्येकमष्टोत्तरशतं जुहुयादित्यर्थः। एवं हवनांतां चैव पूजां विधायानंतरमभियुक्तम

६० र्थं वक्ष्यमाणमंत्रसहितं पत्रे लिखित्वा तत्पत्रं शोध्यशिरोगतं कुर्यात्। यथाह। यं चार्थमभियुक्तः स्यात्तं लिखित्वा
तं तु पत्रके। मंत्रेणानेन सहितं तत्कार्यं तु शिरोगतं। मंत्रश्च। आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अ
हश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तमिति। एतच्च धर्मावाहनादिसिद्धौ पत्रारोपणांतमनुष्ठानकांड
सर्वदिव्यसाधारणं। यथोक्तं। इमं मंत्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत्। आवाहनं च देवानां तथैव परिकल्पयेदिति।
अनंतरं प्राड्विवाको धटमामंत्रयेच्चैव विधिनानेन शास्त्रविदिति स्मरणात्। मंत्राश्च दर्शिताः। त्वं धट ब्रह्मणा सृष्टः प
रीक्षार्थं दुरात्मनां। धकाराद्धर्ममूर्त्तिस्त्वं टकारात्कुटिलं नरं। धृतो भावयसे यस्माद्धटस्तेनाभिधीयसे। त्वं वेत्सि सर्वभूता
नां पापानि सुकृतानि च। त्वमेव देव जानीषे न विदुर्यानि मानवाः। व्यवहाराभिशस्तोयं मानुषः शुद्धिमिच्छति। तदेनं संश
यादस्माद्धर्मतस्त्रातुमर्हसीति। शोध्यस्त्वं तुलेत्यादिना पूर्वोक्तेन मंत्रेण तुलामामंत्रयेत्। अनंतरं प्राड्विवाकः शिरोग
तपत्रकं शोध्यं यथासंनिवेशं च धटमारोपयति। पुनरारोपयेत्तस्मिन्स्थिरो व्यवस्थितपत्रकमिति स्मरणात्। आरोपितं च
विनाडीपंचकं यावत्तथैवावस्थापयेत्कालपरीक्षां च ज्योतिःशास्त्राभिज्ञः कुर्यात्। ज्योतिर्विद्ब्राह्मणः श्रेष्ठः कुर्यात् ६०
कालपरीक्षणं। विनाड्यः पंच विज्ञेयाः परीक्ष्याः कालकोविदैरिति स्मरणात्। दशगुर्वक्षरोच्चारणकालः प्राणः षट्

प्राणा विनाडी। उक्तं च। दशगुर्वक्षरः प्राणः षट् प्राणाः स्याद्विनाडिका। तासां षष्ट्या घटी। घटीनां षष्ट्याहोरात्रं खाग्निभि
र्द्विषैर्मासि इति। तस्मिंश्च काले शुद्ध्यशुद्धिपरीक्षणार्थं शुचयः पुरुषा राज्ञा नियोक्तव्याः। ते च शुद्ध्यशुद्धी कथयंति। य
थोक्तं पितामहेन। साक्षिणो ब्राह्मणाः श्रेष्ठा यथादृष्टार्थवादिनः। ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या नृपेण तु।
शंसंति साक्षिणः सर्वे शुद्ध्यशुद्धी नृपे तदेति। शोध्यशुद्धिनिर्णयकारणं चोक्तं। तुलितो यदि वर्द्धेत स शुद्धः स्यान्न संश
यः। समो वा हीयमानो वा न विशुद्धो भवेन्नर इति। यत्तु पितामहवचनं। अल्पदोषः समो ज्ञेयो बहुदोषस्तु हीय
त इति। तत्र यद्यप्यभियुक्तस्यार्थस्याल्पत्वं बहुत्वं च न दिव्येनावधारयितुं शक्यते तथापि सकृदमतिपूर्वत्वेनाल्पत्व
मसकृन्मतिपूर्वत्वेन च महत्त्वमिति दंडप्रायश्चित्ताल्पत्वमहत्त्वमवधार्यते। यदा चानुपलक्ष्यमाणदृष्टकारण एव क
क्ष्यादीनां छेदो भंगो वा भवति। तदाप्यशुद्धिरेव। कक्ष्याच्छेदे तुलाभंगे धटकर्कटयोस्तथा। रज्जुच्छेदेक्षभंगे च तथैवाशुद्धि
मादिशेदिति स्मरणात्। कक्ष्यं शिक्यतलं। कर्कटौ तुलांतयोः शिक्याधारौ विषदृक्का वायसकीलकौ कर्कटशृंगसन्निभौ
।अक्षः पादस्तंभयोरुपरिनिविष्टस्तुलाधारपट्टः। यदा तु दृश्यमानकारणकः एषां भंगस्तदा पुनरारोपयेत्। शिक्यादिच्छे
दभंगेषु पुनरारोपयेन्नरमिति स्मरणात्। ततश्च ऋत्विक्पुरोहिताचार्यान्दक्षिणाभिश्च तोषयेत्। एवं कारयिता राजा भु

६१ त्का भोगान्मनोरमान् महतीं कीर्त्तिमाप्नोति बलमश्वयायकल्पने। यदा तु कलशं घटं तथैव स्थापयितुमिच्छति तदा वाय
साद्युपघातनिरासार्थं कपाटादिसहितां शालां कुर्यात्। विशालामुच्छ्रितां शुभ्रां धवलशालां तु कारयेत्। यत्र स्यो नोप
हन्येत श्वभिश्चांडालवायसैः। तत्रैव लोकपालादीन् सर्वदिक्षु निवेशयेत्। त्रिसंध्यं पूजयेच्चैतान् गंधपुष्पानुलेपनैः। क
पाटबीजसंयुक्तां परिचारैः रक्षितां। मस्तानीयाग्निसंयुक्तामश्वन्यां कारयेन्नपदनिस्मरणात्। बीजानि यावव्रीह्या
दीनि॥ ॥इति घटविधिः॥ ॥इदानीं क्रमप्राप्तमग्निविधिमाह। करौ विमृदितव्रीहेर्लक्षयित्वा ततो न्यसेत्। सप्ताश्व
त्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत्। दिव्यमात्रको साधारणधर्मेषु सत्सु तुलाविधानोक्तधर्म्मावाहनादिभिः
पत्रारोपणांते च विध्यंते सस्य मम अग्निविधौ विशेषः। विमृदितव्रीहेर्विमृदिता विघर्षिता व्रीहयः करांभ्यां येनासौ विमृदि
तव्रीहिः तस्य करौ लक्षयित्वा तिलकालकव्रणकिणादिस्थाने पलक्तकरसादिनांकयित्वा। यथाह नारदः। हस्तक्षतेषु
सर्वेषु कुर्याद्धंसपदानि तु इति। अनंतरं सप्ताश्वत्थपत्राणि हस्तयोरंजलीकृतयोर्न्यसेत्। पत्रैरंजलिमापूर्य आश्वत्थै
स्सप्तभिः समैरिति स्मरणात्। तानि च हस्तसहितानि सूत्रेण तावद्वेष्टयेत्। यावंत्यश्वत्थपत्राणि सप्त कृत्वोपवेष्टयेदित्य ६१
र्थः। सूत्राणि च सप्तसु क्तानि भवंति। वेष्टयीत सितैर्हस्तौ सप्तभिः सूत्रतंतुभिरिति नारदवचनात्। तथा सप्तशमीपत्रा

णि सप्तैव दूर्वापत्राणि चाक्षतांश्च दध्यक्तां ~~काक्षतां~~ श्चाश्वत्थपत्राणामुपरिन्यसेत्। सप्त पिप्पलपत्राणि शमीपत्राण्य
थाक्षतान्। दूर्वायाः सप्तपत्राणि दध्यक्तांश्चाक्षतान्न्यसेदिति स्मरणात्। तथा कुसुमानि च विन्यसेत्। सप्तपिप्पलपत्रा
नं णि अक्षतां सुमनो दधि। हस्तयोर्न्निक्षिपेत्तत्र सूत्रेणावेष्टितं तथेति पितामहवचनात्। सुमनसः पुष्पाणि। यदपि स्म
रणं। अयस्तप्तं तु पाणिभ्यामर्कपत्रैस्तु सप्तभिः। अंतर्हितं हरन्शुद्धस्त्वदग्धः सप्तमे पदे इति॥ तदश्वत्थपत्राभावे र्कप
त्रविषयं वेदितव्यं। अश्वत्थपत्राणां पितामहप्रशंसावचनेन मुख्यत्वावगमात्। पिप्पलाज्जायते वह्निः पिप्पलो वृक्षरा
ट्स्मृतः। अतस्तस्य तु पत्राणि हस्तयोर्निक्षिपेद्बुधः। इति। कर्त्तुरग्न्यभिमंत्रणमाह। त्वमग्ने सर्वभूतानामंतश्चरसि पाव
क। साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम। हे अग्ने त्वं सर्वभूतानां जरायुजांडजस्वेदजोद्भिज्जानामंतः शरीराभ्यंत
मुं रे चरसि उपयुक्तान्नपानादीनां पावकत्वेन वर्त्तसे पावकशुद्धिहेतो कवे क्रांतदर्शिन् साक्षिवत्पुण्यपापेभ्यः सत्यं ब्रूहि। पुण्य
पापेभ्य इति॥ ल्यब्लोपे पंचम्युपसंख्यानं॥ पुण्यपापान्यवेक्ष्य सत्यं ब्रूहि दर्शयेत्यर्थः। अयःपिंडे त्रिभिस्तापैस्तप्ते संदं
शेन पुरत आनीते कर्त्ता पश्चिममंडले प्राङ्मुखस्तिष्ठन्नेनमेव मंत्रेणाग्निमभिमंत्रयेत्। यथाह नारदः। अग्निवर्णमयःपिंडं
सस्फुलिंगं सुरंजितं। तापेत्तृतीये संताप्य ब्रूयात्सत्यपुरस्कृतमिति। अस्यार्थः। लोहशुद्ध्यर्थं। सुतप्तं लोहपिंडमुद्धृके

निक्षिप्य पुनः संताप्योदके निक्षिप्य तृतीये तापे संताप्य संदंशेन गृहीत्वा पुरत आनीते सत्यपुरस्कृतं सत्यशब्दयुक्तं त्वम
६२ ग्ने सर्वभूतानामित्यादिमंत्रं कर्त्ता ब्रूयादिति। प्राड्विवाकस्तु मंडलभूभागाद्दक्षिणप्रदेशे लौकिकमग्निमुपधायाग्न
येपावकाय स्वाहेत्याज्येनाष्टोत्तरशतवारं जुहुयात्। शांत्यर्थं जुहुयादग्नौ घृतमष्टोत्तरं शतमिति स्मरणात्। हुत्वा च त
स्मिन्नग्नावयःपिंडं प्रक्षिप्य तस्मिंस्ताप्यमाने धर्म्मावाहनादि हवनांतं पूर्वोक्तं विधिं विधाय तृतीये तापे वर्त्तमानेऽयः
पिंडस्थमग्निमेभिर्मंत्रैरभिमंत्रयते। त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे। त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनां
। जठरस्थो हि भूतानां त्वं वै वेत्सि शुभाशुभं। पापं पुनासि वै यस्मात्तस्मात्पावक उच्यसे। पापेषु दर्शयात्मानमर्चिष्मा
न्भव पावक। अथवा शुद्धभावेषु शीतो भव हुताशन। त्वमग्ने सर्वभूतानामंतश्चरसि साक्षिवत्। त्वमेव देव जानीषे न वि
दुर्यानि मानुषाः। व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति। तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसीति॥ ॥अपि च॥ तस्ये
त्युक्तवतो लोहं पंचाशत्पलिकं समं॥ अग्निवर्णं न्यसेत्पिंडं हस्तयोरुभयोरपि। तस्य कर्त्तुरित्युक्तवतः त्वमग्ने सर्वभूताना
मित्याद्यभिमंत्रणं कृतवतः लोहं लोहविकारं पिंडं पंचाशत्पलकं पंचाशत्पलसंमितं समं अश्रीरहितं सर्वतश्च समं वृ क्रेण
त्तं श्लक्ष्णं तथाष्टांगुलायामं। अग्निहीनं समं कृत्वा अष्टांगुलमयोमयं। पिंडं तु तापयेदग्नौ पंचाशत्पलकं सममिति वि ६२

तामह स्मरणात्। अग्निवर्णमग्निसदृशमुभयोर्हस्तयोरश्वत्थपत्रदूर्वाद्यंतरितयोर्न्यसेत् निक्षिपेत् प्राड्विवाकः॥
॥ततः किं कुर्यादित्याह। स तमादाय सप्तैव मंडलानि शनैर्व्रजेत्। स पुरुषस्तं तप्तं लोहपिंडमंजलिना गृहीत्वा सप्त म
डलानि शनैर्व्रजेत्। एवकारेण मंडलेष्वेव पदन्यासं मंडलानतिक्रमणं च दर्शयति। यथाह पितामहः। न मंडलमति
क्रामेन्नाप्यर्वाक् स्थापयेत्पदमिति॥ ॥सप्तैव मंडलानि शनैर्व्रजेदित्युक्तं तत्रैकैकं मंडलं किं प्रमाणकं मंडलयो
रंतरं च किं यत्प्रमाणकमित्यत आह। षोडशांगुलकं ज्ञेयं मंडलं तावदंतरं। षोडश अंगुलानि यस्य तत्षोडशांगुलकं
षोडशांगुलप्रमाणं मंडलं बोद्धव्यं मंडलयोरंतरं च तावदेव। षोडशांगुलकमेव। सप्त मंडलानि व्रजेदिति वदता प्र
थममवस्थानमंडलं कैमेकमुक्तमतश्चाष्टमंडलानि षोडशांगुलकानि मंडलांतरालानि तु सप्त तावत्प्रमाणानि। ए
तदेव नारदेन परिसंख्यातोक्तं। द्वात्रिंशदंगुलं प्राहुर्म्मंडलान्मंडलांतरं। अष्टाभिर्मंडलैरेवमंगुलानां शतद्वयं चत्वा
रिंशत्समधिकं भूमेरंगुलमानतः इति। अयमर्थः। अवस्थानमंडलात्षोडशांगुलान्मंडलांतरमन्यन्मंडलं द्वितीया
द्येकमेकं द्वात्रिंशदंगुलसांतरालं तदेवमवस्थानमंडलं षोडशांगुलं गंतव्यानि च सप्त मंडलानि सांतरालानि द्वात्रिं
शदंगुलानि एवमष्टाभिर्मंडलैश्चत्वारिंशदधिकं शतद्वयं भूमेरंगुलमानतोऽङ्गुलमानमिति। सार्वविभक्तिक

६३ स्तस्रिः। अस्मिंस्तु पक्षे नवस्थानमंडले षोडशांगुलं विभाय द्वात्रिंशदंगुलप्रमाणानां सप्तानां सांतरालमंडलं भूभागा-
नामेकमेकं भूभागं द्विधा विभज्यांतरालभूभागान् षोडशांगुलप्रमाणान्विहाय मंडलभूभागेषु षोडशांगुलप्रमा-
णेषु गंतृपदप्रमाणानि सप्त मंडलानि कार्याणि। यथानेनैवोक्तं। मंडलस्य प्रमाणं तु कुर्यात्स्वपदसंमितमिति।
पत्तु पितामहेनोक्तं। कारयेन्मंडलान्यष्टौ पुरस्तान्नवमं तथा॥ आग्नेयं मंडलं चाद्यं द्वितीयं वारुणं स्मृतं। तृतीयं वा-
युदैवत्यं चतुर्थं यमदैवतं। पंचमं त्विंद्रदैवत्यं षष्ठं कौबेरमुच्यते। सप्तमं सोमदैवत्यं सावित्रं त्वष्टमं तथा॥ नवमं स-
र्वदैवत्यमिति दिव्यविदो विदुः। द्वात्रिंशदंगुलं प्राकुर्म्मंडलान्मंडलांतरं। अष्टाभिर्मंडलैरेवमंगुलानां शतद्वयं ष-
ट्पंचाशत्समधिकं भूमेस्तु परिकल्पना। कर्तुः पदसमं कार्यं मंडलं तु प्रमाणतः। मंडले मंडले देयाः कुशाः शास्त्रप्रचो-
दिताः॥ इति। तत्र नवमं सर्वदैवत्यमपरिमितांगुलप्रमाणं मंडलं विहायाष्टाभिर्मंडलैश्चाष्टाभिश्चांतरालैः प्रत्येकं
त्रोडुशांगुलप्रमाणैरंगुलानां षट्पंचाशदधिकं शतद्वयं संपद्यते। तत्रापि गंतव्यानि सप्तैव मंडलानि। यतः। प्रथमे
तिष्ठति नवमे क्षिपति इति न विरुध्यते। अंगुलप्रमाणं च। तिर्यग्यवोदराण्यष्टौ ऊर्ध्वा वा व्रीहयस्त्रयः। प्रमाणमंगुलस्योक्तं ६३
वितस्तिर्द्वादशांगुलः। हस्तो वितस्तिद्वितयं दंडो हस्तचतुष्टयं। तत्सहस्रद्वयं क्रोशो योजनं तच्चतुष्टयमिति बोद्धव्यं॥

MEMORIAL

सप्तमंडलानि गत्वा किं कर्तव्यमित्यत आह। मुक्त्वाग्निं मदितव्रीहिरदग्धः शुद्धिमाप्नुयात्। अष्टमे मंडले स्थित्वा नवमे मंड-
लेऽग्निस्तप्तमयः पिंडं त्यक्त्वा व्रीहीन्कराभ्यां मर्दयित्वा अदग्धहस्तश्चेच्छुद्धिमाप्नुयात्। दग्धहस्तश्चेदशुद्ध इति अर्थ-
सिद्धं। यस्तु संत्रासात्प्रस्खलन् हस्ताभ्यामन्यत्र दस्यतेनयाप्यशुद्धो न भवति। यथाह कात्यायनः। प्रस्खलन्नभियुक्तस्तेद् श्चे
स्थानादन्यत्र दह्यते। अदग्धं तं विदुर्देवास्तस्य भूयोऽपि दापयेदिति। अंतरापतिते पिंडे संदेहे वा पुनर्हरेत्। यदागच्छतोंतराऽ-
ष्टममंडलादर्वागेव पिंडः पतति। दग्धादग्धत्वे वा संशयस्तदा पुनर्हरेदित्यर्थः प्राप्तमुक्तं। तत्र चामनुष्ठानक्रमः। पूर्वेद्युः य
भूशुद्धिं विधायापरेद्युः मंडलानि यथाशास्त्रं निर्माय मंडलाधिदेवताश्च तत्र तत्र संपूज्य अग्निमुपसमाधाय शांतिहो-
मं निर्वर्त्याग्नावयःपिंडं निधाय धर्मावाहनादि सर्वदेवतापूजावाहनांतां निवर्त्य पोषितः स्नातस्यार्द्रवाससः प्रथमे
मंडले तिष्ठतो व्रीहिमर्दनादिकरसंस्कारं विधाय प्रतिज्ञापत्रकं समंत्रकं कर्तुः शिरसि बध्वा प्राड्विवाकस्तृतीयेनापेऽ
ग्निमभिमंत्र्य तप्तमयःपिंडं संदंशेन गृहीत्वा कर्त्रभिमंत्रितं तस्यांजलौ निदध्यात्। सोऽपि मंडलानि सप्त गत्वा नवमे मंड-
ले प्रक्षिप्यादग्धः शुद्धो भवतीति॥ ॥इत्यग्निविधिः॥ संप्रत्युदकविधिमाह। सत्येन माभिरक्ष त्वं वरुणेत्यभिशाप्य कं।
नाभिदघ्नोदकस्थस्य गृहीत्वोरू दकं विशेत्। हे वरुण सत्येन मामभिरक्ष त्वमित्यनेन मंत्रेण कमुदकमभिशाप्याभिमं

६४ स्य नाभिदघ्नोदकस्य स्थनाभिप्रमाणोदस्थितस्य पुरुषस्योरू गृहीत्वा तूर्णो ध्यो जलं प्रविश्यान्जले निमज्जेत्। एतच्च वरुण
पूजायां सत्यां। गंधमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः। वरुणाय प्रकुर्वीत पूजामादौ समाहित इति नारदस्मरणात्। त
था। साधारणधर्मेषु धर्म्मो वाहनादि सकलदेवतापूजाहोमं समंत्रकं प्रतिज्ञापत्रं शिरो निवेद्यानंतेषु सत्सु च। तोय त्वं प्र
णिनां प्राणः सृष्टेराद्यं तु निर्मितं। शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथा। अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे इ
ति प्राड्विवाकेनोदकमंत्रणे कृते तूर्णो ध्यः सत्येन माभिरक्ष त्वं वरुणेत्युदकं प्रार्थयते। उदकस्थानानि च नारदेनोक्तानि। नदी
षु तनुवेगासु सागरेषु वहेषु च। ह्रदेषु देवखातेषु तडागेषु सरस्सु चेति। तथा पितामहेनापि। स्थिरेतो ये निमज्जेत्तु न ग्राहि
णि न चाल्पके। तृणशैवालरहिते जलौकामत्स्यवर्जिते। देवखातेषु यत्तोयं तस्मिन्कुर्याद्विशोधनं। आहार्यं वर्जयेन्
नित्यं शीघ्रगासु नदीषु च। आविद्धे सलिले नित्यमूर्मिपंकविवर्जिते इति। आहार्यं तडागादिभ्य आहृतं नाम्न कयहा
दिक्षिप्तं जलं। नाभिप्रमाणोदकस्थमध्यस्थितिय वृक्षो द्रवा धर्म्मस्थूणामवष्टभ्य प्राङ्मुखस्तिष्ठेत्। उदके प्राङ्मुखस्तिष्टे
द्धर्म्मस्थूणां प्रगृह्य चेति स्मरणात्॥ ॥ततः किं कर्त्तव्यमित्यत आह। समकालमिषुं मुक्तमानीयान्यो जवी नरः। गते त
स्मिन्निमग्नांगं पश्येच्चेच्छुद्धिमाप्नुयात्। निमज्जनसमकालं गते तस्मिन्ज्जविनि एकस्मिन्पुरुषे ऽन्यो जवी शरपात ६४

स्था। नस्थितः पूर्वमुक्तमिषुमानीय जले निमग्नांगं यदि पश्यति तदा स शुद्धो भवति। त्रिषु शरेषु मुक्तेषु एको वेगवानम
ध्यमशरपातस्थानं गत्वा तमादाय तत्रैव तिष्ठत्यन्यस्तु पुरुषो वेगवान् छरमोक्षस्थाने तोरणमूले तिष्ठति। एवं स्थितयोस्तृ
तीयस्यां करतालिकायां तूर्णो ध्यो निमज्जति। तत्समकालमेव तोरणमूलस्थितोपि द्रुततरं मध्यमशरपातस्थानं गच्छति।
शरग्राही च तस्मिन्प्राप्ते द्रुततरं तोरणमूलं प्राप्यांतर्जलगतं यदि न पश्यति तदा शुद्धो भवति। एतदेव स्पष्टीकृतं पिता
महेन। गंतुश्चापि च कर्तुश्च समं गमनमज्जनं। गच्छेत्तोरणमूलात्तु लक्षस्थानं जवी नरः। तस्मिन्गते द्वितीयोपि वेगादादा
य सायकं। गच्छेत्तोरणमूलं तु यतः स पुरुषो गतः। आगतस्तु शरग्राही न पश्यति यदा जले। अंतर्जलगतं सम्यक् तदा शु
द्धं विनिर्दिशेदिति। जविनोश्च पुरुषयोर्निर्द्धारणं कृतं नारदेन। पंचाशतो धावकानां यौ स्यातामधिकौ जवे। तौ च तत्र नि
योक्तव्यौ शरानयनकारणादिति। तोरणं च निमज्जनसमीपस्थाने समे संवृतो ध्यकर्णप्रमाणोच्छ्रितं कार्य्यं। गत्वा तु तज्जल
स्थानं तटे तोरणमुच्छ्रितं। कुर्वीत कर्णमात्रं तु भूमिभागे समे शुचाविति नारदस्मरणात्। शरत्रयं वैणवं च धनुर्मंगलद्रव्यैः
श्वेतपुष्पादिभिः प्रथमं पूजयेत्। शरान्संपूजयेत्पूर्वं वैणवं च धनुस्तथा। मंगलैर्धूपपुष्पैश्च ततः कर्म्म समाचरेदिति पिता
महवचनात्। धनुःप्रमाणं लक्षस्थानं च नारदेनोक्तं। क्रूरं धनुः सप्तशतं मध्यमं षट्शतं स्मृतं। मंदं पंचशतं ज्ञेयमेवं ज्ञेयो

६५ धनुर्विधिः। मध्यमेन तु चापेन प्रक्षिपेच्छरत्रयम्। हस्तानां च शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः॥ न्यूनाधिके तु दोषः स्यात् क्षि
पतः सायकांस्त्रयेति। अंगुलानां सप्ताधिकं शतं सप्तशतं। तत्क्रूरं धनुः एवं षट्शतं। पंचशतं एवं चैकादशांगुलाधिकं हस्त
चतुष्टयं क्रूरस्य धनुषः प्रमाणं। मध्यमस्य दशांगुलाधिकं॥ मंदस्य नवांगुलाधिकमित्युक्तं भवति। शरांश्चानायसाग्रा वेण
वाः कार्याः। शरांश्चानायसाग्रांस्तु प्रकुर्वीत विशुद्धये। वेणुकांडमयांश्चैव क्षेप्ता तु सुदृढं क्षिपेदिति स्मरणात्। क्षेप्ता क्षत्रि
च यस्तद्वृत्तिर्वा ब्राह्मणः सोपवासो नियोक्तव्यः। यथाह। क्षेप्ता क्षत्रियः प्रोक्तस्तद्वृत्तिर्ब्राह्मणोपि वा। अक्रूरहृदयः शांतः सोपवा
सस्ततः क्षिपेदिति। त्रिषु मुक्तेषु मध्यमः शरो ग्राह्यः। तेषां च प्रेषितानां च शराणां शास्त्रचोदनात्। मध्यमस्तु शरो ग्राह्यः
पुरुषेण बलीयसेति। वचनात्। तत्रापि पतनस्थानादानेतव्यो न संघर्षणस्थानात्। शरस्य पतनं ग्राह्यं संघर्षणं तु विवर्ज
येत्। सर्प्यसर्प्यन् शरो याया दूराद्दूरतरं शर इति वचनात्। वाते च प्रवाति विषमे च प्रदेशे च शरमोक्षो न कर्तव्यः। इषुं न प्रक्षि
पेद्विद्वान्मारुते चाति वायति। विषमे च प्रदेशे च वृक्षस्थाणुसमाकुले। तृणगुल्मलतावल्लीपंकपाषाणसंयुत इति पि
तामहवचनात्। निमग्नांगं पश्यत्रये चैव शुद्धिमाप्नुयादिति वदता उन्मज्जितांगस्याशुद्धिर्दर्शिता। स्थानांतरगमने चाशु
द्धिः पितामहेनोक्ता। अन्यथा न विशुद्धिः स्यादेकांगस्यापि दर्शनात्। स्थानाद्वान्यत्र गमनाद्यस्मिन्पूर्वं निवेशितः ६५

ति। एकांगस्यापि दर्शनादिति च कर्णाद्यभिप्रायेण। शिरोमात्रे तु दृश्येत न कर्णौ नापि नासिका। अप्सु प्रवेशने यस्य
शुद्धं तमपि निर्दिशेदिति विशेषाभिधानात्। अयमत्र प्रयोगक्रमः। उक्तलक्षणजलाशये सन्निधावुक्तलक्षणं
प्र तोरणं विधायोक्तप्रमाणे देशे लक्ष्यं निधाय तोरणसन्निधौ शरं धनुः संपूज्य जलाशये वरुणमावाह्य पूजयित्वा ततो
रे धर्म्मादींश्च देवान्हवनांतमिष्ट्वा शोध्यस्य शिरसि प्रतिज्ञापत्रमावध्य प्राड्विवाको जलमभिमंत्रयते। तोयत्वं प्रा
णिनां प्राण इत्यादिमंत्रेण। अथ शोध्यः सत्येन त्वादिना मंत्रेण जलमभिमंत्र्य गृहीतस्थूणस्य नाभिमात्रोदकावस्थि
सुप तस्य बलीयसः पुरुषस्य समीपं संसर्प्यति। अथ शरे इषु त्रिषु मुक्तेषु मध्यमशरपातस्थाने मध्यमं शरं गृहीत्वा जविन्ये
कस्मिन्पुरुषे स्थिते ऽन्यस्मिंश्च तोरणमूलस्थिते प्राड्विवाकेन तालत्रये दत्ते युगपद्गमनमज्जने अथ शरानयनमि
ति॥ ॥इत्युदकविधिः॥ ॥इदानीं विषविधिमाह॥ त्वं विष ब्रह्मणः पुत्रः सत्यधर्मे व्यवस्थितः। त्रायस्वास्मादभिशा
पात्सत्येन भव मेऽमृतं॥ एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजं। यस्य वेगैर्विना जीर्येच्छुद्धिं तस्य विनिर्दिशेत्। त्वं वि
षेत्यादिमंत्रेण विषमभिमंत्र्य कर्ता विषं हिमशैलजं शार्ङ्गप्रभवं भक्षयेत्। तच्च भक्षितं यस्य विषवेगैर्विना जीर्यति
स शुद्धो भवति। विषवेगो नाम धातोर्धात्वंतरप्राप्तिः। धातोर्धात्वंतरप्राप्तिर्विषवेग इति वचनात्। धातवश्च त्वगसृ

६६ उग्रा समे दोस्थिमज्जा शुक्राणीति। एवं सप्तैव विषवेगा भवंति। तेषां च लक्षणानि शृंगवेरविषतंत्रे कथितानि। वेगो रो-
मांचमाद्योरचयति विषजः स्वेदवक्त्रोपशोषौ तस्योर्द्ध्वं स्तत्स्वरो द्वौ वपुषि जनयतो वर्णभेदप्रवेपौ। यो वेगः पंचमोसौ ध्व
नयनविवशतां कंठभंगं च हिक्कां षष्ठो निश्वाससंमोहौ वितरति च मतिं सप्तमो भक्षकस्येति। अत्र च महादेवस्य पूजा
कर्तव्या यथाह नारदः॥ दष्टा द्विषं सोपवासो देवब्राह्मणसंनिधौ। धूपोपहारमंत्रैश्च पूजयित्वा महेश्वरमिति। प्रा-
ड्विवाकः कृतोपवासो महादेवं पूजयित्वा तस्य पुरतो विषं व्यवस्थाप्य धर्मादिपूजां हवनांतां विधाय। प्रतिज्ञापत्रं शोध्य मा
स्य शिरसि निधाय विषमभिमंत्रयते। त्वं विष ब्रह्मणः सृष्टं परीक्षार्थं दुरात्मनां। पापानां दर्शयात्मानं शुद्धानाममृतं
भव। मृत्युमृते विष त्वं हि ब्रह्मणा परिनिर्मितं। त्रायस्वैनं नरं पापात् सत्येनास्यामृतं भवेति। एवमभिमंत्र्य दक्षिणाभि-
मुखाय स्थिताय दद्यात्॥ नारदवचनात्। द्विजानां सन्निधावेव दक्षिणाभिमुखे स्थिते। उदङ्मुखः प्राङ्मुखो वा विषं
दद्यात्समाहितः इति। विषं च वत्सनाभादि ग्राह्यं। शृंगिणो वत्सनाभस्य हिमजस्य विषस्य चेति पितामहवचनात्।
वर्ज्यानि चैतेनैवोक्तानि। चारितानि च जीर्णानि कृत्रिमाणि तथैव च। भूमिजानि च सर्वाणि विषाणि परिवर्जयेत् इति ६६
। नारदेनापि। भग्नं च चारितं चैव धूपितं मिश्रितं तथा। कालकूटमलाबुं च विषं यत्नेन वर्जयेदिति। कालश्च नारदेनोक्तः।

तोलयित्वेप्सितं काले देयं तद्धि हिमागमे। नापराह्णे न मध्याह्ने न संध्यायां च धर्मवि[illegible]दिति। कालांतरे तत्प्रमाणाद-
ल्पं देयं। वर्षे चतुर्यवा मात्रा ग्रीष्मे पंच यवा स्मृता। हेमंते स्युः सप्त यवाः शरद्यल्पा ततोपि हीति स्मरणात्। अल्पेति ष-
ड्यवेत्यर्थः। हेमंतग्रहणेन शिशिरस्यापि ग्रहणं। हेमंतशिशिरयोः समासेनेति श्रुतेः। वसंतस्य सर्वदिव्यसाधारणत्वात्तत्रा-
पि सप्तयवाः। विषं च घृतप्लुतं देयं नारदवचनात्। विषस्य पलषड्भागाद्भागो विंशतिमस्तु यः। तमष्टभागहीनं तु शोध्ये दद्या-
द्धृतप्लुतमिति। पलं चात्र चतुःसुवर्णिकं। तस्य षष्ठो भागो दशमाषा दशयवाश्च भवंति। त्रियवं त्वेकं कृष्णलं पंचकृष्णलिको
माषः इत्येको माषः पंचदश यवा भवंति। एवं दशानां माषाणां यवाः सार्द्धशतं भवंति। पूर्वे च दश यवा इति षष्ठ्याधिकंश-
तं यवाः पलस्य षष्ठो भागः। तस्माद्विंशतितमो भागो ऽष्टयवस्तस्याष्टमभागहीन एकयवहीनः सं विंशतितमभागः सप्तयवं
घृतप्लुतं दद्यात्। घृतं च विषात् त्रिंशद्गुणं ग्राह्यं। पूर्वाह्णे शीतले देशे विषं दद्यात्तु देहिनां। घृतेन योजितं श्लक्ष्णं पिष्टं
त्रिंशद्गुणान्वितमिति कात्यायनवचनात्। त्रिंशद्गुणेन घृतेनान्वितं विषं शोध्यश्च कुंदुकादिभ्यो रक्षणीयः। त्रिरा- मंत्रवादि
त्रं पंचरात्रं वा पुरुषैः स्वैरधिष्ठितं। कुहकादिभयाद्राजा धारयेद्दिव्यकारिणं। औषधीमंत्रयोगांश्च मणीनथ विषाप-
हान्। कर्तुः शरीरसंस्थान् [illegible] परीक्षयेदिति पितामहवचनात्। तथा विषमपि रक्षणीयं। शार्ङ्गः हेमवतं शा-

६७ स्त्रगंधवर्णरसान्वितं। अकृत्रिममसँस्कृतममंत्रोपहतं च यदिति नारदस्मरणात्। तथा विषपीते यावत्करनालिकान्नानपं देदेयमानं
चकं नावस्नातीक्षणीयो ऽनंतरं चिकित्सनीयः। यथाह नारदः। पंचतालन्नानं काले निर्विकारो यदा भवेत्। तदा भवति
संशुद्धस्ततः कुर्याच्चिकित्सितमिति। पितामहेन तु दिनांतोवधिरुक्तो ऽस्य मात्राविषयः। भक्षिते तु यदा स्वस्थो मूर्छाछ
र्दिविवर्जितः। निर्विकारो दिनस्यांते शुद्धं तमपि निर्दिशेदिति। अत्र च प्राड्विवाकः सोपवासो महादेवं संपूज्य तत्पुरतो
विषं स्थापयित्वा धर्म्मादीनीत्वा शोध्यस्य शिरसि प्रतिज्ञापत्रं निधाय विषमभिमंत्र्य दक्षिणाभिमुखावस्थिताय विषं
प्रयच्छति स च शोध्यो विषमभिमंत्र्य भक्षयतीति क्रमः॥ ॥इति विषविधानं॥ ॥कोशविधिमाह। देवानुग्रान्समभ्य
र्च्य तत्स्नानोदकमाहरेत्। संश्राव्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयं। उग्रान्देवान्। दुर्गादित्यादीन्समभ्यर्च्य गंधपु
ष्पादिभिः पूजयित्वा संस्नाप्य तत्स्नानोदकमाहरेत्॥ आहृत्य च। तोयत्वं प्राणिनां प्राण इत्यादिना तत्तोयं प्राड्विवाकः सं
श्राव्य शोध्येन च तत्तोयं पात्रांतरे कृत्वा सत्येन माभिरक्ष त्वं वरुणेत्यनेनाभिमंत्रितं पाययेत्प्रसृतित्रयं। एतच्च साधार
ण धर्म्मेषु धर्म्मावाहनादि सकलदेवतापूजाहोमसमंत्रकं प्रतिज्ञापत्रशिरोनिवेशनांतेषु सत्सु। अत्र च स्नाप्यदेवता
नियमः कार्यनियमो ऽधिकारिनियमश्च पितामहादिभिरुक्तः। भक्तो यो यस्य देवस्य पाययेत्तस्य तज्जलं। समभावे तु दे ६७

पाणिनिकुञ्जप्रसृतिः शारीरद्रव्यं

वानां मादित्यस्य तु पाययेत्। दुर्गायाः पाययेच्चौरान्ये च शस्त्रोपजीविनः॥ भास्करस्य तु यत्तोयं ब्राह्मणं तत्तु पाययेत्। दुर्गायाः
स्नापयेच्छूलं आदित्यस्य तु मंडलं। अन्येषामपि देवानां स्नापयेदायुधानि त्विति देवतानियमः॥ विश्रंभे सर्वशंकासु संधि
कार्ये तथैव च। एषु कोशः प्रदातव्यो नित्यं चित्तविशुद्धय इति॥ कार्यनियमः। पूर्वाह्ने सोपवासस्य स्नातस्यार्द्रपटस्य च। सश्र
कस्याव्यसनिनः कोशपानं विधीयत इति। सश्रूक आस्तिकः। मद्यपस्त्रीव्यसनिनां कितवानां तथैव च। कोशः प्राज्ञैर्न दातव्यो
ये च नास्तिकवृत्तयः। महापराधे निर्द्धर्मे कृतघ्ने क्लीबकुत्सिते। नास्तिकव्रात्यदासेषु कोशपानं विवर्जयेदिति। महापरा
धो महापातकं। तथा। निर्द्धर्मो वर्णाश्रमधर्मरहितः। पाखंडादिकुत्सितः। प्रतिलोमजः। दासाः। कैवर्त्ताः। इत्यधिकारिनिय
मः। तथा। गोमयेन मंडलं कृत्वा तत्र शोध्यमादित्याभिमुखं स्थापयित्वा पाययेत्प्रसृतित्रयमिति। नारदवचनादवगंतव्यं।
यथाह। तमाहूयाभिशस्तं तु मंडलाभ्यंतरे स्थितं। आदित्याभिमुखं कृत्वा पाययेत्प्रसृतित्रयमिति॥ ॥ननु तुलादिषु वि
षांतेषु समनंतरमेव शुद्ध्यशुद्धिविभावना। कोशे तु कथमित्यत आह। अर्वाक्चतुर्द्दशादह्नो यस्य नो राजदैविकं। व्यस
नं जायते घोरं स शुद्धः स्यान्न संशयः। चतुर्द्दशादह्नः पूर्वं यस्य राजिकं रैवनिमित्तं दैविकं देवप्रभवं व्यसनं दुःखं घोरं महत्।
न्नो नैव जायते। अल्पस्य देहिनामपरिहार्यत्वात्स शुद्धो वेदितव्यः। ऊर्ध्वं पुनरवधेर्न दोषः। यथाह नारदः। ऊर्ध्वं यस्याद्विस

६८ स्ताहाद्वैकृतंतुमहद्भवेत्।नाभियोज्यः सविदुषाकृतकालव्यतिक्रमादित्यार्थसिद्धमेवोक्तं।अर्वाक्तु द्वादशाद्ब्दः दृश्येत
न्महाभियोगविषयं।महाभियोगेष्वेतानीतिप्रस्तुत्याभिधानात्।अवध्यंतराणिपितामहोक्तान्यल्पविषयाणि।कोश
मप्येपिदापयेदितिस्मरणात्।तानिच।त्रिरात्रात्सप्तरात्राद्वाद्वादशाहाद्वापि सप्तकात्।वैकृतंयस्यदृश्येनपापकृत्सउदाहृत
इति।महाभियोगोक्तद्रव्यादर्वाचीनंद्रव्यंत्रिधाविभज्यत्रिरात्राद्यपिपक्षत्रयंव्यवस्थापनीयं।इतिकोशविधिः॥ ॥तुला
दीनिकोशांतानिपंचमहादिव्यानियथोद्देशंयोगीश्वरेणव्याख्यातानिस्मृत्यंतरेल्पाभियोगविषयाणिअन्यान्यपि
दिव्यानिकथितानि।यथाहपितामहः।तंडुलानांप्रवक्ष्यामिविधिंभक्षणचोदितं।चौरेतुतंडुलादेयानान्यस्येतिविनि
श्चयः।तंडुलान्कारयेच्छुक्लान्शालेर्नान्यस्यकस्यचित्।मृण्मयेभाजनेकृत्वाआदित्यस्याग्रतःशुचिः।स्नानोदकेन
संमिश्रान्रात्रौतत्रैववासयेत्।प्राड्मुखोपोषितंस्नातंशिरोरोपितपत्रकं।तंडुलान्भक्षयित्वातुपत्रेनिष्ठीवयेत्ततः।
पिप्पलस्यतुनान्यत्रअभावेभूर्जएवतु।लोहितंदृश्यतेयस्यहनुस्तालुचशीर्यति।गात्रंचकंपतेयस्यतमशुद्धंविनिर्दि
शेदिति।शिरोरोपितपत्रकंतंडुलान्भक्षयित्वानिष्ठीवयेत्प्राड्विवाकः।भक्षयित्वेतिचण्यंतात्णिचिरूपं।सर्वदिव्यसा
धारणंचधर्म्मावाहनादिपूर्ववदिहापिकर्त्तव्यं॥ ॥इतितंडुलविधिः॥ ॥तप्तमाषविधिःपितामहेनोक्तः।तथाहि।सो ६८

DR. BHAU DAJI MEMORIAL

वर्णराजतंवापिताम्रंवाषोडशांगुलं।चतुरंगुलखातंतुमृण्मयंवाथमंडलं।वर्त्तुलमित्यर्थः।पूरयेद्घृततैलाभ्यांविंशत्या
तुपलैस्ततः।सुवर्णमाषकंतस्मिन्सुतप्तेनिक्षिपेत्ततः।अंगुष्ठांगुलियोगेनउद्धरेत्तप्तमाषकं।कराग्रंयोनधुनुयाद्वि
स्फोटोवानजायते।शुद्धोभवतिधर्म्मेणनिर्विकारकरांगुलिरिति।उद्धरेदितिवचनात्पात्रादुत्क्षेपणमात्रेनबहिःप्रक्षे
पणमादरणीयं॥ ॥अपरःकल्पः।सुवर्णेराजतेताम्रेआयसेमृण्मयेपिवा।गव्यंघृतमुपादायतदग्नौतापयेच्छुचिः।सौ
वर्णीराजतींताम्रीमायसींवासुशोधितां।सलिलेनसकृद्धौतांप्रक्षिपेत्तत्रमुद्रिकां।भ्रमद्वीचीतरंगाढ्येअनखस्पर्शगो वा अ
चरे।परीक्षेतार्द्रपत्रेणचुरुकारंसघोषकं।ततश्चानेनमंत्रेणसकृत्तदभिमंत्रयेत्।परंपवित्रममृतंघृतत्वंयज्ञकर्मसु
।दहपावककपापंत्वंहिमशीतंशुचौभव।उपोषितंततःस्नातमार्द्रवाससमागतं।ग्राहयेन्मुद्रिकांतांतुघृतमध्यगतांतथा
।प्रदेशिनींचतस्याथपरीक्षेयुःपरीक्षकाः।यस्यविस्फोटकानस्युःशुद्धोसावन्यथाशुचिरिति।अत्रापिधर्म्मावाहनाद्यनु
संधातव्यं।घृतानुमंत्रणंप्राड्विवाकस्य।त्वमग्नेसर्वभूतानामितिशोध्यस्याग्न्यभिमंत्रणमंत्रः।प्रदेशिनींपरीक्षेयुरि
तिवचनात्प्रदेशिन्येवमुद्रिकोद्धरणं॥ ॥इतितप्तकमाषविधिः॥ ॥धर्माधर्माख्यदिव्यविधिश्चपितामहेनोक्तः।तथा
च।अधुनासंप्रवक्ष्यामिधर्म्माधर्म्मपरीक्षणं।हंतृणांयाचमानानांप्रायश्चित्तार्थिनांनृणां।हंतृणामितिसाहसाभि

योगेषु। याचमानानामित्यर्थाभियोगेषु॥ प्रायश्चित्तार्थिनामिति पातकाभियोगेषु॥ राजतं कारयेद्धर्म्ममधर्म्मं सीसका
६९ यसं मिति प्रतिमाविधानं॥ सीसकं वा आयसं चेति। पक्षान्तरमाह॥ लिखेद्भूर्जे पटे वापि धर्म्माधर्म्मौ सितासितौ। अभ्यु
क्ष्य पंचगव्येन गंधमाल्यैः समर्चयेत्। सितपुष्पस्तु धर्म्मः स्यादधर्म्मोऽसितपुष्पधृत्। एवं विधायोपलिप्य पिंडयोस्तौ
निधापयेत्। गोमयेन मृदा वापि पिंडौ कार्यौ समं ततः। मृद्भांडकेनुपहते स्थाप्यौ चानुपलक्षितौ। उपलिप्ते शुचौ दे
शे देवब्राह्मणसन्निधौ। आवाहयेत्ततो देवांल्लोकपालांश्च पूर्ववत्। धर्म्मावाहनपूर्वं तु प्रतिज्ञापत्रकं लिखेत्। ततो
यदि पापविमुक्तोहं धर्म्मस्त्वायातु मे करे अशुद्धश्चेन्मम करे पाप आयातु धर्म्मन इति अभिशस्तोभिमंत्रयेत्। अभि
युक्तस्तयोश्चैकं प्रगृह्णीताविलंबितः। धर्म्मे गृहीते शुद्धः स्यादधर्म्मे तु स हीयते। एवं समासतः प्रोक्तं धर्म्माधर्म्मपरी संक्षेपेण
क्षणमिति॥ ॥इति धर्माधर्म्मदिव्यविधिः॥ ॥अन्ये च शपथा द्रव्याल्पत्वमहत्त्वविषया जातिविशेषविषयाश्च
मन्वादिभिरुक्ताः। यथा। निष्के तु सत्यवचनं द्विनिष्के पादलंभनं। त्रिकादर्वाक्तु पुष्पं स्यात्कोशपानमतः परं। स देवतासंबंधी
त्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः। गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैरित्यादयः। अत्र च शुद्धिविभा ६९
वनामनुनोक्ता। न चार्त्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिरिति। आर्त्तिरपि यस्यतो राजदैविकं व्यसनं जायते यो

धनार्जनोपायांतरनिरपेक्षात्

रमित्युक्तैव। कालनियमश्च त्रिरात्रप्रभृति कार्यलाघवगौरवपर्यालोचनया द्रष्टव्यः॥ ॥एवं दिव्ये जयपराजया
वधारणे दंडविशेषोपि दर्शितः कात्यायनेन। शतार्द्धं दापयेच्छुद्धमशुद्धो दंडभाग्भवेदिति॥ तं दंडमाह। विषे तोये हु
ताशे च तुलाकोशे च तंदुले। तप्तमाषकदिव्ये च क्रमाद्दंडं प्रकल्पयेत्। सहस्रं षट्शतं चैव तथा पंचशतानि तु। चतु
हीनं स्त्रिद्व्येकमेवं च हीनेषु कल्पयेदिति निह्नवे भावितो दद्याद्धनं दंडेनार्थं दिव्यनिबंधनो दंडः समुच्चीयते॥ ॥इति दिव्य दित्या
प्रकरणं॥ ॥प्रमाणं मानुषं दैवमिति भेदेन वर्णितं। अधुना वर्ण्यते दायविभागो योगमूर्त्तिना। तत्र दायशब्देन यद्धनं
स्वामिसंबंधादेव निमित्तादन्यस्य स्वं भवति तदुच्यते। स च द्विविधः। अप्रतिबंधः सप्रतिबंधश्च। तत्र पुत्राणां पौत्राणां
च पुत्रत्वेन पौत्रत्वेन च पितृधनं पितामहधनं च स्वं भवतीत्यप्रतिबंधो दायः॥ पितृव्यभ्रात्रादीनां तु पुत्राभावे स्वाम्य
भावे च स्वं भवतीति पुत्रसद्भावः स्वामिसद्भावश्च प्रतिबंधः। तदभावे पितृव्यत्वेन भ्रातृत्वेन च स्वं भवतीति सप्रतिबंधो दा
यः। एवं तत्पुत्रादिष्वप्यूहनीयं। विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु व्यवस्थापनं। एत
देवाभिप्रेत्योक्तं नारदेन। विभागोर्थस्य पैत्रस्य तनयैर्यत्र कल्प्यते। दायभाग इति प्रोक्तं व्यवहारपदं बुधैरिति। पैत्रस्येति
स्वत्वनिमित्तसंबंधोपलक्षणं तनयैरित्यपि प्रत्यासन्नोपलक्षणं। इदमिह निरूपणीयं। कस्मिन्काले कस्य कथं के

यथेष्टंउपभोग्यंवस्तु

श्चविभागः कर्त्तव्य इति॥ तत्र कस्मिन्काले कथं केश्चेति तत्र तत्र श्लोकव्याख्यान एव वक्ष्यते। कस्य विभाग इत्येतदिह
७० चिंत्यते॥ किं विभागात्स्वमुत स्वस्य सतो विभाग इति। तत्र स्वत्वमेव तावन्निरूप्यते॥ किं शास्त्रैकसमधिगम्यं स्वत्व
मुत प्रमाणांतरसमधिगम्यमिति। तत्र शास्त्रैकसमधिगम्यमिति तावद्युक्तं॥ गौतमवचनात्। स्वामी ऋक्थक्र
यसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोरिति॥ प्रमाणां
तरगम्ये स्वत्वे नेदं वचनमर्थवत्स्यात्। तथा योद्रणादायिनो हस्तात्लिप्सेत ब्राह्मणो धनं। याजनाध्यापनेनापि यथा
स्तेनस्तथैव स इत्यदत्तादायिनः सकाशाद्याजनादिद्वारेण द्रव्यमर्जयतो दंडविधानमनुपपन्नं स्यात्। स्वत्वस्य लौकि
कत्वे। अपि च॥ लौकिकं चेत्स्वत्वं ममस्वमनेनापहृतमिति न ब्रूयादपहर्तुरेव स्वत्वाद्यान्यस्य स्वं तेनापहृतमि
ति नापहर्तुः स्वं। एवं तर्हि सुवर्णरजतादिस्वरूपवदस्य वा स्वमस्य वा स्वमिति संशयो न स्यात्। तस्मात् शास्त्रैकस
मधिगम्यं स्वत्वमिति। अत्रोच्यते। लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वाद्व्रीह्यादिवत्। आहवनीयादीनां
हि शास्त्रगम्यानां न लौकिकक्रियासाधनत्वमस्ति। नन्वाहवनीयादीनामपि पाकादिसाधनत्वमस्त्येवेति तन्न। नहि
तत्राहवनीयादिरूपेण पाकादिसाधनत्वं किंतर्हि प्रत्यक्षादिपरिदृश्याग्न्यादिरूपेण॥ इह तु सुवर्णादिरूपेण न ७०

क्रयादिसाधनत्वमपि तु स्वत्वेनैव॥ न हि यस्य यत्स्वं न भवति तत्तस्य क्रयाद्यर्थक्रियां साधयति। अपि च। प्रत्यंतवासिना
मप्यदृष्टशास्त्रव्यवहाराणां स्वत्वव्यवहारो दृश्यते क्रयविक्रयादिदर्शनात्। किं च। नियतोपायकं स्वत्वं लौकिकमि
द्ध्मेवेति न्यायविदो मन्यंते। तथा हि लिप्सासूत्रे तृतीये वर्णके द्रव्यार्जननियमानां क्रत्वर्थत्वे स्वत्वमेव न स्यात्। स्वत्व तुरीयाध्याये इदं अपि करणं
स्य लौकिकत्वादिति पूर्वपक्षासंभवमाशंक्य द्रव्यार्जनस्य प्रतिग्रहादिना स्वत्वसाधनत्वं लोकसिद्धमिति॥ पूर्वपक्षः स
मर्थितो गुरुणा॥ ननु द्रव्यार्जनस्य क्रत्वर्थत्वे स्वत्वमेव न भवतीति याग एव न संवर्त्तेत। प्रलपितमिदं केनापि॥ अर्जनं जीवनाभावात्
स्वत्वं नापादयतीति विप्रतिषिद्धमिति वदता। तथा सिद्धांतेपि स्वत्वस्य लौकिकत्वमंगीकृत्यैव विचारप्रयोजनमुक्तं।
अतो नियमातिक्रमः पुरुषस्य न क्रतोरिति अस्य चार्थः एवं विवृतः॥ यदा द्रव्यार्जननियमानां क्रत्वर्थत्वं तदा [illegible] नियमा
र्जितेनैव द्रव्येण क्रतुसिद्धिः। नियमातिक्रमार्जितेन द्रव्येण न क्रतुसिद्धिरिति न पुरुषस्य नियमातिक्रमदोषः।
पूर्वपक्षे। सिद्धांते तु अर्जननियमस्य पुरुषार्थत्वात् तदतिक्रमेणार्जितेन द्रव्येण क्रतुसिद्धिर्भवति॥ पुरुषस्यैव नि
यमातिक्रमाद्दोष इति नियमातिक्रमार्जितस्यापि स्वत्वमंगीकृतमन्यथा क्रतुसिद्ध्यभावान्नचैतावता चोद्यादि
प्राप्तस्यापि स्वत्वं स्यादिति मंतव्यं लोके तत्र स्वत्वप्रसिद्ध्यभावात्। व्यवहारविसंवादात् एवं प्रतिग्रहाद्युपायके स्व

त्वेलौकिकेस्थितेब्राह्मणस्यप्रतिग्रहादयउपायाः। क्षत्रियस्यविजितादयोवैश्यस्यकृष्यादयःशूद्रस्यशुश्रूषादयःइत्य
७१ दृष्टार्थानियमाः। क्रयादयस्तुसर्वसाधारणाः स्वामीरिक्थक्रयसंविभागपरिग्रहाधिगमेष्विति। तत्राप्रति
बंधोदायःऋक्थं। क्रयःप्रसिद्धः। संविभागःसप्रतिबंधोदायः। परिग्रहोऽनन्यपूर्वस्यजलतृणकाष्ठादेःस्वीकारः।
अधिगमोनिध्यादेःप्राप्तिः। एतेषुनिमित्तेषुसत्सुस्वामीभवति। ज्ञातेषुस्वामीज्ञायतेभवति। ब्राह्मणस्याधिकंलब्धमि
तिब्राह्मणस्यप्रतिग्रहादिनायल्लब्धंतदधिकमसाधारणंच॥ क्षत्रियस्यविजितमितिअधिकमित्यनुवर्त्तते॥ क्षत्रि
यस्यविजयदंडादिलब्धमसाधारणं॥ निर्विष्टंवैश्यशूद्रयोरिति। अत्राप्यधिकमनुवर्त्तते। वैश्यस्यकृषिगोरक्षा
दिलब्धंनिर्विष्टंतदसाधारणं। शूद्रस्यद्विजशुश्रूषादिनाभृतिरूपेणयल्लब्धंतदसाधारणमेवमनुलोमजानांप्रतिलो धा
मजानांचलोकप्रसिद्धेषुस्वत्वहेतुषुयद्यदसाधारणमुक्तंसूतानामश्वसारथ्यमित्यादितत्तत्सर्वंनिर्विष्टशब्देनोच्य
ते। सर्वस्यापिभृतिरूपत्वान्निर्वेशोभृतिभोगयोरितित्रिकांडीस्मरणात्। तत्तदसाधारणंवेदितव्यं। यदपि। पत्नीदु
हितरश्चेत्यादिस्मरणंतत्रापिस्वामिसंबंधितयावृद्धपुदायविभागितयाप्राप्तेषुलोकप्रसिद्धेष्वपिस्वत्वेव्यामोहनि
वृत्त्यर्थंस्मरणमितिसर्वमनवद्यं। यदपिममस्वमनेनापहृतमितिनब्रूयात्स्वत्वस्यलौकिकत्वइतितदप्यसत्। स्वत्वहे ७१

प्रयोगोवृद्ध्यर्थंधनप्रदानं। कर्मयोगःकृषिवाणिज्यं। प्रयोगःकर्मयोगोवैश्यस्यैव॥ तेनब्राह्मणानांनिषेधः॥

तुभूतक्रयादिसंदेहात्स्वत्वसंदेहोपपत्तेः। विचारप्रयोजनंतु॥ यद्गर्हितेनार्जयंतिकर्मणाब्राह्मणाधनं। तस्योत्सर्गेणशु
ध्यंतिजप्येनतपसैवचेति॥ शास्त्रैकसमधिगम्येस्वत्वेगर्हितेनासत्प्रतिग्रहवाणिज्यादिनालब्धस्यस्वत्वमेवनास्ती
तितत्सुतानांतदविभाज्यमेवयदातुस्वत्वंलौकिकंतदासत्प्रतिग्रहादिलब्धस्यापिस्वत्वात्। तत्सुतानांतद्विभाज्यमेव
तस्योत्सर्गेणशुध्यंतीतिप्रायश्चित्तमर्जयितुरेवतत्सुतादीनांतुदायत्वेनस्वमितिनतेषांदोषसंबंधः। सप्तवित्तागमा
अलो[illegible] धर्म्यादायोलाभःक्रयोजयः। प्रयोगःकर्मयोगश्चसत्प्रतिग्रहएवचेतिमनुस्मरणात्। इदानीमिदंसंदिह्यते॥ वि
भागात्स्वमुतस्वस्यसतोविभागइति॥ तत्रविभागात्स्वमितितावद्युक्तं॥ जातपुत्रस्याधानविधानात्। यदिजन्मनैव
स्वत्वंस्यात्तदोत्पन्नस्यपुत्रस्यापितत्स्वंसाधारणमितिद्रव्यसाध्येष्वाधानादिषुपितुरनधिकारःस्यात्। तथाविभागा
त्प्राक्पितृप्रसादलब्धस्यविभागप्रतिषेधोनोपपद्यते। सर्वानुमत्यादत्ताद्विभागप्राप्त्यभावात्। यथाहशौर्यभार्याध प॰ २६५
नेचोभेयच्चविद्याधनंभवेत्। त्रीण्येतान्यविभाज्यानिप्रसादोयश्चपैतृकःइति। तथा। भर्त्राप्रीतेनयद्दत्तंस्त्रियैत
स्मिन्मृतेपितत्। सायथाकाममश्नीयाद्दद्याद्वास्थावरादृतइति॥ प्रीतिदानवचनंनोपपद्यतेजन्मनैवस्वत्वे॥ न
चस्थावरादृतेयद्दत्तमितिसंबंधोयुक्तोव्यवहितयोजनाप्रसंगात्। यदपि। मणिमुक्ताप्रवालानांसर्वस्यैवपिताप्र

७२ मुः॥ स्थावरस्य तु सर्वस्य न पिता न पितामहः॥ यथा पितृप्रसादाद्भुज्यंते वस्त्राण्याभरणानि च। स्थावरं तु न भुज्येत प्रसादे सति पैतृक इति॥ स्थावरस्य प्रसाददाने प्रतिषेधवचनं तत्पितामहोपात्तस्थावरविषयं॥ अतीते पितामहे तद्धनं पितापुत्रयोः साधारणमपि मणिमुक्तादि पितुरेव स्थावरं तु साधारणमित्यस्मादेव वचनादवगम्यते॥ तस्माज्जन्मनास्वत्वं किंतु स्वामिनोऽत्यागाद्विभागाद्वा स्वत्वं॥ अत एव पितुरूर्द्ध्वं विभागात्प्राग्द्रव्यस्वत्वस्याग्रहीणत्वादन्येन गृह्यमाणं न निवार्यते इति चोद्यस्यानवकाशः। न ह्येकपुत्रस्य पितृप्रायेणादेव पुत्रस्य स्वमिति न विभागमपेक्षत इति। अत्रोच्यते। लोकप्रसिद्धमेव स्वमित्युक्तं लोके च पुत्रादीनां जन्मनैव स्वत्वं प्रसिद्धतरं नापह्नवमर्हतीति॥ विभागशब्दश्च बहुस्वामिकधनविषयः प्रसिद्धो नान्यदीयविषयो न प्रहीणविषयः। तयोस्तस्यैवार्थस्वामित्वसंभवे तस्याचार्यादिनिगोत्तमवचनाच्च॥ मणिमुक्ताप्रवालानामित्यादिवचनं च जन्मना स्वत्वपक्ष एवोपपद्यते। न च पितामहोपात्तस्थावरविषयमिति युक्तं। न पिता न पितामह इति वचनात्। पितामहस्य हि स्वार्जितमपि पुत्रे पौत्रे च सत्यदेयमिति वचनं जन्मना स्वत्वं गमयति। यथा परमते मणिमुक्तावस्त्राभरणादीनां पैतामहानामपि पितुरेव स्वत्वं वचनादेवमस्मन्मतेऽपि पित्रार्जितानामप्येतेषां पितुर्दानाधिकारो वचनादित्यविशेषः। यत्तु भर्त्रा प्रीतेनेत्यादि विष्णुवचनं स्थावरस्य प्रीतिदाननिषेधप

प्रथा

स्वामीरक्षते

वंशपरंपरा...रवेन न वृत्तिर्भवति। अथवापं...वर्षपरिमिता विच्छिन्न भुक्तिर्भवति। तत्रापि विच्छिन्न द्रव्यलाभस्य पुनर्विधानमस्ति सा हृतिः

स्वदत्तां परदत्तां वा ब्राह्मीं हरति ... पः॥ तस्य राज्यं विनश्यति आयुर्नष्टं सदा भवत्॥

पंचविंशति विच्छिन्न द्रव्यलाभस्य पुनर्विधाने पुनरत्तदेनाविच्छिन्न द्रव्यलाभस्तदेव ... लक्षणं॥ सास्त्रादिमले सा ... गनादूगो लक्षणं॥ तत्तको मुर्षा

वृत्त स्वोपार्जितस्यापि पुत्राद्यभ्यनुज्ञयैवेति वाख्येयं। पूर्वोक्तैर्मणिमुक्तादिवचनैः स्थावरव्यतिरिक्तस्यैव प्रीतिदानयोग्यत्वनिश्चयात्। यदव्यर्थं साध्येषु वैदिकेषु कर्मसु अनधिकार इति॥ तत्र तद्विधानबलादेवाधिकारो गम्यते॥ तस्मात्स्वोपार्जिते पैतामहे च द्रव्ये जन्मनैव स्वत्वं। तथापि तु रावश्यकेषु धर्मकृत्येषु वाचनिकेषु प्रसाददानकुटुंबभरणापद्विमोक्षादिषु च स्थावरव्यतिरिक्तद्रव्यविनियोगे स्वातंत्र्यमिति स्थितं॥ स्थावरे तु स्वार्जिते पित्रादिप्राप्ते च पुत्रादिपारतंत्र्यमेव। स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितं। असंभूय सुतान्सर्वान्न दानं न च विक्रयः। ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः। वृत्तिं च ते भिकांक्षंति न दानं न च विक्रय इत्यादि स्मरणात्। अस्यापवादः। एकोपि स्थावरे कुर्याद्दानाधमनविक्रयं। आपत्काले कुटुंबार्थे धर्मार्थे च विशेषत इति। अस्यार्थः। अप्राप्तव्यवहारेषु पुत्रेषु पौत्रेषु वानुज्ञानादावसमर्थेषु भ्रातृषु वा तथाविधेषु विभक्तेष्वपि सकलकुटुंबव्यापिन्यामापदि॥ तत्पोषणे चावश्यककर्तव्येषु च पितृश्राद्धादिषु स्थावरस्य दानाधमनविक्रयमेकोपि समर्थः कुर्यादिति। यत्तु वचनं। विभक्ता वा विभक्ता वा सपिंडाः स्थावरे समाः। एको ह्यनीशः सर्वत्र दानाधमनविक्रय इति। तदप्यविभक्तेषु द्रव्यस्य मध्यकत्वादेकस्यानीश्वरत्वात्सर्वाभ्यनुज्ञा व्यवहारकार्या विभक्तेषु तत्तरकालं विभक्ता अविभक्ता संज्ञायत्ता दाने

नपुंस्त्रिहर्षो २७

वर्षजीवनपर्याप्तधनलाभो रतिशब्देनव्यवहृयते
षष्टिवर्षाधिका भोग्या सा रतिः परिकीर्तिता॥ मुनिभिः कथिता निस्यात्
भुक्तिः

...नस्यात्...

नव्यवहारसौकर्य्यायसर्वाभ्यनुज्ञानपुनरेकस्यानीश्वरत्वेनातोविभक्तानुमतिव्यतिरेकेणापिव्यवहारःसिध्य
८३ त्येवेतिव्याख्येयं।यदपि॥स्वग्राममज्ञातिसामंतदायादानुमतेनच।हिरण्योदकदानेनषड्भिर्गच्छतिमेदिनी।इति।तत्रा
पिग्रामानुमतिः प्रतिग्रहःप्रकाशः स्यात्स्थावरस्यविशेषतइतिस्मरणात्व्यवहारप्रकाशनार्थमेवापेक्ष्यते।नपु
नर्ग्रामानुमत्याविनाव्यवहारासिद्धिः॥सामंतानुमतिस्तुसीमाविप्रतिपत्तिनिरासाय।ज्ञातिदायादानुमतिस्तुप्रयो
जनमुक्तमेव।हिरण्योदकदानेनेतिस्थावरेविक्रयोनास्तिकुर्यादाधिमनुज्ञयेतिस्थावरस्यविक्रयप्रतिषेधात्।
भूमिंयःप्रतिगृह्णातियश्चभूमिंप्रयच्छति।उभौतौपुण्यकर्माणौनियतौस्वर्गगामिनौ।इतिदानेप्रशंसादर्शनाच्च
विक्रयेपि [redacted] कर्तव्येसहिरण्यमुदकंदत्वादानरूपेणस्थावरविक्रयंकुर्यादित्यर्थः।पैतृकेपैतामहेचधनेज
न्मनैवस्वत्वेपिविशेषंस्पर्यापैतामहोपात्तेत्यत्रवक्ष्यामः॥ ॥इदानींयस्मिन्कालेयेनचयथाविभागःकर्तव्यस्त
द्दर्शयन्नाह।विभागंचेत्पिताकुर्यादिच्छयाविभजेत्सुतान्।ज्येष्ठंवाश्रेष्ठभागेनसर्वेवास्युःसमांशकाः।यदा
पिताविभागंचिकीर्षतितदाइच्छयाविभजेत्सुतानात्मनःसकाशात्पुत्रंपुत्रौपुत्रान्।इच्छायाःनिरंकुशत्वादनि ८३
यमप्राप्तौनियमार्थमाह।ज्येष्ठंवाश्रेष्ठभागेनेतिज्येष्ठंश्रेष्ठभागेनमध्यमंमध्यमभागेनकनिष्ठंकनिष्ठभा

गेनविभजेदित्यनुवर्त्तते।श्रेष्ठादिभागश्चमनुनोक्तः।ज्येष्ठस्यविंशउद्धारःसर्वद्रव्याच्चयद्वरं।ततोर्द्धंमध्यमस्यस्या
त्तुरीयंतुयवीयसः॥बाशब्दोवक्ष्यमाणपक्षापेक्षः।सर्वेवास्युःसमांशिनः।सर्वेवाज्येष्ठादयःसमांशभाजःकर्त्त
व्याः।अयंचविषमोविभागःस्वार्जितद्रव्यविषयःपितृक्रमायातेतुसमंस्वाम्यस्यवक्ष्यमाणत्वात्नेच्छयाविषमो
विभागोयुक्तः॥विभागंचेत्सितांकुर्यादितियदापितुर्विभागेच्छासनावदेकःकालः।अपरोपिजीवत्येवपितरिद्रव्य
(भाग) निस्पृहेनिवृत्तरमणेमातरिचनिवृत्तरजस्कायांपितुरनिच्छायामपिपुत्रेच्छयैवविभागोभवति।यथानारदेन।अतऊ
र्ध्वंपितुःपुत्राविभजेयुर्धनंसममितिपित्रोरूर्ध्वंविभागंप्रतिपाद्य॥मातुर्निवृत्तेरजसिप्रत्तासुभगिनीषुचानिवृत्ते (विवाहितासु)
वापिरमणेपितर्युपरतस्पृहइतिदर्शितं।अत्रपुत्राःधनंसमंविभजेयुरित्यनुषज्यते।गौतमेनापि।ऊर्ध्वंपितुः
पुत्राऋक्थंविभजेरन्निसृष्टेकानिवृत्तेवापिरजसीतिद्वितीयःकालोदर्शितः।जीवतिचनिच्छतीतितृतीयस्तथा।
सरजस्कायामपिमातर्यनिच्छत्यपिपितर्यधर्मवर्त्मनिदीर्घरोगग्रस्तेचपुत्राणामिच्छयाभवतिविभागः।यथाह
शंखः।अकामेपितरिरिक्थविभागोवृद्धेविपरीतचेतसिरोगिणिचेति॥ ॥पितुरिच्छयाविभागोद्विधादर्शितःसमो
विषमश्चतत्रसमविभागेविशेषमाह।यदिकुर्यात्समानंशान्पत्न्यःकार्याःसमांशकाः।नदत्तंस्त्रीधनंयासांभ

५४

त्रीवा श्वशुरेण वा। यदा स्वेच्छया पिता सर्वानेव सुतान्समविभागिनः करोति तदा पत्न्यश्च पुत्रसमांशभाजः कर्तव्याः
यासां पत्नीनां भर्त्रा श्वशुरेण वा स्त्रीधनं न दत्तं। दत्ते तु स्त्रीधने अर्द्धांशं वक्ष्यति॥ दत्तेत्वर्द्धं प्रकल्पयेदिति। यदा तु श्रे
ष्ठभागादिना ज्येष्ठादीन्विभजति तदा पत्न्यः श्रेष्ठादिभागान्न लभंते किंतद्धृतोद्धारात्समुद्धृतात्समानेवांशांल्ल
भंते। स्वोद्धारं च। यथाहापस्तंबः। परिभांडं च गृहे लंकारो भार्याया इति॥ ॥ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समां
शिनः। इति पक्षद्वयेप्यपवादमाह। शक्तस्यानीहमानस्य किंचिद्दत्वा पृथक्क्रिया। स्वयमेव द्रव्यार्जनसमर्थस्य
पितृद्रव्यमनीहमानस्यानिच्छतो यत्किंचिदसारमपि दत्वा पृथक्क्रिया विभागः कर्तव्यः पित्रा तत्सुतादीनां दायजि
घृक्षा मा भूदिति॥ ॥ज्येष्ठं वा श्रेष्ठभागेनेति न्यूनाधिकविभागो दर्शितः तत्र शास्त्रोक्तोद्धारादिविषमविभागव्य
तिरेकेणान्यथा विषमविभागनिषेधार्थमाह। न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतः। न्यूनाधिकविभा
गेन विभक्तानां पुत्राणामसौ न्यूनाधिकविभागो यदि धर्म्यः शास्त्रोक्तो भवति तदा सो पितृकृतः॥ पितृकृत एव
न निवर्तत इति मन्वादिभिः स्मृतः। अन्यथा पितृकृतोपि निवर्तत इत्यभिप्रायः। यथाह नारदः। व्याधितः कुपित
श्चैव विषयासक्तमानसः। अन्यथा शास्त्रकारी च न विभागे पिता प्रभुरिति॥ ॥इदानीं विभागस्य कालांतरं

DR. BHAU DAJI MEMORIAL

मृतस्य कृतविभागस्य पितुः

कर्त्रंतरं प्रकारनियमं चाह। विभजेरन्सुताः पित्रोरूर्द्ध्वं रिक्थमृणं समं। पित्रोर्मातापित्रोरूर्द्ध्वं प्रायणादिति कालो दर्शि
तः। सुता इति कर्तारो दर्शिताः। सममिति प्रकारनियमः सममेवेति रिक्थमृणं च विभजेरन्। ननूर्द्ध्वं पितुश्च मातुश्चेत्यु
पक्रम्य। ज्येष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः। शेषास्तमुपजीवेयुर्यथैव पितरं तथेत्युक्त्वा। ज्येष्ठस्य विंश उद्धा
रः सर्वद्रव्याच्च यद्वरं। ततोर्द्धं मध्यमस्य स्यात्तुरीयं तु यवीयस इति॥ सर्वस्माद्द्रव्यसमुदायाद्विंशतितमो भागः सर्वद्र
व्येभ्यश्च यच्छ्रेष्ठं तत् ज्येष्ठाय दातव्यं। तदर्द्धं चत्वारिंशत्तमो भागो मध्यं च द्रव्यं मध्यमाय दातव्यं तुरीयमशीतितमो
भागो हीनं च द्रव्यं कनिष्ठाय दातव्यमिति। मातापित्रोरूर्द्ध्वं विभजतामुद्धारविभागो मनुना दर्शितः। तथा। उद्धारेनुद्धृ
ते तेषामियं स्यादंशकल्पना॥ एकाधिकं हरेज्ज्येष्ठपुत्रोध्यर्द्धं ततोनुजः। अंशमंशं यवीयांस इति धर्मो व्यवस्थित इ
ति। ज्येष्ठस्य द्वौ भागौ तदनंतरजातस्य सार्द्ध एको भागस्ततोनुजानामेकैको विभागः इत्युद्धारव्यतिरेकेणापि विषमो
विभागो दर्शितः पित्रोरूर्द्ध्वं विभजतां जीवद्विभागे च स्वयमेव विषमो विभागो दर्शितो ज्येष्ठं वा श्रेष्ठभागेनेति। अतः
सर्वस्मिन्नपि काले विषमो विभागोस्तीति कथं सममेव विभजेरन्निति नियम्यते। अत्रोच्यते। सत्यमयं विषमो वि
भागः शास्त्रदृष्टस्तथापि लोकविद्विष्टत्वान्नानुष्ठेयः। अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु इति निषेधा

७५ न। यथा महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेदिति विधाने ऽपि लोकविद्विष्टत्वादननुष्ठानं। यथा वा मैत्रावरुणीं गां
वन्ध्यामनूबन्ध्यामालभेतेति गवालंभविधाने ऽपि लोकविद्विष्टत्वादननुष्ठानं। उक्तं च। यथा नियोगधर्म्मो नो नानु
बंध्यावधो ऽपि वा। तथोद्धारविभागो ऽपि नैव संप्रति वर्त्तत इति। आपस्तंबो ऽपि। जीवन्पुत्रेभ्यो दायं विभजेत्सममिति
ज्येष्ठांशपरिहारं । स्वमतमुक्त्वा॥ ज्येष्ठो दायाद इति॥ कृत्स्नधनग्रहणं ज्येष्ठस्यैकीयमतेनोपन्यस्य देशविशेषे सुवर्णं कृष्णा गावः
कृष्णं भौमं ज्येष्ठस्य रथः पितुः परिभाण्डं च गृहे ऽलंकारो भार्याया ज्ञातिधनं चेत्येक इत्येकीयमतेनैवोद्धारविभागं
दर्शयित्वा तच्छास्त्रविप्रतिषिद्धमिति निराकृतवान्। तेच शास्त्रविप्रतिषेधं स्वयमेव दर्शयति स्म। मनुः पुत्रेभ्यो दायं
विभजेदित्यविशेषेण श्रूयत इति॥ तस्माद्विषमो विभागः शास्त्रदृष्टो ऽपि लोकविरोधात् श्रुतिविरोधाच्च नानु
ष्ठेय इति सममेव विभजेदिति नियम्यते॥ मातापित्रोरूर्ध्वं सुता विभजेरन्निति तदुक्तं तत्र मातृधने ऽपवादमाह॥ मा
तुर्दुहितरः शेषमृणात्॥ मातुर्धनं दुहितरो विभजेरन्नृणात् शेषं मातृकृतर्णापाकरणावशिष्टमतश्चर्णसमं पू
र्णं च मातृधनं सुता विभजेरन्नित्यस्य विषयः। एतदुक्तं भवति। मातृकृतर्णं पुत्रैरेवापाकरणीयं न दुहितृभिः ऋणा
वशिष्टं तु धनं दुहितरः गृह्णीयुरिति॥ युक्तं चैतत्। पुमान्पुंसो ऽधिके शुक्रे स्त्री भवत्यधिके स्त्रिया इति स्त्र्यवयवा ७५

नां दुहितृबाहुल्यात्स्त्रीधनं दुहितृगामि। पितृधनं पुत्रगामि पित्रवयवानां पुत्रे बाहुल्यादिति। तत्र गौतमेन वि
शेषो दर्शितः॥ स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति। अस्यार्थः। प्रत्ताप्रत्तासमवाये ऽप्रत्तानामेव
स्त्रीधनं प्रत्तासु च प्रतिष्ठिताप्रतिष्ठितासमवाये ऽप्रतिष्ठितानामेवेति। अप्रतिष्ठिता निर्धनाः॥ दुहित्रभावे मा
तृधनमृणावशिष्टं को गृह्णीयादित्यत आह। ताभ्य ऋते ऽन्वयः॥ ताभ्यो दुहितृभ्यो विना दुहितॄणामभावे ऽन्वयः
पुत्रादिर्गृह्णीयात्। एतच्च विभजेरन्सुताः पित्रोरूर्द्ध्वमित्यनेनैव सिद्धस्यार्थमुक्तं॥ ११७॥ अविभाज्यमाह॥ पितृ
द्रव्याविरोधेन यदन्यत्स्वयमर्जितं। मैत्रमौद्वाहिकं चापि दायादानां न तद्भवेत्॥ क्रमादभ्यागतं द्रव्यं हृतमभ्युद्ध
रेत्तु यः। दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च॥ मातापित्रोर्द्रव्याविनाशेन यत्स्वयमर्जितं मैत्रं मित्रसकाशा
व्यव. मुख्य ५७ ल्लब्धं। औद्वाहिकं विवाहाल्लब्धं दायादानां भ्रातॄणां तन्न भवति। क्रमायातं क्रमायातं यत्किंचिद्द्रव्यमन्यैर्हृतम
सामर्थ्यादिना पित्रादिभिरनुद्धृतं यः पुत्राणां मध्ये इतरानुज्ञया उद्धरति तद्दायादेभ्यो भ्रातृभ्यो न दद्यात्। उद्धर्ता ए
व गृह्णीयात्। क्षेत्रे तुरीयांशमुद्धर्ता लभते। शेषं तु सर्वेषां सममेव। यथाह शंखः। पूर्वनष्टां तु यो भूमिमेकश्चेदुद्धरे
त् क्रमात्। यथाभागं लभन्ते ऽन्ये दत्वांशं तु तुरीयकमिति क्रमादभ्यागतमिति विशेषणं। तथा विद्यया वेदाध्ययनेनैवेदा
बंधुव्यापारनिरपेक्षविद्वत्कृतेयोरयमनुज्ञा॥ यथाश्रौद्धेन्द्रियतामभ्यनुज्ञा। ...ध्यापनेन
पिंडपितृयज्ञे अग्नौकरणं

पितृद्रव्याविरोधेन

र्थव्याख्यानेनैव यल्लब्धं तदपि दायादिभ्यो न दद्यात्। अङ्गीकरणं ग्रहीष्यात्। अत्र पितृद्रव्याविरोधेन यत्किंचित्स्व
७६ यमर्जितमिति सर्वशेषः। अतश्च पितृद्रव्याविरोधेन यन्मैत्रमर्जितं पितृद्रव्याविरोधेन यदौद्वाहिकं यत्क्रमाया
तमुद्धृतं पितृद्रव्याविरोधेन विद्यया यल्लब्धमिति प्रत्येकमभिसंबध्यते। तथा च। पितृद्रव्याविरोधेन प्रत्युपकारेण
यन्मैत्रं आसुरादिविवाहेषु यल्लब्धं तथा पितृद्रव्यव्ययेन यत्क्रमायातमुद्धृतं तथा पितृद्रव्यव्ययेन लब्धया विद्य
यायल्लब्धं तत्सर्वं सर्वैर्भ्रातृभिः पित्रा च विभजनीयं। तथा पितृद्रव्याविरोधेनस्यास्य सर्वशेषत्वादेव पितृद्रव्यावि
रोधेन प्रतिग्रहलब्धमपि विभजनीयं। अस्य सर्वशेषत्वाभावे मैत्रमौद्वाहिकमित्यादिनाऽरब्धेयं। अथ पितृद्रव्याविरो
धेनापि यन्मैत्रादिलब्धं तस्याविभाज्यत्वान्मैत्रादिवचनमर्थवदित्युच्यते तथा सति समाचारविरोधः विद्यालब्धे
नारदवचनविरोधश्च। कुटुंबं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः। भागं विद्याधना तस्मात्स लभेताश्रुतोपि स अविद्याधिगम्यविभा
न्निति तथा विद्याधनस्याविभाज्यस्य लक्षणमुक्तं कात्यायनेन। परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या। त
या लब्धं धनं यत्तु विद्याप्राप्तं तदुच्यते। तथा पितृद्रव्याविरोधेनस्य सभिन्नवाक्यत्वे प्रतिग्रहलब्धस्याविभाज्य
रूस त्वमाचारविरोधमापद्येत एतदेव स्पष्टीकृतं मनुना। अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत्। दायादेभ्यो न ७६

अर्थीत्सात्वात्

द्विष

तद्दद्याल्लब्धमेव चेति। श्रमेण सेवा या युद्धादिना। ननु पितृद्रव्याविरोधेन यन्मैत्रादिलब्धं द्रव्यं न तद्विभाज्यमिति निवक्त
व्यं विभागप्राप्त्यभावात्। यद्येन लब्धं तत्तस्यैव नान्यस्येति प्रसिद्धतरं। प्राप्तिपूर्वकश्च प्रतिषेधः। तत्र कश्चिदिदं प्रा
प्तिमाह। यत्किंचित्पितरि प्रेते धनं ज्येष्ठोधिगच्छति॥ भागो यवीयसां तत्र यदि विद्यानुपालिनः इति। ज्येष्ठो वा कनिष्ठो त
वा मध्यमो वा पितरि प्रेते प्रेते वा यवीयस्यां वर्षीयसां चेति व्याख्यानेन पितरि सत्यसति मैत्रादीनां विभाज्य
त्वं प्राप्तं प्रतिषिध्यत इति तदसत्। न ह्यत्र प्राप्तस्य प्रतिषेधः। किंतु सिद्धस्यैवानुवादोयं। लोकसिद्धस्यैवानु
वादकान्येव प्रायेणास्मिन्प्रकरणे वचनानि। अथवा समवेतैस्तु यत्प्राप्तं सर्वे तत्र समांशिन इति प्राप्तस्यापवा
द इति संतुष्यतु भवान्। अतश्च यत्किंचित्पितरि प्रेते इत्यस्मिन्वचने ज्येष्ठादिपदानां विवक्षया प्राप्तिरिति व्यामो
हमात्रं। अतो मैत्रादिवचनैः पितुः प्रागूर्ध्वं वा विभाज्यत्वेनोक्तस्य यत्किंचित्पितरि प्रेतेन इति अपवाद इति व्या
ख्येयं। तथान्यदपि अविभाज्यमुक्तं मनुना॥ पत्रं वस्त्रमलंकारं कृतान्नमुदकं स्त्रियः। योगक्षेमं प्रचारं च न वि
भाज्यं प्रचक्षते इति। धृतानामेव वस्त्राणां अविभाज्यत्वं येन धृतं तत्तस्यैव। पितृधृतानि तु पितुरूर्ध्वं विभज
तां श्राद्धभोक्त्रे दातव्यानि। यथाह बृहस्पतिः। वस्त्रालंकारशय्यादि पितुर्यद्वाहनादिकं। गंधमाल्यैः समभ्यर्च्य

७८ श्राद्धभोक्तेतदर्पयेदिति। अभिनवानितुवस्त्राणिविभाज्यान्येव। पत्रंवाहनमश्वन्निविकादितदपियद्येनारूढंत
तस्येव। पित्र्यंतुवस्त्रवदेव। अश्वादीनांवहुत्वेतद्विक्रयोपजी [redacted] विनाविभाज्यत्वमेव। वैषम्येणाविभाज्यत्वे
ज्येष्ठस्य। अजाविकंसैकशफंनजातुविषमंभजेत। अजाविकंसैकशफंज्येष्ठस्यैवविधीयतेतिमनुस्मरणा
त्। अलंकारोपियोयेनधृतः सतस्यैव। अधृतःसाधारणोविभाज्यएव। पत्यौजीवतियःस्त्रीभिरलंकारोधृ
तोभवेत्। नतंभजेरन्दायादाः भजमानाःपतंतितइति॥ अलंकारोधृतोभवेदितिविशेषेणोपादानादधृतानां
विभाज्यत्वंगम्यते। कृतान्नंतंदुलमोदकादितदप्यविभाज्यंयथासंभवंभोक्तव्यं। उदकंउदकाधारःकूपादिः
नचविषमंमूल्यद्वारेणनविभाज्यंपर्यायेणोपभोक्तव्यं। स्त्रियश्चदास्योविषमानमूल्यद्वारेणविभाज्याः
पर्यायेनकर्मकारयितव्याः। अवरुद्धास्तुपित्रास्वैरिण्याद्याःसमाअपिपुत्रैर्नविभाज्याः। स्त्रीषुचसंरुद्धास्व
विभागइतिगोतमस्मरणात्॥ योगश्चक्षेमश्चयोगक्षेमं। योगशब्देनोलाभकारणंश्रौतस्मार्ताग्निसाध्यमिष्टं
कर्मलक्ष्यते। क्षेमशब्देनलब्धपरिरक्षणहेतुभूतंचवहिर्वेदिदानतडागारामनिर्माणादिपूर्तंकर्मलक्ष्यते। ७८
तदुभयंपैतृकमपिपितृद्रव्यविरोधेनार्जितमपिअविभाज्यं। यथाहलौगाक्षिः क्षेमंपूर्तंयोगमिष्टमित्याहुस्त

त्वद२

धनि

न त्वदर्शिः। अविभाज्येचतेप्रोक्तेशयनासनमेवचेति। योगक्षेमशब्देनयोगक्षेमकारिणोराजामंत्रिपुरोहितादयउच्यं
तेइतिकेचित्। छत्रचामरशस्त्रोपानत्प्रभृतयइत्यन्ये। प्रचारोगृहारामादिषुप्रवेशनिर्गममार्गः सोप्यविभाज्यः।
यत्तूशनसाक्षेत्रस्याविभाज्यत्वमुक्तं अविभाज्यंसगोत्राणामासहस्रकुलादपि। याज्यंक्षेत्रंचपत्रंचकृतान्नमुदकं
स्त्रियइति॥ तद्ब्राह्मणोत्पन्नक्षत्रियादिपुत्रविषयं। नप्रतिग्रहभूर्देयाक्षत्रियादिसुतायवै। यद्यप्येषांपितादद्यान्मृ
तेविप्रासुतोहरेदितिस्मरणात्। याज्यंयाजनलब्धंपितृप्रसादलब्धस्याविभाज्यत्वंवक्ष्यति। नियमातिक्रमार्जि
य तस्याविभाज्यत्वमनंतरमेवन्यरासि॥ ॥पितृद्रव्यविरोधेनयदर्जितंतन्नद्विभजनीयमितिस्थितेतत्रार्जक [redacted] स्या स्यभाग
नेविभागस्तुसमःस्मृतः। अविभक्तानांभ्रातृणांसाधारणस्यार्थस्यकृषिवाणिज्यादिनासमुत्थानेसम्यग्वर्द्धने
केनचित्कृतेसमएवविभागोनार्जयितुरंशद्वयं॥ ॥पित्र्यद्रव्येपुत्राणांविभागोदर्शितः इदानींपैतामहेपौत्राणां
विभागविशेषमाह। अनेकपितृकाणांतुपितृतोभागकल्पना। यद्यपिपैतामहेद्रव्येपौत्राणांजन्मनास्वत्वंपुत्रै
रविशिष्टंतथापितेषांपौत्राणांपितृद्वारेणैवपितामहद्रव्यविभागकल्पनानस्वरूपापेक्षया। एतदुक्तंभवति। य
दाविभक्ताभ्रातरःपुत्रानुत्पाद्यदिवंगताः। तत्रैकस्यद्वौपुत्रावन्यस्यत्रयोऽपरस्यचत्वारइतिपुत्राणांवैषम्येत

॥ इत्यंवसिष्ठवचनात्। येनचैषांस्वयमुपार्जितंस्यात्सद्व्यंशमेवलभेतेति॥ अस्यापवादमाह॥ सामान्यार्थसमु॥

घं

एकपुत्रे तेन तत्रांतराभावात् स्वपितुः स्वकांशाद्विभक्तत्वात् म्रियमाणे पितरि प्रथमपक्षे विभक्तवादेन

७८ त्र ह्यावेकं स्वं पित्र्यमंशं लभेते अन्योऽत्रयोऽप्येकमंशं पित्र्यं चत्वारोऽप्येकमंशं पित्र्यं लभंत इति। तथा केषुचित्सुतेषु म्रियमा
णेषु केषुचित्पुत्रासुताद्यविनष्टेष्वपि अयमेव न्यायो म्रियमाणाः स्वानंशान् लभंते तेन दृष्टानामपि पुत्राः पित्र्यमेवांशं
लभंत इति वाचनिकी व्यवस्था॥ ॥अधुनाऽविभक्ते पितर्यविद्यमाने भ्रातृके वा पौत्रस्य पैतामहे द्रव्ये विभागो
नास्ति म्रियमाणे पितरि पितृतो भागकल्पनेत्युक्तत्वात् भवतु वा स्वार्जितवत्पितुरिच्छयैवेत्याशंकित आह।
भूर्या पितामहोपात्ता निबंधो द्रव्यमेव वा। तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैव हि॥ भूः शालिक्षेत्रादिका।
निबंधः एकस्य पर्णभरकस्य यं नियतपर्णानि। तथैकस्य क्रमुकफलभरकस्य यंति क्रमुकफलानि इत्याद्युक्तलक्षणः ८
।द्रव्यं सुवर्णरजतादि यत्पितामहेन प्रतिग्रहविजयादिना लब्धं तत्र पितुः पुत्रस्य च स्वाम्यं लोकप्रसिद्धमिति कृत्वा
विभागोऽस्ति हि यस्मात्सदृशं समानं तस्मात् पितुरनिच्छयैव विभागो न पितृतो विभाग इयं॥ अतश्च पितृतो भागकल्प
नेत्येतत् स्वाम्ये समे पि वाचनिकं विभागं चेत्पिता कुर्यात् इत्येतत्स्वार्जितविषयं। तथा द्वावंशौ प्रतिपद्येत विभजन्ना
त्मनः पितेत्येतदपि स्वार्जितविषयं। जीवतोरस्वतंत्रः स्याज्जरयापि समन्वित इति एतदपि पारतंत्र्यं मातापित्रर्जि ७८
तद्रव्यविषयं। तथाऽनीशास्ते हि जीवतोरित्येतदपि। तथा च। सरजस्कायां मातरि सस्पृहे च पितरि भागमनि

२ यत्र पितामहे[redacted]ऽऽनेतत्र पितुः पुत्रस्य च स्वाम्यं। न चेष्टोऽहं स्वप्रतिग्रहैः

तत्र

यत्र प्रतिग्रहाद्युपायैर्विना २

छत्यपि पुत्रेच्छया पैतामहद्रव्यविभागो भवति तथाऽविभक्तेन पित्रा पैतामहे द्रव्ये दीयमाने विक्रीयमाणे वा पौत्रस्य निषेधे तृक्रैपे
प्यधिकारः पित्रार्जिते तु न निषेधाधिकारः तत्परतंत्रत्वात् अनुमतिस्तु कर्तव्या। तथा हि पैतामहे च स्वाम्ये यद्यपि ज
न्मनैव तथापि पैतृके पितृपरतंत्रत्वात् पितुश्चार्जकत्वेन प्राधान्यात् पित्रा विनियुज्यमाने स्वार्जिते द्रव्ये पुत्रेणा
नुमतिः कर्तव्या। पैतामहे तु द्वयोः स्वाम्यमविशिष्टमिति निषेधाधिकारोऽस्तीति विशेषः। मनुरपि। पैतृकं तु पिता
द्रव्यमनवाप्तं यदाप्नुयात्। न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितमिति। यत् पितामहार्जितं केनाप्यपहृतं पिता
महेनानुद्धृतं यदि पितोद्धरति तत्स्वार्जितमिव पुत्रैः सार्धमकामः स्वयं न विभजेदिति वदन् पितामहार्जितमका
मोऽपि पुत्रेच्छया पुत्रैः सह विभजेदिति दर्शयति॥ विभागोत्तरकालमुत्पन्नस्य पुत्रस्य कथं भागकल्पनेत्यत आह
॥विभक्तेषु सुतो जातः सवर्णायां विभागभाक्। विभक्तेषु पुत्रेषु पश्चात्सवर्णायां भार्यायामुत्पन्नो विभागभाक्
।विभज्यत इति विभागः तं भजत इति विभागभाक्॥ पित्रोरूर्ध्वं तयोरंशं लभत इत्यर्थः। मातृभागं चासत्यां दुहि
तरि मातुर्दुहितरः शेषमित्युक्तत्वात्। असवर्णायामुत्पन्नस्तु स्वांशमेव पित्र्याल्लभते मातुर्भागं तु सर्वं॥ एतदे
व मनुनोक्तं। ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनमिति पित्रोरिदं पित्र्यमिति व्याख्येयं। अनीशाः पूर्वजाः पि

७९ त्रो भ्रातुर्भागे विभक्तज इति स्मरणात्। विभक्तयोर्मातापित्रोर्विभागे विभागात्पूर्वमुत्पन्नो न स्वामी॥ विभक्तजे त्वभ्रातु
र्भागे न स्वामीत्यर्थः। तथा विभागोत्तरकाले पित्रा यत्किंचिदर्जितं तत्सर्वं विभक्तजस्यैव पुत्रैः सह विभक्तेन पित्रा य
त्स्वयमर्जितं। विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृता इति स्मरणात्। ये विभक्ताः पित्रा सह संसृष्टास्तैः सार्द्धं विभक्त पितुरूर्ध्वं
जो विभजेत्। यथाह मनुः। संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सहेति॥ ॥पितुरूर्ध्वं पुत्रेषु विभक्तेषु पश्चादुत्पन्नस्य
कथं भागकल्पनेत्यत आह। दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्। तस्य पितरि प्रेते भ्रातृभिर्विभागस
मये ऽस्पष्टगर्भायां मातरि भ्रातृविभागोत्तरकालमुत्पन्नस्य विभागस्तद्विभागः कृत इत्यत आह। दृश्याद्वा तन्निर्गृ
हीताद्धनात्कीदृशादायव्ययविशोधितात्॥ आयः प्रतिदिवसं प्रतिमासं प्रत्यब्दं वा यदुत्पद्यते। व्ययः पितृकृतर्णा
पाकरणं ताभ्यामायव्ययाभ्यां तच्छोधितं तस्मादुद्धृत्य तद्भागो दातव्यः स्यात्। एतदुक्तं भवति। भ्रातृषु भागेषु तदु खिंकं
द्धमाये प्रवेश्य पितृकृतर्णमपनीयावशिष्टेभ्यः स्वेभ्यो भागेभ्यः किंचित्किंचिदुद्धृत्य विभक्तजस्य भागः स्वभाग
समः कर्तव्य इति॥ एतच्च विभागसमये भ्रातृभार्यायामप्रजस्य ऽस्पष्टगर्भायां विभागादूर्ध्वमुत्पन्नस्यापि वे
दितव्यं। स्पष्टगर्भायां तु प्रसवं प्रतीक्ष्य विभागः कर्तव्यः। यथाह वशिष्ठः। अथ भ्रातॄणां दायविभागो याश्चान ७९

पत्याः स्त्रियस्तासामापुत्रलाभादिति। गृहीतगर्भाणामाप्रसवात्प्रतीक्षणमिति योजनीयं॥ ॥विभक्तजः पित्र्यं मा
तृकं च सर्वं धनं गृह्णातीत्युक्तं। तत्र यदि विभक्तः पिता माता वा विभक्ताय पुत्राय स्नेहवशादाभरणादिकं प्रयच्छति
तत्र विभक्तजेन दानप्रतिषेधो न कर्तव्यो नापि दत्तं प्रत्याहर्तव्यमित्याह। पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत्। माता
पितृभ्यां विभक्ताभ्यां पूर्वं विभक्तस्य पुत्रस्य यद्दत्तमलंकारादि तत्तस्यैव पुत्रस्य न विभक्तजस्य स्वं भवति। न्यायसा
म्यात्। विभागात्प्रागपि यस्य यद्दत्तं तस्यैव तथा ऽसति विभक्तजे विभक्तयोः पित्रोरंशान्दद्युः विभजतां यस्य यद्दत्तं तत्तस्यै भ
व नान्यस्येति वेदितव्यं। जीवद्विभागे स्वपुत्रसमांशित्वं पत्नीनामुक्तं। यदि कुर्यात्समानंशानित्यादिना॥ पितुरूर्ध्ववि
भागे पितृपत्नीनां स्वपुत्रसमांशित्वं दर्शयितुमाह। पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत्। पितुः [illegible] प्रापणादूर्ध्वं विभ
जतां माता पित्रपुत्रांशं हरेत्। यदि स्त्रीधनं न दत्तं दत्ते त्वर्द्धांशहारिणीति वक्ष्यते॥ ॥पितरि प्रेते यद्यसंस्कृता भ्रात
रः संति तत्संस्कारे को धिकृत इत्यत आह॥ असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः॥ पितुरूर्ध्वं विभ
जद्भिर्भ्रातृभिरसंस्कृता भ्रातरः समुदायद्रव्येण संस्कर्तव्याः। असंस्कृतासु भगिनीषु विशेषमाह। भगिन्यश्च
निजादंशाद्दत्वांशं तु तुरीयकं। अस्यार्थः। भगिन्यश्चासंस्कृताः संस्कर्तव्या भ्रातृभिः किं कृत्वा निजादंशाच्चतुर्थ

८० मंशं दत्वा। अनेन दुहितरोपि पितुरूर्ध्वं मंशभागिन्य इति गम्यते। तत्र निजादंशादिति प्रत्येकं परिकल्पितादंशादुद्
धृत्य चतुर्थांशो दातव्य इत्ययमर्थो न भवति। किंतु यज्जातीया कन्या तज्जातीयपुत्रभागाच्चतुर्थांशभागिनी सा
कर्तव्या। एतदुक्तं भवति। यदि ब्राह्मणी सा कन्या तदा ब्राह्मणीपुत्रस्य यावानंशो भवति तस्य चतुर्थांशस्तस्या भव
तीति। तद्यथा यदि कस्यचिद्ब्राह्मणस्यैव पत्नी पुत्रश्चैकः कन्या चैका तत्र पित्र्यं सर्वमेव द्रव्यं द्विधा विभज्य तत्रैकं
भागं चतुर्द्धा विभज्य तुरीयांशं कन्यायै दत्वा शेषं पुत्रो गृह्णीयात्। यदि तु द्वौ पुत्रावेका कन्या तदा पितृधनं सर्वं
त्रिधा विभज्य तत्रैकं भागं चतुर्द्धा विभज्य तुरीयमंशं कन्यायै दत्वा शेषं द्वौ पुत्रौ विभज्य गृह्णीतः। अथ त्वेकः पु
त्रो द्वे कन्ये तदा पितृधनं त्रिधा विभज्य एकं भागं चतुर्द्धा विभज्य तत्र द्वौ भागौ द्वाभ्यां कन्याभ्यां दत्वा वशिष्टं स
र्वं पुत्रो गृह्णाति। एवं समानजातीयेषु समविषमेषु भ्रातृषु भगिनीषु च योजनीयं। यदा तु ब्राह्मणीपुत्र एकः क्ष
त्रिया कन्यैका। तत्र पितृधनं सप्तधा विभज्य क्षत्रियापुत्रभागांस्त्रींश्चतुर्द्धा विभज्य तुरीयांशं क्षत्रिया कन्या
यै दत्वा शेषं ब्राह्मणीपुत्रो गृह्णाति। यदा तु द्वौ ब्राह्मणीपुत्रौ क्षत्रिया कन्या चैका तत्र पित्र्यं धनमेकादशधा
विभज्य तेषु त्रीन् त्रीन् क्षत्रियापुत्रभागांश्चतुर्द्धा विभज्य चतुर्थांशं क्षत्रिया कन्यायै दत्वा शेषं सर्वं ब्राह्मणी ८०

Dr. BHAU DAJI MEMORIAL

पुत्रौ विभज्य गृह्णीतः। एवं जातिवैषम्ये भ्रातॄणां भगिनीनां च संख्यायाः साम्ये वैषम्ये च सर्वत्रोहनीयं। न च दत्वां
शं तु तुरीयकमिति तुरीयांशविवक्षया संस्कारमात्रोपयोगिद्रव्यं दत्वेति व्याख्यानं युक्तं। मनुवचनविरोधात्।
श्यः स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्। स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः इति। अस्यार्थः। ब्राह्मणा
दयो भ्रातरो ब्राह्मणीप्रभृतिभ्यो भगिनीभ्यः स्वेभ्यः स्वजातिविहितेभ्योंऽशेभ्यश्चतुरोंऽशान् हरेद्विप्रदस्यादिव
क्षमाणेभ्यः स्वात्स्वादंशादात्मीयादात्मीयाद्भागाच्चतुर्थं चतुर्थं भागं दद्युः। न चात्रात्मीयभागादुद्धृत्य चतुर्थां
शो देय इत्युच्यते। किंतु स्वजातिविहितादेकस्मादेकस्मादंशात्तुर्थं कृत्स्नमेकस्यै कन्यायै चतुर्थांशो देय इति एक
जातिवैषम्ये संख्यावैषम्ये च भागकॢप्तिरुक्तैव। पतिताः स्युरदित्सव इत्यकरणे प्रत्यवायश्रवणात्। अव
श्यदातव्यता प्रतीयते। अत्रापि चतुर्भागवचनमविवक्षितं संस्कारोपयोगिद्रव्यदानमेव विवक्षितमिति चेत्
न। स्मृतिद्वयेपि चतुर्थांशदानाविवक्षायां प्रमाणाभावाद्दाने प्रत्यवायश्रवणाच्चेति। यदपि केश्चिदुच्यते।
अंशदानविवक्षायां बहुभ्रातृकायां बहुधनत्वं बहुभगिनीकस्य च निर्द्धनता प्राप्नोतीति तदुक्तरीत्या परिहृ
तमेव। न त्वात्मीयाद्भागादुद्धृत्य चतुर्थांशस्य दानमुच्यते। येन तथा स्यात्। ततश्चासहायमेधातिथिप्रभृती

नोव्याख्यानमेवचतुरस्रे।नभारुचेस्मोस्तेस्थितुरुद्धं कन्यायांशभागिनीपूर्वंतु यत्किंचित्पितादद्यातिनदेवलभ
८१ नेविशेषवचनाभावादितिसर्वमनवद्यं।एवंविभागेचेत्पिताकुर्यादित्यादिनाग्रंथेनसमानजातीयानांभ्रातृ
णांपरस्परंपित्राचसहविभागक्लृप्तिरुक्ता।अधुनाभिन्नजातीयानांविभागमाह।चतुस्त्रिद्व्येकभागाःस्युर्व
र्णशोब्राह्मणात्मजाः।क्षत्रजास्त्रिद्व्येकभागाविड्जास्तुद्व्येकभागिनः।तिस्रोवर्णानुपूर्व्येणेतिब्राह्मणस्यचत
स्रःक्षत्रियस्यतिस्रोवैश्यस्यद्वेशूद्रस्यैकेतिभार्यादर्शितास्तत्रब्राह्मणात्मजाब्राह्मणोत्पन्नावर्णशोवर्णशब्दे
नब्राह्मणादिवर्णास्त्रियउच्यंते।संख्यैकवचनाद्वीप्सायामित्यधिकरणकारकादेकवचनाद्वीप्सायांशस्।
अतश्चवर्णेवर्णेब्राह्मणोत्पन्नायथाक्रमंचतुस्त्रिद्व्येकभागाःस्युर्भवेयुः।एतदुक्तंभवति।ब्राह्मणेनब्राह्मण्या
मुत्पन्नाएकैकशश्चतुरोभागांल्लभंतेतेनैवक्षत्रियायामुत्पन्नास्त्रीन्वैश्यायांद्वौद्वौशूद्रायामेकमेकमिति।
क्षत्रजाःक्षत्रियेणोत्पन्नावर्णशइत्यनुवर्ततेयथाक्रमंत्रिद्व्येकभागाःक्षत्रियेणक्षत्रियायामुत्पन्नाःप्रत्ये
कंत्रीस्त्रीन्भागांल्लभंतेवैश्यायांद्वौद्वौशूद्रायामेकैकंविड्जावैश्योत्पन्नाअत्रापिवर्णशइत्यनुवर्तते।य
थाक्रमंद्व्येकभागिनोवैश्यायामुत्पन्नाःप्रत्येकंद्वौद्वौलभंतेशूद्रायामेकैकंशूद्रस्यैकैवभार्याइतिभिन्नजाती ८१

यपुत्राभावात्।तत्पुत्राणांपूर्वोक्तएवभागः।यद्यपिचतुस्त्रिद्व्येकभागाइत्यविशेषेणोक्तंतथापिप्रतिग्रहप्राप्तभूव्य
तिरिक्तविषयमिदंद्रष्टव्यं यतःस्मरंति॥नप्रतिग्रहभूर्देयाक्षत्रियादिसुतायवै॥यद्यप्येषांपितादद्यान्मृतेवि
प्रासुतोहरेदिति॥प्रतिग्रहणात्क्रयादिलब्धाभूःक्षत्रियादिसुतानामपिभवत्येवशूद्रापुत्रस्यविशेषप्रतिषेधा
च्छूद्र्यांद्विजातिभिर्जातोनभूमेर्भागमर्हति।इति।यदिक्रयादिप्राप्ताभूःक्षत्रियादिसुतानांनभवेत्तदाशूद्रापु
त्रस्यविशेषप्रतिषेधोनोपपद्यतेयत्पुनर्ब्राह्मणक्षत्रियविशांशूद्रापुत्रोनरिक्थभाक्।यदेवास्यपितादद्यात्त क्थ
देवास्यधनंभवेदिति तदपिजीवतापित्रायदिशूद्रापुत्रायकिमपिप्रत्तंस्यात्तद्विषयं।यदातुप्रसाददानंनास्तितदैकांशभा
ग गित्यविरुद्धंसर्वंविभागेनोक्तंकिंचिदुच्यते।अन्योन्यापहृतंद्रव्यंविभक्तेयत्तुदृश्यते।तत्पुनस्तेसमैरंशैर्विभजेरन्नितिस्थि
तिः।परस्परापहृतंसमुदायद्रव्यंविभागकालेचाज्ञातंविभक्तेपितृधनेयत्तुदृश्यतेतत्समैरंशैर्विभजेरन्नितिस्थितिःशास्त्र
मर्यादा।अत्रसमैरंशैरितिवदताउद्धारविभागोनिषिद्धः।विभजेरन्नितिवदतायेनदृष्टंतेनैवनग्राह्यमितिदर्शितं
।एवंवचनस्यार्थवत्त्वान्नसमुदायद्रव्यापहारेदोषाभावपरत्वं।ननुमनुनाज्येष्ठस्यैवसमुदायद्रव्यापहारेदोषोदर्शि
तोनकनीयसां।योज्येष्ठोविनिकुर्वीतलोभाद्भ्रातृन्यवीयसः।सोऽज्येष्ठःस्यादभागश्चनियंतव्यश्चराजभिरिति

दृष्टोयदि चौरैरपहृतः तदा आपूपिकमपि सुतरामपहृतं

८२ दत्तानैतद्घनः संभावितस्वातंत्र्यस्य पितृस्थानीयस्य ज्येष्ठस्यापि दोषं वदता ज्येष्ठपरतंत्राणां कनीयसां पुत्रस्थानीया
नां दंडापूपिकनीत्या सुतरां दोषो दर्शित एव तथा च विज्ञेशेषेणैव दोषः स्मर्यते। यो वै भागिनं भागान्नुदते च्यवते वैनं
स यदि वैनं न च्यवतेऽथ पुत्रमथ पौत्रं च्यवत इति। यो भागिनं भागार्हं भागान्नुदते भागादपाकरोति भागं तस्मै न प्रयच्छ
ति स च भागानुन्न एनं नोतारं च्यवते नाशयति दोषिणं करोतीति यदि तं न नाशयति तदा तस्य पुत्रं पौत्रं च नाशयतीति
ज्येष्ठविशेषमंतरेणैव साधारणद्रव्यापहारिणां दोषः श्रुतः अथ साधारणं द्रव्यमात्मनोपि स्वं भवतीति स्वबुद्ध्या
गृह्यमाणं न दोषमावहतीति मतं। तदसत्। स्वबुद्ध्या गृहीतेपि अवर्जनीयतया परस्वमपि गृहीतमेवेति निषे
धानुप्रवेशाद्दोषमावहत्येव। यथा मौद्गे चरौ विपन्ने सदृशतया माषेषु गृह्यमाणेषु मैं ज्ञीया माषा इति निषेधो न प्रवि
शति मुद्गावयवबुद्ध्या गृह्यमाणत्वादिति पूर्वपक्षिणोक्ते मुद्गावयवेषु गृह्यमाणेषु अवर्जनीयतया माषावयवा
अपि गृह्यंत एवेति निषेधः प्रविशत्येवेति राद्धांतिनोक्तं। तस्माद्वचनान्न्यायतश्च साधारणद्रव्यापहारे दोषोस्त्ये
वेति स्थितं। द्व्यामुष्यायणस्य भागविशेषं दर्शयंस्तस्य स्वरूपमाह। अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः॥ उभ ८२
योरप्यसौ रिक्थी पिंडदाता च धर्मतः। अपुत्रां गुर्वनुज्ञातः इत्याद्युक्तविधिना पुत्रेण देवरादिना परक्षेत्रे परस्य भा

प्रवर्तते

र्यायां गुरुनियोगेनोत्पादितः उभयोर्बीजिक्षेत्रिणोरसौ रिक्थी रिक्थहारी पिंडदाता च धर्मत इत्यस्यार्थः॥ यदासौ
नियुक्तो देवरादिः स्वयमप्यपुत्रः पुत्रस्य क्षेत्रे स्वपरपुत्रार्थं प्रवर्तीयं जनयति स हि पितृको द्व्यामुष्यायणो द्वयोरपि
रिक्थहारी पिंडदाता च॥ यदा तु नियुक्तः पुत्रवान्केवलं क्षेत्रिणः पुत्रार्थं प्रदीयते। तदा तदुत्पन्नः क्षेत्रिण एव पुत्रो भवति य
तिन बीजिनः स च नियमेन न बीजिनः रिक्थहारी पिंडदो वेति तथोक्तं मनुना॥ क्रियाभ्युपगमात् क्षेत्रं बीजार्थं यत्प्र
दीयते। तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव चेति। क्रियाभ्युपगमादिति। अत्रोत्पन्नमपत्यमावयोरुभयोरपि
भवत्विति संविदंगीकरणे यत् क्षेत्रं क्षेत्रस्वामिना बीजवपनार्थं बीजिने दीयते तत्र तस्मिन् क्षेत्रे उत्पन्नस्यापत्य
स्य बीजिक्षेत्रिणौ भागिनौ स्वामिनौ दृष्टौ महर्षिभिः तथा॥ फलं त्वनभिसंधाय क्षेत्रिणां बीजिनां तथा। प्रत्यक्षं क्षे
त्रिणामर्थो बीजाद्योनिर्बलीयसीति। फलं त्वनभिसंधायेति अत्रोत्पन्नमपत्यमावयोरुभयोरस्त्वित्येवमनभिसं
धाय परक्षेत्रे यदपत्यमुत्पाद्यते तदपत्यं क्षेत्रिण एव यतो बीजाद्योनिर्बलीयसी। गवाश्वादिषु तथादर्शनात्
। अत्रापि नियोगो वाग्दत्ताविषय एव इतरस्य नियोगस्य मनुना निषिद्धत्वात्। देवराद्वा सपिंडाद्वा स्त्रिया सम्यङ्नि
युक्तया। प्रजेप्सिताधिगंतव्या संतानस्य परिक्षये॥ विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि। एकमुत्पादयेत्पु

त्रेन द्वितीयं कथं च नेत्येवं नियोगमुपन्यस्य॥ मनुः स्वयमेव निषेधति। नान्यस्मिन्विधवा नारी नियोक्तव्या द्वि-
८२ जातिभिः। अन्यस्मिन्हि नियुंजाना धर्मं हन्युः सनातनं। नोद्वाहिकेषु मंत्रेषु नियोगः कीर्त्यते क्वचित्। न वि-
वाहविधावुक्तं विधवावेदनं पुनः। एवं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः। मनुष्याणामपि प्रोक्तो वेने राज्यं प्र-
शासति। स महीमखिलां भुंजन्राजर्षिप्रवरः पुरा। वर्णानां संकरं चक्रे कामोपहतचेतनः। ततः प्रभृति यो मोहात्प्र-
मीतपतिकां स्त्रियं। नियोजयत्यपत्यार्थं गर्हंते तं हि साधव इति। न च विहितप्रतिषिद्धत्वाद्विकल्प इति मंतव्यं नि-
योक्तॄणां निंदाश्रवणात्। स्त्रीधर्मेषु व्यभिचारस्य बहुदोषत्वश्रवणात् संयमस्य प्रशस्तत्वाच्च। यथाह मनुरेव। का-
मं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः। न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु इति॥ जीवनार्थं पुरुषांतराश्रयणं प्र-
तिषिध्य। आसीतामरणात्क्षांता नियता ब्रह्मचारिणी। यो धर्म एकपत्नीनां कांक्षंती तमनुत्तमं। अनेकानि सहस्रा-
णि कौमारब्रह्मचारिणां। दिवं गतानि विप्राणां अकृत्वा कुलसंततिं। मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः। अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते। सेह निंदामवाप्नोति परलोका- ८२
च्च हीयत इति। पुत्रार्थमपि पुरुषांतराश्रयणं निषेधति तस्माद्विहितप्रतिषिद्धत्वाद्विकल्प इति न युक्तं। एवं विवाहसं-

स्कृताया नियोगे प्रतिषिद्धे कस्तर्हि धर्म्यो नियोग इत्यत आह। यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः। तामनेन
विधानेन निजो विंदेत देवरः। यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रतां। मिथो भजेताप्रसवात्सकृत्सकृदृतावृतावि-
ति। यस्मै वाग्दत्ता कन्या सप्रतिग्रहमंतरेणैव तस्याः पतिरित्यस्मादेवगम्यते। तस्मिन्प्रेते देवरस्तस्य ज्येष्ठः कनिष्ठो वा
निजः सोदरो विंदेत परिणयेत्। यथाविधि यथाशास्त्रमधिगम्य परिणीयानेन विधानेन घृताभ्यंगवाङ्नियमादि-
ना शुक्लवस्त्रां शुचिव्रतां मनोवाक्कायसंयतां मिथो रहस्या गर्भग्रहणादृतावृतुः एकवारं गच्छेत्। अयं विवाहो वाचनि-
कोद्घृताभ्यंगादिनियमवन्नियुक्ताभिगमनांगमिति न देवरस्य भार्यात्वमुत्पादयत्यतस्तदुत्पन्नमपत्यं क्षेत्र-
स्वामिन एव तिन देवरस्य संविदाद्भयोरपि। समानासमानजातीयानां पुत्राणां भागक्लृप्तिरुक्ता॥ अधुना मुख्य-
गौणपुत्राणां दायग्रहणव्यवस्थां दर्शयिष्यंस्तेषां स्वरूपं तावदाह। औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा। गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः। कानीनः कन्यकाजातो माता-
महसुतो मतः। अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः। दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्। क्रीतश्च ता-
भ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः। दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः। उत्सृष्टो गृह्यते यस्तु सोपविद्धो भ-

८४ वेत्सुतः॥ उरसो जातः औरसः पुत्रः स च धर्मपत्नीजः सवर्णा धर्म्यविवाहोढा धर्मपत्नी तस्यां जातः औरसः पुत्रो
मुख्यः तत्समः पुत्रिकासुतः तत्समः औरससमः पुत्रिकायाः सुतः पुत्रिकासुतः। अत एव औरससमः यथाह वसि
ष्ठः अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृतां। अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति अथवा पुत्रिकैव सुतः पु
त्रिकासुतः सो औरससम एव पित्रवयवानामल्पत्वान्मात्रवयवानां बाहुल्याच्च। यथाह वसिष्ठः तृतीयः पुत्रः पु पू माय
द्वितीय त्रिकैवेति तृतीयः पुत्रिकैवेत्यर्थः द्व्यामुष्यायणस्तु जनकस्यौरसादपकृष्टो ऽन्यक्षेत्रोत्पन्नत्वात्। क्षेत्रजः क्षेत्रजा
तस्सगोत्रेणेतरेण वा इतरेण सपिण्डेन देवरेण वोत्पन्नः पुत्रः क्षेत्रजः। गूढजः पुत्रो भर्त्तृगृहे प्रच्छन्न उत्पन्नो ही
नाधिकजातीयपुरुषजत्वपरिहारेण पुरुषविशेषजत्वनिश्चयाभावेपि सवर्णजत्वनिश्चये सति बोद्धव्यः कानी
नस्तु कन्यकायामुत्पन्नः पूर्ववत्सवर्णात् स मातामहस्य पुत्रः यद्यनूढा सा भवेत् यदा पितृगृह एव संस्थिता
अथोढा तदा वोढुरेव पुत्रः यथाह मनुः पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः तं कानीनं वदेन्नाम्ना वोढुः क
न्या समुद्भवमिति। पौनर्भवस्तु पुत्रो ऽक्षतायां क्षतायां वा पुनर्भ्वां सवर्णादुत्पन्नः। मात्रा भर्त्रनुज्ञया प्रो
षिते प्रेते वा भर्त्तरि पित्रा वा मातृभ्यां वा सवर्णा यस्मै यो दीयते स तस्य दत्तकः पुत्रः तथाह मनुः। माता पिता ८४

वा दद्यातां यमद्भिः पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः॥ इति। आपद्ग्रहणादनापदि न देयो दातुरयं प्रति
षेधः। तथा एकपुत्रो न देयः। न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वेति वसिष्ठस्मरणात्। तथा ऽनेकपुत्रसद्भावेपि ज्येष्ठो न देयः
ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः इति तस्यैव पुत्रकार्यकरणे मुख्यत्वात्। पुत्रप्रतिग्रहप्रकारश्च पुत्रं प्रतिग्र
हीष्यन्बन्धूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा ऽदूरबान्धवं बन्धुसंनिकृष्ट एव प्रतिगृह्णीयादिति
वसिष्ठेनोक्तः। अदूरबान्धवमित्यनेन देशभाषाविप्रकृष्टस्य प्रतिषेधः एवं क्रीतस्वयंदत्तकृत्रिमेष्वपि योज्यं समानन्या
यत्वात्। क्रीतस्तु पुत्रस्ताभ्यां मातापितृभ्यां मातापित्रा वा विक्रीतः पूर्ववत् न त्वेकं पुत्रं ज्येष्ठं च वर्जयित्वा। आपदि स
वर्ण इत्येव यत्तु मनुनोक्तं। क्रीणीयाद्यस्त्वपत्यार्थे मातापित्रोर्यमन्तिकात्। स क्रीतकः सुतस्तस्य सदृशोसदृशोपि
वेति। तद्गुणैः सदृशो ऽसदृशो वेति व्याख्येयं न जात्या सजातीयेष्वयं प्रोक्तस्तनयेष्वित्युपसंहारात्। कृत्रिमः स्वा
त्स्वयं कृतः कृत्रिमस्तु पुत्रः स्वयं पुत्रार्थिना धनक्षेत्रप्रदर्शनादिप्रलोभनैः पुत्रीकृतो मातापितृविहीनस्तत्सद्भा
वे तस्य परतन्त्रत्वात्। दत्तात्मा तु पुत्रो यो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति स्वयं दत्त उप
गतः। सहोढजस्तु गर्भे स्थितो गर्भिण्यां परिणीतायां यः परिणीतः स वोढुः पुत्रः अपविद्धो मातापितृभ्यामुत्सृष्टो

८५ योऽगृह्यतेसगृहीतः पुत्रः सर्वत्रासवर्ण इत्येव। एवंमुख्यपुत्राननुक्रम्यैतेषां दायग्रहणे क्रममाह। पिंडदोंऽशहरश्चै
षां पूर्वाभावे परः परः। एतेषां पूर्वोक्तानां पुत्राणां द्वादशानां पूर्वपूर्वस्याभावे उत्तर उत्तरः पिंडदः श्राद्धदोंऽशहरो धन
हरो वेदितव्यः। औरसपौत्रिकेयसमवाये औरसस्यैव धनग्रहणे प्राप्ते। मनुरपवादमाह॥ पुत्रिकायां कृतायां तु
यदि पुत्रोनुजायते। समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि स्त्रिया इति। तथान्येषामपि पूर्वस्मिन्पूर्वस्मिन् स
त्यप्युत्तरेषां पुत्राणां चतुर्थांशभागित्वमुक्तं वसिष्ठेन। तस्मिंश्च प्रतिगृहीते औरस उत्पद्येत चतुर्थभागभागी
स्यात् दत्तक इति। दत्तकग्रहणं क्रीतकृत्रिमादीनां प्रदर्शनार्थं नोपुत्रीकरणाविशेषात्। तथा च कात्यायनः। उत्प
न्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः। सवर्णा असवर्णास्तु ग्रासाच्छादनभाजन इति। सवर्णाः क्षेत्रजदत्तकादय
स्ते सत्यौरसे चतुर्थांशहराः। असवर्णाः कानीनगूढोत्पन्नसहोढपौनर्भवास्त्वौरसे सति न चतुर्थांशहराः किं
तु ग्रासाच्छादनभाजनाः। यदपि वसिष्ठवचनं। अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः। पौनर्भवाश्च नैवैते पिं
डरिक्थांशभागिन इति। तदप्यौरसे सति न तुर्यांशनिषेधपरमेव। औरसाद्यभावे तु कानीनादीनामपि सकलपि
त्र्यधनग्रहणमस्त्येव पूर्वाभावे परः पर इति वचनात्। यदपि मनुवचनं। एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः। ८५

डाक्टर भाऊदाजीइत्याख्यस्यस्मारकम्
DR. BHAU DAJI MEMORIAL

शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनमिति तदपि दत्तकादीनामौरसप्रतिकूलत्वे निर्गुणत्वे च वेदितव्यं तत्र क्षेत्र
जस्य विशेषो दर्शितः स्तेनैव। षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात्। औरसो विभजन्दायं पित्र्यं पंचममेव वेति। प्रतिकू
लनिर्गुणत्वसमुच्चये षष्ठमंशं समेकतरसद्भावे पंचममिति विवेक्तव्यं। यदपि मनुना॥ पुत्राणां षड्दायमुपन्यस्य पूर्वषट्
स्य दायादबांधवत्वमुत्तरषट्कस्यादायादबांधवत्वमुक्तं। औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च। गूढोत्पन्नोपविद्धश्च
दायादा बांधवाश्च षट्। कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयंदत्तश्च शौद्रश्च षडदायादबांधवा इति। त
दपि स्वपितृसपिंडसमानोदकानां संनिहितरिक्थहरांतराभावे पूर्वषट्कस्य तद्रिक्थहरत्वं उत्तरषट्कस्य च तन्नास्ति
बांधवत्वं पुनः समानगोत्रत्वेन सपिंडत्वेन चोदकप्रदानादिकार्यकरत्वं वर्गद्वयस्यापि सममेवेति व्याख्येयं। गोत्ररि
क्थे जनयितुर्न भजेत्कृत्रिमः सुतः। गोत्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधेत्यत्र दत्रिमग्रहणस्य पुत्रप्रतिनिधिद
र्शनार्थत्वात्। पितृधनहारित्वं तु पूर्वस्य पूर्वस्याभावे सर्वेषामविशिष्टं। तस्मात्तेनपितरः पुत्रा रिक्थहराः पितुरि
त्यौरसव्यतिरिक्तानां पुत्रप्रतिनिधीनां सर्वेषामृक्थहारित्वप्रतिपादनपरत्वात्। औरसस्य एक एवौरसः पुत्रः
पित्र्यस्य वसुनः प्रभुरित्यनेनैव कृत्स्नभाक्त्वोक्तत्वात्। दायादशब्दस्य दायादानपि दापयेदित्यादौ पुत्रव्यति

रिक्तरिक्थभाग्विषयत्वेन प्रसिद्धत्वात्। वासिष्ठादिषु वर्गद्वयेपि कस्यचिद्ग्रन्थे येन पाठो गुणवदगुणवद्विषयो वेदि
८६ तव्यः। गौतमीये तु पौत्रिकेयस्य दशमत्वेन पाठोपि जातीयविषयः। तस्मात्स्थितमेतत्। पूर्वाभावे परः परोंशभागि
ति। यत्तु। भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत्। सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति। तदपि भ्रातृपुत्रस्य वी
पुत्रीकरणसंभवे ऽन्येषां पुत्रीकरणनिषेधार्थं न पुनः पुत्रत्वप्रतिपादनाय तत्सुतागोत्रजा बंधुरित्यनेन विरोधा
त्। इदानीमुक्तोपसंहारव्याजेन तत्रैव नियममाह। सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः। समानजातीयेष्वेव पुत्रेषु
अयं पूर्वाभावे परः परइत्युक्तो विधिर्न भिन्नजातीयेषु तत्र कानीनगूढोत्पन्नसहोढपौनर्भवानां सवर्णत्वं जनकद्वा
रेण स्वरूपेण तेषां वर्णजातिलक्षणाभावस्योक्तत्वात्। तथानुलोमजानां मूर्धावसिक्तादीनां औरसेष्वंतर्भावात्तेषा
मप्यभावे क्षेत्रजादीनां दायहरत्वं बोद्धव्यं शूद्रापुत्रस्त्वौरसोपि कृत्स्नं भागं अन्याभावेपि न लभते। यथाह मनुः। यद्य
पि स्यात्तु सत्पुत्रोप्यसत्पुत्रोथवा भवेत्। नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः इति। यदि सत्पुत्रो विद्यमानद्विजाति
पुत्रोप्यसत्पुत्रोऽविद्यमानद्विजातिपुत्रो वा स्यात्। तस्मिन्मृते क्षेत्रजादिर्वा अन्यो वा सपिंडः शूद्रापुत्राय तद्ध ८६
नाद्दशमांशादधिकं धनं न दद्यादित्यस्मादेव। एवं क्षत्रियावैश्यापुत्रयोः सवर्णापुत्राभावे सकलधनग्रहणं ग

म्यते॥ अधुना शूद्रधनविभागे विशेषमाह॥ जातोपि दास्यां शूद्रेण कामतोंशहरो भवेत्। मृते पितरि कुर्युस्तं भ्रातरस्त्वर्ध
भागिनं। अभ्रातृको हरेत्सर्वं दुहितॄणां सुताद्दते। शूद्रेण दास्यामुत्पन्नः पुत्रः कामतः पितुरिच्छया भागं लभते। पितुरूर्ध्वं य
दि परिणीतापुत्राः संति ते भ्रातरस्तं दासीपुत्रमर्धभागिकं कुर्युः स्वभागादर्धं दद्युरित्यर्थः। अथ परिणीतापुत्रा न संति
तदा दासीपुत्रः कृत्स्नं धनं गृह्णीयात्। यदि परिणीता दुहितरस्तत्पुत्रा वा न संति तत्सद्भावे त्वर्धभागिक एव दासीपुत्रः।
अत्र शूद्रग्रहणाद्द्विजातीनां दास्यामुत्पन्नः पितुरिच्छयाप्यंशं न लभते नाप्यर्धं इत एव कृत्स्नं किं त्वनुकूलश्चेज्जीवन
मात्रं लभते। मुख्यगौणसुतादायग्रहणरीतिरुक्ता। तेषामभावे सर्वेषां दायादक्रम उच्यते। पत्नी दुहितरश्चैव पितरौ भ्रातर
स्तथा। तत्सुतागोत्रजा बंधुः शिष्यः सब्रह्मचारिणः। एषामभावे पूर्वस्य धनभागुत्तरोत्तरः। स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्व
यं विधिः। पूर्वोक्ता द्वादश पुत्रा यस्य न संति असावपुत्रस्तस्य स्वर्यातस्य परलोकं गतस्य धनभाग्धनग्राही एषां पत्न्या
दीनामनुक्रांतानां मध्यात्पूर्वस्य पूर्वस्याभावे उत्तरोत्तरो धनभागिति संबंधः सर्वेषु मूर्धावसिक्तादिष्वनुलोमजेषु सूता
दिषु प्रतिलोमजेषु वर्णेषु च ब्राह्मणादिषु चायं दायग्रहणक्रमो वेदितव्यः। तत्र प्रथमं पत्नी धनभाक्। पत्नी विवाह
संस्कृता पत्युर्नो यज्ञसंयोग इति स्मरणात्। एकवचनं तु जात्यभिप्रायेण। अतश्च बह्व्यश्चेत्सजातीया विजाती

या श्वयथोक्तं विभक्तस्य धनं गृह्णन्ति। वृद्धमनुरपि॥ पत्न्याः समग्रधनग्रहणं वक्ति। अपुत्रा शयनं भर्तुः पालयंती व्रते स्थिता।
८७ पत्न्येव दद्यात्तत्पिंडं कृत्स्नमंशं लभेत चेति। बृहद्विष्णुरपि। अपुत्रधनं पत्न्यभिगामि तदभावे दुहितृगामि। तदभावे
पितृगामि तदभावे मातृगामि इति॥ कात्यायनेनापि॥ पत्नी भर्तुर्धनहरी या स्यादव्यभिचारिणी॥ तदभावे तु दुहिता
यद्यनूढा भवेत्तदिति। तथा अपुत्रस्यापि कुलजा पत्नी दुहितरोपि वा तदभावे पिता माता भ्राता पुत्राश्च कीर्तिताः इ
ति। बृहस्पतिरपि। कुलेषु विद्यमानेषु पितृभ्रातृसनाभिषु॥ असुतस्य प्रमीतस्य पत्नी तद्भागहारिणीति। एतद्विरु
द्धानि च वाक्यानि लक्ष्यंते। यथा। भ्रातॄणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत वा॥ विभजेरन्धनं तस्य शेषास्ते स्त्रीधनं
विना। भरणं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयात्। रक्षंति शय्यां भर्तुश्चेदाच्छिंद्युरितरासु चेति॥ पत्नीसद्भावे भ्रातॄणां
धनग्रहणं पत्नीनां च भरणमात्रं नारदेनोक्तं। मनुनापि। पिता हरेदपुत्रस्य रिक्थं भ्रातर एव चेत्यपुत्रस्य धनं पितुर्वा
भ्रातुर्वा इति दर्शितं। तथा। अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्यपि च वृत्तायां पितुर्माता हरेद्धनमि
ति॥ मातुः पितामह्याश्च धनसंबंधो दर्शितः। शंखेनापि। स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यं। तदभावे पितरौ हरे ८७
यातां। ज्येष्ठा वा पत्नीति। भ्रातॄणां पित्रोर्ज्येष्ठायाश्च पत्न्याः क्रमेण धनसंबंधो दर्शितः। कात्यायनेनापि। विभक्ते

अस्यार्थः॥ रिक्थं भजेत यदि बीजं लिप्सेतेति॥ द

संस्थिते द्रव्यं पुत्राभावे पिता हरेत्। भ्राता वा जननी वाथ माता वा तत्पितुः क्रमात्। इत्येवमादीनां विरुद्धार्थानां वाक्या
भीतेन नां धारेश्वरेण व्यवस्था दर्शिता। पत्नी गृह्णीयादित्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयं सा च यदि नियोगार्थिनी भव
ति। कुत एतन्नियोगसव्यपेक्षायाः पत्न्या धनग्रहणं न स्वतंत्राया इति पिता हरेदपुत्रस्येत्यादिवचनानां तत्र व्यवस्था
कारणं वक्तव्यं। नान्यद्व्यवस्थाकारणमस्तीति॥ गौतमवचनाच्च। पिंडगोत्रर्षिसंबद्धा रिक्थं भजेरन्स्त्री वानपत्यस्य
बीजं वा लिप्सेतेति। अस्यार्थः। पिंडगोत्रर्षिसंबद्धा अनपत्यस्य रिक्थं भजेरन्। स्त्री वा रिक्थं भजेत यदि बीजं लिप्स्य
तेति॥ मनुरपि। धनं यो बिभृयाद्भ्रातुर्मृतस्य स्त्रियमेव वा। सोपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनमिति॥ अनेनैतद्द
र्शयति। विभक्तधनेपि भ्रातर्युपरतेऽपत्यद्वारेणैव पत्न्या धनसंबंधो नान्यथेति। तथाऽविभक्तधनेपि। कनीया
न्ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि। समस्तत्र विभागः स्यादिति धर्मो व्यवस्थित इति॥ तथा वसिष्ठोपि रिक्थलोभा
न्नियोगप्रतिषेधान्नियोगद्वारक एव पत्न्या धनसंबंधो नान्यथेति दर्शयति। नियोगाभावेपि पत्न्या भरणमात्र
मेव नारदवचनात्। भरणं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयात्। इति योगीश्वरेणापि किल वक्ष्यते। अपुत्रा यो
षितश्चैषां भर्त्तव्याः साधुवृत्तयः। निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव चेति अपि च द्विजातिधनस्य यज्ञार्थत्वा

८८ तस्त्रीणां यत्नेऽनधिकारत्वाद्धनग्रहणमयुक्तं। तथा च केनापि स्मृतं। यज्ञार्थं द्रव्यमुत्पन्नं तत्रानधिकृतास्तु ये। अरि
क्थभाजस्ते सर्वे ग्रासाछादनभाजनाः। यज्ञार्थं विहितं वित्तं तस्मात्तद्विनियोजयेत्। स्थानेषु धर्मयुक्तेषु न स्त्रीमूर्ख
विधर्मिष्विति। तदनुपपन्नं। पत्नी दुहितरश्चेत्यत्र नियोगस्याप्रतीतेरप्रस्तुतत्वाच्च। अपि चेदमत्र वक्तव्यं। पत्न्या
धनग्रहणे नियोगो वा निमित्तं। तदुत्पन्नमपत्यं वा। तत्र नियोगस्यैव निमित्तत्वेऽनुत्पादितपुत्राया अपि धनसंबंधः
प्राप्नोति। उत्पन्नस्य पुत्रस्य धनसंबंधो न प्राप्नोति। अथ तदपत्यस्यैव निमित्तत्वं तथा सति पुत्रस्यैव धनसंबंधात्प
त्नीति नारब्धव्यं॥ अथ स्त्रीणां पतिद्वारको धनसंबंधः पुत्रद्वारको वा नान्यथेति मतं। तदप्यसत्। अध्यग्न्यध्या स्नुषामुखावलोकन काले
चतुर्थदिवसे वाहनिकं दत्तं च प्रीतिकर्मणि। भ्रातृमातृपितृप्राप्तं स्त्रीधनं षड्विधं स्मृतमित्यादिविरोधात्। किं च॥ सर्वपुत्राभा
वे पत्नी दुहितरश्चेत्यारब्धं। तत्र नियुक्ताया धनसंबंधं वदता क्षेत्रजस्यैव धनसंबंधोऽभिहितो भवति स च प्रागेवाभि
हित इति। अपुत्रप्रकरणे पत्नीति नारब्धव्यं। अथ पिंडगोत्रर्षिसंबद्धा रिक्थं भजेरन्स्त्री चानपत्यस्य बीजं लिप्सेतेति
गौतमवचनात् नियुक्ताया धनसंबंध इति तदप्यसत्। न हि यदि लिप्सेतेति तदाऽनपत्यस्य स्त्री धनं गृह्णीयादि ८८
त्ययमर्थोऽस्मात्प्रतीयते। किं तु अनपत्यस्य धने पिंडगोत्रर्षिसंबद्धा भजेरन् स्त्री वा बीजं वा लिप्सेत संयता वा भवेदिति।

तस्या धर्मांतरोपदेशः। वा शब्दस्य पक्षांतरवचनत्वेन समुच्चयार्थाप्रतीतेः। अपि च। संयता एव धनग्रहणे युक्ता न नियुक्ता याः
स्मर्तिलोकनिंदिता याः॥ अपुत्रा शयनं भर्तुः पालयंती व्रते स्थिता। पत्न्येव दद्यात्तत्पिंडं कृत्स्नमंशं लभेत चेति संयताया
धनग्रहणमुक्तं। तथा नियोगश्च निंदितो मनुना। नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः। अन्यस्मिन्हि नि
युंजाना धर्मं हन्युः सनातनमित्यादिना॥ यत्तु वसिष्ठवचनं। रिक्थलोभान्नास्ति नियोग इति। तद्विभक्ते संसृष्टिनि वा भ
र्तरि प्रेते तस्या धनसंबंधो नास्तीति स्वापत्यस्य धनसंबंधार्थं नियोगो न कर्तव्य इति व्याख्येयं। यदपि नारदवचनं। भ
रणं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयादिति। तदपि संसृष्टानां तु यो भागस्तेषामेव स इष्यत इति संसृष्टिनां प्रस्तुतत्वात्
तत्स्त्रीणामनपत्यानां भरणमात्रप्रतिपादनपरं। न चाप्यरूणामप्रजाः श्रेयादित्येतस्य संसृष्टिविषयत्वे संसृष्टानां
तु यो भाग इत्यनेन पौनरुक्त्यमाशंकनीयं यतः पूर्वोक्तविवरणेन स्त्रीधनस्याविभाज्यत्वं। तत्स्त्रीणां च भरणमात्रं वि
धीयते। यदप्यपुत्रा योषितश्चैषां मिस्यादिवचनं तत्क्लीबादिस्त्रीविषयमिति वक्ष्यते। यत्तु। द्विजातिधनस्य यज्ञार्थ
त्वात्स्त्रीणां च यज्ञेऽनधिकाराद्धनग्रहणमयुक्तमिति॥ तदसत्॥ सर्वस्य द्रव्यस्य यज्ञार्थत्वे दानहोमाद्यसिद्धेः।
अथ यज्ञशब्दस्य धर्मोपलक्षणत्वात् दानहोमादीनामपि धर्मार्थत्वान्नदर्थत्वमविरुद्धमिति मतं। एवं तर्ह्यर्थका

मयोर्धनसाध्ययोरसिद्धिरेव स्यात्। तथा सति धर्ममर्थं च कामं च यथाशक्ति न हापयेत्। तथा न पूर्वाह्णमध्यंदि
८९ नापराह्णानफलान् कुर्याद्यथाशक्ति धर्मार्थकामेभ्यस्तथा न तथैतानि शक्यं तेन सन्नियंतुमसेवयेत्यादियाज्ञ
वल्क्यगौतममनुवचनविरोधः। अपि च। धनस्य यज्ञार्थत्वे हिरण्यं धार्यमिति हिरण्यधारणस्य क्रत्वर्थता नि
राकरणेन पुरुषार्थत्वमुक्तं प्रत्युद्धृतं न स्यात्। किं च यज्ञशब्दस्य धर्मोपलक्षकत्वे स्त्रीणामपि पूर्तधर्माधिकाराद्ध
नग्रहणं युक्ततरं यत्तु पारतंत्र्यवचनेन स्त्री स्वातंत्र्यमर्हतीत्यादि तदस्तु पारतंत्र्यं धनस्वीकारे त्वविरोधः। कथं तर्हि
यज्ञार्थं धनमुत्पन्नमित्यादिवचनं उच्यते। यज्ञार्थमेवार्जितं यद्धनं तद्यज्ञ एव नियोक्तव्यं। पुत्रादिभिरपीत्येवं प
रं। तत्र। यज्ञार्थं लब्धमददद्भासः काकोपि वा भवेदिति दोषश्रवणस्य पुत्रादिष्वविशेषात्। यदपि कात्यायनेनोक्तं।
अदायकं राजगामि योषिद्भृत्यौर्ध्वदेहिकं अपास्य श्रोत्रियद्रव्यं श्रोत्रियेभ्यस्तदर्पयेत्। इति। अदायिकं। दाया
दरहितं। यद्रव्यं तद्राजगामि राज्ञो भवति योषिद्भृत्यौर्ध्वदेहिकमपास्य तत्स्त्रीणामशनाच्छादनोपयुक्तं। और्ध्व
देहिकं धनिनः श्राद्धाद्युपयुक्तं चापास्य परिशिष्टस्य राजगामि भवतीति संबंधः। अस्यापवादमाह। श्रोत्रियद्र ८९
व्यं तु योषिद्भृत्यौर्ध्वदेहिकमपास्य श्रोत्रियायोपपादयेदित्येतदप्यवरुद्धस्त्रीविषयं। योषिद्ग्रहणात्। नारद

मित्यमरूढः स्त्रीवि

वचनं च। अन्यत्र ब्राह्मणात्किंतु राजा धर्मपरायणः। तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृतः। पत्न्येव स्त्रीत्वश्रवणा
त्। इह तु पत्नीत्वश्रवणादूढायाः संयताया धनग्रहणमविरुद्धं। तस्माद्विभक्तासंसृष्टिन्यपुत्रे स्वर्याते पत्नी धनं प्रथमं गृह्णी
यादित्यस्यार्थः सिद्धो भवति विभागस्योक्तत्वात् संसृष्टिनां वक्ष्यमाणत्वात्। एतेनान्यधनविषयत्वं श्रीकरादिभिरुक्तं निर
स्तं वेदितव्यं। तथा हि। औरसेषु पुत्रेषु सत्सु अपि जीवद्विभागे अजीवद्विभागे च पत्न्याः पुत्रसमांशग्रहणं युक्तं। यदि
कुर्यात्समानंशान्पत्न्यः कार्याः समांशकाः। तथा। पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेदिति। तथापुत्रस्य स्वर्यातस्य
धनं पत्नी भरणादतिरिक्तं न लभत इति व्यामोहमात्रं। अपत्न्यः कार्याः समांशका इत्यत्र माताप्यंशं समं हरेदित्यत्र
च जीवनोपयुक्तमेव धनं स्त्री हरतीति मतं। तदसत्। अंशशब्दस्य समशब्दस्य चानर्थक्यप्रसंगात्। स्यान्मतं बहुध
ने जीवनोपयुक्तं धनं गृह्णाति स्वल्पे तु पुत्रांशसममंशं गृह्णातीति। तन्न विधिवैषम्यप्रसंगात्। तथा हि पत्न्यः कार्याः
समांशकाः माताप्यंशं समं हरेत् इति च बहुधने जीवनमात्रोपयुक्तं वाक्यांतरमपेक्ष्य प्रतिपादयति अल्पधने तु पुत्रां
शसममंशं प्रतिपादयतीति। यथा चातुर्मास्येषु द्वयोः प्रणयतीति। अत्र पूर्वपक्षिणा सौमिकप्रणयनातिदेशाद्गृहे
तुल्वेनानवेष्य देवउत्तरवेदिमुपकिरंति न शुनासीरीय इत्युत्तरवेदिप्रतिषेधो दर्शितो। राद्धांतैकदेशिना न सौमिक

प्रणयनातिदेशप्राप्ताया उत्तरवेद्याः प्रथमोत्तमयोः पर्वणोरपि प्रतिषेधः। किंतु उपात्रवपंतीति प्राकरणिके
९० नवचनेन प्रणयनातिदेशप्राप्ताया उत्तरवेद्याः प्रतिषेधोस्त्ययमित्यभिहिते पुनः पूर्वपक्षिणोपात्रवपंतीति।
प्रथमोत्तमयोः पर्वणोः प्रतिषेधमपेक्ष्य पाक्षिकीं उत्तरवेदिं प्रापयति। मध्यमयोस्तु निरपेक्षमेव नित्यवदुत्तर
वेदिं प्रापयतीति विधौ वैषम्यं दर्शितं। तद्दूषितं विविधिवैषम्यभयात्प्रथमोत्तमयोः पर्वणोरुत्तरवेदिप्रतिषेधो नि
त्यानुवादो द्वयोः प्रणयंतीत्याद्यर्थवादपर्यालोचनया उपात्रवपंतीति मध्यमयोरेवव्रुणप्रघाससाकमेधपर्वणो
रुत्तरवेदिं विधत्त इति दर्शितं। यदपि मतं। पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वेति। मनुस्म णात्। तथा स्वर्याते
स्य घपुत्रस्य भ्रातृगामिद्रव्यं तदभावे पितरौ हरेयातां ज्येष्ठा वा पत्नीति शंखस्मरणाच्च। अपुत्रधनं भ्रातृगामी
ति प्रोक्ते भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयादित्यादिवचनाच्च भरणोपयुक्तं पत्नी लभत इत्यपि स्थितं
। एवं स्थिते बहुधने अपुत्रे स्वर्याते भरणोपयुक्तं पत्नी गृह्णाति शेषं च भ्रातरः। यदा तु पत्नी भरणमात्रोपयुक्त
मेव धनमस्ति तता न्यूनं वा तदा किं पत्न्येव गृह्णाति भ्रातरो पीति विरोधे पूर्वबलीयस्त्वज्ञापनार्थं पत्नी दुहि
तरश्चैवेत्यारब्धमिति। तदप्यत्र भगवानाचार्यो न मृष्यति। यतः पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वेति विकल्प ९०

स्मरणात्। नेदं क्रमपरं वचनं। अपितु धनग्रहेणाधिकारमात्रप्रदर्शनमात्रपरं। न चास्यापि पत्न्यादिगणे घट
नइति व्याचक्षते। शंखवचनमपि संसृष्टभ्रातृविषयमिति अपि चाल्पविषयत्वमस्माद्वचनात्प्रकरणाद्वानावग
म्यते॥ धनभागुत्तरोत्तर इत्यस्य च पत्नी दुहितर इति विषय द्वयेवाक्यांतरमपेक्ष्याल्पधनविषयत्वमिति पूर्वोक्तं वि
धिवैषम्यं तदवस्थमेवेति यत्किंचिदेतत्। यत्तु हारीतवचनं। विधवा यौवनस्था चेन्नारी भवति कर्कशा। आयुषः क्ष
पणार्थं तु दातव्यं जीवितं तदेति। तदपि शंकितव्यभिचारायाः सकलधननिषेधपरं। अस्मादेव वचनाच्छंकितव्य
भिचारायाः सकलधनग्रहणं गम्यते। एतदेवाभिप्रेत्योक्तं शंखेन। ज्येष्ठा वा पत्नीति ज्येष्ठा गुणज्येष्ठा॥ अनाशं
कितव्यभिचारा सा सकलं धनं गृहीत्वान्यां कर्कशामपि मातृवत्पालयतीति सर्वमनवद्यं तस्मादपुत्रस्य स्वर्यात
स्य विभक्तस्यासंसृष्टिनो धनं परिणीता स्त्री संयता सकलमेव गृह्णातीति स्थितं। तदभावे दुहितर इति। रु वचनं स
मानजातीयानामसमानजातीयानां च समविषमांशप्राप्त्यर्थं। तथा च कात्यायनः पत्नी भर्तुर्धनहरी या स्यादव्य
भिचारिणी। तदभावे तु दुहिता यद्यनूढा भवेत्तदेति। बृहस्पतिरपि। भर्तुर्धनहरी पत्नी तां विना दुहिता स्मृता। अंगा
दंगात्संभवति पुत्रवद्दुहिता नृणां। तस्मात्पितृधनं त्वन्यः कथं गृह्णाति मानव इति। तत्रोढानूढासमवाये ऽनूढै
:वदुहितर इति

गृह्णाति॥

वैनदभावे प्रतिष्ठिता स्त्री धनं दुहितृणां गृह्णाति। तदभावे तु दुहिता यद्यनूढाभावेन देति विशेषस्मरणात्। तत्राप्र
९१ तिष्ठिता प्रतिष्ठिता समवायेऽप्रतिष्ठितैव तदभावे प्रतिष्ठितास्त्री धनं दुहितृणामप्रत्तानाम प्रतिष्ठितानां चेति
गौतमवचनस्य पितृधनेपि समानत्वात् नचैतत्पुत्रिकाविषयमिति मंतव्यं। तत्समः पुत्रिकासुत इति पुत्रिकाया
स्तत्सुतस्य चौरससमत्वेन पुत्रप्रकरणेऽभिधानात्। चशब्दाद्दुहित्रभावे दौहित्रो धनभाक्। यथाह विष्णुः अपुत्रपौ
त्रसंताने दौहित्रा धनमाप्नुयुः पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रकामताः। मनुरपि। अकृता वा कृता वापि यं विंदेत्स
दृशात्सुतं। पौत्री मातामहस्तेन दद्यात्पिंडं हरेद्धनमिति। तदभावे पितरौ धनभाजौ। यद्यपि युगपदधिकरणवचनता
यां द्वंद्वस्मरणात्तदपवादत्वादेकशेषस्य धनग्रहणे पित्रोः क्रमो न प्रतीयते। तथापि विग्रहवाक्ये मातृशब्दस्य
पूर्वनिपातादेकशेषाभावपक्षे च मातापितराविति मातृशब्दस्य पूर्वश्रवणात्पाठक्रमादेवार्थक्रमावगमाद्धनसं
बंधेपि क्रमापेक्षायां प्रतीतक्रमानुरोधेनैव प्रथमं माता धनभाक् तदभावे पितेति गम्यते। किंच। पिता पुत्रांतरेष्व
पि साधारणो माता तु न साधारणीति प्रत्यासत्त्यतिशयादनंतरः सपिंडाद्यस्तस्य धनं भवेदिति वचनान्मातुरेव
प्रथमं धनग्रहणं युक्तं। नच सपिंडेष्वेव प्रत्यासत्तिर्नियामिका। अपि तु समानोदकादिष्वप्यविशेषेण धनग्रह ९१

Dr. BHAU DAJI MEMORIAL

णे प्राप्ते प्रत्यासत्तिरेव नियामिके तस्मादेव वचनादवगम्यत इति मातापित्रोर्मातुरेव प्रत्यासत्त्यतिशयाद्धनग्रहणं
युक्ततरं॥ तदभावे पिता धनभाक्। पित्रभावे भ्रातरो धनभाजः तथा च मनुः पिता हरेदपुत्रस्य रिक्थं भ्रातर एव चे
ति। यत्तु धारेश्वरेणोक्तं। अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्यपि च वृत्तायां पितुर्माता हरेद्धनमि
ति मनुवचनाज्जीवत्स्वपि पितरि मातरि वृत्तायां पितुर्माता पितामही धनं हरेन्न पिता। यतः पितृगृहीतं धनं वि
जातीयेष्वपि पुत्रेषु गच्छति। पितामहीगृहीतं तु सजातीयेष्वेव गच्छतीति पितामह्येव गृह्णातीति। तदप्याचार्यो
नानुमन्यते। विजातीयपुत्राणामपि धनग्रहणस्योक्तत्वात्। चतुस्त्रिद्व्येकभागाः स्युरित्यादिनेति। यत्तु नरहा
र्यं ब्राह्मणद्रव्यं राज्ञां नित्यमिति स्थितिः। इति मनुस्मरणं तत्पाभिप्रायेण पुत्राप्राये। भ्रातृष्वपि सोदराः प्रथमं
गृह्णीयुः भिन्नोदराणां मात्रा विप्रकर्षात्। अनंतरः सपिंडाद्यस्तस्य तस्य धनं भवेदिति स्मरणात्। सोदराणामभा
वे भिन्नोदरा धनभाजो भ्रातृणामप्यभावे तत्पुत्राः पितृक्रमेण धनभाजः भ्रातृपुत्रसमवाये भ्रातृपुत्राणामनधि
कारः। भ्रात्रभावे भ्रातृपुत्राणामधिकारात्। यदा त्वपुत्रे भ्रातरि स्वर्याते तद्भ्रातृणामविशेषेण धनसंबंधे जाते
भ्रातृधनविभागात्प्रागेव यदि कश्चिद्भ्राता म्रियते तदा तत्पुत्राणां पितृतोऽधिकारप्राप्ते तेषां भ्रातृणां च विभज्य

ग्रहणे पितृतो भागकल्पनेत्युक्तं। भ्रातृपुत्राणामप्यभावे गोत्रजा धनभाजः। गोत्रजाः पितामही सपिण्डाः समा
९२ नोदकाश्च तत्र पितामही प्रथमं धनभाक्। मातर्यपि च वृत्तायां पितुर्माता धनं हरेदिति। मात्रनंतरं पितामह्या
धनग्रहणे प्राप्ते पित्रादीनां भ्रातृसुतपर्यंतानां बहूनां सत्त्वेन मध्ये नुप्रवेशाभावात्। पितुर्माता धनं हरेदित्य
स्य वचनस्य धनग्रहणाधिकारप्राप्तिमात्रपरत्वादुत्कर्षेण तत्सुतानंतरं पितामहीग्रहणस्याविरोधात्। पिताम
डा:पि ह्याश्चाभावे समानगोत्रजाः सपिण्डाः पितामहादयो धनभाजः। भिन्नगोत्राणां सपिण्डानां बंधुशब्देन ग्रहणात्। अ
त्र च पितृसंतानाभावे पितामहः पितृव्यास्तत्सुताश्च क्रमेण धनभाजः। पितामहसंतानाभावे प्रपितामही प्र
पितामहस्तत्सुतस्तनय इत्येवमासप्तमात्समानगोत्राणां सपिण्डानां धनग्रहणं वेदितव्यं। तेषामभावे समानोदका
नां धनसंबंधः। ते च सपिण्डानामुपरि सप्त वेदितव्याः। जन्मनामज्ञानावधिका वा। यथाह बृहन्मनुः। सपिण्डता तु
पुरुषे सप्तमे विनिवर्तते। समानोदकभावश्च निवर्तेताचतुर्दशात्। जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते। गोत्र
जाभावे बंधवो धनभाजः। बंधवश्च त्रिविधाः। आत्मबंधवः पितृबंधवो मातृबंधवश्चेति। यथोक्तं। आत्मपितृष्वसुः पुत्रा
आत्ममातृष्वसुः सुताः। आत्ममातुलपुत्राश्च विज्ञेया आत्मबांधवाः। पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः ९२

बंधवो मातृ

सुताः। पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबांधवाः। मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः। मातुर्मातुलपुत्राश्च
विज्ञेया मातृबांधवाः। तत्रांतरंगत्वात्प्रथममात्मबंधवो धनभाजस्तदभावे पितृबंधवः। तदभावे मातृबंधवः इ
ति क्रमो वेदितव्यः। बंधूनामभावे आचार्यस्तदभावे शिष्यः। पुत्राभावे यः प्रत्यासन्नः सपिण्डः तदभावे आचार्यः। आ
चार्याभावेऽन्तेवासीत्यापस्तंबस्मरणात्। शिष्याभावे सब्रह्मचारी धनभाक्। येन सहैकस्मादाचार्यादुपनयनाध्य
यनतदर्थज्ञानप्राप्तिः स सब्रह्मचारी। तदभावे ब्राह्मणद्रव्यं यः कश्चन श्रोत्रियो गृह्णीयात्। श्रोत्रिया ब्राह्मणस्या
नपत्यस्य ऋक्थं भजेरन्निति गौतमस्मरणात्। तदभावे ब्राह्मणमात्रं। यथाह मनुः। सर्वेषामप्यभावे तु ब्राह्मणा ऋ
क्थहारिणः। त्रैविद्याः शुचयो दांतास्तथा धर्मो न हीयत इति। न कदाचिदपि ब्राह्मणद्रव्यं राजा गृह्णीयात्। अहार्यं
ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिरिति। मनुवचनात्। नारदेनाप्युक्तं। ब्राह्मणार्थे [redacted] स्य तन्नाशे दायादश्चेन्न
कश्चन। ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथेति। क्षत्रियादिधनं सब्रह्मचारिपर्यंतानामभावे राजा हरेन्न
ब्राह्मणः। यथाह मनुः। इतरेषां तु वर्णानां सर्वाभावे हरेन्नृप इति। पुत्राः पौत्राश्च दायं गृह्णीतेति तदभावे पत्न्यादय
इत्युक्तं इदानीं तदुभयापवादमाह। वानप्रस्थयति ब्रह्मचारिणां ऋक्थभागिनः। क्रमेणाचार्यसच्छिष्यधर्मभ्रा

त्रेकतीर्थिनः। वानप्रस्थस्य यतेर्ब्रह्मचारिणश्च क्रमेण प्रतिलोमक्रमेण। आचार्यः सच्छिष्यो धर्मभ्रात्रेकतीर्थी च
९३ ऋक्थस्य धनस्य भागिनः॥ ब्रह्मचारी नैष्ठिकः उपकुर्वाणकस्य धनं मात्रादय एव गृह्णंति नैष्ठिकस्य धनं तदपवादे
नाचार्यो गृह्णाति। उच्यते यतेस्तु धनं सच्छिष्यो गृह्णाति सच्छिष्यः पुनरध्यात्मशास्त्रश्रवणधारणतदर्थानुष्ठान
क्षमः। दुर्वृत्तस्याचार्यादेरपि भागानर्हत्वात्। वानप्रस्थस्य धनं धर्मभ्रात्रेकतीर्थी गृह्णाति। धर्मभ्राता प्रतिपन्नो
भ्राता। एकतीर्थ्येकाश्रमी धर्मभ्राता चासावेकतीर्थी च धर्मभ्रात्रेकतीर्थी। एतेषामाचार्यादीनामभावे तु पुत्रादि
षु सत्स्वप्येकतीर्थ्येव गृह्णाति। नन्वनेन शास्त्रेणाश्रमांतरगता इति वसिष्ठस्मरणादाश्रमांतरगतानां ऋक्थसंबं
ध एव नास्ति कुतस्तद्विभागः न च नैष्ठिकस्य स्वार्जितधनसंबंधः। प्रतिग्रहे निषेधात्। अनिचयो भिक्षुरिति पि
गौतमस्मरणात् भिक्षोरपि न स्वार्जितधनसंबंधसंभवः। उच्यते। वानप्रस्थस्य तावत्। अह्नो मासस्य षण्णां
नां तथा संवत्सरस्य वा। अर्थस्य निचयं कुर्यात्कृतमाश्वयुजे त्यजेदिति वचनाद्धनसंबंधोस्त्येव। यतेरपि॥ कौ
पीनाछादनार्थं हि वासो वै बिभृयाद्वसः। योगसंभारभेदांश्च गृह्णीयात्पादुके तथेति वचनाद्वस्त्रपुस्तका ९३
दिसंबंधोस्त्येव॥ नैष्ठिकस्यापि शरीरयात्रार्थवस्त्रादिसंबंधोस्त्येवेति तद्विभागकथनं युक्तमेव। इदानीं स्वर्या

तस्यापुत्रस्य पत्न्यादयो धनभाज इत्युक्तस्यापवादमाह। संसृष्टिनस्तु संसृष्टी॥ विभक्तं धनं पुनर्मिश्रीकृ
तं संसृष्टं तदस्यास्तीति संसृष्टी। संसृष्टत्वं च न येन केनापि। किंतु पित्रा भ्रात्रा पितृव्येण वा। यथाह बृहस्प
तिः। विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः। पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यत इति तस्य संसृष्टि
नः प्रेतस्यांशं भागं विभागकालेऽविज्ञातगर्भायां भार्यायां पश्चादुत्पन्नस्य पुत्रस्य संसृष्टी दद्यात्। पुत्राभावे सं
सृष्टो वापहरेत्। गृह्णीयान्न पत्न्यादि। संसृष्टिनस्तु संसृष्टीत्यस्यापवादमाह। सोदरस्य तु सोदरः। दद्याच्चा
पहरेच्चांशं जातस्य च प्रेतस्य च। संसृष्टिनस्तु संसृष्टीत्यनुवर्तते। अतश्च सोदरस्य संसृष्टिनो धनं प्रेतस्यांशं
सोदरः संसृष्टी जातस्य सुतस्य दद्यात्। तदभावेऽपहरेदिति संबंधः। एवं च सोदरासोदरसंसर्गे सोदरस्य संसृ पूर्वसं
ष्टिनः सोदर एव संसृष्टी जातस्य सुतस्य दद्यात्। तदभावेऽपहरेदिति पूर्ववत्संबंधः एवं च सोदरासोदरसंसर्गे सो
दरस्य संसृष्टिनो धनं सोदर एव संसृष्टी गृह्णीयात्। न भिन्नोदरः संसृष्ट्यपीति पूर्वोक्तस्यापवादः। इदानीं संसृ
ष्ट्यन्यपुत्रे स्वर्याते संसृष्टिनो भिन्नोदरस्य संसृष्टिनः सोदरस्य सद्भावे कस्य धनग्रहणमिति वीक्षायां द्वयो
र्विभज्य ग्रहणे कारणमाह। अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत्। असंसृष्ट्यपि वादद्यात्संसृष्टो नान्यमा

९४ त्वजः। अन्योदर्यः सापत्नो भ्राता संसृष्टी धनं हरेत्। न पुनरन्योदर्यो धनं हरेत् असंसृष्टी॥ अनेनान्वयव्यतिरे
काभ्यामन्योदर्यस्य संसृष्टित्वं धनग्रहणे कारणमुक्तं। असंसृष्टीत्येतदुत्तरेणापि संबध्यते। अतश्च। असंसृ
ष्ट्यपि संसृष्टिनो धनमाददीत। कोसावित्यत आह। संसृष्ट इति। संसृष्ट एकोदरः संसृष्टः सोदर इति यावत्।
अनेनासंसृष्टस्यापि सोदरस्य धनग्रहणे सोदरत्वं कारणमुक्तं। संसृष्ट इत्युत्तरेणापि संबध्यते। तत्र च संसृष्टः
संसृष्टीत्यर्थः। नान्यमातृजः। अत्र एवशब्दाध्याहारेण व्याख्यानं कार्यं संसृष्ट्यपि अन्यमातृज एव संसृष्टिनो ध
नं नाददीतेति। एवं चासंसृष्ट्यपि वाददघादित्यपिशब्दश्रवणात्। संसृष्टो नान्यमातृज एवेत्यवधारणनिषेधाद
संसृष्टसोदरस्य संसृष्टस्य भिन्नोदरस्य च विभज्य ग्रहणं कर्तव्यमित्युक्तं भवति। द्वयोरपि धनग्रहणकारणस्यैकै
कस्य सद्भावात्। एतदेव स्पष्टीकृतं मनुना। विभक्ताः सहजीवंतो विभजेरन् पुनर्यदि। इति। संसृष्टिविभागं प्रक्रम्य। ये
षां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः। म्रियेतान्यतरो वापि तस्य भागो न लुप्यते। सोदर्या विभजेयुस्तं समेत्य
सहिताः समं। भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः। इति वदता। येषां भ्रातॄणां संसृष्टिनां मध्ये ज्येष्ठः कनि
ष्ठो वा मध्यमो वांशप्रदानतः। अंशप्रदाने सार्वविभक्तिकस्तसिः। विभागकाल इति यावत्। हीयेत स्वांशाद्भ्र ९४

संन्यासानंतरगार्हस्थ्यपरिग्रहे दायविभागः प्राप्तः स निषिध्यते॥ ९

विभाग ष्येतांशमातृग्रहणेन ब्रह्महत्यादिना वा म्रियेत वा तस्य भागो न लुप्यते। अतः पृथगुद्धरणीयो न संसृष्टिन एव ग्र
ह्णीयुरित्यर्थः। तस्योद्धृतस्य विनियोगमाह। सोदर्या विभजेयुस्तमिति। तमुद्धृतं भागं। सोदर्याः सहोदराः असंसृष्टा अ
पि समेत्य देशांतरगता अपि समागम्य सहिताः संभूय समं न्यूनाधिकभावेन। ये च भ्रातरो भिन्नोदराः संसृष्टा
स्ते च सनाभयो भगिन्यश्च विभजेयुः। समं विभज्य गृह्णीयुरित्यर्थः। पुत्रपत्न्यादिसंसृष्टिनां यद्दायग्रहणमुक्तं त
स्यापवादमाह। क्लीबोथ पतितस्तज्जः पंगुरुन्मत्तको जडः। अंधोऽचिकित्स्यरोगाद्याः भर्तव्याः स्युर्निरंशकाः। क्ली
बस्तृतीयप्रकृतिः। पतितो ब्रह्महादिः। तज्जः पतितोत्पन्नः। पंगुः पादविकलः। उन्मत्तको वातिकपैत्तिकश्लैष्मिक
सान्निपातिकग्रहावेशाल क्षणैरुन्मादैरभिभूतः। जडो विकलांतःकरणः। हिताहितावधारणाक्षम इति यावत्
। अंधो नेत्रेंद्रियविकलः। अचिकित्स्यरोगः प्रतिसमाधेयक्षयादिरोगग्रस्तः। आदिशब्देनाश्रमांतरगतपितृद्वि घ
ष्ट्युपपातकीबधिरमूकनिरिंद्रियाणां ग्रहणं। यथाह वसिष्ठः। अनंशास्त्वाश्रमांतरगता इति। नारदोपि पितृद्वि
ट् पतितः षंढो यश्च स्यादौपपातिकः। औरसा अपि नैतेंशं लभेरन् क्षेत्रजाः कुत इति। मनुरपि अनंशौ क्लीबपतितौ
जात्यंधबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिंद्रियाः इति। निरिंद्रियो निर्गतमिंद्रियं यस्मात् व्याध्यादि

३ बौधायनः
पत्रे ७५ व्यवहारमयूखे। पतिततज्जवर्जमिति। संन्यासच्युतस्तत्सुतावपि न भरणीया इति

९५ नासनि रिंद्रियः॥ एते क्लीबादयो ऽनंशा ऋक्थभाजो न भवंति केवलमशनाच्छादनदानेन पोषणीया भवेयुः॥ अ
भरणे तु पतितत्वदोषः। सर्वेषामपि तु न्याय्यं दातुं ग्रासमनीषिणा। ग्रासाच्छादनमत्यंतं पतितो ह्यददद्भवेदि
ति मनुस्मरणात्। अत्यंतं यावज्जीवमित्यर्थः॥ एतेषां विभागात्प्रागेव दोषप्राप्तावनंशत्वं न पुनर्विभक्तस्य वि
भागोत्तरकालमप्यौषधादिना दोषनिर्हरणे भागप्राप्तिरस्त्येव। विभक्तेषु सुतो जातः सवर्णायां विभागभागि
त्यस्य समानन्यायात्। पतितादिषु तु लिंगमविवक्षितमतश्च पत्नीदुहितृमात्रादीनामप्युक्तदोषदुष्टानामनं
शत्वं वेदितव्यं। क्लीबादीनामनंशत्वात्तत्पुत्राणामप्यनंशत्वे प्राप्त इदमाह। औरसाः क्षेत्रजास्त्वेषां निर्दोषा भाग
हारिणः॥ एतेषां क्लीबादीनामौरसाः क्षेत्रजा वा पुत्राः निर्दोषा अंशग्रहणविरोधिक्लैब्यादिदोषरहिता भागहा
रिणोंशग्राहिणो भवंति। तत्र क्लीबस्य क्षेत्रजः पुत्रः संभवत्यन्येषामौरसोपि। औरसक्षेत्रजयोर्ग्रहणमितरपु
त्रव्युदासार्थं। क्लीबादिदुहितॄणां विशेषमाह। सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः॥ एतेषां क्लीबादीनां
सुताः दुहितरो यावद्विवाहसंस्कृता भवंति तावद्भरणीयाः। चशब्दात्संस्कार्याश्च। क्लीबादिपत्नीनां विशेषमा
ह। अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः॥ निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च। एषां क्लीबादीनां अ ९५

पुत्राः पत्न्यः साधुवृत्तयः सदाचाराश्चेत् भर्तव्याः व्यभिचारिण्यस्तु निर्वास्याः प्रतिकूलास्तथैव च। निर्वास्या भरणी
याश्च। व्यभिचारिण्यश्चेत्। न पुनः प्रातिकूल्यमात्रेण भरणमपि न कर्तव्यं॥ विभजेरन्सुताः पित्रोरित्यत्र स्त्रीपुंस
धनविभागं संक्षेपेणाभिधाय पुरुषधनविभागो विस्तरेणाभिहितः। इदानीं स्त्रीधनविभागं विस्तरेणाभिधास्य
न् तस्य स्वरूपं तावदाह। पितृमातृपतिभ्रातृदत्तमध्य पागतं। आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितं। पित्रा ग्न्यु
मात्रा पत्या भ्रात्रा च यद्दत्तं। यच्च विवाहकाले अध्यग्नावधिकृत्य मातुलादिभिर्दत्तं। आधिवेदनिकं अधिवेदनि
मित्तं। अधिविन्नस्त्रियै दद्यादिति वक्ष्यमाणं। आद्यशब्देन रिक्थक्रयसंविभागपरिग्रहाधिगमप्राप्तमेतत्स्त्रीध
नं मन्वादिभिरुक्तं। स्त्रीधनशब्दश्च यौगिको न पारिभाषिकः योगसंभवे परिभाषाया अयुक्तत्वात्। यत्तु मनुनो
क्तं। अध्यग्न्यध्यावहनिकं दत्तं च प्रीतिकर्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमिति। स्त्रीधनस्य
षड्विधत्वं तन्न्यूनसंख्याव्युदासार्थं। नाधिकसंख्याव्यवच्छेदाय। अध्यग्न्यादिस्वरूपं कात्यायनेनाभिहितं। विवाह
काले यत्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ। तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितं। यत्पुनर्लभते नारी नीयमाना
पितुर्गृहात्। अध्यावहनिकं नाम स्त्रीधनं तदुदाहृतं। प्रीत्या दत्तं च यत्किंचित् श्वश्र्वा वा श्वशुरेण वा। पादवं

दनिकं चैव प्रीतिदत्तं तदुच्यते। ऊढया कन्यया वापि पत्युः पितृगृहेपि वा। भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायि
९८ कं स्मृतमिति। किंच। बंधुदत्तं तथा शुल्कमन्वाधेयकमेव च॥ बंधुभिः कन्याया मातृबंधुभिः पितृबंधुभिश्च यद्दत्तं।
शुल्कं यत् गृहीत्वा कन्या दीयते। अन्वाधेयकं परिणयनादनु पश्चाद्दाहितं दत्तं। उक्तं च कात्यायनेन। विवाहात्प
रतो यच्च लब्धं भर्तृकुलात्स्त्रिया। अन्वाधेयं तु तद्द्रव्यं लब्धं पितृकुलात्तथेति। स्त्रीधनं परिकीर्तितमिति गतेन
संबंधः। एवं स्त्रीधनमुक्त्वा तद्विभागमाह। अतीतायामप्रजसि बांधवास्तदवाप्नुयुः। तत्पूर्वोक्तं स्त्रीधनं। अप्रज
स्यनपत्यायां दुहितृदौहित्रीदौहित्रपुत्रपौत्ररहितायां स्त्रियामतीतायां बांधवाः भर्त्रादयो वक्ष्यमाणा गृह्णंति
। सामान्येन बांधवो धनग्रहणेऽधिकारिणो दर्शिताः। इदानीं विवाहभेदेनाधिकारिभेदमाह। अप्रजस्त्रीधनं
भर्तुर्ब्राह्मादिषु चतुर्ष्वपि। दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्। अप्रजस्त्रियाः पूर्वोक्तायाः ब्राह्मदैवार्षप्रा
जापत्येषु चतुर्षु विवाहेषु भार्यात्वं प्राप्तायाः अतीतायाः पूर्वोक्तं धनं प्रथमं भर्तुर्भवति। तदभावे तत्प्रत्यासन्ना
नां सपिंडानां भवति। शेषेष्वासुरगांधर्वराक्षसपैशाचेषु विवाहेषु तत्। अप्रजस्त्रीधनं पितृगामि। माता च पिता
च पितरौ। तौ गच्छतीति पितृगामि एकशेषनिर्दिष्टाया अपि मातुः प्रथमं धनग्रहणं पूर्वमेवोक्तं तदभावे तत्प्रत्या ९६

MEMORIAL

सन्नानां धनग्रहणं। सर्वेष्वेव विवाहेषु प्रसूता अपत्यवती चेत् दुहितॄणां तद्धनं भवति। अत्र दुहितृशब्देन दुहितृ
दुहितर उच्यंते। साक्षात् दुहितॄणां मातुर्दुहितरः शेषमृणाद्दित्य त्रोक्तत्वात्। अतश्च मातृधनं मातरि वृत्तायां प्र
थमं दुहितरो गृह्णंति। तत्रोढा अनूढा समवाये अनूढा प्रथमं गृह्णाति तदभावे परिणीता। अत्रापि प्रतिष्ठिता प्र
तिष्ठिता समवाये अप्रतिष्ठिता गृह्णाति। तदभावे प्रतिष्ठिता। यथाह गौतमः। स्त्रीधनं दुहितॄणामप्रत्तानामप्रति
ष्ठितानां चेति। तत्र चशब्दात्प्रतिष्ठितानां च। अप्रतिष्ठिता नपत्या निर्धना वा। एतच्च शुल्कव्यतिरेकेण। शुल्कं
तु सोदर्याणामेव। भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुरिति गौतमवचनात्। सर्वासां दुहितॄणामभावे दुहितृदु
हितरो गृह्णंति दुहितॄणां प्रसूता चेदिति अस्मात् वचनात् तासां भिन्नमातृकाणां विषमाणां समवाये मातृद्वारेण
भागकल्पना प्रतिमातृवा स्ववर्गभागविशेष इति गौतमवचनात्। दुहितृदौहित्रीणां समवाये दौहित्रीणां किं
चिदेव दातव्यं। यथाह मनुः। यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः। मातामह्या धनात्किंचित्प्रदेयं प्रीतिपू
र्वकमिति। दौहित्रीणामप्यभावे दौहित्रा धनहारिणः। यथाह नारदः। मातुर्दुहितरोऽभावे दुहितॄणां तदन्वय इति।
तच्छब्देन सन्निहितदुहितृपरामर्शात्। दौहित्राणामप्यभावे पुत्रा गृह्णंति। नाम्यक्रतेन्वय इत्युक्तत्वात्। मनुरपि।

९७ दुहितॄणां पुत्राणां च मातृधनसंबंधं दर्शयति। जनन्यां संस्थितायां तु समं सर्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्य
श्च सनाभयः॥ इति। मातृकं रिक्थं सर्वे सहोदराः समं भजेरन्। सनाभयो भगिन्यश्च समं भजेरन्निति संबंधः। न पुनः
सहोदरा भगिन्यश्च संभूय भजेरन्निति। इतरेतरयोगस्य द्वंद्वैकशेषाभावादप्रतीतेः। विभागकर्तृत्वान्वयेनापि चश
ब्दोपपत्तेः। यथा देवदत्तः कृषिं कुर्यात् यज्ञदत्तश्चेति। समग्रहणमुद्धारविभागनिवृत्त्यर्थं सोदरग्रहणं भिन्नोदरनिवृ
त्त्यर्थं। अनपत्यहीनजातिस्त्रीधनं तु भिन्नोदराप्युत्तमजातीयसपत्नीदुहिता गृह्णाति। तदभावे तदपत्यं। तथा च मनुः।
स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन। ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेदिति। ब्राह्मणीग्रहणमुत्तमजा
त्युपलक्षणं। अतश्चानपत्यवैश्याधनं क्षत्रिया कन्या गृह्णाति। पुत्राणामभावे पौत्राः पितामहीधनहारिणः॥ ऋ
क्थभाज ऋणं प्रतिकुर्युरिति गौतमस्मरणात्। पुत्रपौत्रैर्ऋणं देयमिति पौत्राणामपि पितामह्यृणापाकरणेऽधिका
रात्। पौत्राणामप्यभावे पूर्वोक्ता भर्त्रादयो बांधवा धनहारिणः। स्त्रीधनप्रसंगेन वाग्दत्ताविषये किंचिदाह। दत्त्वा
कन्यां हरन्दंड्यो व्ययं दद्याच्च सोदयं। कन्यां वाचा दत्त्वापहरन्वृद्ध्यानुबंधाद्यनुसारेण राज्ञा दंडनीयः। एतच्चाप
हारकारणाभावे॥ सति तु कारणे॥ दत्तामपि हरेत्कन्यां श्रेयांश्चेद्वर आव्रजेदित्यपहाराभ्यनुज्ञानान्न दंड्यः। यच्च ९७

वाग्दाननिमित्तं वरेण स्वसंबंधिनां कन्यासंबंधिनां वोपचारार्थं धनं व्ययीकृतं तत्सर्वं सोदयं सवृद्धिकं कन्यादाता व
राय दद्यात्। अथ कथंचिद्वाग्दत्ता संस्कारात्प्रागेव मृता तदा किं कर्तव्यमित्यत आह। मृतायां दत्तमादद्यात्परिशो
ध्योभयव्ययं। यदि वाग्दत्ता मृता तदा यत्पूर्वमंगुलीयकादि शुल्कं वा वरेण दत्तं तद्वर आददीत। परिशोध्योभयव्य
यं उभयोरात्मनः कन्यादातुश्च यो व्ययस्तं विशोध्य विगणय्यावशिष्टमाददीत। यत्तु कन्यायै मातामहादिभिर्दत्तं।
हिरण्यभूषणादिकं वा क्रमायातं तत्सहोदरा भ्रातरो गृह्णीयुः। ऋक्थं मृतायाः कन्याया गृह्णीयुः सोदरास्तदभावे मा
तुस्तदभावे पितुरिति बौधायनस्मरणात्। मृताप्रजस्त्रीधनं भर्तृगामीत्युक्तं इदानीं जीवंत्याः सप्रजायाः अपि
स्त्रिया धनग्रहणे क्वचिद्भर्तुरभ्यनुज्ञामाह। दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके॥ गृहीतं स्त्रीधनं भर्ता न स्त्रि
यै दातुमर्हति॥ दुर्भिक्षे कुटुंबभरणार्थं धर्मकार्ये आवश्यककर्तव्ये व्याधौ च। संप्रतिरोधके। बंदीग्रहणनिग्रहा
दौ द्रव्यांतररहितः स्त्रीधनं गृह्णन्भर्ता न पुनर्दातुमर्हति। प्रकारांतरेणापहृतं दद्यात्। भर्तृव्यतिरेकेण जीवंत्याः स्त्री
धनं केनापि दायादेन न ग्रहीतव्यं। जीवंतीनां तु तासां ये तद्धरेयुः स्वबांधवाः। तान्शिष्याच्चौरदंडेन धार्मिकः पृ
थिवीपतिरिति। दंडविधानात्। तथा पत्यौ जीवति यः स्त्रीभिरलंकारो धृतो भवेत्। न तं भजेरन्दायादा भजमानाः प

९८ तंतितेइति दोषश्रवणाच्च। आधिवेदनिकं स्त्रीधनमुक्तं तदाह अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं। न दत्तं स्त्री
धनं यस्यै दत्ते त्वर्धं प्रकीर्तितं॥ यस्या उपरि विवाहः सा अधिविन्ना सा चासौ स्त्री च तस्यै अधिविन्नस्त्रियै। आधि
वेदनिकं अधिवेदननिमित्तं धनं। समं यावदधिवेदनार्थं व्ययीकृतं तावद्दद्यात्। यस्यै भर्त्रा श्वशुरेण वा स्त्रीधनं न द
त्तं। दत्ते पुनः स्त्रीधने आधिवेदनिकस्य द्रव्यस्यार्धं दद्यात्। अर्धशब्दश्चात्र समप्रविभागवचनो न भवति। अतश्च या
वता तत्पूर्वदत्तमाधिवेदनिकसमं भवति तावद्देयमित्यर्थः॥ एवं विभागमुक्त्वेदानीं तत्संदेहनिर्णयहेतूनाह। विभा
गनिह्नवे ज्ञातिबंधुसाक्ष्यभिलेखितैः। विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः॥ विभागस्य निह्नवे अपलापे
ज्ञातिभिः पितृबंधुभिर्मातुलादिभिः साक्षिभिः पूर्वोक्तलक्षणैः लेख्येन च विभागपत्रेण विभागभावना विभा
गनिर्णयो ज्ञातव्यः। तथा यौतकैः पृथक्कृतैः गृहक्षेत्रैश्च पृथक्कृष्यादिकार्यप्रवर्तनं॥ पृथक्पंचमहायज्ञादि
धर्मानुष्ठानं च। नारदेन विभागलिंगमुक्तं॥ विभागधर्मसंदेहे दायादानां विनिर्णयः। ज्ञातिभिर्भागलेख्ये
न पृथक्कार्यप्रवर्तनात्॥ भ्रातॄणामविभक्तानामेको धर्मः प्रवर्तते। विभागे सति धर्मोपि भवेत्तेषां पृथक्पृथ
गिति। तथा पराण्यपि विभागलिंगानि तेनैवोक्तानि। साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च। विभक्ता भ्रा ९८

संपथेशावरणीन

तरः कुर्युर्नाविभक्ताः कथंचनेति॥ ॥इति रिक्थविभागप्रकरणं समाप्तं॥ ॥अधुना सीमाविवादनिर्णय उच्यते॥ सी
म्नो विवादे क्षेत्रस्य सामंताः स्थविरादयः। गोपाः सीमाकृषाणाश्च सर्वे च वनगोचराः॥ नयेयुरेते सीमानं स्थलांगा
रतुषद्रुमैः। सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षितां॥ ग्रामद्वयसंबंधिनः क्षेत्रस्य सीम्नो विवादे तथैकग्रामांत
र्वर्तिक्षेत्रमर्यादाविवादे च सामंतादयः स्थलांगारादिभिः पूर्वकृतैः सीमालक्षणैरुपलक्षितां चिह्नितां सीमानं नयेयुः
निश्चिनुयुः। सीमा क्षेत्रादिमर्यादा सा च चतुर्विधा। जनपदसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति। सा च यथासं
भवं पंचलक्षणा। तदुक्तं नारदेन। ध्वजिनी मत्स्यिनी चैव नैधान्युभयनिर्मिता। राजशासननीता च सीमा पंचविधा
स्मृतेति। ध्वजिनी वृक्षादिलक्षणचिह्निता। वृक्षादीनां प्रकाशत्वेन ध्वजतुल्यत्वात्। मत्स्यिनी सलिलवती मत्स्य
शब्दस्य स्वाधारजललक्षणत्वात्। नैधानी निखाततुषांगारादिमती। तेषां निखातत्वेन निधानतुल्यत्वात्। उभ
यनिर्मिता। अर्थिप्रत्यर्थिपरस्परसंमतिनिर्मिता। राजशासननीता ज्ञानचिह्नाभावे राजेच्छया निर्मिता। एवंभूता
यां सीम्नि विवादः संभवति। यथाह कात्यायनः। आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च। अभोगभुक्तिः सी
मा च षड्वादस्य हेतव इति। तथा हि। ममात्र पंचनिवर्तनाया भूमेः अधिका भूरस्तीति केनचिदुक्ते पंचनिवर्तने

९९ वनाधिकेति। आधिक्ये विवादः पंचनिवर्तना मदीया भूरिति केनचिदुक्ते न ततो न्यूनैवेति न्यूनतायां। पंचनिवर्तना
ममांशा इत्युक्ते शत एव नास्तीत्यस्तिनास्तित्वविवादः मदीया भूः प्राग्विद्यमानभोगैव भुज्यत इत्युक्ते न संततावि
रतं न्येवमे भुक्तिरित्य भोगभुक्तौ विवादः इयं मर्यादा इयं वेति सीमाविवाद इति षट्प्रकार एव विवादः संभवति
षट्प्रकारेपि भूवादेषु स्यार्थिभ्यां सीमाया अपि निर्णीयमानत्वात्सीमानिर्णयप्रकरणे तस्यांतर्भावः॥ समंता
द्भवाः सामंताः अनंतरेषु दिक्षु अनंतरग्रामादयस्ते च प्रतिसीमं व्यवस्थिताः। ग्रामो ग्रामस्य सामंतः क्षेत्रं क्षेत्रस्य
कीर्तितं। गृहं गृहस्य निर्दिष्टं समंतात्परिरभ्य हीति॥ कात्यायनवचनात्। ग्रामादिशब्देन तत्स्थाः पुरुषाः लक्ष्य
ते ग्रामः पलायत इति यथा। सामंतग्रहणं च तत्संसक्ताद्युपलक्षणार्थं। उक्तं च कात्यायनेन। संसक्तकास्तु सामं
तास्तत्संसक्तास्तथोत्तराः। संसक्तसंसक्तापद्माकाराः प्रकीर्तिताः। स्थविरा वृद्धाः। आदिग्रहणेन मौलोद्धृतयो
र्ग्रहणं। वृद्धादिलक्षणं च तेनैवोक्तं। निष्पाद्यमानं यैर्दृष्टं तत्कार्यं तु गुणान्वितैः। वृद्धा वा यदि वा वृद्धास्ते तु वृद्धाः प्रकी
र्तिताः॥ ये तत्र पूर्वसामंताः पश्चाद्देशांतरं गताः। तन्मूलत्वात्तु ते मौलाः ऋषिभिः परिकीर्तिताः। उपश्रवणसं
भोगकार्याख्यानोपचिह्निताः। उद्धरंति पुनर्यस्मादुद्धृतास्तेन ते स्मृताः इति। गोपाः गोचारकाः। सीमाकृषाणा ९९

सक्तं ✓ यदिवावृद्धा

सीमासन्निहितक्षेत्रकर्षकाः। सर्वे च वनगोचराः वनचारिणो व्याधादयः। ते च मनुनोक्ताः। व्याधान् शाकुनिकान्
गोपान्कैवर्तान्मूलखातकान्। व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरानिति। स्थलमुन्नतो भूप्रदेशः। अंगा
रो अग्नेरुच्छिष्टं तुषा धान्यत्वचः। द्रुमा न्यग्रोधादयः। सेतुर्जलप्रवाहबंधः। चैत्यं पाषाणादिबंधः। आद्यग्रहणेन वे
णुवालुकादीनां ग्रहणं। एतानि च प्रकाशाप्रकाशभेदेन द्विप्रकाराणि। तथा च मनुः। सीमावृक्षांस्तु कुर्वीत न्य
ग्रोधाश्वत्थकिंशुकान्। शाल्मलीशालतालांश्च क्षीरिणश्चैव पादपान्। गुल्मान्वेणूंश्च विविधान् शमीवल्ली
जं स्थलानि च। शरान्कुब्जकगुल्मांश्च तथा सीमा न नश्यति। तडागान्युदपानानि वाप्यः प्रस्रवणानि च। सीमा
संधिषु कार्याणि देवतायतनानि चेति प्रकाशरूपाणि। उपच्छन्नानि चान्यानि सीमालिंगानि कारयेत्। सीमा
ज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययं। अश्मनोऽस्थीनि गोवालांस्तुषान्भस्मकपालिकान्। करीषमिष्टकांगा
रशर्करावालुकास्तथा। यानि चैवंप्रकाराणि कालाद्भूमिर्न भक्षयेत्॥ तानि संधिषु सीमायामप्रकाशानि का
रयेत्। एतैर्लिंगैर्नयेत्सीमां राजा विवदमानयोरिति। प्रच्छन्नलिंगानि। एतैः प्रकाशाप्रकाशरूपैर्लिंगैः सामं
तादिप्रदर्शितैः सीमां प्रतिविवदमानयोः सीमानिर्णयं कुर्याद्राजा॥ ॥यदा पुनश्चिह्नानि न संति विद्यमाना

निवा लिङ्गालिङ्गतया संदिग्धानि तन्निर्णयोपायमाह ॥ सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा । रक्तस्रग्वसनाः
१०० सीमां नयेयुः क्षितिधारिणः ॥ सामन्ताः पूर्वोक्तलक्षणाः समग्रामाश्चत्वारोऽष्टौ दश वापि वा । इत्येवं समसंख्याः प्रत्यास
न्नग्रामीणा रक्तस्रग्विणो रक्ताम्बरधरा मूर्ध्न्यारोपितक्षितिखण्डाः सीमानं नयेयुः । प्रदर्शयेयुः । सामन्ता वेति विकल्पा
भिधानं सामन्तरोक्तसाक्ष्यभिप्रायं । यथाह मनुः । साक्षिप्रत्यय एव स्यात्सीमावादविनिर्णय इति । तत्र साक्षिणां नि
र्णेतृत्वं मुख्यं तदभावे सामन्तानां । तदुक्तं । साक्ष्यभावे तु चत्वारो ग्रामाः सीमान्तवासिनः । सीमाविनिर्णयं कुर्युः प्रयता
राजसन्निधाविति । तदभावे तत्संसक्तादीनां निर्णेतृत्वं । यथाह कात्यायनः । स्वार्थसिद्धौ प्रदुष्टेषु सामन्तेष्वर्थगौर
वात् । तत्संसक्तैश्च कर्तव्य उद्धारो नात्र संशयः । संसक्तसक्तदोषे तु तत्संसक्ताः प्रकीर्तिताः । कर्तव्या न प्रदुष्टास्तु रा
ज्ञा धर्मविजानतेति । सामन्ताद्यभावे मौलादयो ग्राह्याः । तेषामभावे सामन्ता मौला वृद्धा उद्धृतादयः । स्थावरे षट्प्रका
रे पि कार्या नात्र विचारिणेति । कात्यायनेन क्रमाभिधानात् । एते च सामन्तादयः संख्यागुणातिरेकेण भवन्ति । सामन्ताः
साधनं पूर्वं निर्दोषास्युर्गुणान्विताः । द्विगुणास्तु ततः प्रोक्तास्ततोऽन्ये त्रिगुणा मताः इति स्मरणात् । ते च साक्षिणः सामन्ताद १००
यश्च स्वैः स्वैः शपथैः शापिताः सन्तः सीमां नयेयुः ॥ शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः । सुकृतैः शापिताः स्वैः स्वैः

शि

नयेयुस्ते समं जसमिति मनुस्मरणात् । नयेयुरिति बहुवचनं द्वयोर्निरासार्थं नैकस्य ॥ एकश्चेदुन्नयेत्सीमां सोपवासः
समुन्नयेत् । रक्तमाल्याम्बरधरो भूमिमादाय मूर्द्धनीति नारदेनैकस्याभ्यनुज्ञानात् । नैकः समुन्नयेत्सीमां नरः प्रत्ययवा
नपि । गुरुत्वादस्य कार्यस्य क्रियैषा बहुषु स्थितेति एकस्य निषेधः ॥ स उभयानुमतधर्मविद्व्यतिरिक्तविषय इत्यवि
रोधः । स्थलादिचिह्नाभावे साक्षिसामन्तादीनां सीमाज्ञाने उपायविशेषो नारदोक्तः । निम्नगापहृतोत्सृष्टनष्टचिह्नं
सु भूमिषु । तत्प्रदेशानुमानाच्च प्रमाणाद्भोगदर्शनादिति ॥ निम्नगया नद्यापहृतेन अपहरणे नोत्सृष्टानि स्वस्था
नात्प्रच्युतानि नष्टानि वा लिङ्गानि यासु मर्यादाभूमिषु तत्र तत्प्रदेशानुमानादुत्सृष्टचिह्नानां प्राचीनप्रदेशानुमा
नात् । ग्रामादारभ्य सहस्रदण्ड उपरिमितक्षेत्रमस्य ग्रामस्य पश्चिमो भाग इत्येवंविधात्प्रमाणाद्भूमप्रत्यर्थिसमक्षम
विप्रतिपन्नाया अस्मा नौ कालोपलक्षितभुक्तेर्वा निश्चिनुयुः बृहस्पतिना चात्र विशेषो दर्शितः । आगमं च प्रमाणं
च भोगं कालं च नाम च । भूभागलक्षणं चैव ये विदुस्तेऽत्र साक्षिण इति । एते च साक्षिसामन्तादयः शपथैः श्राविताः सन्तः
कुलादिसमक्षं राज्ञा प्रष्टव्याः । यथाह मनुः । ग्रामेयककुलानां तु समक्षं सीम्नि साक्षिणः । प्रष्टव्याः सीमलिङ्गानि त
योश्चैव विवादिनोरिति । ते च प्रष्टाः साक्ष्यादयः समस्ता एकमत्येन सीम्नि निर्णयं ब्रूयुः । तेनिर्णीतां सीमां तत्सदृशी

नसकललिंगयुक्तां साक्ष्यादिनामान्विता चाविस्मरणार्थं पत्रे समारोपयेत्। उक्तं च मनुना। ते सृष्टास्तु यथा ब्रूयुः स
३०१ मस्ताः सीम्नि निर्णयं। निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः इति। एतेषां साक्षिसामंतप्रभृतीनां सीमाचंक्रमणा
दिनाद्यारभ्य यावत्त्रिपक्षं राजदैविकं व्यसनं नोत्पद्येत तदा तत्प्रदर्शनात् सीमानिर्णयः। अयं राजदैविकव्यसना
वधिः कात्यायनेनोक्तः। सीमाचंक्रमणे कोशपादस्पर्शे तथैव च। त्रिपक्षपक्षसप्ताहं दैवराजकमिष्यते इति॥ ॥
यदा त्वमीषामुक्तसाक्ष्यवचसां त्रिपक्षाभ्यंतरे रोगादि दृश्यते। अथवा प्रतिवादिनिर्दिष्टाभ्यधिकसंख्यागुणसा
क्ष्यंतरविरुद्धवचनता तदा ते मृषाभाषितया दंडनीयास्तदाह। अनृते तु पृथक् दंड्या राज्ञा मध्यमसाहसं अनृ
ते मिथ्यावादने निमित्तभूते सति सर्वे सामंताः प्रत्येकं मध्यमसाहसेन चत्वारिंशादधिकेन पणपंचशतेन दंडनीयाः।
सामंतविषयता चास्य। साक्षिमौलादीनां स्मृत्यंतरे दंडांतरविधानात् अवगम्यते। तथा च मनुः। यथोक्तेन नयंतस्ते
पूयंते सत्यसाक्षिणः। विपरीतं नयंतस्तु दाप्याः स्युर्द्विशतं दममिति। नारदोपि। अथ चेदनृतं ब्रूयुः सामंताः सीमनिर्ण
ये। सर्वे पृथक् पृथक् दंड्या राज्ञा मध्यमसाहसमिति। सामंतानां मध्यमसाहसं दंडमभिधाय। शेषाश्चेदनृतं ब्रू
युर्नियुक्ता भूमिकर्मणि। प्रत्येकं तु जघन्यास्ते विनेयाः पूर्वसाहसमिति। तत्संसक्तादिषु प्रथमसाहसमुक्तवान्। ३०२

मौलादीनामपि तमेव दंडमाह। मौलवृद्धादयस्त्वन्ये दंड्यास्ताः पृथक् पृथक्। विनेयाः प्रथमेनैव साहसेनानृते स्थि
ताइति। आदिग्रहणेन गोपशाकुनिकव्याधवनगोचराणां ग्रहणं। यद्यपि शाकुनिकादीनां पापरतत्वात् लिंगप्रद
र्शन एवोपयोगो न साक्षात्सीमानिर्णये तथापि लिंगदर्शन एव मृषाभाषित्वसंभवाद्दंडविधानमुपपद्यत एव। अ
नृते तु पृथक् दंड्या इत्येतद्दंडविधानमज्ञानविषयं। बृहस्पतिना तु गृहीतानां न सर्वे निर्णयं यदि। कुर्युर्भयाद्वा लोभा
द्वा दंड्यास्तूत्तमसाहसमिति ज्ञानविषये साक्ष्यादीनां कात्यायनेन दंडांतरविधानात्। तथा साक्षिवचनभेदे
प्ययमेव दंडस्तेनैवोक्तः। कीर्तिते यदि भेदः स्याद्दंड्यास्तूत्तमसाहसमिति। एवमज्ञानादिनानृतवदने साक्ष्या
दीन्दंडयित्वा पुनः सीमाविचारः प्रवर्तयितव्यः। अज्ञानोक्तौ दंडयित्वा पुनः सीमां विचारयेदित्युक्त्वा। त्यक्त्वा
दुष्टांस्तु सामंतानन्यान्मौलादिभिः सह। संमिश्र्य कारयेत्सीमामेवं धर्मविदो विदुरिति निर्णयप्रकार
स्तेनैवोक्तः॥॥ ॥यदा पुनः सामंतप्रभृतयो ज्ञातारश्चिह्नानि च न संति। तदा कथं निर्णय इत्यत आह। अभा
वे ज्ञातृचिह्नानां राज्ञा सीम्नः प्रवर्तिता। ज्ञातृणां सामंतादीनां लिंगानां च वृक्षादिनामभावे राज्ञैव सीम्न
प्रवर्तिता प्रवर्तयिता॥ अंतर्भावितो ण्यर्थः। ग्रामद्वयमध्यवर्तिनीं विवादास्पदीभूतां भुवं समं प्रविभ

ज्यास्येयं भरस्येयमिति उभयोः समर्थ्यं तन्मध्ये सीमालिंगानि कुर्यात्। यदा तस्यां भूमावन्यतरस्योपकारातिशयो दृ
१·२ श्यते। तदा तस्यैव ग्रामस्य सकला भूः समर्पणीया। यथाह मनुः। सीमायामविषह्यायां स्वयं राजैव धर्म्मवित्। प्र
दिशेद्भूमिमेकेषामुपकारादितिरिति॥ अस्त्यामप्यतद्द्रावाद्राकायाम स्याः स्मृतेर्न्यायमूलतां द्योतयितु
मतिदेशमाह॥ आरामायतनग्रामनिपानोद्यानवेश्मसु। एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु। आरामः पुष्पफ
लोपचयहेतुर्भूभागः। आयतनं निवेशनं पलालकूटाद्यर्थं विभक्तो भूभागप्रदेशः। ग्रामः प्रसिद्धः। ग्रामग्रहणं
च नगराद्युपलक्षणार्थं। निपानं पानीयस्थानं कूपवापिप्रभृतिकं। उद्यानं क्रीडार्था भूमिः। वेश्म गृहं। एतेष्वारा
दिष्वयमेव सामंतसाक्ष्यादिलक्षणो विधिर्ज्ञातव्यः। तथा प्रकर्षेणोद्भूतजलप्रवाहेष्वनयोर्गृहयोर्मध्येन जलौघं
प्रवहत्यनयोर्नवेस्यैवं प्रकारे विवादे। आदिग्रहणात्प्रासादादिष्वपि प्राचीन एव विधिर्वेदितव्यः। यथाह कात्यायनः।
क्षेत्रकूपतडागानां केदारारामयोरपि। गृहप्रासादावसथनृपदेवगृहेषु च॥ ॥सीमानिर्णयमुक्त्वा तत्प्रसंगेन मर्या
दाभेदनादौ दंडमाह। मर्यादायाः प्रभेदे तु सीमातिक्रमणे तथा॥ क्षेत्रस्य हरणे दंडा अधमोत्तममध्यमाः। अनेकक्षेत्रव्य
वच्छेदिका साधारणा भूर्मर्यादा तस्याः प्रकर्षेण भेदने। सीमातिक्रमणे सीमानमतिलंघ्य कर्षणे क्षेत्रस्य च भ १·२

DR. BHAU DAJI MEMORIAL

यादिप्रदर्शनेन हरणे यथाक्रमेणाधमोत्तममध्यमसाहसा दंडा वेदितव्याः। क्षेत्रग्रहणं चात्र गृहाद्युपलक्षणार्थं। यदा
पुनः स्वीयभ्रांत्या क्षेत्रादिकमपहरति तदा द्विशतो दमो वेदितव्यः। यथाह मनुः। गृहं तडागमारामं क्षेत्रं वा भीषया
हरन्। शतानि पंच दंड्यः स्यादज्ञानाद्द्विशतो दम इति। अपह्रियमाणक्षेत्रादिभूयस्त्वपर्यालोचनया कदाचिदुत्तमो दंडः
प्रयोक्तव्यः। अत एवाह। वधः सर्वस्वहरणमित्यादि। यः पुनः परक्षेत्रे सेतुकूपादिकं प्रार्थनया अर्थदानेन वा लब्ध्वानु
ज्ञो निर्म्मातुमिच्छति। तन्निषेधतः क्षेत्रस्वामिन एव दंड इत्याह। न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः। परभूमिं
हरन्कूपः स्वल्पक्षेत्रो बहूदकः। परकीयां भूमिमपहरन्नाशयन् सेतुर्जलप्रवाहबंधः क्षेत्रस्वामिना न प्रतिषेध्यः। स चे
दोषल्पपीडाकरो बहूपकारकश्च भवति। कूपश्चाल्पक्षेत्रव्यापित्वेनाल्पबाधो बहूदकत्वेन बहूपकारकोऽतो नैव नि
वारणीयः। कूपग्रहणं च वापीपुष्करिण्याद्युपलक्षणार्थं। यदा पुनरसौ सर्वक्षेत्रवर्तितया बहुबाधो नद्यादिसमीप
क्षेत्रवर्तितया वाऽल्पोपकारस्तदासौ निषेध्यः इत्यर्थादुक्तं भवति। सेतोश्च द्वैविध्यमुक्तं नारदेन। सेतुश्च द्विविधो ज्ञेयः
खेयो बंध्यस्तथैव च। तोयप्रवर्तनात्खेयो बंध्यः स्यात्तन्निवर्त्तनादिति। यदा त्वन्यनिर्मितं सेतुं भेदनादिनाऽनष्टं स्वयं संस्क
रोति तदा पूर्वस्वामिनं तद्वंश्यं नृपं वापृष्ट्वैव संस्कुर्यात्। यथाह नारदः। पूर्वप्रवृत्तमुत्सन्नमपृष्ट्वा स्वामिनं तु यः। सेतुं प्रव

र्तयेत्कश्चिन्नसतत्फलभाग्भवेत्।मृतेतुस्वामिनिपुनस्तद्वंश्येवापिमानवे।राजानमापृच्छ्यततःकुर्य्यात्सेतुप्रवर्त्तन
१·२ मिति॥ ॥क्षेत्रस्वामिनंप्रत्युपदिश्यमिदानींसेतोःप्रवर्त्तयितारंप्रत्याह।स्वामिनेयोनिवेद्यैवक्षेत्रेसेतुंप्रवर्त्तयेत्।अन्य
न्नस्वामिनोभोगस्तदभावेमहीपतेः।क्षेत्रस्वामिनमनभ्युपगमय्यतदभावेराजानंवायःपरक्षेत्रेसेतुंप्रवर्त्तयत्य
सौफलभाङ्नभवति।अपितुतदुत्पन्नेफलेक्षेत्रस्वामिनोभोगस्तदभावेराज्ञः।तस्मात्प्रार्थनयार्थदानेनवाक्षेत्रस्वा
मिनंतदभावेराजानंवानुज्ञाप्यैवपरक्षेत्रेसेतुःप्रवर्त्तनीयःइतितात्पर्यार्थः॥ ॥क्षेत्रस्वामिनासेतुर्नप्रतिषेध्यइत्यु
क्तमिदानींतस्यैवप्रसक्तानुप्रसक्त्याकंचिद्विध्यंतरमाह।फालाहतमपिक्षेत्रंनकुर्य्याद्योनकारयेत्।सप्रदाप्यःकृष्ट
फलंक्षेत्रमन्येनकारयेत्।यःपुनःक्षेत्रस्वामिपार्श्वेऽहमिदंक्षेत्रंकृषामीत्यंगीकृत्यपश्चादुत्सृजतिनचान्येनकर्षय
तितच्चक्षेत्रंयद्यपिफालाहतमीषद्धलेनविदारितंनसम्यग्बीजवापार्हंतथापितस्याकृष्टस्यफलंयावत्तत्रोत्पत्त्यर्हं
सामंतादिकल्पितंतावदसौकर्षकोदापनीयः।तच्चक्षेत्रंपूर्वकर्षकादाच्छिद्यान्येनकारयेत्॥ ॥इतिसीमाविवादः
॥ ॥व्यवहारपदानांपरस्परंहेतुहेतुमद्भावाभावात्तेषामाद्यमृणादानमित्यादिपाठक्रमोनविवक्षितइतिव्युत्क १·३
मेणस्वामिपालविवादोऽभिधीयते।माषानष्टौतुमहिषीसस्यघातस्यकारिणी।दंडनीयातदर्द्धंतुगौस्तदर्द्धमजावि

कं।परसस्यविनाशकारिणीमहिषीअष्टौमाषान्दंडनीया।गौस्तदर्द्धंचतुरोमाषान्।अजामेषाश्चमाषद्वयंदंडनीयाः
।महिष्यादीनांधनसंबंधाभावात्तत्स्वामीपुरुषोलक्ष्यते।माषश्चात्रताम्रिकपणस्यविंशतितमोभागः।पणस्यपरि
कीर्त्तितइतिनारदस्मरणात्।एतच्चाज्ञानविषयंज्ञानपूर्वेतु।पणस्यपादौद्वौगांतद्द्विगुणंमहिषींतथा।तथाजाविक
वत्सानांपादोदंडःप्रकीर्त्तितःइतिस्मृत्यंतरोक्तंद्रष्टव्यं।यत्पुनर्नारदेनोक्तं।माषंगांदापयेद्दंडंद्वौमाषौमहिषींतथा।त
थाजाविकवत्सानांदंडःस्यादर्द्धमाषिकःइतितत्पुनःप्ररोहयोग्यमूलावशेषभक्षणविषयं॥ ॥अपराधातिशयेनकं
चिद्दंडद्वैगुण्यमाह॥भक्षयित्वोपविष्टानांयथोक्ताद्द्विगुणोदमः।यदिपशवःपरक्षेत्रेसस्यंभक्षयित्वातत्रैवानि
वारिताःशेरते।तदायथोक्ताद्दंडाद्द्विगुणोदंडोवेदितव्यः।सवत्सानांपुनर्भक्षयित्वोपविष्टानांयथोक्ताच्चतुर्गुणोदंडो
वेदितव्यः।वसतांद्विगुणःप्रोक्तःसवत्सानांचतुर्गुणइतिवचनात्॥क्षेत्रांतरेपश्वंतरेवातिदेशमाह।सममेषांविवीते
पिखरोष्ट्रंमहिषीसमं।विवीतःप्रचुरतृणकाष्ठोरक्ष्यमाणःपरिगृहीतोभूप्रदेशस्तदुपघातेपीतरक्षेत्रदंडेनस
मंदंडमेषांमहिष्यादीनांविद्यात्।खरश्चोष्ट्रश्चखरोष्ट्रंमहिषीसमंमहिषीयत्रयादृशेनदंडेनदंड्यातेनतादृशेने
वदंडेनखरोष्ट्रमपिप्रत्येकंदंडनीयं।सस्योपरोधकत्वेखरोष्ट्रयोःप्रत्येकंमहिषीतुल्यत्वाद्दंडस्यवापराधानुसारि

त्वात्खरोष्ट्रमितिसमाहारोऽत्र विवक्षितः॥परसस्यविनाशे गोस्वामिनो दंड उक्तः।इदानीं क्षेत्रस्वामिने फलमप्यसौ
३.४ दापनीय इत्याह।यावत्सस्यं विनश्येत्तु तावत्स्यात्क्षेत्रिणः फलं॥गोपस्ताड्यश्च गोमी तु पूर्वोक्तं दंडमर्हति।सस्य
ग्रहणं क्षेत्रोपचयोपलक्षणार्थं।यस्मिन्क्षेत्रे यावत्पलालधान्यादिकं गवादिभिर्विनाशितं तावत्क्षेत्रफलमेता
वति क्षेत्रे एतावद्भवतीति सामंतैः परिकल्पितं।तत्क्षेत्रस्वामिने गोस्वामी दापनीयः।गोपस्तु ताडनीय एव।न फलं दाप
नीयः।गोपस्य च ताडनं पूर्वोक्तधनदंडसहितमेव पालदोषेण सस्यनाशे द्रष्टव्यं।यानष्टापालदोषेण गोस्तु सस्या
निनाशे यत्।न तत्र गोमिनो दंडः पालस्तडेरं मर्हतीति वचनात्।गोमी पुनः स्वापराधेन सस्यनाशे पूर्वोक्तं दंडमेवा
र्हति न ताडनं।फलदानं पुनः सर्वत्र गोमिन एव।नत्स्कलपुष्पमाहिष्यादिक्षीरोपभोगद्वारेण तत्क्षेत्रफलभागित्वात्।
गवादिभक्षितावशिष्टं पलालादिकं गोमिनैव ग्रहीतव्यं।मध्यस्थकल्पितमूल्यदानेन क्रीतप्रायत्वात्।अत एव ना
रदः॥गोभिस्तु भक्षितं सस्यं यो नरः प्रतियाचते।सामंतानुमतं देयं धान्यं यत्तत्र वापितं।पलालं गोमिनो देयं धान्यं वै
कर्षकस्य त्विति॥ ॥क्षेत्रविशेषे ऽपवादमाह।पथिग्रामविवीतांते क्षेत्रे दोषो न विद्यते।अकामतः कामचारे चौ
रवद्दंडमर्हतीति।पथि मार्गसमीपवर्त्तिक्षेत्रे ग्रामविवीतसमीपवर्त्तिनि च क्षेत्रेषु अकामतो गोभिर्भक्षिते गो १.४

पगोमिनोर्द्वयोरप्यदोषः।दोषाभावप्रतिपादनं च दंडाभावार्थं विनष्टसस्यमूल्यदानप्रतिषेधार्थं च।कामचारे कामतश्चा
रणे चौरवत् चौरस्य यादृशो दंडस्तादृशं दंडमर्हति।एतच्चानावृतक्षेत्रविषयं।तत्रापरिवृते धान्ये विहिंस्युः पशवो य
दि॥न तत्र प्रणयेद्दंडं नृपतिः पशुरक्षिणामिति।दंडाभावस्यानावृतक्षेत्रविषयत्वेन मनुनोक्तत्वात्।आवृते पुनर्मा
र्गादिक्षेत्रेऽपि दोषोऽस्त्येवावृतिकरणं च तेनैवोक्तं।वृतिं च तत्र कुर्वीत यामुष्ट्रो नावलोकयेत्।छिद्रं निवारयेत्सर्वं श्वसू
करमुखानुगमिति॥ ॥पशुविशेषेऽपि दंडाभावमाह॥महोक्षोत्सृष्टपशवः सूतिकागंतुकादयः।पालो येषां च ते मोक्ष्या
देवराजपरिप्लुताः।महोक्षाः साक्षा च महोक्षो वृषः सेक्ता।उत्सृष्टपशवः वृषोत्सर्गविधानेन देवतोद्देशेन त्यक्ताः सू
तिका प्रसूता अनिर्दशाहा आगंतुकः स्वयूथात्परिभ्रष्टो देशांतरादागतः एते मोच्याः परसस्यभक्षणेऽपि न दंड्याः ये
षां च पालोऽपि विद्यते तेऽपि देवराजपरिप्लुताः दैवराजोपहताः सस्यनाशकारिणो न दंड्याः।आदिग्रहणाद्धस्त्यश्वाद
यो गृह्यंते।तथा च मनुः।अदंड्या हस्तिनोऽश्वाः प्रजापाला हि ते स्मृताः अदंड्यो काणकुंठो च ये शाश्वत्कृतल
क्षणाः।अदंड्यागंतुकी गौः सूतिका चाभिसारिणी।अदंड्याश्चोत्सवे गावः श्राद्धकाले तथैव चेति।अत्रोत्सृष्टपशू
नामस्वामिकत्वेन दंड्यत्वासंभवात् दृष्टांतार्थमुपादानं।यथोत्सृष्टपशवो न दंड्या एवं महोक्षादय इति॥ ॥गो

१·५ स्वामिन उक्तमिदानीं गोपं प्रत्युपदिश्यते। यथार्पितान्पशून्गोपः सायं प्रत्यर्पयेत्तथा। प्रमादमृतनष्टांश्च प्रदाप्यः कृ
तवेतनः। गोस्वामिना प्रातःकाले यथा गणयित्वा समर्पिताः पश्वः तथैव सायंकाले गोपो गोमिने पशून्विगणय्य प्रत्य
र्पयेत्। प्रमादेन स्वापराधेन मृतान्नष्टांश्च पशून्कृतवेतनः प्रकल्पितवेतनो गोपः स्वामिने दाप्यः। वेतनकल्पना च
नारदेनोक्ता। गवां शताद्वत्सतरी धेनुः स्याद्द्विशताद्भृतिः। प्रतिसंवत्सरं गोपे संदोहश्चाष्टमेऽहनीति। प्रमादनाशश्च मनु
नास्पष्टीकृतः। नष्टं जग्धं च कृमिभिः श्वहतं विषमे मृतं। हीनं पुरुषकारेण प्रदद्यात्पाल एव त्विति। प्रसह्य चौरैरपहृ
तान्न दाप्यः। यथाह मनुः। विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति। यदि देशे च काले च स्वामिनः स्वस्य शंसतीति। देवमृता
नां तु पुनः कर्णादि प्रदर्शनीयं। कर्णौ चर्म च वालांश्च बस्तिं स्नायूं च रोचनां। पशुस्वामिषु दद्यात्तु मृतेष्वङ्कानि दर्शयन्निति
स्मरणात्।। किंच ।।पालदोषविनाशे तु पाले दण्डो विधीयते। अर्धत्रयोदशपणः स्वामिनां मूल्यमेव च।। पालदोषेनिं ण
पशुविनाशेऽर्धाधिकत्रयोदशपणं दण्डं पालो दाप्यः। स्वामिनश्च द्रव्यं विनष्टपशुमूल्यं मध्यमस्य कल्पितं। दण्डपरि
माणार्थः श्लोकोऽयं पूर्वमेव।। ।।गोप्रसंगाद्गोप्रचारमाह। ग्रामेच्छया गोप्रचारो भूमिराजवशेन वा। द्विजस्तृणैधपुष्पा
णि सर्वतः स्ववदाहरेत्। ग्रामेच्छया ग्राम्यजनेच्छया भूम्यल्पत्वमहत्त्वापेक्षया राजेच्छया वा गोप्रचारः प्रकर्तव्यः। गवादीनां १·५

चरणार्थं क्रियानिमित्तं गोः कृषः परिकल्पनीय इत्यर्थः। द्विजस्तृणाद्यन्तराभावे गवाग्निदेवतार्थं तृणकाष्ठकुसुमा
नि सर्वतः स्ववदनिवारितः आहरेत् फलानि चापरिवृतानि देवगोऽग्न्यर्थं तृणमेधांसि वीरुद्वनस्पतीनां च पुष्पाणि स्व
वदाददीत फलानि चापरिवृतानामिति गौतमस्मरणात्। एतच्चापरिगृहीतविषयं। अपरिगृहीते द्विजव्यतिरिक्त
स्यापि परिग्रहादेव स्वत्वसिद्धेः। यथाह तेनैवोक्तं। स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेष्विति यत्तु नरुक्तं। तृ
णं वा यदि वा काष्ठं पुष्पं वा यदि वा फलं। अनापृच्छ्य तु गृह्णानो हस्तच्छेदनमर्हतीति। द्विजव्यतिरिक्तविषयमापना
पद्विषयं वा गवाद्यतिरिक्तविषयं वा।। ।।इदमपरं गवादीनां स्थानासनसौकर्यार्थमुच्यते। धनुःशतं परीणा
हो ग्रामक्षेत्रान्तरं भवेत्। द्वे शते खर्वटस्य स्यान्नगरस्य चतुःशतं। ग्रामक्षेत्रयोरन्तरं धनुःशतपरिमितं परीणाहः
सर्वतो दिक्षु अनुप्तसस्यं कार्यं। खर्वटस्य प्रचुरकंटकसंतानस्य ग्रामस्य द्वे शते परिणाहः। नगरस्य बहुजनसंकी
र्णस्य धनुषां चतुःशतपरिमितमन्तरं कार्यं।। इति स्वामिपालविवादप्रकरणं।। ।।संप्रत्यस्वामिविक्रयाख्यं व्यव गोपाल
हारपदमुपक्रमते।। तस्य च लक्षणं नारदेनोक्तं। निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा। विक्रीयतेऽसमक्षं यत्स ज्ञे
योऽस्वामिविक्रय इति। तत्र किमित्याह। स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते। हीनाद्रहो हीनमूल्ये वेलाहीने

वत्तस्करः। स्वमस्त्रसंबंधिद्रव्यं अन्यविक्रीतं अस्वामिनि विक्रीतं यदि पश्यति तदा लभेत गृह्णीयात्। अस्वामिविक्रय
१०६ स्यस्वत्वहेतुत्वाभावात्। विक्रीतग्रहणं दत्ताहितयोरुपलक्षणार्थं। अस्वामिकृतत्वेन तुल्यत्वादत एवोक्तं। अस्वामि
विक्रयं दानमाधिं च विनिवर्तयेदिति। क्रेतुश्च पुनरप्रकाशिते गोपिते क्रये दोषो भवति। तथा हीनात् तद्रव्यागमोपा
यहीनात् रहसि चैकांते। संभाव्यद्रव्यादपि हीनमूल्यो ल्पतरेण च मूल्येन क्रये वेलाहीने वेलया हीनो वेलाहीनः
क्रयो रात्र्यादौ कृतस्तत्र च क्रेता तस्करो भवति। तस्करवद्दंडादिभाग्भवतीत्यर्थः। यथोक्तं। द्रव्यमस्वामिविक्रीतं प्राप्य स्वा
मी तदाप्नुयात्। प्रकाशं क्रयतः शुद्धिः क्रेतुः स्तेयं रहः क्रयादिति॥ ॥स्वाम्यभियुक्तेन क्रेत्रा किं कर्तव्यमित्यत आह॥
नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नरं। देशकालातिपत्तौ च गृहीत्वा स्वयमर्प्पयेत्। नष्टमपहृतं वा ऽन्यदीयं क्रया
दिना प्राप्य हर्तारं विक्रेतारं नरं ग्राहयेत् चौरोद्धरणकादिभिः आत्मविशुद्ध्यर्थं राजदंडप्राप्त्यर्थं च। अथाविदितदेशां
तरगतः कालांतरे वा विपन्नस्तदा मूलसमाहरणाशक्तेर्विक्रेतारमदर्शयित्वैव स्वयमेव तद्धनं नाष्टिकस्य सम
र्प्पयेनावं तेवा सौ शुद्धो भवतीति श्रीकराचार्येण व्याख्यातं। तदिदमनुपपन्नं। विक्रेतुर्दर्शनाच्छुद्धिरित्यनेनापौ
नरुक्त्यप्रसंगात्। तोन्यथा व्याख्यायते। नष्टापहृतमित्ति नाष्टिकं प्रत्ययमुपदेशः। नष्टमपहृतं चात्मीयद्रव्य १०६

मासाद्य क्रेतृहस्तस्थं ज्ञात्वा तं हर्तारं क्रेतारं स्थानपालादिभिर्ग्राहयेत्। देशकालातिपत्तौ देशकालातिक्रमे स्थानपा
लाद्यसंनिधानेन द्विज्ञापनकालात् प्रागपलायनाशंकायां स्वयमेव गृहीत्वा तेभ्यः समर्प्पयेत्॥ ॥ग्राहिते हर्त्तरि किं
कर्तव्यमित्यत आह॥ विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमं। क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी। य
द्यसौ गृहीतः क्रेता न मयेदमपहृतमन्यसकाशात् क्रीतमिति वक्ति तदा तस्य क्रेतुर्विक्रेतृदर्शनमात्रेण शुद्धिर्भवति।
न पुनरसावभियोज्यः। किंतु तत्प्रदर्शितेन विक्रेत्रा सह नाष्टिकस्य विवादः। यथाह बृहस्पतिः। मूले समाहिते क्रेता ना
भियोज्यः कथंचन। मूलेन सह वादस्तु नाष्टिकस्य विधीयत इति। तस्मिन्विवादे यद्यस्वामिविक्रयनिश्चयो भवति तदा
तस्य नष्टापहृतस्यागवादि द्रव्यस्य यो विक्रयी विक्रेता तस्मात्सकाशात् स्वामी नाष्टिकः स्वीयं द्रव्यमवाप्नोति नृपश्चा
पराधानुरूपं दंडं क्रेता मूल्यमवाप्नोति। अथासौ देशांतरगतं तदा योजनसंख्यया आनयनार्थं कालो देयः। प्रका
शं वा क्रयं कुर्यान्मूलं चापि समर्पयेत्। मूलानयनकालश्च देयस्तत्राध्वसंख्ययेति स्मरणात्। अथाविज्ञातदेशतया
मूलमाहर्तुं न शक्नोति। तदा क्रयं शोधयित्वैव शुद्धो भवति। असमाहार्यमूलस्तु क्रयमेव विशोधयेदिति वचनात्।
यदा पुनः साक्ष्यादिभिर्दिव्येन वा क्रयं न शोधयति मूलं च न प्रदर्शयति। तदा स एव दंडादिभाग्भवति॥ अनुपस्थाप

१०७ यन्मूलं क्रयं वाप्नुविशोधयन्। यथाभियोगं धनिने धनं दाप्यो दमं च स इति स्मरणात्॥ ॥स्वेन भेतान्यविक्रीतमिस्म
कं। तस्मिन्सु नाकिं कर्तव्यमित्यत आह। आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा। पंचबंधो दमस्तस्य राज्ञे तेनाऽवि
भाविते। आगमेन क्रयक्रयादिना उपभोगेन च मदीयमिदं द्रव्यं तच्चैवं नष्टमपहृतं चेत्यपि भाव्यं साधनीयं तत्स्वा
मिना। अतोऽन्यथानेन स्वामिनाऽविभाविते पंचबंधो नष्टद्रव्यस्य पंचमांशो दमो नाष्टिकेन राज्ञे देयः। अत्र चा
यं क्रमः। पूर्वं स्वामी नष्टमात्मीयं साधयेत् ततः क्रेता चौर्यपरिहारार्थं मूल्यलाभाय च विक्रेतारमानयेत्। अथा
नेतुं न शक्नोति तदात्मदोषपरिहाराय क्रयं साधयित्वा द्रव्यं नाष्टिकस्य समर्पयेदिति॥ तस्करस्य प्रच्छादकं
प्रत्याह। हृतं प्रनष्टं यो द्रव्यं परहस्तादवाप्नुयात्। अनिवेद्य नृपे दंड्यः स तु षण्णवतिं पणान्। हृतं प्रनष्टं वा चौ
रादिहस्तस्थं द्रव्यं अनेन मदीयद्रव्यमपहृतमिति नृपस्यानिवेद्यैव दर्पादिना यो गृह्णाति असौ षडुत्तरान्न
वतिं पणान् दंडनीयः। तस्करप्रच्छादकत्वेन दुष्टत्वात्॥ राजपुरुषानीतं प्रत्याह॥ शौल्किकैः स्थानपालैर्वा
नष्टापहृतमाहृतं। अर्वाक्संवत्सरात्स्वामी हरेत परतो नृपः। यदा तु शुल्काधिकारिभिः स्थानरक्षिभिर्वा न १०७
ष्टमपहृतं द्रव्यं राजपार्श्वं प्रत्यानीतं तदा संवत्सरादर्वाक् प्राप्तश्चेन्नाष्टिकस्तद्द्रव्यमवाप्नुयात्। ऊर्द्ध्वं पुनः

संवत्सरात्तद्राजा गृह्णीयात्। स्वपुरुषानीतं च द्रव्यं जनसमक्षे घुष्टं स्थाप्य यावद्वत्सरं राज्ञा रक्षणीयं। यथाह गौतमः। प्रन
ष्टमस्वामिकमधिगम्य राज्ञे प्रब्रूयुर्विख्याप्य संवत्सरं राज्ञा रक्ष्यमिति। यत्तु मनुनाऽवध्यन्तरमुक्तं। प्रनष्टस्वामि
कं द्रव्यं राजा त्र्यब्दं निधापयेत्। अर्वाक् त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्हरेदिति। तत्तु श्रुतवृत्तसंपन्नब्राह्मणविषयं रक्ष
णनिमित्तं षड्भागादिग्रहणं च तेनैवोक्तं। आददीताथ षड्भागं प्रनष्टाधिगमान्नृपः। दशमं द्वादशं वापि सतां धर्ममम
नुस्मरन्निति। तृतीयद्वितीयप्रथमवत्सरेषु यथाक्रमं षड्द्वादशयो भागा वेदितव्याः। प्रपंचितं चैतत्पुरस्तात्। मनूक्त
षड्भागादिग्रहणस्य द्रव्यविशेषेऽपवादमाह॥ ॥पणानेकशफे दद्याच्चतुरः पंच मानुषे। महिषोष्ट्रगवां द्वौ द्वौ पादं पा
दमजाविके। एकशफे अश्वादौ प्रनष्टाधिगते तत्स्वामी राज्ञे रक्षणनिमित्तं चतुरः पणान्दद्यात् मानुष्यजातीये द्र
व्ये पंच पणान् महिषोष्ट्रगवां रक्षणनिमित्तं प्रत्येकं द्वौ द्वौ पणौ अजाविके पुनः प्रत्येकं पादं पादं दद्यादिति सर्वत्रानुष
ज्यते। अजाविकमिति समाननिर्देशोऽपि पादं पादमिति वीप्साबलात्प्रत्येकं संबंधो गम्यते॥ ॥इत्यस्वामिविक्रयप्र
करणं॥ ॥अधुना विहिताविहितमार्गद्वयाश्रयतया दत्तानपाकर्म्म दत्ताप्रदानिकमिति च लब्धाभिधानद्वयं तदस्य
व्यवहारपदमभिधीयते। तत्स्वरूपं च नारदेनोक्तं। दत्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति। दत्ताप्रदानिकं नाम व्यवहा

रपदंहितरिति। असम्यग्विहितमार्गाश्रयेणद्रव्यंदत्वापुनरादातुमिच्छतियस्मिन्विवादपदेतद्दत्ताप्रदानिकंदत्तस्या
१०८ प्रदानंपुनर्हरणंयस्मिन्दानाख्येतद्दत्ताप्रदानिकंनामव्यवहारपदं। विहितमार्गाश्रयत्वेनतन्निष्पन्नंतन्नदेव
व्यवहारपदंदत्तानपकर्मेत्यर्थादुक्तं। दत्तस्यानपकर्म्म अपुनरादानं। यत्रदानाख्येविवादपदेतद्दत्तानपकर्म
तच्चदेयादेयादिभेदेनचतुर्विधं। यथाहनारदः। अथदेयमदेयंचदत्तंचादत्तमेवच। व्यवहारेषुविज्ञेयोदानमार्गश्च
तुर्विधः इति। तत्रदेयमित्यनिषिद्धदानक्रियायोग्यमुच्यते। अदेयमस्वतयानिषिद्धतयावादानानर्हं। यत्पुनःप्रकृ
तिस्थेनदत्तमव्यावर्तनीयंतद्दत्तमुच्यते। अदत्तंतुयत्तस्याहरणीयंतत्कथ्यते। तदेतत्संक्षेपतोनिरूपयितुमाह॥ ॥
स्वंकुटुंबाविरोधेनदेयंदारसुतादृते। नान्वयेसतिसर्वस्वंयच्चान्यस्मैप्रतिश्रुतं। स्वमात्मीयंकुटुंबाविरोधेनकुटुंबा
परोधेनकुटुंबभरणावशिष्टमितियावत्तद्द्याद्भरणस्यावश्यकत्वात्। तथाचमनुः। वृद्धौचमातापितरौसाध्वीभा
र्याशिशुःसुतः। अप्यकार्यशतंकृत्वाभर्त्तव्यामनुरब्रवदिति। स्वकुटुंबाविरोधेनेत्यनेनदेयमेकविधंदर्शयतिस्वंद
द्यादित्यनेनचास्वभूतानामन्वाहितयाचितकाधिसाधारणनिक्षेपाणांपंचानामप्यदेयत्वंव्यतिरेकेणदर्शितं। य १०८
त्पुनर्नारदेनाष्टविधत्वमदेयानामुक्तं। अन्वाहितंयाचितकमाधिःसाधारणंचयत्। निक्षेपःपुत्रदाराश्चसर्वस्वं

MEMORIAL

चान्वयेसति। आपत्स्वपिहिकष्टासुवर्त्तमानेनदेहिना। अदेयान्याहुराचार्यायच्चान्यस्मैप्रतिश्रुतमिति। एतददेयत्वमात्रा
भिप्रायेणनपुनःस्वत्वाभावाभिप्रायेण। पुत्रदारसर्वस्वप्रतिश्रुतेषुसत्वस्यसद्भावात्। अन्वाहितादीनांस्वरूपंचप्रागेवप्र
पंचितं। स्वंदद्यादित्यनेनदारसुतादेरपिस्वत्वाविशेषेणदेयत्वप्रसंगेप्रतिषेधमाह। दारसुतादृतेदारसुतव्यतिरिक्तंस्वं
दद्यान्नदारसुतमित्यर्थः। तथापुत्रपौत्राद्यन्वयेविद्यमानेसर्वंधनंनदद्यात्। पुत्रानुत्पाद्यसंस्कृत्यवृत्तिंचैषांप्रकल्प
येदितिस्मरणात्। तथाहिरण्यादिकमन्यस्मैप्रतिश्रुतमन्यस्मैनदेयं॥ ॥एवंदारसुतादिव्यतिरिक्तंदेयमुक्त्वाप्रसंगाद्देय
धनग्रहणंचप्रतिग्रहीत्राप्रकाशमेवकर्त्तव्यमित्याह। प्रतिग्रहःप्रकाशःस्यात्स्थावरस्यविशेषतः। देयंप्रतिश्रुतंचैव
दत्वानापहरेत्पुनः। प्रतिग्रहणंप्रतिग्रहःसप्रकाशःकर्त्तव्यःविवादनिराकरणार्थंस्थावरस्यविशेषतःप्रकाशमेवग्रह
णंकार्य्यं। सुवर्णादिवदात्मनिस्थितस्यदर्शयितुमशक्यत्वात्। एवंप्रासंगिकमुक्त्वाप्रकृतमनुसरन्नाह। देयंप्रतिश्रु
तंचैवयद्यस्मैधर्म्मार्थंप्रतिश्रुतंतत्तस्मैदेयमेवयद्यसौधर्म्मप्रच्युतोनभवतिप्रच्युतेपुनर्नदातव्यं। प्रतिश्रुताया
प्यधर्म्मसंयुक्तायनदद्यादितिगौतमस्मरणात्। दत्वानापहरेत्पुनः न्यायमार्गेणयद्दत्तंतत्सर्वविधमपिपुनर्ना
पहर्त्तव्यंकिंतुतथैवानुमंतव्यं। यत्पुनरन्यायेनदत्तंतद्दत्तंषोडशप्रकारमपिप्रत्याहर्त्तव्यमेवेत्यर्थादुक्तंभवति। ना

रदेन चाऽदत्तं सप्तविधं प्रोक्तं मदत्तं षोडशात्मकमिति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतं॥ पण्यमूल्यं भृतिस्तुष्ट्या
१·९ स्नेहात्प्रत्युपकारतः। स्त्रीशुल्कानुग्रहार्थं च दत्तं दानविदो विदुः॥ अदत्तं तु भयक्रोधशोकवेगरुजान्वितैः। तथो
त्कोचपरीहासव्यत्यासच्छलयोगतः॥ बालमूढास्वतंत्रार्त्तमत्तोन्मत्तापवर्जितं। कर्त्ता ममेदं कर्मेति प्रतिलाभेच्छ
या तु यत्। अपात्रे पात्रमित्युक्ते कार्ये चाधर्म्मसंहिते। यद्दत्तं स्यादविज्ञानाददत्तमिति तत्स्मृतमिति। अयमर्थः। प
ण्यस्य क्रीतद्रव्यस्य यन्मूल्यं दत्तं भृतिर्वेतनं कृतकर्म्मणे दत्तं तुष्ट्या वंदिचारणादिभ्यो दत्तं। स्नेहात् दुहितृपुत्रादिभ्यो
दत्तं। प्रत्युपकारतः उपकृतवते प्रत्युपकाररूपेण दत्तं स्त्रीशुल्कं परिणयनार्थं कन्याज्ञातिभ्यो यद्दत्तं यच्च अनुग्र
हार्थं दृष्टार्थं दत्तं तत्सप्तविधं दत्तमेव न प्रत्याहरणीयं। भयेन बंदिग्राहादिभ्यो दत्तं क्रोधेन पित्रादिवैरनिर्यातना
यान्यस्मै दत्तं पुत्रवियोगादिनिमित्तशोकार्थवेगेन दत्तं। उत्कोचेन कार्यप्रतिबंधनिरासार्थमधिकृतेभ्यो दत्तं। परि
हासेनोपहासेन दत्तं। एकः स्वद्रव्यमन्यस्मै ददात्यन्योऽपि तस्मै ददातीति दानव्यत्यासः। छलयोगतः शतं दानम
भिसंधाय सहस्रमिति परिभाष्य ददाति। बालेनाप्राप्तषोडशवर्षेण। मूढेन लोकवेदानभिज्ञेन। अस्वतंत्रेण पु
त्रदासादिना। आर्त्तेन रोगाभिभूतेन। मत्तेन मदनीयेन। उन्मत्तेन वातिकाद्युन्मादग्रस्तेन च अपवर्जितं दत्तं। तथायं मम १·९

दीयं कर्म करिष्यतीति प्रतिलाभेच्छया दत्तं। अचतुर्वेदाय चतुर्वेदोऽहमित्युक्तवते दत्तं। यज्ञं करिष्यामीति धनं लब्ध्वा द्यूता
दौ विनियुंजानाय दत्तमित्येवं षोडशप्रकारमपि दत्तमदत्तमित्युच्यते। प्रत्याहरणीयत्वात्। आर्त्तदत्तस्य दत्तत्वं धर्म्म
कार्यव्यतिरिक्तविषयं। स्वस्थेनार्त्तेन वा यद्दत्तं श्रावितं धर्म्मकारणात्। अदत्वा तु मृते दाप्यस्तत्सुतो नात्र संशयइ
ति कात्यायनस्मरणात्। तथेदमपरं संक्षिप्तार्थवचनं सर्वविवादसाधारणं। योगाधमनविक्रीतं योगदानप्रति
ग्रहं। यस्य वाप्युपधिं पश्येत्तत्सर्वं विनिवर्त्तयेदिति। योग उपाधिः। योगेनोपाधिविशेषेणाधिक्रियदानप्रतिग्रहाः
कृतास्तदुपाधिविगमे क्रयादीन्विनिवर्त्तयेदित्यर्थः। यत्पुनः षोडशप्रकारमप्यदत्तं यश्चागृह्णाति यश्चादेयं प्रय
च्छति। तयोर्दंडो नारदेनोक्तः। गृह्णात्यदत्तं यो लोभाद्यश्चादेयं प्रयच्छति। अदेयदायको दंड्यस्तथाऽदत्तप्रतीच्छकइ
ति॥ ॥इति दत्ताप्रदानिकं नाम पदं॥ ॥क्रीतानुशयः कथ्यते। तत्स्वरूपं च नारदेनोक्तं। क्रीत्वा मूल्येन यः पण्यं क्रे पश्चात्तापः
ता न बहु मन्यते। क्रीतानुशय इत्येतद्विवादपदमुच्यते इति। तत्र च यस्मिन्नहनि पण्यं क्रीतं तस्मिन्नेवाह्नि तदविकृतं
प्रत्यर्पणीयमिति तेनैवोक्तं। क्रीत्वा मूल्येन यः पण्यं दुःक्रीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षत
मिति। द्वितीयादिदिने तु प्रत्यर्पणे विशेषस्तेनैवोक्तः द्वितीयेऽह्नि ददत्क्रेता मूल्यात्त्रिंशांशमावहेत्। द्विगुणं तु तृतीयेऽह्नि

परतः क्रेतुरेव तदिति परतोनुशयो न कर्त्तव्य इत्यर्थः। एतच्च बीजादिव्यतिरिक्त भोगादिविनश्वरभोगविषयं। बीजादिक्र
११० येपुनरन्य एव प्रत्यर्पणेवधिरित्याह। दशैकपंचसप्ताहमासत्र्यहार्द्धमासकं। बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां प
रीक्षणं। बीजं व्रीह्यादिबीजं। अयो लोहः। वाह्यो वलीवर्द्दादिः। रत्नं मुक्ताप्रवालादि। स्त्री दासी। दोह्यं महिष्यादि। पु
मान् दासः। एषां बीजादीनां यथाक्रमेण दशाहादिकः परीक्षाकालो विज्ञेयः परीक्षमाणे च बीजादौ यद्यसम्यक्त्व
बुध्यानुशयो भवति न दशाहाद्यूर्ध्वं तत्र एवं क्रयनिवृत्तिर्भवति न पुनरूर्द्ध्वमित्युपदेशप्रयोजनं। यत्तु मनुवचनं। क्रीत्वा
विक्रीय वा किंचिद्यस्येहानुशयो भवेत्। सोन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वेति। तदुक्तलोहादिव्यतिरिक्तोपभोग
विनश्वरगृहक्षेत्रयानशयनादिविषयं। सर्वं चैतदपरीक्षितक्रीतविषयं। यत्तु नः परीक्षितं न पुनः प्रत्यर्पणीयमिति
। समयं क्रीत्वा यः क्रीतं तद्विक्रेत्रे प्रत्यर्पणीयं। तदुक्तं। क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः। परीक्ष्याभिमतं क्री
तं विक्रेतुर्न भवेत्पुनरिति। दोह्यादिपरीक्षाप्रसंगेन स्वर्णादेरपि परीक्षणमाह। अग्नौ सुवर्णमक्षीणं रजते द्विपलं
शते। अष्टौ त्रपुणि सीसे च ताम्रे पंचदशायसि। वह्नौ प्रताप्यमानं सुवर्णं न क्षीयते। अतः कटकादिनिर्माणार्थं याव
त्स्वर्णकारहस्ते प्रक्षिप्तं तावत् तुलितं तेः प्रत्यर्प्पणीयं। इतरथा क्षयं दाप्यादंड्याश्च। रजते तु शतपले प्रताप्यमाने ११०

पलद्वयं क्षीयेत। अष्टौ त्रपुनि सीसे च शत इत्यनुवर्त्तते। त्रपुनि सीसे च शतपले प्रताप्यमाने अष्टौ पलानि क्षीयंते। ताम्रे पंचद
शायसि। ताम्रे शतपले पंच पलानि अयसि दशपलानि क्षीयंते। अत्रापि शत इत्येव। कांस्यस्य च त्रपुताम्रयोनित्वात्तदनु
सारेण क्षयः कल्प्यः। अतोधिकक्षयकारिणः शिल्पिनो दंड्याः॥ क्वचित्कंबलादौ वृद्धिमाह॥ शते दशपलावृद्धि
रौर्णे कार्पाससूत्रके। मध्ये पंचपला सूत्रे सूक्ष्मे तु त्रिपला मता। स्थूलेनौर्णेन सूत्रेण यत्कंचित्कंबलादिकं क्रीयते
तस्मिन् शतपले दशपलावृद्धिर्वेदितव्या। एवं कार्प्पाससूत्रनिर्मिते पटादौ वेदितव्यं। मध्यं अनतिसूक्ष्मसूत्रनि
र्मिते पटादौ पंचपलावृद्धिः। सुसूक्ष्मसूत्ररचिते शते त्रिपलावृद्धिर्बोद्धव्या। एतच्चाप्रक्षालितवासोविषयं॥ ॥द्र
व्यांतरे विशेषमाह। कार्मिके रोमबद्धे च त्रिंशद्भागः क्षयो मतः। न क्षयो न च वृद्धिश्च कौशेये वल्कलेषु च। कर्मिकं
कर्म्मणा चित्रेण निर्मितं॥ यत्र निष्पन्ने पटे मेचकस्वस्तिकादिकं चित्रसूत्रैः क्रियते तत्कार्मिकमित्युच्यते। यत्र प्रावा
रादौ रोमाणि बध्यंते स रोमबंधः। तत्र त्रिंशत्तमो भागः क्षयो वेदितव्यः। कौशेये कोषप्रभवे वल्कलेषु च क्षालितदु
निर्मितेषु वसनेषु वृद्धिक्षासौ न स्तः। किंतु यावद्धानार्थं कुविंदादिभ्यो दत्तं तावदेव प्रत्यादेयं॥ ॥द्रव्यांतरस्या स्रातिद्रव्ये
क्षयवृद्धिप्रतिपादनाशक्तेः सामान्येन ह्रासवृद्धिज्ञानोपायमाह। देशं कालं च भोगं च ज्ञात्वा नष्टे बलाबलं। द्रव्याणां।

कुशला ब्रूयुर्यत्र द्रव्यमसंशयं। नाशे क्षेमादेर्द्रव्ये नष्टे ह्रासमुपगते द्रव्याणां कुशलाः द्रव्यवृद्धीक्ष्यादिभिज्ञाः देशं काल
१११ मुपभोगं नष्टद्रव्यस्य बलाबलं सारासारतां च परीक्ष्य यत्कल्पयंति तद्दसं न्याय्यं शिल्पिनो दाप्याः॥ ॥इति क्रीतानुशय
प्रकरणं॥ ॥सांप्रतमभ्युपेत्याशुश्रूषाख्यमपरं विवादपदमभिधातुमुपक्रमते तत्स्वरूपं च नारदेनोक्तं। अभ्युपेत्य
तु शुश्रूषां यस्तां न प्रतिपद्यते। अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यत इति। आज्ञाकरणं शुश्रूषा नाम अंगीकृत्य प
श्चाद्यो न संपादयति तद्विवादमभ्युपेत्याशुश्रूषाख्यं। शुश्रूषकः पंचप्रकारः। शिष्यान्तेवासी भृतकोऽधिक
र्मकृद्दास इति तेषामाद्याश्चत्वारः कर्मकरा उच्यंते। ते च शुभकर्मकारिणः। दासाः पुनर्गृहजातादयः पंचदश
प्रकाराः गृहद्वाराशुचिस्थानरथ्यावस्करशोधनाद्यशुभकारिणस्तदिदं नारदेन स्पष्टीकृतं। शुश्रूषकः पंचवि
धः शास्त्रे दृष्टो मनीषिभिः। चतुर्विधः कर्मकरस्तेषां दासास्त्रिपंचकाः। शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधि
कर्मकृत्। एते कर्मकरा ज्ञेया दासास्तु गृहजादयः। सामान्यमस्वतंत्रत्वमेषामाहुर्मनीषिणः। जातिकर्मकृत
स्तु को विशेषो वृत्तिरेव च। कर्मापि द्विविधं ज्ञेयमशुभं शुभमेव च। अशुभं दासकर्मोक्तं शुभं कर्मकृतां स्मृतं। गृह
द्वाराशुचिस्थानरथ्यावस्करशोधनं। गुह्यांगस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनं। इच्छतः स्वामिनश्चांगैरुपस्था १११

नमथांततः। अशुभं कर्म विज्ञेयं शुभमन्यदतः परमिति। तत्र शिष्यो वेदविद्यार्थी अंतेवासी शिल्पशिक्षार्थी। भृत्येन
यः कर्म करोति स भृतकः। कर्म कुर्वतामधिष्ठाता अधिकर्मकृत्। अशुचिस्थानमुच्छिष्टप्रक्षेपार्थं गर्त्तादिकं।
अवस्करं गृहमार्जितपांश्वादिनिचयस्थानं। उज्झनं त्यागः। भृतकश्चात्र त्रिविधः। तदुक्तं। उत्तमस्त्वायुधीयोऽत्र मध्य
मस्तु कृषीवलः। अधमो भारवाही स्यादित्येवं त्रिविधो भृतक इति। दासाः पुनः। गृहजातस्तथा क्रीतो लब्धो दायादु
पागतः। अनाकालभृतस्तद्वदाहितः स्वामिना च यः। मोक्षितो महतश्चर्णाद्युद्धप्राप्तः पणे जितः। तवाहमित्युपग
तः प्रव्रज्यावासितः कृतः। भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः। विक्रेता चात्मनः शास्त्रे दासाः पंचदश स्मृताः। गृहे
दास्यां जातो गृहजातः। क्रीतो मूल्येन। लब्धः प्रतिग्रहादिना। दायादुपागतः पित्रादिदासः। अनाकालभृतो दुर्भिक्षे
दासत्वाय मरणाद्रक्षितः। आहितः स्वामिना धनग्रहणेनाधीतां नीतः। ऋणमोचनेन दासत्वमभ्युपगतः ऋणदा
सः। युद्धप्राप्तः समरे विजित्य गृहीतः। पणे जितः यद्यस्मिन्विवादे पराजितोऽहं तदा त्वद्दासो भवामीति परिभाष्य जितः।
तवाहमित्युपगतः तवाहं दास इति स्वयं संप्रतिपन्नः। प्रव्रज्यावसितः प्रव्रज्यातश्च्युतः। कृतः एतावत्कालं त्वं दास
इत्यभ्युपगमितः। भक्तदासः सर्वकालं भक्तार्थमेव दासत्वमभ्युपगम्य यः प्रविष्टः। वडवाहृतो वडवा गृहदासी तया

हृतस्तल्लाभेन तामुद्वाह्य दासत्वेन प्रविष्टः। यआत्मानं विक्रीणीते असावात्मविक्रेतेत्येवं पंचदशप्रकाराः। यत्तु मनुना
११२ । ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ। पैतृको दंडदासश्च सप्तैते दासयोनयः। इति सप्तविधत्वमुक्तं तत्तेषां दा
सत्वप्रतिपादनार्थं न तु परिसंख्यार्थं। तत्रैषां शिष्यान्तेवासिभृतकाधिकर्म्मकृद्दासानां मध्ये शिष्यवृत्तिः प्रागे
व प्रतिपादिता। आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेदित्यादिना। अधिकर्म्मकृद्भृतकानां वेतनदान
प्रकरणे वक्ष्यते। यो यावत्कुरुते कर्म्म तावत्तस्य सुवेतनमित्यादिना॥ ॥दासान्तेवासिनोस्तु धर्म्मविशेषं वक्तु
माह। बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते। स्वामिप्राणप्रदो भक्तत्यागात्तन्निष्क्रयादपि। बलात् बलावष्ट
म्भेन यो दासीकृतः। यश्चौरैरपहृत्य विक्रीतः अपिशब्दादाहितो दत्तश्च समुच्यते। यदि स्वामी न मुंचति तर्हि राज्ञा
मोचयितव्यः। उक्तं च नारदेन। चौरापहृतविक्रीता ये च दासीकृता बलात्। राज्ञा मोचयितव्यास्ते दास्यं तेषु हि नेष्य
ते इति। चौरव्याघ्रादवरुद्धस्य स्वामिनः प्राणान्यः प्रददाति रक्षति असावपि मोचनीयः। तदिदं सर्वदासानां साधार
णं दास्यनिवृत्तिकारणं। यो वैषां स्वामिनं कश्चिन्मोक्षयेत्प्राणसंशयात्। दासत्वात्स विमुच्येत पुत्रभागं लभेत चे
ततद्यक्रिवं ति नारदस्मरणात्। भक्तदासादीनां प्रातिस्विकमपि मोक्षकारणमुच्यते। अनाकालभृत भक्तदासो भक्तस्य ११२

त्यागाद्दासभावादारभ्य स्वामिद्रव्यं यावदुपभुक्तं तावद्दत्त्वा मुच्यते। आहितर्णदासौ तु तन्निष्क्रयात्। यद्गृहीत्वा स्वामिनो आ
हितो यश्च दत्त्वा धनिनो ऋमर्णत्मो चितस्तस्य निष्क्रयात् सवृद्धिकस्य प्रत्यर्पणान्मुच्यते। नारदेन विशेषोप्युक्तः। अना
कालभृतो दास्यान्मुच्यते गोयुगं ददत्। संभक्षितं यद्दुर्भिक्षे न तच्छुद्ध्येत कर्म्मणा। भक्तस्योत्क्षेपणात्सद्यो भक्तदासः प्रमु
च्यते। आहितोपि धनं दत्त्वा स्वामी यद्येनमुद्धरेत्। ऋणं सूतोदयं दत्वा ऋणी दास्यात्प्रमुच्यते इति। तथा तवाहमित्यभ्यु
पगत युद्धप्राप्तपणजितकृतकवडवाहृतानां च प्रातिस्विकं मोचनकारणं तेनैवोक्तं। तवाहमित्युपगतो युद्धप्राप्तः पणे
जितः। प्रतिशीर्षप्रदानेन मुच्येरंस्तुल्यकर्मणा। कृतकालव्यपगमात्कृतकोपि विमुच्यते। निग्रहाद्वडवायास्तु मुच्य
ते वडवाहृत इति। दासेन सह संभोगनिरोधादित्यर्थः। तरेवं गृहजातक्रीतलब्धदायप्राप्त आत्मविक्रयिणां। स्वामि
प्राणप्रदानतत्प्रसादरूपसाधारणकारणव्यतिरेकेण मोक्षो नास्ति विशेषकारणानभिधानात्। दासमोक्षश्चा
नेन क्रमेण कर्त्तव्यः। स्वं दासमिच्छेद्यः कर्तुमदासं प्रीतमानसः। स्कन्धादादाय तस्यासौ भिंद्यात्कुंभं सहांभसा। साक्ष
ताभिः सपुष्पाभिर्मूर्द्धन्यद्भिरवाकिरेत्। अदास इति चोक्त्वा त्रिः प्राङ्मुखं तमथोत्सृजेत्। इति तेनैवोक्तं। प्रव्रज्यावसि
तस्य तु मोक्षो नास्तीत्याह। प्रव्रज्यावसितो राज्ञो दास आमरणान्तिकः। प्रव्रज्यासंन्यासस्तेनावसितः प्रच्युतः अनभ्यु

पगतप्रायश्चित्तश्चेद्दातृएवदासोभवति।मरणमेवतद्दासत्वस्यांतोनांतराप्रतिमोक्षोस्ति॥ ॥वर्णापेक्षयादास्यव्य
११३ वस्थामाह॥वर्णानामानुलोम्येनदास्यंनप्रतिलोमतः।ब्राह्मणादीनांवर्णानामानुलोम्येनदास्यं॥ब्राह्मणस्यक्ष
त्रियादयःक्षत्रियस्यवैश्यशूद्रौवैश्यस्यशूद्रः इत्येवमानुलोम्येनदासभावोभवतिनप्रातिलोम्येन।स्वधर्मत्या
गिनःपुनःपरिव्राजकस्यप्रातिलोम्येनापिदास्यंदृष्टमतएव।यथाहनारदः।वर्णानांप्रातिलोम्येनदासत्वंनविधीय
ते।स्वधर्म्मत्यागिनोन्यत्रदारवद्दासतामतेति।अंतेवासिधर्म्मानाह।कृतशिल्पोपिनिवसेत्कृतकालंगुरोर्गृहे।अं
तेवासीगुरुप्राप्तभोजनस्तत्फलप्रदः।अंतेवासीगुरोर्गृहेकृतकालंवर्षचतुष्टयंआयुर्वेदादिशिल्पशिक्षार्थत्वद्गृहंव
सामीतियावदंगीकृतंतावत्कालंवसेत्।यद्यपिवर्षचतुष्टयादर्वागेवलब्धापेक्षितशिल्पविद्यःकथंनिवसेतगुरुप्राप्त
भोजनःगुरोःसकाशात्प्राप्तभोजनंयेनसतथोक्तः।तत्फलप्रदः।तस्यशिल्पस्यफलमाचार्यायददातीतितत्फलप्र
दः।एवंभूतोवसेत्।नारदेनविशेषोप्यत्रदर्शितः।स्वशिल्पमिच्छन्नाहर्तुंबांधवानामनुज्ञया।आचार्यस्यवसेदंते
कृत्वाकालंसुनिश्चितं।आचार्यःशिक्षयेदेनंस्वगृहेदत्तभोजनं।नचान्यत्कारयेत्कर्मपुत्रवच्चैनमाचरेत्।शिक्षयं
तमसंदुष्टंयआचार्यःपरित्यजेत्।बलाद्वासयितव्यःस्याद्वधबंधौचसोर्हति।शिक्षितोपिकृतंकालमंतेवासीसमा ११३

DR. BHAU DAJI MEMORIAL

प्नुयात्।तत्रकर्मचयत्कुर्यादाचार्यस्यैवतत्फलं।गृहीतशिल्पःसमयेकृत्वाचार्यंप्रदक्षिणं।शिक्षितश्चानुमान्यैनमं
तेवासीनिवर्त्तनइति।वधशब्दोत्रताडनार्थः।दोषस्याल्पत्वात्॥ ॥इत्यभ्युपेत्याशुश्रूषाख्यंविवादपदं॥ ॥संप्रतिसं
विद्व्यतिक्रमःकथ्यते।तस्यचलक्षणंनारदेनव्यतिरेकमुखेनदर्शितं।पाषंडनैगमादीनांस्थितिःसमयउच्यते।समयस्या
नपाकर्म्मतद्विवादपदंस्मृतमिति।पारिभाषिकधर्मेणव्यवस्थानंसमयस्तस्यानपाकर्मअप्रतिक्रमःपरिपालनंत
द्व्यतिक्रम्यमाणंविवादपदंभवतीत्यर्थः।तदुपक्रमार्थंकिंचिदाह।राजाकृत्वापुरेस्थानंब्राह्मणान्न्यस्यतत्रतु।
त्रैविद्यंवृत्तिमद्ब्रूयात्स्वधर्म्मःपाल्यतामिति।राजास्वपुरेदुर्गादौस्थानंधवलगृहादिकंकृत्वातत्रब्राह्मणान्न्यस्य
स्थापयित्वातद्ब्राह्मणजातंत्रैविद्यंवेदत्रयसंपन्नंवृत्तिमद्भूहिरण्यादिसंपन्नंचकृत्वास्वधर्म्मोवर्णाश्रमनिमित्तः
श्रुतिस्मृतिविहितंभवद्भिरनुष्ठीयतामितितान्ब्राह्मणान्ब्रूयात्॥ ॥एवंनियुक्तैस्तैर्यत्कर्त्तव्यंतदाह।निजधर्मावि
रोधेनयस्तुसामयिकोभवेत्।सोपियत्नेनसंरक्ष्योधर्म्मोराजकृतश्चयः।श्रौतस्मार्त्तधर्म्मानुपमर्द्देनसमयात्स्थि
त्तोयोधर्म्मोगोप्रचारोदकरक्षणदेवगृहपालनादिरूपःसोपियत्नेनपालनीयः।तथाराज्ञाचनिजधर्माविरोधे
नेवयःसामयिकोधर्मोयावत्पथिकभोजनंदेयमस्मदरातिभिःकुलैनुरगादयोनप्रस्थापनीयाइत्येवंरूपःसोपि

क्षणीयः॥ ॥एवं समयधर्मः परिपालनीय इत्युक्त्वा तदतिक्रमादौ दंडमाह। गणद्रव्यं हरेद्यस्तु संविदं यस्तु लंघयेत्॥
सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत्॥ यः पुनर्गणस्य ग्रामादिजनसमूहस्य संबंधि साधारणं द्रव्यं हरति। संवि
त्समयस्तां समूहकृतां राज्ञा कृतां वा यो लंघयेदतिक्रमेत्तदीयं सर्वधनमपहृत्य स्वराष्ट्राद्विप्रवासयेत्। अयं च
दंडोनुबंधाद्यतिशये द्रष्टव्यः। अनुबंधाद्यल्पत्वे योग्यतामवेक्ष्य संघानां कृत्वा सत्येन संविदं। विसंवदेन्नरो लोभात्तं रा
ष्ट्राद्विप्रवासयेत्। निगृह्य दापयेदेनं समयव्यभिचारिणं। चतुःसुवर्णान्षण्निष्कान्शतमानं च राजतमिति॥ मनुप्रति
पादितं दंडं तु निर्वासनचतुःसुवर्णषण्निष्कशतमानानां चतुर्णामन्यतमो जात्याद्यपेक्षया कल्पनीयः॥ ॥
इदं चैतैः कर्त्तव्यमित्याह॥ कर्त्तव्यं वचनं सर्वैः समूहहितवादिनां। गणिनां मध्ये समूहहितवदनशीलास्तद्
२ वचनमितरैर्गणांतर्गतैरनुसरणीयं॥ ॥अन्यथा दंडमित्याह। यस्तत्र विपरीतः स्यात्स दाप्यः प्रथमं दमं। यस्तु ग
णिनां मध्ये समूहहितवादिवचनप्रतिबंधकारी स राज्ञा प्रथमसाहसं दंडनीयः॥ ॥राज्ञा चैवं गणिषु वर्त्तनीयमित्या
ह। समूहकार्य आयातान्कृतकार्यान्विसर्जयेत्। स दानमानसत्कारैः पूजयित्वा महीपतिः। समूहकार्यनिवृत्त्यर्थं
स्वपार्श्वे प्राप्तान्गणिनो निर्वर्त्तितात्मीयप्रयोजनान्दानमानसत्कारैः स राजा परितोष्य विसर्जयेत्॥ समूहदत्ता ११४

पहारिणं प्रत्याह। समूहकार्यप्रहितो यल्लभेत तदर्पयेत्। एकादशगुणं दाप्यो यद्यसौ नार्पयेत्स्वयं॥ समूहकार्या
र्थं महाजनैः प्रेरितो राजपार्श्वे यद्वस्त्रहिरण्यादिकं लभते तदप्रार्थित एव महाजनेभ्यः सो निवेदयेत्। अन्यथा लब्धा
देकादशगुणं दंडं दापनीयः॥ ॥एवं प्रकाराश्च कार्यचिंतकाः कार्या इत्याह। धर्मज्ञाः शुचयो लुब्धा भवेयुः कार्यचिं
तकाः। कर्त्तव्यं वचनं तेषां समूहहितवादिनां। श्रौतस्मार्त्तधर्मज्ञाः बाह्याभ्यंतरशौचयुक्ता अर्थेष्वलुब्धाः कार्यवि
चारकाः कर्त्तव्याः। तेषां वचनमितरैः कार्यमित्येतदादरार्थं पुनर्वचनं॥ ॥इदानीं त्रैविद्यानां प्रतिपादितं धर्मं श्रेण्या
दिष्वतिदिशन्नाह। श्रेणिनैगमपाषंडिगणानामप्ययं विधिः। भेदं तेषां नृपो रक्षेत्पूर्ववृत्तिं च पालयेत्। एकपण्यशिल्पो
पजीविनः श्रेणयः। नैगमा ये वेदस्याप्तप्रणीतत्वेन प्रामाण्यमिच्छंति। पाशुपतादयः। पाषंडिनो ये वेदस्याप्रामाण्यमेव ने
च्छंति नग्नाः सौगतादयः। गणो व्रातः आयुधीयादीनामेककर्मोपजीविनां। एषां चतुर्विधादीनामप्ययमेव विधिः यो निज
धर्माविरोधेनेत्यादिना प्रतिपादितः। एतेषां च श्रेण्यादीनां भेदं धर्मव्यवस्थां नृपो रक्षेत्। पूर्वोपात्तां वृत्तिं च पालयेत्॥
॥इति संविद्व्यतिक्रमप्रकरणं॥ ॥संप्रति वेतनस्यानपाकर्माख्यं व्यवहारपदं प्रस्तूयते। तत्स्वरूपं नारदेनोक्तं॥ भृ
त्यानां वेतनस्योक्तो दानादानविधिक्रमः। वेतनस्यानपाकर्म तद्विवादपदं स्मृतमिति। अस्यार्थः। भृतानां वेतनस्य व

क्ष्यमाणश्लोकैरुक्तो दानादानक्रमो यत्र विवादपदे तद्वेतनस्यानपाकर्मेत्युच्यते । तत्र निर्णयमाह । गृहीतवेतनः कर्म
११५ त्यजन्द्विगुणमावहेत् । अगृहीते समं दाप्यो भृत्यै रक्ष्य उपस्करः ॥ गृहीतं वेतनं येनासौ स्वाङ्गीकृतं त्यजन् अकुर्वन्द्विगु-
णां भृतिं स्वामिने दद्यात् । यदा पुनरनुपगतं कर्म अगृहीत एव वेतने त्यजति तदा समं यावद्वेतनमभ्युपगतं ताव-
द्दाप्यो न द्विगुणं । यद्वाङ्गीकृतां भृतिं दत्वा बलात्कारयितव्यः ॥ कर्माकुर्वन्प्रतिश्रुत्य कार्यो दत्वा भृतिं बलादिति नार-
दवचनात् । भृतिरपि तेनैवोक्ता । भृताय वेतनं दत्वा कर्मस्वामी यथाक्रमं । आदौ मध्येऽवसाने वा कर्मणो यद्विनिश्चि-
तमिति । तैश्च भृत्यैरुपस्कर उपकरणं लाङ्गलादीनां प्रग्रहयोक्त्रादिकं यथाशक्त्या रक्षणीयमितरथा कृष्यादिनि-
ष्पत्त्यनुपपत्तेः ॥ ॥भृतिमपरिच्छिद्य यः कर्म कारयति तं प्रत्याह । दाप्यस्तु दशमं भागं वाणिज्यपशुसस्यतः । अ-
निश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता । यस्तु स्वामी वणिग्गोमी क्षेत्रिको वाऽपरिच्छिन्नवेतनमेव भृत्यं क-
र्म कारयति स तस्माद्वाणिज्यपशुसस्यलक्षणात्कर्मणो यल्लब्धं तस्य दशमं भागं भृताय महीक्षिता राज्ञा दापनीयः
॥ ॥अनाज्ञप्तकारिणं प्रत्याह । देशं कालं च योऽतीयाल्लाभं कुर्याच्च योऽन्यथा । तत्र स्यात्स्वामिनश्छन्दोऽधिकं देयं
कृतेऽधिके । यस्तु भृत्यः पण्यविक्रयाद्युचितं देशं कालं पण्यविक्रयादि कुर्वन्नदर्प्यादिना ह्रासयेत् । तस्मिन्नेव वा ११५

देशे काले च लाभमन्यथा व्ययाद्यतिशयसाध्यतया हीनं करोति तस्मिन्भृतके भृतिदानं प्रति स्वामिनश्छन्द इच्छया भ-
वेत् । यावदिच्छति तावद्दद्यान्न पुनः सर्वामेव भृतिमित्यर्थः । यदा पुनर्देशकालानिलङ्घनयाऽधिको लाभः कृतस्तदा पू-
र्वपरिच्छिन्नाया भृतेरधिकमपि धनं स्वामिना भृत्याय दातव्यं ॥ ॥अनेकभृत्यसाध्यकर्मणि भृतिदानप्रकार-
माह ॥ यो यावत्कुरुते कर्म तावत्तस्य तु वेतनं । उभयोरप्यसाध्यं चेत्साध्ये कुर्याद्यथाक्रमं । यदा पुनरेकमेव कर्म नि-
यतवेतनमुभाभ्यां क्रियमाणमुभयोरप्यसाध्यं चेद्व्याध्याद्यभिभवादुभाभ्यामपि शब्दादुद्दुनिरधिमदिनप-
रिसमापितं तदा यो भृत्यो यावत्कर्म करोति तस्मै तत्कृतकर्मानुसारेण मध्यस्थकल्पितं वेतनं देयं । न पुनः
समं । न चावयवशः कर्मणि वेतनस्यापरिभाषितत्वाददानमिति मन्तव्यं । साध्ये तु उभाभ्यां कर्मणि निर्वर्तिते य-
थाक्रमं यावत्परिभाषितं तावदुभाभ्यां देयं न पुनः प्रत्येकं कृत्स्नवेतनं नापि कर्मानुरूपं परिकल्प्य देयं ॥ ॥आयु-
धीयभारवाहकौ प्रत्याह । अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः । प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिं ॥ न
विद्यते राजदैविकं यस्य भाण्डस्य तत्तथोक्तं । तद्यदि प्रज्ञाहीनतया वाहकेन विनाशं नीतं तदा नाशानुसारेण सो-
दयं दापनीयः । तदाह नारदः । भाण्डं व्यसनमागच्छेद्यदि वाहकदोषतः । दाप्यो यत्तत्र नश्येत्तु दैवराजकृतादृ-

न्तइति। यः पुनर्विवाहाद्यर्थं मंगलवति वासरे प्रतिष्ठमानस्य तस्य स्वामिनो पथ्यिकं कर्म प्रागंगीकृत्य तदानीं न करिष्यामीति प्र
११६ स्थानविघ्नमाचरति तदासौ द्विगुणां भृतिं दाप्यः। अत्यंतोत्कर्षहेतुकर्मनिरोधात्॥ ॥किंच। प्रक्रान्ते सप्तमं भागं चतुर्थं
पथि संत्यजेत्। भृतिमर्द्धपथे सर्वां प्रदाप्यस्त्याजकोपि च। प्राक्रान्ते ऽध्यवसिते प्रस्थाने स्वांगीकृतं कर्म यस्त्यजति सो भृ
तेः सप्तमं भागं दाप्यः। नन्वत्रैव विषये प्रस्थानविघ्नकृदित्यादिना द्विगुणभृतिदानमुमिदानीं सप्तमो भाग इति विरोधः।
उच्यते। भृत्यांतरोपादानावसरसंभवे स्वांगीकृतं कर्म यस्त्यजति तस्य सप्तमो भागः। यस्तु प्रस्थानलग्नसमय एव
त्यजति। तस्य द्विगुणभृतिदानमित्यविरोधः। यः पुनः पथि प्रक्रान्ते गमने वर्त्तमाने सति कर्म त्यजति स भृतेश्चतुर्थंभा
गं दाप्यः। अर्द्धपथे पुनः सर्वां दापनीयः। यस्तु त्याजकः कर्मण्युद्यतं त्याजयति स्वामी पूर्वोक्तदेशेष्वसावपि पूर्वोक्तस
प्तमभागादिकं भृत्याय दापनीयः। एतच्चाव्याधितादिविषयं। भृत्यो नार्त्तो न कुर्याद्यो दर्पात्कर्म यथोदितं। स दंड्यः
कृष्णलानष्टौ न देयं तस्य वेतनमिति। यदा पुनर्व्याध्याद्यपगमे ऽनर्पितदिवसान्परिगणय्य पूरयति तदा लभत एव वे
तनं। आर्त्तस्तु कुर्यात्स्वस्थः सन्यथाभाषितमादितः। सुदीर्घस्यापि कालस्य स्वं लभेतैव वेतनमिति मनुस्मरणात्। यस्त्वप
गतव्याधिः स्वस्थ एव आलस्यादिना स्वारब्धं कर्माल्पेनांशेन न करोति परेण वा न समापयति न तस्मै वेतनं देयं। यथाह मनुः। ११६

यथोक्तमार्त्तः स्वस्थो वा यस्तत्कर्म न कारयेत्। न तस्य वेतनं देयमल्पोनस्यापि कर्मण इति॥ ॥इति वेतनादानप्रकरणं
॥अधुना द्यूतसमाह्वयाख्यविवादपदमधिक्रियते तत्स्वरूपं च नारदेनाभिहितं। अक्षवध्रशलाकाद्यैर्देवनं जिह्म
कारितं। पणक्रीडा वयोभिश्च पदं द्यूतसमाह्वयमिति। अक्षाः पाशकाः। वध्रश्चर्मपट्टिकाः। शलाका दंतादिमय्यो
दीर्घचतुरस्राः। आद्यग्रहणाच्चतुरंगादिक्रीडासाधनं करितुरगरथादिकं गृह्यते। तैरप्राणिभिर्यद्देवनं क्रीडा
पणपूर्विका क्रियते। तथा वयोभिः पक्षिभिः कुक्कुटादिभिः। चशब्दान्मल्लमेषमहिषादिभिः प्राणिभिर्या पणपूर्वि
का क्रीडा क्रियते तदुभयं यथाक्रमं द्यूतसमाह्वयाख्यं विवादपदं। द्यूतं च समाह्वयश्च द्यूतसमाह्वयं। तदुक्तं मनु
ना। अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते। प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वय इति॥ ॥तत्र द्यूत
सभाधिकारिणो वृत्तिमाह। ग्लहे शतिकवृद्धेस्तु सभिकः पंचकं शतं। गृह्णीयाद्धूर्तकितवादितराद्दशकं शतं। परस्प
जूवारी रसंप्रतिपन्नाकितवपरिकल्पितः पणो ग्लह उच्यते। तस्मिन् तदाश्रया शतिका शतपरिमिता तदधिकपरिमाणा वा
वृद्धिर्यस्यासौ शतिकवृद्धिः तस्माद्धूर्तकितवात्पंचकं शतमात्मवृत्त्यर्थं सभिको गृह्णीयात्। पंचपणा आयो यस्मिन्शते
तच्छतं पंचकं तदस्मिन् देयमायलाभ इत्यादिना कन्। जितग्लहस्य विंशतितमं भागं गृह्णीयादित्यर्थः। सभाकितवनिवा

सार्थीयस्यास्त्यसौ सभिकः। कल्पिताक्षादिनिखिलक्रीडोपकरणस्तदुपचितद्रव्योपजीवी सभापतिरुच्यते। इतरस्मात्तु
११८ नरपरिपूर्णशतिकवृद्धेः कितवाद्दशकं शतं जितद्रव्यस्य दशमं भागं गृह्णीयाद् द्वितीयावृत्त॥ ॥एवं कॢप्तवृत्तिना सभि
केन किं कर्त्तव्यमित्याह। स सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतं। जितमुद्ग्राहयेज्जेत्रे दद्यात्सत्यं वचः क्षमी॥ य
एवं कॢप्तवृत्तिर्द्यूताधिकारी स राज्ञा धूर्त्तकितवेभ्यो रक्षितस्तस्मै राज्ञे यथा संप्रतिपन्नमंशं दद्यात्। यथा जितं द्रव्यं
तदुद्ग्राहयेद्बंधकग्रहणेन आसेधादिना च पराजितसकाशादुद्धरेत्। उद्धृत्य च तद्धनं जेत्रे जयिने सभिको दद्या
त्। तथा क्षमी भूत्वा सत्यं च वचो विश्वासार्थं द्यूतकारिणं दद्यात्। तदुक्तं नारदेन॥ सभिकः कारयेद्द्यूतं देयं दद्याच्च तत्
कृतमिति॥ ॥यदा पुनः सभिको दापयितुं न शक्नोति तदा राजा दापयेदित्याह। प्राप्ते नृपतिना भागे प्रसिद्धे धूर्त्तमंड
ले। जितं ससभिके स्थाने दापयेदन्यथा न तु। प्रसिद्धे प्रकाशे राजाध्यक्षसमन्विते सभिकसहिते कितवसमाजे
सभिकेन राजभागे दत्ते राज्ञा धूर्त्तकितवमविप्रतिपन्नं जितं पणं दापयेत्। अन्यथा प्रच्छन्ने सभिकरहिते अदत्तरा
जभागे द्यूते जितपणं जेत्रे न दापयेत्॥ ॥जयपराजयविप्रतिपत्तौ निर्णयोपायमाह। द्रष्टारो व्यवहाराणां साक्षि
णश्च त एव हि। द्यूतव्यवहाराणां द्रष्टारः सभ्यास्त एव कितवा एव राज्ञा नियोक्तव्याः। न तत्र श्रुताध्ययनसंपन्ना ११८

दिनियमोस्ति। साक्षिणश्च द्यूते द्यूतकारा एव कार्याः। न तत्र स्त्रीबालवृद्धकितवेत्यादिनिषेधोस्ति॥ ॥क्वचिद्द्यूते निषेधं दंड
माह॥ राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः। कूटैरक्षादिभिरुपधिना च मतिवंचनहेतुना मणिमंत्रौषधादिदीव्यं
ति तान् श्वपदादिनांकयित्वा राजा स्वराष्ट्रान्निर्वासयेत्। नारदेन तु निर्वासने विशेष उक्तः। कूटाक्षदेविनः पापान् रा
जा राष्ट्राद्विवासयेत्। कंठेक्षमालामासज्य स ह्येषां विनयः स्मृतः इति। यानि च मनुवचनानि द्यूतनिषेधपराणि। द्यू
तं समाह्वयं चैव यः कुर्यात्कारयेत वा। तान्सर्वान्घातयेद्राजा शूद्रांश्च द्विजलिंगिनः इत्यादीनि तान्यपि कूटाक्षदे
वनविषयतया राजाध्यक्षसभिकरहितद्यूतविषयतया च योज्यानि। किंच। द्यूतमेकमुखं कार्यं तस्करज्ञानहेत
वे। यत्पूर्वोक्तं द्यूतं तदेकमुखं प्रधानं यस्य द्यूतस्य। तत्तथोक्तं कार्यं राजाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः।
तस्करज्ञानकारणात्। तस्करज्ञानरूपप्रयोजनं पर्यालोच्य प्रायशश्चौर्यार्जितधना एव कितवा भवंति। अतश्चोर
विज्ञानार्थमेकमुखं कार्यं॥ ॥द्यूतधर्म्मं समाह्वयेतिदिशन्नाह। एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये। कलहे
शतिकवृद्धेरित्यादिना यो द्यूतधर्म्म उक्तः स एव प्राणिद्यूते मल्लमेषमहिषादिनिर्वर्त्ये समाह्वयसंज्ञिके ज्ञातव्यः॥ ॥
इति द्यूतसमाह्वयाख्यं प्रकरणं॥ ॥इदानीं वाक्पारुष्यं प्रस्तूयते॥ तल्लक्षणं चोक्तं नारदेन। देशजातिकुलादीनामाक्रोश

११८ न्यंगसंयुतं। यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यत इति। देशादीनामाक्रोशान्यंगसंयुक्तं उच्चैर्भाषणमाक्रोशः। न्यग
मवद्यं तद्भययुक्तं। यत्प्रतिकूलार्थमुद्वेगजननार्थं वा स्यात्तद्वाक्पारुष्यं कथ्यते। तत्र कलहप्रियाः गौडाः इति देशाक्रोशः।
नितांतं लोलुपाः खलु विप्राः इति जात्याक्रोशः। क्रूरचरित्रा ननु वैष्णवा मित्रा इति कुलाक्षेपः। आदिग्रहणाद्विद्याशिल्प
व्यादिकनिंदया विद्वच्छिल्प्यादिपुरुषाक्षेपो गृह्यते। तस्य चेदं उत्तरत्र माध्यमिकनिष्ठुरादिभेदेन त्रैविध्यमभिधाय तल्लक्ष
णं तेनैवोक्तं॥ निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतं। गौरवानुक्रमात्तस्य दंडोऽपि स्यात्क्रमाद्गुरुः। साक्षेपं निष्ठुरं
ज्ञेयमश्लीलं न्यंगसंयुतं। पतनीयैरुपाक्रोशैस्तीव्रमाहुर्मनीषिण इति। तत्रापि मूर्खो जाल्मः इत्यादि साक्षेपं। अभ्मीक्षकाः
अत्र न्यंगमित्यसभ्यमवद्यं भगिन्यादिगमनेनाश्लीलं। सुरापोऽसीत्यादि महापातकाद्याक्रोशयुक्तं वचस्ती
व्रं। तत्र निष्ठुराक्रोशे सवर्णविषये दंडमाह। सत्यासत्यान्यथास्तोत्रैर्न्यूनांगेंद्रियरोगिणां। क्षेपं करोति चेद्दंड्य
ः पणानर्द्धत्रयोदशान्। न्यूनांगाः करचरणादिविकलाः। विकलेंद्रियाः श्रोत्रादिरहिताः। रोगिणो दुश्चर्मप्रभृतय
स्तेषां सत्येनासत्येनान्यथास्तोत्रेण च निंदार्थया स्तुत्या। यत्र नेत्रयुगलहीन एवांधइत्युच्यते तत्सत्यं। यत्र पुन
श्चक्षुष्मानेवांध इत्युच्यते तदसत्यं। यत्र विकृताकृतिरेव दर्शनीयस्त्वमसीत्युच्यते तदन्यथास्तोत्रं। एवंविधैर्यः १९
११८

DR. BHAU DAJI MEMORIAL

क्षेपं भर्त्सनं करोत्यसावर्द्धाधिकद्वादशपणान्दंडनीयः। काणं वाप्यथवा खंजमन्यं वापि तथाविधं। तथ्येनापि ब्रुवन्दा
प्यो दंडं कार्षापणावरमिति यन्मनुवचनं॥ ॥तदतिदुर्वृत्तवर्णविषयं॥ यदा पुत्रादयो मात्रादीनूक्तापनितदापि तेऽपि दंडनी
यः इति तेनैवोक्तं। मातरं पितरं जायां भ्रातरं श्वशुरं गुरुं। आक्षारयंश्छतं दाप्यः पंथानं चाददद्गुरोरिति च। एतच्च सा
पराधेषु भ्रात्रादिषु गुरुषु निरपराधायां च जायायां द्रष्टव्यं॥ ॥अश्लीलाक्षेपे दंडमाह। अभिगंतास्मि भगिनीं मा
तरं वा तवेति ह। शपंतं दापयेद्राजा पंचविंशतिकं दमं॥ त्वदीयां भगिनीं मातरं वा अभिगंतास्मीति शपंतमन्यं
वा त्वज्जायामभिगंतास्मीत्येवं शपंतं राजा पंचविंशतिकं पणानां पंचाधिका विंशतिर्यस्मिन्दंडे स तथोक्तः तं दमं दा
पयेत्॥ एवं समानगुणेषु वर्णिषु दंडमभिधाय विषमगुणेषु दंडं प्रतिपादयितुमाह। अर्द्धोऽधमेषु द्विगुणः परस्त्री
पा षूत्तमेषु च। अधमेष्वाक्षेप्त्रपेक्षया न्यूनवृत्तादिगुणेष्वर्द्धो दंडः पूर्ववाक्ये पंचविंशतेः प्रकृतत्वात्तदपेक्षयार्द्धः सार्द्ध
द्वादशपणात्मको द्रष्टव्यः। परभार्यासु पुनरविशेषेण द्विगुणः॥ पंचविंशत्यपेक्षयैव पंचाशत्पणात्मको वेदितव्यः। त
थोत्तमेषु च स्वापेक्षयाधिकश्रुतवृत्तेषु दंडः पंचाशत्पणात्मक एव॥ ॥वर्णानां मूर्द्धावसिक्तादीनां च परस्पराक्षेपे दं
डकल्पनामाह। दंडप्रणयनं कार्यं वर्णजात्युत्तराधरैः। वर्णाश्च जातयश्च वर्णजातयः। उत्तराश्चाधराश्चोत्तराधराः।

वर्णजातयश्चउत्तराधराश्चवर्णजात्युत्तराधराः तैर्वर्णजात्युत्तराधरैः।परस्परमाक्षेपेक्रियमाणेदंडस्यप्रणयनंप्र
१५९ कर्षेणनयनमूहनंवेदितव्यं।नचदंडकल्पनमुत्तराधरैरितिविशेषोपादानादुत्तराभावापेक्षयैवकर्त्तव्यमित्यव
गम्यते।यथामूर्द्धावसिक्तंब्राह्मणाद्धीनंक्षत्रियादुत्कृष्टंचाक्रुश्यब्राह्मणःक्षत्रियाक्षेपनिमित्तात्पंचाशत्प
णाद्दंडात्किंचिदधिकंपंचसप्तत्यात्मकंदंडमर्हतिक्षत्रियोपितमाक्रुश्यब्राह्मणाक्षेपनिमित्ताच्छतदंडाद्धीनंपंच
सप्ततिनममेवदंडमर्हति।मूर्द्धावसिक्तोपितमाक्रुश्यतमेवदंडमर्हतिमूर्द्धावसिक्तांबष्ठयोःपरस्पराक्षेपेब्राह्म
णक्षत्रिययोःपरस्पराक्रोशनिमित्तकौयथाक्रमेणदंडौवेदितव्यौ।एवमन्यत्राप्यूहनीयं॥ ॥एवंसर्ववर्णविशे
षेदंडमभिधायवर्णानामेवप्रतिलोमानुलोमाक्षेपेदंडमाह।प्रातिलोमापवादेषुद्विगुणत्रिगुणादमाः।वर्णाना
मानुलोम्येनतस्मादर्द्धार्द्धहानितः।अपवादाअधिक्षेपाःप्रातिलोम्येनापवादास्तेषुब्राह्मणाक्रोशकारिणोः
क्षत्रियवैश्ययोर्यथाक्रमेणपूर्ववाक्याद्द्विगुणपदोपात्तपंचाशत्पणापेक्षयाद्विगुणाःशतपणाःत्रिगुणाःसार्द्ध
शतपणादंडावेदितव्याः।शूद्रस्यब्राह्मणाक्रोशेताडनंजिह्वाछेदनंवाभवति।यथाहमनुः।शतंब्राह्मणमाक्रु
श्यक्षत्रियोदंडमर्हतिवैश्योप्यर्द्धशतंद्वेवाशूद्रस्तुवधमर्हतीति।विट्शूद्रयोरपिक्षत्रियादनंतरैकांतरयोस्त ११९

स्यान्यायतयाशतमध्यर्द्धशतंचयथाक्रमेणक्षत्रियाक्रोशेवेदितव्यं।शूद्रस्यचवैश्याक्रोशेशतं।अनुलोम्येनतुवर्णा
नांक्षत्रियविट्शूद्राणांब्राह्मणेनाक्रोशेकृतेतस्माद्ब्राह्मणाक्रोशनिमित्तात्शतपरिमितात्क्षत्रदंडात्प्रतिवर्णमर्द्ध
स्यार्द्धस्यहानिंकृत्वाअवशिष्टंपंचाशत्पंचविंशतिसार्द्धत्रयोदशपणात्मकंयथाक्रमंब्राह्मणोदंडनीयः।तदुक्तंमनु
ना।पंचाशद्ब्राह्मणोदंड्यःक्षत्रियस्याभिशंसने।वैश्यस्यचार्द्धपंचाशत्शूद्रेद्वादशकोदमइति।क्षत्रियेणवैश्ये
शूद्रेचाक्रुष्टेयथाक्रमंपंचाशत्पंचविंशतिकोदमोवैश्येनशूद्राक्रोशेपंचाशदित्यूहनीयं।ब्राह्मणराजन्यव
त्क्षत्रियवैश्ययोरितिगौतमस्मरणात्।विट्शूद्रयोरेवमेवस्वजातिंप्रतितत्वतइतिमनुस्मरणात्॥ ॥पुनर्नि
ष्ठुराक्षेपमधिकृत्याह।बाहुग्रीवानेत्रसक्थिविनाशेवाचिकेदमः।शत्यस्तदर्द्धिकःपादनासाकर्णकरादि
षु।बाहुग्रीवादीनांप्रत्येकंविनाशेवाचिकेवाचाप्रतिपादितेतवबाहुंछिनद्मीत्येवंरूपेशास्यःशतपरिमितदंडो
वेदितव्यः।पादनासादिषुआदिग्रहणात्स्फिगादिषुवाचिकेविनाशेतदर्द्धिकःतस्माच्छतस्यार्द्धंतदर्द्धंत
दस्यास्तीतिसोतदर्द्धिकः।पंचाशत्पणकोवेदितव्यः॥ ॥किंचाअशक्तस्तुवदन्नेवंदंडनीयःपणान्दश।तथाश
क्तःप्रतिभुवंदाप्यःक्षेमायतस्यतु।यस्तुज्वरादिनाक्षीणशक्तिस्तवबाहुभंगंकरोमीत्येवंशपतिअसौद

१२० र्पणान्दंडनीयः। यः पुनः समर्थः क्षीणशक्तिः पूर्ववदाक्षिपास्यसौ पूर्वोक्तन्यानादिदंडो नरकालं तस्याशक्तस्य क्षेमा
र्थं प्रतिश्रुवं दाप्यः॥ तीव्राक्रोशे दंडमाह॥ ॥पतनीये कृते क्षेपे दंडो मध्यमसाहसः॥ उपपातकयुक्ते तु दाप्यः प्रथम
साहसः॥ पातित्यहेतुभिर्ब्रह्महत्यादिभिर्वर्णिनामाक्षेपे मध्यमसाहसो दंडः॥ उपपातकसंबद्धे तु पुनर्गोघ्नस्त्वम
सीत्येवमादिक्षेपे प्रथमसाहसं दंडनीयः॥ किंच॥ त्रैविद्यनृपदेवानां क्षेप उत्तमसाहसः॥ मध्यमो जातिपूगानां प्र
थमो ग्रामदेशयोः॥ त्रैविद्या वेदत्रयसंपन्नास्तेषां राज्ञां देवानां चाक्षेपे उत्तमसाहसो दंडः॥ ये पुनर्ब्राह्मणमूर्द्धाव
सिक्तादिजातीनां पूगाः संघास्तेषामाक्षेपे मध्यमसाहसो दंडः॥ ग्रामदेशयोः प्रत्येकमाक्षेपे प्रथमसाहसो दंडो
वेदितव्यः॥ ॥इति वाक्पारुष्यं नाम प्रकरणं॥ ॥दंडपारुष्यं प्रस्तूयते॥ तत्स्वरूपं नारदेनोक्तं॥ परगात्रेष्वभिद्रोहो हस्त
पादायुधादिभिः॥ भस्मादिभिश्चोपघातो दंडपारुष्यमुच्यते॥ परगात्रेषु स्थावरजंगमात्मकद्रव्येषु हस्तपा
दायुधैः आदिग्रहणाद्ग्रावादिभिर्योऽभिद्रोहो हिंसनं दुःखोत्पादनं॥ तथा भस्मना आदिग्रहणाद्रजःपंकपुरीषा
दिभिश्च उपघातः संस्पर्शो मनसो दुःखोत्पादनं तदुभयं दंडपारुष्यं दंड्यतेऽनेनेति दंडो देहस्तेन यत्पारु
पा ष्यं विरूक्षीकरणं जंगमादेर्द्रव्यस्य तद्दंडपारुष्यं॥ तस्य चावगोरणादिभेदेन त्रैविध्यमभिधाय हीनमध्यमोत्त १२०

सैकोधकृद्वकरणैः

तेनैवोक्तं। तस्यापि द्रव्यं त्रैवि१

द्रव्यरूपकर्मत्रैविध्यात्पुनस्त्रिविध्यं हीनमध्योत्तमक्रमात्॥ अवगोरणनिःसंगपातनक्षतदर्शनैः॥ हीनमध्योत्तमा
नां च द्रव्याणां समतिक्रमात्॥ त्रीण्येव साहसान्याहुस्तत्र कंटकशोधनमिति॥ निःसंगपातनं निःशंकप्रहरणं त्री
ण्येव साहसानि त्रीः प्रकाराण्येव सहसा कृतानि दंडपारुष्याणीत्यर्थः॥ तथा वाग्दंडपारुष्ययोरुभयोरपि द्वयोः
प्रवृत्तकलहयोर्मध्ये यः क्षमते न केवलं तस्य दंडाभावः किंतु पूज्य एव॥ तथा पूर्वं कलहे प्रवृत्तस्य दंडगुरुत्वं कलहे
च वद्धवैरानुसंधातुरेव दंडभाक्त्वं॥ तथा॥ द्वयोरपराधविशेषापरिज्ञाने दंडः समः॥ तथा॥ श्वपचादिभिरार्याणाम
पराधे कृते सज्जना एव दंडदापनेऽधिकारिणस्तेषामशक्यत्वे तान्राजा घातयेदेव नार्थं हरेत्॥ इत्येवं पंच
प्रकारा विधयस्तेनैवोक्ताः॥ विधिः पंचविधस्तूक्त एतयोरुभयोरपि॥ पारुष्ये सति संरंभादुत्पन्ने क्रुद्धयोर्द्वयोः॥
स मान्यते यः क्षमते दंडभाग्योऽतिवर्तते॥ पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दंडभाक्॥ पश्चाद्यः सोऽप्यसत्का
री पूर्वे तु विनयो गुरुः॥ द्वयोरापन्नयोस्तुल्यमनुबध्नाति यः पुनः॥ स तयोर्दंडमाप्नोति पूर्वो वा यदि वेतरः॥ पारुष्य
ल दोषावृतयोर्युगपत्संप्रवृत्तयोः॥ विशेषश्चेन्न लक्ष्येत विनयः स्यात्समस्तयोः॥ श्वपाकषंडचंडालव्यंगेषु वधवृत्ति
षु हस्तिप व्रात्यदासेषु गुर्वाचार्यनृपेषु च॥ मर्यादातिक्रमे सद्यो घात एवानुशासनं॥ यमेव ह्यतिवर्तेरन्नेते संतं

जनेन्त्वपु। स एव निर्णयं कुर्यान्नतद्विनयभाङ्नृपः। मलात्वेते मनुष्याणां धनमेषां मलात्मकं। अतस्तान्ख्यापयेद्राजा जाना
१२१ र्थं दंडेन दंडयेदिति। एवंभूतदंडपारुष्यनिर्णयपूर्वकत्वाद्दंडप्रणयनस्य तत्स्वरूपसंदेहे निर्णयहेतुमाह। असाक्षि
कृहते चिह्नैर्युक्तिभिश्चागमेन च। द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृतो भयात्। यदा कश्चिद्गृहस्य हमनेनाहत इति रा
ज्ञे निवेदयति तदा चिह्नैर्व्रणादिभिर्युक्तिभिश्चानपगतैर्लिंगैर्युक्त्या कारणप्रयोजनपर्यालोचनात्मिकया आ
गमेन च जनप्रवादेन च शपथादिरूपेण वा कूटचिह्नकृतसंभावनाभयात्परीक्षा कार्या॥ ॥एवं निश्चिते साधनविशे
षेण दंडविशेषमाह। भस्मपंकरजःस्पर्शे दंडो दशपणः स्मृतः। अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणस्ततः।
समेष्वेवं परस्त्रीषु द्विगुणस्तूत्तमेषु च। हीनेष्वर्द्धदमो मोहमदादिभिरदंडनं। भस्मना पंकेन रजसा वा परस्य स्पृशतोअ
सौ दशपणं दंडं दाप्यः। अमेध्यमिति॥ अश्रुश्लेष्मनखकेशकर्णविट्दूषिकाभुक्तोच्छिष्टादिकं गृह्यते। पार्ष्णिः पाद
स्य पश्चिमो भागः। निष्ठ्यूतं मुखनिःसारितं जलं तैः स्पर्शने पूर्वाद्दशपणाद्द्विगुणो विंशतिपणो दंडो वेदितव्यः। पुरीषा
दिस्पर्शने कात्यायनेन विशेष उक्तः। छर्दिमूत्रपुरीषाद्यैरापाद्यः स चतुर्गुणः। षड्गुणः कायमध्ये स्यान्मूर्द्ध्नि त्वष्ट
गुणः स्मृतः। इति। आद्यग्रहणान्मांसशुक्रास्रमज्जा गृह्यते। एवं ततः पूर्वोक्तो दंडः सवर्णविषये द्रष्टव्यः। परभार्या १२१

मुख्यविशेषेण तथोत्तमेषु स्वापेक्षयाधिकश्रुतवृत्तेषु पूर्वोक्ताद्दशपणाद्विंशतिपणाच्च दंडाद्द्विगुणो दंडो वेदितव्यः। ही
नेषु स्वापेक्षया न्यूनश्रुतादिषु पूर्वोक्तस्यार्द्धदमः पंचपणो दशपणश्च वेदितव्यः। मोहश्चित्तवैकल्यं। मदः मद्यपानज
न्यो वस्त्वाविशेषः। आदिग्रहणाद्ग्रहावेशादिकं। एतैर्युक्तेन भस्मादिस्पर्शने कृतेपि दंडो न कर्तव्यः॥ ॥प्रातिलोम्याप
राधे दंडमाह। विप्रपीडाकरं छेद्यमंगमब्राह्मणस्य तु। उद्गूर्णे प्रथमो दंडः संस्पर्शे तु तदर्द्धकः॥ ब्राह्मणानां पीडाकरयस्यापान
मब्राह्मणस्य क्षत्रियादेर्यदंगं करचरणादिकं तच्छेत्तव्यं। क्षत्रियवैश्ययोरपि पीडां कुर्वतः शूद्रस्यांगच्छेदनमेव॥ येन
केनचिदंगेन हिंस्याच्छ्रेयांसमंत्यजः। छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनमिति। द्विजातिमात्रस्यापराधे शूद्रस्यांग
च्छेदविधानात् वैश्यस्यापि क्षत्रियापकारिणो अयमेव दंडस्तुल्यन्यायत्वात्। उद्गूर्णे वधार्थमुद्यते शस्त्रादिके
प्रथमसाहसो वेदितव्यः। शूद्रस्य पुनरुद्गीरणे हस्तादिच्छेदनं। पाणिमुद्यम्य दंडं वा पाणिच्छेदनमर्हति इति मनुस्म
रणात्। उद्गूरणार्थं शस्त्रस्पर्शे तु तदर्द्धिकः। प्रथमसाहसार्द्धदंडो वेदितव्यः। भस्मादिस्पर्शे पुनः क्षत्रियवैश्ययोः
प्रातिलोम्यापवादेषु द्विगुणा त्रिगुणा दमा इति वाक्पारुष्योक्तन्यायेन कल्प्यं। शूद्रस्य तत्रापि हस्तच्छेद एव। अव
निष्ठीवतो दर्पात् द्वावोष्ठौ छेदयेन्नृपः। अवमूत्रयतो मेढ्रमवशर्द्धयतो गुदमिति मनुस्मरणात्॥ ॥एवं प्रातिलोम्या

पराधे दंडमभिधाय पुनः सजातिमधिकृत्याह। उद्गूर्णे हस्तपादे तु दशविंशतिकौ दमौ॥ परस्परं तु सर्वेषां शास्त्रे मध्य-
१२२ मसाहसः॥ हस्ते पादे वा ताडनार्थमुद्गूर्णे यथाक्रमेण दशपणो विंशतिपणश्च दंडो वेदितव्यः। परस्परवधार्थं शस्त्रे उ-
सर्वे द्गूर्णे षां वर्णानां मध्यमसाहसो दंडः॥ ॥किंच॥ पादकेशांशुककरोल्लुंचनेषु पणान्दश। पीडाकर्षांशुकावेष्ट-
पादाध्यासे शतं दमः॥ पादकेशवस्त्रकराणामन्यतमं गृहीत्वा यो उल्लुंचति झटिति आकर्षयति असौ दशपणं दं-
ड्यः॥ पीडा चाकर्षश्चांशुकवेष्टश्च पादाध्यासश्च पीडाकर्षांशुकावेष्टपादाध्यासं तस्मिन्समुच्चिते शतं दंड्यः।
एतदुक्तं भवति। अंशुकेनावेष्ट्य गाढमापीड्याकृष्य यः पादेन घट्टयति तं शतं पणान् दमयेदिति॥ ॥किंच॥ शो-
णितेन विना दुःखं कुर्वन्काष्ठादिभिर्नरः। द्वात्रिंशतं पणान्दंड्यो द्विगुणं दर्शने सृजः॥ यः पुनः शोणितं यथा न दृश्य-
ते तथा मृदुताडनं काष्ठलोष्ठादिभिः करोति असौ द्वात्रिंशतं पणान्दंड्यः। यदा पुनर्गाढताडनेन लोहितं दृश्य-
ते तदा द्वात्रिंशतो द्विगुणं चतुःषष्टिपणान्दंडनीयः॥ त्वग्मांसास्थिभेदे पुनर्मनुना विशेषो दर्शितः। त्वग्भेद-
कः शतं दंड्यो लोहितस्य च दर्शकः। मांसभेत्ता तु षण्निष्कान्प्रवास्यस्त्वस्थिभेदक इति। किंच॥ करपाददतां भं-
गे छेदने कर्णनासयोः। मध्यो दंडो व्रणोद्भेदे मृतकल्पहते तथा। करपाददंतस्य प्रत्येकं भंगे कर्णनासस्य च १२२

प्रत्येकं छेदने रूढव्रणस्योद्भेदने मृतकल्पो यथा भवति तथा हनने ताडिते मध्यमसाहसो विज्ञेयः। अनुबंधादिना विषयस्य
साम्यमत्रापादनीयं॥ किंच॥ चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने। कंधराबाहुसक्थ्नां च भंगे मध्यमसाहसः॥
गमनभोजनभाषणनिरोधे नेत्रस्य आदिग्रहणाज्जिह्वाघ्राणप्रतिभेदने कंधरा ग्रीवा बाहुः प्रसिद्धः। सक्थि
ऊरुः तेषां प्रत्येकं भंजने मध्यमसाहसो दंडः॥ ॥अपि च॥ एकं घ्नतां बहूनां च यथोक्ताद् द्विगुणो दमः। यदा पुन-
र्बहवो मिलित्वा एकस्यांगभंगादिकं कुर्वंति। यदा न्यस्मिन्नपराधे यो दंड उक्तस्तत्र तस्माद्द्विगुणो दंडः प्र-
त्येकं वेदितव्यः। अतिक्रूरत्वात्तेषां आनुलोम्यप्रातिलोम्यापराधे तत्स्वेव सवर्णविषये विहितस्य दंडजात-
स्य वाक्पारुष्योक्तक्रमेण हानिं वृद्धिं च कल्पयेत्। वाक्पारुष्ये य एवोक्तः प्रतिलोमानुलोमतः। स एव दंडपारु- अ
ष्ये राज्ञा कार्यो यथाक्रममिति मनुस्मरणात्॥ कलहापहृतं देयं दंडश्च द्विगुणस्ततः। कलहे वर्तमाने यद्येनापहृतं तत्तेन प्र-
त्यर्पणीयम् अपहृतद्रव्यात् द्विगुणश्चापहारनिमित्तो दंडो देयः॥ दुःखमुत्पादयेद्यस्तु स समुत्थानजं व्ययं। दाप्यो दंडं च यो
यस्मिन्कलहे समुदाहृतः॥ यो यस्य ताडनात् दुःखमुत्पादयेत् स तस्य व्रणरोपणादौषधार्थपथ्यार्थं च यो व्ययः क्रियते तं द-
द्यात्। समुत्थानं व्रणरोपणं यस्मिन्कलहे यो दंडस्तं च दद्यात् समुत्थानजव्ययमात्रं॥ परगात्राभिद्रोहे दंडमुक्त्वाऽनंत-

रं वहिरंगार्थना ग्रो दंडमाह । अभिघाते तथा छेदे भेदे कुड्यावपातने । पणान्दाप्यः पंचदश विंशतिं तद्व्ययं तथा ॥ मुद्ग
रादिना कुड्यस्याभिघाते विदारणे च यथाक्रमं पंचपणो दशपणो विंशतिपणश्च दंडो वेदितव्यः । अवपातने पुनः
कुड्यस्यैते त्रयो दंडाः समुच्चिता ग्राह्याः पुनः कुड्यसंपादनार्थं च धनं स्वामिने दद्यात् ॥ ॥ अपि च । दुःखोत्पादि गृहे
द्रव्यं क्षिपन्प्राणहरं तथा । षोडशाद्यः पणान्दाप्यो द्वितीयो मध्यमं दमं ॥ परगृहे दुःखजनकं कंटकादि द्रव्यं प्रक्षि
पन् षोडशपणान्दंड्यः । प्राणहरं तु पुनर्विषभुजंगादिकं प्रक्षिपन्मध्यमसाहसं दंड्यः ॥ ॥ पश्वभिद्रोहे दंडमाह । दुः
खे च शोणितोत्पादे शाखांगच्छेदने तथा । दंडः क्षुद्रपशूनां तु द्विपणप्रभृतिः क्रमात् ॥ क्षुद्राणां पशूनामजाविहरिण
प्रायाणां ताडनेन दुःखोत्पादने स्रक्श्रावणे शाखांगच्छेदने शाखाशब्देनात्र प्राणसंचाररहितशृंगादिकं लक्ष्य
ते । अंगानि करचरणप्रभृतीनि शाखा चांगं च शाखांगं तस्य छेदने द्विपणप्रभृतिर्दंडः । द्विपणो यस्य दंडस्य स द्वि
पणः द्विपणः प्रभृतिरादिर्यस्य दंडगणस्यासौ द्विपणप्रभृतिः स च दंडगणो द्विपणश्चतुष्पणः षट्पणोऽष्टपण
इत्येवंरूपो न द्विपणत्रिपणचतुष्पणः पंचपण इति । कथमिति चेदुच्यते । अपराधगुरुत्वात्तावत्त्रयमदंडाद्गुरु
तरमुपरितनं दंडत्रितयं अवगम्यते । तत्र चाक्षतत्वादिसंख्याश्रवणाद्ग्रहणात् द्विसंख्याया एवाभ्यासाश्रयणे १२३

Dr BHAU DAJI MEMORIAL

न गुरुत्वसंपादनमिति निरवद्यं । किंच । लिंगस्य छेदने मृत्यौ मध्यमो मूल्यमेव च । महापशूनामेतेषु स्थानेषु द्विगुणो द
मः ॥ तेषां क्षुद्रपशूनां लिंगच्छेदने मारणे च मध्यमसाहसो दंडः स्वामिने च मूल्यं दद्यात् । महापशूनां पुनर्गोगजवाजिप्र
भृतीनामेतेषु स्थानेषु ताडनलोहितस्रावणादिनिमित्तेषु पूर्वोक्ताद्दंडात् द्विगुणो दंडो वेदितव्यः ॥ ॥ स्थावराभिद्रोहे दंड
माह । प्ररोहिशाखिनां शाखास्कंधसर्वविदारणे । उपजीव्यद्रुमाणां च विंशतेर्द्विगुणो दमः ॥ प्ररोहा अंकुरास्तद्यु
क्ताः शाखाः प्ररोहिण्यः या छिन्नाः पुनरुप्ताः प्रतिकांडं प्ररोहंति ताः शाखाः येषां वटादीनां ते प्ररोहिशाखिनस्ते
षां शाखाच्छेदने यतो मूलशाखा निर्गच्छति स स्कंधस्तस्य छेदने समूलवृक्षच्छेदने च यथाक्रमं विंशतिपणाद्दंडादा
रभ्य पूर्वस्मात्पूर्वस्मादुत्तरोत्तरदंडो द्विगुणः एतदुक्तं भवति ॥ विंशतिपणश्चत्वारिंशत्पणो अशीतिपण इत्येवं त्रयो दं
डाः यथाक्रमं शाखाच्छेदनादिष्वपराधेषु भवंतीति । अप्ररोहिशाखिनामप्युपजीव्यद्रुमाणामाम्रादीनां पूर्वोक्तेषु
स्थानेषु पूर्वोक्ता एव दंडाः अनुपजीव्याप्ररोहिशाखिषु पुनर्वृक्षेषु कल्प्यं । वृक्षविशेषं प्रत्याह चैत्यश्मशानसी
मासु पुण्यस्थाने सुरालये । जातद्रुमाणां द्विगुणो दमो वृक्षेऽथ विश्रुते । चैत्यादिषु जातानां वृक्षाणां शाखाच्छे
दनादिषु पूर्वोक्ताद्दंडाद्द्विगुणो विश्रुते च पिप्पलपलाशादिके द्विगुणो दंडः । गुल्मादीन्प्रत्याह गुल्मगुच्छक्षुपल

तान्प्रतानौषधिवीरुधां। पूर्वस्मात् अर्धदंडः स्थानेषूक्तेषु कर्तने। गुल्मा अनतिदीर्घनिबिडलतामालत्यादयः। गुच्छा
१२७ अवल्लीरूपा असरलप्रायाः कुरुंटकादयः। क्षुपाः करवीरादयः सरलप्रायाः। लता दीर्घयायिन्यो द्राक्षातिमुक्त
प्रभृतयः। प्रतानाः कांडप्ररोहरहिताः सरलयायिन्यः सारिवाप्रभृतयः। ओषध्यः फलपाकावसानाः शालिप्र
भृतयः॥ वीरुधः छिन्ना अपि याः विविधं प्ररोहंति गुडूचीप्रभृतयः॥ एतेषां पूर्वोक्तेषु स्थानेषु कर्तने छेदने पूर्वो
क्ताद्दंडादर्धदंडो वेदितव्यः॥ ॥इति दंडपारुष्यप्रकरणं॥ ॥संप्रति साहसं नाम विवादपदं व्यासुस्तल्लक्ष विख्या
णं तावदाह सामान्यद्रव्यप्रसभहरणात्साहसं स्मृतं सामान्यस्य साधारणस्य यथेष्टविनियोगानर्हत्वावि
शेषेण परकीयस्य वा द्रव्यस्यापहरणं साहसं। कुतः प्रसभहरणात्। प्रसह्यहरणात् बलावष्टंभेन हरणादि
ति यावत्। तदुक्तं भवति। राजदंडं जनाक्रोशं चोल्लंघ्य राजपुरुषेतरजनसमक्षं यत्किंचिन्मारणपरदारधर्षणा
दि क्रियते तत्सर्वं साहसमिति। साहसलक्षणं। अतः साधारणधनपरधनयोर्हरणस्यापि बलावष्टंभेन क्रि
यमाणत्वात्साहसत्वमिति नारदेनापि साहसस्य स्वरूपं विवृतं। सहसा क्रियते कर्म यत्किंचिद्बलदर्पितैः। त
त्साहसमिति प्रोक्तं सहो बलमिहोच्यते इति। तदिदं साहसं चौर्यवाग्दंडपारुष्यस्त्रीसंग्रहेषु व्यासक्तमपि ब १२७

लदर्पावष्टंभोपाधितो भिद्यत इति दंडातिरेकार्थं पृथगभिधानं तस्य च दंडवैचित्र्यप्रतिपादनार्थं प्रथमादिभेदेन त्रै
विध्यमभिधाय तल्लक्षणं तेनैव विवृतं। तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमं तथा॥ उत्तमं चेति शास्त्रेषु तस्योक्तं लक्षणं
पृथक्। फलमूलोदकादीनां क्षेत्रोपकरणस्य च भंगाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतं वासःपश्वन्नपानानां
गृहोपकरणस्य च। एतेनैव प्रकारेण मध्यमं साहसं स्मृतं। व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनं। प्राणोप
रोधि यच्चान्यदुक्तमुत्तमसाहसं। तस्य दंडः क्रियापेक्षः प्रथमस्य शतावरः। मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पंचशता
वरः॥ उत्तमे साहसे दंडः सहस्रावर इष्यते। वधः सर्वस्वहरणं पुरान्निर्वासनांकने। तदंगच्छेद इत्युक्तो दंड उत्तमसा
हसे इति वधादयश्चापराधतारतम्यादुत्तमसाहसे समस्ता व्यस्ता वा योज्याः। तत्र परद्रव्यापहरणरूपे साहसे
दंडमाह। तन्मूल्याद्द्विगुणो दंडो निह्नवे तु चतुर्गुणः। तस्यापहृतद्रव्यस्य मूल्याद्द्विगुणो दंडः यः पुनः साहसं कृत्वा
नाहमकार्षमिति निह्नुते तस्य मूल्याच्चतुर्गुणो दंडो भवति। एतस्मादेव विशेषदंडाभिधानात्प्रथमसाहसादिसा
मान्यदंडाभिधानमपहारव्यतिरिक्तविषयं गम्यते। साहसिकस्य प्रयोजयितारं प्रत्याह। यः साहसं कारयति स दा
प्यो द्विगुणं दमं। यश्चैवमुक्त्वाहं दाता कारयेत्स चतुर्गुणं। यस्तु साहसं कुर्वित्येवं वाचैव कारयत्यसौ साहसिकदंडा

द्विगुणं दंडं दाप्यः यः पुनरहं तुभ्यं धनं दास्यामि त्वं कुर्विस्येवं उक्त्वा साहसं कारयति स चतुर्गुणं दंडं दाप्यो नुबंधाति श्र
125 यात्साहसिकविशेषं प्रत्याह। अर्घ्याक्रोशातिक्रमकृद्भ्रातृभार्याप्रहारदः। संदिष्टस्याप्रदाता च समुद्रगृहभेदकृ
त्॥ सामंतकुलिकादीनामपकारस्य कारकः। पंचाशत्पणिको दंड एषामिति विनिश्चयः। अर्घ्यस्यार्घार्हस्याचा
र्यादेराक्षेपमात्रातिक्रमं च यः करोति। यश्च भ्रातृभार्यां ताडयति। तथा संदिष्टस्य प्रतिश्रुतस्यार्थस्याप्रदाता।
यश्च मुद्रितं गृहं उद्घाटयति तथा स्वगृहक्षेत्रादिसंसक्तगृहक्षेत्रादिस्वामिनां कुलिकानां स्वकुलोद्भवानां आ
दिग्रहणात्स्वग्रामस्वदेशीयानां चयोपकर्त्ता ते सर्वे पंचाशत्पणपरिमितेन दंडनीयाः। किंच। स्वच्छंदविधवागा
मी विक्रुष्टेनाभिधावकः॥ अकारणे च विक्रोष्टा चंडालश्चोत्तमान्स्पृशन्। शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोज
कः। अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत्। वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत्। साधारणस्यापलापी
दासीगर्भविनाशकृत्। पितापुत्रस्वसृभ्रातृदंपत्याचार्यशिष्यकाः। एषामपतितान्योन्यत्यागी च शतदंडभा
क्॥ नियोगं विना यः स्वेच्छया विधवां गच्छति चौरादिभयाकुलैर्विक्रुष्टे यः शक्तोपि नाभिधावति। यश्च वृथाक्रोशं
करोति यश्च चांडालो ब्राह्मणादीन्स्पृशति। यश्च शूद्रप्रव्रजितान्दिगंबरादीन्दैवे पित्र्ये च कर्मणि भोजयति। यश्चा 125

युक्तं मातरं ग्रहीष्यामीत्येवं शपथं करोति॥ तथा ऽयोग्य एव शूद्रादिर्योग्यं कर्माध्ययनादि करोति। वृषो बलीवर्दः क्षु
द्रपशवो ऽजादयस्तेषां पुंस्त्वस्य प्रजननशक्तेर्विनाशकः। वृक्षक्षुद्रपशूनामिति पाठे हिंग्वाद्यौषधप्रयोगेन वृक्षा
देः फलप्रसूनानां पातयिता॥ साधारणमपलपति। साधारणद्रव्यस्य वंचकः। दासीगर्भस्य पातयिता च। ये च पि
त्रादयो [redacted] अपतिता एव संतोन्योन्यं त्यजंति। ते सर्वे प्रत्येकं पणशतं दंडार्हा भवंति॥ ॥इति साहसप्र
करणं॥ ॥साहसप्रसंगात्तत्सदृशापराधेषु निर्णेजकादीनां दंडमाह। वासांसि स्त्रीन्पणान्दंड्यो नेजकस्तु परांशु आच्छादकः
कं। विक्रयावक्रयाधानयाचितेषु पणान्दश॥ नेजको वस्त्रधावकः। स परैर्निर्णेजनार्थं समर्पितानि वासांसि।
स्वयमाछादयति तदासौ पणत्रयं दंड्यः। यः पुनस्तानि विक्रीणीते। अवक्रयं वा एतावत्कालं उपभोगार्थं वस्त्रं दी
यते मत्यमेतावद्धनं देयमित्येवं भाटकेन यो ददाति आधित्वं वा नयति स्वसुहृद्भ्यो याचितं वा ददाति असौ प्र
त्यपराधं दशपणान्दंडनीयः। तानि च वस्त्राणि श्लक्ष्णशाल्मलीफलके क्षालनीयानि। न पाषाणेन च व्यत्यस्य
नीयानि। न च स्वगृहे वासयितव्यानि इतरथा दंडः। शाल्मलेफलके श्लक्ष्णे निज्याद्वासांसि नेजकः। न च वासांसि
वासोभिर्निर्हरेत् न च वासयेदिति मनुस्मरणात्। यदा पुनस्तानि प्रमादान्नाशयति तदा। नारदेनोक्तं द्रष्टव्यं। सू

१२६ ल्पाष्टभागो हीयते सकृद्धौतस्य वाससः। द्विःपादस्त्रिस्तृतीयांशश्चतुर्धौतेऽर्धमेव च। अर्धक्षयात्तु परतः पादां
शापचयः क्रमात्। यावत्क्षीणदशं जीर्णं जीर्णस्यानियमः क्षय इति॥ अष्टपणक्रीतस्य सकृद्धौतवस्त्रस्य नाशि
तस्याष्टमभागोनं पणन्यूनं मूल्यं देयं। द्विधौतस्य तु पादोनं पणद्वयोनं। त्रिधौतस्य पुनस्तृतीयांशन्यूनं। चतु
र्धौतस्यार्धं पणचतुष्टयं देयं। ततः परं प्रतिनिर्णेजनमवशिष्टमूल्यपादापचयेन देयं। या च जीर्णं जीर्णस्य पु
नर्नाशितस्येच्छातो मूल्यदानकल्पनं। पितापुत्रविरोधे तु साक्षिणां त्रिपणो दमः। अंतरे च तयोर्यः स्यात्तस्याप्य
ष्टगुणो दमः। पितापुत्रयोः कलहे यः साक्ष्यमंगीकरोति न पुनः कलहं निवारयत्यसौ पणत्रयं दंड्यः। यश्च तयोः स
पणे विवादे पणदाने प्रतिभूर्भवत्यसौ च कारात्तयोर्यः कलहं वर्धयति सापि त्रिपणादष्टगुणं चतुर्विंशतिपणा
न्दंडनीयः। दंपत्यादिविषयमेवं दंडोऽनुसरणीयः। तुलाशासनमानानां कूटकृन्नाणकस्य च। एभिश्च व्यवहर्ता
यः स दाप्यो दममुत्तमं। तुला तोलनदंडः। शासनं पूर्वोक्तं। मानं प्रस्थद्रोणादि। नाणकं मुद्राचिह्नितं द्रम्मनिष्का
दि। एतेषां यः कूटकृत् देशप्रसिद्धपरिमाणादन्यथा न्यूनत्वमाधिक्यं वा द्रम्मादेर्व्यावहारिकमुद्रितत्वं ताम्रा
म्रादिगर्भत्वं चा करोति यश्चैतैः कूटैर्जानन्नपि व्यवहरति तावुभौ प्रत्येकमुत्तमसाहसं दंडनीयौ। नाणकपरीक्ष १२६

णं प्रत्याह। अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकं। स नाणकपरीक्षी तु दाप्य उत्तमसाहसं। यः पुनर्नाणकपरीक्षी ताम्रा
दिगर्भमेव द्रम्मादिकं सम्यगिति ब्रूते सम्यक् वा कूटकमिति असावुत्तमसाहसं दंड्यः। चिकित्सकं प्रत्याह। भिष
ग्मिथ्याचरन्दाप्यस्तिर्यक्षु प्रथमं दमं। मानुषे मध्यमं राजमानुषेषूत्तमं दमं। यः पुनर्भिषक् मिथ्यायुर्वेदानभिज्ञ
एव जीवनार्थं चिकित्सितज्ञोऽहमिति तिर्यक्षु मनुष्यराजपुरुषेषु चिकित्सामाचरत्यसौ यथाक्रमेण प्रथममध्यमो
त्तमान्साहसान्दंडनीयः। तत्रापि तिर्यगादिषु मूल्यविशेषेण वर्णविशेषेण राजप्रत्यासत्तिविशेषेण दंडस्य
गुरुलघुभावः कल्पनीयः। अबध्यं यश्च बध्नाति बध्यं यश्च प्रमुंचति। अप्राप्तव्यवहारं च स दाप्यो दममुत्तमं।
यः पुनर्बंधनानर्हमनपराधिनं राजाज्ञया विना बध्नाति यश्च बद्धं व्यवहारार्थमाहूतमनिवृत्तव्यवहारं चोत्सृज
ति असावुत्तमसाहसं दाप्यः। मानेन तुलया वापि योंऽशमष्टमकं हरेत्। दंडं स दाप्यो द्विशतं वृद्धौ हानौ च कल्पितं
। यः पुनर्वणिक् व्रीहिकार्पासादेः पण्यस्याष्टमकमंशं कूटमानेन कूटतुलया अन्यथा वापहरति। असौ पणानां द्वि
शतं दंडनीयः अपहृतस्य पुनर्द्रव्यस्य वृद्धौ हानौ च दंडस्यापि वृद्धिहानिकल्प्ये॥ भेषजस्नेहलवणगंधधान्यगुडा
दिषु। पण्येषु प्रक्षिपन्हीनं पणान्दाप्यस्तु षोडश। भेषजमौषधद्रव्यं। स्नेहो घृतादिः। लवणं प्रसिद्धं। गंधद्रव्यमु

१२७ क्षीरादि धान्यगुडोऽप्रसिद्धौ । आदिग्रहणाद्धिंगुमरीचादि एतेषु सारद्रव्यविक्रयार्थं मिश्रयतः षोडशपणो दंडः । किं
च ॥ मृच्चर्ममणिसूत्रायःकाष्ठवल्कलवाससां । अजातौ जातिकरणे विक्रेयाष्टगुणो दमः ॥ न विद्यते बहुमूल्या
जातिर्यस्मिन् मृच्चर्मादिके तदजाति तस्मिन् जातिकरणे विक्रयार्थं गंधवर्णरसांतरसंचारेण बहुमूल्यजातीयसा
दृश्यसंपादने यथा मृल्लिकामात्रसंचारणेन मृत्तिकायां सुगंधामलकमिति । मार्जारचर्मणि वर्णोत्कर्षापादने
न व्याघ्रचर्मेति । स्फटिकमणौ वर्णांतरकरणेन पद्मराग इति । कार्पासिके सूत्रे वर्णोत्कर्षाधानेन पट्टसूत्रमिति । का
लायसे वर्णोत्कर्षाधानेन रजतमिति । बिल्वकाष्ठे चंदनामोदसंचारणेन चंदनमिति । कोले त्वगारग्वेलवंगयष्टि
मिति । कार्पासिके वाससि गुणोत्कर्षाधानेन कौशेयमिति । विक्रेयस्यापादितसादृश्यस्य मृच्चर्मादेः पण्यस्याष्ट व्यवहारे
गुणो दंडो वेदितव्यः ॥ समुद्गपरिवर्तं च सारभांडं च कृत्रिमं । आधानं विक्रयं चापि नयतो दंडकल्पना ॥ भिन्ने पणे तु पं
चाशत्पणे तु शतमुच्यते । द्विपणे द्विशतो दंडो मूल्यवृद्धौ च वृद्धिमान् ॥ मुद्गं पिधानं मुद्गेन सह वर्तत इति समुद्गं करंडकं ।
परिवर्तनं व्यत्यासः । योन्यदेव मुक्तानां पूर्णं करंडकं दर्शयित्वा हस्तलाघवेनान्यदेव स्फटिकानां पूर्णं करंडकं सम १२०
र्पयति । यश्च सारभांडं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति तस्य दंडकल्पना वक्ष्यमाणा वेदित

व्यौच

व्या । कृत्रिमकस्तूरिकादेर्मूल्यभूते पणे भिन्ने न्यूने न्यूनपणमूल्य इति यावत् तस्मिन्विक्रीते कृत्रिमे पंचाशत्पणो दंडः
द्विगुणमूल्ये पणे मूल्ये पुनः शतं । द्विपणे मूल्ये द्विशतो दंड इत्येवं मूल्यवृद्धौ दंडवृद्धिरूह्नेया । वणिजः प्रत्याह । संभूय कुर्वतामर्घस भद्रकप्रमाणमाने न
बाधं कारुशिल्पिनां । अर्घस्य ह्रासं वृद्धिं वा जानतां दंड उत्तमः ॥ राजनिरूपितार्घस्य ह्रासं वृद्धिं वा जानंतोपि वणिजः
संभूय मिलित्वा कारूणां रजकादीनां । शिल्पिनां चित्रकारादीनां सबाधं पीडाकरमर्घांतरं लाभलोभात् कुर्वतः प
णसहस्रं दंडनीयाः ॥ किंच ॥ संभूय वणिजां पण्यमनर्घेणोपरुंधतां । विक्रीणतां वा विहितो दंड उत्तमसाहसः ॥
ये पुनर्वणिजो मिलित्वा देशांतरादागतं पण्यमनर्घेण हीनमूल्येन प्रार्थयमाना उपरुंधंति महार्घेण वा विक्री
णते तेषामुत्तमसाहसो दंडो विहितो मन्वादिभिः । केन पुनरर्घेण पणितव्यमित्यत आह ॥ राजनि स्थाप्यते योर्घः
प्रत्यहं तेन विक्रयः । क्रयो वा निःस्रवस्तस्माद्वणिजां लाभकृत्स्मृतः ॥ राजनि संनिहिते सति यस्तेनार्घः स्थाप्यते
निरूप्यते तेनार्घेण प्रतिदिनं क्रयो विक्रयो वा कार्यः । निर्गतः स्रवो निःस्रवोऽवशेषस्तस्माद्राजनिरूपितार्घाद्यो निः
स्रवः स एव वणिजां लाभकारी न पुनः स्वच्छंदपरिकल्पितात् ॥ मनुना चार्घकरणे विशेषो दर्शितः । पंचरात्रे पंचरात्रे
पक्षे मासि तथा गते । कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृप इति । किंच । स्वदेशपण्ये तु शतं वणिग्गृह्णीत पंचकं । द

१२८ शकं पारदेश्ये तु यः स द्युः क्रयविक्रयी॥ स्वदेशप्राप्तं पण्यं गृहीत्वा यो विक्रीणीते सोपि पंचकं शतं पणात्शते पण पंचकं
लाभं गृह्णीयात्। परदेशप्राप्ते पुनः पण्ये शतपणमूल्ये दशपणान्लाभं गृह्णीयात्। यस्य पण्यस्य ग्रहणादिव
स एव विक्रयः संपद्यते॥ यः पुनः कालांतरे विक्रीणीते तस्य कालोत्कर्षविशेषाल्लाभोत्कर्षः कल्प्यः। एवं च यथार्घे
निरूपिते पणशते पंच पणो लाभो भवति तथैवार्घो राज्ञा स्वदेशपण्यविषये स्थापनीयः॥ पारदेश्यपण्ये ऽर्घनिरूपण
प्रकारमाह। पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवं। अर्घोनुग्रहकृत्कार्यः क्रेतुर्विक्रेतुरेव च। देशांतरादागते
पण्ये देशांतरागमनप्रत्यागमनभांडग्रहणशुल्कादिस्थानेषु यावानुपयुक्तोर्थः। तावंतमर्थं परिगणय्य पण्यमूल्ये
न सह मेलयित्वा यथा पणशते दशपणो लाभः संपद्यते तथा क्रेतृविक्रेत्रोरनुग्रहकार्यर्घो राज्ञा स्थापनीयः॥ प्रासं
गिकं परिसमाप्याधुना विक्रीयासंप्रदानं प्रक्रमते। तत्स्वरूपं नारदेनाभिहितं। विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदी
५८ यते। विक्रीयासंप्रदानं तद्विवादपदमुच्यते इति। तत्र विक्रेयद्रव्यस्य चराचरभेदेन द्वैविध्यमभिधाय पुनः षड्विधत्वं
तेनैव प्रत्यपादि। लोकेस्मिन्द्विविधं पण्यं स्थावरं जंगमं तथा। षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः। गणि
कं। तुलितं। मेयं क्रियया रूपतः श्रियेति। गणिकं क्रमुकफलादि। तुलितं कुंकुमादि। मेयं शाल्यादि। क्रियया वा १२८

हदोहादि रूपोपलक्षितं अश्वमहिष्यादि। रूपतः पण्यं गणिकादि। श्रिया दीप्त्या मरकतपद्मरागादि। इत्येतत्षड्प्रका
रकमपि पण्यं॥ विक्रीयासंप्रयच्छतो दंडमाह। गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति। सोदयं तस्य दाप्योसौ दि
ग्लाभं वा दिगागते। गृहीतमूल्यं यस्य पण्यस्य विक्रेत्रा तद्गृहीतमूल्यं तद्यदि विक्रेता प्रार्थ्यमानाय स्वदेशव
णिजे क्रेत्रे न समर्पयति तच्च पण्यं यदि क्रयकाले बहुमूल्यं सत्कालांतरे ऽल्पमूल्यं नैव लभ्यते तेन दार्घह्रासकृ
तोयमुदयो नास्ति वृद्धिः पण्यस्य स्थावरजंगमात्मकस्य तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीयः। यदा मूल्य
ह्रासकृतः पण्यस्योदयो नास्ति किंतु क्रयकाले यावदेव यतो मूल्यस्य यस्य पण्यमिति प्रतिपन्नं तावदेव न दान
स्य पण्यमादाय तस्मिन्देशे विक्रीणानस्य यो लाभस्तेनोदयेन सहितं। द्विकं त्रिकमित्यादि प्रतिपादितवृद्धिरू
पोदयेन वा सहितं क्रेतुर्वांछावशाद्दापनीयः यथाह नारदः। अर्घश्चेदवहीयेत सोदयं पण्यमावहेत्। स्थानि
नामेष नियमो दिग्लाभं दिग्विचारिणामिति। यदा त्वर्घमहत्वेन पण्यस्य न्यूनभावस्तदा तस्मिन्पण्ये वस्त्रगृहा
दिके य उपभोगस्तदाच्छादनसुखनिवसनादिरूपो विक्रेतुस्तत्सहितं पण्यमसौ दाप्यः। यथाह नारदः। विक्रीय
पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति। स्थावरस्य क्षयं दाप्यो जंगमस्य क्रियाफलमिति। विक्रेतुरुपभोगः क्षयशब्द

ते। क्रेतुः संबंधित्वेन क्षीयमाणत्वान्न पुनः कुड्यपातसस्यघातादिरूपः। न स्यात्तु॥ उपहन्येत वा पण्यं दह्येता
१२९ पह्रियेत वा। विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः इत्यनेनोक्तार्थत्वात्। यदा त्वसौ क्रेता देशांतरात्पण्यग्रहणार्थमा
गतस्तदा पण्यमादाय देशांतरे विक्रीणानस्य यो लाभस्तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीयः। अयं च क्रीतपण्य
समर्पणनियमोऽनुशयाभावे द्रष्टव्यः। सति त्वनुशये क्रीत्वा विक्रीय वा किंचिदित्यादिमनूक्तं वेदितव्यं। किंच
। विक्रीतमपि विक्रेयं पूर्वं क्रेतर्यगृह्णति। हानिश्चेत्क्रेतृदोषेण क्रेतुरेव हि सा भवेत्। यदा पुनर्जातानुशयः क्रे
ता पण्यं न जिघृक्षति तदा विक्रीतमपि पण्यं अन्यत्र विक्रेयं। यदा पुनर्विक्रेत्रा दीयमानं क्रेता न गृह्णाति तच्च प
ण्यं राजदैविकेनोपहतं तत्र क्रेतुरेवासौ हानिर्भवेत्। पण्याग्रहणरूपेण क्रेतृदोषेणार्जितत्वात्। अपि च।
राजदैवोपघातेन पण्ये दोषमुपागते। हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः। यदा पुनः क्रेत्रा प्रार्थ्यमानमपि
पण्यं विक्रेता न समर्पयति अजातानुशयोऽपि तच्च राजदैविकेनोपहतं भवति तदासौ हानिर्विक्रेतुरेव। अतोऽ
न्यद्दुष्टं पण्यं विनष्टं सदृशं क्रेत्रे देयं। किंच। अन्यहस्ते तु विक्रीतं दुष्टं वाऽदुष्टवद्यदि। विक्रीणीते दमस्तत्र मूल्यात्तु
द्विगुणो भवेत्। यः पुनर्विनैवानुशयमेकस्य विक्रीतं पुनरन्यस्य हस्ते विक्रीणीते सदोषं वा पण्यं प्रच्छादितदोषं १२९

डाक्टर भाऊदाजीइत्यस्य स्मारकम्
DR. BHAU DAJI MEMORIAL

विक्रीणीते तदा तन्मूल्याद्द्विगुणो दमो वेदितव्यः। नारदेनाप्यत्र विशेषो दर्शितः। अन्यहस्ते तु विक्रीय योऽन्यस्मै तत्प्रय
च्छति। द्रव्यं तद्द्विगुणं दाप्यो विनयं तावदेव तु इति। सर्वश्चायं विधिर्दत्तमूल्ये पण्ये द्रष्टव्यः। अदत्तमूल्ये पुनः पण्ये वाङ्मात्र
क्रये क्रेतृविक्रेत्रोर्नियमकारिणः समयादृते प्रवृत्तौ निवृत्तौ वा न कश्चिद्दोषः। यथाह नारदः॥ दत्तमूल्यस्य पण्यस्य वि
धिरेष प्रवर्तितः। अदत्तेऽन्यत्र समयान्न विक्रेतुरविक्रय इति। विक्रयानुशयोऽभिहितः। क्रीतानुशयस्वरूपं तु प्राक्प्र
पंचिते अधुना तदुभयसाधारणं धर्ममाह। क्षयं वृद्धिं च वणिजा पण्यानामविजानता। क्रीत्वा नानुशयः कार्यः कुर्व
न्षड्भागदंडभाक्॥ परीक्षितक्रीतपण्यानां क्रयोत्तरकालं क्रयकालपरिमाणतोऽर्घकृतां वृद्धिमपश्यता क्रेत्रा
ऽनुशयो न कार्यः। विक्रेत्रा च महार्घनिबंधनं पण्यक्षयमपश्यता नानुशयितव्यं। वृद्धिक्षयपरिज्ञाने पुनः क्रेतुर्वि
क्रेत्रोरनुशयो भवतीति व्यतिरेकादुक्तं भवति। अनुशयकालावधिश्च नारदेनोक्तः। क्रीत्वा मूल्येन यः पण्यं दुःक्री
तं मन्यते यदि। विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षतं। द्वितीयेऽह्नि ददत्क्रेता मूल्यात्त्रिंशांशमावहेत्। द्विगुणं तु तृ
तीयेऽह्नि परतः क्रेतुरेव तदिति। अपरीक्षितक्रयविक्रये पुनः पण्यवैगुण्यनिबंधनानुशयावधिर्दशैकपंचसप्ताहेत्या
दिना दर्शित एव। तदनया वाचोयुक्त्या वृद्धिक्षयपरिज्ञानस्यानुशयकारणत्वमवगम्यते। यथा पण्यपरीक्षावधिबला

१३१ दिपण्यदोषतद्वृद्धिक्षयकारणत्रितयाभावेऽनुशयकालाद्यंतशयकालांतरेपियद्यनुशयंकरोतितदापण्यषड्भागं
दंडनीयः। अनुशयकारणसद्भावेपिअनुशयकालातिक्रमेणानुशयकालातिक्रमेणानुशयंकुर्वतोप्ययमेवदंडः।
उपभोगेनाविनश्वरेषुस्थिरार्घेष्वनुशयकालातिक्रमेणानुशयंकुर्वतोमनूक्तोदंडोद्रष्टव्यः। परेणतुदशाहस्यनदद्या
न्नापिदापयेत्। आददानोददच्चैवराज्ञादंड्यःशतानिषडिति॥ ॥इतिविक्रीयासंप्रदानंनामप्रकरणं॥ ॥संभूय
समुत्थानंनामविवादपदमधुनाऽभिदधाति। समवायेनवणिजांलाभार्थंकर्मकुर्वतां। लाभालाभौयथाद्रव्यं
यथावासंविदाकृतौ। सर्वेवयमिदंकर्ममिलित्वाकुर्महइत्येवंरूपासंप्रतिपत्तिः समवायस्तेनयेवणिग्नटनर्तकप्रभृ
तयोलाभलिप्सवःप्रातिस्विकंकर्मकुर्वतेतेषांलाभालाभावुपचयापचयौयथाद्रव्यंयेनयावद्द्रव्यंपण्यग्रहणाद्य
र्थंदत्तंतदनुसारेणावसेयौ। यद्वाप्रधानगुणभावपर्यालोचनया। अस्यभागद्वयमस्यैकोभागइत्येवंरूपयासं
विदासमयेनयथासंप्रतिपन्नौतथावेदितव्यौ। किंच। प्रतिषिद्धमनादिष्टंप्रमादाद्यच्चनाशितं। सतद्दद्याद्विप्लवा
च्चरक्षितादृशमांशभाक्॥ तेषांसंभूयप्रचरतांमध्येपण्यमिदमित्थंनव्यवहर्तव्यमितिप्रतिषिद्धमाचरतायन्नाशि नि
तंअनादिष्टमननुज्ञातंवाकुर्वाणेन। तथाप्रमादात्प्रज्ञाहीनतयावायेनयन्नाशितंसतत्पण्यंवणिग्भ्योदद्यात्। १३०

यःपुनस्तेषांमध्येचौरराजादिनिमित्तात्व्यसनात्पण्यंपालयतिसतस्माद्रक्षितात्पण्याद्दशममंशंलभते। अर्घप्रक्षेपणा
द्विंशंभागंशुल्कंनृपोहरेत्। व्यासिद्धंराजयोग्यंचविक्रीतंराजगामितत्। इयत्पण्यस्यायमर्घइत्यर्घस्यप्र
क्षेपणाद्राजनोनिरूपणाद्धेतोर्यस्मान्मूल्याद्विंशतितममंशंशुल्कार्थंगृह्णीयात्। यत्तुनव्यासिद्धंअन्यत्रनविक्रेय
मितिराज्ञाप्रतिषिद्धं॥ यच्चराजयोग्यंमाणिक्यादिअप्रतिषिद्धमपिराज्ञेऽनिवेद्यलाभलोभेनविक्रीतंचेद्राजगा
मिद्रव्यदाननिरपेक्षंतत्सर्वंपण्यंराजापहरेदित्यर्थः॥ मिथ्यावदन्परीमाणंशुल्कस्थानादपासरन्। दाप्यस्त्वष्टगु
णंयश्चसव्याजक्रयविक्रयी॥ यःपुनर्वणिक्शुल्कवंचनार्थंमिथ्यावदन्पण्यपरीमाणंनिह्नुतेशुल्कग्रहणस्था
नाद्वापसरतियश्चास्येदमस्येदमितिविवादास्पदीभूतपण्यंक्रीणातिविक्रीणीतेवातेसर्वेपण्यादष्टगुणंदंडनीयाः॥
अपिच॥ नरिकःस्थलजंशुल्कंगृह्णन्दाप्यःपणान्दश। ब्राह्मणप्रातिवेश्यानामेतदेवानिमंत्रणे॥ शुल्कंहिद्विविधंस्थ
लजंजलजंच। तत्रस्थलजमर्घप्रक्षेपणाद्विंशंभागंशुल्कंनृपोहरेदित्यत्रोक्तं जलजेतुमानवेभिहितं। पणंयानंतरे
दाप्यंपौरुषोर्धपणंतरे। पादंपशुश्चयोषिच्चपादार्धंरिक्तकःपुमान्। भांडपूर्णानियानानितार्यंदाप्यानिसारतः। रि
क्तभांडानियत्किंचित्पुमांसश्चापरिच्छदाइति। शुल्कद्वयेप्ययमपरोविशेषः। नभिन्नकार्षापणमस्तिशुल्कंनशिल्प

वृत्तो न श्रोत्रियो न दूतो। न भैक्ष्यवृत्तेन रत्नावशेषेण श्रोत्रिये प्रव्रजिते न यद्देरिति। तीर्यते ऽनेनेति तरो नावादिस्तज्जान्यः शुल्को ऽधि
कृतस्तरिकः स यदा स्थलो द्रव्यं शुल्कं गृह्णाति स दशपणान्दंडनीयः। वेश्मो वेश्म प्रतिवेश इति स्ववेश्माभिमुखं स्ववे
१३१ श्मपार्श्वस्थं वोच्यते तत्र भवाः प्रातिवेश्याः ब्राह्मणाश्चेत्प्रातिवेश्याश्च ब्राह्मणाः प्रातिवेश्यास्तेषां श्रुतवृत्तसंपन्ना
नां श्राद्धादिषु विभवे सत्यनिमंत्रणे एतदेव दशपणात्मकं दंडनं च वेदितव्यं। देशांतरमृतवणिक्रिक्थं प्रसाह। देशां
तरगते प्रेते द्रव्यं दायाद्बांधवा ज्ञातयो वा हरेयुस्तदागतास्तैर्विना नृपः। यदा संभूयकारिणां मध्ये यः कश्चिद्देशां
तरगते मृतस्तदा तदीयमंशं दायादाः पुत्राद्यपत्यवर्गः। बांधवाः मातृपक्षाः मातुलाद्याः ज्ञातयो ऽपत्यवर्गव्यति
रिक्ताः सपिंडाद्याः आगताः संभूयव्यवहारिणो मे देशांतरादागतास्ते वा गृह्णीयुः। तैर्विना दायाद्यभावे राजा गृह्णी
यात्। वाशब्देन च दायादादीनां वैकल्पिकमधिकारं दर्शयति। पौर्वापर्यनियमस्तु पत्नी दुहितरश्चेत्यादिप्रतिपादि
त एवात्रापि विज्ञेयः। शिष्यसब्रह्मचारिब्राह्मणनिषेधो वणिक्सामिश्रवचनप्रयोजनं। वणिजां मध्ये यः पिं
डदानर्णदानादिसमर्थः। स गृह्णीयात्। सामर्थ्याविशेषे पुनः सर्वे वणिजः संसृष्टिनो विभज्य गृह्णीयुस्तेषामप्यभावे
दशवर्षं दायादाद्यागमनं प्रतीक्ष्यानागतेषु राजा स्वयमेव गृह्णीयात्। तदिदं नारदेन स्पष्टीकृतं। एकस्य चे १३१

त्स्यात्मरणं दायादो ऽस्य तदाप्नुयात्। अन्यो वा सति दायादे शक्ताश्चेत्सर्व एव ते। तदभावे तु गुप्तं तत्कारयेद्दशवत्सरान्।
अस्वामिकमदायादं दशवर्षं स्थितं ततः॥ राजा तदात्मसात्कुर्यादेवं धर्मो व्यवस्थित इति। किंच। जिह्मं त्यजेयुर्निर्लो
भमशक्तो ऽन्येन कारयेत्। जिह्मो वंचकस्तं निर्लाभं निर्गतलाभं लाभमाच्छिद्य त्यजेयुः बहिः कुर्युः। यश्च संभूयकारि
णां मध्ये भांडप्रत्यवेक्षणादिकं कर्तुमसमर्थो ऽसावन्येन स्वकं कर्म भांडभारोद्वहनं तदायव्ययपरीक्षणादिकं
कारयेत्। प्रागुपदिष्टं वणिग्धर्ममृत्विगादिष्वतिदिशति। अनेन विधिराख्यात ऋत्विक्कर्षककर्मिणां। अनेन ला
भालाभौ यथाद्रव्यमित्यादिवणिग्धर्मकथनेन ऋत्विजां होत्रादीनां कृषीवलानां नटनर्तकतक्षादीनां च शिल्पि
कर्मोपजीविनां विधिर्वर्तनप्रकारः आख्यातः॥ तत्र च ऋत्विजां धनविभागो विषमो मनुना दर्शितः॥ सर्वेषामर्धिनो
मुख्यास्तदर्धेनार्धिनो परे। तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिन इति। अस्यायमर्थः। ज्योतिष्टोमे नेतानरी
क्षयंती इति वचनेन। गवां शतमृत्विगानतिसृजेद्दक्षिणाकार्ये विनियुक्ते ऋत्विजश्च होत्रादयः षोडश तत्र कस्य
कियानंश इत्यपेक्षायामिदमुपतिष्ठते सर्वेषां होत्रादीनां षोडशानामृत्विजां मध्ये ये मुख्याश्चत्वारो होत्रध्वर्युब्रह्मो
द्गातारस्ते गोशतस्यार्धिनः सर्वेषां भागपरिपूरणोपपत्तिवशाद्यथा तेनाष्टाचत्वारिंशद्गुणार्धेनार्धभाजः। अप

१३१ रैमैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारः तदर्धेन तस्य मुख्यांशस्यार्धेन चतुर्विंशतिरूपेणा
र्धभाजः। ये पुनस्तृतीयिनः अच्छावाकनेष्टाग्नीध्रप्रतिहर्तारस्ते मुख्यांशस्य षोडशगोरूपतृतीयांशेन तृ
तीयांशभाजः ये तु पादिनः ग्रावस्तुदुन्नेतृपोतृसुब्रह्मण्यास्ते मुख्यभागस्य चतुर्थांशद्वादशगोरूप
पादभाजः। ननु कथमयं अंशनियमः घटते न तावदत्र समसमुदायेनापि द्रव्यसमवायः नापि वचनेन ह्यदृष्टा
र्थो नियमः स्यात् ततः समं स्यादश्रुतत्वादिति न्यायेन सर्वेषां समांशभाक्त्वं। कर्मानुरूपेण वांशभाक्त्वमिति युक्तं
।तत्रोच्यते। ज्योतिष्टोमप्रकृतिके द्वादशाहे ऽर्धिनस्तृतीयिनः पादिन इति सिद्धवदनुवादेन घटते यदि तत्साभिनि
ते ज्योतिष्टोमे ऽर्धतृतीयचतुर्थांशभाक्त्वं मैत्रावरुणादीनां न स्यादतो वेदिकाधिप्रभृतिसमाख्याबलात् स्यादुक्तां
शनियमो ऽवकल्प्यत इति निरवद्यं॥ ॥इति संभूयसमुत्थानप्रकरणं॥ ॥इदानीं स्तेयं प्रस्तूयते। तल्लक्षणं च म
नुनाभिहितं॥ स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतं। निरन्वयं भवेत्स्तेयं कृत्वापह्नूयते च यदिति अन्वयवत्
द्रव्यरक्षिराजाध्यक्षादिसमक्षं प्रसभं बलावष्टंभेन यत्परधनहरणादि क्रियते तत्साहसं। स्तेयं तु न द्विलक्ष
णं निरन्वयं द्रव्यस्वाम्याद्यसमक्षं वंचयित्वा यत्परधनहरणं तदुच्यते। यच्च सान्वयमपि कृत्वा न मयेदं कृतमिति न १३२

यान्निह्नुते तदपि स्तेयं। नारदेनाप्युक्तं। उपायैर्विविधैरेषां छलयित्वापकर्षणं। सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनी
षिण इति। तत्र तस्करग्रहणपूर्वकत्वाद्दंडनस्य ग्रहणस्य च ज्ञानपूर्वकत्वात् ज्ञानोपायं तावदाह॥ ग्राहकैर्गृ
ह्यते चौरो लोप्त्रेणाथ पदेन वा। पूर्वकर्मापराधी च तथा चाशुद्धवासकः॥ यश्चौरोयमिति जनैर्विख्याप्यते ऽसौ
ग्राहकै राजपुरुषैः स्थानपालप्रभृतिभिर्ग्रहीतव्यः। लोप्त्रेणापहृतभाजनादिना वा चौर्यचिह्नेन। नष्टदेशादा
रभ्य चौरपदानुसरणेन वा ग्राह्यः। पूर्वकर्मापराधी प्राक्प्रख्यातचौर्यः। अशुद्धो ऽप्रज्ञातो वासः स्थानं यस्या
सावशुद्धवासकः सोपि ग्राह्यः। किंच। अन्येपि शंकया ग्राह्या जातिनामादिनिह्नवैः। द्यूतस्त्रीपानसक्ताश्च
शुष्कभिन्नमुखस्वराः॥ परद्रव्यगृहाणां च पृच्छका गूढचारिणः। निराया व्ययवंतश्च विनष्टद्रव्यविक्रयाः॥ न केवलं
पूर्वोक्ता ग्राह्याः किं त्वन्येपि वक्ष्यमाणैर्लिंगैः शंकया ग्राह्याः। जातिनिह्नवेन नाहं शूद्र इत्येवंरूपेण। नामनि
ह्नवेन नाहं डित्थ इत्येवंरूपेण। आदिग्रहणात्स्वदेशग्रामकुलाद्यपलापेन च लक्षिता ग्राह्याः। द्यूतपण्यांगना
मद्यपानादिव्यसनेष्वतिप्रसक्ताः तथा कुतस्त्यो ऽसि त्वमिति चौरग्राहिभिः पृष्टो यदि शुष्कमुखो भिन्नस्वरो वा भ
वति तदसावपि ग्राह्यः। बहुवचनात् स्विन्नललाटादीनां ग्रहणं। तथा ये निष्कारणं कियदस्य धनं किं वास्य

१३३
गृह्णन्ति स्येवं पश्यन्ति। वेषान्तरधारणेनात्मानं गूहयित्वा ये चरन्ति। ये चाऽन्याभावेऽपि बहुव्ययकारिणः। ये च विन
ष्टद्रव्याणां जीर्णवस्त्रभिन्नभाजनादीनामविज्ञातस्वामिकानां विक्रयिकास्ते सर्वे चौर्यसंभावनया ग्राह्याः।
एवं नानाविधचौर्यलिंगान्पुरुषान्गृहीत्वैते चौराः किं वा साधव इति सम्यक्परीक्षेत। न पुनर्लिंगदर्शनमा
त्रेण चौर्यनिर्णयं कुर्यादचोरस्यापि लोप्त्रादिचौर्यलिंगसंबंधसंभवात्। यथाह नारदः। अन्यहस्तात्परिभ्र
ष्टमकामादुत्थितं भुवि। चोरेण वा परिक्षिप्तं लोप्त्रं यत्नात्परीक्षयेत्। तथा। असत्याः सत्यसंकाशाः सत्याश्चा
सत्यसंनिभाः। दृश्यन्ते विविधा भावास्तस्माद्युक्तं परीक्षणमिति। एवं चौर्यशंकया गृहीतेनात्मा शोधनीय इ
त्याह। गृहीतः शंकया चौर्ये नात्मानं चेद्विशोधयेत्। दापयित्वा हृतं द्रव्यं चोरदंडेन दंडयेत्। यदि चौर्यशंक
या गृहीतस्तन्निस्तरणार्थमात्मानं न शोधयति तर्हि वक्ष्यमाणधनदापनवधादिदंडभाग्भवेत्। तो मानुषेण
तदभावे दिव्येन वात्मा शोधनीयः। ननु नाहं चोर इति मिथ्योत्तरे कथं प्रमाणं संभवति तस्याभावरूपत्वात्। उच्य
ते। दिव्यस्य तावद्भावाभावगोचरत्वं रुच्या वान्यतरः कुर्यादित्यत्र प्रतिपादितं मानुषं पुनर्यद्यपि साक्षाच्छु
द्धमिथ्योत्तरे न संभवति तथापि कारणेन संस्पृष्टे संभावरूपमिथ्याकारणसाधनमुखेनाभावमपि गोचरय १३३

त्येव। यथा नाशापहारकालेऽहं देशान्तरस्थ इत्यभियुक्तेऽभाविते चौर्याभावस्याप्यर्थात्सिद्धेः शुद्धिर्भवत्येव। चोरदं
डमाह। चोरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैः। यस्तु प्रागुक्तपरीक्षया तैन्निरपेक्षं वा निश्चितचौर्यः स्वामिनेऽप ह
हृतं धनं स्वरूपेण मूल्यतया वा दापयित्वा विविधैर्वधैर्घातयेत्। एतच्चोत्तमसाहसदंडप्राप्तियोग्योत्तमद्र
व्यविषयं न पुनः पुष्पवस्त्रादिक्षुद्रमध्यमद्रव्यापहारविषयं। साहसेषु य एवोक्तस्त्रिषु दंडो मनीषिभिः। स ए
व दंडस्तेयेऽपि द्रव्येषु त्रिष्वनुक्रमादिति। नारदवचनेन वधरूपस्योत्तमसाहसस्योत्तमद्रव्यविषये व्यवस्थापि
तत्वात्। यत्पुनरिदमनुवचनं। अन्यायोपात्तत्वाद्धनमेषां मलात्मकं अतस्तान्घातयेद्राजा नार्थदंडेन दंडयेदि
ति। तदपि महापराधविषयं। चोरविशेषेऽपवादमाह। सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत्। ब्राह्मणं पुन
श्चोरं महत्यपराधे न घातयेदपि तु ललाटेऽंकयित्वा स्वदेशान्निष्कासयेत्। अंकनं च श्वपदाकारं कार्यं। तथा
च मनुः। गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः। स्तेये च श्वपदं कार्यं ब्रह्महण्यशिराः पुमानिति। एतच्च दंडो
त्तरकालं प्रायश्चित्तमचिकीर्षतो द्रष्टव्यं। यथाह मनुः प्रायश्चित्तं तु कुर्वाणाः पूर्वे वर्णा यथोदितं। नांक्या राज्ञा ल
लाटे तु दाप्यास्तूत्तमसाहसमिति। चोरादर्शनेऽपहृतद्रव्यप्राप्त्युपायमाह॥ घातितेऽपहृते दोषो ग्रामभर्तुर

१२४ निर्गते। विवीतभर्तुस्तु पथि चौरोद्धर्तुरवीतके। यदि ग्राममध्ये मनुष्यादिप्राणिवधो धनापहरणं वा जायेत तदा ग्रा-
मपतेरेव चोरोपेक्षादोषस्तत्परिहारार्थं स एव चौरं गृहीत्वा राज्ञेऽर्पयेत् तदशक्तौ हृतं धनं धनिने दद्याद्यदि चोरप स्व
दं स्वग्रामात् निर्गतं न दर्शयति। दर्शिते पुनस्तत्पदं यत्र गच्छति तद्विषयाधिपतिरेव चोरं धनं दापयेत्। तथा च प्रविशति
नारदः। गोचरे यस्य लुप्येत तेन चोरः प्रयत्नतः। ग्राह्यो दाप्योऽथवा रूपं पदं यदि न निर्गतम्। निर्गते पुनरेतस्मान्न
चेदन्यत्र पातितम्। सामन्तान्मार्गपालांश्च दिक्पालांश्चैव दापयेदिति। विवीते त्वपहारे विवीतस्वामिन एव दो-
षः। यदा त्वध्वन्येव तद्धृतं भवत्य विवीतके विवीतके वा विवीतादन्यत्र क्षेत्रे तदा चौरोद्धर्तुर्मार्गपालस्य दिक्-
पालस्य वापराधः। किं च। स्वसीम्नि दद्याद्ग्रामस्तु पदं वा यत्र गच्छति। पंचग्रामी बहिः क्रोशाद्दशग्राम्यथवा
पुनः। यदा पुनर्ग्रामाद्बहिः सीमापर्यन्ते क्षेत्रे मोषादिकं भवति तदा तद्ग्रामवासिन एव दद्युर्यदि सीम्नो बहिश्चौ-
रपदं न निर्गतं निर्गते पुनर्यत्र ग्रामादिकं प्रविशति स एव चौरार्पणादिकं कुर्यात्। यदा त्वनेकग्राममध्ये क्रो-
शमात्राद्बहिः प्रदेशे घातितो मुषितो वा चोरपदं च जनसंमर्दादिना भग्नं तदा पंचानां ग्रामाणां समाहारः पं-
चग्रामी दशग्रामसमाहारो दद्यात्। विकल्पवचनं तु। यथा प्रत्यासन्नपदहृतधनप्रत्यर्पणादिकं कुर्यादिति १२४

वमर्थः। यदा त्वन्यतोऽपहृतं धनं दापयितुं न शक्नोति तदा स्वकोशादेव राजा दद्यात्। चौरहृतमवजित्य यथास्थानं गमये-
त्। स्वकोशाद्वा दद्यादिति गौतमस्मरणात्। मुषितामुषितसंदेहे मानुषेण दिव्येन वा निर्णयः कार्यः। यदि तस्मिन्दाप्य-
माने भवेन्मोषे तु संशयः। मुषितः शपथं दाप्यो बंधुभिर्वापि साधयेदिति वृद्धमनुस्मरणात्। अपराधविशेषेण दंड-
विशेषमाह। बंदिग्राहांस्तथा वाजिकुंजराणां च हारिणः। प्रसह्य घातिनश्चैव शूलानारोपयेन्नरान्॥ बंदिग्राहादी-
नां बलवधभेन घातकानां चौराणां शूलानारोपयेत्। अयं च वधप्रकारविशेषोपदेशः। अग्न्यागारायुधा-
गारदेवनागारभेदकान्। हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारयन्निति मनुस्मरणात्। किं च। उत्क्षेपकग्रंथिभेदौ क-
रसंदंशहीनकौ॥ कार्यौ द्वितीयापराधे करपादैकहीनकौ। वस्त्राद्युत्क्षिप्यापहरतीत्युत्क्षेपकः। वस्त्रादि-
बद्धं स्वर्णादिकं विस्रस्योत्कृत्य वा योऽपहरत्यसौ ग्रंथिभेदः। तौ यथाक्रमं करेण संदंशसदृशेन तर्जन्यंगुष्ठेन च
हीनौ कार्यौ। द्वितीयापराधे पुनः करश्च पादश्च करपादं। तत्रैकं च करपादैकं तेन हीनौ ययोस्तौ। करपादैकही-
नकौ कार्यौ। उत्क्षेपकग्रंथिभेदकयोरेकैकं करपादं च छिंद्यादित्यर्थः। एतदप्युत्तमसाहसप्राप्तियोग्यद्रव्यविष-
ये। तदंगच्छेदद्रव्यकोटं उत्तमसाहसमिति नारदवचनात्। तृतीयापराधे तु वधमथाह मनुः। अंगुलीग्रंथिभेदस्य

१३५ छेदयेत्प्रथमे ग्रहे द्वितीये हस्तपादौ तृतीये वधमर्हति ॥ जातिद्रव्यपरिमाणतो मूल्याद्यनुसारतो दंडः कल्पनीय
इति ॥ जातिद्रव्यपरिमाणपरिग्रहविनियोगवयःशक्तिगुणदेशकालादीनां दंडगुरुलघुभावकेणानामानेस्या
त्प्रतिद्रव्यं वक्तुमशक्तेः सामान्येन दंडकल्पनोपायमाह । क्षुद्रमध्यमहाद्रव्यहरणे सारतो दमः ॥ देशकाल
वयःशक्ति संचिंत्य दंडकर्मणि । क्षुद्राणां मध्यमानामुत्तमानां च द्रव्याणां हरणे सारतो मूल्याद्यनुसारतो दं
डः कल्पनीयः क्षुद्रादिद्रव्यस्वरूपं च नारदेनोक्तं । मृद्भांडासनखट्वास्थिदारुचर्मतृणादि यत् । शमीधान्यं कृ
तान्नं च क्षुद्रं द्रव्यमुदाहृतं । वासः कौशेयवर्जं च गोवर्जं पशवस्तथा । हिरण्यवर्जं लोहं च मध्यं व्रीहियवा अपि
। हिरण्यरत्नकौशेयस्त्रीपुंगोगजवाजिनः । देवब्राह्मणराज्ञां च द्रव्यं विज्ञेयमुत्तमं । त्रिःप्रकारेष्वपि द्रव्येषूत्त
मिकः प्रथममध्यमोत्तमसाहसरूपो दंडनियमस्तेनैव दर्शितः । साहसेषु य एवोक्तस्त्रिषु दंडो मनीषिभिः । स एव
दंडस्तेयेपि द्रव्येषु त्रिष्वनुक्रमादिति । मृन्मयेषु मणिकमल्लिकादिषु गोवाजिव्यतिरिक्तेषु च महिषमेषादिपशुषु ।
ब्राह्मणस्वसंबंधिषु च कनकधान्यादिषु तरतमभावोस्तीति उच्चावचदंडविशेषाकांक्षायां मूल्याद्यनुसारेण दंडः
कल्पनीयः । तत्र च दंडकल्पनायां तद्धेतुभूतं देशकालवयःशक्तिसम्यक् चिंतनीयं । एतच्च जातिद्रव्यपरिमाणप १३५

MEMORIAL

रिग्रहादीनामुपलक्षणं । तथा हि । अष्टापाद्यं स्तेयकिल्बिषं शूद्रस्य द्विगुणोत्तराणीतरेषां प्रतिवर्णं विदुषोतिक्रमे दंडभू
यस्त्वमिति । अयमर्थः । किल्बिषशब्देनात्र दंडो लक्ष्यते यस्मिन्नपहारे यो दंड उक्तः स विदुच्छूद्रकर्तृके ऽपहारे ऽष्टगुण
आपादनीयः ॥ इतरेषां पुनः विट्क्षत्रब्राह्मणानां विदुषां स्तेये द्विगुणोत्तराणि किल्बिषाणि । षोडश द्वात्रिंशच्चतुःष
ष्टिगुणा दंडाः । आपादनीयाः । यस्माद्धि इच्छूद्रादिकर्तृके ऽपहारे दंडभूयस्त्वं । मनुनाप्ययमेवार्थो दर्शितः । अष्टा
पाद्यं तु शूद्रस्य स्तेये भवति किल्बिषं । षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य तु । ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि श
तं भवेत् । द्विगुणा वा चतुःषष्टिस्तद्दोषगुणवेदन इति । तथा परिमाणकृतमपि दंडगुरुत्वं दृश्यते । यथाह मनुः । धा
न्यं दशभ्यः कुंभेभ्यो हरतोभ्यधिके वधः । शेषेप्येकादशगुणं दाप्यस्तस्य च तद्धनमिति । विंशतिद्रोणकः कुंभः ह
र्तृह्रियमाणस्वामिगुणापेक्षया सुभिक्षदुर्भिक्षकालापेक्षया वा ताडनांगच्छेदनवधरूपा दंडा योज्याः । तथा
संख्याविशेषादपि दंडविशेषो रत्नादिषु । सुवर्णरजतादीनामुत्तमानां च वाससां । रत्नानां चैव सर्वेषां शताद
भ्यधिके वधः । पंचाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते । शेषेप्येकादशगुणं मूल्याद्दंडं प्रकल्पयेदिति । तथा द्र
व्यविशेषादपि । पुरुषाणां कुलीनानां नारीणां च विशेषतः । रत्नानां चैव सर्वेषां हरणे वधमर्हति । अकुलीनानां

१३६ तुर्दंडोत्तरं। पुरुषं हरतो दंड उक्त उत्तमसाहसः। स्वल्पपराधे तु सर्वस्वं कन्यां तु हरतो वध इति। क्षुद्रद्रव्याणां तु माषतो
न्यूनमूल्यानां च गुणो दमः। काष्ठभांडतृणादीनां मृन्मयानां तथैव च। वेणुवैणवभांडानां तथा स्नाय्वस्थिचर्मणां। शा
कानामार्द्रमूलानां हरणे फलमूलयोः। गोरसेक्षुविकाराणां तथा लवणतैलयोः। पक्वान्नानां कृतान्नानां मत्स्याना
मामिषस्य च। सर्वेषामल्पमूल्यानां मूल्यात्पंचगुणो दम इति। नारदस्मरणात्। यत्पुनः प्रथमसाहसः क्षुद्रद्रव्येषु
ज्ञातावरः पंचशतपर्यंतो मासमाषमूल्येनाधिकमूल्ये च यथायोग्यं व्यवस्थापनीयः। यत्तु नर्मानवं क्षुद्रद्रव्यगो
चरवचनं। तन्मूल्याद्द्विगुणो दम इति तदल्पप्रयोजनत्राणादिविषयं। तथापराधगुरुत्वादपि दंडगुरुत्वं। तथा॥
संधिं छित्वा तु ये चौर्यं रात्रौ कुर्वंति तस्कराः। तेषां छित्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत्। एवं सर्वेषामानंत्यात्प्रति
द्रव्यं वक्तुमशक्तेर्जातिपरिमाणादिभिः कारणैर्दंडगुरुलघुभावः कल्पनीयः। पथिकानां पुनरल्पापहारे न दंडः।
यथाह मनुः। द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके। आददानः परक्षेत्रान्न दंडं दातुमर्हति। तथा॥ चणकव्रीहि
गोधूमयवानां मुद्गमाषयोः। अनिषिद्धैर्गृहीतव्यो मुष्टिरेकः पथि स्थितैः। तथैव सप्तमे भक्तानि षडनश्नता। अश्व
स्तनविधानेन हर्तव्यं हीनकर्मण इति। अचौरस्यापि चौरोपकारिणो दंडमाह। भक्तावकाशाग्न्युदकमंत्रोपकर १३६

भ्रते

णव्ययान्दत्वा चौरस्य वा हंतुर्जानतो दम उत्तमः। भक्तमशनं। अवकाशो निवासस्थानं। अग्निश्चौरस्य शीतापनोदाद्य
र्थः। उदकं तत्पिपासायां। मंत्रश्चौर्यप्रकारोपदेशः। उपकरणं चौर्यसाधनं। व्यय अपहारार्थदेशांतरं गंतुः पाथेयं। ए
तानि चौरस्य हंतुर्वा दुष्टत्वं जानन्नपि यः प्रयच्छति। तस्योत्तमसाहसो दंडः। चौरोपेक्षिणामपि दोषः॥ शक्ता ह्यप्युपेक्ष
ते ते पि तद्दोषभागिन इति॥ नारदस्मरणात्। किंच। शस्त्रावपाते गर्भस्य पातने चोत्तमो दमः। उत्तमो वाधमो वापि पुरु
षस्त्रीप्रमापणे। परगात्रेषु शस्त्रस्यावपातने दासी ब्राह्मणगर्भव्यतिरेकेण गर्भपातने चोत्तमो दमः॥ दासीगर्भनि
पातने तु दासीगर्भविनाशकृदित्यादिना शतदंडोऽभिहितः॥ ब्राह्मणगर्भमविज्ञान मित्यत्र ब्राह्मणहत्यातिदेशं वक्ष्य
ति। पुरुषस्य स्त्रिया वा प्रमापणे शीलवृत्ताद्यपेक्षयोत्तमो वा अधमो वा दंडो बोध्यः॥ अपि च। विप्रदुष्टां स्त्रियं चैव पुरु
षघ्नीमगर्भिणीं। सेतुभेदकरीं चाप्सु शिलां बद्ध्वा प्रवेशयेत्। विशेषेण प्रदुष्टां विप्रदुष्टां। भ्रूणघ्नी स्वगर्भपातिनी। च या
च पुरुषस्य हंत्री सेतूनां भेत्री च। एतागर्भरहिताः स्त्रीर्गले बद्धशिलामप्सु प्रवेशयेद्यथा न प्लवंते। किंच। विषाग्निदां पतिगुरु
निजापत्यप्रमापणीं॥ विकर्णकरनासौष्ठीं कृत्वा गोभिः प्रमापयेत्। अगर्भिणीमित्यनुवर्तते। या परवधार्थमन्नपानादिषु वि
षं ददाति क्षिपति या च दाहार्थं ग्रामादिष्वग्निं। तथा या च निजपतिगुर्वपत्यानि मारयति तां छिन्नकर्णकरनासौष्ठीं कृत्वा

ध्वा व्यवस्थितो वेदित

दीनैर्दुष्टबलीवर्द्दैः प्रवास्यमारयेत् स्तेयप्रकरणे यदेतत्साहसिकस्य दंडविधानं तत्साधारणमिति मंतव्यं। अविज्ञातक
१३७ र्तृके हननेहंतृज्ञानोपायमाह। अविज्ञातहतस्याशु कलहं सुतबांधवाः॥ प्रष्टव्या योषितश्चास्य परपुंसिरताः पृथक्॥
अविज्ञातपुरुषेण घातितस्य संबंधिनः सुताः प्रत्यासन्नाश्च बांधवाः केनास्य कलहो जात इति कलहमाशु प्रष्टव्याः तथा
मृतस्य संबंधिन्यो योषितो याश्च परपुंसि रताः व्यभिचारिण्यस्ता अपि प्रष्टव्याः॥ कथं प्रष्टव्या इत्याह स्त्रीद्रव्यवृत्तिका
मो वा केन वायं गतः सह। मृत्युदेशसमासन्नं पृष्ट्वापि जनं शनैः॥ किमयं स्त्रीकामो द्रव्यकामो वृत्तिकामो वा त
थाकस्यां किं संबंधिन्यां वा स्त्रियामस्य रतिरासीत् कस्मिन् द्रव्ये वा प्रीतिः कुतो वा वृत्तिकामः केन वा सह देशांतरं गतः
इति नानाप्रकारं व्यभिचारिण्यो योषितः पृथक् पृथग् विश्वास्य प्रष्टव्या तथा मरणदेशनिकटवर्त्तिनः गोपाः रवि
काद्याः ये जनास्ते पि विश्वासपूर्वकं प्रष्टव्याः॥ एवं नानाप्रकारैः प्रश्नैर्हंतारं निश्चित्य तदुचितो दंडो विधातव्यः॥ किंच।
क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः॥ राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना। क्षेत्रं पक्वफलसस्योपे
तं वेश्म गृहं वनमटवी क्रीडावनं च ग्रामं। विवीतमुक्तलक्षणं। खलं। धान्यदहनीयं राजपत्नीमभिगच्छति ता
न्सर्वान् कटैर्वीरणमयैर्वेष्टयित्वा दहेत् क्षेत्रादिदाहकानां मारणदंडप्रसंगादिदं विधानं। इति स्तेयप्रकरणं। स्त्रीसं १३८

ग्रहणाख्यं विवादपदं व्याख्यायते। प्रथमसाहसादिदंडप्राप्त्यर्थं त्रेधा तत्स्वरूपं व्यासेन विवृतं त्रिविधं तत्समाख्यातं प्रथ
मं मध्यमोत्तमं। अदेशकालभाषाभिर्निर्जने च परस्त्रियाः कटाक्षावेक्षणं हास्यं प्रथमं साहसं स्मृतं। प्रेषणं गंधमाल्यानां धू
पभूषणवाससां॥ प्रलोभनं चान्नपानैर्मध्यमं साहसं स्मृतं। सहासनं विविक्ते तु परस्परमुपाश्रयः। केशाकेशिग्रह
श्चैव सम्यक्संग्रहणं स्मृतं। स्त्रीपुंसयोर्मिथुनीभावः संग्रहणं। संग्रहणज्ञानपूर्वकत्वात्तत्कर्तुर्दंडविधानस्य तज्ज्ञा
नोपायं तावदाह पुमान्संग्रहणे ग्राह्यः केशाकेशि परस्त्रियाः। सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा॥ संग्र
हणे प्रवृत्तः पुमान् केशाकेश्यादिभिर्लिंगैर्ज्ञात्वा गृहीतव्यः। परस्परकेशग्रहणपूर्विका क्रीडा केशाकेशि। तत्र तेनेद
मिति सरूपइतिवदु ग्रीहोमनि द्व कर्मव्यतिहार इति समासांत इच् प्रत्ययः अव्ययत्वाच्च लुप्त तृतीया विभक्तिः तत्रश्चा
यमर्थः परभार्यया सह केशाकेशि क्रीडनेनाभिनवैः करुहदशनादिकृतव्रणैः रागकृतैर्लिंगैर्द्वयोः संप्रतिपत्त्या
वा ज्ञात्वा संग्रहीतव्यः परस्त्रीग्रहणं नियुक्तावरुद्धादिनिरासार्थं। किंच। नीवीस्तनप्रावरणसक्थिकेशावमर्श
नं। अदेशकालसंभाषं सहैकस्थानमेव च। यः पुनः परदारपरिधानग्रंथिप्रदेश कुचप्रावरणजघनमर्द्दरुहादिस्पर्श
नं साभिलाष इवाचरति। तथा देशे निर्जने जनताकीर्णे वांधकाराकुले काले। संलापं करोति परनार्या वा सहैक

१३८ मंचकादेरिरंसया वा वतिष्ठते। सोपि संग्रहणे प्रवृत्तो ज्ञातव्यः एतच्च शंक्यमानदोषपुरुषविषयमन्यस्य न दोषः यथाह
मनुः। यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणात्। न दोषं प्राप्नुयात् किंचिन्न हि तस्य व्यतिक्रम इति यः परस्त्रियास्पृ
ष्टः क्षमते सोपि प्राप्यासंग्रह इति तेनैवोक्तं। स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया॥ परस्परस्यानुमते सर्वं संग्रह
णं स्मृतमिति। यश्च ममेयं विदग्धा स्मरूद्भिन चरेति श्लाघया भुजंगजनसमक्षं रक्षापयत्यसावपि प्राप्नुयादिति ते
नैवोक्तं दर्पाद्वा यदि वा मोहात् श्लाघया वा स्वयं वदेत्। पूर्वं मयेयं भुक्तेति तत्र संग्रहणं स्मृतमिति। प्रतिषिद्धयोः
स्त्रीपुंसयोः पुनः संलापादिकरणे दंडमाह। स्त्री निषेधे शतं दद्याद्द्विशतं तु दमं पुमान्। प्रतिषेधे तयोर्दंडो यथा सं
ग्रहणे तथा। प्रतिषिध्यत इति प्रतिषेधः पतिपित्रादिभिर्येन सह संभाषणादिकं निषिद्धं तत्र प्रवर्तमाना स्त्री शत
पणं दंडं दद्यात्। पुरुषः पुनरेवं निषेधे प्रवर्तमानो द्विशतं दद्यात्। द्वयोस्तु स्त्रीपुंसयोः प्रतिषिद्धप्रवर्तमानयोः संग्रहणे
संभोगे वर्णानुसारेण यो दंडो वक्ष्यते स एव विज्ञेयः। एतच्च चारणादिभार्याव्यतिरेकेण। नैष चारणदारेषु विधिर्ना
त्मोपजीविषु। सज्जयंति हि ते नारीर्निगूढाश्चारयंति चेति मनुस्मरणात्। तदानीं संग्रहणे दंडमाह। सजातावुत्तमो दं
डः आनुलोम्ये तु मध्यमः। प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनं। चतुर्णामपि वर्णानां बलात्कारेण सजातीयगु १३८

प्तपरदाराभिगमने साशीतिपणसहस्रं दंडनीयः। यदा त्वानुलोम्येन हीनवर्णां स्त्रियमगुप्तामभिगच्छति तदा मध्यमसाह
सं दंडनीयः। यदा पुनः सवर्णामगुप्तामानुलोम्येन सुगुप्तां वा व्रजति तदा मानवे विशेषोऽभिहितः। सहस्रं ब्राह्मणो दंड्यो गु
प्तां विप्रां बलाद्व्रजन्। शतानि पंच दंड्यः स्यादिच्छंत्या सह संगतः। तथा सहस्रं ब्राह्मणो दंडं दाप्यो गुप्ते तु ते व्रजन्। शूद्रायां
क्षत्रियविश्योः सहस्रं तु भवेद्दम इति। एतच्च गुरुसखिभार्यादिव्यतिरेकेण द्रष्टव्यं। माता मातृष्वसा श्वश्रूर्मातुलानी
पितृष्वसा पितृव्यसखिशिष्यपत्नी भगिनी तत्सखी स्नुषा। दुहिताचार्यभार्या च सगोत्रा शरणागता। राज्ञी प्रव्रजि
ता धात्री साध्वी वर्णोत्तमा च या। आसामन्यतमां गच्छन् गुरुतल्पग उच्यते। शिश्नस्योत्कर्तनात्तत्र नान्यो दंडो विधीयत
इति नारदस्मरणात्। प्रातिलोम्ये उत्कृष्टवर्णस्त्रीगमने क्षत्रियादेः पुरुषस्य वधः। एतच्च गुप्ताविषयमन्यत्र तु धनदं
डः। उभावपि हि तावेव ब्राह्मण्या गुप्तया सह। विप्लुतौ शूद्रवद्दंड्यौ दग्धव्यौ वा कटाग्निना। ब्राह्मणीं यद्यगुप्तां तु सेवे
तां वैश्यपार्थिवौ। वैश्यं पंचशतं कुर्यात् क्षत्रियं तु सहस्रिणमिति मनुस्मरणात्। शूद्रस्य पुनर्गुप्तामुत्कृष्टवर्णां स्त्रियं
व्रजतो लिंगच्छेदः सर्वस्वापहारो। गुप्तां तु व्रजतस्तस्य वधः सर्वस्वापहारश्चेति तेनैवोक्तं। शूद्रो गुप्तमगुप्तं वा द्वैजातं व
र्णमावसन्। अगुप्ते अंगसर्वस्वाद्गुप्ते सर्वेण हीयत इति॥ नार्याः पुनर्हीनवर्णं व्रजंत्याः कर्णयोरादिग्रहणान्नासा

१३९ देश्च कर्तनं। आनुलोम्येन वा सवर्णा वा व्रजेत्स्या दंडः कल्प्यः अयं च वधाद्युपदेशो राजन्यादिव्रात्यस्यैव पालनाधिकाराच्च द्विजाति
मात्रस्य। ब्राह्मणः परीक्षार्थमपि शस्त्रं नाददीतेति शस्त्रग्रहणनिषेधात्। यदा तु राज्ञो निवेदने कालविलंबनेन कार्य्याति
पाताशंका तदा स्वयमेव जारादीन्हन्यात्। शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते। तथा। नाततायिवधे दोषो हंतुर्भव
ति कश्चन। प्रकाशं वाप्रकाशं वा मन्युस्तं मन्युमृच्छतीति शस्त्रग्रहणात्। अनुलोमानां च। तथा क्षत्रियवैश्ययोरन्योन्यस्त्र्यभि
गमने यथाक्रमं सहस्रपंचशतपणात्मको दंडो वेदितव्यो। तदाह मनुः वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्।
यो ब्राह्मण्यामगुप्तायां तावुभौ दंडमर्हतः। पारदार्यप्रसंगात्कन्यायामपि दंडमाह। अलंकृतां हरन्कन्यामुत्तमं त्वन्य
थाधमं। दंडं दद्यात्सवर्णासु प्रातिलोम्ये वधः स्मृतः। विवाहाभिमुखीं तामलंकृतां सवर्णां कन्यामपहरन्नुत्तमं सा
हसं दंडनीयः तदनभिमुखीं सवर्णां हरन्प्रथमं साहसं उत्कृष्टवर्णजां कन्यामपहरतः पुनः क्षत्रियादेर्वध एव। दंडवि
धानाच्चापहर्तृसकाशाद्विधान्यस्मै देयेति गम्यते। आनुलोम्यापहरणे दंडमाह। सकामास्वनुलोमासु न दोषो
स्त्वन्यथाधमः। यदि सानुरागां हीनवर्णां कन्यामपहरति तदा दोषाभावान्न दंडः। अन्यथा त्वनिच्छतीमपहरतः प्र
थमसाहसो दंडः। कन्यादूषणे दंडमाह। दूषणे तु करच्छेद उत्तमायां वधस्तथा। अनुलोमास्वित्यनुवर्तते यद्यकामां क १३९

न्यां बलात्कारेण नखक्षतादिना दूषयति तदा तस्य करच्छेदः कर्तव्यः। यदा पुनस्तामेवांगुलिप्रक्षेपेण योनिक्षतं कुर्वन्दूष
यति तदा मनूक्तषट्शतसहितोंगुलिच्छेदः॥ अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः तस्याशु कर्त्ये अंगुल्यौ दंडं चा
र्हति षट्शतमिति॥ यदा पुनः सानुरागां पूर्ववत् दूषयति तदा पित्रैनैव विशेष उक्तः। सकामां दूषयंस्तुल्यो नांगुलिच्छे
दमर्हतीति। द्विशतं तु दमं दाप्यः प्रसंगविनिवृत्तये इति। यदा तु कन्यैव कन्यां दूषयति विदग्धा वा तत्रापि विशेषः। तेनैव
विशेष उक्तः॥ कन्यैव कन्यां या कुर्यात्तस्याः स्याद्द्विशतो दमः। या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौंड्यमर्हतीति। अंगुल्यो
रेव विच्छेदः खरेणोद्वहनं तथेति। कन्यां कुर्यादिति कन्यां योनिक्षतवतीं कुर्यादित्यर्थः। यदा पुनरुत्कृष्टजातीयां कन्या
मविशेषात्सानुरागामकामां वाभिगच्छति तदा हीनस्य क्षत्रियादेर्वधः॥ उत्तमां सेवमानस्तु जघन्यो वधमर्हतीति म
नुस्मरणात्। यदा सकामां सवर्णामभिगच्छति। तदा गोमिथुनं शुल्कं तत्पित्रे दद्यात् यदीच्छति पितेति। शुल्कमनिच्छति
दंडरूपेण तदेव राज्ञे दद्यात्॥ वर्णामकामां तु गच्छतो वध एव यथा तदाह मनुः। शुल्कं दद्यात्सेवमानः समामिच्छेत्पि
ता यदि। योऽकामां दूषयेत्क स सद्यो वधमर्हति। सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नर इति। किं चाज्ञातं स्त्रीदूष
णे दद्याद्धेतुमिथ्याभिशंसिने पनृगलं छन्ते तदाप्यो हीनां स्त्रीगां च मध्यमं स्त्रीत्वादेन प्रकृतत्वात् कन्यावमस्यते।

१४० तस्यां यदि कश्चिद्विद्यमानानेवोपस्माारराजयक्ष्मादिदीर्घकुत्सितरोगसंसृष्टमैथुनत्वादिदोषान्प्रकाश्येयमकन्येति दू
षयत्यसौ शतं दाप्यः॥ मिथ्याभिशंसने पुनरविद्यमानदोषाविष्कारेण दूषणे द्वे शते दाप्यः॥ गोव्यतिरिक्तपशुगमने तु
शतं दाप्यः॥ यः पुनर्हीनां स्त्रियमंत्यावसायिनीमविशेषात्सकामामकामां वाभिगच्छत्यसौ मध्यमसाहसं दंडनीयः।
साधारणस्त्रीगमने दंडमाह। अवरुद्धासु दासीषु भुजिष्यासु तथैव च। गम्यास्वपि पुमान्दाप्यः पंचाशत्पणिकं दमं।
गच्छन्नित्यनुवर्तते। उक्तलक्षणा वर्णस्त्रियो दास्यः ता एव स्वामिना शुश्रूषाहानिम्युदासार्थं। गृह एव स्थातव्यमि
त्येवं पुरुषांतरोपभोगतो निरुद्धाः अवरुद्धाः पुरुषनियतपरिग्रहाः भुजिष्याः यदा दास्योवरुद्धा भुजिष्या वा भवेयुस्त
दासु तथा च शब्दाद्वेश्या स्वैरिणी नामापि साधारणस्त्रीणां भुजिष्याणां ग्रहणं। तासु च सर्वपुरुषसाधारणतया
गम्यास्वपि गच्छन्पंचाशत्पणं दंडं दंडनीयः परपरिग्रहीतत्वेन तासां परदारतुल्यत्वात्। एतच्च स्पष्टमुक्तं नार
देन। स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च या। गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः। आस्वेव तु भु
जिष्यासु दोषः स्यात्परदारवत्। गम्यास्वपि हि नोपेया यतः परपरिग्रहा इति। निष्कासिनी स्वाम्यनवरुद्धा दासी॥ ननु
च स्वैरिण्यादीनां साधारणतया गम्यत्वाभिधानमयुक्तं। न हि जातितः शास्त्रतो वा काश्चन लोके साधारणस्त्रियः १४०

DR. BHAU DAJI MEMORIAL

पलभ्यंते। तथा हि स्वैरिण्यो दास्यश्च ता वर्णस्त्रिय एव स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत्॥ वर्णानामानुलो
म्येन दास्यं न प्रतिलोमत इति स्मरणात्। न च वर्णस्त्रीणां पत्यौ जीवति मृते वा पुरुषांतरोपभोगो घटते दुःशीलः का
मवृत्तो वा गुणैर्वा परिवर्जितः। परिचर्यः स्त्रिया साध्व्या सततं देववत्पतिः॥ कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः।
न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य त्विति निषेधस्मरणात्॥ नापि कन्यावस्थायां साधारणत्वं। पित्रादिपरि
रक्षितायाः कन्यायाः एव दानोपदेशात्तदभावेपि तस्या विधाया एव स्वयंवरोपदेशात्॥ न च दासीभावात्स्वधर्मा
धिकारच्युतिः॥ पारतंत्र्यं हि दास्यं न स्वधर्मपरित्यागः। नापि वेश्या साधारणी वर्णानुलोमजत्वव्यतिरेकेण गम्यजा
त्यंतराऽसंभवात्। तदंतःपातित्वेन पूर्ववद्वेश्या गम्यत्वं प्रतिलोमजत्वे तु तासां नितरामगम्यत्वमतः पुरुषांतरोपभो
गे तासां निंदितकर्माभ्यासेन पातित्यात्पतितसंसर्गस्य च निषिद्धत्वाच्च न सकलपुरुषोपभोगयोग्यत्वं। सत्य
मेवं किं त्वत्र स्वैरिण्याद्युपभोगे पित्रादिरक्षकराजदंडभयादिदृष्टदोषाभावाद्गम्यत्ववाचोयुक्तिः दंडाभाव
श्चावरुद्धासु दासीष्विति नियतपुरुषपरिग्रहोपाधितो दंडविधानात्तदुपाधिरहितास्वर्थादवगम्यते। स्वैरि
ण्यादीनां पुनर्दंडाभावो विधानाभावात्कन्यां भजतीमुत्कृष्टं न किंचिदपि दापयेदिति लिंगदर्शनाच्चावगम्यते।

१४१ प्रायश्चित्तं तु स्वधर्मस्खलननिमित्तं गम्यानां गमनं चाविशेषाद्भवत्येव। यत्तु न वेश्यानां जात्यंतरासंभवेन वर्णांतः
पातित्वमनुमानादुक्तं वेश्याः वर्णानुलोम्याद्यंतःपातिन्यो मनुष्यजात्याश्रयत्वाद्ब्राह्मण्यादिवदिति। तन्न। कुंडगोल
कादिभिरनैकांतिकत्वात्। अतो वेश्याख्या काचिज्जातिरनादिर्वैश्यायामुत्कृष्टजाते स्समानजातेर्वा पुरुषादुत्पन्ना
पुरुषसंभोगवृत्तिर्वेश्येति ब्राह्मण्यादिवल्लोकप्रसिद्धिबलेनाभ्युपगन्तव्या न च निर्मूलेयं प्रसिद्धिः। स्मर्यते हि स्कं
दपुराणे। पंचचूडा नाम काश्चनाप्सरसस्तत्संततिर्वेश्याख्या पंचमी जातिरिति। अनन्यासां नियतपुरुषपरिण
यनविधिविधुरतया समानोत्कृष्टजातिपुरुषाभिगमनेनादृष्टदोषो नापि दंडस्तासु चानावरुद्धासु गच्छतां पुरु
षाणां यद्यपि न दंडस्तथाप्यदृष्टदोषोस्त्येव। स्वदारनिरतः सदेति नियमात्। एवं च वेश्याभिगमने प्राजापत्यं वि
धीयत इति। प्रायश्चित्तस्मरणाच्चेति निरवद्यं। अवरुद्धासु दासीषु नित्यमनेन दासीस्वैरिण्यादिभुजिष्याभिगमे दं
डं विदधता स्वभुजिष्यासु दंडो नास्तीत्यर्थादेवोक्तं। तस्यापवादमाह। प्रसह्य दास्यभिगमे दंडो दशपणस्मृतः। ब
हूनां यद्यकामासौ चतुर्विंशतिकः पृथक्। पुरुषसंभोगजीविकासु दासीस्वैरिण्यादिषु शुल्कदानविरहेण प्रबला
त्कारेणाभिगच्छतो दशपणो दंडः। यदि बहव एकामनिच्छंतीं बलात्कारेणाभिगच्छंति तर्हि प्रत्येकं चतुर्विंशतिप १४१

णपरिमितं दंडं दंडनीयाः। यदा पुनस्तदिच्छया भाटिं दत्वा पश्चादनिच्छंतीमपि बलाद्गच्छंति तदा तेषामदोषः। यदि व्या
ध्याद्युपनिबंधस्तस्या न स्यात्। व्याधिता सश्रमा व्यग्रा राजकर्मपरायणा। आमंत्रिता चेन्नागच्छेदद्दंड्या वडवा स्मृ
तेति। नारदस्मरणात्। किंच। गृहीतवेतना वेश्या नेच्छंती द्विगुणं वहेत्। अगृहीते समं दाप्यः पुमानप्येवमेव च। यदा
अर्थ तु शुल्कं गृहीत्वा स्वस्यापि पतिं नेच्छति तदा शुल्कं द्विगुणं दद्यात्। तथा शुल्कं दत्वा स्वयमनिच्छतः स्वस्य पुंसः शु
ल्कहानिरेव। शुल्कं गृहीत्वा पण्यस्त्री नेच्छंती द्विगुणं वहेत्। अनिच्छन् दत्तशुल्कोपि शुल्कहानिमवाप्नुयादिति तेनैवो
क्तं। तथान्योपि विशेषस्तेनैव दर्शितः। अप्रयच्छंस्तथा शुल्कमनुभूय पुमान् स्त्रियं। अक्रमेण च संगच्छन् घातदंतन
खादिभिः। अयोनौ वाभिगच्छेद्यो बहुभिर्वापि वासयेत्। शुल्कमष्टगुणं दाप्यो विनयं तावदेव तु। वेश्याः प्रधाना या
स्तत्र कामुकास्तद्गृहोषिताः। तत्समुत्थेषु कार्येषु निर्णयं संशये विदुरिति। किंच। अयोनौ गच्छतो योषां पुरुषं वा
पि मेहतः। चतुर्विंशतिको दंडस्तथा प्रव्रजितागमे। यस्तु स्वयोषां मुखादावभिगच्छति पुरुषं वाभिमुखो मेहति त
था प्रव्रजितां वाभिगच्छति सो चतुर्विंशतिपणान् दंडनीयः। किंच। अंत्याभिगमने त्वंक्यः कुबंधेन प्रवासयेत्। शूद्र
स्तथांत्य एव स्यादंत्यस्यार्यागमे वधः। अंत्या चांडालीतद्गमने त्रैवर्णिकाः प्रायश्चित्तानभिमुखाः सहस्रांकं

१४२ जस्त्विय मिति मनुस्मरणात्। पण सहस्रं दंडयित्वा कुबंधेन कुत्सितबंधेन भगाकारेणांकयित्वा स्वराष्ट्रान्निर्वास
येत्। प्रायश्चित्ताभिमुखस्य पुनर्दंडनमेव। शूद्रः पुनश्चांडाल्यभिगमने ऽन्त्यज एव चांडाल एव भवति। अंत्यज
स्य पुनश्चांडालादेरुत्कृष्टजातिस्त्र्यभिगमे वध एव॥ ॥इति स्त्रीसंग्रहणप्रकरणं॥ ॥व्यवहारप्रकारप्रक
रणमध्ये स्त्रीपुंसयोगाख्यमपरं विवादपदं मनुनारदाभ्यां विवृतं। तत्र नारदः। विवाहादिविधिः स्त्रीणां यत्र
पुंसां च कीर्त्यते। स्त्रीपुंसयोगसंज्ञं तद्विवादपदमुच्यते। इति मनुरप्याह। अस्वतंत्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवा
निशं। विषयेषु च सज्जंत्यः संस्थाप्या आत्मनो वशे इत्यादि। यद्यपि स्त्रीपुंसयोः परस्परस्यमर्थितया प्रत्यर्थितया
नृपसमक्षं व्यवहारो निषिद्धः। तथापि प्रत्यक्षेण कर्णपरंपरया वा विदितेन तयोः परस्पराभिचारे दंडादिना दंप
ती निजधर्ममार्गे राज्ञा स्थापनीयौ इतरथा दोषभाग्भवतीति व्यवहारप्रकरणे राजधर्ममध्ये स्त्रीपुंसधर्म
जातस्योपदेशः। एतच्च विवाहप्रकरणे सविस्तरं प्रपंचं प्रतिपादितमिति योगीश्वरेण न पुनरत्रोक्तं। सांप्रतं प्रकी
र्णकाख्यं विवादपदं प्रस्तूयते। तल्लक्षणं च कथितं नारदेन॥ प्रकीर्णके पुनर्ज्ञेया व्यवहारा नृपाश्रयाः। राज्ञामाज्ञा
प्रतीघातस्तत्कर्मकरणं यथा॥ पुरप्रदानं संभेदः प्रकृतीनां तथैव च। पाषंडिनैगमश्रेणिगणधर्मविपर्ययाः॥ पि १४२

तापुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः। प्रतिग्रहविलोपश्च कोप आश्रमिणामपि। वर्णसंकरदोषश्च तद्वृत्तिर्नियमस्तथा
।नदृष्टं यच्च पूर्वेषु सर्वं तत्स्यात्प्रकीर्णकं इति। प्रकीर्णके विवादपदे ये विवादाः राजाज्ञोल्लंघन तदाज्ञाकरणादि
विषयास्ते नृपसमवायिनः। नृप एव तत्र स्मर्तावा रव्यापेतमार्गे वर्तमानानां प्रतिकूलतामास्थाय व्यवहार
निर्णयं कुर्यात्। एवं वदता योन्नृपाश्रयो व्यवहारः स प्रकीर्णकमित्यर्थाल्लक्षितं भवति। तत्रापराधविशेषे
णदंडविशेषमाह॥ न्यूनं वाप्यधिकं वापि लिखेद्यो राजशासनं। पारदारिकचौरं वा मुंचतो दंड उत्तमः। राजदत्त
भूमेर्निबंधस्य वा परिमाणान्न्यूनत्वमाधिक्यं वा प्रकाशयन् राजशासनं यो लिखति यश्च पारदारिकं चौरं वा
गृहीत्वा राज्ञे ऽनर्पयित्वा मुंचति तावुभावुत्तमसाहसं दंडनीयौ॥ प्रसंगात् नृपाश्रयव्यतिरिक्तव्यवहारविषय
मपि दंडमाह। अभक्षेण द्विजं दूष्यं दंड्य उत्तमसाहसं। मध्यमं क्षत्रियं वैश्यं प्रथमं शूद्रमर्धकं। मूत्रपुरीषादिना
भक्ष्यानर्हेणान्नपानादिमिश्रेण स्वरूपेण वा ब्राह्मणं दूषयित्वा खादयित्वोत्तमसाहसं दंड्यो भवति। क्षत्रियं
पुनरेवं दूषयित्वा मध्यमं। वैश्यं दूषयित्वा प्रथमं। शूद्रं दूषयित्वा प्रथमसाहसस्यार्धं दंड्यो भवतीति संबंधः॥ ल
शुनाद्यभक्ष्यदूषणे तु दोषतारतम्याद्दंडतारतम्यमूहनीयं। किंच। कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी।

१४३ अंगहीनश्चकर्तव्योदाप्यश्चोत्तमसाहसं।सम्वेधापापादितवर्णोत्कर्षैःकूटैःसुवर्णैर्व्यवहारशीलोयःस्वर्णका
रादिर्यश्चविमांसस्यकुत्सितमांसस्यश्वादिसंबंधस्यविक्रयशीलःसौनिकादिःचशब्दात्कूटरजतादिव्यवहारी
चतेसर्वेप्रत्येकंनासाकर्णकरैस्त्रिभिरंगैर्हीनाःकार्याः।चशब्दात्अंगच्छेदेनसमुच्चितमुत्तमसाहसंदंडंदाप्याः।यस्तु
मनुनोक्तं।सर्वकंटकपापिष्ठंहेमकारंतुपार्थिवः।प्रवर्तमानमन्यायेछेदयेल्लवशःक्षुरैरिति।तद्देवब्राह्मणराजस्वर्णविष
ये।।विषयविशेषेदंडाभावमाह।चतुष्पादकृतोदोषोनापेहीतिप्रजल्पतः।काष्ठलोष्ठेषुपाषाणबाहुयुग्यकृतस्तथा।।च
तुष्पादैर्गोगजादिभिःकृतोयोदोषोमनुष्यमारणादिरूपःसोगवादिस्वामिनोनभवतिअपसरेतिप्रकर्षेणोच्चैर्भाषमाण
स्यतथालकुटलोष्टसायकपाषाणोत्क्षेपणेनबाहुनायुग्येनचयुगंवहताश्वादिनाकृतोयःपूर्वोक्तोदोषःसोपिकाष्ठा
दीन्यास्यतोभवत्यपसरेतिप्रजल्पतः।काष्ठाद्युत्क्षेपणेचहिंसायांदोषाभावकथनंदंडाभावप्रतिपादनार्थंप्रायश्चित्तंपुन
रबुद्धिपूर्वककरणनिमित्तमस्त्येव।काष्ठादिग्रहणंचकुन्ततोमरादेरुपलक्षणार्थं।किंच।।छिन्ननस्येनयानेनतथा
भग्नयुगादिना।।पश्चाच्चैवापसरताहिंसनेस्वाम्यदोषभाक्।।नसिभवारज्जुर्नस्याछिन्नानस्याशकटादियुक्तबलीवर्दनस्या
रज्जुर्यस्मिन्यानेतच्छिन्ननस्यंशकटादि।तेनतथाभग्नयुगेनआदिग्रहणाद्भग्नाक्षचक्रादिनाचयानेनपश्चादपसरतो १४३

मोषायोजोत इतिप्रसिद्धं   सारथिः

पसरता।चशब्दात्तिर्यग्गच्छताप्रतिमुखंचागच्छताचमनुष्यादिहिंसनेस्वामीप्राजकोवादोषभाग्नभवतिअतस्तत्प्रयत्नज
नितत्वाद्धिंसनस्य।तथाचमनुः।छिन्ननस्येभग्नयुगेतिर्यक्प्रतिमुखागते।अक्षभंगेचयानस्यचक्रभंगेतथैवच।छेदने
चैवयंत्राणांयोक्त्ररश्म्योस्तथैवच।आक्रंदेचाप्यपैहीतिनदंडंमनुरब्रवीदिति।उपेक्षायांस्वामिनोदंडमाह।शक्तोप्यमो
क्षयन्स्वामीदंष्ट्रिणांशृंगिणांतथा।।प्रथमंसाहसंदद्याद्विक्रुष्टेद्विगुणंतथा।।अप्रवीणप्राजकनियोजननिमित्तकप्रेरि
तैर्दंष्ट्रिभिर्गजादिभिःशृंगिभिर्गवादिभिर्वध्यमानंसमर्थोपिस्वामीयद्यमोक्षयन्नुपेक्षतेतदाकुशलप्राजकनियोज
ननिमित्तंप्रथमसाहसंदंडंदद्यात्।यदातुमारितोहमित्याक्रुष्टोपिनमोक्षयतितदाद्विगुणंयदापुनःप्रवीणमेव
प्राजकंप्रेरयतितदाप्राजकएवदंड्योनस्वामी।यथाहमनुः।प्राजकश्चेद्भवेदाप्तःप्राजकोदंडमर्हतीति।।प्राजकोयंता
आप्तोभियुक्तः।प्राणिविशेषाच्चदंडविशेषःकल्पनीयः।यथाहमनुः।मनुष्यमारणेक्षिप्रंचोरवत्किल्बिषीभवेत्।प्रा
णभृत्सुमहत्स्वर्धंगोगजोष्ट्रहयादिषु।।क्षुद्रकाणांपशूनांतुहिंसायांद्विशतोदमः।पंचाशत्तुभवेद्दंडःशुभेषुमृगपक्षिषु
।गर्दभाजाविकानांतुदंडःस्यात्पंचमाषकः।माषकस्तुभवेद्दंडःश्वशूकरनिपातनेइति।किंच।जारंचोरेत्यभिवदन्दाप्यः
पंचशतंदमं।उपजीव्यधनंमुंचंस्तदेवाष्टगुणीकृतं।।स्वंवंशकलंकभयात्।जारंपारदारिकंचोरनिर्गच्छेत्यभिवदन्स्वचश

१४४ तेषणानांपंचशतानियस्मिन्ऽमेसतयोक्तस्तेदमंदाप्यः॥यःपुनर्जारहस्ताद्धनमुपजीव्योलोकोचरूपेणगृहीत्वाजारंमु
चतिअसौयावद्गृहीतंतावदष्टगुणीकृतंदंडंदाप्यःकिंच।राज्ञोनिष्टप्रवक्तारंतथैवाक्रोशकारिणं।तन्मंत्रस्यचभे
त्तारंछित्वाजिह्वांप्रवासयेत्।राज्ञोनिष्टस्यानभिमतस्याभिशस्तोत्यादेःप्रकर्षेणाऽसोभयोवक्तारंतथैवराज्ञआक्रोश सत्वा:
कारिणं।निंदाकरणशीलंतदीयस्यचमंत्रस्यस्वराष्ट्रविवृद्धिहेतोःपरराष्ट्रपक्षक्षयकारस्यचाभेत्तारंअमित्रकर्णेषुज
पंतंतस्यजिह्वामुत्कृत्यस्वराष्ट्रान्निष्काशयेत्।कोशापहरणादौपुनर्वधएव।राज्ञकोशापहर्तृश्चप्रतिकूलेषुवस्थि
तान्घातयेद्विविधैर्दंडैररीणांचोपजापकान्।इतिमनुस्मरणात्।विविधैःसर्वस्वापहारेपियद्यस्यजीवनोप
करणंतन्नापहर्तव्यंचौर्योपकरणंविना।यथाहनारदः।आयुधान्यायुधीयानांवास्यादीन्वाद्युजीविनां।वेश्या
स्त्रीणामलंकारान्वाद्यतोद्यादितद्विदां।यच्चयस्योपकरणंयेनजीवतिकारुकाः॥सर्वस्वहरणेप्येतन्नराजाहर्तुम
र्हतीति।ब्राह्मणस्यपुनर्नशारीरोब्राह्मणोदंडइतिनिषेधात्।वधस्थानेशिरोमुंडनादिकंकर्तव्यं।ब्राह्मणस्यवधोमौड्यं
पुरान्निर्वासनांकने।ललाटेचाभिशस्तांकःप्रयाणंगर्दभेनचेति।मनुस्मरणात्।किंच।मृतांगलग्नविक्रेतुर्गुरोस्ताड
यितुस्तथा।राजयानासनारोढुर्दंडउत्तमसाहसः।मृतशरीरसंबंधिनोवस्त्रपुष्पादेर्विक्रेतुर्गुरोःपित्राचार्यादेस्ताडयितुस्त १४४

था।राजानुमतिंविनातद्यानंगजाश्वादिआसनंसिंहासनादिआरोहतश्चोत्तमसाहसोदंडः।किंच।द्विनेत्रभेदिनोराज
द्विष्टादेशकृतस्तथा।विप्रत्वेनचशूद्रस्यजीवतोष्टशतोदमः।यःपुनःक्रोधादिनापरस्यनेत्रद्वयंभिनत्तियश्चज्योतिःशा
स्त्रविद्गुर्वादिहितेष्वप्युपतिरिक्तोराज्ञोद्विष्टमनिष्टंसंवत्सरांतेनवराज्यच्युतिर्भविष्यतीत्यादिरूपमादेशंकरोतितथा
यःशूद्रोभोजनार्थंयज्ञोपवीतादिब्राह्मणलिंगानिदर्शयतितेषामष्टशतोदमः।अष्टोपणशतानियस्मिन्ऽमेसतथो
क्तः।श्राद्धभोजनार्थंपुनःशूद्रस्यविप्रवेषधारिणस्तप्तशलाकयायज्ञोपवीतवत्पृष्ठालिखेदिति।स्मृत्यंतरेणोक्तंद्र
ष्टव्यं।वृत्त्यर्थंतुयज्ञोपवीतादिब्राह्मणलिंगधारिणोवधएव।द्विजातिलिंगिनःशूद्रान्घातयेदितिस्मरणात्।राग
लोभादिनाऽन्यथाव्यवहारदर्शनेदंडमाह।दुर्दृष्टांस्तुपुनर्दृष्ट्वाव्यवहारान्नृपेणतु॥सभ्याःसजयिनोदंड्याविवा
दाद्द्विगुणंदमं।दुर्दृष्टान्स्मृत्याचारप्राप्तधर्मोल्लंघनेनरागलोभादिभिरसम्यग्विचारितानाशंकमानान्व्यवहारान्पुनः
सम्यग्विचार्यनिश्चितदोषाःपूर्वसभ्याःजयिसहिताःप्रत्येकंविवादपदेयोदंडःपराजितस्यतद्द्विगुणंदाप्याः।अप्रा
प्तजेतृदंडविधिपरत्वाद्वचनस्यरागाल्लोभादित्यादिश्लोकेनापौनरुक्त्यं।यदापुनःसाक्षिदोषेणव्यवहारस्यदुष्ट
तासदासाक्षिणएवदंड्याःनजयीनापिसभ्याः।यदातुराजानुमतस्यव्यवहारस्यदुर्दृष्टत्वंतदासर्वएवराज्ञाहिताःस

१४५ म्यादर्थ[illegible] ॥ पादो गच्छति कर्त्तारं पादः साक्षिण मृच्छति ॥ पादः सभासदः सर्वान्पादो राजानमृच्छतीति स्मरणात् ।
एतच्च प्रसक्तं राजादीनां दोषप्रतिपा[illegible]यो न पुनरेतस्य वपापापूर्वस्य विभागाय यथोक्तं कर्त्तृसमवायि फलजन
न स्वभावत्वादपूर्वस्य । न्यायतो निर्णीतव्यवहारस्य प्रत्यावर्त्तयितुर्दंडमाह । यो मन्येता जितोस्मीति न्यायेनापि
पराजितः । तमायांतं पुनर्जित्वा दापयेद्द्विगुणं दमं ॥ यः पुनर्न्यायमार्गेण पराजितोप्यौद्धत्यान्नाहं पराजितोस्मीति
मन्यते तमायांतं कूटलेख्याद्युपन्यासेन पुनर्धर्माधिकरणमधितिष्ठंतं धर्मेण पुनः पराजयं नीत्वा द्विगुणं दंडं दा
पयेत् । नारदेनाप्युक्तं । तीरितं चानुशिष्टं च यो मन्येत विधर्मतः द्विगुणं दंडमास्थाय तत्कार्यं पुनरुद्धरेदिति । तीरितं सा
क्ष्यलेख्यादिनिर्णीतमनुष्ठितदंडमनुशिष्टमनुष्ठितदंडपर्यंतं नीतमिति यावत् । यत्तु मनुवचनं । तीरितं चानुशि
ष्टं च यत्र क्वचन विद्यते । कृतं तद्धर्मतो ज्ञेयं न तत्पुनर्निवर्त्तयेदिति तदर्थिप्रत्यर्थिनोरन्यतरवदनादवसारस्य धर्मतो
वृत्तत्वात् त्रिंशत्कार्यापुनर्द्विगुणदंडप्रतिज्ञापूर्वं व्यवहारं प्रवर्त्तयेत् पुनर्धर्मतो वृत्तत्वनिश्चयेपि । राज्ञा लोभादिना प्रवर्त्त
यितव्य इत्येवंपरं । यत्तु नृपांतरेणापि न्यायापेतं कार्यं निर्वर्त्तितं तदपि सम्यक्परीक्षणेन धर्मपथि व्यवस्थापनी
यं ॥ न्यायापेतं यदन्येन राज्ञाज्ञानकृतं भवेत् । तदप्यन्यायविहितं पुनर्न्याये निवेशयेदिति स्मरणात् । अन्यायगृही १४५

तदंडधनस्य गतिमाह । राज्ञा न्यायेन यो दंडो गृहीतो वरुणाय तं । निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतं । अन्यायेन यो दं
डो राज्ञा लोभादिना गृहीतस्तं त्रिंशद्गुणीकृतं वरुणायेदमिति संकल्प्य ब्राह्मणेभ्यः स्वयं दद्यात् । यस्माद्दंडरूपेण यावद्गृ
हीतं अन्यायेन तावत्तस्मै प्रतिदेयमितरथापहारदोषप्रसंगात् । अन्यायदंडग्रहणे पूर्वस्वामिनः स्वत्वविच्छेदाभावा
त् ॥ ॥ इति श्रीपद्मनाभभट्टोपाध्यायात्मजस्य श्रीमत्परमहंसपरिव्राजकाचार्यविज्ञानेश्वरभट्टारकस्य कृतौ ऋजु
मिताक्षरायां याज्ञवल्क्यधर्मशास्त्रविवृतौ द्वितीयोध्यायः ॥ समाप्तः ॥ ॥ अस्मिन्नध्याये प्रकरणानुक्रमणिका
कथ्यते । आद्यं व्यवहारमातृकाप्रकरणं ॥ १ ॥ भुक्तिलक्षणं २ [illegible]दानं ३ निक्षेपप्रकरणं ४ साक्षिलक्षणं ५ ले
ख्यलक्षणं ६ दिव्यस्वरूपकथनं ७ दायविभागः [illegible] सीमाविवादः ९ स्वामिपालविवादः १० स्वामिविक्रयः ११ द
त्ताप्रदानिकं १२ क्रीतानुशयः १३ अभ्युपेत्याशुश्रूषा १४ संविद्व्यतिक्रमः १५ वेतनादानं १६ द्यूतसमाह्वया
ख्यं १७ वाक्पारुष्यं १८ दंडपारुष्यं १९ साहसं २० विक्रीयासंप्रदानं २१ संभूयसमुत्थानं २२ स्तेयप्रकरणं
२३ स्त्रीसंग्रहणं २४ प्रकीर्णकमिति चतुर्विंशतिप्रकरणानि [illegible]पदस्येयं त्रिष्वस्य कृतिरात्मनः धर्म
शास्त्र[illegible] योगिनः इति[illegible]मु[illegible]शास्त्रागतव्यवहारिका सुविवृतिर्विहिता ऋजुसंमि

ताक्षरपदा रचना मधुरागभीर वितत ... लाभिर्वाग्भिनाम्नामिताक्षरा। अनल्पार्थाभिरल्पापि वि
१४६ वृत्तिर्विहितामया॥ ॥इतियाज्ञवल्क्यमुनिशास्त्र ... वृत्तिर्नरूपविहिताविदुषः॥ प्रमिताक्षरापि विपुलार्थव
तीति ... श्रवणयोरमृतं ... शास्त्रं॥ ॥संवत १८ ५८ मीति बसाखबदी ७४

प्रायश्चित्ताध्याय.

ऐश्वर्यमदमत्तोसिमामवज्ञायतिष्ठसि॥ उपस्थितेषु बौद्धेषु मदध्यीनां वस्थितिः॥ वेद्यपानरतं नटं कुपठितं स्वाध्यायहीनं द्विजं युद्धे किं
किंपुरुषं हयं गतरवलं मूर्खं परिव्राजकं॥ राजानं च कुमंत्रिणा परिगतं मित्रं घृणान्वेषितं भार्यायौवनगर्वितां पररतां मुंचंति ते प
डिताः॥ हितेन वाच्यं अहितेन वाच्यं हिताहि तंनैव तु भाषणीयं॥ येरंडको नाम कृपालभिक्षुकः हितोपदेशेन बिलं प्रविष्टः॥ नियमेन जपं
कुर्यात अकृतौ प्रत्यवायन॥ अन्यथाकरणेनर्थस्वरे वर्णविपर्ययात॥ अन्यथाकरणे तु प्रत्यवायो नास्ति तथापि चितौ काम्याभावात् स्वरवर्णविपर्ययः स्यात॥ चित्तैकाग्र्येण जपं कुर्यात

मि॰प्रा॰ श्रीगणेशाय नमः॥ गृहस्थाश्रमिणां नित्यनैमित्तिकाधर्मा उक्ताः॥ अभिषेकादिगुणयुक्तस्य
१ गृहस्थविशेषस्य गुणधर्माश्च प्रदर्शिताः॥ अधुना तदधिकारसंकोचहेतुभूताशौचप्रतिपा
दनमुखेन तेषामपवादः प्रतिपाद्यते॥ आशौचशब्देन च कालस्नानाद्यपनोद्यः पिंडोदका
दानादिविधेरध्ययनादिपर्युदासस्य च निमित्तभूतः पुरुषगतः कश्चनातिशयः कथ्यते॥ न पु
नः कर्मानधिकारमात्रं॥ अशुद्धा बांधवाः सर्वे इत्यादावशुद्धत्वाभिधानात्॥ अशुद्धशब्दस्य च
वृद्धव्यवहारेऽनाहिताग्निदीक्षितादावनधिकारमात्रे प्रयोगाभावात्॥ वृद्धव्यवहारस्य सत्ति
निबंधनत्वाच्छब्दार्थावगतेः किंच॥ पर्याशौचिनां दानादिनिषेधदर्शनात्तदयोग्यत्वमाशौ
चशब्दाभिधेयं कल्प्यते तद्वदुदकदानादिविधिदर्शनात्तद्योग्यत्वमप्यभिधेयं स्यात्॥ तत्रानेका राम॰
र्थकल्पनादोषप्रसंगदुरुपेक्षणीयोयं पक्षः॥ तत्राशौचिभिः सपिंडादिभिर्यत्कर्तव्यं तत्तावद्दा १

आरन्ता। आहिताग्निदाहप्रक्रियया २

ह॥ ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः। आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्वृतः॥ १॥ यमस्म
तं तथा गाथां जपद्भिर्लौकिकाग्निना॥ स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत्॥ २॥ ऊनेऽप उपयुक्तं याज्ञिकमित्यर्थः
रिपूर्णे द्विवर्षे यस्यासोऊनद्विवर्षः। तं प्रेतं निखनेत् भूमावपवरं कृत्वा निदध्यान्न पुनर्दहेदित्यर्थः
॥ न च स कृत्स्नं सिंचत्युदकमित्यादिभिः प्रेतोद्देशेन विहितमुदकदानाद्यौर्ध्वदैहिकं कुर्यात्॥ अ
यं च गंधमाल्यानुलेपनादिभिरलंकृत्य शुचौ भूमौ श्मशानादन्यत्रास्थिनिचयरहितायां वहि
तायां वहिर्ग्रामान्निखननीयः। यथाह मनुः॥ ऊनद्विवार्षिकं प्रेतं निदध्युर्बांधवा वहिः॥ अलं
कृत्य शुचौ भूमावस्थिसंचयनादृते॥ नास्य कार्योग्निसंस्कारोस्ति द्विषये भवंति॥ तथोनद्विवर्ष
मपि खातयां भूमौ परित्यज्य तद्विषये श्राद्धाद्यौर्ध्वदैहिकेषु उदासीनैर्भवितव्यमित्याचारादिप्रा
सश्राद्धाद्यभावो नेन दर्शितेन सूच्यते। संघृतेनाभ्यज्य यमगाथां गायद्भिर्निधातव्यः॥ ऊनद्विवा

३ नापिकार्योदकक्रिया॥ अरण्ये काष्ठवत्त्यक्त्वा क्षिपेयुस्त्र्यहमेव तु॥ अरण्ये काष्ठवत्त्यक्त्वेत्यस्य यमर्थः। यथारण्ये काष्ठं त्यक्त्वोदासीना ३

मि॰प्र॰ षिकंप्रेतंघृताक्तंनिखनेद्बहिः॥यमगाथांगायमानोयमसूक्तमनुस्मरन्निति यमस्मरणात्॥तत
२ स्तस्मादूनद्विवर्षादिवर्षीयोमृतोसौश्मशानपर्यंतेज्ञातिभिःसपिंडैःसमानोदकैश्चज्येष्ठपु
रस्सरैरनुव्रज्योऽनुगंतव्योऽस्मादेववचनादूनद्विवर्षस्यानुगमनमनियतमितिगम्यते॥अनु
गम्यच परेपिवांसमित्यादियमसूक्तं॥यमदेवताऋगाथाजपद्भिर्लौकिकेनासंस्कृतेनाग्निना
दग्धव्यः॥यदिजातारणिर्नास्ति॥तत्सद्भावेतुतन्मथितेनदग्धव्योनलौकिकेनतस्याप्यग्निसं
पादकार्यमात्रार्थत्वेनोत्पत्तेः॥लौकिकाग्निश्चचंडालाग्न्यादिव्यतिरिक्तोग्राह्यः॥चंडाला
ग्निरमेध्याग्निःसूतकाग्निश्चकर्हिचित्॥पतिताग्निश्चिताग्निश्चनशिष्टग्रहणोचिताइ
तिदेवलस्मरणात्॥लौगाक्षिणाचात्रविशेषउक्तः॥तूष्णींनैवोदकंकुर्यात्तूष्णींसंस्कारमेव राम॰
च॥सर्वेषांकृतचूडानामन्यत्रापीच्छयाद्वयमिति॥अयमर्थः॥चूडाकर्मोत्तरकालेनिय २

मेनाग्न्युदकादानंकार्यं॥अन्यत्रनामकरणादूर्ध्वमकृतचूडेऽपीच्छयाप्रेताग्न्युदकादानमनयाद्व
यमग्न्युदकदानात्मकंतूष्णींकार्यंननियमेनेतिविकल्पः॥मनुनाप्यत्रविशेषोदर्शितः॥ना
ऽत्रिवर्षस्यकर्तव्याबांधवैरुदकक्रिया॥जातदंतस्यवाकुर्यान्नाम्निवापिकृतेसतीति॥उ
दकग्रहणंसाहचर्यादग्निसंस्कारस्याप्युपलक्षणंनात्रिवर्षस्येतिवचनात्॥कुलधर्मा
पेक्षयाचूडोत्कर्षेपिवर्षत्रयादूर्ध्वमग्न्युदकदाननियमोवगम्यतेलौगाक्षिवचनाद्वर्षत्रया
त्प्रागपिकृतचूडस्यतयोर्नियमइतिविवेचनीयम्॥उपेतश्चेद्यद्युपनीतस्तर्ह्याहिताग्ना
वृताआहिताग्निदाहप्रक्रिययास्वगृह्यादिप्रसिद्धयालौकिकाग्निनैवदग्धव्यः॥अर्थव
त्प्रयोजनवत्॥अयमर्थः॥यस्यकृत्स्नंदाहकार्यंतत्प्रयोजनंसंभवतिभूमिजोषणा
प्रोक्षणादेस्तद्यादेयं॥यत्पुनर्लुप्तप्रयोजनंपात्रयोजनादितन्निवर्तते॥तथालौकिका

मि॰प्र॰ ग्निविधानेनउपनीतस्यअनाहिताग्नेर्गृह्याग्निनादाहविधानेनापहृतप्रयोजनत्वाद्दाहव
३ नीयादेरपिनिवृत्तिरिति॥ अग्न्यन्तरविधानंचवृद्धयाज्ञवल्क्येनोक्तं॥ आहिताग्निर्यथान्या
यंदग्धव्यस्त्रिभिरग्निभिः॥ अनाहिताग्निरेकेनलौकिकेनापरोजनइति॥ नचशूद्रेणस्मशा
नंप्रत्यग्निकाष्ठादिनयनंकार्यं॥ यस्यानयतिशूद्रोग्निंतृणंकाष्ठंहवींषिच॥ प्रेतत्वंहिसदात
स्यसचाधर्मेणालिप्यतेइतियमस्मरणात्॥ तथादाहश्चस्नपनाद्यनन्तरंकर्त्तव्यः॥ प्रेतंदहेच्छु
भैर्गंधैःस्नपितंस्रग्विभूषितं॥ इतिस्मरणात्॥ प्रचेतसाप्युक्तं॥ स्नानंप्रेतस्यपुत्राद्यैर्वस्त्रा
द्यैःपूजनंततः॥ नग्नदेहंदहेन्नैवकिंचिद्देयंपरित्यजेदिति॥ किंचिद्देयमितिशववस्त्रैकदेशं
स्मशानवास्यर्थंदेयंपरित्यजेदित्यर्थः॥ तथाप्रेतनिर्हरणेपिमनुनाविशेषोदर्शितः॥ न राम॰
विप्रंस्वेषुतिष्ठत्सुमृतंशूद्रेणहारयेत्॥ अस्वर्ग्याह्याहुतिःसास्याच्छूद्रसंस्पर्शदूषिता॥ ३

अत्रचस्वेषुतिष्ठत्स्वित्यव्यवसितमस्वर्ग्यत्वादिदोषश्रवणात्॥ दक्षिणेनमृतंशूद्रंपुरद्वा
रेणनिर्हरेत्॥ पश्चिमोत्तरपूर्वैस्तुयथासंख्यंद्विजातयइति॥ तथाहारीतेनापि॥ नग्रामा
भिमुखंप्रेतंहरेयुरिति॥ यदातुप्रोषितमरणेशरीरंनलभ्यतेतदास्थिभिःप्रतिकृतिंकृत्वा
तेषामप्यलाभेपर्णशरादिगृह्योक्तमार्गेणप्रतिकृतिंकृत्वासंस्कारःकार्यः॥ आशौचं
चात्रदशाहादिकमेवआहिताग्निश्चेत्प्रवसन्म्रियेतपुनःसंस्कारंकृत्वाशववदाशौचमिति
वशिष्ठस्मरणात्॥ अनाहिताग्नेस्तुत्रिरात्रं॥ सुपिष्टैर्जलंसंमिश्रैर्दग्धव्यश्चतथाग्निना॥
असौस्वर्गायलोकायस्वाहेत्युक्त्वासबांधवैः॥ एवंपर्णशरंदग्ध्वात्रिरात्रमशुचिर्भवेदि
तिवचनात्॥ ततश्चायमर्थः॥ नामकरणादर्वाक्निखननमेवनचोदकदानादि॥ ततऊर्द्ध्वं
यावत्त्रिवर्षंवैकल्पिकमग्न्युदकदानं॥ ततःपरंयावदुपनयनंतूष्णीमेवाग्न्युदकदानं

उदकदानादिकंकर्तव्यमित्यर्थः

मि॰प्रा॰ नियतं॥वर्षत्रयात्प्रागपिकृतचूडस्य॥उपनयनादूर्द्ध्वंपुनराहिताग्न्याहृत्वादाहंकृत्वासर्वमौर्द्ध
४ देहिकंकार्यं॥अयंतुविशेषः॥उपनीतस्यलौकिकाग्निनादाहः कार्यः॥अनाहिताग्नेर्गृह्या
ग्निनादाहोयथासंभवंपात्रयोजनंचकार्य॥संस्कारानंतरंकिंकर्तव्यमित्यतआह॥सप्त द्दशमा
माद्वापिज्ञातयोऽभ्युपयंत्यपः॥अपनःशोशुचदघमनेनपितृदिङ्मुखाः॥सप्तमदिवसाद्वा
दशमदिवसाद्वाज्ञातयःसमानगोत्राःसपिंडाः॥समानोदकाश्चअपनःशोशुचदघमि
त्यनेनमंत्रेणदक्षिणाभिमुखाअपोऽभ्युपयंति॥अभ्युपगमनेनतत्प्रयोजनभूतोदकदा
नविशिष्टमभ्युपगमनंलक्ष्यते॥एवंमातामहाचार्येष्वनंतरमुदकदानस्यातिदेशदर्श
नात्॥एतच्चायुग्मासुतिथिषुकार्यं॥प्रथमतृतीयपंचमसप्तमनवमेषूदकक्रियेतिगौतम राम॰
स्मरणात्॥एतच्चस्नानानंतरंकार्यं॥शरीरमग्नौसंयोज्यानवेक्षमाणाअपोऽभ्युपयन्ती ४

शोनिनानपस्मरणात्॥तथाप्रचेतसाप्यत्र विशेषोदर्शितः॥प्रेतस्यबांधवायथाब्दमुदक
मवतीर्यनोपघूर्षयेयुरुदकांतेप्रसिंचेयुरपसव्ययज्ञोपवीतवाससोदक्षिणाभिमुखाब्राह्म
णस्योदङ्मुखाः॥प्राङ्मुखाश्चराजन्यवैश्ययोरितिस्मृत्यंतरेतुयावत्साशौचदिनानिताव
दुदकदानंस्यादित्युक्तं॥यथाहविष्णुः॥यावदाशौचंतावत्प्रेतस्योदकंपिंडंचदद्युरिति
॥तथाप्रचेतसाप्युक्तं॥दिनेदिनेंजलीन्पूर्णान्प्रदद्यात्प्रेतकारणात्॥तावद्वृद्धिश्चकर्त
व्यायावत्पिंडःसमाप्यतइतिप्रतिदिनमंजलीनांवृद्धिःकार्यायावद्दशमःपिंडःसमाप्य
तइत्यर्थः॥यद्यप्येतयोर्गुरुलघुकल्पयोरन्यतरानुष्ठानेनापिशास्त्रार्थसिद्धिस्तथापि
बहुक्लेशावहत्वेनगुरुतरकल्पेप्रवृत्त्यनुपपत्तेः॥प्रेतस्योपकारातिशयोभविष्यतीति
कल्पनीयं॥अन्यथागुरुतरकल्पानुष्ठानस्यानर्थक्यप्रसंगात्॥वशिष्ठेनाप्यत्रविशेषो

मि॰प्रा॰ ५ दर्शितः॥सव्येतराभ्यां पाणिभ्यामुदकक्रियां कुर्वीरन्निति॥वक्ष्यमाणसकृत्प्रसेकं नाम
गोत्रादिगुणविशिष्टस्योदकदानस्यासमानगोत्रेषु मातामहादिष्वतिदेशमाह॥एवं माता
महाचार्यप्रेतानामुदकक्रिया॥कामोदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्विजां॥यथा सगोत्र
सपिंडानां प्रेतानामुदकं दीयते॥तथा मातामहानामाचार्याणां च प्रेतानां नित्यमुदकक्रि
या कार्या॥सखा मित्रं॥प्रत्ताः परिणीता दुहितृभगिन्यादयः॥स्वस्रीयो भागिनेयः॥श्व
शुरः प्रसिद्धः॥ऋत्विजो याजकाः॥एषां सख्यादीनां प्रेतानां कामोदकं कार्यं॥कामइच्छा॰
कामेनोदकदानं कामोदकं॥प्रेताभ्युदयकामनायां सत्यमुदकं देयमसत्यां न देयमित्यक
रणे प्रत्यवायो नास्तीत्यर्थः॥उदकदानगुणविधिमाह॥सकृत्प्रसिंचंत्युदकं नामगोत्रेण वा शेम॰
ग्यताः॥तच्चोदकदानमित्थं कार्यं॥सपिंडाः समानोदकाश्च मौनिनो भूत्वा प्रेतस्य नाम गो ५

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

त्रे उच्चार्यामुकनामा प्रेतोऽमुकगोत्रस्तृप्यत्विति॥सकृदेवोदकं प्रसिंचेयुस्त्रिर्वा त्रिरद्भिः प्रसे
कं कुर्युः॥प्रेतस्तृप्यत्विति प्र चेतस्मरणात्॥प्रतिदिनमंजलिवृद्धिस्तु प्रतिपादितैव॥तथामि
ये पि विशेषस्तेनैवोक्तः॥नदीकूलं ततो गत्वा शौचं कृत्वा यथार्थवत्॥वस्त्रं संशोधयेदादौ ततः
स्नानं समाचरेत्॥सचेलस्तु ततः स्नात्वा शुचिः प्रयतमानसः॥पाषाणं तत्र चाधाय विप्रे दद्या
द्दशांजलीन्॥द्वादश क्षत्रियो दद्याद्वैश्यः पंचदश स्मृताः॥त्रिंशच्छूद्राय दातव्यास्ततः संप्रविशेद्गृ
हं॥ततः स्नानं पुनः कार्यं गृहशौचं च कारयेदिति॥सपिंडानां मध्ये केषांचिदुदकदानप्रति
षेधमाह॥न ब्रह्मचारिणः कुर्युरुदकं पतितान च॥ज्ञातित्वे सत्यपि ब्रह्मचारिणः समावर्तन
पर्यंतं पतिताश्च प्रच्युतद्विजातिकर्माधिकारा उदकादिदानं न कुर्युः॥ब्रह्मचर्यांतरकालं
पूर्वमृतानां सपिंडादीनां उदकदानमाशौचं च कुर्यादेव॥यथाह मनुः॥आदिष्टी नोदकं कुर्या

दंश्व ग स्य समाप्तनात् । समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेदिति ॥ आदिशब्दीब्रह्मचार्यस्य
मि॰प्रा॰ ६ पोशानकर्मकुर्युरिवामासात्पश्वीरित्यादिव्रतादेशयोगाद्दुस्तचाप्युच्यते ॥ एतच्च पित्रादिव्यति
रेकेणेतिवक्ष्यति ॥ आचार्यपित्र्युपाध्यायानित्यत्र आचार्यः पुनरेवं मन्यते ॥ आदिशब्दीति
प्रक्रांतप्रायश्चित्तः कथ्यते ॥ तस्यैवायमुदकदानादिनिषेधः प्रायश्चित्तं तूपन्नैरकालमु तसाम्पुत
दकादानाशौचविधिरिति ॥ तथा क्लीबादीनां चोदकदायित्वं निषिद्धं ॥ क्लीबाद्यानोदकं कुर्यु
स्तेनाव्रत्याविधर्मिण्यः ॥ गर्भभर्तृद्रुहश्चैव सुराप्यश्चैव योषितइति वृद्धमनुस्मरणात् ॥ ए
वमुदकदाने कर्तृविशेषप्रतिषेधमुक्त्वा संप्रदानविशेषप्रतिषेधमाह ॥ पाषंड्यनाश्रिता
स्तेना भर्तृघ्न्यः कामगादिकाः । सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः ॥ नरशिरःकपा राम॰
लादि श्रुतिवाह्यलिंगधारणं पाषंडं तद्येषां ते पाषंडिनः ॥ अनाश्रिता अधिकारि सत्यप्य ६

कृताश्रमविशेषपरिग्रहाः ॥ स्तेनाः सुवर्णादुत्तमद्रव्यहारिणः ॥ भर्तृघ्न्यः पतिघातिन्यः ॥ कामगाः कुलटाः ॥
आदिग्रहणात्स्वगर्भब्राह्मणघातिन्यो गृह्यंते ॥ सुराप्यो या सा याः सुराः प्रतिषिद्धास्तत्पानरताः ॥ आत्मत्यागि
न्यो विषाग्न्युद्बंधनादिभिरात्मानं या त्यजंति ॥ एते पाषंड्यादयश्चिरात्रं दशरात्रं वेति वक्ष्यमाणस्याशौचस्योदकदा
नादेर्दैहिकस्य च भाजनाः न भवंति ॥ भाजयतीति भाजनः सपिंडादीनामाशौचादिनिमित्तभूतान भवंत्यतस्त
न्मरणे सपिंडैरुदकदानादिनकार्यमित्येतत्प्रतिपादनपरं वचनं ॥ अत्र च सुराप्य इत्यादिषु लिंगमविवक्षितं
॥ अनुपादेयगतत्वात् ॥ एतच्चाबुद्धिपूर्वविषयं ॥ यथाह गौतमः ॥ प्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपत
नैश्चेच्छतामिति ॥ प्रायो महाप्रस्थानं ॥ अनाशकमनशनं ॥ गिरिशिखरादवपातः प्रपतनं ॥ अत्र चेच्छतामिति वि शि
शेषणेपादानात्प्रमादकृते दोषो नास्तीत्यवगंतव्यं ॥ अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः ॥ तस्याशौचं
विधातव्यं कर्तव्या चोदकक्रियेत्यंगिरःस्मरणात् ॥ तथा मत्सुविशेषादप्याशौचादिनिषेधः ॥ चांडालादुदका

७ त्मयो ब्राह्मणं दैवे धुतादपि॥ दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणां॥ उदकं पिंडदानं च प्रेतेभ्यो यत्प्रदीयते॥
नोपतिष्ठति तत्सर्वमंतरिक्षे विनश्यतीति॥ एतदपीच्छापूर्वमात्महननविषयं॥ गौतमवचनेनेच्छापूर्वकमेवो
दकेन हतस्याशौचादिनिषेधस्योक्तत्वात्तत्रापि चंडालादुदकात्सर्पादिति तत्साहचर्यदर्शनाद्बुद्धिपूर्वविषय
त्वनिश्चयः॥ अतो यद्यपि चांडालादीन्हंतुं गतो यस्तैर्मारितस्तस्याप्येवं तदेवात्मानं गोपायेदिति विध्यति
क्रमनिमित्तः पिंडदानादिनिषेधः॥ एवं दुष्टदंष्ट्र्यादिनिग्रहणार्थमाभिमुख्येन यद्यागच्छतो मरणे यं निषेध
इत्यनुसंधेयं॥ आयं चाशौचप्रतिषेधो दशाहादिकालावच्छिन्नस्य विप्रगोनृपहतानामन्वक्षं चात्मघातिनामि
ति सद्यः शौचस्य वक्ष्यमाणत्वात्॥ तथा दाहादिक [illegible] मप्येषां न कार्यं। नाशौचं नोदकं नाश्रु न दाहाद्यंत्यकर्म च
॥ ब्रह्मदंडहतानां च न कुर्यात्कटधारणमिति यमस्मरणात्॥ ब्रह्मदंडहता ब्राह्मणहताः॥ प्रेतवहनसाधनं च राम०
द्वारि कटशब्देनोच्यते॥ न चाहिताग्निमग्निभिर्दहेदिति यज्ञपात्रैश्चेत्येतच्छ्रुतिविहिताग्नियज्ञपात्रादिप्रतिपत्तिलोप ७

प्रसंगाद्यं स्यात्स्त्रीं दाहादिनिषेधो विप्रादिहताहिताग्निषु विषयं नास्कंदतो त्याशंकनीयं॥ यतश्चंडालादिहता
हिताग्निसंबंधिनामग्निसंबंधिनामग्नियज्ञपात्राणां स्मसंततरे प्रतिपत्त्यंतरं विधीयते॥ श्रौताग्निं प्रक्षिपेदप्सु
आवसथ्यं चतुष्पथे॥ पात्राणि तु दहेदग्नौ यजमाने वृथामृत इति॥ तथा तच्छरीरस्यापि प्रतिपत्त्यंतरमुक्तं॥ आ
त्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया॥ तेषामपि तथा गंगातोये संस्थापनं हितमिति स्मरणात्॥ तस्माद्विशे
षेण सर्वेषां दहनादिनिषेधः॥ अतिस्नेहादिना निषेधातिक्रमे प्रायश्चित्तं कर्तव्यं॥ कृताग्निमुदकं स्नानं स्पर्शनं
वहनं कथां॥ रज्जुच्छेदाश्रुपातं च तप्तकृच्छ्रेण शुध्यतीति स्मरणात्॥ एतच्च प्रसंगे कं बुद्धिपूर्वं वेदितव्यं॥ अबुद्धिपू
र्वकरणे तु एषामन्यतमं प्रेतं यो वहेत दहेत वा॥ कटोदकक्रियां कृत्वा कृच्छ्रं सांतपनं चरेदिति संवर्तोक्तं द्रष्ट
व्यं॥ यः पुनः॥ तच्छवकेवलं स्पृष्टमश्रु वा पातितं यदि॥ पूर्वोक्तानामेकैकं चेद्विरात्रमभोजनमिति स्पर्शाश्रुपा
तयोः पृथग्वा सदृक्तः॥ असौ कृच्छ्रेष्वशक्तस्य॥ त [illegible] थावंधनेच्छेदने दहने वा मासं भैक्ष्याहारस्त्रिषवणं चेति सुमं

८ तुनाभेक्षाशिखमुक्तं॥ तदप्यशक्तस्यैव॥ एवमन्यान्यपि तद्विषयाणि स्मृतिवाक्यानि व्यवस्थापनीयानि॥ अयं च
दाहादिप्रतिषेधोऽनुष्ठानासमर्थजीर्णवानप्रस्थादिव्यतिरिक्तविषयस्तेषामभ्यनुज्ञादर्शनात्॥ वृद्धः शौनकस्मृ
तेर्लुप्तः प्रसारव्यातभिषक्क्रिया॥ आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनांबुभिः॥ तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थि
संचयः॥ तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेदिति वचनात्॥ एवं येन येनोपाधिनात्महननं शास्त्रतोऽभ्यनुज्ञाय
ते॥ तद्व्यतिरिक्तमार्गेणात्महननेऽप्याद्याद्यौर्ध्वदेहिकेषु निषिद्धेषूक्तेषु पुनस्तेषां कार्य्यमित्यपेक्षायां वृद्धयाज्ञव
ल्क्यच्छागलेयाभ्यामुक्तं॥ नारायणबलिः कार्यो लोकगर्हाभयान्नरैः॥ तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः
॥ तस्मात्तेभ्योपि दातव्यमन्नमेव सदक्षिणमिति॥ व्यासेनाप्युक्तं॥ नारायणं समुद्दिश्य शिवं वा यत्प्रदीयते॥ तस्य
शुद्धिकरं कर्म तद्भवेन्नैतदन्यथा॥ एवं नारायणबलिः प्रेतस्य शुद्ध्यापादनद्वारेण श्राद्धादिसंप्रदानत्वयोग्यतां ज राम॰
नयतीत्यौर्ध्वदेहिकमपि सर्वं कार्यमेव॥ अत एव षट्त्रिंशन्मतेप्यौर्ध्वदेहिकस्याभ्यनुज्ञा दृश्यते। गोब्राह्मणहतानां ८

च पतितानां तथैव च॥ ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदेहिकमिति॥ एवं संवत्सरादूर्ध्वमेव नारायणबलिं कृत्वौर्ध्वदे
हिकं कार्यं॥ नारायणबलिश्चैवं कर्तव्यः॥ कस्यांचिच्छुक्लैकादश्यां विष्णुं वैवस्वतं यमं यथावदभ्यर्च्य तत्समीपे म
धुघृतप्लुतांस्तिलमिश्रान्दश पिंडान्विष्णुरूपिणं प्रेतमनुस्मरन्प्रेतनामगोत्रेऽङ्कस्वाय दक्षिणाग्रेषु दर्भेषु द
क्षिणाभिमुखो दत्वा गंधादि[illegible]रभ्यर्च्य पिंडप्रवाहणांतं कृत्वा नद्यां प्रक्षिपेत्सपत्न्यादिभ्यो दद्यात् ततस्तस्यामेव
रात्रावयुग्मान्ब्राह्मणान्नामंत्र्योपोषितः श्वोभूते मध्याह्ने विष्ण्वाराधनं कृत्वैकोद्दिष्टविधिना ब्राह्मणपादप्रक्षाल
नादितृप्तिप्रश्नान्तं कृत्वा पिंडपितृयज्ञावृतोल्लेखनाद्यवनेजनांतं तत्स्त्रीं कृत्वा विष्णवे ब्रह्मणे शिवाय यमाय च
परिवारसहिताय चतुरः पिंडान्दत्वा नामगोत्रसहितं प्रेतं संस्मरन्विष्णोर्नाम संकीर्त्य पंचमं पिंडं दद्यात् ततो विप्रान् चर्म
चांतान्दक्षिणाभिस्तोषयित्वा तन्मध्ये चैकं गुणवंतमं प्रेतबुद्ध्या संस्मरन्गोभूहिरण्यादिभिरतिशयेन संतो
ष्य ततः पवित्रपाणिभिर्विप्रैः प्रेताय तिलादिसहितमुदकं दापयित्वा स्वजनैः सार्द्धं भुंजीत॥ सर्प्पहते त्वयं वि

१ शेषः॥ सर्व्वं हन्ते त्वयं विशेषः॥ संवत्सरं यावत्पुराणोक्तविधिना पञ्चम्यां नागपूजां विधाय पूर्णे संवत्सरे ना
रायणबलिं कृत्वा सौवर्णं नागं दद्याद्गां च सदक्षिणां ततः सर्वमौर्द्ध्वदेहिकं कुर्यात्॥ नारायणबलिस्वरूपं च वै समवे
भिहितं तथा॥ एकादश्यां समासाद्य शुक्लपक्षस्य वै तिथिं॥ विष्णुं समर्चयेद्देवं यमं वैवस्वतं तथा॥ दशपिंडा
न् घृताभ्यक्तान् दर्भेषु मधुसंयुतान्॥ तिलमिश्रान्प्रदद्याद्वै संयतो दक्षिणामुखः॥ विष्णुं बुद्धौ समासाद्य नं
द्यंभसि ततः क्षिपेत्॥ नामगोत्रग्रहं तत्र पुष्पैरभ्यर्चनं तथा॥ धूपदीपप्रदानं च भक्ष्यं भोज्यं तथा परं॥ निमंत्रये
त विप्रान्वै पंच सप्त नवापि वा॥ विद्यातपःसमृद्धान्वै कुलोत्पन्नान्समाहितान्॥ अपरेहनि संप्राप्ते मध्याह्ने समु
पोषितः॥ विष्णोरभ्यर्चनं कृत्वा विप्रांस्तानुपवेशयेत्॥ उदङ्मुखान्यथाज्येष्ठं पितृरूपमनुस्मरन्॥ मनो नि
वेश्य विष्णौ वै सर्वं कुर्याद्द्विजः॥ आवाहनादि यत्प्रोक्तं दैवपूर्वं तदाचरेत्॥ तृप्तान्ज्ञात्वा ततो विप्रांस्तत्सिंष्ट्वा राम० १
यथाविधि॥ हविष्यव्यंजनेनैव तिलादिसहितेन च॥ पंच पिंडान्प्रदद्याद्वै देवरूपमनुस्मरन्॥ प्रथमं विष्णवे

दत्तं

दद्याद्ब्रह्मणे च शिवाय च॥ यमाय सानुचराय चतुर्थं पिंडमुत्सृजेत्॥ मृतं संकीर्त्य मनसा गोत्रपूर्वं मतः परं॥
विष्णोर्नाम गृहीत्वैवं पंचमं पूर्ववत्क्षिपेत्॥ विप्रानाचम्य विधिवद्दक्षिणाभिः समर्चयेत्॥ एकं त्वुत्तमं विप्रं
हिरण्येन समर्चयेत्॥ गवा वस्त्रेण भूम्या च प्रेतं तं मनसा स्मरन्॥ ततस्तिलांभो विप्रास्तु हस्ते दर्भसमन्वि
तं॥ क्षिपेयुर्गोत्रपूर्वं तु नाम बुद्ध्वा निवेद्य च॥ हविर्गंधतिलांभस्तु तस्मै दद्युः समाहिताः॥ मित्रभृत्यज
नैः सार्द्धं पश्चाद्भुंजीत वाग्यतः॥ एवं विष्णुमते स्थित्वा यो दद्यादात्मघातिने॥ समुद्धरति तं क्षिप्रं नात्र कार्या
विचारणा॥ सर्पदृष्टनिमित्तं सौवर्णनागदानं परकृतिरूपेण भविष्यत्पुराणे सुमंतुनाभिहितं॥ सुवर्णभा
रनिष्पन्नं नागं कृत्वा तथैव गां॥ व्यासाय दत्त्वा विधिवत्पितुरानृण्यमवाप्नुवानिति॥ एवमुदकदानं सापवा
[पुत्रोहीनं-आत]
दमभिधायानंतरं किं कार्यमित्यत आह॥ कृतोदकान्समुत्तीर्णान्मृदुशाड्वलसंस्थितान्॥ स्नातानपवदेयु
स्तानितिहासैः पुरातनैः॥ कृतमुदकदानं येभ्यस्तान् कृतोदकान् स्नातान् सम्यगुदकादुत्तीर्णान् मृदुशाड्वले

१० नवोद्गतनूतनलग्नचयान्वितेऽग्रभागेसम्यक्स्थितानपुत्रादीन्कुलवृद्धाःपुरातनैरितिहासैर्वैरस्यमालोरपवदेयुः
शोकनिरसमर्थैर्वचोभिर्बोधयेयुः॥शोकनिरसनसमर्थमितिहाससरूपमाह॥मानुष्येकदलीस्तंभनिःसारे
सारमार्गणं॥करोतियःससंमूढोजलबुद्बुदसन्निभे॥मनुष्यशब्देनजरायुजांडजादिचतुर्विधभूतजातंल
क्ष्यंतेतस्यभावोमानुष्यं॥तत्रसंसरणधर्मित्वेनकदलीस्तंभवदंतःसाररहिते॥जलबुद्बुदवदाचिरविनश्व
रेसंसारेसारस्यस्थैर्यस्यमार्गणमन्वेषणंयःकरोतिससंमूढः॥अत्यंतनष्टचित्तस्तस्मात्संसारस्वरूपवेदि
भिर्भवद्भिरस्थ्यंनकार्यं॥किंच॥पंचधासंभृतःकायोयदिपंचत्वमागतः॥कर्मभिःस्वशरीरोत्थैस्तत्रकापरि
देवना॥जन्मांतरात्मीयशरीरजनितैःकर्मबीजैःस्वफलोपभोगार्थंपंचधापृथिव्यादिपंचभूतात्मकतयापंच
प्रकारंसंभृतोनिर्मितःकायः॥सयदिफलोपभोगनिवृत्तौपंचत्वमागतःपुनःपृथिव्यादिरूपतांप्राप्तस्तत्र गम०
भवतांकिमर्थंपरिदेवनानिःप्रयोजनत्वात्रानुशोचनंकार्यं॥वस्तुतस्तथात्वान्नहिकेनचिद्वस्तुस्थितिरतिक्र १०

मितुंशक्यते॥किंच॥गंत्रीवसुमतीनाशमुदधिर्दैवतानिच॥फेनप्रख्यःकथंनाशंमर्त्यलोकोनयास्यति॥ने
दमाश्चर्यंमरणंनामयतःपृथिव्यादीनीमहांत्यपिभूतानिनाशंगच्छंति॥तथासमुद्राअपिजरामरणविर
हिताअमराअपिप्रलयसमयेअवसानंगच्छंति॥कथमिवाऽस्थिरतयाफेनसन्निभोमरणधर्माभूतसंघो
विनाशंनयास्यत्युचितमेवहिमरणधर्मणःप्रायणमतोनिष्प्रयोजनःशोकसमावेशः॥अनिष्टापादकत्वा
दप्यनुशोचनंनकार्यमित्याह॥श्लेष्माश्रुबांधवैर्मुक्तंप्रेतोभुंक्तेयतोवशः॥अतोनरोदितव्यंहिक्रियाःकार्याः
स्वशक्तितः॥यस्मादनुशोचद्भिर्बांधवैर्वदननयननिर्गमितंश्लेष्माश्रुवाअकामोपिप्रेतोभुंक्तेतस्मान्नयदा
८ क्रंदितव्यं॥किंतुप्रेतहितेच्छुभिःस्वशक्त्यनुसारेणश्राद्धादिक्रियाःकार्याः॥इतिसंश्रुत्यसगच्छेयुर्गृहंबालपु
रःसराः॥विदश्यनिंबपत्राणिनियताद्वारिवेश्मनः॥आचम्याग्न्यादिसलिलंगोमयंगौरसर्षपान्॥प्रविशेयुः
समालभ्यकृत्वाश्मनिपदंशनैः॥एवंकुलवृद्धवचांसिसम्यगाकर्ण्यसत्यक्तशोकाःसंतोबालानग्रतःकृत्वाग

Dr. BHAU DAJI MEMORIAL

११ हंगच्छेयुः॥ गत्वा च वेश्मनो द्वारि स्थित्वा नियताः संयतमनस्काः निंबपत्राणि विदश्यदशनैः खंडयित्वा
चमनं च कृत्वाग्न्युदकगोमयगौरसर्षपानालभ्य आदिग्रहणात् दूर्वाप्रवालमग्निवृषभौ चेति शंखोक्तो दू
र्वांकुरवृषभावपि स्पृष्ट्वा अश्मनि चपदं निधाय शनैरस्खलितं वेश्म प्रविशेयुः॥ अतिदेशमाह॥ प्रवेशना
दिकं कर्म प्रेतसंस्पर्शिनामपि॥ इच्छतां तत्क्षणात् शुद्धिः परेषां स्नानसंयमात्॥ यदेतत्पूर्वोक्तं निंबपत्रद
शनादि वेश्मप्रवेशनांतं कर्म तन्न केवलं ज्ञातीनामपि तु परेषामपि धर्मार्थं प्रेतालंकारनिर्हरणादिकं कुर्वतां
भवति॥ प्रवेशनादिकं मित्यत्रादिशब्दो ऽमांगलिकत्वात्मतिलोमाभिप्रायस्तेषां च धर्मार्थं निर्हरणादौ प्र
वृत्तानां तत्क्षणाच्छुद्धिमिच्छतामसपिंडानां स्नानप्राणायामाभ्यामेव शुद्धिः यथाह पराशरः॥ अनाथं ब्राह्म
णं प्रेतं ये वहंति द्विजातयः॥ पदे पदे यज्ञफलमनुपूर्वं लभंति ते॥ न तेषामशुभं किंचित्पापं वाऽशुभकारि शम०
णं॥ जलावगाहनात्तेषां सद्यः शौचं विधीयत इति॥ स्नेहादिना निर्हरणे तु मनूक्तो विशेषः॥ असपिंडं द्विजं ११

प्रेतं विप्रो निर्हृत्य बंधुवत्॥ विशुध्यति त्रिरात्रेण मातुराप्तांश्च बांधवान्॥ यद्यन्नमत्ति तेषां तु दशाहेनैव शु
ध्यति॥ अनदन्नन्नमह्नैव न चेत्तस्मिन् गृहे वसेदिति॥ अत्रेयं व्यवस्था॥ यः स्नेहादिना शवनिर्हरणं कृ
त्वा तदीयमेवान्नमश्नाति॥ तद्गृहे च वसति तस्य दशाहेनैव शुद्धिः॥ यस्तु केवलं तद्गृहे वसति न पुनस्तद
न्नमश्नाति तस्य त्रिरात्रं यः पुनर्निर्हरणमात्रं करोति न तद्गृहे वसति न चाश्नाति तस्यैकाह इति॥ एतत्सजा
तीयविषयं॥ विजातीयविषये पुनर्यज्जातीयं प्रेतं निर्हरति तज्जातिप्रयुक्तमाशौचं कार्यं॥ यथाह गौतमः॥ अ
वरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत्पूर्वो वाऽवरं तत्र तच्छवोक्तमाशौचमिति॥ उपस्पर्शनं निर्हरणं॥ विप्रस्य शूद्र
निर्हरणे मासमाशौचं॥ शूद्रस्य तु विप्रनिर्हरणे त्रिरात्रमित्येवं शावच्छौचं कार्यमित्यर्थः॥ ॥ ब्रह्मचारिणं प्र
त्याह॥ आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती॥ सकटान्नं च नाश्नीयान्न च तैः सह संवसेत्॥ आचार्य उक्त
लक्षणः॥ माता च पिता च पितरौ॥ उपाध्यायश्च पूर्वोक्तः॥ एतान्निर्हृत्यापि व्रती ब्रह्मचारी व्रतेन पुनस्य व्रत

१२ भ्रंशः॥ कटशब्देनाशौचं लक्ष्यते॥ तत्सहचरितमन्नं सकटान्नं तद्ब्रह्मचारिणा आद्यान्त्याशौचिभिः सह संवसे
त्॥ एवं च वदता चार्यादिव्यतिरिक्तप्रेतनिर्हरणे ब्रह्मचारिणो व्रतलोप इत्यर्थादुक्तं भवति॥ अत एव वशिष्ठेनो
क्तं॥ ब्रह्मचारिणः शवकर्मणा व्रतान्निवृत्तिरन्यत्र मातापितृभ्यो गुरोरिति॥ ॥आशौचिनां नियमविशेषमाह॥
क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक्पृथक्॥ पिंडयज्ञावृता देयं प्रेतायान्नं दिनत्रयं॥ क्रीतमयाचितलब्धं
वा अशनं येषां ते क्रीतलब्धाशनाः॥ भवेयुरिति शेषः॥ क्रीतलब्धाशननियमात्तदलाभे अनशनमर्थात्सि
द्धं भवति॥ अत एव वशिष्ठः॥ गृहान्तं वर्जयित्वा च प्रस्तरे त्र्यहमनश्नन्त आसीरन्क्रीसीरन्क्रीतोत्पन्नेन वा
वर्तेरन्निति॥ अत्र प्रस्तर आशौचिनां शयनासनार्थं तृणमयः प्रस्तरः॥ ते च सपिंडा भूमावेव पृथक्पृथ
क् शयीरन्निति मरणदाहे॥ मनुनाप्यत्र विशेषो दर्शितः॥ अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहं॥ मां
साशनं च नाश्नीयुः शयीरंश्च पृथक् क्षिताविति॥ तथा गौतमेनापि विशेष उक्तः॥ अधःशय्यासनिनो ब्रह्मचा

रिणः सर्वे इति॥ तथा पिंडपितृयज्ञप्रक्रियया प्राचीनावीतित्वादिरूपया प्रेताय दिनत्रयं पिंडरूपमन्नं तत्संप्रो
क्षितोदेयं यथाह मरीचिः॥ प्रेतपिंडं बहिर्दद्याद्दर्भमंत्रविवर्जितं॥ प्रागुदीच्यां चरुं कृत्वा स्नातः प्रयतमान
स इति॥ दर्भविवर्जितत्वमनुपनीतविषयं॥ असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशेष्विति प्र
चेतसः स्मरणात्॥ तथा कर्तृनियमश्च गृह्यपरिशिष्टात् विज्ञेयः॥ असगोत्रः सगोत्रो वा यदि स्त्री यदि
वा पुमान् प्रथमेहनि यो दद्यात्स दशाहं समापयेदिति॥ तथा द्रव्यनियमश्च पुनः पुलस्त्येन दर्शितः॥ शा
लिना सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत्॥ प्रथमेहनि यद्द्रव्यं तदेव स्याद्दशाहिकं॥ तच्छ्रीप्रसेकं पुष्पं च
धूपं दीपं तथैव चेति॥ पिंडश्च पाषाणे देयः॥ भूमौ माल्यं पिंडपानीयमुपले वा दद्युरिति शंखस्मरणात्॥
न च दद्युरिति बहुवचनेनोदकदानवत्सर्वैः पिंडदानं कार्यमित्याशंकनीयं॥ किंतु पुत्रेणैव कार्यं तदभावे
प्रत्यासन्नेन सपिंडानामन्यतमेन तदभावे मातृसपिंडादिना कार्यं॥ पुत्राभावे सपिंडाः मातृसपिंडाः शि

ष्याश्च दद्युः॥ तदभावे ऋत्विगाचार्याविति गौतमस्मरणात्॥ पुत्रवत्त्वे पुनर्ज्येष्ठेनैव कार्यं॥ सर्वैरनुमतिं
१३ कृत्वा ज्येष्ठेनैव तु यत्कृतं॥ द्रव्येण वाविभक्तेन सर्वैरेव कृतं भवेदिति मरीचिस्मरणात्॥ पिंडसंख्यानियम
श्च॥ ब्राह्मणस्य दश पिंडाः॥ क्षत्रियस्य द्वादशैवं स्येवमाशौचदिनसंख्यया विष्णुनाभिहितः॥ यावदाशौचं
प्रेतस्योदकं पिंडमेकं च दद्युरिति॥ तथास्मृत्यंतरेपि॥ नवभिर्दिवसैर्दद्यान्नवपिंडान्समाहितः दशमं पिं
डमुत्सृज्य रात्रिशेषे शुचिर्भवेदिति॥ शुचित्ववचनमपरेद्युः क्रियमाणश्राद्धार्थब्राह्मणनिमंत्रणाभिप्रा
येण योगीश्वरेण तु पिंडत्रयदानमभिहितं॥ अनयोश्च गुरुलघुकल्पयोरुदकदानविषयोप्यव
स्था विज्ञेया॥ अत्रापरः शातातपीयो विशेषः॥ आशौचस्य च ह्रासेपि पिंडान्दद्याद्दशैव त्विति त्रिरात्रा
शौचिनो पुनः पारस्करेण विशेषो दर्शितः॥ प्रथमे दिवसे देयास्त्रयः पिंडाः समाहितः॥ द्वितीये चतुरो राम०
दद्याद्दशैवं त्विति त्रिरात्राशौचिनो पुनः पारस्करेण विशेषो दर्शितास्थिसंचयनं तथा॥ त्रीन्तु दद्यात्तृती १३

येह्नि वस्त्रादिक्षालयेत्तथैवेति॥ किंच॥ जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये॥ जलं क्षीरं च मृन्मयेपा
त्रद्वये पृथक् आकाशे शिक्यादावेकाहं स्थापनीयं विशेषानुपादानात्प्रथमेहनि कार्यं॥ तथा पारस्करवच
नात्प्रेतात्र स्नाहीत्युदकं स्थाप्यं पिबेदमिति क्षीरं॥ तथास्थिसंचयनं च प्रथमादिदिनेषु कार्यं॥ तथाह सं
वर्तः॥ प्रथमेह्नि तृतीये वा सप्तमे नवमे तथा॥ अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सहेति॥ क्वचित्तु द्विती
येत्वस्थिसंचय इत्युक्तं॥ वैष्णवे तु चतुर्थे दिवसेऽस्थिसंचयनं कुर्यात्तेषां च गंगांभसि प्रक्षेप इति॥ अंताऽ
न्यतमस्मिन्दिने स्वगृह्योक्तविधिना अस्थिसंचयनं कार्यं। अंगिरसा चात्र विशेषो दर्शितः॥ अस्थिसंच
यने यागो देवानां परिकीर्तितः॥ प्रेतीभूतं तथोद्दिश्य यः शुचिर्नैकरोति चेत्॥ देवतानां तु यजनं तं शयं प्र
पद्देवताः देवताश्चात्र श्मशानवासिन्यस्तत्र पूर्वे दग्धाः॥ श्मशानवासिनो देवाः शवानां परिकीर्तिता इति
तेनोक्तं॥ अत्र स्नानदेवतानचिरमृतं च प्रेतमुद्दिश्य धूपदीपादिभिः पिंडरूपेण चान्नेन तत्र पूजा कार्यं

भवनीत्यनु

सूक्तं भवति। तथा वपनं च दशमे ऽहनि कार्यं॥ दशमे ऽहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्॥ तत्र त्याज्यानि वा
१४ सांसि केशश्मश्रुनखानि चेति देवलस्मरणात्॥ तथा स्मृत्यंतरे ऽपि॥ द्वितीये ऽहनि कर्त्तव्यं क्षुरकर्म प्रय
त्नतः॥ तृतीये पंचमे वापि सप्तमे वा प्रदानतः इति॥ श्राद्धप्रदानादर्वागानियमइतियावत्॥ वपनं च कर्मा व
मित्याकांक्षायामापस्तंबेनोक्तं॥ अनुभाविनां च परिवापनमिति॥ अयमर्थः॥ शावं दुःखमनुभाविनः
सपिंडास्तेषां चाविशेषेण वपनमुतास्ववयसामित्यपेक्षायामिदमेवोपतिष्ठते॥ अनुभाविनां परिवा
पनमिति॥ अनुपश्चाद्भवंतीत्यनुभाविनो ऽल्पवयसस्तेषां वपनमिति॥ अनुभाविनः पुत्रा इति केचि
न्मन्यंते॥ गंगायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृते॥ आधानकाले सोमे च वपनं सप्तसु स्मृतमिति निय
मदर्शनात्॥ अथ शुचित्वेन सकलश्रौतस्मार्तकर्माधिकारनिवृत्तौ प्रसक्तायां केषुचिदभ्यनुज्ञार्थमाह॥ ग म०
वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात्॥ वितानो ऽग्नीनां विस्तारस्तत्र भवा वैतानास्त्रेताग्निसा १४

प्रयाग

ध्या अग्निहोत्रदर्शपौर्णमासाद्याः क्रियाऽश्वौ॥ प्रतिदिनमुपास्यत इत्युपासनो गृह्योग्निस्तत्र भवा औपास
नाः सायं प्रातर्होमक्रियाऽश्यंते॥ ताश्चैता वैतानोपासनां वैदिक्यः क्रियाः कार्याः कथं वैदिकत्वमिति चेत्
॥श्रुतिचोदनात्॥ तथाहि॥ यावज्जीवमग्निहोत्रं जुहुयादित्यादिश्रुतिभिरग्निहोत्रादीनां चोदनास्त्येव॥ तथा
अहरहः स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठादितिश्रुतौपासनहोमोपि चोद्यते॥ अत्र च श्रौतत्वविशेषणो
पादानात्स्मार्तक्रियाणां दानादीनामननुष्ठानं गम्यते॥ अत एव वैयाघ्रपादेनोक्तं॥ स्मार्तकर्मपरित्यागो राहोर
न्यत्र सूतके॥ श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयादिति॥ श्रौतानां च कार्यत्वाभिधानं नित्यनैमित्तिका
भिप्रायेण॥ यथाहं यत्रीनामिः॥ नित्यानि निवर्तेरन्वैतानवर्ज्यं शालाग्नौ चैक इति॥ नित्यानि निवर्तेरन्नित्यविशे
षणादावश्यकानां नित्यनैमित्तिकानां निवृत्तौ प्रसक्तायां वैतानवर्ज्जमित्यग्नित्रयसाध्यावश्यकानां पर्युदासः॥
शालाग्नौ चैक इति गृह्याग्नौ भवानामप्यावश्यकानां पाक्षिकः पर्युदास उक्तः॥ अतस्तेषां शौचं नास्त्येव॥ काम्या

१५ नापुनः शौचाभावादननुष्ठानमनुताप्यानेनैवाभिप्रायेणोक्तं॥ प्रत्यहेऽन्नाग्निषुक्रियाइति॥ अग्निषुक्रियानप्र
त्यहेऽपिस्यनग्निसाध्यानां पंचमहायज्ञादीनां निवृत्तिः॥ अतएव संवर्त्तः॥ होमं तत्र च कुर्वीत शुष्कान्नेन फले
नवा॥ पंचयज्ञविधानं तु न कुर्यान्मृत्युजन्मनोरिति॥ वैश्वदेवस्याग्निसाध्यत्वेपि वचनान्निवृत्तिः॥ विमेस्
त्रिः॥ विप्रो दशाहमासीत वैश्वदेवविवर्जितइति तेनैवोक्तत्वात्॥ मृतके कर्म्मणां त्यागः संध्यादीनां विधी
यते इति यद्यपि संध्याया निवृत्तिः श्रूयते तथाप्यंजलिप्रक्षेपादिकं कार्यं॥ मृतके सावित्र्या चांजलिं प्रक्षिप्य प्र
दक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यादिति पैठीनसिस्मरणात्॥ यद्यपि वैतानोपासनाः कार्याइति सामान्येनोक्तं
तथाप्यन्येन कारयितव्याः॥ अन्यएतानि कुर्युरिति पैठीनसिस्मरणात्॥ बृहस्पतिनाप्युक्तं॥ मृतके मृतके चैव
अशक्तौ श्राद्धभोजने॥ प्रवासादिनिमित्तेषु हावयेन्नतु हापयेदिति॥ तथा स्मार्त्तत्वेपि पिंडपितृयज्ञश्रवणाकर्मा राम०
श्वयुज्याहिकश्च नित्यो होमः कार्य एव। मृतके तु समुत्पन्ने स्मार्त्तं कर्म्म कथं भवेत्॥ पिंडयज्ञं चरुं होममसगोत्रेण १५

कारयेदिति जातूकर्ण्यस्मरणात्॥ यद्यपि सांगे कर्मण्यपन्यकर्तृत्वं तथापि स्वद्रव्यत्यागात्मकं प्रधानं स्वयं कुर्यात्॥ त
स्यानन्यनिष्पाद्यत्वादत एवोक्तं॥ श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयादिति॥ यत्तु न दानं न प्रतिग्रहो होमः
स्वाध्यायश्च निवर्त्तत इति होमप्रतिषेधः स काम्याभिप्रायो वैश्वदेवाभिप्रायो वा व्यवस्थापनीयः॥ तथा मृतका
न्नभोजनमपि न कार्यम्॥ उभयत्र दशाहानि कुलस्यान्नं न भुज्यते इति यमस्मरणात्॥ उभयत्र जननमरणयो
ः॥ दशाहानीत्याशौचकालोपलक्षणं॥ कुलस्य मृतकयुक्तस्य संबंध्यन्नमसकुल्यैर्न भोक्तव्यं॥ सकुल्यानां पुनर्न
दोषः॥ मृतके तु कुलस्यान्नमदोषं मनुरब्रवीदिति तेनैवोक्तत्वात्॥ अयं च निषेधो दातृभोक्त्रोरन्यतरेण ज
ननमरणे ज्ञाते सति द्रष्टव्यः॥ उभाभ्यामपरिज्ञाते मृतकं नैव दोषकृत्॥ एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहे
दिति षट्त्रिंशन्मते दर्शनात्॥ तथा विवाहादिषु मृतकोत्पत्तेः प्राक् ब्राह्मणार्थं पृथक्कृतमन्नं भोक्तव्यमेव॥ विवा
होत्सवयज्ञेषु त्वंतरा मृतसूतके। पूर्वसंकल्पितार्थेषु न दोषः परिकीर्त्तित इति बृहस्पतिस्मरणात्॥ तथा परो

पि विशेषः षड्भिरन्यैरेते दर्शितः ॥ विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके ॥ परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजो-
२६ त्तमैः ॥ भुंजानेषु तु विप्रेषु त्वंतरा मृतसूतके ॥ अन्यगेहोदका चान्ताः सर्वे ते शुचयः स्मृता इति ॥ तथाशौचि-
परिग्रहत्वेपि केषुचिद्द्रव्येषु दोषाभावः ॥ यथाह मरीचिः ॥ लवणे मधुमांसे च पुष्पमूलफलेषु च ॥ शाककाष्ठ-
तृणेष्वप्सु दधिसर्पिःपयःसु च ॥ तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः ॥ पण्येषु चैव सर्वेषु नाशौचं मृत-
सूतक इति ॥ पक्वं भक्ष्यजातं । अपक्वं तंडुलादि स्वयंग्रह इति स्वयमेव स्वाम्यनुज्ञातो गृह्णीयादित्यर्थः ॥ पक्वा-
पक्वाभ्यनुज्ञानमन्नसत्रप्रवृत्तविषयं ॥ अन्नसत्रप्रवृत्तानामाममन्नमगर्हितं ॥ भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं
तु पयः पिबेदित्यंगिरःस्मरणात् ॥ अन्नशब्दो भक्ष्यव्यतिरिक्तौदनादिविषयः ॥ शवसंसर्गनिमित्ताशौचे तु अं-
गिरसा विशेष उक्तः ॥ आशौचं यस्य संसर्गादापतेद्गृहमेधिनः ॥ क्रियास्तस्य न लुप्यंते गृह्याणां च न तद्भवेदिति गम०
॥ तदाशौचं केवलं गृहमेधिन एव न पुत्रस्य तद्गृहे भवानां भार्यादीनां तद्गृह्याणां च भवेदित्यर्थः ॥ अतिक्रांताशौचेप्य- २६

यमेवार्थः स्मृत्यंतरे दर्शितः ॥ अतिक्रांते दशाहे तु पश्चाज्जानाति चेद्गृही ॥ त्रिरात्रं सूतकं तस्य न तु कर्हिचिदि- द्व्यस्य
ति ॥ एवमाशौचिनां विधिप्रतिषेधरूपान्धर्मानभिधायाधुनाशौचनिमित्तकालनियममाह ॥ त्रिरात्रं दश-
रात्रं वा शावमाशौचं लक्ष्यते ऊनद्विवर्षउभयोः सूतकं मातुरेव हि ॥ शवनिमित्तमाशौचं शावं ॥ सूतकशब्दे- जन्माशौचं
न जननं वाचिना ॥ तन्निमित्तमाशौचं लक्ष्यते एवं च वदता जननमरणयोराशौचनिमित्तत्वमुक्तं भवति ॥
तच्च जन्ममरणमुत्पन्नं ज्ञातमेव निमित्तं ॥ निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म चेत्यादिलिंगदर्शनात् ॥ त-
था ॥ विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं ॥ यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्यादिसादिवाक्यारंभसा-
मर्थ्याच्च ॥ उत्पत्तिमात्रापेक्षत्वे ह्याशौचस्य दशाहाद्याशौचकालनियमास्तत्प्रभृति काण्वेव स निर्दश ज्ञातिम-
रणश्रवणे दशरात्रशेषमेवाशौचमर्थात्सिद्ध्यतीति यच्छेषं दशरात्रस्येत्याद्यनारंभणीयं स्यात् ॥ तस्मात्तु ज्ञातमेव
जननं मरणं च निमित्तं तच्चोभयनिमित्तं तच्चोभयनिमित्तमप्याशौचं त्रिरात्रं दशरात्रं चेष्यते मन्वादिभिः ॥

Dr. BHAU DAJI MEMORIAL

२७ अत्राशौचप्रकरणेऽहर्ग्रहणेनाहोरात्रोपलक्षणार्थमन्वादिभिरिष्यत इति वचनं॥ तदुक्तं सपिंडे समानो ३
दकरूपविषयभेदप्रदर्शनार्थं॥ तथाहि॥ दशाहं शावमाशौचं सपिंडेषु विधीयते॥ जननेऽप्येवमेव स्यान्नि
पुणां शुद्धिमिच्छतां॥ जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते॥ शावस्पर्शे विशुद्ध्यंतीत्यहात्त्वुदकदायि
नइत्येते वाक्ये त्रिरात्रदशरात्रयोः समानोदकसपिंडविषयत्वेन व्यवस्था कृता॥ अतः सपिंडानां सप्तम
पुरुषावधिकानामविशेषेण दशरात्रं समानोदकानां त्रिरात्रमिति॥ यत्पुनः स्मृत्यंतरवचनं॥ चतुर्थे द
शरात्रं स्यात्षण्णिशाः पुंसि पंचमे॥ षष्ठे चतुरहाच्छुद्धिः सप्तमे त्वहरेव त्विति तद्विगीतत्वान्नादरणीयं॥ य
द्यप्यविगीतं तथापि मधुपर्कगोपश्वालंभवल्लोकविद्विष्टत्वान्नानुष्टेयं॥ अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याच
रेन्नत्विति मनुस्मरणात्॥ नच सप्तमे प्रसासन्ने सपिंडे एकाहो विप्रकृष्टाष्टमादिषु समानोदकेषु त्र्यहत इति राम०
युक्तं॥ एवमविशेषेण सपिंडानामाशौचे प्राप्ते कंचिद्विशेषमाह॥ ऊनद्विवर्षे संस्थितेऽभयोरेव माता २७

पित्रोर्दशरात्रमाशौचं न सर्वेषां सपिंडानां तेषां तु वक्ष्यति॥ आदंतजननात्सद्य इति॥ तथाच पैंग्यः॥ गर्भस्थे
प्रेते मातुर्दशाहं जातेऽभयोः मातापित्रोः कृतेनाग्निसोदराणां चेति॥ अथवायमर्थः॥ ऊनद्विवर्षे संस्थिते
ऽभयोर्मातापित्रोरेव नेतरेषामिति॥ अस्पृश्यत्वलक्षणमिसभिप्रेतं॥ इतरस्य पुनः कर्मानधिकारलक्षणं
सपिंडेष्वपि॥ आदंतजन्मनः सद्य इत्यादिभिर्विहितत्वात्॥ अत्र दृष्टांतः॥ सूतकं मातुरेव हीति यथा सूतकं ज
ननिमित्तमस्पृश्यत्वलक्षणमाशौचं मातुरेव केवलं तथोनद्विवर्षोपरमे मातापित्रोरेवास्पृश्यत्वलक्षणमा
शौचं॥ न सपिंडानां॥ तथाच स्मृत्यंतरे॥ ऊनद्विवर्षे प्रेते मातापित्रोरेव नेतरेषां॥ इत्यस्पृश्यत्वमिति॥ ऊनद्वि
वर्षे सपिंडानामस्पृश्यत्वं प्रतिषेधताऽन्यत्रास्पृश्यत्वमभ्यनुज्ञातं भवति॥ तथाच देवलः॥ स्वाशौचकालाद्विज्ञे
यं स्पर्शनं तु त्रिभागतः॥ शूद्रविट्क्षत्रविप्राणां यथाशास्त्रं प्रचोदितमिति॥ एतच्चानुपनीतप्रायणनिमित्ते
अतिक्रांताशौचे च त्रिरात्राहोरात्रविहितत्वं उपनीतविषये पित्रैवोक्तं॥ दशाहादित्रिभागेन कृते संचयने कमा

१८ त॥अंगस्पर्शनमिच्छंति वर्णानां तत्त्वदर्शिनः॥त्रिचतुःपंचदशभिःस्पृश्या वर्णाः क्रमेण तु॥भोज्यान्नोद
शभिर्विप्रः शेषाद्धि त्रिषडुत्तरैरिति॥द्व्युत्तरैर्दशभिः॥त्र्युत्तरैर्दशभिः॥षडुत्तरैःपंचदशभिरिति द्रष्ट
व्यं॥जनननिमित्तमस्पृश्यत्वमाशौचमाह॥पित्रोस्तु सूतकं मातुस्तद्दस्रग्दर्शनाद्ध्रुवं॥तदहर्न प्रदुष्येत पूर्वेषां
जन्मकारणात्॥सूतकं जनननिमित्तमस्पृश्यत्वलक्षणमाशौचं॥पित्रोर्मातापित्रोरेव॥न सर्वेषां सपिंडा
नां तत्रापि अस्पृश्यत्वं मातुर्ध्रुवं दशाहपर्यंतं स्थिरमित्यर्थः॥कुतस्तद्दस्रग्दर्शनात्॥तस्याः संबंधित्वेनास्रजो
दर्शनात् अत एव वसिष्ठः॥नाशौचं विद्यते पुंसः संसर्गं चेन्न गच्छति॥रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न वि
द्यत इति॥पितुस्तु ध्रुवं न भवति स्नानमात्रेणास्पृश्यत्वं निवर्तते॥तथाह संवर्तः॥जाते पुत्रे पितुः स्नानं
सचैलं तु विधीयते॥माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुरिति॥माता शुद्ध्येद्दशाहेनेत्येतच्च संव्यवहा राम०
रयोग्यतामात्रं॥अदृष्टार्थेषु पुनः कर्मसु पैठीनसिना विशेष उक्तः॥सूतकं पुत्रवती विंशतिरात्रेण कर्मा १८

णि कारयेन्मासेन स्त्री जननीमिति॥अंगिरसा च॥सपिंडानामस्पृश्यत्वाभावः स्पष्टीकृतः॥सूतके सूतिकाव
र्ज्जं संस्पर्शो न निषिध्यते॥संस्पर्शे सूतिकायास्तु स्नानमेव विधीयत इति यस्मिन्दिने कुमारजननं तदहर्न दुष्येत
॥तन्निमित्तदानाद्यधिकारापहारकं न भवतीत्यर्थः॥यस्मात्तदहनि पूर्वेषां पित्रादीनां पुत्ररूपेण जन्म उत्पत्ति स्मि
स्तस्मात्तदहर्न दुष्यते तथा च हद्याज्ञवल्क्येनोक्तं॥कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रहः॥हिरण्यभू
गवाश्वाजवासः शय्यासनादिषु॥तत्र सर्वं प्रतिग्राह्यं कृतान्नं न तु भक्षयेत्॥भक्षयित्वा तु तन्मोहाद्द्विजश्चांद्रा
यणं चरेत् इति॥व्यासेनाप्यत्र विशेष उक्तः॥सूतिकावासनिलया जन्मदा नाम देवताः॥तासां यागनिमित्तं तु शु
द्धिर्जन्मनि कीर्तिता॥प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा॥त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनीति॥मार्कंडेये
नापि॥रक्षणीया तथा षष्ठी निशा तत्र विशेषतः॥रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः॥पुरुषाः शस्त्रहस्ता
श्च नृत्यगीतैश्च योषितः॥रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतक इति॥ ॥आशौचमध्ये पुनर्जनने मरणे

त्ः अंगस्पर्शनमिच्छंति वर्णानां तत्त्वदर्शिनः॥ त्रिचतुःपंचदशभिः स्पृश्या वर्णाः क्रमेण तु भोज्यान्नोद
१८ शभिर्विप्रः शेषाद्वित्रिषडुत्तरैरिति॥ द्युत्तरैर्दशभिः॥ त्र्युत्तरैर्द्वादशभिः। षडुत्तरैः पंचदशभिरिति द्रष्ट
व्यं॥ जननिमित्तमस्पृश्यत्वमाशौचमाह। पित्रोस्तु सूतकं मातुरस्तद्दर्शनाद्ध्रुवं॥ तदहर्नप्रदुष्येत पूर्वेषां
जन्मकारणात्॥ सूतकं जननिमित्तमस्पृश्यत्वलक्षणमाशौचं॥ पित्रोर्मातापित्रोरेव। न सर्वेषां सपिंडा
नां तत्रापि अस्पृश्यत्वं मातुर्ध्रुवं दशाहपर्यंतं स्थिरमित्यर्थः॥ कुतस्तद्दस्रग्दर्शनात्॥ तस्याः संबंधित्वेनास्रजो
दर्शनात् अत एव वसिष्ठः॥ नाशौचं विद्यते पुंसः संसर्गं चेन्न गच्छति॥ रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न वि
द्यत इति॥ पितुस्तु ध्रुवं न भवति स्नानमात्रेणास्यास्पृश्यत्वं निवर्त्तते॥ तथाह संवर्त्तः॥ जाते पुत्रे पितुः स्नानं
सचैलं तु विधीयते॥ माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुरिति॥ माता शुध्येद्दशाहेनेत्येतच्च संव्यवहा राम०
रयोग्यतामात्रं॥ अदृष्टार्थेषु पुनः कर्मसु पैठीनसिना विशेषः उक्तः॥ सूतकां पुत्रवतीं विंशतिरात्रेण कर्मा १८

णि कारयेन्मासेन स्त्रीजननीमिति॥ अंगिरसा च॥ सपिंडानामस्पृश्यत्वाभावः स्पष्टीकृतः॥ सूतके सूतिकाव
र्जं संस्पर्शो न निषिध्यते॥ संस्पर्शे सूतिकायास्तु स्नानमेव विधीयत इति यस्मिन्दिने कुमारजननं तदहर्न दुष्येत
॥ तन्निमित्तदानाद्यधिकारापहारकृन्न भवतीत्यर्थः॥ यस्मात्तत्र्यहनि पूर्वेषां पितॄणां पुत्ररूपेण जन्म ऽस्ति स्मि
तस्मात्तदहर्न दुष्यते तथा च हद्याज्ञवल्क्येनोक्तं। कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रहः॥ हिरण्यभू
गवाश्वाजवासः शय्यासनादिषु॥ तत्र सर्वं प्रतिग्राह्यं कृतान्नं न तु भक्षयेत्॥ भक्षयित्वा तु तन्मोहाद्द्विजश्चांद्रा
यणं चरेदिति॥ व्यासेनाप्यत्र विशेष उक्तः॥ सूतिकावासनिलया जन्मदानाम देवताः॥ तासां यागनिमित्तं तु शु
द्धिर्जन्मनि कीर्त्तिता॥ प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा॥ त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनीति॥ मार्कंडेये
नापि॥ रक्षणीया तथा षष्ठी निशा तत्र विशेषतः॥ रात्रौ जागरणं कार्यं जन्मदानां तथा वलिः॥ पुरुषाः शस्त्रहस्ता
श्च नृत्यगीतैश्च योषितः॥ रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतक इति॥ ॥आशौचमध्ये पुनर्जनने मरणे

१९ वाजाते प्रतिनिमित्तकमावर्त्तत इति न्यायेन पुनर्दशाहाद्याशौचप्राप्तौ तदपवादमाह ॥ अंतरा जन्ममरणे
शेषाहोभिर्विशुध्यति ॥ वर्णापेक्षयावयोवस्थापेक्षया वा यस्य यावानाशौचकालस्तदंतरा तन्मध्ये मृत
तो न्यूनस्य वाशौचस्य निमित्तभूते जनने मरणे वा जाते पूर्वाशौचावशिष्टैरेवाहोभिर्विशुध्यति ॥ न पुनः
पश्चादुत्पन्नजननादिनिमित्तं पृथगाशौचं कार्यं ॥ यदा पुनर्वर्त्तमानाशौचाद्दीर्घकालमंतरापतति तदा न माशौच
पूर्वशेषेण शुद्धिः यथाहोशना । अल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि ॥ न पूर्वेण विशुद्धिः स्यात्स्वका
लेनैव शुध्यतीति ॥ यमोप्याह अथ वृद्धिमदाशौचं पश्चिमेन समापयेदिति ॥ अत्र चांतरा जन्ममरण इति
यथम्याविशेषेणाभिहितं ॥ तथा विसूतकांतर्वर्त्तिनः शावस्य न पूर्वाशौचशेषेण शुद्धिः ॥ यथाहांगिराः ॥ सू
तके मृतकं चेत्स्यान्मृतके त्वथ सूतकं ॥ तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकमिति ॥ तथा षड्विंशन्मतेपि राम०
शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् ॥ शावेन शुध्यते सूतिर्न सूतिः शावशोधिनीति तस्मान्न सूतकांतः १९

पातिनः शावस्य पूर्वशेषेण शुद्धिः ॥ किंतु शावांतः पातिन एव सूतकस्य ॥ तथा सजातीयांतः पातित्वेपि शाव
स्य क्वचित्पूर्वशेषेण शुद्धेः अपवादः स्मृत्यंतरे दर्शितः ॥ मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता पितुः शे
षेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीमिति अयमर्थः ॥ मातरि पूर्वं मृतायां तन्निमित्ताशौचमध्ये यदि पितु
रुपरमः स्यात्तदा न पूर्वेण शुद्धिः ॥ किंतु पितुः प्रयाणनिमित्ताशौचकालेनैव शुद्धिः कार्या ॥ तथा पितुः प्रया
णनिमित्ताशौचमध्ये मातरि स्वर्यातायामपि न पूर्वशेषमात्रात् शुद्धिः ॥ किंतु ॥ पूर्वाशौचं समाप्योपरि पक्षि
णीं क्षिपेदिति ॥ तथाशौचसन्निपातकालविशेषकृतोथ पवादो गौतमेनोक्तः ॥ रात्रिशेषे सति द्वाभ्यां प्रभाते ति
सृभिरिति ॥ अयमर्थः रात्रिमात्रावशिष्टे पूर्वाशौचे यद्याशौचांतरसन्निपतेत् तर्हि पूर्वाशौचसमाप्यानंत
रात्रिद्वयं द्वाभ्यां शुद्धिः प्रभाते पुनस्तस्या रात्रेः पश्चिमे यामे जननाद्याशौचांतरसन्निपाते तिसृभी रात्रिभिः शुद्धिर्न पु
नस्तच्छेषमात्रेण ॥ शातातपेनाप्युक्तं ॥ रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहादिति ॥ प्रेतक्रियापुनः सूत

कसन्निपातेपिननिवर्त्ततइतितेनैवोक्तं॥अंतर्दशाहेजननास्यश्चास्यान्मरणं यदि॥प्रेतमुद्दिश्यकर्त्तव्यंपिं
२० डदानंस्वबंधुभिः॥प्रारब्धेप्रेतपिंडेतुमध्येचेज्जननंभवेत्॥तथैवाशौचपिंडास्तुशेषाद्दद्याद्यथाविधीति॥
एकादशाहेसंप्राप्तेसूतकंतुयदाभवेत्॥कर्तुस्त्वाकालिकीशुद्धिरशुद्धः पुनरेवसइतितथाशावाशौचयोः
संनिपातेपिप्रेतकृत्यकार्यंतुल्यन्यायत्वात्॥तथाजातकर्मादिकमपिपुत्रजन्मनिमित्तकमाशौचांतरस
न्निपातेपिकार्यमेव॥यथाहप्रजापतिः॥आशौचेतुसमुत्पन्नेपुत्रजन्मयदाभवेत्॥कर्तुस्ताकालिकीशु
द्धिःपूर्वाशौचेनशुध्यतीति॥ ॥पूर्णप्रसवकालजननाशौचमभिधायाऽधुनाऽप्रासकालगर्भनिस्सरणनि
मित्तमाशौचमाह॥गर्भस्रावेमासतुल्यानिशाःशुद्धेस्तुकारणं॥स्रवतिर्यद्यपिलोकेद्रवद्रव्यकर्तृकेपरिस्पं
देप्रयुज्यते॥तथाप्यत्रद्रवाद्रव्यसाधारणरूपधःपतनेवर्त्ततेकुतःद्रवत्वस्यप्रथममासएवसंभवान्नत्रचमा
सतुल्यानिशाइतिबहुवचनाऽनुपपत्तेः॥गर्भस्यस्रावेयावंतोगर्भग्रहणमासास्तत्सममसंख्यानिशाःशुद्धेःका राम० २०

रणं॥एतच्चस्त्रियाएव॥गर्भस्रावेमासतुल्याराज्यःस्त्रीणांस्नानमात्रमेवपुरुषस्येतिवृद्धवसिष्ठस्मरणा
त्॥यत्तुनर्गौतमेन॥अहंचेतित्रिरात्रमुक्तं॥तन्मासत्रयादर्वाग्वेदितव्यं॥गर्भस्रुतौयथामासमचिरेतूत्तम
त्रयः॥राजन्येतुचतूरात्रंवैश्येपंचाहमेवतु॥अष्टाहेनतुशूद्रस्यशुद्धिरेषाप्रकीर्तितेतिमरीचिस्मरणात्॥
अचिरेमासत्रयादर्वाग्गर्भस्रावेउत्तमेब्राह्मणजातौत्रिरात्रमित्यर्थः॥एतच्चषण्मासपर्यंतंद्रष्टव्यं॥सप्तमा
दिषुपुनःपरिपूर्णमेवप्रसवाशौचंकार्यं॥तत्रपरिपूर्णांगस्यजीवतोनिर्गमदर्शनात्तत्रचलोकेप्रसवशब्द
प्रसवशब्दप्रयोगात्॥षण्मासाभ्यंतरेयावद्गर्भस्रावोभवेद्यदा॥तदामाससमैस्तासांदिवसैःशुद्धिरिष्यते
॥अतऊर्द्ध्वस्वजात्युक्तंतासामाशौचमिष्यते॥सद्यःशौचंसपिंडानांगर्भस्यपतनेसतीतिस्मरणात्॥एतच्च
सपिंडानांसद्यःशौचविधानंद्रवभूतगर्भपतनेवेदितव्यं॥यत्तुनर्वशिष्ठवचनं॥ऊनद्विवार्षिकेप्रेतेगर्भपत
नेवासपिंडानांत्रिरात्रमिति॥तत्संचमषष्ठयोःकठिनगर्भपतनविषयं॥आचतुर्थाद्भवेत्स्रावःपातपंचमष

ष्टयोः कठिनगर्भपतनविषयं॥ आचतुर्थाद्भवेत्स्रावः पातपंचमषष्ठयोः॥ अतऊर्द्ध्वंतुप्रसवोदशाहंसू
२१ तकंभवेत्॥ स्रावेमातुस्त्रिरात्रंस्यात्सपिंडाशौचवर्जनं॥ पातेमातुर्यथामासंपित्रादीनांदिनत्रयमिति
मरीचिस्मरणात्॥ सप्तममासप्रभृतिमृतजनने जातमृतेवासपिंडानाजनननिमित्तंपरिपूर्णमाशौचं
॥ जातमृतेमृतेजातेवासपिंडानांदशाहमितिहारीतस्मरणात्॥ अतः सूतकवद्दोछानाद्दाशौचंसूतक
वदितिपारस्करवचनाच्च॥ ऊं छानाद्दशाहमिति॥ आसूतिकायाउच्छानाद्दशाहमितियावत्॥ सूकवदि
तिशिश्रूपरमनिमित्तोदककृानरहितमित्यर्थः॥ बृहन्मनुरपि॥ दशाहाभ्यंतरेबालेप्रमीतेतस्यबांधवैः
॥ शणवाशौचनकर्त्तव्यंसूत्याशौचंविधीयतइति॥ तथास्मत्संतरमपिअंतर्दशाहोपरतस्यसूतकाद्दोभि
रेवाशौचमिति॥ एवमादिवचननिचयपर्यालोचनयासपिंडानांजनननिमित्ताशौचसंकोचोनास्तीतिग राम०
म्यते॥ यत्पुनर्बृहद्विष्णुवचनं॥ जातेमृतेमृतेजातेवाकुलस्यसद्यः शौचमिति॥ तच्छिश्रूपरमनिमित्तस्या २१

शौचस्यस्नानाच्छुद्धिप्रतिपादनपरं॥ नप्रसवनिमित्तस्य॥ तथाचपारस्करः॥ गर्भेयदिविपत्तिःस्या
द्दशाहंसूतकंभवेत्॥ सपिंडानांप्रसवनिमित्तस्यविद्यमानत्वात्॥ जीवञ्जातोयदिप्रेयात्सद्यएवविशु
ध्यतीतिप्रेताशौचाभिप्रायं॥ तथाहिशंखेनोक्तं॥ प्राङ्नामकरणात्सद्यः शौचमिति॥ यत्पुनः कात्यायनव
चनं॥ अनिर्द्दत्तेदशाहेतुपंचत्वंयदिगच्छति॥ सद्यएवविशुद्धिःस्यान्नप्रेतंनोदकक्रियेति॥ तदपिवैस्नवे
नसमानार्थं॥ यद्वातुनप्रेतंनैवसूतकमितिपाठस्तदासूतकमस्पृश्यत्वनवपित्रादीनांभवतीत्यर्थः॥ अ
थवायमर्थः॥ अंतर्दशाहेयदिशिश्रूपरमस्तदानप्रेताशौचंयदितत्रसपिंडजननंतदासूतकमपिनैव
कार्यं॥ किंतु॥ पूर्वाशौचेनैवशुद्धिरिति॥ यत्तुबृहन्मनुवचनं॥ जीवन्जातोयदिततोमृतः सूतकएवतु॥
सूतकंसकलंमातुःपित्रादीनांत्रिरात्रकमिति॥ यच्चबृहस्पतेतसोवचनं॥ मुहूर्तंजीवितोबालःपंचत्व
यदिगच्छति॥ मातुःशुद्धिर्दशाहेनसद्यः शौचास्तुगोत्रिणइति॥ तत्रेयंव्यवस्था॥ जननोत्तरंनाभिवर्द्धना

स्याद्वृत्तौ पित्रादीनां जनननिमित्तमाशौचं दिनत्रयं ॥ सद्यः शौचं त्वग्निहोत्राद्यर्थं ॥ स्नानोपस्पर्शनात्त
त्कालं शौचमिति शंखवचनात् ॥ नाभिवर्द्धनोत्तरकालं तु शिशुप्रायत्येपि जनननिमित्तं पूर्णमाशौचं
सपिंडानां ॥ यावन्नच्छिद्यते नालं तावन्नाप्नोति सूतकं ॥ छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति जै
मिनिस्मरणात् ॥ मनुनाप्ययमर्थो दर्शितः ॥ रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुद्ध्यते ॥ रजस्युप
रते साध्वी स्नानेन स्त्री रजस्वलेति पूर्वभागस्यार्थो दर्शितः ॥ उत्तरस्य त्वयमर्थः ॥ रजसि निस्सरणादु
परते निवृत्ते रजस्वला स्त्री स्नानेन साध्वी दैवादिकर्म्मयोग्या भवति स्पर्शादिविषये पुनस्त्वनुपरतेपि र
जसि चतुर्थेहनि स्नानाच्छुद्धा भवतीति ॥ तदुक्तं बृहन्मनुना ॥ चतुर्थेहनि संशुद्धा भवति व्यावहारि
कीति च ॥ तथा च स्मृत्यंतरं ॥ शुद्धा भर्त्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला ॥ दैवे कर्म्मणि पित्र्ये च पंचमेऽ
हनि शुद्ध्यतीति ॥ पंचमेऽहनीति रजोनिवृत्तिकालोपलक्षणार्थं ॥ यदा रजोदर्शनादारभ्य पुनः सप्तद

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीस्मारक

राम०
२२

नविंशे

शदिनाभ्यंतरे रजोदर्शनं ॥ तदाशुचित्वं नास्त्येव ॥ अष्टादशे त्वेकाहाच्छुद्धिरेकोनविंशाद्धात्ततः उत्तरेषु त्र्यहाच्छुद्धिः
॥ यथाहात्रिः ॥ रजस्वला परिस्नाता पुनरेव रजस्वला ॥ अष्टादशादिनादर्वागशुचित्वं न विद्यते एकोनविंश
तेरर्वागेकाहं स्यात्ततो द्व्यहं विंशत्प्रभृत्युत्तरेषु त्रिरात्रमशुचिर्भवेदिति ॥ ~~यत्तु चतुर्दशादिति~~ ॥ यत्तु चतुर्दशादि
नादर्वागशुचित्वं न विद्यत इति स्मृत्यंतरं ॥ तत्र स्नानप्रभृतित्वमभिप्रेतमतो न विरोधः । अयं चाशुचित्वप्र
तिषेधो यस्याः विंशतिदिनोत्तरकालमेव प्रायशो रजोदर्शनं तद्विषयः ॥ यस्याः पुनरारूढयौवनायाः प्रागे
वाष्टादशदिनात्स्वाचुर्येण रजोनिर्गमस्तस्यास्त्रिरात्रमेवाशौचं ॥ तया च यावत्त्रिरात्रं स्नानादिरहितया स्थात
व्यं ॥ रजस्वला त्रिरात्रमशुचिर्भवेदिति सा च नांजीत नाभ्यंजीत नाप्सु स्नायादधः शयीत न दिवा स्वप्यान्नाग्नीं
स्पृशेन्न रज्जुं सृजेन्न दंतान्धावयेन्न हसेन्न च किंचिदाचरेदखर्वेण पात्रेण पिबेदंजलिना
वा पात्रेण लोहितायसेन वेति विज्ञायत इति वसिष्ठस्मरणात् ॥ अंगिरसापि विशेषः दर्शितः स्त्रीयाः

स्पृत्त

२३ येवाहविर्भुकक्षितिशायिनी॥रजस्वलाचतुर्थेह्निस्नातानाशुद्धिमवाप्नुयादिति॥पाराशरेपिविशेषः॥स्नाने
नैमित्तिकेप्राप्तेनारीयदिरजस्वला॥पात्रांतरिततोयेनस्नानंकृत्वाव्रतंचरेत्॥सिक्तगात्राभवेदद्भिःसांगो
पांगाकथंचन॥नवस्त्रपीडनंकुर्यान्नान्यद्वासश्चधारयेत्इति॥उशनसाप्यत्रविशेषोदर्शितः॥ज्वराभिभू
तायानारीरजसाचपरिप्लुता॥कथंतस्याभवेच्छौचंशुद्धिःस्यात्केनकर्मणा॥चतुर्थेहनिसंप्राप्तेस्पृशेदन्या
तुतांस्त्रियं॥सासचैलावगाह्यापःस्नात्वास्नात्वापुनःस्पृशेत्॥दशद्वादशकृत्वोवाआचम्याथपुनःपुनः॥अंतेच
वाससांत्यागस्ततःशुद्धाभवेच्चसा॥दद्याच्छक्त्याततोदानंपुण्याहेनविशुध्यतीतिअयंचआतुरमात्रेस्ना
नप्रकारोऽनुसरणीयः॥आतुरेस्नानउत्पन्नेदशकृत्वोह्यनातुरः॥स्नात्वास्नात्वास्पृशेदेनंततःशुद्ध्येत्सआतु
रःइतिपराशरस्मरणात्॥यदातुरजस्वलायाःसूतिकायावामृतिर्भवति॥तदायंस्नानप्रकारः॥सूतिकायां राम०
मृतायांतुकथंकुर्वंतियाज्ञिकाः॥कुंभेसलिलमादायपंचगव्यंतथैवच॥पुण्यग्भिरभिमंत्र्यायोवाचाशुद्धिंलभे २३

त्ततः॥तेनैवस्नापयित्वातुदाहंकुर्याद्यथाविधि॥रजस्वलायास्तुपंचभिःस्नापयित्वातुगव्यैःप्रेतांरजस्वलां
वस्त्रांतरावृतांकृत्वादाहयेद्विधिपूर्वकमिति एतच्चरजोदर्शनपुत्रजन्मादिषट्कद्वयोत्तरकालमुत्पन्नंतदातद्दि
वसप्रभृत्याशौचाहोरात्रगणनाकार्या॥यदातुजन्मारजोदर्शनंपुत्रजन्मादिर्जातंतदार्द्धरात्रात्प्राग्जननाद्यु
त्पत्तौपूर्वदिवसैकदेशव्यापित्वेप्याशौचस्यतत्प्रभृत्येवगणनाकार्येत्येकःकल्पः॥रात्रिंत्रेधाविभज्याद्येभाग
द्वयेजननादौजातेपूर्वदिनंग्राह्यमितिद्वितीयः॥प्रागुदयादित्यपरः॥यदाहकश्यपः॥उदितेतुयदासूर्येना
रीणांदृश्यतेरजः॥जननंवाविपत्तिर्वायस्याहस्तस्यशर्वरी॥अर्द्धरात्रावधिःकालःसूतकादौविधीयते॥
रात्रिंकुर्यात्त्रिभागंतुद्वौभागौपूर्ववत्तु॥उत्तरांशःप्रभातेनयुज्यतेऋतुसूतके॥रात्रावेवसमुत्पन्नेमृतेरज
सिसूतके॥पूर्वमेवदिनंग्राह्यंयावन्नाभ्युदितोरविरिति॥एतेषांकल्पानांदेशाचारानुसारतोव्यवस्थाविज्ञे
या॥इदंचाशौचमाहिताग्नेरुपरमेसंस्कारदिवसप्रभृतिकर्तव्यं॥अनाहिताग्नेस्तुमरणदिवसप्रभृति॥

संचयनं तदुभयोरपि संस्कारप्रभृतीति विवेचनीयं॥ यथाहांगिराः॥ अनग्निमतउत्क्रांतेः साग्नेः संस्कारक
२४ र्मणः॥ शुद्धिः संचयनं दाहान्मृताहस्तु यथातिथीति॥ साग्नेः संस्कारकर्मणइतिश्रवणाद्दाहिताग्नेरपि तद्दे
शांतरमृतेस्तु त्वाद्दीनामासंस्कारान्नाध्याहिककर्मलोपो नास्तीत्यनुसंधेयं॥ तथा च पैठीनसिः॥ अनग्निमतउ
त्क्रांतेराशौचं हि द्विजातिषु॥ दाहादग्निमतो विद्याद्विदेशस्थे मृते सति॥ सपिंडत्वादिना दशाहादिप्राप्तोक्त
स्निन्नत्रक विशेषेऽपवादमाह॥ हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनां॥ नृपोऽभिषिक्तक्षत्रियादिः गोग्र
हणं शृंगिदंष्ट्रादितिरश्चामुपलक्षणार्थं॥ विप्रग्रहणं अंत्यजोपलक्षणं॥ एतैर्हतानां संबंधिनां ये सपिं
डास्तेषविषोद्बंधनादिभिर्बुद्धिपूर्वमात्मानं ये व्यापादयंति ते आत्मघातिनः॥ आत्मघातिग्रहणं पापघ
नाश्रितादेस्येकयोगोपात्तपतितमात्रोपलक्षणं॥ तत्संबंधिनां चान्वक्षमनुगतमक्षमन्वक्षं सद्यः शौचमित्य रा.म०
र्थः सान्वक्षं यावद्दर्शनं तावत्॥ न पुनर्दशाहादिकं॥ तथा च गौतमः॥ गोब्राह्मणहतानामन्वक्षं राजक्रोधाद्वा २४

युद्धे प्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतामिति॥ क्रोधग्रहणं प्रमादव्यापादितनिरासार्थं॥
अयुद्धग्रहणं युद्धहतस्य का हाशौचमस्तीति ज्ञापनार्थं॥ ब्रह्मणार्थे विपन्नायेयोषितां गोग्रहेपि वा॥ आहवे
पि हतानां चैकरात्रमशौचकमिति स्मरणात्॥ एतच्च युद्धकालक्षतेनैव कालांतरे विपन्नस्य स्मरणे मद्दे
नि हतस्य पुनः सद्यः शौचं यथाह मनुः॥ उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च॥ सद्यः संतिष्ठते यज्ञः तथा
शौचमिति स्थितिरिति॥ ज्ञातस्यैव जननादेराशौचनिमित्तत्वाज्जन्मादिदिनाद्दूरतरकालेपि ज्ञाते दशाहादि
प्राप्तावपवादमाह॥ प्रोषिते कालशेषः स्यात्पूर्णे दत्त्वोदकं शुचिः॥ प्रोषिते देशांतरस्थे यत्र स्थेन प्रथमदिव
सएव सपिंडजननादिकं न ज्ञायते॥ तस्मिन्सपिंडकालस्य दशाहाद्यवच्छिन्नस्य यः शेषोवशिष्टः कालः स
एव शुद्धिहेतुर्भवति॥ पूर्णे पुनराशौचकाले दशाहादिके प्रेतायोदकं दत्त्वा शुचिर्भवति॥ उदकदानस्य स्ना
नपूर्वकत्वात्॥ स्नात्वोदकं दत्त्वा शुचिर्भवति॥ तदुक्तं मनुना॥ निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च॥ सवा

साजलमाप्लुत्य शुद्धो भवति मानव इति॥ पूर्णे दत्वोदकं शुचिरिति प्रेतोदकदानसहचरितस्याशौचकालशु
२५ द्धिहेतुत्वविधानाज्जन्मन्यतिक्रांताशौचं सपिंडानां नास्तीति गम्यते॥ पितुस्तु निर्दशेपि जनने स्नानमस्त्येव
॥ श्रुत्वा पुत्रस्य जन्म चेति वचनात्॥ एतच्च पुत्रग्रहणं जन्मनि सपिंडानामतिक्रांताशौचं नास्तीत्यत्र ज्ञापकं॥
अन्यथा निर्दशं ज्ञातिमरणं श्रुत्वा जन्म च निर्दशमित्येवावक्ष्यत्॥ न चोक्तं तथा च देवलः॥ नाशुद्धिः प्रसवाशौ
चे व्यतीतेषु दिनेष्वपीति॥ तस्माद्विपक्षावेवातिक्रांताशौचमिति स्थितं केचिदन्यथेमं श्लोकं पठंति॥ प्रोषिते का
लशेषः स्यादाशेषे त्र्यहमेव तु॥ सर्वेषां वत्सरे पूर्णे प्रेते दत्वोदकं शुचिरिति॥ प्रोषिते प्रेते सर्वेषां ब्राह्मणक्षत्रि
यादीनां विशेषेण कालशेषः शुद्धिहेतुः॥ अशेषे पुनरतिक्रांते दशाहादौ सर्वेषां त्र्यहमेवाशौचं॥ संवत्सरे पू
र्णेपि हि प्रोषितप्रायणमवगतं स्नात्वा दासर्वो ब्राह्मणादिः स्नात्वोदकं दत्वा शुचिः स्यात्॥ तथा च मनुः॥ संवत्स राम०
रे व्यतीते तु स्पृष्ट्वैवापो विशुध्यतीति॥ अयं च त्र्यहो दशाहादूर्ध्वं मासत्रयादर्वाग्द्रष्टव्यः॥ पूर्वोक्तं तु सद्यः शौचं न २५

वमासादूर्ध्वमर्वाक्संवत्सराद्द्रष्टव्यं॥ यत्पुनर्वसिष्ठः॥ ऊर्ध्वं दशाहाच्छ्रुत्वैकरात्रमिति तदूर्ध्वं षण्मासेभ्यो यावन्नवमं
॥ यदपि गौतमवचनं॥ श्रुत्वा चोर्ध्वं दशम्याः पक्षिणीति तत्तन्मासत्रयादूर्ध्वमर्वाक् षष्ठात्॥ तथा च वृद्धवसिष्ठः
मासत्रये त्रिरात्रं स्यात्षण्मासे पक्षिणी तथा॥ अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यतीति॥ एतच्च मातापितृव्य
तिरिक्तविषयं॥ पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः॥ श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति पै
ठीनसिस्मरणात्॥ तथा च स्मृत्यंतरेपि॥ महागुरुनिपाते तु आर्द्रवस्त्रोपवासता॥ अतीतेब्देपि कर्तव्यं प्रेतका
र्यं यथाविधीति॥ संवत्सरादूर्ध्वमपि प्रेतकार्यमाशौचोदकदानादिकं कार्यं॥ न पुनः स्नानमात्राच्छुद्धिरित्यर्थः॥
पितृपत्न्यामपि मातृव्यतिरिक्तायां स्मृत्यंतरे विशेषो दर्शितः॥ पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमः॥ संवत्स
रे व्यतीतेपि त्रिरात्रमशुचिर्भवेदिति॥ यस्तु तद्यादिव्यवहिते देशांतरे मृतस्तत्सपिंडानां दशाहादूर्ध्वं मासत्रयाद
र्वागपि सद्यः शौचं॥ देशांतरमृतं श्रुत्वा क्लीबे वैखानसे यतौ॥ मृते स्नानेन शुध्यंति गर्भस्रावे च गोत्रिण इति॥ देशा

तरलक्षणं बृहस्पतिनोक्तं॥ महानद्यंतरं यत्र गिरिर्वा व्यवधायकः॥ वाचो यत्र विभिद्यंते तद्देशांतरमुच्यते॥
२६ देशांतरं वदंत्येके षष्टियोजनमायतं॥ चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव चेति॥ इदं चातिक्रांताशौचमुप
नीतोपरमविषयं॥ न पुनर्वयोवस्थाविशेषाशौचविषयमपि॥ तथा चोक्तं आद्यपादेन॥ तुल्यं वयसि सर्वेषा
मतिक्रांते तथैव च॥ उपनीते तु विषमं तस्मिन्नेवातिकालजमिति॥ अयमर्थः॥ वयसि त्रिवर्षादिरूपे यदा
शौचमादंतजन्मनः सद्यइत्यादिवाक्यविहितं तत्सर्वेषां ब्राह्मणादिवर्णानां तुल्यमविशिष्टं॥ अतिक्रांते च
दशाहादिके त्र्यहादिपक्षाशौचं तदपि सर्वेषामविशिष्टं॥ उपनीते पुनरुपरते दशाहद्वादशपंचदशत्रिंशद्दिना
नीत्येवं विषममाशौचं ब्राह्मणादीनां॥ तस्मिन्नेवोपनीतोपरमे त्वतिकालजमतिक्रांताशौचं भवति॥ न व
योवस्थाशौचातिक्रम इति॥ क्षत्रियादिषु दशरात्रस्य सपिंडाशौचस्यापवादमाह॥ क्षत्रस्य द्वादशाहानि विशः राम०
पंचदशैव तु॥ त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिनः॥ क्षत्रियवैश्यशूद्राणां सपिंडजननेतदुपरमे च यथा २६

क्रमेण द्वादशपंचदशत्रिंशद्दिनान्याशौचं भवति॥ न्यायवर्तिनः पुनः शूद्रस्य पाकयज्ञद्विजशुश्रूषादिरत
स्य तदर्धं तस्य मासस्यार्धं पंचदशरात्रमाशौचं॥ एवं च त्रिरात्रदशरात्रं वैश्येतद्दशरात्रमाशौचं पारिशेष्यात् ब्रा
ह्मणविषयेऽवतिष्ठते॥ अन्यत्र पुनः क्षत्रियादीनां दशाहाद्याशौचकल्पा दर्शिताः॥ तथाह पराशरः॥ क्ष
त्रियस्तु दशाहेन स्वकर्मनिरतः शुचिः॥ तथैव द्वादशाहेन वैश्यः शुद्धिमवाप्नुयात्॥ तथा च शातातपः॥ एकाद
शाहाद्राजन्यो वैश्यो द्वादशभिस्तथा॥ शूद्रो विंशतिरात्रेण शुध्यते मृतसूतके॥ वसिष्ठस्तु॥ पंचदशरात्रेण राज
न्यो विंशतिरात्रेण वैश्य इति॥ अंगिरास्त्वाह॥ सर्वेषामेव वर्णानां सूतके मृतके तथा॥ दशाहाच्छुद्धिः शातातपोब्र
वीत्॥ इत्येवमनेकोच्चावचाशौचकल्पा दर्शिताः॥ तेषां लोके समाचाराभावान्नातीव व्यवस्थादर्शनमुपयोगीति
नात्र व्यवस्था प्रदर्श्यते॥ यदा पुनर्ब्राह्मणादीनां क्षत्रियादयः सपिंडा भवंति॥ तदा हारीतोक्ताशौचकल्पोनुस
रणीयः॥ दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु॥ षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिष्विति॥ विस्तरस्त्वा

द॥क्षत्रियस्यविट्शूद्रेषुसपिंडेषुषड्रात्रत्रिरात्राभ्यांवैश्यस्यशूद्रेसपिंडेषड्रात्रेणशुद्धिर्हीनवर्णानांतूत्कृष्टे
२७ षुसपिंडेषुजातेषुमृतेषुवातदाशौचव्यपगमेशुद्धिरिति॥बौधायनेनत्वविशेषेणदशाहइत्युक्तं॥सत्रविट्
शूद्रजातीयायेस्युर्विप्रस्यबांधवाः॥तेषामाशौचेविप्रस्यदशाहाच्छुद्धिरिष्यते॥अ.नयोश्चपक्षयोराप
त्नापरिद्विषयत्वेनव्यवस्था॥दास्यादीनांतुस्वामिशौचेनस्पृश्यत्वं॥कर्मानधिकारस्तुमासावधिरेव॥त
दाहांगिराः॥दासीदासश्चसर्वोवैयस्यवर्णस्ययोभवेत्॥तद्वर्णस्यभवेच्छौचंदास्यामासास्तुसूतकमिति॥
प्रतिलोमानांत्वाशौचाभावएव॥प्रतिलोमाधर्महीनाइतिस्मरणात्॥केवलंमृतौप्रसवेचमलापकर्षणार्थं
स्नानपुरीषोत्सर्गवच्छौचंभवत्येव॥वयोवस्थाविशेषेपिदशाहाशौचस्यापवादमाह॥आदंतजन्मनःसद्यःआ
चूडान्नैशिकीस्मृता॥त्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरं॥यावताकालेनदंतानामुत्पत्तिस्तस्मिन्कालेअ राम०
तीतस्यबालस्यसंबंधिनांसद्यःशौचं॥चूडाकरणात्पूर्वंमृतस्यसंबंधिनांनैशिकी।निशायांभवाअहोरात्रव्यापि २७

स्यशुद्धिः॥व्रतादेशःउपनयनंततोऽर्वाक्चूडायाश्चोर्ध्वमतीतस्यअहमशुद्धिः॥अत्रचादंतजन्मनःसद्यइतिय
द्यप्यविशेषेणाभिधानंतथाप्यग्निसंस्काराभावेद्रष्टव्यं॥अदंतजातेबालेमृतेसद्यएवनास्याग्निसंस्कारोनोद
कक्रियेतिवैसमवेऽग्निसंस्काररहितस्यसद्यःशौचविधानात्॥सतित्वग्निसंस्कारेऽहस्त्वदंतकन्यासुबालेषुचे
तिवक्ष्यमाणएकाहः॥तथाचयमः॥अदंतजातेतनयेशिशौगर्भच्युतेतथा॥सपिंडानांतुसर्वेषामहोरात्रमशौ
चकमिति॥नामकरणात्प्राक्सद्यःशौचंइतिशंखस्मरणात्॥चूडाकर्मचप्रथमेतृतीयेवावर्षेस्मर्यते॥चूडाक
र्मद्विजातीनांसर्वेषामेवधर्मतः॥प्रथमेऽब्देतृतीयेवाकर्तव्यंश्रुतिचोदनादितिस्मरणात्॥ततश्चदंतजन
नादूर्ध्वंप्रथमवार्षिकचूडाकर्मपर्यंतमेकाहः॥तत्रत्वकृतचूडस्यदंतजननेसत्यपित्रिवर्षंयावदेकाहएव॥त
थाचविष्णुः॥दंतजातेप्यकृतचूडेत्वहोरात्रेणशुद्धिरिति॥ततऊर्ध्वमागुपनयनात्त्र्यहः॥यत्तुमनुवचनं॥नृणा
मकृतचूडानामशुद्धिर्नैशिकीस्मृता॥निर्वृत्तचूडकानांतुत्रिरात्राच्छुद्धिरिष्यतइति॥तस्याप्ययमेवविषयः॥य

२८ त्रूनद्विवर्षमधिकृत्यतेनैक्तं॥अरण्येकाष्ठवत्त्यक्त्वाक्षिपेयुस्त्र्यहमेवत्विति॥यच्चवसिष्ठवचनं ऊनद्विवर्षे
प्रेतेगर्भपतनेवासपिंडानांत्रिरात्रमितितत्संवत्सरकृतचूडाभिप्रायेण॥यत्त्वंगिरोवचनं॥यद्यप्यकृतचूडो
वैजातदंतस्तुसंस्थितः॥दाहयित्वातथाप्येनमाशौचंत्र्यहमाचरेदिति॥तद्वर्षत्रयादूर्ध्वंकुलधर्मापेक्षयावो
त्कर्षेवेदितव्यं॥विप्रेन्यूनत्रिवर्षेतुमृतेशुद्धिस्तुनैशिकी॥तितेनाभिहितत्वात्॥नचायमेकाहोदंतजनना
भावेइतिशंकनीयं॥नहिन्यूनत्वेतीयवर्षस्यदंतानुत्पत्तिः संभवति॥तथासत्यपिदंतजननेअकृतचूडस्यैका
हविदधताविष्णुवचनेनविरोधश्चदुःपरिहरः स्यात्तस्मात्पूर्वैवव्याख्याज्यायसी॥यत्तुशातातपवचनं॥
बालानामदंतजातानांत्रिरात्रेणशुद्धिरिति॥तन्मातापितृविषयं॥निरस्यतुपुमांच्छुक्रमुपस्पृश्यविशुध्यतिबैजि
कादभिसंबंधादनुरुंध्यादघंत्र्यहमिति॥जन्यजनकसंबंधोपाधिपाधिकतयात्रिरात्रस्मरणात्॥ततश्चायम रा.म.
र्थः॥नामकरणात्सद्यःशौचंतदूर्ध्वंदंतजननादर्वागग्निसंस्कारक्रियायामेकाहः॥इतरथासद्यःशौचं॥ २८

५

MEMORIAL

जातदंतस्यप्रथमवार्षिकाच्चौलादर्वागेकाहः॥प्रथमवर्षादूर्ध्वंत्रिवर्षपर्यंतंकृतचूडस्यत्र्यहः॥इतरस्यत्वेकाहः
वर्षत्रयादूर्ध्वमकृतचूडस्यापित्र्यहः॥उपनयनादूर्ध्वंसर्वेषांब्राह्मणादीनांदशरात्राह्निकमिति॥इदानींस्त्रीषु
वयोवस्थाविशेषेणापवादमाह॥ ॥अहस्त्वदत्तकन्यासुबालेषुचविशोधनं॥अदत्ताअपरिणीतायाः कन्यास्ता शुद्धि
स्वकृतचूडासुवाग्दानात्प्रागहोरात्रंविशेषेणशुद्धिकारणंसपिंडानां॥सापिंड्यंचकन्यानांत्रिपुरुषपर्यंतमेव.
अप्रत्तानांतुस्त्रीणांत्रिपुरुषीविज्ञायतइतिवसिष्ठस्मरणात्॥बालेषुचानुत्पन्नदंतेष्वग्निसंस्कारेसत्येका
हाविशोधनं॥अकृतचूडायांतुकन्यायांसद्यःशौचं॥अकृतचूडायांतुकन्यायांसद्यःशौचंविधीयतेइत्या
पस्तंबस्मरणात्॥वाग्दानादूर्ध्वंतुसंस्कारात्प्राक्पतिपक्षेपितृपक्षेचत्रिरात्रमेव॥यथाहमनुः॥स्त्रीणाम
संस्कृतानांतुत्र्यहाच्छुद्ध्यंतिबांधवाः॥यथोक्तेनैवकल्पेनशुद्ध्यंतितुसनाभयइति॥बांधवाःपतिपक्षास्त्रिरा
त्रेणशुद्ध्यंति॥सनाभयस्तुपितृपक्षाःसपिंडायथोक्तेनैवकल्पेननिर्वृत्तचूडकानामित्यादिनोक्तेनत्रिरा

२९ त्रत्वेनान पुनर्दशरात्रत्वेन विवाहात्प्राक्कृतस्याप्युक्तत्वात्॥ अत एव मरीचिः॥ वारिपूर्वं प्रदत्तायां नैव प्रतिपा-
दिता॥ असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतमिति॥ उभयोः पतिपितृपक्षयोर्विवाहादूर्द्ध्वं तु विशेषणा वि-
शेषो दर्शितः॥ संस्कृता सु स्त्री पुनाशौचं पितृपक्षे तत्प्रसवमरणे चेत्पितृगृहे स्याताम्॥ तदेकरात्रं त्रिरात्रं चेति॥
तत्र प्रसवे एकाहः॥ मरणे त्रिरात्रमिति व्यवस्था॥ इदं तु वयोवस्थाशौचं सर्ववर्णसाधारणं॥ क्षत्रस्य द्वादशाहानी-
ति स्ववर्णविशेषोपादानेनाभिधानात्॥ अत एव मनुना॥ अनुपात्तवर्णविशेषाशौचविधेः साधारणप्रतिपाद-
नार्थं चातुर्वर्ण्याधिकारे सत्स्वपि पुनश्चानुलोमपि वर्णानां यथावदनुपूर्वशः इत्युक्तं॥ तथांगिरसाप्युक्तं॥ अवि-
शेषेण वर्णानामर्वाक् संस्कारकर्मणः त्रिरात्रात्तु भवेच्छुद्धिः कन्यास्वह्ना विधीयत इति॥ आप्रदानाद्वचनं च तुल्ये
वयसि सर्वेषामिति प्राक् दर्शितं॥ अतो यथा पिंडयज्ञावृतो देयमित्यादि पिंडोदकादानादिविधिः सर्ववर्णसाधार- राम०
णः॥ यथा वा समानोदकाशौचविधिः अंतरा जन्ममरण इति सन्निपाताशौचविधिश्च॥ यद्वा गर्भस्रवे मासतु- २९

ल्या इति स्रावाशौचविधिः॥ प्रोषिते कालशेषः स्यादशेषे त्र्यहमेव त्विति विदेशस्थाशौचविधिश्च॥ यथा गुर्वाद्या-
शौचविधिः सर्वसाधारणस्तथा वयोवस्थानिमित्तमप्याशौचं साधारणमेव भवितुमर्हति॥ अत एव॥ क्षत्रे ष-
ड्भिः कृते चौले वैश्ये नवभिरुच्यते॥ ऊर्द्ध्वं त्रिवर्षाच्छूद्रे द्वादशाहो विधीयते॥ तथा॥ यत्र त्रिरात्रं विप्राणामशौचं सं-
प्रदृश्यते॥ तत्र शूद्रे द्वादशाहः षण्णव क्षत्रवैश्ययोरित्यादीन्यृष्यशृंगादिवचनानि विगीतत्वबुद्ध्याऽनाद्रियमा-
णैर्धारेश्वरविश्वरूपमेधातिथिप्रभृतिभिराचार्यैरयमेव साधारणपक्षोंगीकृतः॥ अवगीतानि वा आर्त्तानां क्ष-
त्रियादिविषयतया व्याख्येयानि॥ गुर्वाद्यतिदेशमाह॥ गुर्वंतेवास्यनूचानमातुलश्रोत्रियेषु च॥ गुरुरुपाध्यायः
॥ अंतेवासी शिष्यः॥ अनूचानोंऽगानां प्रवक्ता॥ मातुलग्रहणेनात्मबंधवो मातृबंधवः पितृबंधवश्चयोनिसंबं-
धादुपलक्ष्यंते॥ ते च पत्नीदुहितर इत्यत्र दर्शिताः॥ श्रोत्रिय एकशाखाध्यायी॥ एकां शाखामधीत्य श्रोत्रिय इ-
ति बौधायनस्मरणात्॥ एतेषूपरतेष्वहोरात्रमाशौचं॥ यस्तु मुख्यो गुरुः पिता तदुपरमे सपिंडत्वाद्दशाहरा-

३० व॥यस्तुपितापुत्रानुत्पाद्यसंस्कृत्यवेदानध्याप्यवेदार्थंग्राहयित्वावृत्तिंचविदधाति॥तस्यमहागुरुत्वात्तदुपर
मेद्वादशरात्रंवामहागुरुपुत्रानाध्ययनेवर्जयेदित्याश्वलायनोक्तंद्रष्टव्यं॥आचार्येपित्रमेतुत्रिरात्रमेव॥यथा
हमनुः॥त्रिरात्रमाहुराशौचमाचार्येसंस्थितेसति॥तस्यपुत्रेचपत्न्यांचदिवारात्रमितिस्थितिरिति॥यदात्वा
चार्योदैत्यंसंपृष्टिकरोति॥तदादशरात्रमाशौचं॥गुरोःप्रेतस्यशिष्यस्तुपितृमेधंसमाचरन्॥प्रेताहारैःसमंत
त्रदशाहेनविशुध्यति॥तेनैवोक्तत्वात्॥श्रोत्रियस्यतुसमानग्रामीणस्यैकरात्रमाशौचं॥एकाहंसब्रह्मचारिणिस
मानग्रामीणेचश्रोत्रियइत्याश्वलायनस्मरणात्॥एकाचार्योपनीतःसब्रह्मचारीतत्रासन्निधानेद्रष्टव्यं
॥सन्निहितेतुशिष्यादौत्रिरात्रादि॥यथाहमनुः॥श्रोत्रियेतूपसंपन्नेत्रिरात्रमशुचिर्भवेत्॥मातुलेपक्षिणीं
रात्रिंशिष्यर्त्विग्बांधवेषुच॥उपसंपन्नेमैत्रीप्रातिवेश्यत्वादिनासंबद्धे॥शीलढकेवा॥मातुलग्रहणंमातृष्व राम०
स्रादेरुपलक्षणार्थंबांधवाइत्यात्मबंधवोमातृबंधवःपितृबंधवश्चोच्यते॥तथाचबृहस्पतिः॥अहंमातामहा ३०

चार्येश्रोत्रियेचशुचिर्भवेदिति॥तथाचप्रचेताः॥मृतेचर्त्विजियाज्येचत्रिरात्रेणविशुध्यतीति॥तथावृद्ध
बृहस्पतिः॥संस्थितेपक्षिणींरात्रिंदौहित्रेभगिनीसुतेसंस्कृतेतुत्रिरात्रंस्यादितिधर्मोव्यवस्थितः॥पित्रो
रुपरमेस्त्रीणामूढानांतुकथंभवेत्॥त्रिरात्रेणैवशुद्धिःस्यादित्याहभगवान्मनुः॥श्वशुरयोश्चभगिन्यां
चमातुलान्यांचमातुलेपित्रोःस्वसरितद्वच्चपक्षिणींक्षपयेन्निशां॥तथामातुलेश्वशुरेमित्रेगुरौगुर्वंगनासुच
आशौचंपक्षिणींरात्रिंमृतामातामहीयदि॥तथाचगौतमः॥पक्षिणीमसपिंडेयोनिसंबंधेसहाध्यायिनिचे
ति॥योनिसंबद्धाःमातुलमातृष्वस्रीयपैतृष्वस्रेयादयः॥तथाजाबालिः॥एकोदकानांतुत्र्यहोगोत्रजाना
महःस्मृतं॥मातृबंधौगुरौमित्रेमंडलाधिपतौतथेति॥विष्णुः॥असपिंडेस्ववेश्मनिमृतेएकरात्रमिति॥त
थावृद्धः॥भगिन्यांसंस्कृतायांतुभ्रातर्यपिचसंस्कृते॥मित्रेजामातरिप्रेतेदौहित्रेभगिनीसुते॥शालकेत
त्सुतेचैवसद्यःस्नानेनशुध्यति॥ग्रामेश्वरेकुलपतौश्रोत्रियेवातपस्विनि॥शिष्येपंचत्वमापन्नेशुचिर्नक्षत्र

दर्शनात्॥ग्राममध्यगतोयावच्छवस्तिष्ठतिकस्यचित्॥ग्रामस्यतावदाशौचंनिर्गतेशुचितामियादित्यादी
३१ न्याशौचविशेषप्रतिपादकानिस्मृतिवचनान्यन्वेषणीयानिग्रंथगौरवभयादत्रनलिख्यंतेतेषुचैकविषयगु
रुलघ्वाशौचप्रतिपादकतयापरस्परविरुद्धेषुसन्निधिविदेशस्थापेक्षयाव्यवस्थानुसंधातव्या॥किंचऔ
रसेषुपुत्रेषुभार्यास्वन्यगतासुच॥अहस्त्वनुवर्तते॥औरसाःक्षेत्रजदत्रकादयस्तेषुजातेषूपरतेषुवाहो
रात्रमाशौचं॥तथास्वभार्यास्वन्यगतासुअन्यंप्रतिलोमव्यतिरिक्तयाश्रितास्वतीतासुचाहोरात्रमेव॥नपुनः
सत्स्वपिसापिंड्येदशरात्रं॥प्रतिलोमाश्रितासुत्वाशौचाभावएव॥पाषंडिनाश्रिताइत्यनेनप्रतिषेधात्॥एत
त्त्वभार्यापुत्रशब्दयोःसंबंधिशब्दत्वाद्यत्प्रतियोगिकंभार्यात्वंपुत्रत्वंचतस्यैवेदमाशौचंसपिंडानांत्वाशौचा
भावएव॥अतएवप्रजापतिः॥अन्याश्रितेषुदारेषुपरपत्नीसुतेषुच॥गोत्रिणःस्नानशुद्धाःस्युस्त्रिरात्रेणै राम०
वतत्पितेति॥स्वैरिण्याद्यास्तुयमाश्रितास्तस्यत्रिरात्रमेव॥यथाहविष्णुः॥औरसेषुपुत्रेषुजातेषुचमृतेषुच ३१

॥परपूर्वासुभार्यासुप्रसूतासुमृतासुचेतित्रिरात्रंत्रमत्रप्रकृतं॥अनयोश्चत्रिरात्रैकरात्रयोःसन्निधिविदे
शस्थापेक्षयाव्यवस्थापरातुपितुस्त्रिरात्रंतदासपिंडानामेकरात्रं॥यथाहमरीचिः॥सूतकेमृतकेचैवत्रिरा
त्रंपरपूर्वयोः॥एकाहस्तुसपिंडानांत्रिरात्रंयत्रवैपितुरिति॥किंच॥निवासराजनिप्रेतेतदहःशुद्धिकारणं
॥निवसत्यस्मिन्नितिनिवासःस्वदेशउच्यते॥तस्ययोराजास्वामीविषयाधिपतिःसयस्मिन्नहन्यतीततद
हर्मात्रंशुद्धिकारणं॥रात्रौचेद्दतीतस्तदारात्रिमात्रं॥अतएवमनुः॥प्रेतेराजनिसज्योतिर्यस्यस्याद्विषयेस्थि
तइतिज्योतिषासहवर्त्ततइतिसज्योतिराशौचमह्निचेद्यावत्सूर्यदर्शनं॥रात्रौचेद्यावन्नक्षत्रदर्शनमित्यर्थः
॥अनुगमनाशौचमाह॥ ॥ब्राह्मणेनानुगंतव्योनशूद्रोनद्विजःक्वचित्॥अनुगम्यांभसिस्नात्वास्पृष्ट्वाग्निंघृ
तभुक्शुचिः॥ब्राह्मणेनासपिंडेनद्विजोविप्रादिःशूद्रोवाप्रेतोनानुगंतव्यः॥यदिस्नेहादिनाऽनुगच्छतितदां
भसितडागादिषुस्नात्वाग्निंस्पृष्ट्वाघृतंप्राश्यशुचिर्भवेत्॥अस्यचघृतप्राशनस्यभोजनकार्यविधानेनप्रमा

सजातिब्राह्मणः

३२ णाभावान्नभोजनप्रतिषेधः॥इदंसमानोत्कृष्टजातिविषयं॥यथाहमनुः॥अनुगम्येच्छयाप्रेतंज्ञातिमे मज्ञाति
व वा॥स्नात्वासचैलंस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यति॥ज्ञातयोमातृसपिंडाः इतरेषांतुविहितत्वान्नदोषः॥
निकृष्टजात्यनुगमनेतुस्मृत्यंतरोक्तंद्रष्टव्यम्॥तत्रशूद्रानुगमने॥प्रेतीभूतंनृपः शूद्रंब्राह्मणोज्ञानदुर्बलः
॥अनुगछेन्नीयमानंसत्रिरात्रेणशुध्यति॥त्रिरात्रेनुततश्चीर्णेनदींगत्वासमुद्रगांप्राणायामशतंकृत्वाघृ
तंप्राश्यविशुध्यतीतिपराशरोक्तं॥क्षत्रीयानुगमनेत्वहोरात्रं॥मानुषास्थिस्निग्धंस्पृष्ट्वात्रिरात्रमाशौचमस्नि
ग्धेत्वहोरात्रं॥शवानुगमनेचैवमितिवसिष्ठोक्तं॥वैश्यानुगमनेपुनःपक्षिणी॥तथाक्षत्रियस्यानंतरवैश्या
नुगमनेहोरात्रमेकांतरशूद्रानुगमनेपक्षिणी॥वैश्यस्यशूद्रानुगमनेएकाहइत्यूहनीयं॥तथारोदनेपिपा राम० ३२
रस्करेणोक्तं॥मृतस्यबांधवैःसार्धंकृत्वातुपरिदेवनं॥वर्जयेत्तदहोरात्रंदानंश्राद्धादिकर्मचेति॥तथालंक
रणमपिनकार्यं॥कृष्णपादः सपिंडस्यप्रेतालंकरणेकृते॥अज्ञानादुपवासःस्याद्दशकेस्नानमिष्यतेइ

तिशंखेनप्रायश्चित्तस्याम्नानात्॥सपिंडाशौचेक्वचिदपवादमाह॥महीपतीनांनाशौचंहतानांविद्युतात
था॥गोब्राह्मणार्थेसंग्रामेयस्यचेच्छतिभूमिपः॥यद्यपिमहीशब्देनकृत्स्नाभूगोलकमभिधीयतेतथाप्य
त्रसकलायाःक्षितेरेकभर्तृकत्वानुपपत्तेर्महीपतीनामितिबहुवचनानुरोधाच्चतदेकदेशभूतानिमंड
लानिलक्ष्यंते॥तत्पालनाधिकृतानांक्षत्रियादीनामभिषिक्तानांनाशौचं॥तैराशौचंनकार्यमित्यर्थः॥त
थाविद्युद्धतानांगोब्राह्मणरक्षार्थेविपन्नानांचसंबंधिनोयेसपिंडास्तैरप्याशौचंनकार्यं॥यस्यचमंत्रिपुरोहि
तादेर्भूमिपोनन्यसाध्यमंत्राभिचारादिकर्मसिद्ध्यर्थमाशौचाभावमिच्छतितेनापिनकार्यं॥अत्रचमहीपती
नांप्रजासाधारणत्वेनविहितंप्रजापरिरक्षणंतद्धेनदानमानकारव्यवहारदर्शनादिनाविनानसंभवतितत्रै स
वाशौचाभावेनपुनःपुनःपंचमहायज्ञादिष्वपि॥तथाचमनुः॥राज्ञोमाहात्मिकेस्थानेसद्यःशौचंविधीयते
॥प्रजानांपरिरक्षार्थमासनंचात्रकारणमिति गौतमेनाप्युक्तं॥राज्ञांचकार्याभिघातार्थमिति॥राजमरणादे

33 रप्याशौचंनभवति॥यथाहप्रचेताः॥कारवःशिल्पिनोभृत्यावैद्यादासास्तथैवच॥राजानोराजभृत्याश्च
सद्यःशौचाःप्रकीर्त्तिताइति॥कारवःसूपकारादयःशिल्पिनश्चित्रकारचैलनिर्णेजकादयः॥अयंचा
शौचाभावःकिंविषयइत्यपेक्षायांकर्मणोनिमित्तैःशब्दैस्तत्रदसाधारणस्यकर्मणोबुद्धिस्थत्वात्तत्रैवद्र
ष्टव्यः॥अतएवविष्णुः॥नराज्ञाराजकर्मणि॥नव्रतिनांव्रते॥नसत्रिणांसत्रे॥नकारुणांकारुकर्मणा
तिप्रतिनियतविषयमेवाशौचाभावंदर्शयति॥शातातपीयेप्युक्तं॥मूल्यकर्मकराःशूद्रादासीदासा
स्तथैवच॥स्नानेशरीरसंस्कारेगृहकर्मण्यदूषिताइति॥इयंचदासादिशुद्धिरपरिहरणीयत्वप्रसस्य
शविषयेसमनुसंधेयम॥अतएवस्मृत्यंतरं॥सद्यःस्पृश्योगर्भदासोभक्तदासस्त्र्यहाच्छुचि॥तथा॥चिकि
त्सकोयत्कुरुततदन्येननशक्यते तस्माच्चिकित्सकःस्पर्शेशुद्धोभवतिनित्यशइति॥किंच॥ऋत्विजांदीक्षि राम०
तानांचयज्ञियंकर्मकुर्वतां॥सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदांतथा॥दानेविवाहेयज्ञेचसंग्रामेदेशविप्लवे 33
वानप्रस्थः॥

दत्तायां ॥आपद्यपिहिकष्टायांसद्यःशौचंविधीयते॥ऋत्विजोवृरणभरणसंभृताःकर्तृविशेषाः॥दीक्षयासंस्कृ
ताःदीक्षितास्तेषांयज्ञियंयज्ञे[illegible]भवंकर्मकुर्वतांसद्यःशौचंविधीयतइतीसर्वत्रानुषंगः॥दीक्षितस्यचेता
नोपासनाःकार्याइत्यनेनसिद्धेप्यधिकारेपुनर्वचनंयाजमानेषुस्वयंकर्तृत्वविधानार्थंसद्यःस्नानविध्य
र्थंच॥सत्रिग्रहणेनसंततानुष्ठानतुल्यतयात्रसत्रप्रवृत्तालक्ष्यन्ते॥मुख्यानांसत्रिणांदीक्षितग्रहणेनैवसि
क्षण दे॥व्रतिशब्देनकृच्छ्रचांद्रायणादिप्रवृत्ताःस्नातकव्रतप्रायश्चित्तप्रवृत्ताश्चोच्यंते॥तथाब्रह्मचर्यादिव्रतयोगि
नःश्राद्धकर्तृभोक्तृश्चग्रहणं॥तथाचस्मृत्यंतरं॥नित्यमन्नप्रदस्यापिकृच्छ्रचांद्रायणादिषु॥निवृत्तेकृच्छ्
होमादौब्राह्मणादिषुभोजने॥गृहीतनियमस्यापिनस्यादन्यस्यकस्यचित्॥निमंत्रितेषुविप्रेषुप्रारब्धेश्राद्ध
कर्मणि॥निमंत्रितस्यविप्रस्यस्वाध्यायादिरतस्यच॥देहेपितृषुतिष्ठत्सुनाशौचंविद्यतेक्वचित्॥प्रायश्चित्त
प्रवृत्तानांदातृब्रह्मविदांतथेति॥सत्रिणांव्रतिनांसत्रेव्रतेचशुद्धिर्नकर्ममात्रेसंव्यवहारेवा॥तथाचविष्णुः

३४ नवतिनांव्रतेनसत्रिलांसत्रइति॥ब्रह्मचार्युपकुर्वाणकोनैष्ठिकश्च॥यस्तुनित्यंदातेदनप्रतिगृहीतासंवे
स्वानमोदात्तशब्देनोच्यते॥ब्रह्मवितयति॥एतेषांचत्रयाणामाश्रमिणांसर्वत्रशुद्धिः॥विशेषप्रमाणाभा
वात॥दानेपूर्वसंकल्पितद्रव्यस्यनाशौचं॥पूर्वसंकल्पितंद्रव्यंदीयमानंनदुष्यतीतिक्रतुस्मरणात॥स्मरणा
त॥स्मसंतरेचात्रविशेषउक्तः॥विवाहोत्सवयज्ञादिष्वंतरामृतसूतके॥शेषमन्नंपरैर्देयदातृन्भोक्तृंश्च
नस्पृशेदिति॥यज्ञेवृषोत्सर्गादौ॥विवाहेचपूर्वसंभृतसंभारे॥तथाचस्मृत्यंतरेयज्ञेसंभृतसंभारेविवाहे
श्राद्धकर्मणीति॥सद्यःशौचमत्रप्रकृतं॥विवाहग्रहणंपूर्वप्रवृत्तचौलोपनयनादिसंस्कारकर्मोपल
क्षणं॥यज्ञग्रहणंचपूर्वप्रवृत्तेदेवप्रतिष्ठारामाद्युत्सवमात्रोपलक्षणं॥नदेवप्रतिष्ठोत्सवविवाहेषुनदेश
विभ्रमेनापद्यपिचकाष्टायामाशौचमितिविष्णुस्मरणात॥संग्रामेयुद्धे॥संग्रामेसमुपोढेराजानसंनाह राम० ३४
येदित्याश्वलायनाद्युक्तसंनहनविधौप्रास्थानिकथांतिहोमादौचसद्यःशुद्धिः॥देशस्यविस्फोटादिभिरुप

सर्गेराजभयाद्वाविप्लवेनदुपशमनार्थेशांतिकर्मणिसद्यःशौचं॥विप्लवाभावेपिकृद्देशविशेषेणपैठीनसिना
क शुद्धिरुक्ता॥विवाहदुर्गयज्ञेषुयात्रायांतीर्थकर्मणि॥नतत्रसूतकंतद्वत्कर्मयज्ञादिकारयेदिति॥तथा॥कष्टपाम
व्यायद्विव्याध्याद्यभिभवनस्तुमुर्षावस्थायांदुरितशमनार्थेदाने॥तथासकुचितत्वतेश्चक्षुत्पिपासापरिश्रांतमा
तापित्रादिवहुकुटुंबस्यतद्भरणोपयोगिनिप्रतिग्रहेसद्यःशुद्धिः॥इयंचशुद्धिर्यस्यसद्यःशौचंविनार्थुपशमोन
भवत्सश्चस्तनिकस्तद्विषयापरस्येकाहपर्याप्तधनस्तस्यैकाहः॥यस्त्र्यहोपयोगिसंचयीतस्यत्र्यहः॥यस्तुचतुरहा
र्थमापादितद्रव्यः॥कुंभीधान्यस्तस्यचतुरहः॥कुशूलधान्यकश्चपदृशाहः॥इत्येवंयस्ययावत्कालमार्थभावस्त
स्यतावत्कालशमशौचमापद्युपाधिकत्वात आशौचसंकोचस्य अतएवमनुना॥कुशूलधान्यकोवास्यात्कुंभीधा
न्यकएवच॥अर्हेकाह्निकोपिभवेदश्वस्तनिकएववेत्यत्रप्रतिपादितचतुर्विधगृहस्थाभिप्रायेणदशाहंश
वमाशौचंसपिंडेषुविधीयते॥अर्वाक्संचयतादस्यांत्र्यहमेकाहमेवचेतिकल्पचतुष्टयंप्रतिपादितं॥समानोदक

DR. BHAU DAJI MEMORIAL
डाक्तर भाऊदाजी इत्यस्य स्मारकम्

३५ विषयाश्च संकुचिताशौचकल्पाः पक्षिण्येकाहसद्यःशौचरूपाः स्मर्यंते तद्दृष्टान्निसंकोचोपाधिकतयोज्याः॥
अयं चाशौचसंकोचो वीर्येनैव प्रतिग्रहादिना विनान्निस्तद्विषयो न सर्वत्रेत्यवगंतव्यं। ननु एकाहात् ब्राह्मणः शुध्येद्यो
ग्निवेदसमन्वितः॥ त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैरित्यादिस्मृत्यंतरवचनपर्यालोचनयाध्ययनयज्ञा
नुष्ठानयोगिनां त्र्यहादिभिः सर्वात्मना शुद्धिरित्येवं कस्मान्नेष्यते॥ उच्यते॥ दशाहं शावमाशौचं इति सामान्यप्रा
सक्तदशाहबाधपुरःसरमेव ह्येकाहाद्ब्राह्मणः शुध्येदित्यादि विधायकं भवति॥ बाधकस्य चानुपपत्तिनिबंधनत्वा
द्यावत्सबाधिते अनुपपत्तिप्रशमो न भवति तावद्बाधनीयमतः। कियदनेन बाध्यमित्यपेक्षायामपेक्षितविशेषस
मर्पणक्षमस्याग्निवेदसमन्वित इति वाक्यशेषदर्शनादग्निवेदविषये ग्निहोत्रादिकर्मणि स्वाध्याये च व्यवतिष्ठते॥
न पुनर्दानादावपि॥ एवं चाग्निवेदयोः कार्यान्वयित्वं भवति॥ इतरथा येनाग्निवेदसाध्यं कर्म कृतं तस्यैकाहा रा.म०
च्छुद्धिरिति पुरुषविशेषोपलक्षणत्वमेव स्यान्न चैतद्युक्तं॥ एवं सति प्रत्यहं त्र्याग्निषु क्रियाः वैतानोपासनाः कार्याः ३५

क्रियाश्च श्रुतिचोदनात्तथा ब्राह्मणस्य च स्वाध्यायानिवृत्त्यर्थं सद्यःशौचं इत्येवमादिभिर्मन्वादिवचनैरेकवाक्यतां
भवंति॥ तथोभयत्र दशाहानि कुलस्यान्नं न भुज्यत इति॥ दशाहपर्यंतं भोजनादिकं प्रतिषेधयद्भिर्यमादिवचनैर
विरोधोऽपि सिध्यति॥ अतः क्वाचित्कमेवेदमाशौचसंकोचविधानं॥ न पुनः सर्वं संव्यवहारादिगोचरमित्यलं प्रपंचे
न॥ इदं च स्वाध्यायविषये सद्यःशौचविधानं बहुवेदस्य च ब्रह्मकृतायामापदि द्रष्टव्यं॥ इतरस्य नु दानं प्रतिग्रहो हो
मः स्वाध्यायश्च निवर्त्तत इति प्रतिषेधः एवं ब्राह्मणादिभिर्ध्येयस्य यावत्कालमाशौचं उक्तं सत तस्यानंतरं स्नात्वा शु
ध्येत्तत्कालातिक्रममाचारात्॥ यथाह मनुः॥ विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधं वैश्यः प्रतोदं रश्मीन्वा
यष्टिं शूद्रः कृतक्रिय इति॥ अयमर्थः कृतक्रिय इति प्रत्येकमभिसंबध्यते॥ विप्रोनुभूताशौचकालः कृतक्रि
यः कृतस्नानो ह स्नानापः स्पृष्ट्वा शुध्यति॥ स्पृष्ट्वेति स्पर्शनक्रियैवोच्यते॥ न स्नानमाचमनं वा वाहनायुधं तस्यै
वानुषंगात्॥ अथवा कृतक्रियो यावदाशौचं कृतोदकादिक्रियः तदनंतरं विप्रादिरुदकादि स्पृष्ट्वा शुध्यतीत्या

एतेषांस्पर्शस्यस्पर्शनेआचमनेन

शौचकालानंतरभाविस्नानप्रतिनिधित्वेनोक्तइति॥क्षत्रियादिवाहनादिंकस्पृष्ट्वाशुद्ध्येदिति॥कुलव्यापिनी
३६ शुद्धिमभिधायेदानीप्रसंगात्प्रतिपुरुषव्यापिनीशुद्धिमाह॥उदक्याशुचिभिःस्नाया संस्पृष्टस्तैरुपस्पृशेत्॥
अब्लिंगानिजपेच्चैवगायत्रींमनसासकृत्॥उदक्यारजस्वला॥अशुचयःशवचांडालपतितसूतिकाःश्वाशौ
चिनश्च एतैःसंस्पृष्टःस्नायात्तैःपुनरुदक्याशुचिसंस्पृष्टादिभिःसंस्पृष्टउपस्पृशेदाचामेत्॥आचम्याब्लिं
गानिआपोहिष्ठेत्येवमादीनित्रीणिमंत्रवाक्यानिजपेत्रिष्वेवबहुवचनस्यचरितार्थत्वात्॥तथागायत्रीचसकृन्म
नसाजपेत्॥नन्वुदक्यादिसंस्पृष्टःस्नायादित्येकवचननिर्दिष्टस्यकथंतैरितिबहुवचनेनपरामर्शः॥सत्यमेवं
किंत्वत्रोदक्यादिसंस्पृष्टव्यतिरिक्तस्नानार्हमात्रस्पर्शेऽप्याचमनविधानार्थंतैरितिबहुवचननिर्देशइत्यविरोधः॥ रा०म०
तेचस्नानार्हाःस्मृत्यंतरतोवगंतव्याः॥यथाहपराशरः॥दुःस्वप्नेमैथुनेवांतेविरिक्तेक्षुरकर्मणि॥चितिधूमश्म ३६
शानास्थिस्पर्शनेस्नानमाचरेदिति॥तथाचमनुः॥वांतोविरिक्तःस्नात्वातुघृतप्राशप्राशनमाचरेत्॥आचामेदे

वभुक्त्वान्नंस्नानंमैथुनिनःस्मृतमितिमैथुनिनःस्नानमृतुकालविषयं॥अन्यतोतुयदागच्छेच्छौचंमूत्रपुरीषव
दितिबृहस्पतिबृहस्पतिस्मरणात्॥अन्यतावपिकालविशेषेस्मृत्यंतरेस्नानमुक्तं॥अष्टम्यांचचतुर्दश्यांदिवाप
र्वणिमैथुनंकृत्वासचैलंस्नात्वावारुणीभिश्चमार्जयेदिति॥तथाचमनुःअजीर्णेभ्युदितेवांतेतथाभ्यस्तमितेरवौ
दुःस्वप्नेदुर्जनस्पर्शेस्नानमेवविधीयते॥बृहस्पतिः॥मैथुनेकटधूमेचसद्यःशौचंविधीयतइत्येतदसचैलस्पर्श
विषयं॥सचैलेनतुचित्यादिस्पर्शेसचैलमेवस्नानं॥यथाहच्यवनः॥श्वानंश्वपाकंप्रेतधूमंदेवद्रव्योपजीविनं॥
ग्रामयाजकंसोमविक्रयिणंयूपंचितिंचितिकाष्ठंचमद्यंमद्यभांडंसस्नेहंमानुषास्थिशवस्पृशंरजस्वलामहापात
किनंशवंस्पृष्ट्वासचैलमभोवगाह्योत्तीर्याग्निमुपस्पृश्यगायत्र्यष्टशतंजपेत्घृतंप्राश्यपुनःस्नात्वात्रिराचामेदि
ति॥एतच्चबुद्धिपूर्वविषयमन्यत्रस्नानमात्रं॥शवस्पृशंदिवाकीर्तिचितिंयूपंरजस्वलां॥स्पृष्ट्वात्वकामतोविप्रः
स्नानंकृत्वाविशुध्यतीतिस्मरणात्॥एवमन्यत्रापिवक्ष्यमाणेषुविषयसमीकरणमूहनीयं॥यथाहकश्यपः॥

उदयास्तमयोः स्कंदित्वा क्षिप्स्यं दनेकणीक्रोशनेविसर्गोहलोपस्पसंस्पर्शनेसचैलंस्नात्वा पुनमइतिजपेन्महाव्या
३७ हृतिभिः समाज्याहुतीर्जुहुयादित्यादि॥ तथा वस्त्रसंतरेणवं॥ स्पृष्टा देवलकं चैव सवासाजलमाविशेत्॥ देवार्च्च
नरतो विप्रो वित्तार्थी वत्सरत्रयं॥ असौ देवलको नाम हव्यकव्येषु गर्हितः॥ तथा च ब्रह्मांडपुराणे॥ शैवान्पाशुप
तान्स्पृष्ट्वा लोकायतिकनास्तिकान्॥ विकर्मस्थान्द्विजान्शूद्रान्सवासाजलमाविशेत्॥ इति॥ तथा अस्वर्ग्योद्या
हृतिः सास्यात्शूद्रसंस्पर्शदूषितेतिलिंगाच्च शूद्रस्पर्शेननिषेधः तथांगिराः॥ यस्तु छायांश्वपाकस्य ब्राह्मणोघ्य
धिरोहति॥ तत्रस्नानंप्रकुर्वीत घृतंप्राश्य विशुध्यतीति॥ तथा च व्याघ्रपादः॥ चंडालं पतितं चैव दूरतः परिवर्ज
येत्॥ गोवालव्यजनाद्र्वाक्सवासाजलमाविशेत्॥ एतदतिसंकरस्थानविषयं॥ अन्यत्र बृहस्पतिनोक्तं॥ युगं
च द्वियुगं त्रियुगं चचतुर्युगं॥ चांडालसूतिकोदक्यापतितानामधः क्रमादिति॥ तथा पैठीनसिः॥ काकोलूकस्प राम०
र्शनेसचैलस्नानमनुदकमूत्रपुरीषकरणेसचैलस्नानं महाव्याहृतिहोमश्च॥ अनुदकमूत्रपुरीषकरणइत्येत ३७

च्चिरकालमूत्रपुरीषशौचाकरणपरं॥ तथांगिराः॥ भासवायसमार्जारखरोष्ट्रभश्वशूकरान्॥ अमेध्यानि च संस्पृ
श्यसचैलोजलमाविशेत्॥ मार्जारस्पर्शनिमित्तस्नानमुच्छिष्टसमये अनुष्ठानसमये च वेदितव्यं॥ समाचारात्॥
अन्यदा तु मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिरिति स्नानाभावः॥ श्वस्पर्शे तु स्नानं नाभेरूर्ध्वं वेदितव्यं अधस्ता
त्तु क्षालनमेव॥ नाभेरूर्ध्वं करामुक्त्वा शुनायद्युपहन्यते॥ तत्र स्नानमधस्ताच्चेत्प्रक्षाल्याचम्यशुद्ध्यतीति॥ तेनैवो
क्तत्वात्॥ तथा पक्षिस्पर्शे विशेषो जातूकर्णेन दर्शितः॥ ऊर्ध्वं नाभेः करौ मुक्त्वा यदंगमुपस्पृशेत्खगः स्नानं तत्र प्र
कुर्वीत शेषं प्रक्षाल्य शुद्ध्यतीति॥ अमेध्यस्पर्शेपि विष्णुना विशेषो दर्शितः॥ नाभेरधस्तात्प्राहुपुचकापिकैर्मलैः
सुराभिर्मद्यैर्वोपहतो मृत्तोयैस्तदंगं प्रक्षाल्याचांतः शुद्धेदन्यत्रोपहतो मृत्तोयैस्त्वप्रक्षाल्य स्नानतेंद्रियेषूपह
तस्तूपोष्यस्नात्वा पंचगव्येन दशनच्छदोपहतश्चेति एतच्च परकीयामेध्यस्पर्शविषयं॥ आत्मीयमलस्पर्शे तूर्ध्व
मपि नाभेः क्षालनमेव॥ यथाह देवलः॥ मानुषास्थिवसां विष्टामार्त्तवं मूत्ररेतसी॥ मज्जानं शोणितं चैव परस्यय

दिसंस्पृशेत्॥स्नात्वामग्नज्वलेपादौनाचम्यसशुचिर्भवेत्॥तान्येवस्वानिसंस्पृश्यपूतःस्यात्परिमार्जनादिति॥
३८ तथाशंखेनाप्युक्तं॥रथ्याकर्दमतोयेनष्ठीवनाद्येनवातथा॥नाभेरूर्ध्वंनरःस्पृष्टःसद्यःस्नानेनशुध्यतीति॥यमे
नाप्यत्रविशेषउक्तः॥सकर्दमंतुवर्षासुप्रविश्यग्रामसंकरं॥जंघयोर्मृत्तिकास्तिस्रःपादयोर्द्विगुणास्ततः
॥ग्रामसंकरंग्रामसलिलप्रवाहप्रदेशंसकर्दमंप्रविश्येत्यर्थः॥मारुतशोषितकर्दमादौनदोषः॥रथ्याकर्द
मतोयानिस्पृष्ट्वास्थिसस्नेहंस्नात्वाविप्रोविशुध्यतीति आचम्यवतुनिस्नेहंगांस्पृष्ट्वावीक्ष्यवापुनः॥ ॥इ
तिरंहिजातिविषयंअन्यत्रवसिष्ठेनोक्तं॥मानुषास्थिस्निग्धंस्पृष्ट्वात्रिरात्रमाशौचमस्निग्धेत्वहोरात्रमिति॥
अमानुषेतुविष्णूक्तं॥भक्ष्यवर्ज्यंपंचनखंसर्वंतदस्थिचसस्नेहंस्पृष्ट्वास्नातःपूर्ववस्त्रंप्रक्षालितंबिभृयात्॥इ
सेवमन्येपिस्नानार्हाःस्मृत्यंतरोक्ताबोद्धव्याः॥एवंस्नानार्हाणांबहुत्वात्तदभिप्रायंतदिरितिबहुवचनमविरुद्धं राम०
उदक्याशुचिभिःस्नायादित्येतच्चदंडाद्यचेतनव्यवधानस्पर्शेवेदितव्यं॥चेतनव्यवधानेतुमानवं॥दिवाकीर्त्ति ३८

मुदक्यांचपतितंसूतिकांतथा॥शवंतत्स्पृष्टिनंचैवस्पृष्ट्वास्नानेनशुध्यतीति॥तृतीयस्यत्वाचमनमेव॥त
त्स्पृष्टिनंस्पृशेद्यस्तुस्नानंतस्यविधीयते॥ऊर्ध्वमाचमनंप्रोक्तंद्रव्याणांप्रोक्षणंतथेतिसंवर्त्तस्मरणात्॥एत
च्चाबुद्धिपूर्वविषयं॥मतिपूर्वेतुतृतीयस्यापिस्नानमेव॥यथाहगौतमः॥पतितचंडालसूतिकोदक्याशवस्पृ
ष्टितत्स्पृष्ट्युपस्पर्शनेसचैलमुदकोपस्पर्शनाच्छुध्येयुरिति॥चतुर्थस्यत्वाचमनं॥उपस्पृश्याशुचिस्पृष्टंतृती
यंचापिमानवः॥हस्तौपादौचतोयेनप्रक्षाल्याचम्यशुध्यतीतिदेवलस्मरणात्॥अशुचिनापुनरुदक्यादिस्प
र्शेदेवलेनविशेषउक्तः॥श्वपाकंपतितंव्यंगमुन्मत्तंशवहारकं॥सूतिकांसाविकांनारींरजसाचपरिप्लुतां॥
श्वकुक्कुटवराहांश्चग्राम्यान्संस्पृश्यमानवः॥सचैलःसशिराःस्नात्वातदानीमेवशुध्यतीति॥अशुद्धान्स्वय
मप्येतानशुद्धस्तुयदिस्पृशेत्॥विशुध्यत्युपवासेनतथाकृच्छ्रेणवापुनरिति॥साविकाप्रसवस्यकारयित्री॥श्व
पाकादिविषयःकृच्छ्रः॥श्वादिषुतूपवासइतिविषयव्यवस्था॥अधुनाकालशुद्धौदृष्टांतत्वेनद्रव्यशुद्धिप्रकर

णोक्तानतंघेतत्प्रकरणेवक्ष्यमानानश्शुद्धिहेतून्ननुक्रामति॥कालोग्निःकर्ममृद्वायुर्मनोज्ञानंतपोजलं॥पश्चा
३९ त्तापोनिराहारःसर्वेमीशुद्धिहेतवः॥यथाग्न्यादयोमीसंर्वेस्वविषयेशुद्धिहेतवःतथाकालोपिदशरात्रादिकः
शास्त्रगम्यत्वाच्छुद्धिहेतुत्वस्य॥अग्निस्तावच्छुद्धिहेतुर्यथाभ्यधापिपुनःपाकान्महीमयमिति॥कर्मचशुद्धि
निमित्तं।यथावक्ष्यति॥तथाश्वमेधावभृथ——स्नानादिति।तथामृदपिशुद्धिकारणं॥यथाकथितं॥स
लिलेभस्ममृदापिप्रक्षेप्तव्यंशुद्धयेइति॥वायुरपिशुद्धिहेतुर्यथोदीरितं॥मारुतेनैवशुध्यंतीति॥मनोपि
शुद्धिसाधनंयथासमाम्नायि॥मनसावाडूषितावाग्वदतीत्यादि॥ज्ञानंचाध्यात्मिकंबुद्धिशुद्धौ——निद
शरीरस्य नं॥तथाभिधास्यति॥क्षेत्रज्ञस्येश्वरज्ञानादिति॥तपश्चकृच्छादि॥यथावदिष्यति॥प्राजापत्यंचरेत्कृच्छ्रंस
मावागुरुतल्पगइति॥तथाजलमपिशरीरादेः॥तथाजल्पिष्यति॥वर्ष्मणोजलमिति॥पश्चात्तापोपि राम०
शुद्धिजनकः॥यथागदितम्॥ख्यापनेनानुतापेनेति॥निराहारोपिशुध्यापादनम्॥यथाव्याहरिष्यति॥ ३९

चाअ
त्रिरात्रोपोषितोजप्त्वेत्यादि॥किंकार्यकारिणांदानंवेगोनद्याश्चशुद्धिकृत्॥शोध्यस्यमृद्वतोयंचसन्यासोथ
द्विजन्मनांतपोवेदविदांक्षांतिर्विदुषांवर्ष्मणोजलं॥जपःप्रच्छन्नपापानांमनसःसत्यमुच्यते॥भूतात्म
जीवस्य नस्तपोविद्येबुद्धेर्ज्ञानंविशोधनं॥क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिःपरमामता॥अकार्यकारिणांनिषिद्धसेवि
नांदानमेवमुख्यंशुद्धिकारणं॥यथाभिधास्यति॥पात्रेधनंवापर्याप्तंदत्वेति॥नद्यानिदाघादावल्पतोयत
यामेध्यापहाततीरायाःकूलंकषवर्षासुप्रवाहवेगःशुद्धिकृत्॥शोधनीयस्यद्रव्यस्यमृद्वतोयंचशुद्धिकृत्॥
यथाभणितं॥अमेध्याक्तस्यमृत्तोयैःशुद्धिर्गंधापकर्षणादिति॥संन्यासःप्रव्रज्याद्विजन्मनांमानसापप
चारेशुद्धिकृत्॥तपोवेदाभ्यासोवेदविशुद्धिकारणं॥कृच्छादित्तुसर्वसाधारणंनवेदविदामेव॥क्षांतिरुपश
मोविदुषांवेदार्थविदां॥वर्ष्मणःशरीरस्यजलंप्रच्छन्नपापानामविख्यातदोषाणामघमर्षणादिसूक्तजपः
शुद्धिसाधनं॥मनःसदसत्संकल्पात्मकंतस्यासत्संकल्पादशुद्धस्यसाधुसंकल्पःशोधनं॥भूतशब्देनतद्धिका

४० रः भूतो देहेंद्रियसंघातो लक्ष्यते तत्र स्थूलोहं कृशोहं काणोहं बधिरोहमित्येवं तदभिमानित्वेन योयमात्मावर्त्तते
सभूतात्मा तस्य तपो विद्ये शुद्धिनिमित्ते ॥ तपःशब्देनानेकजन्मतस्त्वेकस्मिन्नपि जन्मनि जागरस्वप्नसुषुप्त्यव
स्थास्वात्मनो योयमन्वयः शरीरादेश्च व्यतिरेकः सोभिधीयते ॥ तथा तपसा ब्रह्म विजिज्ञासस्वेति पंचकोशव्य
तिरेकप्रतिपादनपरे वाक्ये विद्याशब्देनोपनिषदमस्थूलमनण्वह्रस्वमसंगो ह्ययमात्मेति तत्पदार्थनिरूप
णविषयवाक्यजन्यं ज्ञानमुच्यते ॥ एताभ्यामस्य शुद्धिः शरीरादिव्यतिरेकबुद्धेः संशयविपर्ययरूपत्वेनाशु
द्धायाः प्रमाणरूपं ज्ञानं तेन विशोधनं क्षेत्रस्य तपोविद्याविशुद्धस्य त्वंपदार्थभूतस्य तत्त्वमसीत्यादिवाक्यजन्यात्सा
क्षात्काररूपादीश्वरज्ञानात्परमा विशुद्धिर्मुक्तिलक्षणा यथैताः शुद्धयः परमपुरुषार्थास्तथा कालशुद्धिरपि इत्ये
वं प्रशंसार्थभूतात्मादिशुद्धिविधानं ॥ इत्याशौचप्रकरणं ॥ आपद्यपि च कष्टायां सद्यः शौचं विधीयत इत्यापदि या० म० ४०
मुख्यशौचकल्पानुष्ठानासंभवेन सद्यःशौचाद्यनुकल्पमुक्त्वेदानीं तत्प्रसंगादापदि प्रतिग्रहोधिको विप्रे याजना

MEMORIAL

आपत्कालानंतरं प्रायश्चित्तं कृत्वा । आश्रमोचितमार्गे स्थेयमित्यर्थः

ध्यापने तथेत्याद्युक्तयाजनादिमुख्यवृत्त्यसंभवेन वृत्त्यंतरमाह ॥ क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विजः ॥
क्षत्रिय निस्तीर्य तामथात्मानं पावयित्वा न्यसेत्पथि ॥ द्विजो विप्रो बहुकुटुंबतया स्ववृत्त्या जीवितुमसमर्थः ॥ क्षत्रसंबंधिना
कर्मणा शस्त्रग्रहणादिना आपदि जीवेत् ॥ ~~तेनापि जीवितुं न समर्थः वैश्यसंबंधिना कर्मणा वाणिज्यादिना जीवेत् ॥~~
तेनापि जीवितुं न समर्थः वैश्यसंबंधिना कर्मणा वाणिज्यादिना जीवेत् ॥ न तु शूद्रवृत्त्या ॥ तथा च मनुः ॥ उभा
भ्यामपि जीवंस्तु कथं स्यादिति चेद्भवेत् ॥ कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकामिति ॥ तथा आपद्यपि न हीनव
र्णेन ब्राह्मणी वृत्तिराश्रयणीया ॥ किंतु ब्राह्मणेन क्षात्री क्षत्रियेन वैश्येन शौद्री सेवं स्वानंतरहीनवर्णवृत्तिरेव ॥ अ
जीवंतः स्वधर्मेणानंतरां पापीयसीं वृत्तिमातिष्ठेरन् ॥ ननु कदाचिज्ज्यायसीमिति वसिष्ठस्मरणात् ॥ ज्यायसी ब्राह्मणी
वृत्तिः तथा च स्मृत्यंतरं ॥ उत्कृष्टं वापकृष्टं वा तयोः कर्म न विद्यते ॥ मध्यमे कर्मणी हित्वा सर्वसाधारणे हिते ॥ शूद्र
स्योत्कृष्टं ब्राह्मणं कर्म न विद्यते ॥ तथा ब्राह्मणस्यापकृष्टं शौद्रं कर्म मध्यमे क्षत्रवैश्यकर्मणी पुनरापत्सु सर्ववर्णसा

४२ धारणे शूद्रस्त्वापद्गतो वैश्यवृत्त्या शिल्पैर्वा जीवेत्॥ शूद्रस्य द्विजशुश्रूषा तयाजीवन्वणिग्भवेत्॥ शिल्पैर्वा
विविधैर्जीवेत् द्विजातिहितमाचरन्निति प्रागुक्तत्वात्॥ मनुना चात्र विशेषो दर्शितः यैः कर्मभिः प्रचरितैः
शुश्रूष्यन्ते द्विजातयः॥ तानि कारुककर्माणि शिल्पानि विविधानि चेति॥ अनेनैव न्यायेनानुलोमासन्ताना
मपि स्वानंतरात्प्रवृत्तिरूहनीया॥ एवं स्वानंतरहीनवर्णवृत्त्यापदं निस्तीर्य प्रायश्चित्ताचरणेनात्मानं पावयित्वा प
थि न्यसेत्॥ स्ववृत्त्या वात्मानं स्थापयेदित्यर्थः॥ अयमर्थः॥ गर्हितवृत्त्यार्जितं धनं पथि न्यसेत्॥ उत्सृजेदिति॥
तथा च मनुः॥ जपहोमैरपैत्येनो याजनाध्यापनैः कृतं॥ प्रतिग्रहनिमित्तं तु त्यागेन तपसैव चेति वैश्यवृत्त्या
जीवतो ब्राह्मणस्यापण्यानीयं तदाह॥ फलोपलक्षौमसोममनुष्यापूपवीरुधः॥ तिलौदनरसक्षारान्दधि
क्षीरघृतं जलं॥ शस्त्रासवमधूच्छिष्टमधुलाक्षाथ बर्हिषः॥ मृच्चर्मपुष्पकुतपकेशतक्रविषक्षितीः॥ कौशे राम० ४१
यनीललवणमांसैकशफसीसकान्॥ शाकार्द्रौषधिपिण्याकपशुगंधांस्तथैव च॥ वैश्यवृत्त्यापि जीवंनो विक्री
पञ्चाशीतां नो विक्रीणीत इत्यनेनान्वयः

णीत कदाचन॥ नो विक्रीणीतेति प्रत्येकमभिसंबध्यते॥ फलानि कदल्यादीनि बदरेंगुदव्यतिरिक्तानि॥ यथाह
नारदः॥ स्वयंशीर्णानि पर्णानि फलानां बदरेंगुदे॥ रज्जुः कार्पासिकं सूत्रं तच्चेदविकृतं भवेदिति॥ उपलं माणिक्य
घृष्यमात्रं क्षौमम् अतसीसूत्रमयं वस्त्रं॥ क्षौमग्रहणं तांतवादेरुपलक्षणं॥ यथाह मनुः॥ सर्वं च तांतवं रक्तं शाणं
क्षौमाविकानि च॥ अपि चेत्स्युररक्तानि फलमूले तथौषधीरिति॥ सोमो लताविशेषः॥ मनुष्यपदेनाविशेषा
त्स्त्रीपुंनपुंसकानां ग्रहणं॥ अपूपं मंडकादि भक्ष्यमात्रं॥ वीरुधो वेत्रामृतादिलताः॥ तिलाः प्रसिद्धाः॥ ओद
नग्रहणं भोज्यमात्रोपलक्षणं॥ रसाः गुडेक्षुरसशर्करादयः॥ तथा च मनुः॥ क्षीरं क्षौमं दधि घृतं तैलं मधु गुडं क
शामिति॥ क्षाराः यवक्षारादयः॥ दधिक्षीरयोर्ग्रहणं मस्तुपिंडकिलाटकूर्चिकादीनां तद्विकाराणामुपलक्षणम्॥
क्षीरं स विकारमिति गौतमस्मरणात्॥ घृतग्रहणं तैलादिस्नेहमात्रोपलक्षणम्॥ जलं प्रसिद्धं॥ शस्त्रं खड्गा
दि॥ आसवग्रहणं मद्यमात्रोपलक्षणं॥ मधूच्छिष्टं सिक्थकं॥ मधु क्षौद्रं॥ लाक्षा जतु॥ बर्हिः कुशः॥ मृत्प्रसिद्धा

चर्माजिनं पुष्पं प्रसिद्धं॥ अजलोमकृतः कंबलः कुतपः। केशाश्वमर्यादिसंबद्धाः॥ तक्रमुदश्वित्। विषं शृंग्या
४२ दिक्षितिभूमिः निसंभवमिश्री। हियवाजाव्यश्ववर्षभवे धन्वनडुहश्चैकशफा इति गौतमस्मरणात् कौशेयं कोशप्र
भवं वसनं॥ नीलं नीलीरसं॥ लवणग्रहणेन विडसौवर्चलसैंधवसामुद्रभौम्यकृत्रिमाणपविशेषेण ग्रहणं तेमांसं
प्रसिद्धं॥ एकशफा हयादयादयः॥ सीसग्रहणेन लोहमात्रोपलक्षणं॥ शाकं सर्वमविशेषात्॥ ओषध्यः फल
पाकांताः॥ आर्द्रौषधय इति विशेषोपादानात् शुष्के पुनर्दोषः॥ पिण्याकः प्रसिद्धः॥ पशव आरण्याः॥ आरण्यां पतुः
श्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि चेति मनुस्मरणात्॥ गंधाश्चंदनागुरुप्रभृतयः॥ सर्वानेतान्वैश्यवृत्त्या जीवन्ब्रा
ह्मणः कदाचिदपि नो विक्रीणीत॥ क्षत्रियादेस्तु न दोषः। अत एव नारदः॥ वैश्यवृत्त्या न विक्रेयं ब्राह्मणेन पयो
दधीति ब्राह्मणग्रहणं कृतं॥ प्रतिप्रसवमाह॥ धर्मार्थं विक्रयं नेयास्तिला धान्येन तत्समाः॥ यथावश्यकाः पाकय याम०
ज्ञादिधर्माः स्वसाधनव्रीह्यादिधान्याभावेन निष्पद्यंते॥ तर्हि धान्येन तिला विक्रयं नेयास्तत्समा द्रोणपरिमितः द्रो ४२

णपरिमितेनैवं तेन धान्येन समाः॥ सर्वे सदृशे इति समासः॥ तथा च मनुः॥ काममुत्पाद्य कृष्यां तु स्वयमेव कृषी
वलः॥ विक्रीणीत तिलांछुद्धान्धर्मार्थमचिरस्थितान्॥ इति धर्मग्रहणमावश्यकभेषजाद्युपलक्षणं॥ अत एव
नारदः॥ अशक्तौ भेषजस्यार्थे यज्ञहेतोस्तथैव च॥ यद्यवश्यं तु विक्रेयास्तिला धान्येन तत्समा इति॥ यद्यन्यथावि
क्रीणीते तदा दोषः॥ भोजनाभ्यंजनाद्दानाद्यदन्यत्कुरुते तिलैः॥ कृमिर्भूत्वा स विष्ठायां पितृभिः सह मज्जतीति म
नुस्मरणात्॥ सजातीयैः पुनर्विनिमयो भवेत्सेव॥ रसा रसैर्निमातव्या न त्वेव लवणं रसैः॥ कृतान्नं च कृतान्ने
न तिला धान्येन तत्समा इति॥ कृतान्नं सिद्धान्नं तच्च सिद्धान्नेन परिवर्तनीयं॥ कृतान्नं चाकृतान्नेनेति पाठे सिद्ध
मन्नं अकृतान्नेन तंडुलादिना परिवर्तनीयमिति यावत्॥ पूर्वोक्तनिषेधातिक्रमे दोषमाह॥ लाक्षालवणमांसा
नि पतनीयानि विक्रये॥ पयो दधि च मद्यं च हीनवर्णकराणि तु॥ लाक्षालवणमांसानि विक्रीयमाणानि सद्यः पतनी
यानि द्विजातेः कर्महानिकराणि॥ पयः प्रभृतीनि तु हीनवर्णकराणि शूद्रत्वापादकानि एतद्व्यतिरिक्तपराय

विक्रयेवैश्यतुल्यतायथाहमनुः॥सद्यःपततिमांसेनलाक्षयालवणेनच॥अहेनशूद्रोभवतिब्राह्मणःक्षीरवि
४३ क्रयात्॥इतरेषामपण्यानांविक्रयादिहकामतः॥ब्राह्मणःसप्तरात्रेणवैश्यभावंनिगच्छति॥किंच॥आप
द्गतःसंप्रगृह्णन्भुंजानोपियतस्ततः॥नलिप्येतेनसाविज्वलनार्कसमोहिसः॥यस्त्वधनोबहुकुटुंबतया
पद्गतोपिक्षत्रवृत्तिंवैश्यवृत्तिंवानप्रविविक्षतिसयतस्ततोहीनहीनतेभ्यःप्रतिगृह्णन्नतदन्नंभुंजानो
पिवानचैनसापापेनलिप्यते॥यतस्तस्यामापदवस्थायामसत्प्रतिग्रहादावधिकारीत्वेनज्वलनार्कसमो
यथाज्वलनोर्कश्चहीनसंकरेपिनदुष्यति॥तथायमापद्गतोनदुष्यतीत्येतावत्साम्यं॥एवंचवदताआपद्गत
स्यपरधर्माश्रयणाद्विगुणमपिस्वधर्मानुष्ठानमेवमुख्यमितिदर्शितंभवति॥तथाचमनुः॥वरंस्वधर्मोविगु
णोनपारक्यःस्वनुष्ठितः॥परधर्मेश्रियादिप्रःसद्यःपततिजातितइति॥किंच॥कृषिःशिल्पंभृतिर्विद्याकु राम०
सीदंशकटंगिरिः॥सेवानूपंनृपोभैक्ष्यमापत्तौजीवनानितु॥आपत्तौजीवनानीतिविशेषणात्कृष्यादीनांम ४३

जलप्रायभूमिरथतृणाढ्यीवनं

धर्मेनापदवस्थायांयस्ययावृत्तिःप्रतिषिद्धातस्यसावृत्तिरनेनाभ्यनुज्ञायते॥एवंशिल्पादीन्यप्यभ्यनुज्ञाय
ते॥यथाचापदिवैश्यवृत्तिःस्वयंकृताकृषिर्विप्रक्षत्रिययोरभ्यनुज्ञायते॥शिल्पंस्वरूपकरणादि॥भृतिःप्रेष्य
त्वं॥विद्याभृतकाध्यापकत्वादा॥कुसीदंवृद्ध्यर्थंद्रव्यप्रयोगस्तत्स्वयंकृतमभ्यनुज्ञायते॥शकटंभारकेनधा
न्यादिवहनद्वारेणजीवनेहेतुः॥गिरिःस्वगततृणेंधनद्वारेणजीवनं॥सेवापरचित्तानुवर्त्तनं॥अनूपंप्रचुर
तृणवृक्षजलप्रायप्रदेशः॥तथान्नपणाचनं॥भैक्ष्यंस्नातकस्यापि॥एतान्यापत्तौजीवनानि॥तथाचमनुः॥
विद्याशिल्पंभृतिःसेवागोरक्षंविपणिःकृषिः॥गिरिर्भैक्ष्यंकुसीदंचदशजीवनहेतवः॥इति॥यदाकृष्यादीनामपि
जीवनहेतूनामसंभवस्तदाकथंजीवनमित्यतआह॥बुभुक्षितस्त्र्यहंस्थित्वाधान्यमब्राह्मणाद्धरेत्॥प्रतिगृह्य
तदाख्येयमभियुक्तेनधर्मतः॥धान्याभावेत्रिरात्रंबुभुक्षितोनश्नन्स्थित्वाऽब्राह्मणात्शूद्रात्तदभावेवैश्या
त्तदभावेक्षत्रियाद्वाहीनकर्मणः॥एकाहपर्याप्तंधान्यंहरेत् यथाहमनुः॥तथैवसप्तमेभक्तेभक्तानिषडनश्न

दिनत्रयोपवासानंतरंधान्यादिस्तेयंकृत्वातेनकुटुंबपोषणादिविधायपश्चात्तेनदृष्टंचेन्मयास्तेयंकृतंत्रास्त्येणौकंमितिवक्तव्यमित्यर्थः
स्तेयंकर्तव्यमित्य

४४ ता॥अश्वस्तनविधानेनहर्त्तव्यंहीनकर्मणइति॥तथा॥प्रतिग्रहोत्तरकालंचयदपहृतंतद्धर्मतोयथावृत्त
मारव्येयंकथनीयं॥यद्दिनास्तिकेनस्वामिनात्वयेदंकिंममापहृतमित्यभियुज्यते॥तथाहमनुः॥खलात्क्षेत्रा
दगाराद्वायतोवाप्युपलभ्यते॥आख्यातव्यंततस्तस्मैपृच्छेतेयदिपृच्छतीति॥इदमपरमापत्संगाद्राज्ञो
विधीयते॥तस्यवृत्तंकुलशीलंश्रुतमध्ययनंतथा॥ज्ञात्वाराजाकुटुंबंचधर्म्यांवृत्तिंप्रकल्पयेत्॥योशनायां तपः
परितोवसीदतितस्यवृत्तमाचारंकुलमाभिजात्यंशीलमात्मगुणं॥श्रुतंशास्त्रश्रवणंवेदाध्ययनंचपरीक्ष्यंरा
जाधर्मादनपेतांवृत्तिंप्रकल्पयेदन्यथातस्यदोषः॥तथाचमनुः॥यस्यराज्ञस्तुविषयेश्रोत्रियःसीदतिक्षुधा
॥तस्यसीदतितद्राष्ट्रंदुर्भिक्षव्याधिपीडितमिति॥इत्यापद्धर्मप्रकरणं॥चतुर्णामाश्रमिणांमध्येब्रह्मचारिगृह
स्थयोधर्माःप्रतिपादिताःसांप्रतमवसरप्राप्तावानप्रस्थधर्मान्प्रतिपिपादयिषुराह॥सुतविन्यस्तपत्नीक राम०
स्तयावानुगतोवनं॥वानप्रस्थोब्रह्मचारीसाग्निःसोपासनोव्रजेत्॥वनेप्रकर्षेणनियमेनतिष्ठतिचरतीति ४४

वनप्रस्थः॥वनप्रस्थएववानप्रस्थः॥संज्ञायांदैर्घ्यं॥भाविनींवृत्तिमाश्रित्यवनंप्रतिष्ठासुरितियावत्॥असौसु
तविन्यस्तपत्नीकस्तयैयंभरणीयेसर्वंसुतेविन्यस्तानिक्षिप्तापत्नीयेनसतथोक्तः॥यदिसापतिपरिचर्याभि
लाषेणस्वयमपिवनंजिगमिषति॥तदातयानुगतोवासहितस्तथाब्रह्मचारीदूरेताःसाग्निर्वैतानाग्निसहितः
॥तथासोपासनोगृह्याग्निसहितश्चवनंव्रजेत्॥सुतविन्यस्तपत्नीकइतिवदताकृतगार्हस्थ्यावानप्रस्थ्येधिक्रि
यतइतिदर्शयति॥एतच्चाश्रमसमुच्चयपक्षमंगीकृत्योक्तमितरथाअविप्लुतब्रह्मचर्योयमिच्छेत्तमावसेदित्यकृ
तगार्हस्थ्योपिवनवासेधिक्रियतएव॥अयंचवनप्रवेशोजराजर्जरकलेवरस्यजातपौत्रस्यवा॥यथाहमनुः॥गृ
हस्थस्तुयदापश्येद्वलीपलितमात्मनः॥अपत्यस्यैववापत्यंतदारण्यंसमाश्रयेदिति॥अयंचपुत्रेषुपत्नीनिक्षेपो
विद्यमानभार्यस्यमृतभार्यस्याप्यस्यायस्तवादिभिर्वनवासस्मरणात्॥अतोयद्दाहपिस्वाग्निहोत्रेणेतिपुनराधान
विधानंतदपरिपक्वकषायविषयंसाग्निःसोपानइत्यत्रापियदाधानकृतंतदाश्रौताग्निभिःगृह्येणचसहितोवनं

व्रजेत्॥ सर्वाधाने तु श्रौतैरेव केवलं॥ यदि कथंचिज्ज्येष्ठभ्रातरो नाहिताग्नित्वादिना श्रौताग्निना रहिताः तर्हि के
४५ वलसोपासनो व्रजेत्॥ इत्येवं विवेचनीयं॥ अग्निनयनं च तन्निर्वर्त्योपिहोत्रादिकर्मसिद्ध्यर्थं॥ अतएव मनुः॥
वैतानिकं च जुहुयादग्निहोत्रं यथाविधि। दर्शमस्कंदयन्पर्व पौर्णमासं च शक्तितः इति॥ ननु च पुत्रनिक्षिप्तप
त्नीकस्य तद्विरहिणः कथमग्निहोत्रादिकर्मानुष्ठानं घटते॥ पत्न्या सह यष्टव्यमिति सहाधिकारनियमात्॥
सत्यमेवं किंतु तत्र पत्नीनिक्षेपविधिबलादेव पत्नीतत्त्वैरपेक्षेणाधिकारः कल्प्यते यथा हि रजस्वलायां यस्य व्र
ते हत्यस्मिन्नालंभुकास्यात्तामपरुध्य यजेतेत्यपरोधविधिबलात्तन्निरपेक्षता॥ यद्वा वनं प्रविष्टमानयेदपति
पत्न्यनुमनुत इति न विरोधः॥ न च यथा ब्रह्मचारिणो विधुरस्य वा वनं प्रस्थितस्याग्निहोत्रादिपरिलोपस्तथा नि
क्षिप्तपत्नीकस्याप्यग्निहोत्राद्यभाव इत्याशंकनीयं॥ अपाक्षिकत्वेन श्रवणात्॥ न च ब्रह्मचारिविधुरयोरप्यग्निसा रा.म.
ध्यकर्मस्वनधिकारः॥ पंचममासादूर्ध्वमाहितश्रावणाकाग्नेस्तदधिकारदर्शनात्॥ वानप्रस्था जटिलश्चीराजि ४५

नवासनफालकृष्टमधितिष्ठेदकृष्टं मूलफलं संचिन्वीतोर्ध्वरेताः क्षमाशयो दद्यादेव न प्रतिगृह्णीयादूर्ध्वं पंचभ्यो
मासेभ्यः श्रावणकेनाग्निमाधायाहिताग्निर्वृक्षमूलिको दद्यादेव पितृमनुष्येभ्यः स गच्छेत्स्वर्गमानंत्यमिति व
सिष्ठस्मरणात्॥ चीरवस्त्रखंडो वल्कलं वा॥ न फालकृष्टमधितिष्ठेत्कृष्टक्षेत्रस्योपरि न वसेत्॥ श्रावणकेन वै
दिकेन मार्गेण न लौकिकेनेत्यर्थः॥ साग्निः सोपासनो व्रजेदित्येतदग्निसाध्यश्रौतस्मार्तकर्मानुष्ठानार्थमित्यु
नागर क्तं॥ तत्र गुणविधिमाह॥ अफालकृष्टेनाग्नीश्च पितॄन्देवातिथीनपि॥ रसांश्च तर्पयेत्स्य श्रुजयालोमभृद्धात्म
वान्॥ फालग्रहणं कर्षणसाधनोपलक्षणं॥ अकृष्टक्षेत्रोपलक्षणं चोद्भवेन नीवारवेणुश्यामाकादिनाग्निं संतर्पये
त्॥ अग्निसाध्यानि कर्माण्यनुतिष्ठेद्वा च शरः द्विभागेन मपितेनैव कुर्यात्तथा पितॄन्देवानतिथीनपि शदा
द्भूतान्यपि तेनैव तर्पयेत्॥ तथा रसांश्च शदाद्वाश्रमप्राप्तानपि॥ तथा च मनुः॥ यद्भक्ष्यः स्यात्ततो दद्याद्बलिं भि
क्षां च शक्तितः। अप्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् इति एवं पंचमहायज्ञान्कृत्वा स्वयमपि तच्छेषमेवभुं

४६ जीत॥देवताभ्यस्तु तद्धुत्वा वन्यं मेध्यतरं हविः॥शेषमात्मनि युंजीत लवणं च स्वयं कृतमिति मनुस्मरणात्॥स्व
यंकृतमूषरलवणं॥तच्च भोग्यार्थे यागांगार्थे च मुन्यन्ननियमाद्ग्राम्याहारपरित्यागोर्थात्सिद्धः॥अतएव मनुः
संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदमिति॥ननु च दर्शपूर्णमासादेः व्रीह्यादिग्राम्यद्रव्यसाध्यत्वात्कथं तत्परि
त्यागः न च वचनीयमफालकृष्टेनाग्नींश्चेति विशेषवचनसामर्थ्याद्व्रीह्यादिबाधइति॥विशेषविषयविशपायि
स्मृत्याश्रुतिबाधस्यान्याय्यत्वात्॥अफालकृष्टविधेश्च स्मार्ताग्निसाध्यकर्मविषयत्वेनोपपद्यन्ते॥सत्यमेवं किं
त्वत्र व्रीह्यादेरप्यफालकृष्टत्वसंभवान्न विरोधः॥अतएव मनुना वासंतशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः॥पु
रोडाशांश्चरूंश्चैव विधिवन्निर्वपेत्पृथगिति नीवारादिमुन्यन्नानां स्वतो मेध्यत्वेसिद्धे पुनर्मेध्यग्रहणं यज्ञार्हव्रीह्या
दिग्रहणार्थं कृतं॥मेधो यज्ञस्तदर्थं मेध्यमिति॥तथाश्मश्रुलोमनखजानि रोमाणि जटारूपांश्च शिरोरुहान्कक्षादी राम० ४६
नि च रोमाणि बिभृयात्॥रोमग्रहणं नखानामप्युपलक्षणं॥तथा च मनुः॥जटाः संबिभृयान्नित्यं श्मश्रुलोमनखां

स्तथेति॥तथा आत्मवान्नात्मोपासनाभिरतः स्यात्॥सर्वोक्तद्रव्यसंचयनियममाह॥अह्नो मासस्य षण्णां वात
था संवत्सरस्य वा॥अर्थस्य संचयं कुर्यात्कृतमाश्वयुजे त्यजेत्॥एकस्याह्नः संबंधिभोजनयजनादिदृष्टादृष्टक
र्मपर्याप्तस्यार्थस्य संचयं कुर्यात्॥मासस्य वा षण्णां मासानां संवत्सरस्य वा संबंधिकर्मपर्याप्तं संचयं कुर्यान्ना
धिकं॥यद्येवं क्रियमाणोपि कथंचिदतिरिच्यते॥तर्हि तदतिरिक्तं आश्वयुजे मासि त्यजेत्॥किंच॥दांतस्त्रिषव
णस्नायी निवृत्तश्च प्रतिग्रहात्॥स्वाध्यायवान्दानशीलः सर्वसत्त्वहिते रतः॥दांतो दर्परहिताः॥त्रिषु सवने
षु प्रातर्मध्यंदिनापराह्णेषु स्नानशीलः॥तथा प्रतिग्रहपराङ्मुखः॥चशब्दाद्याजनादिनिवृत्तश्च॥स्वाध्यायवा
न्वेदाभ्यासरतः॥तथा मूलफलभिक्षादिदानशीलः सर्वप्राणिहिताचरणनिरतश्च भवेत्॥किंच॥दंतोलू लि ख
कः कालपक्वाशी वाश्मकुट्टकः॥श्रौतं स्मार्तं फलस्नेहैः कर्म कुर्यात्क्रियास्तथा॥दंता एवोलूखलं निस्तुषीकरण
साधनं दंतोलूखलः॥तद्यस्यास्ति स दंतोलूखलिकः॥कालेनैव पक्वं कालपक्वधान्यावस्थनीवारवेणुश्यामाकादि व

Dr. BHAU DAJI MEMORIAL डा० भाउदाजी स्मारकम्

दंतैरुलूखलिफलं तदशनशीलः॥ कालपक्काशी वा शस्त्रोग्निपक्काशनो वा स्यात्॥ कालं पक्वभुगेव चेति मन्त्रकाग्नि
४७ पक्काशित्वाभिप्रायः॥ अश्मकुट्टको वा ध्रुभवेत्॥ अश्मना कुट्टनमवहननं यस्य स तथोक्तः॥ तथा श्रौतं स्मार्त्तं
च कर्म॥ दृष्टार्थाश्च भोजनाभ्यंजनादिक्रियाः लकुचमधुकादिमेध्यतरुफलोद्भवैः स्नेहद्रव्यैः कुर्यान्न तु घृता
दिकैः॥ तथा च मनुः॥ मेध्यवृक्षोद्भवानद्यात्स्नेहांश्च फलसंभवानिति॥ पुरुषार्थतया विहितद्विभोजननियम्य
र्थमाह॥ चांद्रायणैर्नयेत्कालं कृच्छ्रैर्वा वर्त्तयेत्सदा॥ पक्षे गते वाप्यश्नीयान्मासे वाहनि वा गते॥ चांद्रायणैर्वक्ष्यमा
णलक्षणैः कालं नयेत्॥ कृच्छ्रैर्वा प्राजापत्यादिभिः कालं वर्त्तयेत्॥ यद्वा पक्षे पंचदशदिनात्मके गते अश्नीयात्
मासे वा गते द्विवा गते नक्तमश्नीयात्॥ अपि शब्दाच्चतुर्थकालिकात्वादिना॥ यथाह मनुः॥ नक्तं वान्नं समश्नी
याद्दिवा वाहृत्य शक्तितः॥ चतुर्थकालिको वा स्यात्स्याद्वाप्यष्टमकालिक इति॥ एतेषां च कालनियमानां शक्त्यपेक्षया रामं०
विकल्पः॥ किंच॥ स्वप्याद्भूमौ शुची रात्रौ दिवा संप्रपदैर्नयेत्॥ स्थानासनविहारैर्वा योगाभ्यासेन वा तथा॥ आहा ४७

रविहारावसरवर्ज्जं रात्रौ शुचिः प्रयतः स्वप्यान्नोपविशेन्नापि तिष्ठेत्॥ दिवा स्वेपस्य पुरुषमात्रार्थत्वात्प्र
तिषिद्धत्वान्नतन्निवृत्तिपरं॥ तथा भूमावेव स्वप्यान्न शय्यान्तरिताायां मंचकादौ वा॥ दिनं तु संप्रपदैरटनैर्नये
त्॥ स्थानासनत्रयैर्वा विहारैः संचारैः कंचित्कालं स्थानं कंचित्कालं चोपवेशनमित्येवं वा दिनं नयेत्॥ योगा
भ्यासेन वा॥ तथा च मनुः॥ विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीरित्यात्मनः संसिद्धये ब्रह्मत्वप्राप्तये॥ त
था प्रातः क्षिति परिलोटनाद्वा नयेत्॥ भूमौ विपरिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनमिति स्मरणात्॥ प्रपदैः पादाग्रैः
॥ किंच॥ ग्रीष्मे पंचाग्निमध्यस्थो वर्षासु स्थंडिलेशयः॥ आर्द्रवासास्तु हेमंते शक्त्या वापि तपश्चरेत्॥ ऋतुः
संवत्सरो ग्रीष्मो वर्षा हेमंत इति दर्शनात्॥ ग्रीष्मे चैत्रादिमासचतुष्टये चतसृषु दिक्षु चत्वार उपरिष्टात्सवि
स इत्येवं पंचानामग्नीनां मध्ये तिष्ठेत् तथा वर्षासु श्रावणादिमासचतुष्टये स्थंडिलेशयः॥ वर्षधारा विनिवार
णविरहीणि भूतले निवसेत्॥ हेमंते मार्गशीर्षादिमासचतुष्टये क्लिन्नं वासो वासीत॥ एवंविधतपश्चरणेअ

समर्थः स्वशक्त्यनुरूपं वा तपश्चरेत्॥ यथा शरीरशोषस्तथा यतेत॥ तपश्चरंश्चोग्रतरं शोषयेत् देहमात्मन
४८ इति मनुस्मरणात्॥ किंच॥ यः कंटकैर्वितुदति चंदनैर्यश्च लिंपति॥ अक्रुद्धोऽपरितुष्टश्च समस्तस्य च त
स्य च तस्य च॥ यः कश्चित्कंटकादिभिर्विविधमंगानि वितुदति व्यथयति तस्मै न कुप्येत्॥ यश्चंदनादिभि
रुपलिंपति सुखयति तस्य न परितुष्येत्॥ किंतु तयोरुभयोरपि समः स्यादुदासीनो भवेत्॥ अग्निपरिच
र्याः क्षमं प्रत्याह॥ अग्नीन्वाप्यात्मसात्कृत्वा वृक्षावासो मिताशनः॥ वानप्रस्थगृहेष्वेव यात्रार्थं भैक्षमाचरे
त्॥ अग्नीनात्मनि समारोप्य वृक्षावासो वृक्ष एव आवासः कुटी यस्य स तथोक्तः॥ मिताशनः स्वल्पाहारोऽ
पि शक्त्या फलमूलाशन इति॥ मुनिर्मौनव्रतयुक्तः। फलमूलासंभवे तु यथाह मनुः॥ अग्नीनात्मनि वैतानान्
समारोप्य यथाविधि॥ अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशन इति॥ मुनिर्मौनव्रतयुक्तः॥ फलमूलासं रा म०
भवे च यावता प्राणधारणं भवति॥ तावन्मात्रं भैक्षं वानप्रस्थगृहेष्वाचरेत्॥ यदा तु तत्रासंभवो व्याध्यभिभ ४८

वो वा तदा किं कार्यमित्यत आह॥ ग्रामादाहृत्य वा ग्रासानष्टौ भुंजीत वाग्यतः॥ ग्रामाद्वा भैक्षमाहृत्य वाग्यतो मौनी
भूत्वाष्टौ ग्रासान्भुंजीत ग्राम्यभैक्षविधानान्मुख्यत्वनियमो लुप्यते सः॥ यदा पुनरष्टभिर्ग्रासैः प्राणधारणं न सं
भवति॥ तदाष्टौ ग्रासा मुनेर्भैक्ष्यं वानप्रस्थस्य षोडशेति स्मृत्यंतरोक्तं द्रष्टव्यं॥ सकलानुष्ठानासमर्थं प्रत्या
ह॥ वायुभक्षः प्रागुदीचीं गच्छेदा वर्ष्मसंक्षयात्॥ अथवा वायुरेव भक्षो यस्यासौ वायुभक्षः प्रागुदीचीमैशानीं दि
शं गच्छेत्॥ आ वर्ष्मसंक्षयात्॥ वर्ष्म वपुस्तस्य निपातपर्यन्तमकुटिलगतिर्गच्छेत्॥ यथाह मनुः॥ अपराजितां वा
स्थाय दिशं गच्छेदजिह्मग इति॥ महाप्रस्थाने त्वशक्तो भृगुपतनादिकं वा कुर्यात्॥ वानप्रस्थो वीराध्वानं ज्वल
नाम्बुप्रवेशनं॥ भृगुपतनं चानुतिष्ठेदिति स्मरणात्॥ स्नानाचमनादिधर्मा ब्रह्मचारिप्रकरणाद्यभिहिताश्चा
विरोधिनोऽस्यापि भवंति॥ इतरेषां च तदविरोधीनि गौतमस्मरणात्॥ एवं प्रागुदीचीं दिशं वा महाप्रस्थानपर्य
न्तामनुसारागात मनुतिष्ठन्ब्रह्मलोके पूज्यतामाप्नोति॥ यथाह मनुः॥ आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुं॥

४९ वीतशोकभयोविप्रोब्रह्मलोकेमहीयतइति॥ब्रह्मलोकःस्थानविशेषोनतुनित्यंब्रह्मतत्र॥लोकशब्दस्याप्रयो
गात्॥तुरीयाश्रमांतरेणमुक्तनंगीकाराच्च॥नवयोगाभ्यासेनवापुनरितिब्रह्मोपासनविध्यनुपपत्तेस्तद्भावा
पत्तिःपरिशंकनीया॥सालोक्यादिप्राप्त्यर्थत्वेनापितदुपपत्तेः॥अतएवश्रुतौ॥त्रयोधर्मस्कंधाइत्युपक्रम्य
यज्ञोध्ययनंदानमितिप्रथमः॥तपएवेतिद्वितीयोब्रह्मचार्याचार्यकुलवासीतृतीयोत्यंतमाचार्यकुलएवा
त्मानमवसादयन्नितिगार्हस्थ्यवानप्रस्थनैष्ठिकत्वस्वरूपमभिधायसर्वएतेपुण्यलोकाभवंतीतित्रयाणामाश्र
मिणांपुण्यलोकप्राप्तिमभिधायब्रह्मसंस्थस्यमुक्तिलक्षणामृतत्वप्राप्तिरभिहिता॥यद्यपिश्राद्धकृत्सत्य
वादीचगृहस्थोपिहिमुच्यतइतिगृहस्थस्यापिमोक्षप्रतिपादनं॥तद्भवांतरानुभूतपारिव्राज्यस्यैवेदमवगं
तव्यं॥इतिवानप्रस्थप्रकरणं॥वैखानसधर्माननुक्रम्यक्रमप्राप्तान्पारिव्राजकधर्मान्सांप्रतंप्रस्तौति॥वनाद्गृ राम०
हाद्वाकृत्वेष्टिंसार्ववेदसदक्षिणां॥प्राजापत्यांतदंतेतानग्नीनारोप्यचात्मनि॥अधीतवेदोजपकृत्पुत्रवानन्नदो ४९

ग्निमान्॥शक्त्याचयज्ञकृन्मोक्षेमनःकुर्यात्तुनान्यथा॥यावताकालेनतीव्रतपःशोषितवपुषोविषयकषायप
रिपाकोभवति॥पुनश्चमदोद्भवाशंकानोद्भाव्यतेतावत्कालपर्यंतवनवासंकृत्वातदनंतरंमोक्षेमनःकुर्या
दितिवनगृहशब्दाभ्यांतत्संबंध्याश्रमोलक्ष्यते॥मोक्षशब्देनमोक्षैकफलकश्चतुर्थाश्रमः॥अथवागार्हस्थ्या
दनंतरंमोक्षेमनःकुर्यादनेनचपूर्वोक्तश्चतुराश्रमसमुच्चयपक्षःपाक्षिकइतिद्योतयति॥तथाचविकल्पो
जाबालश्रुतौश्रूयते॥ब्रह्मचर्यंपरिसमाप्यगृहीभवेद्गृहीभूत्वावनीभवेद्वनीभूत्वाप्रव्रजेत्॥यदिवेतरथाब्रह्म
चर्यादेवप्रव्रजेद्गृहाद्वावनाद्वेति॥तथागार्हस्थ्येतराश्रमबाधश्चगौतमेनदर्शितः॥ऐकाश्रम्यंत्वाचार्याःप्रत्यक्षविधा
नात्गार्हस्थ्यस्येति॥एषांचसमुच्चयविकल्पबाधपक्षाणांसर्वेषांश्रुतिमूलत्वादिच्छयाविकल्पः॥अतोयत्कैश्चि
त्संदितंमन्येनुक्तंस्मार्तत्वान्नैष्ठिकत्वादीनांगार्हस्थ्येनश्रौतेनबाधःगार्हस्थ्यानधिकृतांधपंग्वादिविषयतावेति
॥तत्स्वाध्यायाध्ययनैवधुर्येनिबंधनमित्युपेक्षणीयं॥किंच॥यथाविक्रमणज्यावेक्षणादावक्षमतयापंग्वादी

५० नांश्रौतेष्वनधिकारस्तथास्मार्त्तेष्वपि तुरंकुंभाहरणभिक्षाचरणाक्षमत्वात्कथंपंग्वादिविषयत्वमानैष्ठिकत्वाद्या
श्रमनिर्वाहः॥अस्मिंश्चाश्रमेब्राह्मणस्यैवाधिकारः॥आत्मन्यग्नीन्समारोप्यब्राह्मणःप्रव्रजेद्गृहात्॥तथैषवो
भिहितोधर्मोब्राह्मणस्यचतुर्विधइत्युपक्रमोपसंहाराभ्यांमनुनाब्राह्मणस्याधिकारप्रतिपादनात्॥ब्राह्मणाःप्र
व्रजंतीतिश्रुतेश्चाग्रजन्मनएवाधिकारोनद्विजातिमात्रस्य॥अन्येतुत्रैवर्णिकानामकृतत्वात्त्रयाणांवर्णानां
वेदमधीत्यचत्वारश्चाश्रमाइतिस्मृतिचकारवचनाच्चद्विजातिमात्रस्याधिकारमाहुः॥यदावनाद्गृहाद्वाप्रव्रजतित
दासार्ववेदसदक्षिणांसर्ववेदसर्वधनदसंबंधिनीदक्षिणायस्याःसातथोक्तांप्रजापतिदेवताकांइष्टिंकृत्वात
देतेतांश्चैतानग्नीनात्मनिश्रुत्युक्तविधानेनसमारोप्यचशक्त्यादुदगयनेपौर्णमास्यांपुरश्चरणमादौकृत्वा
शुद्धेनकायेनअष्टौश्राद्धानिवानिर्वपेत्॥द्वादशवेतिबोधायनेनाप्युक्तंपुरश्चरणादिकंकृत्वातथाधीतवेदो रा०म०
जपपरायणोजातपुत्रोदीनांधकृपणार्थिसार्थाययथाशक्त्यन्नंदत्त्वाभूत्वाअनाहिताग्निर्ज्येष्ठत्वादिनाप्र ५०

तिबंधाभावेकृताधानोनित्यनैमित्तिकान्यज्ञान्कृत्वामोक्षमनःकुर्यात्॥चतुर्थाश्रयंप्रविशेत्॥नान्यथा॥अ
नेनानपाकृतऋणत्रयस्यगृहस्थस्यप्रव्रज्यायामनधिकारंदर्शयति॥यथाहमनुः॥ऋणानित्रीण्यपाकृत्य
मनोमोक्षेनिवेशयेत्॥अनपाकृत्यमोक्षंतुसेवमानोव्रजत्यधः॥यदातुब्रह्मचर्यात्प्रव्रजतितदानप्रजोत्पादना
दिनियमः॥नचशंकनीयमकृतदारपरिग्रहस्यतत्रानधिकाराद्यागयमुक्तत्वाच्चविवाहस्यऋणत्रयापाकर
णविधिरेवदारानाक्षिपतीति॥विद्याधनार्जननियमवत्अन्यप्रयुक्तदारसंग्रहेतस्यानाक्षेपकत्वात्॥ननुजा
यमानोवैब्राह्मणस्त्रिभिर्ऋणवान्जायते॥ब्रह्मचर्येणऋषिभ्योयज्ञेनदेवेभ्यःप्रजयापितृभ्यइति॥जातमात्र
स्यैवप्रजोत्पादनादीनिआवश्यकानीतिदर्शयतिमैवंनहिजातमात्रोकृतदाराग्निपरिग्रहोयज्ञादिष्वधिक्रिय
तेतदस्मादधिकारीजायमानोब्राह्मणइतियज्ञादीननुतिष्ठेदितितस्यार्थः॥अतश्चोपनीतस्यवेदाध्ययनमे
वावश्यकं॥कृतदाराग्निपरिग्रहस्यप्रजोत्पादनमपीतिनिरवद्यं॥एवमधिकारिणंनिरूप्यतद्धर्ममाह॥सर्वभू

५१ तहितः शांतस्त्रिदंडी सकमंडलुः॥ एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत्॥ सर्वभूतेभ्यः प्रियाप्रियकरि
भ्यो हितः उदासीनो न पुनर्हिंसाचरणः हिंसानुग्रहयोरनारंभी इति गौतमस्मरणात्॥ शान्तः बाह्यान्तःकरणोप
रतः॥ वाग्दंडोथ मनोदंडः कर्मदंडश्च ते त्रयः यस्यैते नियता दंडाः स त्रिदंडीति कथ्यते॥ तदभिव्यंजकाश्च यष्टयः
॥ त्रिदंडा अस्य संतीति त्रिदंडी दंडांश्च वैणवान् ग्राह्याः प्राजापत्येष्ट्यनंतरं दंडी चेति बोधायनस्मरणात्॥ चतुर्थमाश्र
मं गच्छेद्ब्रह्मविद्यापरायणः॥ एकदंडी त्रिदंडी वा सर्वसंगविवर्जित इति चतुर्विंशतिमते दर्शनाच्च॥ तथा॥ शिखाधा
रणमपि वैकल्पिकं मुंडः शिखी वेति गौतमस्मरणात्॥ मुंडोऽममोऽपरिग्रह इति वसिष्ठस्मरणात्॥ यज्ञोपवीतधार
णमपि वैकल्पिकमेव॥ सशिखान् केशान्निकृत्य विसृज्य यज्ञोपवीतकमिति काठकश्रुतिदर्शनात्॥ कुटुंबं पुत्रदारां
श्च वेदांगानि च सर्वशः॥ केशान् यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः॥ इति बाष्कलस्मरणात्॥ अथ यज्ञोपवीतम राम०
प्सु जुहोति भूः स्वाहेत्यथ दंडमाधत्ते॥ सखे मां गोपायेति परिशिष्टदर्शनाच्च॥ यथाशक्ति सदा कंथापरिग्राह्या कषा ५१

यी मुंडस्त्रिदंडी सकमंडलुपवित्रपादुकासनकंथामात्र इति देवलस्मरणात्॥ शौचाद्यर्थी कमंडलुसहितश्च भवे
त्॥ एकारामः प्रव्रजितांतरेण सहायः॥ संन्यासिनीभिः स्त्रीभिश्च स्त्रीणां चैक इति बोधायनेन स्त्रीणामपि प्रव्रज्या
स्मरणात्॥ तथा च दक्षः॥ एको भिक्षुर्यथोक्तस्तु द्वावेव मिथुनं स्मृतं॥ त्रयो ग्रामः समाख्यात ऊर्ध्वं तु नगरायते॥
राजवार्त्तादि तेषां च भिक्षावार्त्ता परस्परं॥ अतिपैशुन्यमात्सर्यं सन्निकर्षान्न संशय इति॥ तथा वै संचरेद्योगी सतां
धर्ममदूषयन्॥ यथा जनाऽवमन्येरन् गच्छेयुर्नैव संगतिं॥ निंद्यश्च संततं साधुस्तथा विद्वान् समाचरेदिति पराशरः॥ उ
न्मत्तोपपिशाचो वायं मूर्खोयं विषयी सुखी॥ इति ब्रूयुर्यथा सर्वे तथेतथेमां विचरेन्महीं॥ अव्यक्तलिंगोऽव्यक्ताचार इति
श्रुतेः॥ अनुन्मत्तवेष्टितः॥ उन्मत्तवेषो नोन्मत्त इति व्यासः॥ परिव्रज्य परि सर्वं व्रजति धातुस्त्यागे वर्तते॥ अतश्चा
हंममाभिमानं तत्कृतं च लौकिकं कर्मनिचयं वैदिकं च निःसकाम्यात्मकं संसजेत्॥ तदुक्तं मनुना॥ सुखाभ्युदयि
कं चैव नैःश्रेयसिकमेव च॥ प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकं॥ इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते॥ निष्का

मंज्ञानपूर्वंतुनिवृत्तमुपदिश्यते॥यथोक्तान्यपिकर्माणिपरिहायद्विजोत्तमः॥आत्मज्ञानेशमेचस्याद्वेदा-
५२ भ्यासेचयत्नवानिति॥अत्रवेदाभ्यासःप्रणवाभ्यासस्तत्रयत्नवान्॥भिक्षाप्रयोजनार्थंग्राममाश्रयेतप्रविशे-
त्।नपुनःसुखनिवासार्थं॥वर्षाकालेतुनदोषः॥ऊर्द्ध्वंवार्षिकाभ्यांमासाभ्यांनैकस्थानवासीतिशंख-
स्मरणात्॥अशक्तौपुनर्मासचतुष्टयपर्यंतमपिस्थातव्यम्॥नचिरमेकत्रवसेदन्यत्रवर्षाकालात्॥
श्रावणादयश्चत्वारोमासावर्षाकालइतिदेवलस्मरणात्॥एकरात्रंवसेद्ग्रामेनगरेपंचरात्रके॥वर्षाभ्यो-
न्यत्रवर्षासुमासांश्चतुरोवसेत्॥इतिकण्वस्मरणात्॥कथंभिक्षाटनकार्यमित्यतआह॥अप्रमत्तश्चरे-
पारवंड्यादिरहि द्भैक्षंसायाह्नेनभिलक्षितः॥रहितेभिक्षुकैर्ग्रामेयात्रामात्रमलोलुपः॥अप्रमत्तोवाक्चक्षुरादिचापलर-
हितोभैक्षंचरेत्॥वसिष्ठेनात्रविशेषोदर्शितः॥सप्तागाराण्यसंकल्पितानिचरेद्भैक्षमिति॥सायाह्नेअह्नः रा॰म॰
पंचमेभागे॥तथाचमनुः॥विधूमेपन्नमुसलेव्यंगारेभुक्तवज्जने॥वृत्तेशरावसंपातेनित्यंभिक्षांयतिश्च ५२

मानसहुपर्वसन्ते

DR. BHAU DAJI MEMORIAL

रेत्॥तथा॥एककालेचरेद्भिक्षांप्रसज्जेन्नतुविस्तरे॥भैक्षप्रसक्तोहियतिर्विषयेष्वपिसज्जातइति॥अन-
भिलक्षितःज्योतिर्विज्ञानोपदेशादिनाअचिह्नितः॥नचोत्पातनिमित्ताभ्यांननक्षत्रांगविद्यया नानुशास-
नवादाभ्यांभिक्षांलिप्सेतकर्हिचिदितितेनैवोक्तत्वात्॥यत्पुनर्वसिष्ठवचनं ब्राह्मणकुलेवायल्लभेततद्भुंजी-
तसायंप्रातर्मांसवर्ज्जमितितदशक्तविषयं॥भिक्षुकैर्भिक्षणशीलैःपाषंड्यादिभिर्वर्ज्जितेग्रामे॥मनुना
चात्रविशेषउक्तः॥नतापसैर्ब्राह्मणैर्वावयोभिरपिवाश्वभिः॥आकीर्णंभिक्षुकैरन्यैरगारमुपसंव्रजेदि-
ति॥यावताप्राणयात्रावर्त्ततेतावन्मात्रंभैक्षंचरेत्॥तथाचसंवर्तः॥अष्टौभिक्षाःसमादायसमुनिःसप्तपं-
चवा॥अद्भिःप्रक्षाल्यताःसर्वास्ततोऽश्नीयाज्जवाग्यतइति॥अलोलुपःमिष्टान्नव्यंजनादिष्वप्रसक्तः॥भि-
क्षाचरणार्थंपात्राण्याह॥यतिपात्राणिमृद्वेणुदार्वलाबुमयानिच॥सलिलैःशुद्धिरेतेषांगोवालैश्चाव-
घर्षणं॥मृदादिप्रकृतिकानियतीनांपात्राणिभवेयुः॥तेषांसलिलंगोवालावघर्षणंचशुद्धिसाधनं॥इयं

चशुद्धिर्भिक्षाचरणादिप्रयोगांगभूतानामेध्यापहतिविषया॥ तदुपघाते द्रव्यशुद्धिप्रकरणोक्ता द्रष्टव्या
५३ अत एव मनुना॥ अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च॥ तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे इ
ति॥ चमसदृष्टांतोपादानेन प्रायोगिकी शुद्धिर्दर्शिता॥ पात्रांतराभावे भोजनमपि जलेनैव कार्यं॥ तदुक्तं संग्रहीत्रे
कांते तेन पात्रेणान्येन वा स्वल्पीमात्रया भुंजीतेति देवलस्मरणात्॥ एवंभूतस्य यतेरात्मोपासनांगं नियमवि
शेषमाह॥ संनिरुध्येंद्रियग्रामं रागद्वेषौ प्रहाय च॥ भयं हृत्वा च भूतानाममृती भवति द्विजः॥ चक्षुरादी
द्रियसमूहं रूपादिविषयेभ्यः सम्यङ् निरुध्य विनिवर्त्य॥ रागद्वेषौ प्रियाप्रियविषयौ प्रहाय त्यक्त्वा॥ चशब्दा
दीर्ष्यादीनपि॥ तथा॥ भूतानामपकाराकरणेन भयमकुर्वन् शुद्धांतःकरणः सन्नद्वैतसाक्षात्कारेणामृ
तो भवति॥ किंच॥ कर्तव्याशयशुद्धिस्तु भिक्षुकेण विशेषतः॥ ज्ञानोत्पत्तिनिमित्तत्वात्स्वातंत्र्यकरणाय च ५३
॥विषयाभिलाषद्वेषजनितदोषकलुषितस्याशयस्यांतःकरणस्य शुद्धिः॥ कलुषक्षयः प्राणायामैः क

इंद्रियाणामंतर्मुखता।

र्तव्या॥ तस्याः शुद्धेरात्माद्वैतसाक्षात्काररूपज्ञानोत्पत्तिनिमित्तत्वात्॥ एवं सति विषयासक्तिजनितदो
षात्मकप्रतिबंधक्षये सम्यगात्मध्यानधारणादौ स्वतंत्रो भवति॥ भिक्षुकेण तेषा शुद्धिर्विशेषतोनुष्ठेया॥ तस्य
मोक्षप्रधानत्वात्॥ मोक्षस्य च शुद्धान्तःकरणतामन्तरेण दुर्लभत्वात्॥ यथाह मनुः॥ दह्यंते ध्मायमानानां धा
तूनां हि यथा मलाः॥ तथेंद्रियाणां दह्यंते दोषाः प्राणस्य निग्रहादिष्यामलति॥ इंद्रियनिरोधोपाय तयासं
सारस्वरूपनिरूपणमाह॥ अवेक्ष्या गर्भवासाश्च कर्मजा गतयस्तथा॥ आधयो व्याधयः क्लेशाः जरा रूपवि
उत्पत्तिः पर्ययः॥ भवो जातिसहस्रेषु प्रियाप्रियविपर्ययः॥ वैराग्यसिद्ध्यर्थं मूत्रपुरीषादिपूर्णनानाविधगर्भवा
सा अवेक्षणीयाः पर्यालोचनीयाः॥ चशब्दाज्जननोपरमावपि॥ तथा निषिद्धाचरणादिक्रियाजन्या महा
रौरवादिनिरयपतनरूपा गतयः॥ तथा॥ आधयो मनःपीडाः व्याधयश्च ज्वरातिसारादयः शारीराः॥ क्ले
शाः अविद्यास्मितारागद्वेषाभिनिवेशाः पंच॥ जरा वलीपलिताद्यभिभवः॥ रूपविपर्ययः खंजकुब्जत्वा

५४ दिनाप्राक्तनस्यान्यस्यान्यथाभावः॥तथा॰श्वशूकरखरोष्ट्राद्यनेकजातिषु भवद्वयन्ति॥तथा॰इष्टस्याप्रापि
रनिष्टस्याप्तिरित्यादिबहुतरक्लेशावहं संसारस्वरूपं पर्यालोच्य तत्परिहारार्थमात्मज्ञानोपाये यत्नेन्द्रियज
ये प्रयतेत॥एवमवस्थानन्तरं किं कार्यमित्यत आह॥ध्यानयोगेन संपश्येत्सूक्ष्म आत्मात्मनि स्थितः॥यो
गश्चित्तवृत्तिनिरोधः॥आत्मैकाग्रता ध्यानं॥तस्मादेव बाह्यविषयस्योपरमः॥ध्यानयोगेन निदिध्या
सनापरपर्यायेण सूक्ष्मः शरीरप्राणादिव्यतिरिक्तः क्षेत्रज्ञ आत्मनि ब्रह्मरूपेऽवस्थित इत्येवं तत्त्वंपदार्थ जीवः
योरभेदं सम्यक्पश्येत॥अपरोक्षीकुर्यात्॥अत एव श्रुतौ आत्मा द्रष्टव्य इति साक्षात्काररूपं दर्शनमनूद्य
तत्साधनत्वेन श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रवणमनननिदिध्यासनानि विहितानि॥किं च॥ना
श्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः॥अतो यदात्मनोऽपथ्यं परेषां न तदाचरेत्॥प्राक्तनश्लोकोक्तोपासना ध्यान॰गम॰
स्ये धर्मे।नाश्रमो दंडकमंडल्वादिधारणं कारणं॥यस्मादसौ क्रियमाणो भवेदेव नातिदुष्करः॥तस्माद्यदात्म ५४
किंतु धर्मः [illegible]

नोऽपथ्यमुद्वेगकरं परुषभाषणादि तत्परेषां न समाचरेत्॥अनेन ज्ञानोत्पत्तिहेतुभूतान्तःकरणशुद्ध्यापादन
त्वेनान्तरंगत्वाद्रागद्वेषप्रहाणस्य प्रधानत्वेन प्रशंसार्थमाश्रमनिराकरणम्॥न पुनस्तत्परित्यागाय॥तस्या
पि विहितत्वात्॥तदुक्तं मनुना॥भूषितोपि चरेद्धर्मं यत्र तत्राश्रमे वसन्॥समः सर्वेषु भूतेषु न लिंगं धर्मका
रणं॥किं च॥सत्यमस्तेयमक्रोधो ह्रीः शौचं धीर्धृतिर्दमः॥संयतेन्द्रियता विद्या धर्मः सर्व उदाहृतः॥सत्यं यथार्थ
प्रियवचनम्॥अस्तेयं परद्रव्यानपहारः॥अक्रोधोऽपकारिण्यपि क्रोधस्यानुत्पादनं॥ह्रीर्लज्जा॥शौचमाहा
रादिशुद्धिः॥धीर्हिताहितविवेकः॥धृतिरिष्टवियोगानिष्टप्राप्तावप्यचलितचित्तस्य यथापूर्वमवस्थापनं॥दमो मद
त्यागः॥संयतेन्द्रियताऽप्रतिषिद्धेष्वपि विषयेष्वनतिप्रसंगः॥विद्याऽऽत्मज्ञानम्॥एतैः सत्यादिभिरनुष्ठितैः सर्वो
धर्मोऽनुष्ठितो भवत्यनेन दंडकमंडल्वादिधारणं बाह्यलक्षणं तत्सारहीनामात्मगुणानामन्तरंगतां द्योतयति॥ननु
ध्यानप्रयोगेणात्मनि स्थितमात्मानं पश्येदित्युक्तं जीवपरमात्मनोर्भेदाभावादित्यत आह॥निःसरन्ति यथा लो

हपिंडात्तप्तात्स्फुलिंगकाः॥सकाशाद्वात्मनस्तद्वदात्मानः प्रभवन्तिहि॥यद्यपिजीवपरयोःपारमार्थिकोभेदोना
५५ स्तितथाप्यात्मनःसकाशाद्विविधोपाधिभेदभिन्नतयाजीवात्मानःप्रभवंति॥हियस्मात्तस्मायुज्यतएवजीवप
रयोर्भेदव्यपदेशः॥यथातप्तात्लोहपिंडादयोगोलकात्विस्फुलिंगकाःतेजोवयवाःनिःसरंति।निःसृताश्च
स्फुलिंगव्यपदेशंलभंते॥तद्वत्॥अतउपपन्नमात्मात्मनिश्चितोद्रष्टव्यइति॥यद्वाऽयमर्थः॥ननुसुषुप्तिस
मयेप्रलयेचसकलस्थेचज्ञानांब्रह्मणिप्रलीनत्वात्कास्याममात्मोपासनाविधिरित्यतआहनिःसरन्तीत्यादि
॥यद्यपि॥सूक्ष्मरूपेणप्रलयवेलायांप्रलीनास्तथाप्यात्मनःसकाशाद्विविधोपाधिभेदभिन्नतयाजीवात्मा
नःप्रभवंति॥पुनःकर्म्मवशात्स्थूलशरीराभिमानिनोजायंते॥तस्मान्नोपासनाविधिविरोधः॥तेजस
स्पष्टभग्भावसाम्यात्लोहपिंडदृष्टांतः॥ननुचानुपात्तवपुषांक्षेत्रज्ञानांनिःपरिस्पंदतयाकर्माभावात्क ५५
थंतन्निबंधनोजरायुजांडजादिचतुर्विधदेहपरिग्रहइत्यतआह॥तत्रात्मादिस्वयंकिं चित्कर्मकिंचितस्व

निष्क्रियस्यदेहग्रहःकथमित्यतआहतत्रात्मेति।यद्यपिपरिस्पंदोनास्ति।तथापिमानसंकर्मभवत्येवेति।स्वयमेव।स्तन्यपानं रूतेतृप्तिर्भवतीत्यन्वयः

भावनः॥करोतिकिंचिदभ्यासाद्धर्माधर्मोभयात्मकं॥यद्यपितस्यामवस्थायांपरिस्पंदात्मकक्रियाभावस्त
थापिधर्माधर्माध्यवसायात्मकंकर्ममानसंभवत्येव॥तस्यचविशिष्टशरीरग्रहणहेतुत्वमस्त्येव॥वार्त्तिकेःप
क्षिमृगतांमानसैरंत्यजातितामितिमनुस्मरणात्॥एवंगृहीतवपुःस्वयमेवान्वयव्यतिरेकनिरपेक्षः॥
स्तन्यपानादिकेकृतेतृप्तिर्भवतिअकृतेनभवतीत्येवंरूपावन्वयव्यतिरेकौतत्रनिरपेक्षः॥प्राग्भवीयानुभ
वभावितभावनानुभावोद्भूतकार्य्यावबोधःकिंचित्स्तन्यपानादिकंकरोति॥किंचित्स्वभावतोमदृच्छयाप्रयो
जनाभिसंधिनिरपेक्षंपिपीलिकादिभक्षणंकरोतिकिंचिद्भवांतराभ्यासवशात्धर्म्माधर्म्मोभयरूपंकरोति
॥तथाचस्मसंतरं॥प्रतिजन्मयदभ्यस्तंदानमध्ययनंतपः॥तेनैवाभ्यासयोगेनतदेवाभ्यसतेपुनरिति॥स
र्वंजीवानांकर्म्मवैचित्र्यात्तत्कृतंजरायुजादिदेहवैचित्र्यंयुज्यतएव॥नन्वेवंसतिब्रह्मणएवकथंचिज्जीवव्य
पदेशात्तस्यचनित्यत्वादिधर्मत्वात्कथंविष्णुमित्रोजातइतिव्यवहारइत्याशंक्याह॥निमित्तमक्षरःकर्त्ताबोद्धा

निमित्तकारणं। अदृष्टादेर्बोधा।धर्मादिकर्त्ता च

५६ सत्वादि ब्रह्मगुणी वशी॥ अजः शरीरग्रहणात्स जात इति कीर्त्यते॥ स स्वमात्मा सकलजगत्प्रपंचाविर्भावेन विद्यासमा
वेशात्समवाय्यसमवायिनिमित्तमिस्यैवस्वयमेव त्रिविधकारणं न पुनः कार्यकोटिनिविष्टः॥ यस्मादक्षरोऽवि
नश्वरः॥ ननु सत्वादिगुणविकारस्य सुखदुःखमोहात्मकस्य कार्यभूते प्रपंचे दर्शनात्तद्गुणवत्याः प्रकृतेरे
व जगत्कर्तृतोचिता॥ न पुनर्निर्गुणस्य ब्रह्मणो मैवं मंस्थाः॥ आत्मैव कर्ता यस्मादसौ जीवोपभोग्यसुखदुःख
हेतुभूतादृष्टादेर्वेदितानस्यचेतनायाः प्रकृतेर्निरूपयाकृत विचित्रभोक्तापवर्गभोगानुकूलभोग्यभोगा
यतनादियोगिजगत्प्रपंचना घटते॥ तस्मादात्मैव कर्ता॥ तथा स एव ब्रह्मवृंहको विस्तारकः॥ न चासौ नि
र्गुणो यतस्तस्य त्रिगुणा शक्तिरविद्या प्रकृतिप्रधानाद्यपरपर्याया विद्यते॥ इतः स्वतो निर्गुणत्वेपि शक्ति रा म०
मुखेन सत्वादिगुणयोगी कथ्यते॥ न चैतावता प्रकृतेः कारणता॥ यस्मादात्मैव वशी स्वतंत्रो न प्रकृतिर्ना ५६
मस्वतंत्रत्वात्तरं॥ तादृग्विधत्वे प्रमाणाभावात्॥ न च वदच्चनीयं शक्तिरूपापि सैव कर्तृभूतेति यतः शक्ति

मत्कारणेन शक्तिः॥ तस्मादात्मैव जगतस्त्रिविधमपि कारणं॥ तथा अजडस्य त्रिरहितः॥ अतस्तस्य यद्यपि
साक्षाज्जन्मनोपपद्यते॥ तथापि शरीरग्रहणमात्रेण जात इत्युच्यते॥ अवस्थांतरयोगितया सन्नरहस्थो
जात इतिवत्॥ शरीरग्रहणप्रकारमाह॥ सर्गादौ स यथाकाशं वायुं ज्योतिर्जलं मही॥ सृजन्सेकोत्तरगुणां
स्तथा स्त्रे भवन्नपि॥ सृष्टिसमये स परमात्मा यथाकाशादीन् शब्दगुणं गगनं॥ शब्दस्पर्शगुणः पवनः॥ श
ब्दस्पर्शरूपगुणं तेजः॥ शब्दस्पर्शरूपरसवदुदकं॥ शब्दस्पर्शरूपरसगंधगुणा जगत्येवमेकोत्तरगुणान्सृ
जति॥ तथात्मा जीवभावमापन्नो भवन्नुसद्यमानोपि स्वशरीरस्यारंभकत्वेनापि तानुपादत्ते गृह्णाति॥ कथं
शरीरारंभकत्वं पृथिव्यादीनामित्यत आह॥ आहुत्याप्याययते सूर्यः सूर्याद्वृष्टिरथौषधिः॥ तदन्नं रसरूपेण
भुक्तत्वमुपगच्छति॥ यजमानैः प्रक्षिप्ताया आहुत्याः पुरोडाशादिरसेनाप्याययते सूर्यः॥ सूर्याच्च कालवशेन परि
पक्वाज्यादिहवीरसाद्वृष्टिर्भवति॥ ततो व्रीह्याद्यौषधिरूपमन्नं॥ तच्चान्नमेवितं षड्रसं तु धिरादिक्रमेण शुक्रतां

णितभावमापद्यते॥ततः किमित्याह॥स्त्रीपुंसयोश्च संयोगे विशुद्धे शुक्रशोणिते॥पंचधातून्स्वयंषष्ठ आद
५७ त्ते युगपत्प्रभुः॥ऋतुवेलायां स्त्रीपुंसयोः संयोगे शुक्रे च शोणिते च शुक्रशोणिते तस्मिन्परस्परं संयुक्ते विशु
द्धे वातपित्तश्लेष्मदुष्टगंधिपूयक्षीणमूत्रपुरीषगंधिरेतांस्यबीजानीत्येवंरूपदोषरहिते स्थित्वा तस्मि
न्पृथिव्यादिपंचमहाभूतानि शरीरारंभकतया स्वयंषष्ठश्चिदात्मा प्रभुः शरीरारंभकारणादृष्टकर्मयोगि
तया समर्थो युगपदादत्ते भोगायतनत्वेन स्वीकरोति॥तथा च शारीरके॥स्त्रीपुंसयोश्च संयोगे योनौ रजसा
भिसंसृष्टं शुक्रं तत्क्षणमेव सह भूतात्मना गुणैश्च सत्वरजस्तमोभिः सह वायुना प्रेर्यमाणं गर्भाशये तिष्ठती
ति॥किंच॥इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः॥धारणा प्रेरणं दुःखमिच्छाहंकार एव च॥प्रयत्न आ
प्रा॰ दि कृतिर्वर्णः स्वरद्वेषौ भवाभवौ॥तस्येदमात्मकं सर्वमनादेरादिमिच्छतः॥इन्द्रियाणि ज्ञानकर्मेन्द्रियाणि वक्ष्यमा रा.म॰
णानि॥मनश्चोभयसाधारणं॥प्राणोपानव्यानोदानसमान इत्येवं पंचवृत्तिभेदभिन्नप्रकोष्ठवायुः प्राणः॥ज्ञा ५७

नमवगमः॥आयुः कालविशेषावच्छिन्नं जीवनं॥सुखं निर्वृतिः॥धृतिश्चित्तस्य स्थैर्यं धारणा प्रज्ञा मेधा च॥प्रे
रणं ज्ञानकर्मेन्द्रियाणां अधिष्ठातृत्वं॥दुःखमुद्वेगः॥इच्छा स्पृहा॥अहंकारो हंकृतिः॥प्रयत्नः कृतिः॥आकृ
तिराकारः॥वर्णो गौरिमादिः॥स्वरः स्वहुकाकल्यादिः॥द्वेषो वैरभावः॥भवः पुत्रपश्वादिविभवः॥अभव
स्तद्विपर्ययः॥तस्यानादेरात्मनो नित्यस्यादिमिच्छतः॥शरीरं जिघृक्षमाणस्य सर्वमेतदिन्द्रियादिकमात्म
जनितं प्राग्भवीयकर्मबीजजनितमित्यर्थः॥संयुक्तशुक्रशोणितस्य कायरूपपरिणतौ क्रममाह॥प्रथमे मा
सि संक्लेदभूतो धातुविमूर्छितः॥मास्यर्बुदं द्वितीये तु तृतीयेंगेंद्रियैर्युतः॥असौ चेतनः षष्ठो धातुर्धातुविमू
र्छितः॥धातुषु पृथिव्यादिषु विमूर्छितो लीनो भूतः क्षीरनीरवदेकीभूत इति यावत्॥प्रथमे गर्भमासे संक्लेद
रूपो द्रवरूपतामापन्न एवावतिष्ठते न कठिनतया परिणमते॥द्वितीये मास्यर्बुदं ईषत्कठिनमांसपिंडरूपं भवति
॥अयमभिप्रायः॥केवलपवनजठरदहनाभ्यां प्रतिदिनमीषदीषच्छोष्यमाणं शुक्रं पक्वाया दितद्रवीभावं भूत

५८ जातंत्रिंशद्दिनैःकाठिन्यमापद्यतइति॥तथाचशुश्रुते॥द्वितीयेशीतोष्मानिलैरभिपच्यमानोभूतसं
घातोघनोजायतइति॥तृतीयेतुमासिअंगेंद्रियैश्चसंयुक्तोभवतिकिंच॥आकाशगुणाद्यवैसौक्ष्म्यंशब्दं
श्रोत्रंबलादिकं॥वायोश्चस्पर्शनंचेष्टाव्यूहनंरौक्ष्यमेवच॥पित्तात्तुदर्शनंपक्तिमौष्ण्यंरूपप्रकाशतां॥रसा
त्तुरसनंशैत्यंस्नेहंक्लेदंसमार्द्रवं॥भूमेर्गंधंतथाघ्राणंगौरवंमूर्तिमेवच॥आत्मागृह्णात्यजःसर्वंतृतीयेस्पंद
तेततः॥आत्मागृह्णातीतिसर्वत्रसंबध्यते॥गगनात्सु[illegible]मानंलघनक्रियोपयोगिनंसौक्ष्म्यंसूक्ष्मेक्षित्वं॥श
ब्दविषयं।श्रोत्रश्रवणेंद्रियं॥बलंदार्ढ्यं॥आदिग्रहणात्सुषिरत्वंविविक्ततांच॥आकाशच्छन्दश्श्रोत्रंविविक्ततां
चसर्वंछिद्रसमूहांश्चेतिगर्भोपनिषद्दर्शनात्॥पवनात्स्पर्शेन्द्रियंचेष्टांगमनागमनादिका॥व्यूहनमंगानांवि
विधंप्रसारणं॥रौक्ष्यकर्कशत्वंस्वशब्दात्स्पर्शंच॥पित्तात्तेजसःदर्शनंचक्षुरिंद्रियं॥पक्तिर्भुक्तस्यान्नस्यपच रा.म०
नं॥औष्ण्यमुष्णस्पर्शत्वमंगानां॥रूपंश्यामादिप्रकाशितांभ्राजिष्णुतां॥तथासंतापादिर्शौर्यामर्षतैक्ष्ण्य ५८

DR. BHAU DAJI MEMORIAL

पक्तिर्योग्यभ्राजिष्णुतासंतापवर्णरूपेंद्रियाणितैजसानीतिगर्भोपनिषद्दर्शनात्॥एवंरसादुदकाद्रसनेंद्रियं
॥शैत्यमंगानां॥स्नेहंस्निग्धतां॥मृदुत्वसहितंक्लेदंसमार्दवं॥तथाभूमेर्गंधंघ्राणंघ्राणेंद्रियंगौरवंगरिमाणं
मूर्तिंच॥मूर्तिमेतत्परमार्थतोजन्मरहितोप्यात्मातृतीयेमासिगृह्णाति॥ततश्चतुर्थमासिस्पंदतेचलति॥त
थाचशारीरके॥तस्माच्चतुर्थमासिचलनाशावभिप्रायंकरोतीति॥किंच॥द्वैहृदस्याप्रदानेनगर्भोदोषमवा
प्नुयात्॥वैरूप्यंमरणंवापितस्मात्कार्यंप्रियंस्त्रियाः॥गर्भस्यैकंहृदयंगर्भिण्याश्चापरमित्येवंद्विहृदयायाः
स्त्रियायदभिलषितंतद्दोहं तस्याप्रदानेनगर्भोवैरूप्यतामरणरूपवादोषंप्राप्नोति॥तस्मात्तद्दोषपरिहा
रार्थंगर्भपुष्ट्यर्थंचगर्भिण्याःस्त्रियायत्प्रियंतदभिलषितंतत्संपादनीयं॥तथाचसुश्रुते द्विहृदयांनारींदौर्हृ
दिनीमाचक्षते॥तदभिलषितंदद्यात्॥वीर्यवंतंचिरायुषंपुत्रंजनयतीति॥तथाव्यायामादिकमपिगर्भग्र
हणप्रभृतितयापरिहरणीयं॥ततःप्रभृतिव्यायाममध्यवसायातितर्जनदिवास्वप्नरात्रिप्रजागरणःशोक

५९ भयपानाशे हलवेगधारणमुल्कशमनशोणितमोक्षणानि परिहरेदिति तत्रैवाभिधानात्॥ गर्भग्रहणं चव्य
मादिभिर्लिंगैरवगंतव्यं॥ सद्योगृहीतगर्भाया: श्रमो ग्लानिः॥ पिपासासक्थिसादनं शुक्रशोणितयोरनुबंधः
स्फुरणं च योन्याइत्यादि तत्रैवोक्तं॥ किंच॥ स्थैर्यं चतुर्थेत्वंगानां पंचमे शोणितोद्भवः॥ षष्ठे बलस्य वर्णस्य न
खरोम्णां च संभवः॥ तृतीयेमासि प्रादुर्भूतस्यांगसंघस्य चतुर्थे मासि स्थैर्यं स्थेमा भवति॥ पंचमे लोहित
स्योद्भव इत्यर्थः॥ तथा षष्ठे बलवर्णकरनुहरोम्णां संभवः॥ किंच॥ मनश्चैतन्ययुक्तो सौ नाडीस्नायुशिरायु
तः॥ सप्तमे चाष्टमे चैव त्वङ्मांसस्मृतिमानपि॥ असौ प्रह्वोक्तगर्भः॥ सप्तमे मासि मनसा चेतनसा चेतनया
च युक्तो सौ नाडीस्नायुशिरायुतभिर्वायुवाहिनीभिः स्नायुभिरस्थिवंधनैः शिराभिर्वातपित्तश्लेष्मवा
हिनीभिश्च संयुतः॥ तथाष्टमे मासि त्वङ्मांसेन स्मृत्या च युक्तो भवति॥ किंच॥ पुनर्धात्रीं पुनर्गर्भमोजस्त राम०
स्य प्रधावति॥ अष्टमे मास्यतोगर्भोजातः प्राणैर्वियुज्यते॥ तस्याष्टममासिकस्य गर्भस्योतः कश्चन गुण ५९

विशेषो धात्रीगर्भं च प्रतिपुनः पुनरतिचंचलतया शीघ्रं गच्छति॥ अतोष्टमे मासि जातो गर्भः प्राणैर्वियु
ज्यते॥ अनेनौजःस्थितिरेव जीवनो हेतुरिति दर्शयति॥ ओजःस्वरूपं सुश्रुतेन दर्शितं॥ हृदि तिष्ठति य
च्छुद्धमीषद्रक्तं सपीतकं॥ ओजः शरीरे संख्यातं तन्नाशान्नाशमृच्छति इति॥ किंच॥ नवमे दशमे वापि प्र
ब बलैः सूतिमारुतैः॥ निःसार्यते बाणइव यंत्रच्छिद्रेण सज्वरः॥ एवं करचरणवक्षरादि परिपूर्णांगः स नि योन
वमे दशमे वा मासि अपि शब्दात्स्यागपि सप्तमे ष्टमे वा मास्यायासादि दोषवशात्प्रबलः सूतिहेतुः प्रभंजनः प्रेरितस्त्वा
यस्थिचर्मादिनिर्मितवपुर्यंत्रच्छिद्रेण सुसूक्ष्मसुषिरेण सज्वरो दुःसहदुःखाभिभूयमानो निःसार्यते॥ ध
नुर्यंत्रेण सुधन्व प्रेरितबाणइवातिवेगेन॥ निर्गमसमनंतरं च बाह्यपवनस्पर्शेन नष्टप्राचीनस्मृतिर्भवति॥
जातः स वायुना स्पृष्टो न स्मरति पूर्वजन्ममरणकर्म शुभाशुभमिति निरुक्तस्य द्वादशे भिधानात्॥ काय
स्वरूपं विवृण्वन्नाह॥ तस्य षोढा शरीराणि षट्त्वचो धारयंति च॥ षडंगानि तथास्थ्नां च सह षष्ट्या शतत्रयं॥

तस्यात्मनो या निजरायुजोंडजशरीराणि प्रत्येकं षट्प्रकाराणि रक्तादिषड्धातुपरिपाके हेतुभूतषडग्नियोगि
६० त्वेन तथाह्यन्नरसो जाठराग्निपरिपच्यमानो रक्ततां प्रतिपद्यते॥ रक्तं च स्वकोशस्थाग्निना पच्यमानं मांसत्वं
मांसं च स्वकोशानलपरिपक्वं मेदस्त्वं॥ मेदोपि स्वकोशवह्निना पक्वमस्थितां॥ अस्थ्यपि स्वकोशाग्निपक्वं मज्ज
त्वं॥ मज्जापि स्वकोशपावकपरिपच्यमानं चरमधातुतया परिणमते॥ चरमधातोस्तु परिणतिर्नास्ति सर्व
वात्मनः प्रथमः कोश इत्येवं षट्कोशाग्नियोगित्वात् षट्प्रकारत्वं शरीराणां॥ अन्नरसरूपस्य तु प्रथम
धातोरनियतत्वान्नत्र सकाशान्यत्वं॥ तानि च शरीराणि षट्त्वचो धारयंति॥ रक्तमांसमेदोस्थिमज्जशुक्रा
ख्याः षड्धातव एव रंभास्तंभत्वगिव बाह्याभ्यंतररूपेण स्थितास्त्वगिवाच्छादकत्वात्त्वचस्ताः षट्त्वचो धारयंति॥
तदिदमायुर्वेदप्रसिद्धं॥ तथांगानि च षडेव करयुग्मचरणयुगलमुत्तमांगमंगं चेति॥ अस्थ्नां तु षष्टिसहि गा.म०
तं शतत्रयमुपरितनपद्यश्लोक्या वक्ष्यमाणमवगंतव्यं॥ किंच॥ स्थालैः सह चतुःषष्टिर्दंतास्ते विंशतिर्नखाः ६०

पाणिपादशलाकाश्च तासां स्थानचतुष्टयं॥ स्थालानि दंतमूलप्रदेशस्थान्यस्थीनि द्वात्रिंशत्तैः सह द्वा
त्रिंशद्दंताश्चतुःषष्टिर्भवंति॥ नखाः कररुहाः विंशतिः॥ हस्तपादस्थानि शलाकाकाराण्यस्थीनि मणिबं
धस्योपरिवर्त्तीनि अंगुलीमूलस्थानि विंशतिरेव॥ तेषां नखानां शलाकास्थां च स्थानचतुष्टयं॥ द्वौ चरणौ क
रौ चेत्येवमस्थ्नां चतुरुत्तरशतं किंच॥ पष्ट्यंगुलीनां द्वे पार्ष्ण्यौ गुल्फेषु चतुष्टयं॥ चत्वार्यरत्निकास्थीनि जंघ
योस्तावदेव च॥ विंशतिरंगुलयस्तासामेकैकस्याः त्रीणि त्रीणि पर्वसंगुलिसंबंधीन्यस्थीनि षष्टिर्भवंति॥ पादयो
ः पश्चिमो भागो पार्ष्णी तयोरस्थि द्वे॥ एकैकस्मिन्पादे द्वावित्येवं चतुर्षु गुल्फेषु चत्वार्यस्थीनि॥ बाह्वोररत्निप्र
माणानि चत्वार्यस्थीनि जंघयोश्च तावदेव चत्वार्येवेत्येवं चतुःसप्ततिः॥ किंच॥ द्वे जानुकपोलोनु फलकांस
समुद्भवे॥ अक्षतालूषके श्रोणीफलके च विनिर्दिशेत्॥ जंघानुसंधिर्जानुः॥ कपोलो गल्लुः ऊरुसक्थि तत्फ
लकम्॥ अंसो भुजशिरः॥ अक्षः कर्णनेत्रयोर्मध्यशंखादधोभागः॥ तालूषकं काकुदं श्रोणी ककुद्मती तत्फ

६१ लकं॥तेषामेकैकस्यास्थिनी द्वे विनिर्दिशेदित्येवं चतुर्दशास्थीनि भवंति॥किंच॥भगास्थ्येकं तथा पृष्ठे
चत्वारिंशच्च पंच च॥ग्रीवायां पंचदशास्थिः स्याज्जत्र्वेकैकं तथा हनुः॥गुह्यास्थ्येकं पृष्ठे पश्चिमभागे पंचचत्वा
रिंशदस्थीनि ग्रीवा कंधरा पंचदशास्थिर्भवेत्॥वक्षोंसयोः संधिर्जत्रु मतिजत्रवेकैकं॥हनुश्चिबुकं॥तत्रा
प्येकमस्थीत्येवं चतुःषष्टिः॥किंच॥तन्मूले द्वे ललाटाक्षिगंडे नासाघनास्थिकं॥पार्श्वकाः स्थालकैः सार्द्ध
मर्बुदैश्च द्विसप्ततिः॥तस्य हनोर्मूले स्थिनी द्वे॥ललाटं भालं॥अक्षि चक्षुः गंडः कपोलाक्षयोर्मध्यप्रदेशस्ते
षां समाहारो ललाटाक्षिगंडं तत्र प्रत्येकं अस्थियुगलं नासाघनसंज्ञकास्थिमती पार्श्वकाः कक्षाधःप्रदे
शसंबंधीन्यस्थीनि तदाधारभूतानि स्थालकानि तैः स्थालकैरर्बुदैस्तास्थिविशेषैः सह पार्श्वकाद्विसप्तति
॥पूर्वोक्तैश्च नवभिः सार्द्धमेकाशीतिर्भवति॥किंच॥द्वौ शंखकौ कपालानि चत्वारि शिरसस्तथा॥उरः सप्तदश राम०
स्थीनि पुरुषस्यास्थिसंग्रहः॥भ्रूकर्णयोर्मध्यप्रदेशवस्थिविशेषौ शंखकौ॥शिरसः संबंधीनि चत्वारि कपाला ६१

नि॥उरो वक्षः सप्तदशास्थिकमित्येवं त्रयोविंशतिः पूर्वोक्तैश्च सह षष्ट्यधिकं शतत्रयमित्येवं पुरुषस्या
स्थिसंग्रहः कथितः॥सविषयाणि ज्ञानेंद्रियाण्याह॥गंधरूपरसस्पर्शशब्दाश्च विषयाः स्मृताः॥नासिका लो
चने जिह्वा त्वक् श्रोत्रं चेंद्रियाणि तु॥एते गंधादयो विषयाः पुरुषस्य बंधनहेतवः॥विषयशब्दस्य षिञ् बंधन
इत्यस्य धातोर्व्युत्पन्नत्वात्॥एतैश्च गंधादिभिर्बोध्यत्वेन व्यवस्थितैः॥स्वस्वगोचरसंवित्साधनतयानुमेयानि घ्राणा
दीनि पंचेंद्रियाणि भवंति॥कर्मेंद्रियाणि दर्शयितुमाह॥हस्तौ पायुरुपस्थं च जिह्वा पादौ च पंच च॥कर्मेंद्रियाणि
जानीयान्मनश्चैवोभयात्मकं॥हस्तौ प्रसिद्धौ॥पायुर्गुदः॥उपस्थं रतिसंपाद्यसुखसाधनं जिह्वा प्रसिद्धा पादौ च॥
एतानि हस्तादीनि पंच कर्मेंद्रियाण्यादाननिर्हरणव्याहारविहारादिकर्मसाधनानि जानीयात्॥मनोंतःकर
कर्म णं युगपज्ज्ञानानुत्पत्तिगम्यं॥तच्च बुद्धिकर्मेंद्रियसहकारित्वेनोभयात्मकं॥प्राणायतनानि दर्शयितुमाह॥नाभि
रोजो गुदं शुक्रं शोणितं शंखकौ तथा॥मूर्द्धांसकंठहृदयं प्राणस्यायतनानि तु॥नाभिप्रभृतीनि दश प्राणस्थानानि

६२ समाननाम्नः पवनस्य सकलांगसंचारित्वेपि नाभ्यादिस्थानविशेषवासो युक्तिः प्राचुर्याभिप्रायात् प्राणायतनानि
प्रपंचयितुमाह ॥ वपा वसा वहननं नाभिः क्लोम यकृत्प्लीहा ॥ क्षुद्रांत्रं वृक्कौ बस्तिः पुरीषाधानमेव च ॥ आमाश
योथ हृदयं स्थूलांत्रं गुद एव च । उदरं च गुदौ कोष्ठौ विस्तारोयमुदाहृतः ॥ वपा प्रसिद्धा ॥ वसा मांसस्नेहः ॥ अवहन
दत्स्यांत्रं नं पुप्पुसः प्लीहा पूर्वं प्रसिद्धः तौ च मांसपिंडाकारौ सव्यकुक्षिगतौ ॥ यकृत्कालिका क्लोम मांसपिंडस्तौ च दक्षिण
कुक्षिगतौ ॥ क्षुद्रांतं ह्रस्वांत्रं ॥ वृक्कौ हृदयसमीपस्थौ मांसपिंडौ बस्तिर्मूत्राशयः ॥ पुरीषाशयः पुरीषाधानं ॥
आमाशयोपक्रान्तस्थानं ॥ हृदयं हृत्पुंडरीकं स्थूलांत्रं गुदोदराणि प्रसिद्धानि ॥ वायातगुदवलयात्त्रिगुदवल
यैर्द्वौ कोष्ठौ कोष्ठेनाधरधः प्रदेशो भवेत् ॥ अयं च प्राणायतनस्य विस्तार उदाहृत उक्तः ॥ पूर्वश्लोके तु संक्षेपः ॥
अत एव पूर्वश्लोकोक्तानां केषांचिदिह पाठः ॥ पुनः प्राणायतनप्रपंचार्थमाह ॥ कनीनिके चाक्षिकूटे शष्कुलीक शा॰म॰
र्णपत्रकौ ॥ गंडौ शंखौ भ्रुवौ दंतवेष्टौ ओष्ठौ कुकुंदरौ ॥ वंक्षणौ वृषणौ वृक्कौ श्लेष्मसंघातजौ स्तनौ ॥ उपजिह्वा स्फिजौ ६२

बाहू जंघोरु पुच्छपिंडिका ॥ तालूदरं बस्तिशीर्षं चिबुकं गलशुंडिके ॥ अवटश्चैवमेतानि स्थानान्यत्र शरीरके ॥ अ
क्षिवर्त्म वर्त्मचतुष्कं च पद्हस्तहृदयानि च ॥ नवच्छिद्राणि तान्येव प्राणस्यायतनानि तु ॥ कनीनिके अक्षितारे अ
क्षिकूटे अक्षिनासयोः संधी ॥ शष्कुली कर्णशष्कुली कर्णपत्रकौ कर्णपाल्यौ दंतावेष्टौ दंतपाल्यौ ॥ कुकुंदरे जघ
नकूपकौ ॥ वंक्षणौ जघनानुसंधी ॥ वृक्कौ चपर्वौ कौ स्तनौ च ॥ श्लेष्मसंघातकौ ॥ उपजिह्विका घंटिका ॥ स्फिजौ क
टिप्रोथौ ॥ जंघोरुपुच्छपिंडिका जंघयोरूर्वोश्च पिंडिकामांसलप्रदेशः ॥ गलशुंडिके हनुमूलगलयोः संधी ॥ शी
र्षं शिरः ॥ अवटः शरीरे यः कश्चन निम्नो देशः ॥ कंठमूलं कक्षादि तथा अक्ष्णोः कनीनिकयोः प्रत्येकं श्वेतया
श्चद्वयमिति वर्त्मचतुष्टयं ॥ यद्वा ॥ अक्षिपुटचतुष्टयं ॥ शेषं प्रसिद्धमेवमेतानि कुत्सिते शरीरे स्थानानि ॥ त
थाक्षियुगलं कर्णयुग्मं नासाविवरद्वयं आस्यं पायुरुपस्थमित्येतानि सर्वाण्यानि नवच्छिद्राणि च प्राणस्यायतना
न्येव ॥ किंच ॥ शिराः शतानि सप्तैव नव स्नायुशतानि च ॥ धमनीनां शते द्वे तु पंच पेशीशतानि च ॥ शिराः नाभिसंबं

६३ धाश्चलाःशिरास्तत्संख्यावातपित्तश्लेष्मवाहिन्यःसकलकलेवरव्यापिन्योनानाशाखाःसत्यःसप्तशतसंख्या
भवंति॥तथांगप्रत्यंगसंधिबंधनाःस्नायवोनवशतानि॥धमन्योनाभेरुद्गताश्चतुर्विंशतिसंख्याःप्राणादि
वायुवाहिन्यःशाखाभेदेनद्विगुणाभवंति॥पेश्यःपुनर्मांसलाकाराजंघापिंडिकाद्यंगप्रत्यंगसंबंधिन्यःपंच
शतानिभवंति॥पुनश्चासामेवशिरादीनांशाखाभागचतुर्थसंख्यांतरमाह॥एकोनत्रिंशल्लक्षाणितथान
वशतानिच॥षट्पंचाशच्चजानीतशिराधमनिसंज्ञकाः॥शिराधमन्योमिलिताःशाखोपशाखाभेदेनएको
नत्रिंशंतिलक्षाणि॥तथानवशतानिषट्पंचाशच्चभवंतीत्येवंहेसामश्रवप्रभृतयोजानीत॥किंच॥तथालक्षा
स्तुविज्ञेयाःश्मश्रुकेशाःशरीरिणां॥सप्तोत्तरंमर्मशतंद्वेचसंधिशतेतथा॥शरीरिणांश्मश्रूणिकेशाश्चमिलि
ताःसंतस्त्रयोलक्षाविज्ञेयाः॥मर्माणिमरणकराणिक्लेशकराणिवस्थानानि॥तेषांसप्तोत्तरंशतंविज्ञेयं॥अ राम०
स्थ्नांतुद्वेशतेसंधिस्नायुशिरादिसंधयःपुनरनंताः॥सकलशरीरसुषिरादिसंख्यामाह॥रोम्णांकोट्यस्तुपं ६३

चाशच्चतस्रःकोट्यएवच॥सप्तषष्टिस्तथालक्षाःसार्धाःस्वेदायनैःसह॥वायवीयैर्विगण्यंतेविभक्ताःपरमा
णवः॥यद्येकोनुभवेदेषांभावानांचैवसंस्थितिं॥पूर्वोक्तशिराकेशादिसहितानांरोम्णांपरमाणवःसूक्ष्मतर
रूपभागाःस्वेदस्रवणसुषिरैःसहचतुःपंचाशत्कोट्यस्तथाचसप्तोत्तरषष्टिलक्षाःसार्धपंचाशत्कोट्यस्तथा
चतुरषष्टिलक्षाःसार्द्धपंचाशत्सहस्रसहितावायवीयैर्विभक्ताःपवनपरमाणुभिःपृथक्कृताविगण्यंते
॥एतच्चशास्त्रदृष्ट्याभिहितंचक्षुरादिकरणपथगोचरत्वाभावात्तस्यार्थस्येदमप्रतिगदेनमर्थंशिरादिभावसं
स्थानंपहेमुनयोभवतांमध्येयदिकश्चिदनुवेत्तिसोपिमहान्नंग्रेऽसौपल्लवतावोद्ध्योभावसंस्थितिः॥श
रीररसादिद्रव्यादिपरिमाणमाह॥रसस्युर्नवविज्ञेयाजलस्यांजलयोदश॥सप्तैवतुपुरीषस्यरक्तस्याष्टौप्रकीर्त्तिता
ः॥षट्श्लेष्मापंचपित्तंतुचत्वारोमूत्रमेवच॥वसात्रयोद्वौतुमेदोमज्जैकोर्द्धस्तुमस्तके॥श्लेष्मौजसस्तावदेव
रेतसस्तावदेवतु॥इत्येवमस्थिरंवर्ष्मयस्यमोक्षायकृत्यसौ॥सम्यक्परिणताहाररसाःरसपरिमाणंनवांज

६४ त्रयः।पार्थिवपरमाणुसंश्लेषनिमित्तस्यजलस्यांजलयोदशविज्ञेयाः॥पुरीषस्यवर्चस्कस्यसप्तैवरक्तस्य
जाठरानलपरिपाकापादितसौहित्यलौहित्यस्यान्नसारस्याष्टावंजलयः प्रकीर्तिताः॥श्लेष्मणः कफस्य
षडंजलयः॥पित्तस्यतेजसः पंचमूत्रस्यचत्वारः॥वसायामांसस्नेहस्यत्रयः॥मेदसोमांसरसस्यद्वावंज
ली॥मज्जात्वस्थिसुषिरगतोरससत्वस्यैकोंजलिः॥मस्तकेपुनरर्धांजलिः॥श्लेष्मसारस्य॥तथारेतसश्चर
मधातोस्तावदेवार्धांजलिरेव॥एतच्चसमधातुपुरुषाभिप्रायेणोक्तं॥विषमधातोस्तुननियमः॥बलरूपा
च्छरीरणामस्थायित्वात्तथैवच॥दोषधातुमलानांचनियमस्तुनविद्यतेइत्यायुर्वेदस्मरणात्॥इतीदृ
शमस्थिस्नाधारध्वमेतदशुचिनिधानंवर्ष्मास्थिरमितियस्यबुद्धिरसौकृतीपंडितोमोक्षायसमर्थोभवति
॥वैराग्यनित्यानित्यविवेकायोमोक्षोपायत्वात्॥अस्थिरक्तपुरीषादिभाचुर्यज्ञानस्यवैराग्यहेतुत्वात्॥अत राम०
एवव्यासः सर्वाशुचिनिधानस्यकृतघ्नस्यविनाशिनः॥शरीरकस्यापिकृतेमूढाःपापानिकुर्वते॥यदिना ६४

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

मास्यकायस्यपदंतस्तद्बहिर्भवेत्॥दंडमादायलोकोयंश्वनःकाकांश्चवारयेदिति॥तस्मादीदृशकुत्सितश
रीरस्यात्मनिनैकविनिवृत्त्यर्थमात्मोपासनेप्रयतितव्यं॥उपासनीयात्मस्वरूपमाह॥द्वासप्ततिसहस्राणि
हृदयादभिनिःसृताः॥हितानामहितानांचतासांमध्येशशिप्रभं॥मंडलंतस्यमध्यस्थमात्मादीपइवाचलः॥स
प्रयत्नंविदित्वेहपुनराजायतेनतु॥हृदयप्रदेशादभिनिःसृताःकदंबकुसुमकेसरवत्सर्वतोनिर्गताः॥
हिताहितकरत्वेनहिताहितसंज्ञाद्वासप्ततिसहस्राणिनाड्योभवंति॥अपरास्तिस्रोनाड्यस्तासामिलापिंग
लाख्येनाड्यौसव्यदक्षिणपार्श्वगतेदृष्टिविपर्यस्तेनासाविवरसंबद्धेप्राणापानायतने॥सुषुम्नाख्यापुनस्त
तीयाहृदंडवन्मध्येब्रह्मरंध्रविद्धविनिर्गता॥तासांनाडीनांमध्येमंडलंचंद्रप्रभं॥तस्मिन्नात्मानिर्वातस्थदीपइ
वाचलःप्रकाशमानआस्ते॥सएवंभूतोज्ञातश्चोपतस्तत्साक्षात्कारणादिहसंसारेनपुनःसंसरति॥अमृतत्वं
चप्राप्नोति॥किंच॥ज्ञेयंचारण्यकमहंयदादित्यादवाप्तवान्॥योगशास्त्रंचमत्प्रोक्तंज्ञेयंयोगमभीप्सता॥चित्त

६५ वृत्तेर्विषयांतरतिरस्कारेणात्मनिस्थैर्यंयोगस्तत्सामर्थ्यमपायद्वहृद्वारणप्रकारख्यमादित्यात्प्रासंतत्त्वज्ञातव्य
॥तथा॥यन्मयोक्तंयोगशास्त्रंतदपिज्ञातव्यं॥कथंपुनरसावात्माध्यातव्यइत्याह॥अनन्यविषयंकृत्वामनोबु
द्धिस्मृतींद्रियं॥ध्येयआत्मास्थितोयोसौहृदयेदीपवत्प्रभुः॥आत्मव्यतिरिक्तविषयेभ्योमनोबुद्धिस्मृतींद्रिया
णिप्रसाहृत्यात्मैकविषयाणिकृत्वाआत्माध्येयः॥योसौप्रभुःनिर्वातस्थप्रदीपवद्दीप्यमानोनिःकंपोहृदि
तिष्ठति॥एतदेवचतस्यध्येयत्वंयच्छिन्नवृत्तेर्वहिर्विषयावभासतिरस्कारेणात्मप्रवणतानामशरावसंपुटनि
रुद्धप्रभाप्रतानप्रसरस्येवप्रदीपैकनिष्ठत्वं॥यस्यपुनश्छिन्नवृत्तिर्निराकारालंबनतयासमाधौनाभिर मते
तेनशब्दब्रह्मोपासनंकार्यमित्याह॥यथाविधानेनपठन्सामगायमविच्युतं॥सावधानस्तथाभ्यासात्परंब्र
ह्माधिगच्छति॥स्वाध्यायावगतमार्गेणानतिक्रमेणसामगायंसामगानंसाम्नांगानात्मकत्वेपिगायमितिविशेष राम०
णमप्रगीतमंत्रव्युदासार्थं॥अविच्युतमस्खलितं॥सावधानःसामध्वन्यनुस्मृतात्मैकाग्रचित्तवृत्तिःपठंस्तद ६५

पूरुषेण अहंब्रह्मास्मीतिशब्दोपासनाकार्यामित्याह

कुशलः।निपुणः।निमग्नः।

अहंब्रह्मास्मीतिशब्दाकारश्रून्योपासनेन अहंब्रह्मास्मीतिशब्दपठनाभ्यासोऽभ्यासेतया

भ्यासतयातत्रनिष्णातःशब्दाकारस्थन्योपासनेनपरंब्रह्माधिगच्छति॥तदुक्तं॥शब्दब्रह्मणिनिष्णातःपरंब्रह्माधि व्यवस्थितः
गच्छति॥यस्यपुनर्वैदिकमार्गेनोचितंनाभिरमतेतेनलौकिकगीतानुस्मृतात्मोपासनंकार्यमित्याह॥अपरांतक
मुल्लोप्यमद्रकंप्रकरींतथा॥औवेणकंसरोविंदुमुत्तरंगीतकानिच॥ऋग्गाथापाणिकादक्षविहिताब्रह्मगीतिका
॥गेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितं॥अपरांतकमुल्लोप्यमद्रकंप्रकरींऔवेणकानिसरोविंदुकसहितंचोत्त
रमित्येतानिप्रकरणाख्यानिसप्तगीतानिचशब्दाद्दासारितवर्धमानकादिमहागीतकानिगृह्यंते॥ऋग्गाथा
घाश्चतस्रोगीतिकाइत्येतदपरांतकादिगीत जातमध्यारोपितात्मभावंमोक्षसाधनत्वान्मोक्षसंज्ञितंज्ञात
व्यं॥तदभ्यासस्यैकाग्रताधायकत्वद्वारेणात्मैकतापत्तिकारणत्वात्॥किंच॥वीणावादनतत्त्वज्ञःश्रुतिजातिविशा
रदः॥तालज्ञश्चाप्रयासेनमोक्षमार्गंनियच्छति॥भरतादिमुनिप्रतिपादितवीणावादनतत्त्ववेदी॥श्रूयतइतिश्रु
तिर्द्वाविंशतिविधासप्तस्वरेषुतथाहिषड्जमध्यमपंचमाःप्रत्येकंचतुःश्रुतयःऋषभधैवतौप्रत्येकंत्रिश्रुती॥

६६ गांधारनिषादौपंचमेकंद्विश्रुतीइति॥ज्ञानयस्तुषड्जादयःसप्तशुद्धाः॥संकरजास्त्वेकादशेत्येवमष्टादशविधा
स्तासुविशारदःप्रवीणः॥तालइतिगीतप्रमाणंकथ्यते॥तत्स्वरूपज्ञश्चतदनुविद्धश्रोपासनयातालादिभंग
भयाच्चित्तस्यैकाग्र्यतयासुकरत्वादभ्यासेनैवमुक्तिपथंनियच्छतिप्राप्नोति॥चित्तविक्षेपाधिकतरायहत
स्यगीतज्ञस्यफलांतरमाह॥गीतज्ञोयदियोगेननाप्नोतिपरमंपदं॥रुद्रस्यानुचरोभूत्वातेनैवसहमोदते॥गी
तज्ञोयदिकथंचिद्योगेनपरमंपदंनाप्नोति॥तर्हिरुद्रस्यसचिवोभूत्वातेनैवसहमोदतेक्रीडति॥पूर्वोक्तमु
पसंहरति॥अनादिरात्मकथितस्तस्यादिस्तुशरीरकं॥आत्मनश्चजगत्सर्वंजगतश्चात्मसंभवः॥प्रागुक्तौ
साअनादिरात्माक्षेत्रज्ञस्तस्यशरीरग्रहणमेवादिरुद्भवःकथितः॥अजःशरीरग्रहणाद्धिसुतंपरमात्मन
श्चसकाशात्पृथिव्यादिसकलभुवनोद्भवः॥तदुद्भूताच्चपृथिव्यादिभूतसंघाताज्जीवानांस्थूलशरीरतयासं राम०
भवश्चकथितः॥सर्गादौसयथाकायमित्यादिनाएतदेवप्रश्नपूर्वकंविवृणोति॥कथमेतद्विमुह्यामः सदेवा ६६

इतियोगप्रकरणं॥ ८

सुरमानुषं॥जगदुद्भूतमात्माचकथंतस्मिन्वदस्वनः॥यद्येतत्सकलसुरासुरमनुजादिसहितंजगतदात्मनःसका
शात्कथमुत्पन्नं॥आत्माचतस्मिन्जगतिकथंतिर्यगमरसरीसृपादिशरीरभाग्भवतीत्येतस्मिन्न
र्थेविमुह्यामः॥अतोमोहापनुत्त्यर्थमस्माकंविस्तरतोवदस्व॥एवंमुनिभिःपृष्टःप्रत्युत्तरमाह॥मोहजालमपास्ये
हपुरुषोदृश्यतेहियः॥सहस्रकरपन्नेत्रसूर्यवर्चःसहस्रकः॥सआत्माचैवयज्ञश्चविश्वरूपःप्रजापतिः॥विरा
जःसोन्नरूपेणयज्ञत्वमुपगच्छति॥इहजगतियदिहंस्थूलकलेवरादावनात्मन्यात्माभिमानरूपंमोहजालंतदपा
स्यतद्व्यतिरिक्तोयःपुरुषोनेककरचरणलोचनःसूर्यवर्चःअनंतरश्मिसहस्रकोवहुशिरादृश्यते॥एतच्छ्रुतऋ
चरशक्त्याधारतयोच्यते॥तस्यसाक्षात्कारादिसंबंधाभावात्॥सएवआत्मायज्ञःप्रजापतिश्च॥यतोसौविश्व
रूपःसर्वात्मकः॥वैश्वरूप्यमेवकथमितिचेत्॥यस्मादसौविराजःपुरोडाशाद्यन्नरूपेणयज्ञत्वमुपगच्छतियज्ञा
च्चवृष्ट्यादिद्वारेणप्रजास्सृष्टिरित्येवंविश्वरूपं॥एतदेवप्रपंचयति॥योद्रव्यदेवतात्यागसंभूतोरसउत्तमः॥देवान्सं

६७ तर्थ्यमरसोमयजमानंफलेनच॥संयोज्यवायुनासोमंनीयतेरश्मिभिस्ततः॥ऋग्यजुःसामसंहितंसौरंधामोप वि
नीयते॥स्वमंडलादसौसूर्यःसृजत्यमृतमुत्तमम्॥यज्जन्मसर्वभूतानामशनानशनात्मनां॥तस्मादन्नात्सु
नर्यज्ञःपुनरन्नंपुनःक्रतुः॥एवमेतदनाद्यंतंचक्रंसंपरिवर्त्तते॥द्रव्यस्यचरुपुरोडाशादेर्देवतोद्देशेनात्या
गाद्योरसोदृष्टरूपमात्मनःपरिणामंतरंडत्तमः॥सकलजगज्जन्मवीजंतयोत्कृष्टतमःसंभूतःसदेवान्सं
भ्रदानकारकभूतान्सम्यक्प्रीणयित्वायजमानंचाभिलषितफलेनसंयोज्यपवनेनप्रेर्यमाणश्चंद्रमंडलंप्रति
नीयते॥ततःशशिमंडलाद्रश्मिभिर्भानुमंडलंसैषात्रय्येवविद्यातपतीत्यभेदाभिधानादृग्यजुःसाममयंप्रत्यु
पनीयते॥ततःस्वमंडलादसौसूर्योऽमृततरसवृष्टिरूपमुत्तमंयत्सकलभूतानामशनानशनात्मनांचराचराणां
जननिमित्तंतत्सृजति॥तस्माद्वृष्टिसंपादितौषधिमयात्प्रजोत्पत्तिहेतोरन्नात्पुनर्यज्ञोयज्ञाच्चपूर्वाभिहितभंग्या राम०
पुनरन्नंसन्नाच्चपुनःक्रतुरित्येवमेतदखिलंसंसारचक्रंप्रवाहरूपेणोत्पत्तिहेतुविनासहितसम्यक्परिवर्त्त ६७

तइत्यनेनक्रमेणात्मनःसकाशादखिलजगदुत्पत्तिः॥तत्रचात्मनःस्वकर्मानुरूपविग्रहपरिग्रहः॥ननुयद्या
त्मनःसंसरणमनाद्यंतंतर्हिअनिर्मुक्तिप्रसंगइत्यतआह॥अनादिरात्मसंभूतिर्विद्यतेनांतरात्मनः॥समवायी
तुपुरुषोमोहेच्छाद्वेषकर्मजः॥यद्यात्मनोनादित्वात्संभूतिर्नविद्यतेअंतरात्मनः।शरीरव्यापिनस्तथापिपुरुष
:शरीरेणसमवायीभवति॥भोगायतनेसुखदुःखात्मकंभोगजातमुपभुंक्तइत्येवंभूतेनसंबंधेनसंबंधीभव
त्येव॥सचसमवायोमोहेच्छाद्वेषजमितिकर्मनिमित्तोनतुनिसर्गजातस्तस्यकार्यत्वेनविनाशोपपत्तेर्नोनिर्मुक्ति
ः॥आत्मनोजगज्जन्मेत्युक्तंतत्प्रपंचयितुमाह॥सहस्रात्मामयायोवआदिदेवउदाहृतः॥मुखबाहूरुपज्ज्ञा
:स्तस्यवर्णायथाक्रमम्॥पृथिवीपादतस्तस्यशिरसोद्यौरजायत॥नस्तःप्राणादिशःश्रोत्रात्स्पर्शाद्वायुर्मुखाद्व
सौ॥मनसश्चंद्रमाजातश्चक्षुषश्चदिवाकरः॥जघनादंतरिक्षंचजगच्चसचराचरं॥योसौसकलजीवात्मकत
याप्रपंचात्मकतयाचसहस्रात्माबहुरूपस्तथासकलजगद्धेतुतयादिदेवोमयायुष्माकमुदाहृतः॥तस्यवदन

स्त नासिकाया

६८

भुजशाकिंचरणजातापथाक्रममग्रजन्मादयश्चत्वारोवर्णाः॥तथातस्यपादाद्भूमिः॥मस्तकात्सुरसद्मघ्राणा
त्प्राणःकर्णात्ककुभः॥स्पर्शात्पवनोवदनाद्धुतवहोमनसःशशांकोनेत्राद्भानुर्जघनाद्गगनंजंगमात्मकंजग
च्च॥अत्रचोदयंति॥यद्येवंसकथंब्रह्मन्पापयोनिषुजायते॥ईश्वरःसकथंभावैरनिष्टैःसंप्रयुज्यते॥हेब्रह्म
न्योगीश्वरयद्यात्मैवजीवादिभावंभजतेतर्हिकथमसौपापयोनिषुमृगपश्वादिषुजायते॥अथमोहरागद्वेषा
दिदोषदुष्टत्वाज्जन्मेत्युच्यते॥तच्चन॥यस्मादसावीश्वरःस्वतंत्रःकथमनिष्टैर्मोहरागादिभिर्भावैःसंप्रयुज्यते॥अ
थमोहरागद्वेषादिदोषदुष्टत्वाज्जन्मेत्युच्यते॥तच्चन॥यस्मादसावीश्वरःस्वतंत्रःकथमनिष्टैर्मोहरागादिभिर्भावैः
संप्रयुज्यते॥किंच॥करणैरन्वितस्यापिपूर्वज्ञानंकथंचन वेत्तिसर्वगतोयस्मात्सर्वगोपिनवेदनां॥तथेदमप्य
त्रदूषणं॥मनःप्रभृतिभिर्ज्ञानोपायैःसहितस्यापितस्यात्मनःपूर्वज्ञानजन्मांतरानुभूतविषयंकस्मान्नोत्पद्यते॥ राम० ६८
तथासर्वप्राणिगतांवेदनांसुखादिरूपांस्वयंसर्वगोपिसर्वदेहगतोपिकस्मान्नवेत्ति॥तस्मादात्मैवेश्वरोजीवादिभा

वंभजतइत्ययुक्तम्॥तत्रपूर्वबोधस्योत्तरमाह॥अंत्यपक्षिस्थावरतांमनोवाक्कायकर्मजैः॥दोषैःप्रयाति जीवोयंभ
वयोनिशतेषुच॥यद्यपीश्वरःस्वरूपेणसत्यज्ञानानंदलक्षणस्तथाप्यविद्यासमावेशवशान्मोहरागादिभावैर
भिभूयमानोनानाहीनयोनिजननसाधनमानसादित्रिविधंकर्मनिचयमाचरति॥तेनचांत्यादिहीनयोनितामा
पद्यते॥अंत्याश्चांडालादयःपक्षिणःकाकादयःस्थावरावृक्षादयःतेषांभावःअंत्यपक्षिस्थावरतां॥यथाक्रमे
णमनोवाक्कायारब्धकर्मदोषैर्जन्मसहस्रेष्वपिअयंजीवःप्राप्नोति॥किंच॥अनंताश्चयथाभावाःशरीरेषुशरी आशयाः
रिणाम्॥रूपाण्यपितथैवेहसर्वयोनिषुदेहिनां॥शरीरिणांजीवानांशरीरेषुभावाअभिप्रायविशेषाःसत्वाद्युद्रे
कतारतम्याद्यथानंतास्तथातत्कार्याण्यपिरूपाणिकुब्जवामनत्वादीनिदेहिनांसर्वयोनिषुभवंति॥ननुयदिकर्म
जन्यानिकुब्जत्वादीनितर्हितत्कर्मानंतरमेवतैर्भवितव्यमित्याशंक्याह॥विपाकःकर्मणांप्रेत्यकेषांचिदिहजाय कर्मफलं
ते॥इहचामुत्रचैकेषांभावस्तत्रप्रयोजनं॥केषांचिज्ज्योतिष्टोमादिकर्मणांविपाकःफलंप्रेत्यदेहांतंभवति॥केषां

६९ चित्कार्यादिकर्मणां त्वस्यादिफलमिहैव भवति॥ केषांचिच्चित्तादीनां पश्वादिकं इह देहांतरे वे स नियतं॥ न ह्यनंतरमेव
कर्मफलेन भवितव्यमिति शास्त्रार्थः अत्र च कर्मणां शुभाशुभफलजनकत्वे सत्वादिभावप्रयोजक भूतत्व
दापन्नत्वात्फलतारतम्यस्य॥ मनोवाक्कायकर्मजैरंसादियोनितां प्राप्नोतीत्युक्तं तत्प्रपंचयितुमाह॥ परद्रव्या
णपभिध्यायंस्तथानिष्टानि चिंतयन्॥ वितथाभिनिवेशी च जायते सांसु योनिषु॥ परधनानि कथमपहरेयमिति
भिमुखेन ध्यायन्॥ तथानिष्टानि ब्रह्महत्यादीनि हिंसात्मकानि करिष्यामीति चिंतयन्॥ वितथे ऽसत्ये परलोकवस्तु
नि अभिनिवेशः पुनः पुनः संकल्पस्तद्वांश्चंडालाधस्यंयोनिषु जायते॥ किंच॥ पुनुषोन्रृतवादी च पिशुनः पुरुष
स्तथा॥ अनिबद्धप्रलापी च मृगपक्षिषु जायते॥ यस्त्वनृतवदनशीलः पुरुषः पिशुनः कर्णेजपः परुषः परोद्वे
गकरभाषी॥ अनिबद्धप्रलापी प्रकृतासंगतार्थवादी च बुद्धिपूर्वाः बुद्धिपूर्वोत्वसादितारतम्याद्धीनोत्कृष्टेषु मृगपक्षि ए म०
षु मृगपज्जायते॥ किंच॥ अदत्तादाननिरतः परदारोपसेवकः॥ हिंसकश्चाविधानेन स्थावरेष्वप जायते॥ अदत्तपर ६९

धनापहारप्रसक्तश्चाविहितमार्गेण प्राणिनां घातकश्च॥ दोषगुरुलघुभावतारतम्यात्तरुलताप्रतानादिस्थाव
रेषुज्जायते॥ सत्वादिगुणपरिपाकमाह॥ आत्मज्ञः शौचवान्दांतस्तपस्वी विजितेंद्रियः॥ धर्मकृद्वेदविद्यावि
त्साविकोदेवयोनितां॥ आत्मज्ञो विद्याधनाभिजनाद्यभिमानरहित॥ शौचवान्वाह्याभ्यंतरशौचयुक्तः॥ दांतमु ७५
पशमन्वितः॥ तपस्वी कृच्छ्रादितपोयुक्तः॥ तथेंद्रियार्थेष्वप्रसक्तो नित्यनैमित्तिकधर्मानुष्ठाननिरतो वेदार्थवेदी च
यस्यैते धर्माः स सात्विकः॥ स च सत्वोद्रेकतारतम्यवशादुत्कृष्टोत्कृष्टतरसुरयोनितां प्राप्नोति॥ किंच॥ असत्का
र्यरतोऽधीर आरंभी विषयी च यः॥ स राजसो मनुष्येषु मृतो जन्माधिगच्छति॥ असत्कार्येषु तौर्यत्रिकादिष्वभिर
तो यस्तथा व्यग्रचित्तः सदा कार्याकुलो विषयेष्वतिप्रसक्तश्च रजोगुणयुक्तस्तद्गुणतारतम्याद्धीनोत्कृष्टमनुष्यजा
तिषु मरणानंतरमुत्पत्तिं प्राप्नोति तथा निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचकस्तथा॥ प्रमादवान्भिन्नवृत्तो भवे
त्तिर्यक्षु तामसः॥ यः पुनर्निद्राशीलः प्राणिपीडाकरो लोभयुक्तस्तथा नास्तिको धर्म्मादेर्निंदकोः॥ याचको याचन

७० शीलः प्रमादवान् कार्याकार्यविवेकशून्यो विरुद्धाचारश्चासौ तमोगुणयुक्तस्तु नारतम्यादीनहीनतरपश्वादि
योनिषु जायते ॥ एवं वाक्यमुपसंहरति ॥ रजसा तमसा चैव समाविष्टो भ्रमन्निह ॥ भावैरनिष्टैः संयुक्तः संसारं
प्रतिपद्यते ॥ स एवमविद्याविद्धोयमात्मा रजस्तमोभ्यां सम्यगाविष्ट इह संसारे पर्यटन्नानाविधदुःखप्रदैर्भावै
रभिभूतः पुनः पुनः संसारं देहग्रहणं प्राप्नोतीतीश्वरः ॥ स कथं भावैरनिष्टैः संप्रयुज्यत इत्यस्य बोधस्यानव
काशः ॥ यद्यपि करणैरन्वितस्यापि इति द्वितीयं बोधं तस्योत्तरमाह ॥ मलिनो हि यथादर्शो रूपालोकस्य न क्षम
स्तथाविपक्वकरण आत्माज्ञानस्य न क्षमः ॥ यद्यस्याप्यन्तः करणादिज्ञानसाधनसंपन्नस्तथापि जन्मांतरा
नुभूतार्थावबोधनेन समर्थः ॥ अविपक्वकरणो रागादिमलाक्रान्तचित्तो यस्माद्यथादर्शो लोमलच्छन्नो रूपज्ञानो
त्पादनसमर्थो न भवति ॥ ननु प्रागभवीयज्ञानस्याप्यात्मप्रकाशत्वात्तस्य च स्वतः सिद्धत्वादनुपलंभोऽयुक्त इत्याशं रा म०
क्याह ॥ कटुर्वारौ यथापक्वे मधुरः सन्न सो न हि ॥ प्राप्यते स्वात्मनि तथा नापक्वकरणे ज्ञता ॥ अविपक्वे कटुर्वारौ इति ७०

सर्वक्षेत्रनिवर्तिनीनां वेदनानां ज्ञाता न तु तत्प्राप्नोति

त्कर्कटिकायां विद्यमानोऽपि मधुरो रसो यथा नोपलभ्यते ॥ तथात्मन्यपक्वकरणे विद्यमानापि ज्ञता ज्ञातृता
प्रागभवीयवस्तुगोचरता न प्राप्यते ॥ वेत्ति सर्वगतो कस्मात्सर्वगोपि न वेदनां इति यदुक्तं तत्रोत्तरमाह ॥ ॥ सर्वा
श्रयां निजे देहे देही विंदति वेदनां ॥ योगी मुक्तश्च सर्वासां यो न वाप्नोति वेदनां ॥ यः पुनर्देही देहाभिमानयुक्तः सुखादिरूपां
स सर्वाश्रयामाध्यात्मिकादिरूपां वेदनां स्वकर्मोपार्जित एव देहे प्राप्नोति ॥ न देहांतरगतां भोगायतना
रंभादृष्टवैलक्षण्यादेव ॥ यस्तु योगी मुक्तो मुक्ताहंकारादिः स सकलक्षेत्रगतानां सुखदुःखादिसंविदां
वेदिता भवति ॥ परिपक्वकरणत्वात् ॥ नन्वेकस्मिन्नात्मनि सुरनरदारादिदेहेषु भेदप्रत्ययो न घटत इत्याशं
क्याह ॥ आकाशमेकं हि यथा घटादिषु पृथग्भवेत् यथात्मैकोप्यनेकश्च जलाधारेष्विवांशुमान् यथैकमे
नैवा वगगनं कूपकुंभाद्युपाधिभेदभिन्नं नानुभूयते ॥ यथा च भानुरेकोपि भिन्नेषु जलभाजनेषु करकमणिक
मल्लकादिषु नानेवानुभूयते ॥ तथैकोप्यात्मांतः करणोपाधिभेदेन नाना प्रतीयते ॥ द्वितीयदृष्टांतोपादान

Dr. BHAU DAJI MEMORIAL

७१ मात्मभेदस्यापरमार्थिकस्यप्रद्योतनार्थम्॥पंचधातूनयंषष्ठ आहत्ते युगपत्प्रभुरित्याद्युक्तमर्थमुपसंहरन्नाह
॥ब्रह्मखानिलतेजांसिजलभूश्चेतिधातवः॥इमेलोकाएषचात्मातस्माच्चसचराचरं॥ब्रह्मआत्माखंगगनं
॥अनिलोवायुः तेजोग्निः॥जलंप्रसिद्धं॥भूश्चैतेतेवातादिधातवइवशरीरंव्याप्यधारयंतीतिधातवो ऽभि
धीयंते।तत्रखादयःपंचधातवोलोक्यंतेदृश्यंतइतिलोकाजडाइतियावत्॥एषचिद्धातुरात्मा।एतस्माच्च
जडजडसमुदायात्स्थावरजंगमात्मकंजगदुत्पद्यते॥कथमसावात्माजगत्सृजतीत्यतआह॥मृद्दंडचक्रसंयोगा
त्कुंभकारोयथाघटं॥करोतितृणमृत्काष्ठैर्गृहंवागृहकारकः॥हेममात्रमुपादायरूपंवाहेमकारकः॥नि ह
जलालासमायोगात्कोशंवाकोशकारकः॥कारणान्येवमादायतासुतास्विहयोनिषु॥सृजत्यात्मानमात्मैवसं
भूयकरणानिच॥यथाहिकुलालोमृच्चक्रचीवरादिकंकरणजातमुपादायकरकशरावादिकंनानाविधका राम०
र्यजातंरचयतियथावावर्द्धकिस्तृणमृत्काष्ठैःपरस्परापेक्षापेक्षैरेकंगृहाख्यंकार्यंकरोति॥यथाकेवलंहेमो ७१

पादायहेमानुगतमेवकटकमुकुटकुंडलादिकार्यमुत्पादयति॥यथावाकोशकारकःकीटविशेषोनिजलालया
रज्जुमात्मवंधनंकोशाख्यमारंभते॥तथात्मापिपृथिव्यादीनिसाधनानिपरस्परसापेक्षाणिकरणानिचश्रोत्रा
दान्युपादायास्मिन्संसारेतासुतासुसुरादिषुयोनिषुस्वयमेवात्मानंनिजकर्मवंधनवद्धशरीरतयासृजति॥
किंपुनर्वैषयिकज्ञानेंद्रियव्यतिरिक्तात्मसद्भावेप्रमाणमित्याशंक्याह॥महाभूतानिसत्यानियथात्मापितथैव
हि॥कोन्वर्थंकेननेत्रेणदृष्टमन्येनपश्यति॥वाचंवाकोविजानातिपुनःसंश्रुत्यसत्कृतां॥यथापृथिव्यादीनिम
हाभूतानिसत्यानिप्रमाणगम्यत्वात्तथात्मापिसत्योयस्मात्॥अन्यथायदिवुद्धीन्द्रियव्यतिरिक्तोज्ञाताध्रुवोनस्या
त्०तर्हिएकेनचक्षुरिन्द्रियेणदृष्टंवस्तुअन्येनस्पर्शेन्द्रियेणकोविजानाति॥यमहमद्राक्षंतमहंस्पृशामीति॥
यथाकस्यचित्पुरुषस्यवाचंपूर्वंश्रुत्वापुनःश्रूयमाणांवाचंतस्यवागियमितिकःप्रत्यभिजानाति॥तस्मात्॥ज्ञा
नेन्द्रियातिरिक्तोज्ञाताध्रुवइतिसिद्धम्॥किंच॥अतीतार्थास्मृतिःकस्यकोवास्वप्नस्यकारकः॥जातिरूपवयो

७२ व्रतविधादिभिरहंकृतः॥शब्दादिविषयोपभोगंकर्म्मणामनसोगिरा॥यद्यात्मा ध्रुवोनस्यात्तर्हि अनुभूतार्थ
गोचरास्मृतिः पूर्वानुभवभावितसंस्कारोद्बोधनिबंधनाकस्यभवेत्॥नह्यन्यदृष्टमन्यस्यस्मृतिमुप
घते॥तथाकः स्वप्रज्ञानस्यकारकः॥नहींद्रियाणामुपरतव्यापाराणांतत्कारकत्वं॥तथाहमेवाभिजनत्वा
दिसंपन्नइत्येवंविधानुसंधानप्रत्ययः कस्यभवति स्थिरमेतत्प्रत्यतिरिक्तस्य॥तथाशब्दस्पर्शादिविषयोप
भोगसिध्यर्थमुद्योगंमनोवाक्कायैः कः कुर्यात्तस्मादपिबुद्धीन्द्रियव्यतिरिक्त आत्मास्थितः॥उपासनाविशेष
सिध्यर्थंसंसाररूपंविहरणवत्ताह॥सस्संदिग्धमतिः कर्मफलमस्तिनवेतिवा॥विप्लुतः सिद्धमात्मानमसिद्धो अहंकारपक्षः
पिहिमन्यते॥योसौपूर्वोक्तआत्माः विकृतोहंकारदूषितः॥सस्सकलकर्म्मसुफलमस्तिनवेतिसंदिग्धम
तिर्भवति॥तथाऽसिद्धोप्यकृतार्थोपिसिद्धमिवकृतार्थमिवात्मानंमन्यते॥किंच॥ममदाराः सुताभृत्याअ रा.म०
हमेषामितिस्थितिः॥हिताहितेषुभावेषुविपरीतमतिः सदा॥तस्यविप्लुतमतेर्ममकलत्रप्रेष्यादयोहमेषा ७२

मित्यतीवममताकुलास्थितिर्भवति॥तथाहिताहितकरेकार्यप्रसरेसविप्लुतमतिर्विपरीतमतिः सदाजाय
ते॥किंच॥ज्ञेयज्ञेप्रकृतौचैवविकारेवाविशेषवान्॥अनशनानलायातजलप्रपतनोद्यमी॥एवंवृत्तोविनी
तात्माऽवितथाभिनिवेशवान्॥कर्म्मणाद्वेषमोहाभ्यामिच्छयाचैवबध्यते॥ज्ञेयंजानातीतिज्ञेयज्ञस्तस्मिन्ना
त्मनि प्रकृतौवात्मनोगुणसाम्यावस्थायांविकारेवाहंकारादावविशेषवान्॥विवेकानभिज्ञोभवति॥तथाअ
नशनहुताशनांबुप्रवेशविषाशनादिषुविप्लववशात्कृतप्रयत्नोभवेत्॥एवंनानाप्रकाराकार्यप्रवृत्तोऽवि
नीतात्माऽसंयताऽत्माऽसत्कार्याभिनिवेशयुक्तः सन् तत्तत्कृतकर्मणातेनरागद्वेषाभ्यांमोहेनचबध्यते॥
शरीरग्रहणद्वारेण॥कथंपुनस्तस्यविभ्रंशोभवतीत्यतआह॥आचार्योपासनंवेदशास्त्रार्थेषुविवेकिता
॥तत्कर्मणामनुष्ठानंसंगः सद्भिर्गिरः शुभाः॥स्त्र्यालोकालंभविगमः सर्वभूतात्मदर्शनम्॥त्यागः परिग्रहा
णांचजीर्णकाषायधारणं॥विषयेन्द्रियसंरोधस्तंद्रालस्यविवर्जनम्॥शरीरपरिसंख्यानंप्रवृत्तिष्ववदर्शन

७३ म॥नीरजस्तमस्कासत्वशुद्धिर्निःस्पृहताशमः॥एतैरुपायैः संशुद्धः सत्वयोग्यमृतीभवेत्॥विद्यार्थमाचार्यसे
वनं वेदांतार्थेषु पातंजलादियोगशास्त्रेषु च विवेकित्वं॥तत्प्रतिपादितध्यानादिकर्मणामनुष्ठानम् सत्पुरुषसंगः
॥प्रियहितवचनत्वं॥ललनालोकनालंभनयोः परित्यागः सर्वभूतेष्वात्मवद्दर्शनं समदर्शनं॥परिग्रहाणां
च पुत्रक्षेत्रकलत्रादिनां त्यागः।जीर्णकाषायधारणं।तथा शब्दस्पर्शादिषु विषयेषु श्रोत्रादींद्रियाणां प्रवृत्तिनिरो
धः।तंद्रानिद्रानुकारिणी॥आलस्यमनुत्साहस्तयोर्विशेषेण त्यागः॥शरीरस्य परिसंख्यानमस्थिरं अशुचित्व
दोषानुसंधानं तथा सकलगगनादिप्रवृत्तिषु सूक्ष्मप्राणिवधादिदोषपरामर्शस्तथा रजस्तमो विधुरता प्राणा
यामादिभिरुपायैर्भावशुद्धिः॥निस्पृहता विषयेष्वनभिलाषः॥शमो वाह्यांतःकरणसंयमः॥एतैराचार्योपा
सनादिभिरुपायैः सम्यक्शुद्धः॥केवलसत्वयुक्तो ब्रह्मोपासनेनामृतीभवेत्।मुक्तो भवति॥कथममृतत्वप्राप्ति राम०
रित्यत आह॥तत्वस्मृतेरुपस्थानात्सत्वयोगात्परिक्षयात्॥कर्मणां संनिकर्षाच्च सतां योगः प्रवर्त्तते॥आत्मा ७३

स्यात्तत्वस्मृतेरात्मनि निश्चलतयोपस्थानात्सत्वशुद्धियोगात्परिक्षयात्केवलसत्वगुणयोगात्कर्मबीजानां
परिक्षयात्सत्पुरुषाणां संबंधात्सत्यो गः प्रवर्त्तते॥किंच॥शरीरसंक्षयेयस्य मनः सत्वस्थमीश्वरं॥अविप्लु
तमतिः सम्यक्स जातिस्मरतामियात्॥यस्य पुनः योगिनोऽविप्लुतमतेः शरीरसंक्षयसमये मनः सत्वयु
क्तं सम्यगेकांततयेश्वरं प्रति व्याप्रियते॥सयधुपासनायोगात्प्रवीणतयात्मानं नाधिगच्छति॥तर्हि विशिष्ट
संस्कारपाटववशेन जातसंततानुभूतक्रिमिकीटादिनानागर्भवासादिसमुद्भूतदुःखस्मरणं प्राप्नुयात्॥तत्स्म
रणेन च जातोद्वेगस्तच्छिद्रकारिणि मोक्षे प्रवर्त्तते॥यस्त्वपटुसंस्कारतया पूर्वां जातिं न स्मरति तस्य का गति
रित्यत आह॥यथा हि भरतो वर्णैर्वर्णयत्यात्मनस्तनुं॥नानारूपाणि कुर्वाणस्तथात्मा कर्मजास्तनूः॥भरतो न
टः स यथा रामरावणादिनानारूपाणि कुर्वाणः सितासितपीतादिभिर्वर्णैरात्मनस्तनुं वर्णयति रचयति॥तथै
वात्मा तत्र कर्मफलोपभोगार्थं कुब्जवामनादिनानारूपाणि कर्मभिरुपात्तानि कलेवराण्यादत्ते किंच॥काल

७४ कर्मात्मजीवानां दोषैर्मोतुस्तथैव च ॥ गर्भस्य वै कृतं दृष्टमंगहीनादि जन्मनः ॥ न केवलं कर्मवामनत्वादिनिमि
त्तं ॥ किंतु कालकर्मणी स्वकारणवीजदोषो मातृदोषश्चेति सर्वमेतत्सहकारिकारणमेतेन दृष्टादृष्टरूपेण कार
णकलापेन गर्भस्यांगहीनत्वादिविकारो जन्मनः आरभ्य नियतकालो दृष्टः ॥ ननु प्राकृतप्रलयावसरे महदाद्यखि
लविकारविनाशे कर्मणो नाशात्कथं तन्निबंधनः प्रथमपिंडपरिग्रह इत्याशंक्याह ॥ अहंकारेण मनसा गत्या कर्म
फलेन च ॥ शरीरेण च नात्मायं मुक्तपूर्वः कथंचन ॥ मनो हंकारो प्रसिद्धो गतिः संस्मरणहेतुभूतो दोषराशिः ॥
कर्मफलं धर्माधर्मरूपं ॥ शरीरं लिंगात्मकं ॥ एतैरहंकारादिभिरयमात्मा कदाचिदपि न मुच्यते ॥ यावन्मोक्षः ॥
ननु प्रतिनियतकर्मणां जीवानां प्रतिनियतकालामेवोपरतिर्युक्ता न पुनः संग्रामादौ युगपदेककालत्वात्तत्सं
क्षय इत्याशंक्याह ॥ वर्त्याधारः स्नेहयोगाद्यथा दीपस्य संस्थितिः ॥ विक्रियापि च दृष्टैवमकाले प्राणसंक्षयः ॥ नारा॰राम॰
यथाहि खलु तैलक्लिन्नानेकवर्त्तिवर्त्तिनीनां ज्वालानां युगपत्संस्थितिस्तासां च स्थितानां पदुतरं दोधूयमानपव ७४

वाय्वादिनोद्दीपसमुदायनाशवत् ।

नाहतिरूपविपत्तिहेतूपनिपाते यौगपद्याद्युगपदुपरतिर्यथा भवति ॥ तथैव रथसारथिवाजिकुंजरादिजीवानां पु
रास्त्रापरतिहेतुयौगपद्यादेककालेपि प्राणपरिक्षयो नानुपपन्नः ॥ एतदुक्तं भवति ॥ प्रतिनियतकालविपत्तिहेतु
भूता दृष्टस्य तद्विरुद्धकार्याकारणादृष्टहेतूपनिपातेन प्रतिबंध इति ॥ मोक्षमार्गमाह ॥ अनंताः रश्मयस्तस्य दीप
वद्यः स्थितो हृदि ॥ सितासिताः कर्बुनीलाः कपिलाः पीतलोहिताः ॥ ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमंडलं ॥ ब्र ध्व
ह्मलोकमतिक्रम्य तेन याति परां गतिं ॥ योसौ हृदि प्रदीपवत्स्थितो जीवस्तस्य नानारश्मयो नाड्यः सुखदुःखहेतुभूता
द्वासप्ततिसहस्राणीत्यादितो क्ताः ॥ सितासितकर्बुरादिरूपाः सर्वतः स्थितास्तेषां मध्ये को रश्मिरूर्ध्वं व्यवस्थितो योसौ ध्व
मार्तंडमंडलं निर्भिद्य हिरण्यगर्भनिलयं वातिक्रम्य प्रवर्त्तते तेन जीवः परां गतिं पुनरनावृत्तिलक्षणां प्राप्नोति ॥ स्वर्ग
नाडी मार्गमाह ॥ यदस्यान्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितं ॥ तेन देवशरीराणि सधामानि प्रपद्यते ॥ यदस्यात्मनो मुक्तिमार्ग
भूताद्रश्मेरन्यद्रश्मिशतमपूर्ध्वाकारमेव व्यवस्थितं ॥ तेन सुरशरीराणि तेजसानि सुखैकभोगाधिकरणानि सधामा

देहात्मवादं निराकरोति वेदैः

भरद्वाजादिपक्षिदर्शनं

७५ निकृनकंरज तरन्नरचितोम रपुरव रसहितानिभपद्यते॥संसरणमार्गमाह॥येनैकनरूपात्स्वाधस्ता
द्दृश्मयोस्यमद्भभा॥इहकर्मोपभोगायेते:संसरतिसोवशः॥येपुनस्तस्याधस्ताद्दृश्मयोमद्भभास्तेरिह
फलोपभोगार्थंसंसारेससरति॥अवशः स्वयंकृतकर्मपरतंत्रः॥भूतचैतन्यवादिपक्षं परिजिहीर्षुराह॥वे
दैः शास्त्रैः सविज्ञानैर्जन्मनामरणेनच॥आर्त्यागत्या तथागत्यासत्येनघृन्तेनच॥श्रेयसासुखदुःखाभ्यां
कर्मभिश्चशुभाशुभैः॥निमित्तशाकुनज्ञानग्रहसंयोगजैःफलैः॥तारानक्षत्रसंचारैर्जागरैःस्वप्नजैरपि शुक्रादयः
॥आकाशपवनज्योतिर्जलभूतिमिरैस्तथा॥मंन्वंतरैर्युगप्राप्त्यामंत्रौषधिफलैरपि॥विद्यात्मानंदेहम
नंकारणंजगतस्तथा॥वेदैः सएवनेतिनेती त्यात्मेति अस्थूलमनणुवकृत्स्नमपाणिपादइत्यादिभिः॥शास्त्रैर्मी
मांसान्वीक्षिक्यादिभिः॥विज्ञानैश्चममेदंशरीरमित्यादिदेहव्यतिरिक्तात्मानुभवैः॥तथाजन्ममरणाभ्यांज राम०
न्मांतरानुष्ठितधर्माधर्मनियताभ्यांदेहातिरिक्तात्मानुमानं॥आर्त्याजन्मांतरगतकर्मानुष्ठाननियतया॥त ७५

थागमनागमनाभ्यांज्ञानेच्छाप यत्नाधारनियताभ्यामपिभौतिकदेहातिरिक्तात्मानुमानं॥नहिदेहस्यचैत
न्यादिसमवायःसंभवति॥यतः कारणगुणक्रमेणकार्यद्रव्ये वैशेषिकगुणारंभोदृष्टः॥नचकारणभूतपा
र्थिवपरमाणुषुचैतन्यादिसमवायःसंभवति॥तदारब्धस्तंभकुंभादिभौतिकेष्वनुपलंभात्॥नचमदशक्तिव
द्गुडकादिद्रव्यांतरसंयोगजइतिवाच्यं॥शक्तेः साधारणगुणत्वात्तौभौतिकदेहातिरिक्तश्चैतन्यादिसमवा
य्यंगीकर्तव्यः॥सत्यान्ततेषमिद्धं॥श्रेयोहितप्राप्तिः सुखदुःखआमुष्मिके॥तथाशुभकर्मानुष्ठानमशुभकर्म
परित्यागः॥एतैश्चज्ञाननिपतैर्देहातिरिक्तात्मानुमानम्॥निमित्तंभूकंपादि॥शाकुनज्ञानंपिंगलादिप
तत्रिचेष्टालिंगकंज्ञानं॥ग्रहाःसूर्यादयः॥तत्संयोगजैःफलैः॥ताराअश्विन्यादिव्यतिरिक्तानिज्योतींषि॥
नक्षत्राणध्रुवपुक्पभतीनि॥एतेषांसंचारैः॥शुभाशुभफलद्योतनैर्जागरैरवजागरावस्थाजन्यश्वसद्धि
द्धादित्यादिदर्शनैः॥तथास्वप्नजैःखरवराहयुक्तरथारोहणादिज्ञानैः॥तथाकाशाद्यैश्चजीवोपभोगार्थतया

स्तैः॥ तथा मन्वंतरभासायुगांतरभासाद्देहेऽनुपपद्यमानतया तथा मंत्रौषधिफलैः प्रेक्षापूर्वकः फलदकर्मोघैः
साक्षात्परंपरया वा देहेऽनुपपद्यमानैर्वेद्यमानं हनुमन्यो वित्तजानीत॥ किंच॥ अहंकारः स्मृतिर्मेधा हर्षो बुद्धिः
सुखं धृतिः॥ इंद्रियान्तरसंचार इच्छा धारणजीविते॥ स्वर्गः स्वप्नश्च भावानां प्रेरणं मनसो गतिः॥ निमेषश्चेत
ना यत्न आदानं पांचभौतिकं॥ यत एतानि दृश्यंते लिंगानि परमात्मनः॥ तस्मादस्ति परो देहादात्मा सर्वग ईश्वरः
अहंकृतिरहंकारः स्मृतिः प्राग्भवीयानुभवभावितसंस्कारोद्बोधनिबंधना स्तन्यपानादिगोचरा सुखमैहिकं ध
तिर्धैर्यमिन्द्रियान्तरेण दृष्टेऽर्थे इन्द्रियान्तरस्य संचारो यमहमद्राक्षं तमहं स्पृशामीत्येवमनुसंधानरूप इन्द्रि
यान्तरसंचारः॥ अत्रेच्छाप्रयत्नचैतन्यानां स्वरूपेण लिंगत्वं पूर्वश्लोके तु गमनसंसवचनादिहेतुतयार्थिकं
लिंगत्वमिति स पौनरुक्त्यं॥ तथा धारणं शरीरस्य जीवितं प्राणधारणं॥ स्वर्गो नियतदेहान्तरोपभोग्यः सुखविशे
षः॥ स्वप्नः प्रसिद्धः॥ पूर्वश्लोके तु स्वप्नस्य शुभफलद्योतनतया लिंगत्वमत्र स्वरूपेणेति न पौनरुक्त्यं॥ भावाना

Dr. BHAU DAJI MEMORIAL

मिन्द्रियादीनां प्रेरणं मनसो गतिश्चेतनाधिष्ठानव्याप्ता॥ निमेषः प्रसिद्धः तथा पंचभूतानामुपादानं॥ यस्मा
देतानि लिंगानि भूतेष्वनुपपन्नानि साक्षात्परंपरया वा परमात्मनो द्योतकानि दृश्यन्ते तस्मादस्ति देहातिरिक्त
आत्मा सर्वग ईश्वर इति सिद्धम्॥ क्षेत्रस्वरूपमाह॥ बुद्धीन्द्रियाणि सार्थानि मनः कर्मेन्द्रियाणि च॥ अहंकारश्च बु
द्धिश्च पृथिव्यादीनि चैव हि॥ अव्यक्त आत्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते॥ ईश्वरः सर्वभूतस्थः सन्नसन्सदस
च्च यः॥ बुद्धीन्द्रियाणि श्रोत्रादीनि॥ सार्थानि शब्दादिविषयसहितानि मनः॥ कर्मेन्द्रियाणि वागादीनि॥ तथाहं
कारो बुद्धिश्च निश्चयात्मिका पृथिव्यादीनि पंचभूतानि॥ अव्यक्तं प्रकृतिरित्येतत् क्षेत्रमस्य योऽसावीश्वरः सर्व
गतोऽत एव सद्रूपः प्रमाणान्तरागम्यत्वादसन्नस्य दृष्टप्रतीतिकत्वात्सदसद्रूपोऽसावात्मा क्षेत्रज्ञ इति निगद्यते॥
बुद्ध्यादेरुत्पत्तिमाह॥ बुद्धेरुत्पत्तिरव्यक्तात्ततोऽहंकारसंभवः॥ तन्मात्रादीन्यहंकारादेकोत्तरगुणानि च॥ सत्त्वादि
गुणसाम्यमव्यक्तं ततस्त्रिःप्रकारायाः सत्त्वरजस्तमोमया बुद्धेरुत्पत्तिस्तस्याश्च वैकारिकस्तैजसो भूतादिरि

७७ तित्रिविधोहंकारउत्पद्यते॥तत्रतामसाद्भूतादिसंज्ञकादहंकारात्तन्मात्राणि॥आदिग्रहणाद्गगनादीनि॥तानि
चैकोत्तरगुणान्युत्पद्यते॥चशब्दाद्वैकारिकतैजसाभ्यांबुद्धिकर्मेंद्रियाणामुत्पत्तिः॥गुणस्वरूपमाह॥शब्दः
स्पर्शश्चरूपंचरसोगंधश्चतद्गुणाः॥योयस्मान्निःसृतश्चैषांसतस्मिन्नेवलीयते॥तेषांगगनादिपंचभूताना
मेकोत्तरवृद्ध्यापंचशब्दादयोगुणावेदितव्याः॥एषांचबुद्ध्यादिविकाराणांमध्येयोयस्मान्महत्तत्त्वादेरुत्पन्नःस
तस्मिन्नेवसूक्ष्मरूपेणप्रलयसमयेप्रलीयते प्रकरणार्थमुपसंहरन्नाह॥यथात्मानंसृजत्यात्मातथावःक
थितोमया॥विपाकात्त्रिप्रकाराणांकर्मणामीश्वरोपिसन्॥सत्वंरजस्तमश्चैवगुणास्तस्यैवकीर्तिताः॥रजस्त
मोभ्यामाविष्टश्चक्रवद्भ्राम्यतेह्यसौ अनादिरादिमांश्चैवसएवपुरुषःपरः॥लिंगेंद्रियग्राह्यरूपःसविकारउदा
हृतः॥मानसादित्रिप्रकारकर्मणांविपाकादीश्वरोपिसन्नात्मायथात्मानंसृजति॥तथामुष्याकंकथितःसत्वाद राम० ७७
यश्चगुणास्तस्यैवाविद्याविष्टस्यकीर्तिताः॥तथासएवरजस्तमोभ्यामाविष्टश्चक्रवदिहसंसारेभ्राम्यतीत्यपिकथि

तं॥सएवानादिःपरमपुरुषःशरीरग्रहणेनादिमान्कुब्जवामनत्वादिविकारसहितस्तथास्थूलाकारतयापरि
णतोलिंगैरिंद्रियैश्चग्राह्यरूपउदाहृतः॥स्वर्गमार्गमाह॥पितृयाणोजवीथ्याश्चयदगस्त्यस्यचांतरम्॥तेनाग्निहो
त्रिणोयान्तिस्वर्गकामादिवंप्रति॥अजवीथ्यमरमार्गस्तस्यागस्त्यस्यचयदन्तरमसौपितृयानस्तेनाग्निहोत्रिणः
स्वर्गकामाःस्वर्गंप्राप्नुवन्ति॥किंच॥येचवादानपराःसम्यगष्टाभिश्चगुणैर्युताः॥तेपितेनैवमार्गेणसत्यव्रतप
रायणाः॥येचदानादिस्मार्तकर्मपराःसम्यक्दंभरहिताः॥तथाष्टभिरात्मगुणैर्दयाक्षान्तिरनसूयाशौचमना या
सोमंगलमकार्पण्यमस्पृहेतिगौतमादिप्रतिपादितैर्युक्तास्तथायेचसत्यवदननिरतास्तेपितेनैवपितृया
णेनसुरसदनंप्राप्नुवन्ति॥ननुनैमित्तिकादिप्रतिसंचरेऽखिलाध्यापकप्रलयादविदितवेदास्तस्यापरितनाः
कथमिवाग्निहोत्रादिकंकर्मकरिष्यन्ति॥कथन्तरांवाकृतकर्माणःस्वर्गमार्गमधिरोक्ष्यन्तीत्यतआह॥तत्रा
ष्टाशीतिसाहस्राःमुनयोगृहमेधिनः॥पुनरावर्तिनोबीजभूताधर्मप्रवर्तकाः॥तत्रपितृयानेऽष्टाशीति

७८ सहस्रसंख्यामुनयो गृहस्थाश्रमिणः पुनरावृत्तिधर्माणः सर्गादौ वेदस्योपदेशकतया धर्मप्रवर्त्तकाः॥ न
त्वदेहतरुप्रादुर्भावबीजभूताः सन्तोऽग्निहोत्रादिधर्मप्रवर्त्तका अतो न प्रागुक्तदोषसमासंगः॥ किंच॥ स
सर्षिनागवीथ्युत्तरं देवलोकं समाश्रिताः॥ तावन्त एव मुनयः सर्वारंभविवर्ज्जिताः॥ तपसा ब्रह्मचर्येण संग
त्यागेन मेधया॥ तत्र गत्वावतिष्ठन्ते यावदाभूतसंप्लवं॥ सप्तर्षयः प्रसिद्धाः॥ नागवीथ्यैरावतपथः॥ तद
न्तराले तावन्त एवाष्टाशीतिसहस्रसंख्या मुनयः सर्वारंभविवर्ज्जिताः। केवलज्ञाननिष्ठास्तपो ब्रह्मचर्ययु
क्तास्तथा संगत्यागिनो देवलोकं समाश्रिता आभूतसंप्लवं प्राकृतप्रलयपर्यन्तमवतिष्ठन्ते॥ तत्र च स्थिताः
स्वाध्यायाद्याध्यात्मिकधर्माणां प्रवर्त्तकाः॥ कथंभूतास्ते मुनय इत्यत आह॥ यतो वेदाः पुराणांगविद्योपनि
षदस्तथा॥ श्लोकाः सूत्राणि भाष्याणि यच्च किंचन वाङ्मयं॥ यतो द्विविधा अपि मुनिसमूहाश्चत्वारो वेदाः पुराणां राम०
गविद्योपनिषदश्च निस्सृता एवाध्येतृपरंपरायाताः प्रवृत्तास्तथा श्लोका इतिहासात्मकाः सूत्राणि च शब्दानु ७८

शासनमीमांसागोचराणि भाष्याणि च सूत्रव्याख्यारूपाणि पदन्यायायुर्वेदादिकं वाङ्मयं तदपि यत्सकाशा
त्प्रवृत्तं तथाविधास्ते मुनयो धर्मप्रवर्त्तकाः॥ एवं सति वेदस्यापि नानित्यतादोषप्रसंगः॥ ततः किमित्याह॥ वे
दानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः॥ श्रद्धोपवासः स्वातंत्र्यमात्मनो ज्ञानहेतवः॥ वेदस्य नित्यत्वे सति तत्प्रमा
णप्रबलाद्वेदानुवचनादयः सत्त्वशुद्ध्यापादनद्वारेणात्मज्ञानस्य हेतव इत्युपपन्नं भवति॥ किंच॥ सत्याश्रमैर्वि धा
जिज्ञास्यः समस्तैरेवमेव तु॥ द्रष्टव्यस्त्वथ मंतव्यः श्रोतव्यश्च द्विजातिभिः॥ य एनमेवं विंदंति ये चारण्यकमा
श्रिताः॥ उपासते द्विजाः सत्यं श्रद्धया परया युताः॥ यस्मान्नित्यतया प्रमाणभूतो वेदस्तस्मात्सात्त्विकमार्गेण स
कलाश्रमिभिर्नानाप्रकारं जिज्ञासितव्यः॥ तमेव प्रकारं दर्शयति॥ द्विजातिभिर्द्रष्टव्योऽपरोक्षीकर्त्तव्यः॥ तत्रो
पायमाह॥ श्रोतव्यो मंतव्य इति॥ प्रथमतो वेदान्तश्रवणेन निर्णेतव्यः॥ तदनंतरं मंतव्यो युक्तिभिर्विचारयि णे
तव्यः॥ ततोऽसौ ध्यानेनापरोक्षो भवति॥ ये द्विजातयोऽतिशयश्रद्धायुक्ताः सन्तो निर्जनप्रदेशं समाश्रिताः॥ दं

७९ एवमुक्तेनमार्गेणतेनमात्मानंसस्वंपरमार्थभूतमुपासते॥तंआत्मानंविंदं तिलभंतेप्राप्नुवंति॥प्राप्तिमार्गे
देवायानमाह॥क्रमात्तेसंभवंयर्च्चिरहःशुक्लंतथोत्तरं॥अयनंदेवलोकंचसवितारंसविद्युतं॥ततस्तत्पुरु
षोभ्येत्यमानसोब्रह्मलौकिकान्॥करोतिपुनरावृत्तिस्तेषामिहनविद्यते॥तेविज्ञातात्मानःक्रमादर्च्याद्यभि
मानिदेवतास्थानेषुमुक्तमार्गभूतेषुविश्रम्यतैःप्रस्थापिताःपरमंपदंप्राप्नुवंति॥अर्चिर्वह्निः॥अहर्दिनं
॥शुक्लंशुक्लपक्षः॥तथोत्तरायणं॥देवलोकंसुरसद्म॥सवितासूर्यः॥वैद्युतंतेजः॥तानेवंक्रमादर्चिरादिस्था
नगतान्मानसःपुरुषोब्रह्मलोकभाजःकरोति॥तेषामिहसंसारेपुनरावृत्तिर्नविद्यते॥किंतुप्राकृतमृतिसंचरा
वसरेसूक्ष्मलिंगशरीराःपरमात्म्यैकीभवंति॥पूर्वोक्तपितृयानमाह॥यज्ञेनतपसादानैर्येहिस्वर्गजितोनराः॥
धूमंनिशांकृष्णपक्षंदक्षिणायनमेवच॥पितृलोकंचंद्रमसंवायुंवृष्टिंजलंमहीं॥क्रमात्तेसंभवंतीहपुनरेवं रा.म.
व्रजंतिच॥एत नविजानातिमार्गद्वितयमात्मवान्॥दंदशूकःपतंगोवाभवेत्कीटोथवाकृमिः॥येपुन ७९
द्या

विहितैर्यज्ञतपोदानैःस्वर्गफलमोक्तारस्तेक्रमाद्धूमादिचंद्रपर्यंतपदार्थाभिमानिनीर्देवताःप्राप्यपुनरेववा
युवृष्टिजलभूमीःप्राप्यव्रीह्याद्यन्नरूपेणभुक्तत्वमवाप्यसंसारयोनिषुव्रजंति॥एतन्मार्गद्वयमप्रमत्तोयोनवि
जानातिमार्गद्वयोपायभूतधर्मानुष्ठानंनकरोति॥असौदंदशूकोभुजंगःपतंगःशलभःकृमिःकीटोवा
भवेत्॥उपासनक्रममाह॥ऊरुस्थोत्तानचरणःसव्येन्यस्येतरकरं॥उत्तानंकिंचिदुन्नम्यमुखंविष्टभ्यचो
रसा॥निमीलिताक्षःसत्वस्थोदंतैर्दंतानसंस्पृशेत्॥तालुस्थाचलजिह्वश्चसंवृतास्यःसुनिश्चलः॥सन्नि
रुध्येंद्रियग्रामंनातिनीचोच्छ्रितासनः॥द्विगुणंत्रिगुणंवापिप्राणायाममुपक्रमेत्॥ततोध्येयःस्थितोयोसौ
हृदयेदीपवत्प्रभुः॥धारयेत्तत्रचात्मानंधारणांधारयन्बुधः॥ऊरुस्थावुत्तानौचरणौयस्यसतथोक्तः॥बद्धप
द्मासनः॥तथाउत्तानेसव्यकरेदक्षिणमुत्तानंन्यस्यमुखंचकिंचिदुन्नम्योरसावैविष्टभ्यस्तंभयित्वातथानिमिलि कार्यं
ताक्षःसत्वस्थःकामक्रोधादिरहितोदंतैर्दंतानसंस्पृशन्॥तथातालुनिस्थिताऽचलाजिह्वायस्यसतथो

कः॥ तथा संवृतास्यो पिहिताननः॥ सुनिश्चलो निःकंपः तथा सम्यगिन्द्रियसमूहं विषयेभ्यः प्रत्याहृत्यना
८० न्तिनीचां मनो नात्युच्छ्रितासनो यथा चित्तविक्षेपो न भवति तथोपविष्टः सन् द्विगुणं त्रिगुणं वापि प्राणायामा
भ्यासमुपक्रमेत्॥ ततो वशीकृतपवनेन योगिनो योसौ हृदये दीपवदप्रकंपः प्रभुः॥ स्थितो सौ ध्यातव्यः॥
तत्र हृद्यात्मानं मनोगोचरतया धारयेत् तथा धारणां च धारयेत्॥ धारणास्वरूपं च जानुप्रभ्रमणेन छोटिका
दानकालो मात्रा ताभिः पंचदशमात्राभिरधमः प्राणायामः॥ त्रिंशद्भिर्मध्यमः पंचचत्वारिंशद्भिरुत्तमः॥ इ
त्येवं प्राणायामत्रयात्मिकैकैका धारणा॥ तिस्रो योगशास्त्रवाक्यात्ताश्चाधारयेद्यथोक्तमन्यत्र॥ संभ्राम्य छो
टिकां दद्यात्करार्यं जानुमंडले मात्राभिः पंचभिः प्राणायामोधमः स्मृतः मध्यमो द्विगुणः श्रेष्ठस्त्रिगुणो धार
णा तथा॥ त्रिभिस्त्रिभिः स्मृतैकैका ताभिर्योगस्तथैव च॥ धारणात्मयोगाभ्यासप्रयोजनमाह॥ अंतर्धानं स्मृतिः कां राम०
तिर्दृष्टिः श्रोत्रज्ञता तथा॥ निजं शरीरमुत्सृज्य परकायप्रवेशनं॥ अर्थानां छंदतः सृष्टिर्योगसिद्धेस्तु लक्षणं॥ ८०

सिद्धे योगे सजन्देहममृतत्वाय कल्पते॥ अणिमादिप्राप्त्या परैरदृश्यत्वमंतर्धानं॥ स्मृतिरतींद्रियेष्वप्यर्थेषु
मन्वाहेरविस्मरणं॥ कांतिः कमनीयता॥ दृष्टिरतीतानागतेष्वप्यर्थेषु॥ तथा श्रोत्रज्ञता अतिदवीयसि देशे दूरदेशे
भिव्यज्यमानतया श्रोत्रपथमनासेदुषामपि शब्दानां ज्ञातृता॥ निजशरीरत्यागेन परशरीरप्रवेशनं॥ सर्वोच्छा
वशेनार्थानां करणनिरपेक्षतया सृष्टिरित्येतद्योगस्य सिद्धेर्लक्षणं लिंगं॥ न ह्येतावदेव प्रयोजनं॥ किंतु सिद्धे
योगे सजन्देहममृतत्वाय कल्पते॥ ब्रह्मसत्वप्रासये प्रभवति॥ यत्नदानाद्यसंभवे सत्वशुद्धावुपायांतरमाह॥
अथवाप्यभ्यसन्वेदं न्यस्तकर्मा वने वसन्॥ अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयात्॥ अथवा सक्तका
म्यनिषिद्धकर्म्मा वने वसन्॥ वेदमभ्यस्यन्नेकांतशीलो ऽयाचितं मिताशनो पारितं सत्वशुद्धिरात्मोपासने
न मुक्तिलक्षणां सिद्धिमाप्नोति॥ किंच॥ न्यायागतधनस्तत्वज्ञाननिष्ठो तिथिप्रियः॥ श्राद्धकृत्सत्यवादी च गृ
हस्थोपि हि मुच्यते सम्यग्निग्रहारित्यायेनोपार्जितधनः॥ अथितिपूजानसरो नित्यं नैमित्तिकश्राद्धानु

८१ ध्याननिरतः सत्यवचनशीलः सन्नात्मतत्त्वध्याननिरतो गृहस्थोपि हि यस्मान्मुक्तिमवाप्नोति ॥ तस्मान्न केवलमै
हिकपारिव्राज्यं भिक्षुपरिग्रह एव साधनं ॥ इत्याध्यात्मप्रकरणम् ॥ वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः इ
त्यत्र प्रतिपादितया प्रतिज्ञातषड्विधधर्ममध्ये पंचप्रकारं धर्ममभिधायाधुनावशिष्टं नैमित्तिकधर्मजातं प्राय
श्चित्तपदाभिलप्यं प्रारिप्सुः प्रथमं तस्य स्वरूपरचनार्थमधिकारिविशेषप्रदर्शनार्थं अर्थवादरूपं कर्मविपाकं
तावदाह ॥ महापातकजान्घोरान्नरकान्प्राप्य दारुणान् ॥ कर्मक्षयात्प्रजायंते महापातकिनस्त्विह ॥ ब्रह्मह
त्यादिपंचकस्य महापातकसंज्ञा ब्रह्महा मद्यपः इत्यत्र वक्ष्यते ॥ तद्योगिनो महापातकिनस्ते महापातकजनितां
स्तामिस्रादिनरकान्स्वजनितदुःखतानुरूपान्घोरानतितीव्रवेदनान् पा दंतत्वेनातिभयंकरान् ॥ दारुणान् दुः
खैकभोगनिलयान्प्राप्य अ कर्मक्षयात्कर्मजन्यनरकदुःखोपभोगक्षयादनंतरं कर्मशेषात्पुनरिह संसारे दुः राम०
खबहुलश्वशृगालादितिर्यग्योनिषु प्रकर्षेणाभ्यासेनाभ्यो जायंते ॥ महापातकिग्रहणमितरेषामप्युपपातकी ८१

दीनामुपलक्षणं ॥ तेषां च तिर्यगादियोनिप्राप्तेर्वक्ष्यमाणत्वात् ॥ महापातकिनां संसार प्राप्तिमुक्तां तद्विशेषप्र
धनायाह ॥ मृगश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति ॥ खरपुल्कसवेनानां सुरापो नात्र संशयः ॥ कृमिकीटप
तंगत्वं स्वर्णहारी समाप्नुयात् ॥ तृणगुल्मलतात्वं च क्रमशो गुरुतल्पगः ॥ मृगा हरिणादयः श्वसूकरोष्ट्राः प्रसि
द्धाः ॥ तेषां योनिं ब्रह्महा स्वकर्मशेषेण प्राप्नोति ॥ खरो रासभः पुल्कसः प्रतिलोमनिषादेन शूद्रायां जातः ॥ वैदे
हकेनांबष्ठ्यां जातो वेनस्तेषां योनिं सुरापः प्राप्नोति कृमयः सजातीयसंभोगनिरपेक्षा मांसविष्टागोमयादि
जन्यास्ततः किंचित्स्थूलतराः पक्षास्थिरहिताः सजातीयसंभोगरहिताः पिपीलिकादयः कीटाः ॥ पतंगः श
लभस्तेषां योनिं ब्राह्मणस्वर्णहारी प्राप्नुयात् ॥ तृणं काशादि ॥ गुल्मलते प्रागुक्ते ॥ तज्जातीयतां क्रमेण गुरुत
ल्पगः प्राप्नोति ॥ एतच्चाकामकृतविषयं ॥ कामकारकृते त्वन्यास्वपि दुःखबहुलयोनिषु संसरंति ॥ यथाह मनुः
श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणां ॥ चंडालपुल्कसानां च ब्रह्महा योनिमृच्छति ॥ कृमिकीटपतंगानां विड्

८२ भुजां चैव पक्षिणां ॥ हिंस्राणां चैव सत्वानां सुरापो ब्राह्मणो व्रजेत् ॥ लूतांहि सरटानां च तिरश्चां चांबुचारिणां ॥
हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः ॥ लूता ऊर्णनाभः सरटः कृकलासः ॥ तृणगुल्मलतानां च तिरश्चां
क्रव्यादां दंष्ट्रिणामपि ॥ क्रूरकर्मकृतां चैव शतशो गुरुतल्पग इति ॥ किंच ॥ ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदं
तकः ॥ हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः ॥ यो येन संवसत्येषां स तल्लिंगोभिजायते ॥ एवं रौरवादिनरके
षु श्वकरखरादियोनिषु च दारुणं दुःखमनुभूयानंतरं दुरितशेषेण जननसमय एव क्षयरोगादिलक्षणयुक्ता
ः दुःखप्रचुरेषु मानुषशरीरेषु संसरंति ॥ तत्र ब्रह्महा क्षयरोगी राजयक्ष्मी भवेत् ॥ निषिद्धसुरापायी नः स्वभा
वतः कृष्णदशनः ब्राह्मणहेम्नो हर्ता कुत्सितनखत्वं ॥ गुरुदारगामी दुश्चर्मत्वं कुत्सितं ॥ एतेषां ब्रह्महादीनां मध्ये
येन पतितेन यः पुरुषः संवसति स तल्लिंगोभिजायते किंच ॥ अन्नहर्ता मयावी स्यात् मूको वागपहारकः ॥ राम०
धान्यमिश्रोतिरिक्तांगः पिशुनः पूतिनासिकः ॥ तैलहृत्तैलपायी स्यात् पूतिवक्त्रस्तु सूचकः ॥ अन्नस्यापहर्ता म ८२

कीटविशेषः

यावी जीर्णान्नः ॥ वागपहारकोऽननुज्ञातोध्यायी पुस्तकापहारी च मूको वागिंद्रियविकलो भवेत् ॥ धान्यमिश्रो धान्यहर्ता
तिरिक्तांगः षडंगुल्यादिः ॥ पिशुनो विद्यमानपरदोषप्रख्यापनशीलो दुर्गंधिनासिकः ॥ तैलस्य हर्ता तैलपायी
कीटविशेषो भवति ॥ सूचकोऽसद्दोषसंकीर्तनः दुर्गंधिवदनो जायते एतच्चातिर्यक्त्वाभावे नरकानंतरं मानुषश
रीरप्राप्तौ द्रष्टव्यं ॥ यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः ॥ अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः ॥ इति
मनुस्मरणात् ॥ किंच ॥ परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च ॥ अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः ॥ यः पर
दारानपहरति ब्रह्मस्वं च सुवर्णव्यतिरिक्तमपहरति ॥ असावरण्ये निर्जले प्रदेशे ब्रह्मराक्षसो भूतविशेषो जायते
॥ किंच ॥ हीनजातौ प्रजायेत पररत्नापहारकः ॥ पत्रशाकं शिखी हृत्वा गंधान् छुछुंदरिः शुभान् ॥ हीनजातौ हे
मकाराख्यायां पक्षिजातौ पररत्नापहारको जायते तथाह मनुः ॥ मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः ॥ वि
विधानि च रत्नानि जायते हेमकर्तृषु ॥ इति ॥ तथा पत्रात्मकं शाकं हृत्वा मयूरः ॥ शुभान् गंधानपहृत्य छुछुंदरी राजद

DR. BHAU DAJI MEMORIAL

हिताख्यामप्यिकाजायते॥किंच॥मूषको धान्यहारी स्यात् यानमुष्ट्रः कपिः फलं॥जले प्लवः पयः काकोगृह
८३ कारीधुपस्करं॥मधुदंशः पलं गृध्रो गांगोधाग्निं बकस्तथा॥कुष्टीवस्त्रं श्वारसं तु चीरी लवणहारकः॥धान्य श्वित्री
हार्यारवुर्यानं हृत्वोष्ट्रः॥फलं वानरो जलं प्लवः शकटाविलाख्यः पक्षी॥क्षीरं ध्वांक्षः॥गृहोपस्करं मुसलादि
हृत्वा गृहकारी वरटाख्यः कीटविशेषः॥मधु हृत्वा दंशाख्यः कीटः॥पलं मांसं तत् हृत्वा गृध्राख्यः पक्षी॥गां
हृत्वा गोधाख्यः प्राणिविशेषः॥अग्निं हृत्वा बकाख्यः पक्षी॥वस्त्रं हृत्वा श्वित्री॥इक्ष्वादिरसं हृत्वा सारमेयः॥
लवणहारी चीर्याख्यः उच्चैःस्वरः कीटः॥एवं मदृशेनार्थं किंचिदुक्त्वा मतिदृश्यं दृष्टा कोटेन वक्तुमशक्तेरेको
पाधिना कर्मविपाकं दर्शयितुमाह॥मदर्शनार्थमेतत्तु मया कं स्तेयकर्मणि॥द्रव्यप्रकारा हि यथा तथैव प्रा
णिजातयः॥द्रव्यस्यापह्रियमाणस्य यादृशाः प्रकारास्तादृश्य एव प्राणिजातयः स्तेयकर्मणापहर्तारो भवं राम०
ति॥यथांस्य हारी हंस इति॥अथवा यत्फलसाधनद्रव्यमपहरति तत्साधनविकलो यथा पंगुतामश्वहारक ८३

इति संक्षेपेन क्वचिद्विशेषो दर्शितः॥ब्रह्महा कुष्ठी तेजसापहारी मंडली॥देवब्राह्मणाक्रोशकः स्खलतिर्गरदा
ग्निदावुन्मत्तो॥गुरुपत्नीहंतापस्मारी गोघ्नश्चांधः॥धर्मपत्नीं मुक्त्वान्यत्र प्रवृत्तः शब्दवेधी प्राणिविशेषः कुंड
गोभगभक्षो॥देवब्राह्मणस्वापहारी पांडुरोगी न्यासापहारी काणः॥स्त्रीपण्योपजीवी षंढः॥कौमारदारत्या
गी दुर्भगः॥मिष्टैकाशी वातगुल्मी॥अभक्ष्यभक्षको गंडमाली॥ब्राह्मणीगामी निर्वीजी॥क्रूरकर्मा वामनो वस्त्रा
पहारी क्षिपलकः॥शंखशुक्त्यपहारी कपाली॥दीपापहारी कौशिको मित्रध्रुक् क्षयी॥मातापित्रोराक्रोशकः
खंडकार इति॥वृद्धगौतमोपि किंचिद्विशेषमाह॥अनृतवाक् स्खल्वलो मुहुर्मुहुः संलग्नवाक्॥जलोहरो हार
त्यागी॥कूटसाक्षी श्लीपदी उच्छनजंघचरणः॥विवाहविघ्नकर्त्ता छिन्नोष्ठः॥अवगूरणः छिन्नहस्तो मातृ
घ्नोंधस्कंधागामी वातवृषणः॥चतुष्पथे विराममूत्रविसर्जने मूत्रकृच्छ्री॥कान्यादूषकः षंढः ईर्ष्यालुः
मशकः॥पित्रोर्विवदमानोपस्मारी॥आसापहार्येनपसः॥रत्नापहार्यसंतदरिद्रो विद्याविक्रयी पुरुषमृ

ग:॥वेदविक्रयीद्वीपी॥बहुयाचकोजलप्लवः अयाज्यायाजकोवराहोऽनिमंत्रितभोजीवायसः॥मृष्टैकभोजी
८४ वानरोयतस्ततोऽन्यमार्जारः॥कक्षवनदहनात्खद्योतोदारकाचार्योमुखविगंधिः॥पर्युषितभोजीकृमि
रदत्तादायीबलीवर्दो॥मत्सरीभ्रमरोग्न्युत्सादीमंडलकुष्ठीशूद्राचार्यःश्वपाकोगोहर्त्तासर्पः॥स्नेहापहा
रीक्षयी॥अन्नापहार्यजीर्णी॥ज्ञानापहारीमूकः॥चंडालीपुल्कसागमनेऽजगरः॥प्रव्रजितागमनेमरुपि
शाचः॥शूद्रागमनेदीर्घकीटः॥सवर्णाभिगामीदरिद्रो॥जलहारीमत्स्यः॥क्षीरहारीबलाकः॥वार्द्धुषिकोऽ
गहीनोऽविक्रेयविक्रयीगृध्रोराजमहिषीगामीनपुंसकोराजाक्रोशकोगर्दभो॥गोगामीमंडूकोनध्या
याध्ययनेशृगालः॥परद्रव्यापहारीपरप्रेष्योमत्स्यवधोगर्भवासीसैतेऽनूर्द्धगमनाइति॥स्त्रियोप्येतेषु
निमित्तेषुपूर्वोक्तास्ववजातिषुस्त्रीत्वमनुभवंति॥यथाहमनुः॥स्त्रियोप्येतेनकल्पेनहृत्वादोषमवाप्नुयुः॥ राम०
एतेषामेवजंतूनांभार्यात्वमुपयांतिताइति॥एतच्चक्षयित्वादिलक्षणकथनंप्रायश्चित्तोन्मुखीभूतत्रस्तहा ८४

घद्वेगजननार्थंनपुनःक्षयित्वादिलक्षणयुक्तानांद्वादशवार्षिकादिव्रतप्राप्त्यर्थंसंसर्गनिवृत्त्यर्थंवा॥तथा
हि॥पापक्षयार्थंप्रायश्चित्तं॥नचप्रारब्धफलपापादृष्टविनाशेकिंचित्प्रयोजनमस्ति॥नहिकार्मुकनिर्मुक्तो
बाणोलक्ष्यवेधहेतुस्तद्व्यापारस्यवासनांपुनरपेक्षते॥नचतदारब्धफलनाशार्थोपूर्वनाशोन्वेषणीयः॥न
हिनिमित्तकारणभूतचक्रचीवरादिविनाशेनतदारब्धकरकादिविनाशः॥नचैनैसर्गिककौनख्यादिकं
प्रस्तानेतुशक्यते॥किंचनरकतिर्यग्योन्यादिजन्यदुःखपरंपरानुभूतस्यहिकौनख्यादिकोविकारश्चर
मफलंतेनचोत्पन्नमात्रेणस्वकारणापूर्वनाशोजन्यते॥मंथनजनिताशुशुक्षणिनेवारणिक्षयस्तस्मा
न्नपापविनाशार्थंव्रतचर्यानापिसंव्यवहारार्थंनहिशिष्टाःकुनख्यादिभिःसहसंबंधंपरिहरंति॥प्राचीन
निरयासापनाशेनसंव्यवहार्यत्वस्यापिसिद्धेर्नार्थोव्रतचर्यया॥यत्तुवशिष्ठेनोक्तं॥कुनखीश्यावदंतश्चकृच्छ्रं
द्वादशरात्रंचरेदिति॥तत्क्षामवस्त्रादिवन्नैमित्तिकमात्रंनपुनःपापक्षयार्थंसंव्यवहार्यत्वसिद्ध्यर्थंवेतिमंत

म्यं॥ किंच॥ यथाकर्मफलं प्राप्यनियतं कालपर्यंतम्। जायंते लक्षणभ्रष्टा दरिद्राः पुरुषाधमाः॥ यथाकर्मस्वकृ
८५ तदुःकृतानतिक्रमेण तदनुरूपं नरकादिफलं प्राप्य तिर्यक्त्वं च प्राप्य कालक्रमेण क्षीणकर्माणि दुष्टलक्षणदरि
द्राश्च पुरुषेषु निकृष्टा जायंते॥ किंच॥ ततो निःकल्मषीभूताः कुले महति भोगिनः॥ जायंते विद्ययोपेता ध
नधान्यसमन्विताः॥ ततो दुर्लक्षणमनुष्यजन्मानंतरं निःकल्मषीभूता नरकाद्युपभोगद्वारेण पापाः प्रा
ग्भवीयसुकृतशेषेण महाकुलभोगसंपन्ना विद्याधनधान्यसंपन्ना जायंते॥ एवं प्रायश्चित्तेषु प्ररोचनार्थं
कर्मविपाकमभिधायाधुना तेष्वेवाधिकारित्वं निरूपयितुमाह॥ विहितस्याननुष्ठानान्निंदितस्य च सेवना
त्॥ अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छति॥ तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये॥ एवमस्यांतरात्मा च लो
कश्चैव प्रसीदति॥ विहितमिति यदावश्यकं संध्योपासनाग्निहोत्रादिकं नित्यं॥ अशुचिस्पर्शादौ नैमित्तिकं च रा.म० ८५
न चोदितं स्नानादिकं च तदुभयमुच्यते॥ तस्याकरणात्॥ निंदितस्य निषिद्धस्य निषिद्धस्य सुरापानादेः करणा

दिंद्रियाणा

सत्वारिंद्रसंस्कारेष्वाधानस्य परिगणितत्वात्तदंगत्वेन किंचित्कालकृताग्निहोत्रस्य केनचिन्निमित्तेनोपरतस्य पुनरकरणस्य प्रत्यवायो न भवतीत्यर्थोपपादक
परोयं ग्रंथः॥

मनिग्रहाच्च नरः पतनमृच्छति प्राप्नोति प्रत्यवायी भवतीति यावत्॥ नन्विंद्रियार्थेषु सर्वेषु न प्रसज्जेत का
मत इतींद्रियप्रसक्तेरपि निषिद्धत्वान्निंदितग्रहणेनैव गतार्थत्वात्किमर्थमनिग्रहाच्चेंद्रियाणामिति पृथगु
पादानं॥ अत्रोच्यते॥ इंद्रियप्रसक्तिनिषेधस्य नैकांततः प्रतिषेधरूपता स्नातकधर्ममध्येऽस्य पाठात्तत्र
च व्रतानीमानि धारयेदिति व्रतशब्दाधिकारात्तत्र श्रवणाच्चेंद्रियप्रसक्तिप्रतिषेधकः संकल्पो विधीयते॥
स चोभयरूप इति पृथगुपादानं॥ ननु विहिताकरणस्य सर्वैवेतीति कुतो वसितं॥ न तावदग्निहोत्रादिचोदना पुरु
षप्रवर्तनात्मिकाऽननुष्ठानप्रत्यवायहेतुतामाक्षिपति विषयानुष्ठानस्य पुरुषार्थत्वावगतिमात्रपर्यवसानोपि
हिंसातावन्मात्रेण प्रवृत्त्युपपत्तेर्न पुनरकरणस्य प्रत्यवायहेतुत्वमपि वक्ति॥ शीलशक्तित्वादनुपपत्तेः॥ किंच॥ तद्धेतोरनुपपत्तिः
यद्यनुपपत्तु ~~काम्यं कर्मस्व~~ पशमेपि प्रवृत्तिसिद्ध्यर्थमर्थांतरं कल्प्येत॥ तर्हि निषिद्धमात्रक्रियाजन्यप्रत्यवायपरि
हारार्थं तस्येतद्वर्जनस्यैव पुरुषार्थत्वसिद्धावपि फलांतरं कल्प्येत॥ न चैतत्कस्यचिदपि संमतं॥ ननु यथानि

अपरपर्याय

८६ विद्ध्यर्थवादावगतप्रत्यवायपरिहारार्थत्वमेव पुरुषार्थत्वं तथा विहितेष्वप्यर्थवादावगताकरणजन्यप्रत्य
वायपरिहारार्थता कस्मान्नस्यात्॥ मैवं न हि सर्वत्राग्निहोत्रादिषु तादृग्विधा अर्थवादाः संति॥ न च विहितस्या
ननुष्ठानान्नरः पतनमृच्छतीतीयं स्मृतिरेव वाक्यशेषस्थानीयेति च तुल्यं॥ न हि वाक्यांतरप्र[illegible]मितेऽकार्ये
वाक्यांतरेणार्थवादः संभवति॥ भवतु वा कथंचिदेकवाक्यत्वमर्थवादस्तथापि नाभावरूपं विहिताकरणं का
र्यांतरं जनयितुं क्षमते॥ ननु ज्वरे चैवातिसारे च लंघनं परमौषधमित्यायुर्वेदवचनाद्भोजनाभावरूपं लंघनं
ज्वरशांतिं जनयतीति यथावगम्यते तथात्रापि भवतु॥ मैवं॥ यतो नात्रापि लंघनात्ज्वरशांतिः किं तर्हि ज्वर
नाशप्रतिबंधकभोजनाभावे सति जठरानलपरिपाकजनितात् धातुसाम्यादिति मंतव्यं॥ तस्माद्विहितस्या
ननुष्ठानात्पतनमृच्छतीति कथमस्याः स्मृतेर्गतिरिति वाच्यं॥ उच्यते॥ अग्निहोत्रादिविषयाधिकारासिद्धिरू रामः०
पप्रत्यवायाभिप्रायेणेतीन दोषः॥ ननु वांताश्युल्कामुखः प्रेतो विप्रो भवति स्वकत्तः॥ अमेध्यकुणपाशी ८६

तुक्षत्रियः कटपूतनः॥ मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक् चैलाशकश्च भवति शूद्रो धर्मात्स्वकात्च्यु
त इति एतानि विहिताकरणं प्रत्यवायपराणि मनुवचनानि कथं घटंते॥ उच्यते॥ यथा वांतमश्नत उल्कया दा
ह्यमानमुखस्य दुःखं तथास्यापि विहितमकुर्वतः पुरुषस्य पुरुषार्थासिद्धेरिस्व करणनिरंतरमनुष्ठानप्ररोचना
र्थमित्यविरोधः॥ यद्वा प्राग्भवीयनिषिद्धाचरणाक्षिप्तविहितानुष्ठानविरोधिरागालस्यादिजन्यं वांताश्युल्कामु
खप्रेतत्वादिरूपमिति तत्कचिदभावस्य कारणतेति मंतव्यं ननु पुंश्चली वानरखररदष्टमिथ्याभिशस्तादेर्विहिता
करणादिनिमित्तानामन्यतमस्याप्यभावात्कथं प्रत्यवायिता॥ कथं च तदभावे प्रायश्चित्तविधानं॥ उच्यते॥
अस्मादेव प्रायश्चित्तविधानाज्जन्मांतराच[illegible]रितनिषिद्धसेवादिजन्यपापापूर्वं समाक्षिप्तमि
थ्याभिशापादिकं तन्निमित्तप्रायश्चित्तापनोद्यमनोनानुष्ठितमिति कल्प्यते॥ पुरुषप्रयत्ननिरपेक्षेणाकार्य
रूपपापोत्पत्त्यनुपपत्तेः॥ न च पुंश्चल्यादिगतप्रयत्नेन पुरुषांतरे पापोत्पत्तिः॥ कर्तृसमवायित्वनियमात्

नाभुक्तं क्षीयते कर्मेत्यादि

८७ धर्माधर्मयोस्तस्मात्फलेवमप्रायश्चित्ते निमित्तत्रयपरिगणनात्तथा च मनुः ॥ अकुर्वन्विहितं कर्म निन्दितं च समा
चरन् ॥ प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नर इति ॥ नरग्रहणं प्रतिलोमजातानामपि प्रायश्चित्ताधिकारमा
सर्थं तेषामप्यहिंसादिसाधारणधर्मव्यतिक्रमसंभवात् ॥ यस्मादेवं निषिद्धाचरणादिना प्रसज्यते तस्मात्तेन
कृतनिषिद्धसेवादिना पुरुषेण प्रायश्चित्तं कर्तव्यमिहलोके परत्र च विशुद्ध्यर्थं ॥ प्रायश्चित्तशब्दश्चायं पापक्षपा
र्थे नैमित्तिके कर्मविशेषे रूढः ॥ एवं प्रायश्चित्ते कृते अस्यांतरात्मा शुद्धतया प्रसीदति लोकश्च संव्यवहर्तुं प्रसी प्रसन्नो भवति
दति ॥ एवं च वदतैतद्दर्शितं नैमित्तिकोयं प्रायश्चित्ताधिकारः ॥ तत्रार्थवादगतदुरितक्षयोपि ज्ञातेश्चिन्त्याये
न साध्यतयास्विक्रियते ॥ न च दुरितपरिजिहासुनानुष्ठीयत इत्येतावता कामाधिकाराशंका कार्या यस्माद्दुरि
तव्यमतो नित्यं प्रायश्चित्तं विशुद्धये ॥ निंद्यैर्हि लक्षणैर्युक्ता जायंतेऽनिःकृतैनस इत्यकरणे दोषश्रवणेनावश्य प्र०
कर्तव्यावगमात् ॥ प्रायश्चित्ताकरणे दोषमाह ॥ प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः ॥ अपश्चात्तापिनः कष्टा ८७

न तु शिष्टाः । उत्तरमिमांसा अधिकरणमायोज्यो ॥ पामरलोकः

न्नरकान्यांति दारुणान् ॥ पापेषु शास्त्रार्थव्यतिक्रमजनितेषु प्रसक्ताः पुरुषा अपश्चात्तापिनो मया दुःकृतं कृ
तमित्येवमुद्वेगरहिताः प्रायश्चित्तमकुर्वाणाः दुःसहान्नरकान्प्राप्नुवंति ॥ नरकस्वरूपं विष्णुरेवाह ॥ ता
मिस्रं लोहशंकुं च महानिरयशाल्मली ॥ रौरवं कुड्मलं पूतिमृत्तिकं कालसूत्रकं ॥ संघातं लोहितोदं च सविषं सं
प्रयातनं ॥ महानरककाकोलं संजीवनमहापथं ॥ अवीचिमंधतामिस्रं कुंभीपाकं तथैव च ॥ असिपत्रवनं चै
व तापनं चैकविंशतिः ॥ किंच महापातकजैर्घोरैरुपपातकजैस्तथा ॥ अन्विता यांत्यचरितप्रायश्चित्ता नराध
माः ॥ तामिस्रप्रभृतीन्तापनपर्यंतानेकविंशतिनरकानन्वर्थसंज्ञान्द्योतितावांतरभेदान्महापातकोप
पातकजनितभयंकरदुरितैरन्विता अनाचरितप्रायश्चित्ताः पुरुषाधमाः प्राप्नुवंति ॥ उपात्तदुरितन्निरासा
र्थं प्रायश्चित्तमित्युक्तं तत्र विशेषमाह ॥ प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ॥ कामतो व्यवहार्यस्तु वचना
दिह जायते ॥ प्रायश्चित्तैर्वक्ष्यमाणैरज्ञानाद्यदेनः पापं कृतं तदपैति गच्छति ॥ न कामतः कृतं ॥ किं तु तत्र प्रा

न तु पारलौकिकी शुद्धिः

९९ यश्चित्तविधायकवचनबलादिहलोकेव्यवहार्योजायते॥अत्रच॥प्रायश्चित्तैरपैत्येनोयदज्ञानकृतमित्यप
क्रमात्प्रत्ययोगितयाज्ञानकृतइतिवक्तव्येयकामतइत्युक्तंतत्ज्ञानकामनयोस्तुल्यत्वप्रदर्शनार्थं॥तथा
दिविहितंयदकामानांकामात्तद्द्विगुणंभवेत्॥तथाअबुद्धिपूर्वकक्रियायामर्द्धंप्रायश्चित्तं॥तथास्मिन्तुनाधिगतः
शूद्रस्त्वज्ञानात्तुकथंचन॥कृच्छ्रत्रयंप्रकुर्वीतज्ञानेतुद्विगुणंभवेत्॥इत्यादिभिर्वचनैर्ज्ञानकामनयोस्तुल्यप्रा
यश्चित्तदर्शनात्तुल्यफलत्वमेव॥किंच॥स्वतंत्रप्रवृत्तिविषयज्ञानकामनाभ्यांनियतयोरन्यतरापायेपितत्
स्याअसंभवात्ततःकामतइत्युक्तेज्ञानंज्ञानतइत्युक्तेपिकामःप्राप्तोऽविनाभावात्॥नचचौरादिभिर्बलात्प्रव
र्त्तमानस्यसत्यपिविषयज्ञानेकामनाभावान्ना विनाभावइतिवाच्यं॥यतोत्रविद्यमानस्यापिज्ञानस्यप्रवृत्तिहेतु
त्वाभावेनासत्समत्वं॥यत्र॥भुक्तेपिपतितोन्नेस्याकृर्द्दमेपतनेतत्रापिवास्तवज्ञानाभावात्तद्विषयकामनायाअ राम०
भावएव एवमज्ञानकामनयोरव्यभिचारएव॥ननुप्रायश्चित्तैरपैत्येनइतिनयुक्तंफलविनाश्यत्वात्कर्मणः॥ ९९

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यास्मारकसंग्रहालय

मेवं॥यथापापोत्पत्तिःशास्त्रगम्यातथातत्परिक्षयोपीतिनात्रप्रमाणांतरंक्रमते॥तदेवगौतमेनपूर्वोत्तरप
क्षभंग्याअयमर्थोदर्शितस्तत्रप्रायश्चित्तंकुर्यान्नकुर्यादितिमीमांसतेनकुर्यादित्याहुर्नहिकर्मक्षीयतइति॥कु
र्यादित्यपरेपुनरात्मस्तोमेनेष्ट्वापुनःसवनमायांतीतिविज्ञायते॥व्रात्यस्तोमेनेष्ट्वातरतिसर्वपाप्मानंतरतिब्र
ह्महत्यांयोश्वमेधेनयजतइति॥पुनःसवनमायांतीतिसवनसंपाद्यज्योतिष्टोमादिद्विजातिकर्मणियोग्योभव
तीत्यर्थः॥नचैतदर्थवादमात्रं॥अधिकारिविशेषणाकांक्षायांरात्रिसत्रन्यायेनार्थवादिकफलस्यैवकल्पना
याःन्याय्यत्वादतोयुक्तंप्रायश्चित्तैरपैत्येनइति॥ननुकामकृतेप्रायश्चित्ताभावात्कथंव्यवहार्यत्वंतदभावश्चान
भिसंधिकृतेपराधेप्रायश्चित्तमितिवसिष्ठवचनादियंविशुद्धिरुदिताप्रमाप्यांकामतोद्विजं॥कामतोब्राह्मणव
धेनिःकृतिर्नविधीयतइतिमनुवचनाच्चावगम्यते॥नैतत्॥यःकामतोमहापापंनरःकुर्यात्कथंचन।नतस्यनिः
कृतिर्दृष्टाभृग्वग्निपतनादृतइति॥तथा॥विहितंयदकामानांकामात्तद्द्विगुणंभवेदितिचकामकृतेपिप्रायश्चि

८९ त्वदर्शनात्॥ यत्तु वसिष्ठवचनं॥ तस्याप्यकामकृतेपराधे प्रायश्चित्तं शुद्धिकारणमित्यभिप्रायो न पुनः कामकृ
ते प्रायश्चित्ताभाव इति॥ यच्च मनुवचनमियं विशुद्धिरुदितेत्यादि तदपीयमिति सर्वनामपरामृष्टद्वादशवार्षि
कव्रतचर्याया एवाकामतो ब्राह्मणवधे निष्कृतिर्न विधीयत इत्यनेन प्रतिषेधो न पुनः प्रायश्चित्तमात्रस्य म
रणान्तिकादेः प्रायश्चित्तस्य दर्शितत्वात्॥ ननु यदि कामकृतेपि प्रायश्चित्तमस्ति तर्हि पापक्षयोपि कस्मान्न स्या
द्विशेषाद्यदि पापक्षयोपि नास्ति तर्हि व्यवहार्यतापि कथं भवति॥ उच्यते॥ उभयत्र प्रायश्चित्ताविशेषेपि फ
लविशेषः शास्त्रतोवगम्यते॥ अज्ञानकृते सर्वत्र पापक्षयः॥ यत्र तु ब्रह्महसुरपगुरुतल्पगमातृपितृयोनि
संबन्धागस्तेननास्तिककर्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः पातकसंयोजकाश्चेति गौतमोक्तमहापा
तकादौ व्यवहार्यत्वं निषिद्धं तस्मिन्पतनीये कर्मणि कामतः कृते व्यवहार्यत्वमात्रं न पापक्षय इति॥ न च पापक्ष राम
याभावे व्यवहार्यत्वमनुपपन्नं॥ इह हि पापस्य शक्ती नरकोत्पादिका व्यवहारनिरोधिका चेत्येवं शक्तिद्वयविनाशे ८९

निंदितक

पि व्यवहारनिरोधिकायाः शक्तेर्विनाशेनानुपपन्नं तस्मात्पापानपगमेपि व्यवहार्यत्वं नानुपपन्नं॥ यत्तु म
नुवचनं॥ अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः॥ कामकारकृतेप्याहुरेके श्रुतिनिदर्शनादिति॥ तदपि
कामकृतेपि प्रायश्चित्तमात्रसमर्थं न पुनः पापक्षयप्रतिपादनपरं॥ अपतनीये पुनः कामकृतेपि प्रायश्चित्ते
न पापक्षयो भवत्येव॥ अकामतः कृतं पापं वेदाभ्यासेन शुध्यति॥ कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथ
ग्विधैरिति मनुस्मरणात्॥ पतनीयेपि कर्मणि कामकृते मरणान्तिकप्रायश्चित्तेषु कल्मषक्षयो भवत्येव फ
लान्तराभावात्॥ नास्यास्मिन्लोके प्रत्यापत्तिर्विद्यते कल्मषं तु निर्हण्यत इत्यापस्तंबस्मरणात्॥ निषिद्धाच
रणादिकं प्रायश्चित्तनिमित्तमित्युक्तं तत्प्रपञ्चयितुमाह॥ ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः॥ एते महा
पातकिनो यश्च तैः सह संवसेत्॥ हन्तिरयं प्राणवियोगकरे व्यापारे रूढो यद्व्यापारसमनन्तरं कालान्तरे वा कालान्
तरे वा कारणान्तरनिरपेक्षः प्राणवियोगो भवति स ब्राह्मणं हतवानिति ब्रह्महा मद्यपो निषिद्धसुरायाः पाता स्ते

वचनादिह लोके शुद्धिर्जायते।

९० नो ब्राह्मणसुवर्णस्य हर्त्ता॥ ब्राह्मणसुवर्णापहरणं महापातकमिति सापसंवस्मरणात्॥ गुरुतल्पगो गुरुभार्या
गामी॥ तल्पशब्देन शयनवाचिना साहचर्याद्भार्या लक्ष्यते॥ एते ब्रह्महादयो महापातकिनः॥ पातयंतीति पा
तकानि ब्रह्महत्यादीनि॥ महच्छब्देन तेषां गुरुत्वं ख्याप्यते॥ तद्योगिनो महापातकिन इति॥ लाघवार्थं संज्ञाक
रणं॥ यश्चैतैर्ब्रह्महादिभिः प्रत्येकं सहसंवससेभिस्तु संवसेद्यो वै वत्सरं सोपि तत्सम इति वक्ष्यमाणन्यायेन सो
पि महापातकी॥ तथाशब्दः प्रकारवचनोनुग्राहकप्रयोजकादिकर्तृसंग्रहार्थः॥ अनुग्राहकश्च यः पलाय
मानममित्रमुपरुध्य परेभ्यश्च हन्तारं परिरक्षन्हन्तुर्मौढिमानमुपजनयन्नुपकरोति स उच्यते॥ अत एव मनु
ना अनुग्राहकस्य हिंसाफलसंबंधो दर्शितः। बहूनामेककार्याणां सर्वेषां शस्त्रधारिणां॥ यद्येको घातयेत्तत्र
सर्वे ते घातकाः स्मृता इति। तथा प्रयोजकादीनामथापस्त्वेन फलसंबंधः उक्तः। प्रयोजयितानुमन्ता कर्त्ता चे रा.म.
ति स्वर्गनरकफलेषु कर्मसु भागिनो यो भूय आरभते तस्मिन्फलविशेष इति॥ तत्र प्रवृत्तस्य प्रवर्तकः प्र ९०

योजकः॥ स च त्रिप्रकारः आज्ञापयिताभ्यर्थयमान उपदेष्टेति॥ तत्राज्ञापयिता नाम स्वयमुच्चैः सन्नीचं भृ
त्यादिकं यः प्रेषयति मदीयममित्रं जहीति स उच्यते॥ अभ्यर्थयमानस्तु यः स्वयमसमर्थः प्रार्थनादिना म
च्छत्रुं व्यापादयेत्त्वं प्रवर्तयति सोभिधीयते॥ अनयोश्च स्वार्थसिद्ध्यर्थमेव प्रयोक्तृत्वं॥ उपदेष्टा पुनः स्व
शत्रुमित्थं व्यापादयेति मर्मोद्घाटनाद्युपदेशपुरःसरं प्रेरयन्कथ्यते॥ तत्र च प्रयोज्यगतमेव फलमिति
तेषां भेदः॥ अनुमन्तानुप्रवृत्तस्य प्रवर्तकः॥ स च द्विप्रकारः॥ कश्चित्स्वार्थसिद्ध्यर्थमनुजानाति कश्चित्परा
र्थमिति॥ नन्वनुमन्तुः कथं हिंसाहेतुत्वं न तावत्प्राणवियोगसादनेन॥ तस्य साक्षात्कर्तृव्यापारजन्यत्वा
न्नापि प्रयोजकस्येव साक्षात्कर्तृप्रवृत्त्युत्पादनद्वारेण प्रवृत्तस्य प्रवर्तकत्वात्॥ न च साधु त्वयाध्यवसितमि
ति प्रवृत्तमेवानुमन्यत इति शंकनीयं॥ तादृशस्यानुमननस्य हिंसाप्रसहेतुत्वाद्यर्थत्वाच्चेदुच्यते॥ यत्र हि
राजादिपारतंत्र्यात्स्वयं मनसाप्रवृत्तोपि प्रवृत्तिं विच्छेदभयाद्दासगामिदंडभयाद्वा शिथिलप्रयत्नो राजाद्यनुम

९१ त्रिमपेक्षतेतत्रानुमंतुःप्रवृत्तिमुपोद्बलयंतीहिंसाफलंप्रतिहेतुतांप्रतिपद्यते॥तथायोपिभर्त्सनताडन
धनापहारादिनापरान्कोपयतिसोपिमरणहेतुभूतमन्युत्पादनद्वारेणहिंसाहेतुर्भवत्यतएवविष्णुनोक्तं।
आक्रुष्टस्ताडितोवापिधनैर्वापिधनैर्वापिवियोजितः॥यमुद्दिश्यत्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकं॥तथाज्ञा
तिमित्रकलत्रार्थंसुहृत्क्षेत्रार्थमेवच॥यमुद्दिश्यत्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकंइति॥नचहृतेष्वप्याक्रो
शनादिषुकस्यचिन्मन्युत्पत्त्यदर्शनादकारणतेतिशंकनीयं॥पुरुषस्वभाववैचित्र्यात्ययेऽल्पतरेणापिनिमि
त्तेनजातमन्यवोभवंतीतिव्यभिचारइतिनाकारणता॥एतेषांचानुग्राहकप्रयोजकादीनांप्रत्यासत्तिव्यवधा
नापेक्षयाव्यापारगतगुरुलाघवापेक्षयाचफलगुरुलाघवात्प्रायश्चित्तगुरुलाघवंबोद्धव्यम्॥योप्यारभतेत राम०
स्मिन्फलविशेषइतिवचनात्तथाद्यनुग्राहकस्यतावत्स्वयमेवहिंसायांप्रवृत्तत्वेनस्वतंत्रकर्तृत्वेसत्यपिसाक्षात्प्रा ९१
णवियोगफलकस्वकृतप्रहारादिव्यापारयोगित्वाभावेनसाक्षात्कर्तृवद्योहिंसारंभकत्वाभावादल्पफलत्वमल्प

प्रायश्चित्तत्वंच॥प्रयोजकस्यतुस्वतंत्रकर्तृप्रवृत्तिजनकत्वेनव्यवहितत्वात्ततोल्पफलत्वं॥प्रयोजकानांमध्येप
रार्थप्रवृत्तत्वेनोपदेष्टुरल्पफलत्वं॥ननुप्रयोजकहस्तस्थानीयत्वात्प्रयोज्यस्यनफलसंबंधोयुक्तः॥यदिपरप्रयुक्त्या
प्रवर्तमानस्यापिफलसंबंधस्तर्हिस्थपतितडागखनित्रप्रभृतीनामपिमूल्येनप्रवर्तमानानांस्वर्गादिफलप्रसंगः
इत्युच्यते॥शास्त्रफलंप्रयोक्तरीतिन्यायेनाधिकारिकर्तृगतफलजनकादेवकूपतडागनिर्माणादयः॥नचस्थप
तितडागकारादयोदेवकुलतडागकरणादिष्वधिकारिणोस्वर्गकामित्वात्॥अत्रपुनःपरप्रयुक्त्याप्रवर्तमाना
नामपिहिंसायामधिकारित्वाद्भवत्येवतद्घातिकर्मनिबंधनोदोषः॥अनुमंतुस्तुप्रयोजकादप्यल्पफलत्वंप्रयोजकव्या
पाराद्बहिरंगत्वात्पुत्राज्ञानुमननस्य॥निमित्तकर्तुःपुनराक्रोशकादेःप्रवृत्तिहेतुभूतमन्युजनकत्वेनव्यव
हितत्वान्मरणानुसंधानविनाप्रवृत्तत्वाच्चानुमंतुःसकाशादप्यल्पफलत्वं॥ननुयदिव्यवहितस्यापिकारणत्वं
तर्हिमातापित्रोरपिहंतृपुरुषोत्पादनद्वारेणहननकर्तृत्वप्रसंगः॥उच्यते॥नहिपूर्वभावित्वमात्रेणकारणत्वं

९२ कारणाकारणतयापितथाभावित्वोपपत्तेः॥यत्तुखलुस्वव्यतिरिक्तकार्योत्पत्त्यनुगुणव्यापारयोगिभवतित
द्धिकारणं॥यदिरथंतरसामासोमःस्यादैन्द्रवायवाग्रान्ग्रहान्गृह्णीयादितिरथंतरसामत्वेनैवक्रतोरैन्द्रवायवाग्र
तायाकारणंनहितत्रसोमयागःस्वरूपेणकारणंव्यभिचारात्॥नचपित्रोस्तादृग्विधकारणत्वलक्षणयोगित्वमि
तिप्रसंगः॥अनेनैवन्यायेनधर्माभिसंधिनानिर्मितकूपवाप्यादौप्रमादात्ब्राह्मणादिमरणेखनयितुर्दोषाभावः
नहिकूपोऽनेनखानितःअतोहमात्मानंव्यापादयामीत्येवकूपखननिमित्तंव्यापारं॥यथाक्रोशादौअतः॥
कूपकर्तुरपिकारणत्वमेवनंपुनर्हिंसाहेतुत्वमितिमातापित्रोस्तुल्यत्वमेव॥तथाक्वचित्सत्यपिहिंसानिमित्तयोगित्वे
परोपकारार्थप्रवृत्तौवचनाद्दोषाभावः॥यथाहसंवर्तः॥बंधनेगोचिकित्सार्थेमूढगर्भविमोचने॥यत्नेकृतेवि
पत्तिश्चेत्प्रायश्चित्तंनविद्यते॥औषधंस्नेहमाहारंदद्द्गोब्राह्मणादिषु॥दीयमानेविपत्तिःस्यान्नसपापेनलि राम
प्यते॥दाहच्छेदशिराभेदप्रयत्नैरुपकुर्वतां॥प्राणसंत्राणसिद्ध्यर्थंप्रायश्चित्तंनविद्यतेइति॥एतच्चादाननिदानभि ९२

पुणभिषग्विषयं॥इतरस्यतुभिषग्मिथ्याचरन्दाप्यइत्यत्रदोषोदर्शितः॥यत्रतुमन्युनिमित्ताक्रोशनादिकमकुर्व
तोपिनामगृहीत्वास्मारादिनात्मानंव्यापादयतितत्रापिदोषः॥अकारणंतुयःकश्चित्द्विजःप्राणान्परित्य
जेत्॥तस्यैवतत्रदोषःस्यान्नतुयंपरिकीर्तयेदितिस्मरणात्॥तथायत्राप्याक्रोशकादिजनितमन्युनात्मानंस्वस्म
दिनायहृत्स्मरणादर्वागाक्रोशनादिकर्त्राधनदानादिनासंतोषितोयदिजनसमक्षमुच्चैःश्रावयतिनात्राक्रो
शकस्यापराधइतितत्रापिवचनान्नदोषः॥यथाहविष्णुः॥उद्दिश्यकुपितोहत्वातोषितःश्रावयेत्पुनः॥तस्मि
न्मृतेनदोषोस्तिद्वयोरुच्छ्रावणेकृतइति॥एतेषांचप्रयोजकादीनांदोषगुरुलघुभावपर्यालोचनयाप्रायश्चि
त्तविशेषंवक्ष्यामः॥ब्रह्महत्यासमान्याहगुरूणामध्यधिक्षेपोवेदनिंदासुहृद्वधः॥ब्रह्महत्यासमंज्ञेयम
धीतस्यचनाशनं॥गुरूणामाधिक्येनाधिक्षेपः॥अनृताभिशंसनंगुरोरनृताभिशंसनमितिमहापात
कसमानीतिगौतमस्मरणात्॥एतच्चलोकाविदितदोषाभिशंसनविषयं॥दोषंबुध्वानपूर्वः॥परेषांपरेभ्यः

९३ पतितस्य समाख्यातास्यादिसापसंवस्मरणात् ॥ नास्तिक्यमभिनिवेशेन वेदकुत्सनं ॥ सुहृन्मित्रं तस्याब्राह्मणस्य
पि विधः ॥ अधीतस्य वेदस्याभ्यासच्छास्त्रविनोदेनालस्यादिना वा शनैर्विस्मरणं ॥ एतानि प्रत्येकं ब्रह्महत्यासमा
नि ॥ यत्पुनः स्वाध्यायाग्निसुतत्यागः इत्यधीतत्यागस्योपपातकमध्ये परिगणनं तत्कथंचित्कुटुंबभरणाकु
लतया सच्छास्त्रश्रवणव्यग्रतया वा विस्मरणे द्रष्टव्यं ॥ शिष्याभार्यासुतोदासी नियोगी ग्रामकूटकः ॥ ऋणी
च समसमस्तेषां न हत्या ब्रह्मघातिनां ॥ सुरापानसमान्याह ॥ निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतं ॥ रज
स्वलामुखास्वादः सुरापानसमानि तु ॥ निषिद्धं लशुनादिकं ॥ तस्य मतिपूर्वं भक्षणं ॥ अत्रैतदेव मनुः ॥ छ
त्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं ॥ पलांडुं गृंजनं चैव मत्या जग्ध्वा पतेन्नर इति ॥ अमतिपूर्वं तु प्रायश्चित्ता
तरं अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सांतपनं चरेत् ॥ यतिचांद्रायणं वापि शेषेषूपवसेदहरिति तेनैवोक्तत्वात् ॥ जै रा.म.
ह्म्यं कौटिल्यं अनभिसंधानेनान्यथावादित्वमन्यकर्तृत्वं च अत्र जैह्म्यमिति यद्यपि सामान्येनोक्तं तथापि प्रायश्चि ९३

त्तगुरुत्वान्निमित्तस्यापि गुरुविषयं जैह्म्यमिति गौरवं गम्यते ॥ अस्ति चैनैमित्तिकपर्यालोचनाया निमित्तस्या
वगतिः ॥ यथा यस्याभावग्नी अनुगतौ स्यातामभिनिम्लोचेदभ्युदियाद्वा पुनराधेयमत्र प्रायश्चित्तिरित्यत्रो
भावित्वस्य निमित्तविशेषणत्वेन हविरुभयत्ववदविवक्षितत्वेप्यग्निद्वयनिष्पाद्यक पुनराधेयरूपनैमित्तिक
विधिबलादग्निद्वयानुगतिरेव निमित्तमिति कल्प्यते ॥ तथात्रापीति युक्तं निमित्तगौरवकल्पनं ॥ तथा समुत्क
र्षनिमित्तं राजकुलादावचतुर्वेद एव चतुर्वेदोहमित्यनृतभाषणं ॥ रजस्वलायावक्त्रासवसेवनमेतानि सुरा
पानसमानि ॥ ॥सुवर्णस्तेयसमान्याह ॥ ॥अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा ॥ निक्षेपस्य च सर्वं हि
सुवर्णस्तेयसम्मितम् ॥ अश्वादीनां ब्राह्मणसंबंधिनां निक्षेपस्य च सुवर्णव्यतिरिक्तस्यापहरणमेतत्सुवर्णस्ते
यसमं वेदितव्यं ॥ गुरुतल्पसमान्याह ॥ सखिभार्याकुमारीषु स्वयोनिष्वंत्यजासु च ॥ सगोत्रासु सुतस्त्रीषु गुरु
तल्पसमं स्मृतं ॥ सखा मित्रं तस्य भार्या ॥ कुमार्युत्तमजातीया कन्यका तासु ॥ सकामास्वनुलोमासु न दोषस्त्व

९४

न्यथादमः॥ दूषणेनुकरच्छेद उत्तमायां वधस्तथैनिति तत्रैव दंडविशेषप्रतिपादनात्प्रायश्चित्तगुरुत्वं युक्तं सखि
भार्या मित्रपत्नी॥ कुमारी अपरिणीता स्वयोनिर्भगिनी॥ अंत्यजा चांडाली॥ सगोत्रा समानगोत्रा॥ सुतस्त्री स्नु
षाः एतासां गमने प्रत्येकं गुरुतल्पसमं॥ एतच्च रेतःसेकादूर्ध्वं वेदितव्यं॥ अर्वाग्निवृत्तौ तु न गुरुतल्पसमत्वं किं
तल्पमेव प्रायश्चित्तं रेतःसेकः स्वयोनीषु कुमारीष्वंत्यजासु च॥ सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुरिति
मा॥ नवे रेतःसेक इति विशेषणोपादानात्॥ सगोत्राग्रहणेनैव सिद्धे पुनः सुतस्त्रीग्रहणं प्रायश्चित्तगौरवप्र
तिपादनार्थं॥ अत्र च ब्रह्महत्यादिसमत्ववचनं गुर्वधिक्षेपादेस्तन्निमित्तप्रायश्चित्तापदेशार्थं॥ ननु वेदनिंदा
दौ दोषस्य लघुत्वाद्गुरुतरं ब्रह्महत्यादिप्रायश्चित्तं न युज्यते॥ नैवं गुरुप्रायश्चित्तोपदेशबलादेव दोषगुरुत्वावग
तेः॥ न च ब्रह्महत्यादिप्रायश्चित्तातिदेशार्थमेवेदं वचनं न भवति किंतु दोषगौरवमात्रप्रतिपादनपरमित्याशंक राम०
नीयं॥ यतस्तावन्मात्रप्रतिपादनपरत्वे ब्रह्महत्यासममिदं गुरुतल्पसममित्यादिभेदेन समत्वाभिधानं नोपप ९४

DR. ... BALAJI MEMORIAL

द्यते॥ तच्च प्रायश्चित्तं समशब्देनोपदिश्यमानं ब्रह्महत्यादिप्रायश्चित्तेभ्यः किंचिन्न्यूनमेवोपदिश्यते॥ लोके
राजसमो मंत्रीत्यादिवाक्येषु समशब्दस्य किंचिद्धीने प्रयोगदर्शनान्महतः पातकस्येतरस्य च तुल्यत्वस्यायुक्त
त्वाच्च॥ एवं च सति याज्ञवल्क्येन ब्रह्महत्यासमत्वेनोक्तानामपि ब्रह्मोज्झत्ववेदनिंदासुहृद्वधानां मनुना यत्सु
रापानसाम्यं॥ ब्रह्मोज्झता वेदनिंदा कौटसाक्ष्यं सुहृद्वधः॥ गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षडित्युक्तं
तत्प्रायश्चित्तविकल्पार्थं॥ एवमन्येष्वपि वचनेषु विरोधः परिहर्तव्यः॥ यत्तु वशिष्ठेन॥ गुरोरलीकनिर्बंधे कृच्छ्रं
द्वादशरात्रं चरित्वा सचैलः स्नातो गुरुप्रसादात्पूतो भवतीति लघुप्रायश्चित्तं उक्तं तदमतिपूर्वे सकृदनुष्ठाने च वेदि
तव्यं॥ गुरुतल्पातिदेशमाह॥ पितुःस्वसारं मातुश्च मातुलानीं स्नुषाम पि॥ मातुः सपत्नीं भगिनीमाचार्यतन
यां तथा॥ आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः॥ लिंगं छित्वा वधस्तस्य सकामायाः स्त्रिया अपि॥ पितृष्व
स्रादयः प्रसिद्धाः ता गच्छन् गुरुतल्पगस्तस्य लिंगं छित्वा राज्ञा वधः कर्तव्यो दंडार्थं प्रायश्चित्तं च तदेव चशब्दाद्ग

९५ ज्ञीप्रव्रजिताद्रीनांग्रहणं॥यथाहनारदः॥मातामातृष्वसाश्वश्रूर्मातुलानीपितृष्वसा॥पितृव्यसखिशिष्यस्त्री
भगिनीतत्सखीस्नुषा॥दुहिताचार्यभार्याचसगोत्राशरणागता॥राज्ञीप्रव्रजिताधात्रीसाध्वीवर्णोत्तमाचया
॥असामन्यतमांगच्छन्गुरुतल्पगउच्यते॥शिश्नस्योत्कर्तनंनीतत्रनान्योदंडोविधीयतइति॥राज्ञीराज्यस्यकर्तुर्भार्या
नक्षत्रियैव॥तद्गमनेप्रायश्चित्तांतरोपदेशात्॥धात्रीमातृव्यतिरिक्तास्तन्यदानादिनापोषयित्री॥साध्वीव्रतचारि
णी॥वर्णोत्तमाब्राह्मणी॥अत्रमातृग्रहणंदृष्टांतार्थं॥अयंचलिंगछेदरूपात्मकोदंडोब्राह्मणव्यतिरिक्तस्य॥न
जातुब्रा[illegible]ह्मणंहन्यात्सर्वपापेष्ववस्थितमितितस्यवधनिषेधात्॥वधस्यैवप्रायश्चित्तत्वात्॥अस्यचीवषयं
गुरुतल्पप्रायश्चित्तप्रकरणेप्रपंचयिष्यामः॥अत्रस्नुषाभगिन्योःपूर्वश्लोकेनगुरुतल्पसमीकृतयोःपुनर्ग्र
हणंप्रायश्चित्तविकल्पार्थंयदापुनरेताःस्त्रियःसकामाःसत्यःएतानेवपुरुषान्वशीकृत्योपभुंजतेतदातासाम राम०
पिपुरुषवद्वधएवदंडःप्रायश्चित्तंच॥एतानिवगुर्वधिक्षेपादितनयागमनपर्यंतानिमहापातकातिदेशविषया ९५

णिसद्यःपतनहेतुत्वात्सानकान्का[illegible]ष्यंते॥यथाहयमः॥मातृष्वसामातृसखीदुहिताचपितृष्वसा॥मातुला
नीस्वसाश्वश्रूर्गत्वासद्यःपतेन्नरइति गौतमेनपुनरन्येषामपिपातकत्वमुक्तं॥मातृपितृयोनिसंबद्धगस्तेन
नास्तिकनिंदितकर्माभ्यासिपतितात्याग्यपतितत्यागिनःपतिताःपातकसंयोजकसंयोजकाश्चेति॥तेषांचम
हापातकोपपातकमध्यपाठात्महापातकान्न्यूनत्वमुपपातकाच्चगुरुत्वमवगम्यते॥तदुक्तं॥महापातककृ
त्यानिपापान्युक्तानियानितु॥तानिपातकसंज्ञानितन्न्यूनमुपपातकमिति॥तथांगिराः॥पातकेतुसहस्रं
स्यान्महत्सुद्विगुणंतथा॥उपपापेतुरीयंस्यान्नरकंवर्षसंख्ययेति॥एवंमहापातकानितत्समानिपरिगणय्यो
पातकानिपरिगणयितुमाह॥गोवधोव्रात्यतास्तेयमृणानांचानपक्रिया॥अनाहिताग्नितापण्यविक्रयंपरि
वेदनं॥भृताद्ध्ययनादानंभृतकाध्यापनंतथा॥पारदार्यंपारिवित्त्यंवार्धुष्यंलवणक्रिया॥स्त्रीशूद्रविट्क्षत्रव
धोनिंदितार्थोपजीवनं॥नास्तिक्यंव्रतलोपश्चसुतानांचैवविक्रयः॥धान्यकुप्यपशुस्तेयमयाज्यानांचयाज

९६ नं॥पितृमातृसुतत्यागस्तडागारामविक्रयः॥कन्यासंदूषणं चैव परिविंदकयाजनं॥कन्याप्रदानं तस्य च कौ
टिल्यं व्रतलोपनं॥आत्मनोर्थे क्रियारंभो मद्यपस्त्रीनिषेवणं॥स्वाध्यायाग्निसुतत्यागो बांधवत्याग एव च॥
इंधनार्थं द्रुमच्छेदः स्त्रीहिंसौषधजीवनं॥हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रयः॥शूद्रप्रेष्यं हीनस प्राणिहिंसाकरणं
ख्यं हीनयोनिनिषेवणं॥तथैवानाश्रमे वासः परान्नपरिपुष्टता॥असच्छास्त्राधिगमनमाकरेष्वधिकारि
ता॥भार्याया विक्रयश्चैषामेकैकमुपपातकं॥गोवधो गोपिंडव्यापादनं॥कालेऽनुपनीतत्वं व्रात्यता॥ब्राह्म
णसुवर्णतत्समव्यतिरिक्तपरद्रव्यापहरणं स्तेयं॥गृहीतस्य सुवर्णादेरप्रदानमृणानामनपाकरणं॥त
थादेवर्षिपितृणां संबंध्यृणस्यानपाकरणं च॥सत्यधिकारे अनाहिताग्नित्वं॥ननु ज्योतिष्टोमादिकामश्रुत
यः स्वांगभूताग्निनिष्पत्त्यर्थमाधानं प्रयुंजत इति मीमांसकप्रसिद्धिरतश्च यस्याग्निभिः प्रयोजनं तस्य राम०
तदुपायभूताधाने प्रवृत्तिर्व्रीह्याद्यर्थिन इव धनार्जने॥यस्य पुनरग्निभिः प्रयोजनं नास्ति तस्याप्रवृत्तिरिति ९६

कथमनाहिताग्निता दोषः॥उच्यते॥अस्मादेवाधानस्यावश्यकत्ववचनान्नित्यश्रुतयोपि साधिकारत्वो
विशेषादाधानस्य प्रयोजिका इति स्मृतिकाराणामभिप्रायो लक्ष्यत इत्यदोषः॥तथा अपण्यस्य च लवणा
देर्विक्रयः॥सहोदरस्य ज्येष्ठस्य तिष्ठतः कनीयसो भ्रातुर्दाराग्निसंयोगः परिवेदनं॥पणपूर्वाध्यापकाद
ध्ययनग्रहणं॥पणपूर्वाध्यापनं भृतकाध्यापनं॥परदारसेवनं गुरुदारतत्समव्यतिरेकेण पारदार्यं॥पा
रिवित्त्यं कनीयसः कृतविवाहे ज्येष्ठस्य विवाहराहित्यं॥वार्धुष्यं प्रतिषिद्धवृद्ध्युपजीवित्वं॥लवणस्योत्पादनं
स्त्रियाः वधः ब्राह्मण्या अप्यात्रेय्या व्यतिरेकेण॥शूद्रवधः॥अदीक्षितविट्क्षत्रवधः॥निंदितार्थोपजीवनम
राजस्थापितार्थोपजीवनं॥नास्तिक्यं नास्ति परलोक इत्याद्यभिनिवेशः॥व्रतलोपो ब्रह्मचारिणः स्त्रीप्रसंगः
॥सुतानामपत्यानां विक्रयः॥धान्यं व्रीह्यादि कुप्यमसारद्रव्यं त्रपुसीसादि पशवो गवादयस्तेषामपहरणं॥
गोवधो व्रात्यता स्तेयमित्यनेन स्तेयग्रहणेनैव सिद्धे पुनर्धान्यकुप्यादिस्तेयग्रहणं नियमार्थमतो धान्यादिष्वपि

९७ रिक्तद्रव्यस्तेयेनावसन्नमेतदेवप्रायश्चित्तमपितुततोन्यूनमपिभवत्येतेनबांधवत्यागग्रहणेनैवसिद्धेपुनः॥
पित्रादित्यागग्रहणंव्याख्यातं॥अयाज्यानांजातिकर्मदुष्टानांशूद्रव्रात्यादीनांयाजनं॥पितृसुतानामपति
तानांत्यागोगृहान्निष्कासनं॥तडागस्यारामस्यचोद्यानोपवनादेर्विक्रयः॥कन्यायद्दूषणमंगुल्यादिनायो
निविदारणंनतुसंभोगस्तस्यसखीभार्याकुमारीष्वितिगुरुतल्पसमत्वस्यउक्तत्वात्॥परिविदंकयाजनंतस्यच
कन्याप्रदानंकौटिल्यंगुरोरन्यत्रगुरुविषयस्यसुरापाणसमत्वमुक्तं॥पुनर्व्रतलोपग्रहणमशिष्टाप्रतिषिद्धेष्व
पिहरिचरणकमलाप्रेक्षणात्प्राक्तांबूलादिकंनभक्षयामीत्येवंरूपेषुप्राप्त्यर्थंनतुस्नातकव्रतप्राप्त्यर्थंतत्र
स्नातकव्रतलोपेचप्रायश्चित्तमभोजनंइतिमनुनालघुप्रायश्चित्तस्यप्रतिपादितत्वान्नथात्मार्थंपाकल
क्षणक्रियारंभः॥अघंसकेवलंभुंक्तेयःपचत्यात्मकारणादितितस्यैवप्रतिषिद्धत्वात्॥क्रियामात्रविषयत्वे राम० ९७
तुप्रतिषेधकल्पनायांगौरवस्यात्॥मद्यपायाःस्त्रियाजायायाअपिनिषेवणमुपभोगः॥स्वाध्यायत्यागोऽध्या

ध्यानतः॥अग्नीनांचश्रौतस्मार्त्तानांत्यागः॥सुतत्यागःसंस्काराद्यकरणं॥बांधवानांपितृव्यमातुलादीनांत्यागः
सतिविभवेअपरिरक्षणं॥पाकादिदृष्टप्रयोजनसिद्ध्यर्थमार्द्रद्रुमच्छेदोनतुआहवनीयपरिरक्षणार्थमपि॥स्त्रि
याहिंसयाऔषधेनचजीवनंवर्तनंस्त्रीहिंसौषधजीवनंतत्रस्त्रीजीवनंनामभार्यापण्यभावेनप्रयोज्यतल्लब्धो
पजीवनं॥स्त्रीधनोपजीवनंवा॥हिंसयाजीवनंप्राणिवधेनजीवनं॥औषधजीवनंवशीकरणेन॥हिंस्रयंत्र
स्यतिलेक्षुपीडाकरस्यप्रवर्त्तनं॥व्यसनानिमृगयादीन्यष्टादश॥आत्मविक्रयोद्रव्यग्रहणेनपरदारस्यकर
णं॥शूद्रसेवनंहीनेषुमैत्रीकरणं॥अनूढसवर्णदारस्यकेवलहीनवर्णदारोपगमनंसाधारणस्त्रीसंभोगश्च
॥अगृहीताश्रमित्वं॥परपाकरतित्वं॥असच्छास्त्रस्यचार्वाकादिग्रंथस्याधिगमः॥सर्वाकरेषुसुवर्णाद्युत्पत्ति
स्थानेषुराजाज्ञयाधिकारित्वं॥भार्यायाविक्रयः॥चशब्दान्मन्वाद्युक्ताभिचारप्रतिषिद्धलशुनादिभक्षणादेर्ग्र
हणं॥एषांगोवधादीनांप्रत्येकमुपपातकंसंज्ञावेदितव्या॥मनुनापुनरन्यान्यपिनिमित्तानिजातिभ्रंशकरसं

१८ करीकरणापात्रीकरणमलिनीकरणसंज्ञानिपरिगणितानि॥ ब्राह्मणस्यरुजः कृत्वाघातिरघ्रेयमद्ययोः॥ जै
ह्म्यंपुंसि च मैथुनंजातिभ्रंशकरंस्मृतं॥ खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा॥ संकरीकरणंज्ञेयंमीनाहिम
हिषस्य च॥ निंदितेभ्योधनादानंवाणिज्यंशूद्रसेवनं। अपात्रीकरणंज्ञेयमसत्यस्यचभाषणं। कृमिकीट
वयोहत्यामद्यानुगतभोजनं। फलैधःकुसुमस्तेयमधैर्यंचमलावहमिति॥ अतोन्यन्निमित्तजातंप्रकीर्णकं
कथ्यते वृद्धविष्णुना च समस्तानिप्रायश्चित्तनिमित्तान्युत्तरोत्तरलघीयांसिपृथक्संज्ञाभेदभिन्नानिदर्शिता
नि। ब्रह्महत्यासुरापानंब्राह्मणसुवर्णापहरणंगुरुतल्पगमनमितिमहापातकानितत्संयोगश्च॥ मातृगमनं
दुहितृगमनंस्नुषागमनमित्यतिपातकानि। यागस्थक्षत्रियवधोवैश्यस्यचरजस्वलायाश्चांतर्वत्न्याश्चा
त्रिगोत्रायाअविज्ञातगर्भस्यशरणागतस्यचघातनंब्रह्महत्यासमानि। कौटसाक्ष्यंसुहृद्वधः इत्येतौसुरापा राम० १८
नसमौ॥ ब्राह्मणस्यभूमिहरणंसुवर्णस्तेयसमं। पितृव्यमातामहमातुलनृपपत्न्यभिगमनंगुरुदारगमन

समंपितृष्वसृगमनंश्रोत्रियपत्न्यृत्विगुपाध्यायमित्रपत्न्यभिगमनंचस्वसुःसख्याःसगोत्रायाउत्तमवर्णा
यारजस्वलायाःशरणागतायाःप्रव्रजितायानिक्षिप्तायाश्चगमनमित्येतान्युपातकानि॥ अनृतवचनंसमु
त्कर्षेराजगामि च पैशुनंगुरोश्चालीकनिर्बंधोवेदनिंदाअधीतस्यत्यागोग्निमातृपितृसुतदाराणांवोअभो
ज्यानांचभक्षणं। परस्वापहरणंपरदाराभिगमनमयाज्यानांचयाजनंव्रात्यताभृतकाध्यापनंभृताध्ययनादा
नंसर्वाकरेष्वधिकारोमहायंत्रप्रवर्तनंद्रुमगुल्मलतौषधीनांहिंसयाजीवनमभिचारमूलकर्मसुचप्रवृत्ति
रात्मार्थक्रियारंभोऽनाहिताग्नितादेवर्षिपितृऋणमनपाक्रियाअसच्छास्त्राधिगमनंनास्तिकताकुशी
लवतामद्यपस्त्रीनिषेवणमित्युपपातकानि॥ ब्राह्मणस्यरुजःकरणमघ्रेयमद्ययोर्घ्रातिःजैह्म्यंपशुषुपुं
सिचमैथुनाचरणमित्येतानिजातिभ्रंशकराणिग्राम्यारण्यपशूनांहिंसनंसंकरीकरणं॥ निंदितेभ्योधना
दानंवाणिज्यंकुसीदजीवनमसत्यभाषणंशूद्रसेवनमित्यपात्रीकरणानिपक्षिणांजलचराणांघातनंकृमि

९९ कीटवातनं मद्यानुगतभाजनमिति मलावहानि ॥ यदुक्तं तस्य कीर्णकमिति । कात्यायनेन तु महापातकसमा
नोविभक्ता उपपातकत्वेनोक्तानां पातकसंज्ञा दर्शिता । महापापं चातिपं तथा पातकमेव च ॥ प्रासंगिकं चोप
पापमित्येवं पंचको गण इति ॥ ननु उपपातकादीनां कथं पातकत्वं पतनहेतुत्वाभावात् ॥ यदि तेषामपि पत
नहेतुत्वं तर्हि मात्स्पित्र्योनिसंबंधागइत्यादि परिगणनमनर्थकं अथैवमुच्यते ॥ यद्यपि महापातकसमे
ष्विव सद्यः पातित्यहेतुत्वं नास्ति तथाप्यभ्यासापेक्षया पातित्यमविरुद्धं । निंदितकर्माभ्यासी इति गौतमवचना
दिति ॥ मैवं । अभ्यासस्यानिरूप्यमाणत्वात् द्विःशतकृत्वो वेति । तत्राविश्वासेंगीक्रियमाणे योषिद्विर्दिवास्व
पिति यः शतकृत्वो वा गोवधं करोति तयोरविशेषेण पातित्यं स्यात् । अत्रोच्यते । यत्रार्थवादे प्रर्थवादे प्रसवा
यविशेषः श्रूयते प्रायश्चित्तबहुत्वं वा तस्मिन्निंदितकर्मणि यावदभ्यस्यमाने महापातकतुल्यत्वं भवति । ता याम०
वानभ्यासः पतित्वहेतुः ॥ दिवास्वापादौ तु सहस्रकृत्वोप्यभ्यस्यमानेन महापातकतुल्यत्वं भवतीति न तत्र पा ९९

तिरमतो युक्तमुपपातकादेरभ्यासापेक्षया पतनहेतुत्वं ॥ ॥ एवं संव्यवहारार्थं संज्ञाभेदसहितं प्रायश्चित्तनि
मित्तपरिगणनं कृत्वा नैमित्तिकानि प्रदर्शयितुमाह । शिरःकपाली ध्वजवान् मिताशी कर्म वेदयन् । ब्रह्महा द्वाद
शाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥ शिरसः कपालमस्यास्तीति शिरःकपाली तथा ध्वजवान् । हत्वा शवशिरो
ध्वजमिति मनुस्मरणात् । अन्यत् शिरःकपालं दंडाग्रसमारोपितं ध्वजशब्दवाच्यं गृहीयात्त् च कपालं स्वव्या
पादितब्राह्मणशिरःसंबंधि ग्राह्यं । ब्राह्मणो ब्राह्मणं घातयित्वा तस्यैव शिरःकपालमादाय तीर्थान्यनुसंचरे
दिति शातातपस्मरणात् तदलाभे अन्यस्य ब्राह्मणस्यैव ग्राह्यं एतदुभयपाणिना वा ग्राह्यं खट्वांगकपालपाणि
रिति गौतमस्मरणात् । खट्वांगशब्देन दंडारोपितशिरःकपालात्मको ध्वजो गृह्यते न पुनः खट्वैकदेशः महा
व्रतः खट्वांगं परशुरमित्यादि व्यवहारेषु तथैव प्रसिद्धेः एतच्च कपालधारणं चिन्हार्थं न पुनर्भोजनार्थं भिक्षार्थं
वा मन्मयकपालपाणिर्भिक्षार्थं ग्रामं प्रविशेदिति गौतमस्मरणात् ० तथा वनवासिना चतेन भवितव्यं ० ब्रह्म

१०० स्या द्वादशाब्दानि कुटीं कृत्वा वने वसेदिति मनुस्मरणात्· ग्रामसमीपे वा· कृतवापनो वा निवसेद्ग्रामान्ते गोव्रजे पि
वा· आश्रमे वृक्षमूले वा सर्वभूतहिते रत इति· तेनैवोक्तत्वात्· कृतवापनो वेति विकल्पाभिधानाज्जटी वेति ग
म्यते। अत एव संवर्तः ब्रह्महा द्वादशाब्दानि वालवासा जटी ध्वजी॥ तथा भिक्षाशनशीलश्च भवेत् भिक्षा च लो
हितकेन मृन्मयखंडशरावेण ग्राह्याः लोहितकेन खंडशरावेण भिक्षायै ग्रामं प्रविशेत्· आपस्तंबस्मरणात्·
सप्तागाराण्यप्रचारे लभ्यते तेषु वमसंकल्पितानि भिक्षार्थं प्रविशेत्· सप्तागाराण्यसंकल्पितानि चरेद्भैक्षमिति
वशिष्ठस्मरणात्· तथैककालश्च सोम्याशाः एककालाहार इति तेनैवोक्तत्वात्· तच्च भैक्षं ब्राह्मणादिवर्णेष्वे
व कार्यं चातुर्वर्ण्यं चरेद्भैक्षं खट्वांगी संयतः पुमानिति संवर्तस्मरणात्· तथा ब्रह्महास्मीति स्वकर्मख्यापयन्द्वारि
स्थितो भिक्षां याचेत्· वेश्मनो द्वारि तिष्ठन्भिक्षार्थी ब्रह्मघ्नाय क इति पराशरस्मरणात्· अयं च भिक्षाशित्वनिय राम०
मो वन्यैर्जीवनाशक्तौ द्रष्टव्यः भिक्षायै प्रविशेद्ग्रामं वन्यैर्यदि न जीवतीति संवर्तस्मरणात्· तथा ब्रह्मचर्यादियुक्ते १००

Dr. BHAU DAJI MEMORIAL

न च तेन भवितव्यं· खट्वांगकपालपाणिर्द्वादश संवत्सरान्ब्रह्मचारी भिक्षायै ग्रामं प्रविशेत्· कर्म्म चक्षाणः प
थोऽप्यक्रामेत्संदर्शनादार्यस्य स्थानासनाभ्यां विहरन्सवनेषूदकोपस्पर्शी शुध्येदिति गौतमस्मरणात्· ब्रह्म
चारिग्रहणं च वर्जयेन्मधु मांसगंधमाल्यदिवास्वप्नांजनाभ्यंजनोपानच्छत्र कामक्रोधलोभमोहहर्षनृत्यगी
तपरिवादनभयानीति ब्रह्मचारिप्रकरणोक्तविरुद्धधर्मप्राप्त्यर्थं· अत एव शंखः स्थानवीरासनी मौनी मौं
जी दंडकमंडलुः भिक्षाचर्याग्निकार्येषु कूष्मांडीभिः सदा जप इति· तस्य भवेदिति शेषः अत्र च सवनेषूद
कस्पर्शे त्रिस्नानविधानात्तदंगभूतमंत्रादिप्राप्तिरप्यवगम्यते· तथा शुचिना कर्म कर्तव्यमित्यस्य सर्वकर्म
साधारणत्वाद्व्रतचर्यांगभूतशौचसंपत्त्यर्थं स्नानवत्संध्योपासनमपि कार्यं· तस्यापि शौचापादनद्वारेण स
र्वकर्मशेषत्वात्· तथा च दक्षः संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु॥ यत्किंचित्कुरुते कर्म न तस्य फल
भाग्भवेत्· इति· न च द्विजातिकर्मभ्यो हानिः पतनमिति वचनात्संध्योपासनाया अपि द्विजातिकर्मत्वादप्रा

२०१ सिरितिशंकनीयं यस्मात्पतितस्यैव व्रतचर्योपदेशात् । तदंगतयैव संध्योपासनादिप्राप्तिरतो द्विजातिनामध्य
यनमिज्यादानं ब्राह्मणस्याधिकारः अतिथिसत्कृतिवैश्वदेवानामपि प्रवचनयाजनप्रतिग्रहाः इत्यादीना
मेव द्विजातिकर्मणां व्रतचर्यानंतरभूतानां हानिर्न सर्वेषां । तावन्मात्रबाधेन हानिवचनस्य चरितार्थत्वात् ।
इयं च मनुयाज्ञवल्क्यगौतमादिप्रतिपादिता द्वादशवार्षिकव्रतचर्यैकैव । न पुनर्भिन्ना । परस्परसापेक्षत्वा
द्विरोधाच्च । तथाहि । भिक्षार्थी कर्म वेदयन्नित्युक्ते किं भिक्षापात्रं केषां वा गृहेषु कतिषु वेत्याकांक्षा जायेतेव ।
नत्र लोहितकेन खंडशरावेण सप्त स्वागारादिवचनैः परिपूरणमविरुद्धं । अतः सैवैकैककल्पोपदेशाद्यत्कैश्चि
दुक्तं मनुगौतमाद्युक्तेतिकर्तव्यतायाः परस्परसापेक्षत्वेपि विकल्पस्तदनिरूपणे वोक्तमिति मंतव्यं । एवं द्वा राम०
दशवर्षाणि व्रतचर्यामावर्त्य ब्रह्महा शुद्धिमाप्नुयात् । इयं चाकामकृतब्रह्मवधविषया । इयं विशुद्धिरुदिता २०१
प्रमाप्याकामतो द्विजं कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते इति मनुस्मरणात् । अत्रेदं चिंतनीयं । किं द्वि

त्रिब्राह्मणवधे प्रायश्चित्तस्य तंत्रत्वमुताहो त्विरिति । तत्र केचिन्मन्यते । ब्रह्महा द्वादशाब्दानीत्यत्र ब्रह्मशब्दस्यै
कस्मिन्द्वयोर्बहुषु साधारणत्वादेकस्मिन्ब्राह्मणवधे यत्प्रायश्चित्तं तदेव द्वितीयेत्तृतीयेपि तत्रैकब्राह्मणवध
निमित्तैकप्रायश्चित्तानुष्ठाने सति इदं कृतमिदं नेति न शक्यते वक्तुं देशकालकर्तृणां प्रयोगानुबंधभूताना
मभेदेनागृह्यमाणविशेषत्वात्तंत्रानुष्ठानेन पापक्षयलक्षणकार्यनिष्पत्तिरुक्ता । यथा तंत्रानुष्ठितैः प्रयाजा
दिभिः आग्नेयादिषु तंत्रेणैवानेकोपकारलक्षणकार्याणां निष्पत्तिर्न चैवं वाच्यं । द्वित्रिब्राह्मणवधे पापस्य गु
रुत्वादेनसि गुरुणि गुरूणि लघुनि लघूनीति वचनादावृत्तमेव प्रायश्चित्तानुष्ठानं युक्तं । विलक्षणकार्ययो
स्तंत्रेण निष्पत्त्यनुपपत्तेरिति यतो नेदं वचनमावृत्तिविधायकं । किंतु उपदिष्टानां गुरुलघुकल्पानां व्यवस्था
प्रतिपादनपरं । न च द्वितीयब्राह्मणवधे पापस्य गुरुत्वं प्रमाणाभावात् । पञ्चमनुदेवलाभ्यामुक्तं । विधेः प्रा
थमिकादस्माद्द्वितीये द्विगुणं चरेत् । तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निःनिष्कृतिः इति । तदपि प्रतिनिमि

त्तंनैमित्तिकंशास्त्रमावर्त्ततइतिन्यायेनद्वित्रिब्राह्मणवधगोचरंनैमित्तिकाशस्याप्रसनुवादेनचतुर्थेन
द्भावविधिपरेनपुनर्द्वितीयब्रह्मवधप्रायश्चित्तानुष्ठानद्वैगुण्यविधिप रमेव·वाक्यभेदप्रसंगात्·तस्मा
द्वित्रिब्राह्मणवधेपिसकृदेवद्वादशवर्षाद्यनुष्ठानंयुक्तं·यथाग्न्येयेष्टामवतेपुरोडाशमष्टाकपालंनिर्वपेदि
त्यादिगृहदाहादिनिमित्तेषुचोदितानांक्षामवत्यादीनांयुगपदेनकेष्वपिगृहदाहादिनिमित्तेषुसकृदे
वानुष्ठानं·अत्रोच्यते·नहिवचनविरोधीन्यायःप्रवर्त्तते·वचनंविधेःप्राथमिकादिकंद्वित्रिब्राह्मणव
धेप्रायश्चित्तानुष्ठानावृत्तिविधिपरं·एवंसतिन्यायलभ्यंतन्त्रानुष्ठानवाधेनावृत्तिविधायिदंवचनंप्रवृ
त्तिविशेषकरंस्यात्·इतरथाशास्त्रतःप्राप्तानुवादकत्वेनअनर्थकंस्यात्·नचवाक्यभेदः।चतुर्थादिब्र
ह्मवधपर्युदासेनेतरत्रावृत्तिप्रायश्चित्तविधानेनैकार्थत्वात्·किंच·चतुर्थेनास्तिनिष्कृतिरितिलिंग
दर्शनाद्धन्यमानब्राह्मणसंख्योत्कर्षेदोषगौरवमवगम्यते·तथादेवलादिवचनाच्च·यस्त्वादनभिसंधायया

यंकर्मसकृत्कृतं·तस्येयंनिष्कृतिर्दिष्टाधर्मविद्भिर्मनीषिभिरिति·नचविलक्षणयोर्गुरुलघुदोषयोःक्षयसं
त्रेणनिष्पद्यते·अतएवंविधेषुदोषगुरुत्वेनकार्यवैलक्षण्यादृष्टिप्रतिनिमित्तंनैमित्तिकस्यावृत्तियुक्ताक्षा
मवत्यादिषुपुनःकार्यस्यावैलक्षण्याद्युक्तःतंत्रभावइत्यलंप्रपंचेन·यत्त्विदंचतुर्थेनास्तिनिष्कृतिरितितदपि
महापातकविषयं·पापस्यातिगुरुत्वेनप्रायश्चित्ताभावप्रतिपादनपरत्वात्·अतःशूद्रान्नसेवनादौबहुशो
प्यभ्यस्तेतदनुगुणप्रायश्चित्तावृत्तिःकल्पनीया·नपुनःप्रायणगुरुत्वेनप्रायश्चित्ताभावप्रतिपादनपर
त्वात्प्रायश्चित्ताभावःअतएवोक्तंमनुना·इतरेणचानस्यतल्पेतुश्वहृहस्याव्रतंचरेदिति·इदंचद्वादशवार्षिकं
व्रतंसाक्षात्कर्तुरेव·ब्रह्महेतितस्यैवाभिधानात्·अनुग्राहकप्रयोजकादेस्तत्तद्दोषानुसारेणप्रायश्चित्ततारत
म्यंकल्पनीयं·तत्रानुग्राहकोयस्यप्रायश्चित्तभाजंपुरुषमनुगृह्णातितत्प्रायश्चित्तपादोनंकुर्यात्·अतस्तस्य
द्वादशवार्षिकेनववार्षिकं·प्रयोजकस्त्वर्धंनंषड्वार्षिकंकुर्यात्·अनुमंतापुनःसार्धपादंसार्धचतुर्वार्षिकं·

निमित्तीत्वेकुपादंत्रैवार्षिकं॰ अतएवसुमंतुःतिरस्कृतोपद्यविप्रोहत्वात्मानमतोपदि॰ निर्गुणःसहसा
१०३ क्रोधाद्गृहक्षेत्रादिकारणात्॰ त्रैवार्षिकंव्रतंकुर्यात्प्रतिलोमांसरस्वतीं॰ गच्छेद्वापिविशुध्यर्थंतस्यापस्ये
तिनिश्चितं॰ अस्यार्थनिर्गुणोविप्रोह्यसमर्थेनिर्गुणोपदि॰ क्रोधादेम्रियतेयस्तुनिर्निमित्तंतुभर्त्सितःवत्सर
त्रितयंकुर्यान्नरःकृच्छ्रंविशुद्धयेइति॰ यदापुनर्नात्यंतगुणवान् आत्मघातीवात्यंतनिर्गुणस्तदैकव
र्षमेवब्रह्महत्याव्रतंकुर्यात्॰ केशश्मश्रुनखादीनांकृत्वांतुवपनंवने॰ ब्रह्मचर्यंचरन्विप्रोवर्षेणैके
नशुध्यतीतितेनैवोक्तत्वात्॰ अनयैवदृशानुग्राहकप्रयोजकादीनांयेनुग्राहकप्रयोजकादयस्ते
षामपिप्रायश्चित्तकरणंकल्पनीयं॰ अस्यांचकल्पनायांप्रयोजपितानुमंताकर्ताचेतिस्वर्गनरकफ राम॰
लेषुकर्मसुभागिनोयोभूय आरभतेतस्मिन्फलविशेषइत्यापस्तंबीयंवचनंमूलं॰ तथाप्रोग्रा १०३
हकादीनामपिदंडप्रायश्चित्तंकल्प्यं॰ यथाहपैठीनसिःहंतामंतोपदेष्टाचतथासंप्रतिपादकःप्रो

त्साहकःसहायश्चतथामार्गानुदेशकः आश्रयःशस्त्रदाताचभक्तदाताविकर्मिणां॰ उपेक्षकःशक्तिमां
श्चदोषवक्तानुमोदकः अकार्यकारिणस्तेषांप्रायश्चित्तंप्रकल्पयेत्॰ यथाशक्त्यानुरूपंचदंडंचैषांप्रकल्प
येदिति॰ तथाबालवृद्धादीनांसाक्षात्कर्तृत्वेप्यर्धमेव॰ अशीतिर्यस्यवर्षाणिबालोवाप्यूनषोडशः प्रायश्चित्ता
र्द्धमर्हंतिस्त्रियोरोगिणएवचेत्यंगिरःस्मरणात्॰ तथा॰ अर्वाक्द्वादशतवर्षाद्दशातेरूर्ध्वमेववा॰ अर्द्धमेवभ
वेत्पुंसांतुरियंतत्रयोषितामिति॰ तथानुपनीतस्यापिबालकस्यपादमात्रमेवप्रायश्चित्तः स्त्रीणामर्द्धंप्रदा
तव्यंवृद्धानांरोगिणांतथा॰ पादोबालेषुदातव्यःसर्वपापेष्वयंविधिरितिविष्णुस्मरणात्॰ अतश्चयच्छंखेनाप्यु
क्तेकादशवर्षस्यपंचवर्षान्यरस्यच॰ प्रायश्चित्तंचरेद्भ्रातापितावान्यःसुहृज्जनइतिप्रतिपादितं॰ अतोबाल
तरस्यास्यनापराधोनपातकं॰ राजदंडोनतस्यास्तिप्रायश्चित्तंनविद्यतइतितदपिसंपूर्णप्रायश्चित्ताभावप्र
तिपादनपरं॰ आश्रमविशेषेनेरपेक्षेणश्रूयमाणेषुब्राह्मणोनहंतव्यःतस्माद्ब्राह्मणराजन्यौवैश्यश्चनसुरांपि

वेदिसेवमादिष्वनपेक्षितवमोविशेषस्यैवाधिकारात्· अतस्तदीयमपिप्रायश्चित्तंपित्रादिभिरेवाचरणीयंपु
१०४ त्रानुसाधसंस्कृसवेदमध्याप्यहन्निंविदध्यादितितस्यैवपुत्रहिताचरणेधिकृतत्वात्· यत्रपुनरन्तःकस्मिंश्चि
द्वत्ववधेप्रयोजकभावमापन्नस्यान्यस्मिन्साक्षात्कर्तृत्वेगुरुलघुप्रायश्चित्तसंनिपातस्तत्रद्वादशवार्षिका
दिगुरुप्रायश्चित्तांतःपातिनः प्रयोजकसंबंधिलघुप्रायश्चित्तस्यप्रसंगात्कार्यसिद्धिः नचैवंसत्यविशेषा
ल्लघुकल्पेनमहतोपिसिद्धिःस्यादित्याशंकनीयं· अलघ्वंतःपातितपानुष्ठानेविशेषानवगमात्प्रसंगात्का
र्यसिद्धिरुच्यते· नचलघ्वंतःपातोमहानकल्पइतिकुतःप्रसंगाशंका· नचचैत्रवधजनितकल्मषक्षयार्थ
मनुष्ठितेनकथंविष्णुमित्रवधोत्थाघपापनिर्हृतिरिति॥चैत्राघक्षदेशस्यास्वातंत्र्यात्· अतोयथाकाम्यनियो
गनिष्पत्त्यर्थंस्वर्गार्थंवानुष्ठितैराग्नेयादिभिर्नित्यनियोगनिष्पत्तिस्तद्वल्लघुप्रायश्चित्तस्यापिकार्यसिद्धिःयत्तु राम०
नमध्यमांगिरोवचनं· गवांसहस्रंविधिवत्पात्रेभ्यःप्रतिपादयेत्· ब्रह्महाविप्रमुच्येतसर्वपापेभ्यएवचेति· १०४

तसवनस्थगुणवत्ब्राह्मणविषयं· एतच्चद्विगुणंसवनस्थेतुब्राह्मणेव्रतमादिदिसेतद्वाक्यविहितद्विगुणद्वाद
शवार्षिकव्रतचर्याशक्तस्यवेदितव्यं· प्रायश्चित्तस्यातिगुरुत्वात्· नत्वनाहितद्वादशवार्षिकविषयं· तत्रहिद्वा
दशद्वादशादिनान्येकैकंप्राजापत्यमितिगणनायांप्राजापत्यानांषष्ट्यधिकंशतत्रयंभवति· यद्यपिप्राजापत्य
स्यांतेत्र्यहंउपवासोधिकस्तथाप्यत्रवनवासजटाधारणवन्याहारत्वादितयोविशेषयुक्तत्वादुपवासाभावेप्येकैक
स्यद्वादशाहस्यप्राजापत्यतुल्यत्वंततश्चप्राजापत्यक्रियाशक्तौधेनुंदद्यादितिवचनात्गवासमोवद्गातव्यंतन्मू
ल्यंवानसंशयइत्यनेनन्यायेनप्रतिप्राजापत्यमेकैकस्यांधेन्वांदीयमानायांधेनूनामपिषष्ट्यधिकंशतत्रयं
भवति· नपुनःसहस्रं· अतोयथोक्तएवविषयोयुक्तः· यदपिशंखवचनं· समाप्यद्वादशसंवत्सरान्षड्वीन्सा
ईसवत्सरंचव्रतान्याददिशेत्तेषामंतेगोसहस्रंतस्यार्धंतस्यार्धमर्धंचदद्यात्सर्वेषांवर्णानामानुपूर्व्येणेतिद्वादश
वार्षिकगोसहस्रयोःसमुच्चयविधिपरंतदाचार्यादिहननविषयंद्रष्टव्यं· तस्यातिगुरुत्वात्· तथाचदक्षःस

ममब्राह्मणेदानं द्विगुणं ब्राह्मणब्रुवे। आचार्ये शतसाहस्रं सोदर्ये त्वनमक्षयमिति प्रतिपादितोक्तत्वात्॥ सम द्विगुण
१०५ साहस्रमानंत्यं च यथाक्रमं॥ दाने फलविशेषः स्याद्धिंसायां तद्वदेव ही ति। तथापस्तंबेन द्वादशवार्षिकमुक्तोक्त
मस्मिन्नेव विषये। गुरुं हत्वा श्रोत्रियं वा एतदेव व्रतमो मरणान्तमा दुच्छ्वासाच्चरेदिति। तत्र यावज्जीवमावर्त्यमाने
व्रते यदात्रैगुण्यं चातुर्गुण्यं वा संभाव्यते न दातचासमर्थस्य वह धनस्यायं क्षाननयसोः समुच्चयो द्रष्टव्यः द्वा
दशवार्षिकव्यतिरिक्तानां तु सुमंतुपराशराद्युक्तानां प्रायश्चित्तानामुत्तरत्र व्यवस्थां वक्ष्यामः। ननु च द्वादश
वार्षिकादिकल्पानां व्यवस्था कुतोवसिता। न तावद्द्वादशवार्षिकविधायकवाक्यैरिति युक्तं। तत्राप्रतीतेः। न
च वाच्यं। प्रमाणावगतगुरुलघुकल्पानां धीबीमाप्रसाक्षीदिति व्यवस्था कल्प्यत इति। विकल्पसमुच्चयां
गांगिभावानामन्यतमाश्रयणेनापि बाधस्य सुपरिहरत्वात्। अत्रोच्यते। न तावत् द्वादशवार्षिकं। सत्तुर राम०
शंनादीनां विषमकल्पानां विकल्प्यते। विकल्पाश्रयणे गुरुकल्पानामनुष्ठानासंभवेनानर्थक्यप्रसंगात्। न च १०५

षोडशिग्रहणाग्रहणवद्विषमयोरपि कल्प्योपपत्तिरिति वाच्यं। यस्तत्रापि सति संभवे ग्रहणमेवेति युक्तं कल्पयितुं।
यद्वा षोडशिग्रहणानुगृहीतेनातिरात्रेण क्षिप्रं स्वर्गादिसिद्धिरिस्मातिशयितस्य वा स्वर्गस्येति कल्पनीयं। इतरथा
ग्रहणविधेरानर्थक्यप्रसंगात्। नापि समुच्चयः उपदेशातिदेशप्राप्तिमंतरेण समुच्चयो न संभवति उपदेशावग
तनैरपेक्ष्यस्य बाधप्रसंगात्। न चांगांगिभावः क्रत्वादिविनियोक्तृणामभावात्। अतः परस्परोपमर्दपरिहारा
र्थं विषयव्यवस्थाकल्पनेनैवोचिता। सा च जातिशक्तिगुणाद्यपेक्षया कल्पनीया। जातिशक्तिगुणापेक्षं सकृद्बुद्धिपू
र्वं तया। अनुबंधादि विज्ञाय प्रायश्चित्तं प्रकल्पयेत्। इति देवलस्मरणात्। पूर्वोक्तस्य ब्रह्महत्याप्रायश्चित्तस्यानै
मित्तिकं समास्य वधिमाह। ब्राह्मणस्य परित्राणाद्गवां द्वादशकस्य वा। तथाश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुया
त्। यश्चौरव्याघ्रादिभिर्व्यापाद्यमानस्य ब्राह्मणस्यैकस्याप्यात्मप्राणानंतरे कृत्वा प्राणत्राणं करोति गवां द्वादशक
स्यासावसंपूर्णेपि द्वादशवार्षिके शुध्येत्। यद्यपि प्राणत्राणे प्रवृत्तस्तद कृत्वैव म्रियते तथापि शुध्यत्येव। अत

DR BHAU DAJI MEMORIAL

एवमनुना·ब्राह्मणार्थेगवार्थेवासद्यःप्राणान्परित्यजेत्·मुच्यतेब्रह्महत्यायागोप्तागोर्ब्राह्मणस्यचेति·ब्राह्मणरक्ष
२०६ णांतरर्थंमरणंचपृथग्गुणात्तं·तथापरकीयाश्वमेधस्यावभृथाख्यकर्मांगभूतस्नानसमयेस्वयमपिस्नात्वाब्रह्महत्या
याःशुद्धिमाप्नुयात्·स्नानंचस्वकल्मषंविख्याप्यकुर्यात्·तथाचमनुः·शिष्ट्वावाभूमिदेवानांनरदेवसमागमे·
स्वमेनोवभृथेस्नात्वाहयमेधेविमुच्यतेति।भूमिदेवाब्राह्मणाऋत्विजस्तेषांनरदेवेनराज्ञायजमानेनसमवाये
स्वीयमेनःशिष्ट्वाविख्याप्याश्वमेधावभृथेस्नात्वाशुध्येत्·यदितैरनुज्ञातोभवति·अश्वमेधावभृथंगत्वातैरनुज्ञा
तःस्नातःसद्यःपूतोभवतीतिशंखस्मरणात्·अश्वमेधावभृथग्रहणमग्निष्टुन्मध्यानांपंचदशरात्रादिक्रत्वंत
राणामग्निष्टुत्समाधिकानांवासर्वमेधादीनांउपलक्षणं·अश्वमेधावभृथेवान्ययज्ञेप्यग्निष्टुदंतश्चेदितिगौतम राम०
स्मरणात्·अयंचप्रक्रांतद्वादशवार्षिकस्यकथंचिद्ब्राह्मणपरित्राणादिकंकुर्वतोव्रतसमाप्त्यवधिरुच्यते·य १०६
थासारस्वतेसत्रेप्लाक्षंप्रस्रवणंप्राप्योत्थानमृषभैकशतानांगवांसहस्रभावेसर्वस्वज्यान्यांगृहपतिमर

णेवेतिनपुनःस्वतंत्रंप्रायश्चित्तांतरं·तथाचशंखः·द्वादशेवर्षेशुद्धिंप्राप्नोत्यंतरावाब्राह्मणंमोचयित्वागवां
वाद्वादशानांपरित्राणात्प्राप्यवाश्वमेधावभृथस्नानाद्वापूतोभवतीति·अतएवमनुना·कृतवापनोवानिवसे
दितिद्वादशवार्षिकस्यगुणविधिंप्रक्रम्यब्राह्मणार्थेगवार्थेवासद्यःप्राणान्परित्यजेत्·मुच्यतेब्रह्महत्यायागो
प्तागोर्ब्राह्मणस्यचइत्यादिनामध्येब्राह्मणत्राणादिकमभिधायएवंदृढव्रतोनित्यंब्रह्मचारीसमाहितःसमाप्ते
द्वादशेवर्षेब्रह्महत्यांव्यपोहतीतिद्वादशवार्षिकमेवोपसंहृतं·ननुचब्रह्महत्यायाःशुद्धिमवाप्नुयादितिब्रा
ह्मणत्राणादीनांद्वादशवार्षिकेणसहैकफलत्वावगमात्स्वातंत्र्यमेवयुक्तंनपुनरंगत्वं·किंच·प्रधानविरोधित्वा
दपिनांगत्वं·प्रधानानुग्राहकंह्यंगंभवति·नचप्रारब्धद्वादशवार्षिकस्येदंविधानंयेनतत्कार्येविधानंगम्यते·य
थासत्रयागविश्वजितायजेतेतिसत्रप्रयोगप्रवृत्तस्यतत्सरिसमापनाक्षमस्यविश्वजिद्विधानमतोपिस्वातंत्र्य
मेवयुक्तं·यथाग्निप्रवेशलक्षणभावादीनां·नचतेषामपिद्वादशवार्षिकोपक्रमोपसंहारमध्यपठितत्वेनत

१०७ दंगत्वमिति शंकनीयं· यतः सत्यपि मध्यपाठे निर्ज्ञातप्रयोजनत्वेन प्रयोजनाकांक्षाविरहान्न परस्परमंगांगि
त्वमुक्तं· यथा सामिधेनीप्रकरणमध्यवर्त्तिनास्य विविसदानमग्निसमिंधनप्रकाशकत्वेन सामिधेनीभिः
सहैककार्याणां न सामिधेन्यंगत्वं· न चैकांततोप्यग्निप्रवेशादीनां द्वादशवार्षिकमध्ये पाठः वशिष्ठगौतमा
दिभिरेषां द्वादशवार्षिकप्रक्रमात्प्रागेव पठित्वात्· इदमेव च स्वातंत्र्येण प्रकटितं मनुना· लक्ष्यं शस्त्रभृतां वा
स्यात्प्रास्येदात्मानमग्नौ वेति प्रतिवाक्यं वाशब्दः पठितः तथा प्रतिप्रायश्चित्तमेवोपसंहृतं· अतोन्यतममास्था
य विधिं विप्रः समाहितः ब्रह्महत्याकृतं पापं व्यपोहत्यात्मवित्तयेति अतोग्निप्रवेशादीनां स्वातंत्र्यमेव युक्तं· अ
न्यच्च ब्राह्मणत्राणादिरप्येकफलत्वान्नांगत्वमिति· उच्यते· परिहृतमेतदंतरा ब्राह्मणं मोचयित्वेत्यादिनां शंख
वचनेनांगत्वावगमात्· अंगस्यैव सतः प्रधानद्वारेण फलसंबंधः न च प्रधानविरोधः यतो ब्राह्मणत्राण रा म०
वधिकस्यैव व्रतानुष्ठानस्य फलसाधनत्वं विधीयत इति न विरोधः किंच· दीर्घतीव्रा मयग्रस्तं ब्राह्मणं गाम १०७

थापि वा· दृष्ट्वा पथि निरातंकं कृत्वा ब्रह्महाशुचिः दीर्घेण बहुकालव्यापिना तीव्रेण दुःसहेनामयेन कुष्ठादि
व्याधिनाग्रस्तं पीडितं ब्राह्मणं गां वा तथाविधां पथि दृष्ट्वा निरातंकां नीरुजं कृत्वा ब्रह्महाशुचिर्भवति· ननु ब्राह्म
णस्य परित्राणादिसत्र यदुक्तं ब्राह्मणरक्षणं तदेव किमर्थं पुनरुच्यते· ब्राह्मणं गामथापि वेति· सत्यमेव· किंत्वा
त्मप्राणपरित्यागेनाधस्तनवाक्ये ब्राह्मणरक्षणमुक्तं· अधुना पुनरौषधदानादिनेति विशेषः अमुनैवाभिप्रा
येणोक्तं मनुना· विप्रस्य तन्निमित्ते वा प्राणलाभे विमुच्यत इति· किंच· आनीय विप्रसर्वस्वं हृतं घातितमेव वा· मृतोवा
तन्निमित्तं हृतः शस्त्रैर्जीवन्नपि विशुध्यति· विप्रस्यापहृतसर्वस्वतयावसीदतः संबंधि द्रव्यं भूहिरण्यादिकं चौ
रैर्हृतं साकल्येनानीय रक्षणं यः करोति स विशुध्यति· आनयने प्रवृत्तः स्वयं चौरैर्घातितितोवा यदि वा तन्निमि
त्तं ब्राह्मणसर्वस्वानयनार्थं तत्र युध्यमानः शस्त्रैः क्षतो मृतकल्पो जीवन्नपि विशुध्यति· शस्त्रैरिति बहुवचनं क्षत
बहुत्वमात्रार्थं· अत एव मनुना· अवरं त्रिर्निरोद्धा वा सर्वस्वमवजित्य वेति त्र्यवरग्रहणं कृतं· एतस्य श्लोकद्वयोक्त

१०८ कल्पयं च कस्यब्राह्मणरक्षणरूपत्वेनांतरा वा ब्राह्मणं मोचयित्वेत्यनेन यां स्ववचनेन शंसक्रोडीकृतत्वात् द्वादश
वार्षिकसमासवधित्वेन विनियोगान्तत्वात्तं ॥ ॥प्रायश्चित्तांतरमाह॰ लोमभ्यः स्वाहेत्येवं हि लोमप्रभृति त
वैतनुं॰ मज्जांतं जुहुयाद्वापि मंत्रैरेभिर्यथाक्रमं॰ लोमभ्यः स्वाहेत्येवमादिभिर्मंत्रैर्लोमप्रभृति लोमप्रभृति वै
तनुं मज्जांतां तनुं जुहुयात् इति शब्दः करणत्वनिर्देशार्थः एवं शब्दः प्रकारसूचनार्थः हि शब्दः स्पष्टतरप्र
सिद्धत्वांगादीनां प्रभृतिशब्देनाक्षिप्यमाणानां द्योतनार्थः ततश्च लोमादीनि होमद्रव्याणि चतुर्थ्यंतानि निर्दि
श्यंते॰ स्वाहाकारं पठित्वा तैर्मंत्रैर्जुहुयात्॰ तेन हूयमानद्रव्याणां लोमत्वग्लोहितमांसमेदःस्नाय्वस्थिमज्जा
नामष्टसंख्यत्वादष्टौ मंत्रा भवंति॰ तथा च वशिष्ठः कृत्वाग्निमुपसमाधाय जुहुयाल्लोमानि मृत्योर्जुहोमि लो
मभिर्मृत्युं वाशय इति प्रथमां त्वचं मृत्योर्जुहोमि त्वचा मृत्युं वाशय इति द्वितीयां लोहितं मृत्योर्जुहोमि लोहित रा०भ०
न मृत्युं वाशय इति तृतीयां मांसानि मृत्योर्जुं॰ मांसैर्मृत्युं वाशय इति चतुर्थं मेदो मृत्योर्जुहोमि मेदसा मृत्युं वा १०८

शय इति पंचमीं॰ स्नायूनि मृत्योर्जुहोमि स्नायुभिर्मृत्युं वाशय इति षष्ठीं॰ अस्थीनि मृत्योर्जुहोमि अस्थिभिर्मृत्युं वा
शय इति सप्तमी॰ मज्जां मृत्योर्जुहोमि मज्जाभिर्मृत्युं वाशय इति अष्टमी॰ अत्र च लोमप्रभृति वै तनुं जुहुयादिति
लोमादीनां होमद्रव्यत्वावगमाल्लोमभ्यः स्वाहेति सत्यपि चतुर्थीनिर्देशे लोमादीनां न देवतात्वं कल्प्यते॰ द्रव्यप्रश
नवेन मंत्राणां होमसाधनत्वोपपत्तेः। किंतु लोमभिर्मृत्युं वाशय इत्यादि वाशिष्ठमंत्रपर्यालोचनया मृत्योरेव हविः
संबंधावगमाद्देवतात्वं कल्प्यते॰ अतश्च लोमादीनि सामर्थ्यात्स्वधितिना वदायमन्यस्य देशेनाष्टौ होमान्कृत्वांते
तैस्तनुं प्रक्षिपेत्ततो यत्कैश्चिदुक्तं॰ अनादिष्टद्रव्यत्वादाज्यहविष्को होम इति तदनिरस्त्यैवोक्तमित्युपेक्षणीयं॰
जुहुयादित्येतेनाग्नौ सिद्धे कृत्वाग्निमुपसमाधायेति पुनरग्निग्रहणं लौकिकाग्निप्राप्त्यर्थं॰ युक्तं चैतत्॰
पतितानामग्नीनां प्रतिपत्तिविधानात्॰ आहिताग्निस्तु यो विप्रो महापातकवान्भवेत्॰ प्रायश्चित्तैर्न शुध्येत तद
ग्नीनां तु का गतिः॰ वैतानं प्रक्षिपेत्तोये शालाग्निं शमयेद्बुध इत्युशनःस्मरणात्॰ तथा॰ महापातकसंयुक्तो

१०९ दैवाद्यस्याग्निमान्यादि॰ पुत्रादिः पालयेदग्नीनयुक्तश्चादोषसंक्षयात्॰ प्रायश्चित्तं न कुर्याद्यश्चरन्वाग्निपते
यदि॰ गृह्याग्निर्वापयेच्छ्रौतं॰ अग्न्यस्य मपरिछन्नमिति कात्यायनस्मरणात्॰ तनुपक्षे पश्चोत्साद्योत्थाय त्रिरधो
मुखेन कर्तव्यः यथाह मनुः प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिरा इति॰ गौतमेनाप्यत्र विशेषो दर्शितः
प्रायश्चित्तमग्नौ सक्तिर्ब्रह्मघ्नस्त्रिरवच्छातस्येति अवच्छातस्य अनशनकर्शितकलेवरस्येत्यर्थः॥ तथा चका
टकश्रुतिः॥ अनशनेन कर्शितोऽग्निमारोहेदिति॥ इदं च मरणान्तिकप्रायश्चित्तं कामकारविषयं॥ यथाह
मध्यमाङ्गिराः॥ प्राणान्तिकं च यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः॥ तत्कामकारविषयं विज्ञेयं नात्र संशय इति
॥ तथा॥ यः कामतो महापापं नरः कुर्यात्कथंचन॥ न तस्य शुद्धिर्निर्दिष्टा भृग्वग्निपतनादृत इति॥ एतच्च प्राय
श्चित्तं सततत्रमवनब्राह्मणत्राणादिवत् द्वादशवार्षिकान्तर्भूतमित्यर्क्कं प्राक्॥ किंच॥ संग्रामे वा हतो लक्ष्यभूतः राम॰
शुद्धिमवाप्नुयात्॥ मृतकल्पः प्रहारार्त्तो जीवन्नपि विशुध्यति॥ अथ वा संग्रामे युद्धभूमावुभयबलप्रेरितश १०९

रसंधानस्थाने लक्ष्यभूतो मृतः शुद्धिमवाप्नुयात्॥ गाढमर्मजनितप्रहारतीव्रवेदनो मृतकल्पो मूर्छितोऽजी
वन्नपि विशुध्यति॥ लक्ष्यभावश्च प्रायश्चित्ती अयमस्मीति सर्वविदुषां धनुर्विद्याविदां संग्रामे स्वेच्छया कर्त्तव्यो न तु
राज्ञा बलात्कारयितव्यः॥ यथाह मनुः॥ लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मन इति॥ इदं च मरणान्तिकत्वात्
साक्षात्कर्तुः क्षत्रियस्य कामकारविषयं॥ अपिशब्दादश्वमेधादिनापि शुध्यति॥ यथाह मनुः॥ यजेत वाश्वमेधे
न स्वर्जिता गोसवेन वा॥ अभिजिद्विश्वजिद्भ्यां च त्रिवृताग्निष्टुतापि वा इति॥ अश्वमेधानुष्ठानं च सार्वभौमक्षत्रि
यस्यैव॥ यजेत वाश्वमेधेन क्षत्रियस्तु महीपतिरिति पराशरस्मरणात्॥ नासार्वभौमो यजेतेति सार्वभौमस्य प्र
तिषेधदर्शनाच्च॥ इदं चाश्वमेधानुष्ठानं सार्वभौमस्य कामकारकृते मरणान्तिकस्थाने द्रष्टव्यं॥ महापातककर्ता
रश्च ताशेमतिपूर्वकं॥ अग्निं प्रविश्य शुध्यन्तीति स्थित्वा वा महति क्रतौ वितिपमेन मरणफलाग्निप्रवेशतुल्यत्वान्महा
क्रतोरश्वमेधस्य निर्दिष्टत्वात्॥ स्वर्जिता दयाश्वत्रैवर्णिकस्याहिताग्नेरिति प्रथमयज्ञस्य द्वादशवार्षिकेणस

हविःकल्प्यते॥नचस्वर्जिताग्न्यर्थमाधानंप्रथमयज्ञानुष्ठानंवाकार्यंपतितस्यद्विजातिकर्मस्वनधिकारान्नचैवंस
११० ध्योपासनवदविरोधइतियुक्तं॥आधानादेरुत्तरक्रतुशेषत्वाभावात्॥तेचदक्षिणान्यूनाधिक्याभ्युपगमेनद
दशवार्षिकषाड्वार्षिकत्रैवार्षिकादिषुसाक्षाद्व्रात्यादिषुव्यवस्थापनीयाः॥किंच॥अरण्येनियतोजप्त्वात्रि
र्वैवेदस्यसंहितां॥शुध्यतेवामिताशीत्वाप्रतिस्रोतःसरस्वतीं॥अरण्येनिर्जनप्रदेशेनियतोनियताहा
रः॥जप्त्वेद्वानियताहारइतिमनुस्मरणात्॥त्रिवारमंत्रब्राह्मणात्मकंवेदंजपित्वाशुध्यति॥संहिताग्रहण
पदक्रमव्युदासार्थं॥यद्वामिताशनोभूत्वाप्लक्षप्रस्रवणादारभ्यपश्चिमोदधेःप्रतिस्रोतः।स्रोतःप्रतिस
रस्वतीमित्वागत्वाशुध्यति॥अशनंचहविष्येणकार्यंहविष्यभुग्वानुचरेत्प्रतिस्रोतःसरस्वतीमितिमनुस्म
रणात्॥अयंचवेदजपोविदुषोहंतुर्निर्धनस्याप्यंतगुणवतोनिर्गुणव्यापादनेप्रमादकृतेद्रष्टव्यःसरस्वती ग.मं. ११०
गमनंतुतादृशएवविषयेविद्याविरहिणोद्रष्टव्यंनिमित्तिनश्चतिरस्कृतोयदाविप्रोनिर्गुणोऽप्रमतेयदितिसुमं

Dr. BHAU DAJI MEMORIAL

तुवचनस्यदर्शितत्वात्॥मनुवचनंजपित्वान्यतमंवेदंयोजनानांशतंव्रजेत्तरतितदथर्मेनियतोजप्नेसस्यैववि
षयेऽशक्तस्यद्रष्टव्यं॥किंच॥पात्रेधनंवापर्याप्तंदत्वाशुद्धिमवाप्नुयात्॥आरात्तुश्चविशुद्ध्यर्थमिष्टिर्वैश्वानरी
स्मृता॥नविद्ययाकेवलयेत्युक्तलक्षणेपात्रेगोभूहिरण्यादिकंजीवनायपर्याप्तंसमर्थंधनंदत्वाशुद्धिमवाप्नु
यात्॥तद्धनंयःप्रतिगृह्णातितस्यवैश्वानरदेवस्येष्टिःशुद्ध्यर्थंकर्तव्या॥एतच्चाहिताग्निविषयं॥अनाहिताग्ने
स्तुदेवसश्चरुर्भवति॥यएवाहिताग्नेर्धर्मःसएवौपासनिकस्येतिगृह्यकारवचनात्॥वाशब्दात्सर्वस्वंसपरिच्छ
दंवागृहंदद्यात्॥यथाहमनुः॥सर्वस्वंवावेदविदेब्राह्मणायोपपादयेत्॥धनंवाजीवनायालंगृहंवासपरि
च्छेदमिति॥इदंचपात्रेधनदानंनिर्गुणस्यधनवतोहंतुर्निर्गुणव्यापादनेद्रष्टव्यं॥तत्रविषयेअविद्यमानान्वय
स्यसर्वस्वदानंनिर्गुणव्यापादनेद्रष्टव्यं॥सान्वयस्यतुसोपस्करगृहदानमितिव्यवस्था॥यदपिपराशरेणो
क्तं॥चतुर्विधोपपन्नस्तुविधिवद्ब्रह्मघातके॥समुद्रसेतुगमनंप्रायश्चित्तंविनिर्दिशेत्॥सेतुबंधपथेभि

क्षांवातुर्वर्णांत्समाहरेत्॥वर्जयित्वाविकर्मस्थान्छत्रोपानद्विवर्जितः॥अंहद्दःकृतकर्मावैमहापातकः
१११ कारकः॥गृहद्वारेषुतिष्ठामिभिक्षास्थान्थाब्रह्मघातकः॥गोकुलेषुचगोष्ठेषुग्रामेषुनगरेषुच॥तपो
वनेषुतीर्थेषुनदीप्रस्रवणेषुच॥एतेषुख्यापयन्नेनःपुण्यंगत्वातुसागरं॥ब्रह्महाविप्रमुच्येतस्नात्वात
स्मिन्महोदधौ॥ततःप्रतोगृहंप्राप्यकृत्वाब्राह्मणभोजनंदत्त्वावस्त्रंपवित्राणिपूतात्माप्रविशेद्गृहंगवांवापिशं
तंदद्याच्चातुर्विद्यायदक्षिणां॥एवंशुद्धिमवाप्नोतिचातुर्विद्यानुमोदितइति॥तदपिपात्रेधनंवापर्याप्तमिस
नेनसमानविषयं॥यत्तुमंतुवचनं॥ब्रह्महासंवत्सरंकृच्छ्रंचरेदधःशायीत्रिषवणीकर्मावेदकोभैक्षाहारोदि
व्यनदीपुलिनसंगमाश्रमगोष्ठपर्वतप्रस्रवणतपोवनविहारीस्यात्॥स्थानवीरासनीसंवत्सरेपूर्णेहिर
ण्यमणिगोधान्यतिलभूमिसर्पींषिब्राह्मणेभ्योदद्यत्पूतोभवतीतितदपिहंतुर्मूर्खस्यधनलोजातिमात्रया राम॰
पादनेद्रष्टव्यं॥यत्तुनर्वसिष्ठवचनं॥द्वादशरात्रंमंबुभक्षोद्वादशरात्रमुपवसेदितितन्मनसाध्यवसित १११

ब्रह्महस्यस्यस्वतएवोपरतजिघांसस्यवेदितव्यं॥यत्पुनःषंढंतुब्राह्मणंहत्वाशूद्रहत्याव्रतंचरेत्॥चांद्रायणं
वाकुर्वीतपराकद्वयमेववेतिषट्त्रिंशन्मतवचनंतदप्रसानेपपुंस्त्वस्यसप्रसयवधेद्रष्टव्यं॥अत्रैवविषयेअ
प्रसयवधेबृहस्पतिराह॥अरुणायाःसरस्वत्याःसरस्वत्याःसंगमेलोकविश्रुतेशुध्येत्रिषवणस्नायीत्रि
रात्रोपोषितोद्विजः॥एवमन्यान्यपिस्मृतिवचनान्यन्विष्यविषमाणांव्यवस्थासमानांतुविकल्पः॥एतानिचद्वा
दशवार्षिकादिधनदानपर्यंतानिब्राह्मणस्यैव॥क्षत्रियादेस्तुद्विगुणादिकं॥यथाहांगिराः॥पर्षद्याब्राह्मणा
नांतुसाराज्ञांद्विगुणामता॥वैश्यानांत्रिगुणाप्रोक्तापर्षद्वच्चव्रतंस्मृतमिति॥एवंचब्राह्मणानांचयेनहंतृहा
स्यमानगुणविशेषेणप्रायश्चित्तविशेषोव्यवस्थितःसएवतद्गुणविशिष्टेक्षत्रियादौहंतरिद्विगुणस्त्रिगु
णोवेदितव्यः॥अनयैवदिशाक्षत्रियवैश्यादावपिहीनेनोत्कृष्टवधेदोषगौरवात्प्रायश्चित्तस्यापिद्विगुणपादिक
ल्पनीयं॥दोषगौरवंचदंडगौरवादवगम्यते॥यथोक्तंप्रतिलोमापवादेषुद्विगुणास्त्रिगुणादमः॥वर्णानामानुलो

११२ म्पेच तस्मादर्द्धार्द्धहानिरिति॥ यत्तु चतुर्विंशतिमतवचनं॥ प्रायश्चित्तं यदाम्नातं ब्राह्मणस्य महर्षिभिः॥ पादो
नक्षत्रियः कुर्यात् अर्द्धं वैश्यः समाचरेत्॥ शूद्रः समाचरेत्पादमशेषेष्वपि पाप्मसु इति तत्प्रातिलोम्यानुष्ठित
चतुर्विधसाहसव्यतिरिक्तविषयं॥ तथा मूर्द्धावसिक्तादीनामथानुलोमोत्पन्नानां दंडवत्प्रायश्चित्तमूहनीयं
॥ दर्शितं च दंडतारतम्यं॥ दंडप्रणयनं कार्यं वर्णजात्युत्तराधरैरिति॥ ततश्च मूर्द्धावसिक्तस्य ब्राह्मणवधे ब्राह्म
णादतिरिक्तं क्षत्रियान्न्यूनमर्धे द्वादशवार्षिकं भवति॥ अनयैव दिशा प्रतिलोमोत्पन्नानामपि प्रायश्चि
त्तं गौरवमूहनीयं॥ तथाश्रमिणामप्यंगिरसा विशेषो दर्शितः॥ गृहस्थोक्तानि पापानि कुर्वंत्याश्रमिणो यदि
॥ शौचवच्छोधनं कुर्युरर्वाग्ब्राह्मनिदर्शनादिति॥ शौचवदिति एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां त्रिगु
णं तु वनस्थानां यतीनां च चतुर्गुणमिति वचनात् यथा ब्रह्मचार्यादीनां शौचं द्विगुणादिक्रमेण वर्द्धते तथा शो राम०
धनं प्रायश्चित्तमपि भवतीत्यर्थः॥ ब्रह्मचारिणस्तु प्रायश्चित्तं द्विगुणं षोडशवर्षादूर्द्धमेव॥ अर्वाक्पुनर्बालो ११२

वा पुनः षोडशः प्रायश्चित्तार्द्धमर्हतीति षोडशवर्षादर्वाचीनस्यार्द्धप्रायश्चित्ताभिधानात्॥ न च द्वादशवार्षिकेच
तुर्गुले क्रियमाणे मध्ये विपत्तिशंकया समाप्त्यनुपपत्तेः प्रवृत्तिरेव नोपपद्यत इति शंकनीयं इति॥ यतः प्रक्रां
तप्रायश्चित्तस्य मध्ये विपन्नावपि पापक्षयो भवत्येव॥ यथाह हारीतः॥ प्रायश्चित्ते व्यवसिते कर्त्ता यदि विपद्यते
इति॥ पूतस्तदहरेवासाविहलोके परत्र चेति॥ व्यासोप्याह॥ धर्मार्थं यतमानस्तु न चेच्छक्नोति मानवः॥
प्राप्तो भवति तत्पुण्यमत्र मे नास्ति संशय इति॥ अथ नानानिमित्तांतरेषु ब्रह्महत्याप्रायश्चित्तस्यातिदेशमा
ह॥ यागस्थक्षत्रविद्घाती चरेद्ब्रह्महणि व्रतं॥ गर्भहा च यथावर्णं तथात्रेयीनिषूदकः॥ दीक्षणीयाद्युदवस
नीयांपर्यंते सोमयागप्रयोगे वर्त्तमानौ क्षत्रियवैश्यौ यो व्यापादयति स ब्रह्महणि पुरुषे यद्व्रतमुपदिष्टं द्वा
दशवार्षिकादि तच्चरेत्॥ यद्यपि यागशब्दः सामान्यवचनस्तथात्र सोमयागमभिधत्ते॥ सवनगतौ राजन्य
वैश्याविति वासिष्ठे सवनत्रयसंपाद्यसोमयागस्यैव निर्दिष्टत्वात्॥ अत्र च गुरुलघुभूतानां द्वादशवार्षिका

१९३ द्विजस्महत्याव्रतानांजातिशक्तिगुणाद्यपेक्षयाप्राग्वद्यवस्थावेदितव्या॥एवंगर्भवधादिष्वपिमरणांतिकं
तुजातिदिश्यतेव्रतग्रहणात्॥अतःकामतोयागस्थक्षत्रियादिवधेव्रतस्यैवद्वैगुण्यं॥तच्चव्रतंसंवत्सरमे
वकर्तव्यं॥पूर्वयोर्वर्णयोर्वेदाध्यायिनंहत्वेतिप्रक्रम्यापस्तंबेनद्वादशवार्षिकाभिधानात्॥गर्भेचविज्ञा
सुसंभृतंहत्वायथावर्णं।यद्वर्णपुरुषवधेयत्प्रायश्चित्तमुक्तंतद्वर्णगर्भवधेतच्चरेत्॥एतच्चानुपजात
स्त्रीपुंनपुंसकव्यंजनगर्भविषयांहत्वागर्भमविज्ञातमितिमानवेविशेषदर्शनात्॥अत्रचयद्यपिब्राह्मण
गर्भस्यब्राह्मणत्वादेवतद्वधनिमित्तव्रतप्राप्तिस्तथापिस्त्रीत्वस्यापिसंभवात्स्त्रीशूद्रविट्क्षत्रवधइत्यु
पपातकत्वेनतत्प्रायश्चित्तप्राप्तिरपिस्यादतःस्त्रीपुंनपुंसकत्वेनवीज्ञातेपिब्राह्मणगर्भत्वमात्र प्रयुक्तं
ब्रह्महत्याव्रतंकुर्यादित्यर्थवदतिदेशवचनं॥उपजातेतुस्त्रीपुंसादिविशेषव्यंजनेयथातमेवप्रायश्चित्तं॥ राम० १९३
यश्चात्रेयीनिषूदकोव्यापादकःसोपितथाव्रतंचरेत्॥हन्यमानात्रायीवर्णानुरूपंव्रतंचरेदित्यर्थः॥आत्रे

यीशब्देनर्तुमत्युच्यते॥रजस्वलामृतुस्नातामात्रेयीमाहुरत्रह्येष्यदपत्यंभवतीतिवसिष्ठस्मरणात्॥अत्रिगो
त्रांवानारीमितिविष्णुस्मरणात्॥एतदुक्तंभवतिब्राह्मणगर्भवधेब्राह्मण्यात्रेयीवधेचब्रह्महत्याव्रतंक्षत्रगर्भ
वधेक्षत्रियात्रेयीवधेचक्षत्रहत्याव्रत॥मेवमन्यत्रापीति॥चशब्दात्साक्ष्येअनृतवचनादिष्वपि॥यथाहमनु
ःउक्त्वाचैवानृतंसाक्ष्येप्रतिरभ्यगुरुंतथा॥अपहृत्यचनिक्षेपंकृत्वाचस्त्रीसुहृद्वधमिति॥यत्रव्यवहारेअस
त्यवचनेनवर्णिनांवधप्राप्तिस्तद्विषयमेतत्॥प्रायश्चित्तस्यातिगुरुत्वात्।प्रतिरंभःक्रोधावेशः॥निक्षेपश्चब्रा
ह्मणसंबंधी॥स्त्रीचाहिताग्निभार्यापतिव्रतात्वादिगुणयुक्तोच्यतेसवनस्थाचापथाहांगिराः॥आहिताग्ने
र्द्विजाग्र्यस्यतथापत्नींमनिंदितां॥ब्रह्महत्याव्रतंकुर्यादात्रेयीघ्नस्तथैवचेति॥सवनस्थांस्त्रियंहत्वा॥ब्रह्महत्या
व्रतंचरेदितिपराशरस्मरणात्॥एवंचसवनस्थाग्निहोत्रिण्यात्रेयीवधेब्रह्महत्याप्रायश्चित्तातिदेशात्तद्यति
रिक्तस्त्रीवधस्यस्त्रीशूद्रविट्क्षत्रवधइत्युपपातकमध्यपाठादुपपातकत्वमेव॥ननुब्राह्मणोनहंतव्यइत्य

११४ त्रनिषेधेऽनुपादेयगतत्वेनलिंगवचनयोरविवक्षितत्वाद्ब्राह्मणजातेश्चस्त्रीपुंसयोरविपर्ययत्वादतिक्रमनि
मित्तप्रायश्चित्तविधेर्ब्रह्महाद्वादशाब्दनीसस्याभयत्रपासत्वात्किमर्थंतथात्रेयीनिषूदकइति अतिदेशवचनं
॥उच्यते॥सत्यपिब्राह्मणत्वेऽनात्रेय्यावधस्यचमहापातकप्रायश्चित्तनिराकरणार्थमतस्तस्योपपातकम
ध्यपाठादुपपातकप्रायश्चित्तमेव॥आतिदेशिकेषुचप्रायश्चित्तेष्वेवातिदेशेनपातित्यस्यातःपतितत्या
गादिकार्यमत्रनभवति॥किंच॥वरेद्भुतमहत्वापिघातार्थंचेत्समागतः॥यथावर्णमित्यनुवर्त्तते॥ब्राह्मणादि
हननेकृतनिश्चयस्तद्घातार्थंसमागतस्तुशस्त्रादिप्रहारेहतेकथंचित्स्मृतिघातादिप्रतिबंधवशाद्दैवान्मृत
स्तदाअहत्वापिपावर्णंब्रह्महत्यादिव्रतंचरेत्॥तथाचगौतमः॥स्पष्टश्चेद्ब्राह्मणवधेअहत्वापीति॥ननुहन
नेतदभावेचैकप्रायश्चित्तत्तानयुक्ता॥सममतएवोपदेशिकेभ्योन्यूनत्वादातिदेशिकानांपादोनान्यवब्रह्मह राम०
त्यादिव्रतानिद्वादशवार्षिकादीनिभवंति॥एतच्चप्रपंचितंप्राक्॥किंच॥द्विगुणंसवनस्थेतुब्राह्मणेव्रतमादि ११४

सोमयागस्य

शेत्॥यस्तुसवनसंपाद्येसोमयागमनुतिष्ठंतंब्राह्मणंव्यापादयतितस्मिन्द्वादशवार्षिकादिव्रतंद्विगुणंसमा
दिशेत्॥तेषांचव्रतानांगुरुत्वलघुत्वानांजातिशक्तिगुणाद्यपेक्षयासत्यपिसवनस्थात्वस्याविशेषेपूर्ववदेवव्य
वस्थावगंतव्याः॥ब्रह्महत्यासमानांतुगुर्वधिक्षेपादीनांआतिदेशिकेभ्योपिन्यूनत्वादर्द्धोनंद्वादशवार्षिकादि
प्रायश्चित्तमित्युक्तं॥इतिब्रह्महत्याप्रायश्चित्तप्रकरणं॥अथक्रमप्राप्तसुरापानप्रायश्चित्तंप्रक्रमते॥सुरांवु
घृतगोमूत्रपयसामग्निसंनिभं॥सुरापोऽन्यतमंपीत्वामरणाच्छुद्धिमृच्छति॥सुराणांमध्येऽन्यतमममग्निसंनि दी
भंक्वाथापादिताग्निस्पर्शदाहशक्तिकंकृत्वापीत्वासुरापोमरणाच्छुद्धिंप्राप्नोतिगोमूत्रमाहचयाज्ञवल्क्यएवघृतंप
यसीग्याद्ये॥घृतपयःसारश्चयोश्चस्त्रेणमेवगोमूत्रं॥सतत्वार्द्रवासंसाकार्यं॥सुरापआर्द्रवासाअग्निवर्णांसु
रांपिबेदितिपैठीनसिस्मरणात्॥तथालोहेनपात्रेणसुरापोग्निवर्णांप्रायसेनपात्रेणताम्रेणवापिबेदितिप्र
चेतःस्मरणात्॥यत्तुवसिष्ठवचनंअभ्यासेतुसुरापाअग्निवर्णांतांपिबेद्द्विजइति॥तत्सुराव्यतिरिक्तमद्यपा

११५ विषयं॥ एतच्चकामकारविषयं॥ सुरापानेकामकृतेज्वलंतींतांविनिक्षिपेत्॥ मुखे तया विनिर्दग्धो मृतः शुद्धि
मवाप्नुयात् इति बृहस्पतिस्मरणात्॥ यं तु सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेदिति मनुना मोहग्रहणं कृ
तं॥ तच्छास्त्रार्थपरिज्ञानाभिप्रायेण॥ अत्रेदं चिंतनीयं॥ किं सुराशब्दो मद्यमात्रे रूढउत तिसृष्वेव गौडीमाध्वी
पैष्टीष्वाहोस्वित्पैष्ट्यामेवेति॥ तत्र केचिन्मद्यमात्रे रूढ इति वर्णयंति॥ अभ्यासे तु सुरायाः इति वासिष्ठे पैष्ट्या
दित्रयव्यतिरिक्तेपि मद्यमात्रे सुराशब्दप्रयोगदर्शनात्॥ न चासौ गौण प्रयोग इति शंकनीयं॥ मदजननश
क्तिमत्त्वोपाधिकतया सर्वत्र मुख्यत्वे संभवति गौणत्वकल्पनाया अन्याय्यत्वादिति॥ तदुक्तं॥ पानसंज्ञाक्षमा
धकं स्वार्जूरं तालमैक्षवं॥ मध्वल्कं सैरमारिष्टं मैरेयं नालिकेरजं॥ समानानि विजानीयान्मद्यान्येकादशैव तु
॥ द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतं इति पुलस्त्येन मद्यविशेषत्वेन सुरायाः निर्दिष्टत्वात्॥ अतश्च मद्यमा राम०
त्रे सुराशब्दप्रयोगो गौणः॥ अन्ये पुनः पैष्ट्यादिषु तिसृषु सुराशब्दस्य रूढिं मन्यते॥ तथाहि यद्यप्यनेकत्र सुरा ११५

DR. BHAU DAJI MEMORIAL

शब्दप्रयोगो दृश्यते तथापि कुत्रानादित्वमिति संदेहे गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरेति मनुवचनाद्गु
डमधुपिष्टविकारेष्वनादित्वनिर्धारणात्तत्रैव मुख्यत्वं युक्तं न वानेकत्र शक्तिकल्पना दोषः॥ मदशक्तेरुपाधित्वा
श्रयणेन तस्य सुपरिहरत्वात्॥ न च तालादिरसेष्वप्युपाधेर्विद्यमानत्वादिति प्रसंगः॥ पंकजादिशब्दवद्योगरूढ
त्वाश्रयणात्॥ अतश्च यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैरिति तिसृणां सुराणां समानदोषत्वप्रतिपाद
नपरं न पुनरसुरयोर्गौडीमाध्व्योः पैष्टीसुरामत्वप्रतिपादनपरं॥ द्विजोत्तमग्रहणं द्विजान्यपलक्षणं॥ एतदप्य
युक्तं॥ द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतमिति पुलस्त्यवचने गौडीमाध्वीभ्यामपि सुरामद्यस्य व्यतिरेकदर्श
नात्॥ तथा सुरा वै मलमन्नानां पाप्मा च मलमुच्यते इत्यन्नविकारस्यैव सुरात्वनिर्देशात् अन्नशब्दस्य चान्नेन व्यंज
नमिश्रादिपुबीष्यादिविकारणप्रयोगदर्शनाद्गुडमधुनोश्चारसरूपत्वान्नथा सौत्रामणीग्रहेषु चान्नविकारत्व
सुराशब्दस्य श्रुतत्वात् पैष्ट्यैव सुरा मुख्या उच्यते इतरयोस्तु सुराशब्दो गौणः॥ यत्तूक्तं गौडी माध्वीति मनुवच

११६ नातिस्पष्टार्थेसतिकल्पनिर्धारणेति॥तदप्ययुक्तं॥यतोनेदंशब्दानुशासनवत्स्वार्थसंबंधानादित्वप्रति
पादनपरं॥किंतुकार्यप्रतिपादनपरं॥अतोगुरुप्रायश्चित्तनिमित्ततयागौडीमाध्व्योर्गौणःसुराशब्दप्र
योगः॥एवंचनानेकशक्तिकल्पनादोषोनाप्युपाध्याश्रयणंकृतं॥नचात्रद्विजोत्तमग्रहणस्योपलक्षण
त्वं॥अतश्चसुरावैमलमन्नानांपाप्मातुमलमुच्यते॥तस्माद्ब्राह्मणराजन्यौवैश्यश्चनसुरांपिबेदितिपैष्ट्या
एववर्णत्रयसंबंधित्वेननिषेधः॥गौड्यादीनांतुमद्यानांब्राह्मणसंबंधित्वेनैवनिषेधोनक्षत्रियवैश्ययोः॥
यक्षरक्षःपिशाचान्नंमद्यंमांसंसुरासवं॥तद्ब्राह्मणेननात्तव्यंदेवानामश्नताहविरितिमानवेब्राह्मणेनेति
विशेषोपादानात्॥बृहद्विष्णुनापिब्राह्मणस्यैवमद्यप्रतिषेधोदर्शितः॥माधूकमैक्षवंसैरंतालंखार्जूरया
नसंमध्वत्थंचैवमाध्वीकंमैरेयंनालिकेरजं॥अमेध्यानिदशैतानिमद्यानिब्राह्मणस्यत्वितिबृहद्याज्ञवल्क्ये राम०
नापिक्षत्रियवैश्ययोर्दोषाभावोदर्शितः॥कामादपिहिराजन्योवैश्योवापिकथंचन॥मद्यमेवसुरांपीत्वान ११६

दोषंप्रतिपद्यतइति॥व्यासेनापितयोर्माध्वीकपानमनुज्ञातं॥उभौमध्वासवक्षीबौउभौचंदनचर्चितौ॥एकप
र्यंकगाधिनौदृष्टौमेकेशवार्जुनाविति॥एवंब्राह्मणसंबंधित्वेनमद्यमात्रनिषेधेसत्यपिगौडीमाध्वीचपैष्टीच
विज्ञेयात्रिविधासुरायथैवैकातथासर्वानपातव्याद्विजोत्तमैरितिगौडीमाध्व्योःपृथग्निषेधवचनंदोषगुरु
त्वेनसुरासमत्वप्रतिपादनपरं अयंचसुरानिषेधोऽनुपनीतस्यानूढायाश्चकन्यायाभवत्येव॥तस्माद्ब्राह्म
णराजन्यौवैश्यश्चनसुरांपिबेदितिजातिमात्रावच्छेदेनरनिषेधात्॥अतश्चसुरांपीत्वाद्विजोमोहादितिप्राय
श्चित्तविधिवाक्येमनुनायत्द्विजग्रहणंकृतंतद्ग्रहणंचयोपलक्षणार्थं॥निमित्तभूतनिषेधसापेक्षत्वान्नैमित्ति
कविधिनिषेधचवर्णमात्रस्यावच्छेदकत्वात्॥यथायस्यहविर्निरुप्तंपुरस्ताच्चंद्रमाअभ्युदेतीतिनिमित्तवाक्ये
हविर्मात्राभ्युदयस्यनिमित्तत्वावगतौतत्सापेक्षेनैमित्तिकवाक्येश्रूयमाणमपित्रेधातंडुलान्विभजेदितितंडुल
ग्रहणंतंडुलसान्नाय्यरूपहविर्मात्रोपलक्षणं॥इयांस्तुविशेषः॥पादोबालेषुदातव्यःसर्वपापेष्वयंविधिरि

११७ निर्वचनात्कामकारेपि न मरणांतिकं किंतु पादमेव द्विगुणीकृत्य पदार्थिकं देयं॥ वहितं यत्कामानां कामान्नद्वि
गुणं चरेदित्यंगिरः स्मरणात्॥ एवं नृपानुरादिष्वपि योज्यं॥ तथा तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविरिति
मद्यस्यापि जातिमात्रावच्छेदेन निषिद्धत्वादनुपनीतेनन पेयं॥ ननु कथमनुपनीतस्य दोषः॥ प्रागुपनयनात्का
मचारवादभक्ष इति गौतमवचनात्तथा॥ मद्यमूत्रपुरीषाणां भक्षणे नास्ति कश्चन॥ दोषस्त्वापंचमाद्वर्षादूर्द्ध
पित्रोः सुहृद्गुरोरिति कुमारवचनाच्च दोषाभावावगतेः॥ उच्यते॥ सुरामद्ययोर्निषेधवाक्ये जातिमात्रस्यावच्छे
दकत्वश्रवणात्प्रतिहन्तैव निषेधप्रवृत्तिः॥ अत एवास्य संस्तरे निषेधवचनं सुरापाननिषेधस्य जात्याश्रय
इति स्थितिरिति॥ अतः पादो बालेषु दातव्यः सर्वपापेष्वयं विधिरिति॥ सर्वपापेषु सुरापानादिष्वपीति
वचनात्स्यादेव सुरापानप्रायश्चित्तं॥ तथा जातूकर्ण्येन मद्यपानेपि प्रायश्चित्तमुक्तं॥ अनुपेतस्तु यो बालो राम०
मद्यं मोहात्पिबेद्यदि॥ तस्य कृच्छ्रत्रयं कुर्यान्माता भ्राता तथा पितेति अतो गौतमवचनं सुरादिव्यतिरिक्तशुक्त ११७

पर्युषितादिविषयं॥ कुमारवचनं तु स्वल्पदोषख्यापनपरं॥ अत एव प्रागुपनयनात्कृतदोषस्योपनयनमेव प्रा
यश्चित्तमित्युक्तं मनुना गर्भे होमैर्जातकर्मचूडामौंजीनिबंधनैः॥ बैजिकं गार्भिकं चैनो द्विजानामपमृज्यत इति
॥ अयमत्रार्थः॥ त्रैवर्णिकानामुपनीतिप्रभृतियैषा प्रतिषेधः॥ ब्राह्मणस्य तु मद्यमात्रप्रतिषेधोप्युपनीतिप्रभृ
त्येव राजन्यवैश्ययोस्तु न कदाचिदपि गौड्यादिमद्यप्रतिषेधः॥ शूद्रस्य तु न सुराप्रतिषेधो नापि मद्यप्रतिषेधः
प्रायश्चित्तांतरमाह॥ बालवासा जटी वापि ब्रह्महत्याव्रतं चरेत्॥ पिण्याकं वा कणान्वापि भक्षयेत्त्रिसमा निशि॥ गो
च्छागादिलोमनिर्मितवस्त्रप्रावरणे वालवासा दिग्ग्रहणं चीरवल्कलयोरुपलक्षणार्थं॥ सुरापगुरुतल्पगौ ची
रवल्कलवाससौ ब्रह्महत्याव्रतं चरेयातामिति प्रचेतः स्मरणात्॥ जटिग्रहणं मुंडत्वनिराकरणार्थं॥ ब्रह्महत्या
ने व्रतं चरेदित्यनेन वसिष्ठेयद्वालवसनादिग्रहणं तद्धनम्यत्र संभवि स्वयं मारितशिरः कपालादिनिवृत्त्यर्थं॥ इदम
कामतो जलबुद्ध्या यः सुरां पिबति तद्विषयं॥ इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजमिति सर्वमोपाधित्वेन विहि

११८ तस्यैवद्वादशवार्षिकस्यातिदेशात्॥अत्रचभ्रूणघ्नस्यमहापातकत्वात्तस्यातिदेशिकत्वेसंपूर्णमेवद्वा
दशवार्षिकंकुर्यान्नपादोनं॥अतएववृद्धहारीतः॥द्वादशभिर्वर्षैर्महापातकिनःपूयंतइति॥अथवापि
ण्याकःपीडितःत्रिसमाःवर्षत्रयंरात्रौभक्षयेत्॥कणांस्तंदुलकणान्वापिक्वाथंवाभक्षयेत्॥एतच्चसकृदे
वकार्यी॥कणान्वाभक्षयेदब्दंपिण्याकंवासकृन्निशीतिमनुस्मरणात्॥अस्यचपिण्याकादिभक्षणस्यभोज
नकार्येविहितत्वाद्दशनांतरपरित्यागः॥एतच्चोदकबुद्ध्यासुरापानेछर्दनोत्तरकालंवेदितव्यं॥एतदेवव्र
तंकुर्यान्मद्यपश्छर्दनेकृतेपंचगव्यंचतस्यांतेमसहंकायशोधनमितिव्यासवचनात्॥नचसुरासंसृष्टेष
दुपलभ्यमानतद्गंधरसोदकपानविषयमितिसुंदरं॥संसर्गेपिसुरात्वस्यानपायात्॥यथाज्यत्वस्यपृषदा
ज्ये॥अतएवाज्यपाइतिनिगमाःकार्याःनपृषदाज्यपाइत्येवमुक्तंन्यायविद्भिः॥यत्तुनारदस्यवचनं॥ रा.म०
संयम्यकृत्वासुरांपीत्वागुरुदारान्गत्वाब्रह्महत्यांचकृत्वाचतुर्थकालंमितभोजनोपोभ्युपेयात्सवनानुकल्पं ११८

स्थानासनाभ्यांविहरंस्त्रिभिर्वर्षैःपापमपनुदतीति॥यच्चांगिरोवचनं॥महापातकसंयुक्तावर्षैःशुध्यं
तितेत्रिभिरितितदुभयमपिपिण्याकंवाकणान्वेत्यनेनैकविषयं॥यदपियमेनप्रायश्चित्तद्वयमुक्तं॥बृहस्प
तिसवेनेष्ट्वासुरापोब्राह्मणःपुनःसमत्वंब्राह्मणैर्गच्छेदित्येषावैदिकीश्रुतिः॥भूमिप्रदानंयःकुर्यात्सुरांपीत्वा
द्विजोत्तमः॥पुनर्नचपिबेत्तांतुसंस्कृतःसविशुध्यतीति॥तदुभयमपिपूर्वेणसहैकविषयं॥यद्वाअतिरिक्तद
क्षिणाकस्याश्रयणात्द्वादशवार्षिकेणसहविकल्प्यते॥अत्रापिबालवृद्धादीनांसार्द्धैकवर्षायमनुपनीतानां
तुनवमासिकमतेत्वेवंकल्पनाकार्या॥यत्तुमनुवचनं॥कणान्वाभक्षयेदब्दंपिण्याकंवासकृन्निशि॥सुरापानाप
नुत्त्यर्थंवालवासाजटीध्वजीति॥तत्रात्मनाचसंयोगेसुरापाअबुद्धिपूर्वेद्रष्टव्यं॥ननुचद्रवद्रव्यस्याभ्यवहरणं
पानमित्युच्यते॥अभ्यवहरणंचकंठादधोनयनं॥नताल्वादिसंयोगमात्रमतःकथंतत्रपानमितितत्प्रायश्चि
त्तं॥उच्यते॥येनताल्वादिसंयोगेनविनापानक्रियानिवर्त्ततेसोपिपानक्रियाप्रतिषेधेनप्रतिषिद्धः॥अतोय

११९ घपिमुख्यपानाभावान्नमहापातकत्वंतथापितत्प्रतिषेधेनतदंगभूतान्यतिभीचारित्वात्वाद्दिसंयोगस्यापिप्र
तिषिद्धत्वेनदोषस्यविद्यमानत्वात्भवत्येवप्रायश्चित्तं॥चरेद्व्रतमहत्वापिघातार्थंचेत्समागतइतियथाहननं
प्रतिषेधेनतदंगभूताध्यवसायादेरपिप्रतिषिद्धत्वात्प्रायश्चित्तविधानं॥यत्तुबौधायनीयंत्रैमासिकंअम
त्यासुरापानेकृच्छ्रमब्दपादंचरित्वापुनरुपनयनमिति॥यच्चयाम्यं॥सुरांपीत्वाद्विजंहत्वारुक्मंहृत्वाद्विजन्मनः॥
संयोगपतितैर्गत्वाद्विजश्चांद्रायणंचरेदिति॥यदपिबार्हस्पत्यं॥गौडीमाध्वींसुरांपैष्टींपीत्वाविप्रःसमाचरे
त्॥तप्तकृच्छ्रंपराकंचचांद्रायणमनुक्रमादिति॥तत्त्रितयमप्यतन्मौषध्यसाध्यव्याध्युपशमार्थंपानेवेदितव्यं
प्रायश्चित्तस्याल्पत्वात्॥यदातुसुरासंस्पृष्टंशुष्कंरसमेवान्नंभक्षयतितदापुनरुपनयनं॥यथाहमनुः॥अज्ञा
नात्प्राश्यविण्मूत्रंसुरासंस्पृष्टमेवच॥पुनःसंस्कारमर्हंतित्रयोवर्णाद्विजातयइति॥यदाचशुष्कसुराभांड रा.म०
स्थोदकंपिबतितदाशंखनाततपोक्तंकुर्यात्सुराभांडोदकपानेछर्दनंघृतप्राशनमहोरात्रोपवासश्चेति॥यत्तु ११९

बौधायनीयं॥सुरापात्रस्यपोभांडस्थपःपर्युषिताःपिबेत्शंखपुष्पीविपक्वंतुक्षीरंसर्पिःपिबेत्त्र्यहमिति॥त
त्सुर्युषितत्वादधिकं॥अकामतोभ्यासेपुनर्मनुनोक्तं॥अपःसुराभाजनस्थामद्यभांडस्थितास्तथा॥पंचरात्रंपि
बेत्पीत्वाशंखपुष्पीशृतंपयइति॥यत्तुविष्णूक्तं॥अपःसुराभाजनस्थाःपीत्वासप्तरात्रंशंखपुष्पीशृतंपयः
पिबेदितितन्मतिपूर्वकेपाने॥ज्ञानतोभ्यासेतुचतुरहमाह॥सुराभांडस्थितंतोयंयदिकश्चित्पिबेद्द्विजः
॥सप्तदशाहक्षीरेणपिबेद्ब्राह्मीसुवर्चलामिति॥सुरापस्यमुखगंधघ्राणेतुमनुः॥ब्राह्मणस्तुसुरापस्यगंध
माघ्रायसोमपः॥प्राणानप्सुत्रिरायम्यघृतंप्राश्यविशुध्यतीति॥तत्सोमयाजिनएवामतिपूर्वेमतिपूर्वेतुद्विगुण
मयीतसोमस्यतुकल्प्यं॥साक्षात्सुरागंधघ्राणस्यतद्घ्रातिरघ्रेयमद्ययोरितिजातिभ्रंशकरत्वात्॥जातिभ्रंश
करंकर्मकृत्वान्यतमनमिच्छया॥चरेत्सांतपनंकृच्छ्रंप्राजापत्यमनिच्छयेतिमनूक्तंद्रष्टव्यं॥एवंमुख्यसुरापानेप्रा
यश्चित्तमुक्त्वामद्यपानेप्रायश्चित्तमाह॥अज्ञानात्तुसुरांपीत्वारेतोविण्मूत्रमेवच॥पुनःसंस्कारमर्हंतित्रयोव

र्णा द्विजातयः॥ यः पुनरज्ञानादुदकबुध्या सुरां मद्यं ब्राह्मणः पिबति॥ ये च ब्राह्मणादयो रेतोविण्मूत्राणि प्रा
१२० श्नंति तेत्र योपि द्विजातयो वर्णास्तप्तकृच्छ्रपूर्वकं पुनरुपनयनं प्रायश्चित्तमर्हंति॥ अत्र मद्यपाने योपि पुनः
संस्कारः स ब्राह्मणस्यैव॥ क्षत्रियविशोस्तदभ्यनुज्ञानस्य दर्शितत्वात्॥ सुराशब्दश्चात्र मद्यपरः॥ प्राय
श्चित्तस्यातिलघुत्वात् अज्ञानतो मुख्यसुरापाने द्वादशवार्षिकस्य विहितत्वाच्च॥ अत एव गौतमेनात्र
मद्यशब्दः प्रयुक्तः॥ अमत्या मद्यपाने पयो घृतमुदकं वायुं वा त्र्यहं तप्तानि पिबेत्स तप्तकृच्छ्रस्ततोस्य सं
स्कारः मूत्रपुरीषकुणपरेतसां प्राशने चेति यद्यप्यस्मिन्नेव विषये मनुनोक्तं॥ अज्ञानाद्वारुणीं पीत्वा सं
स्कारेण विशुद्ध्यतीति तदपि तप्तकृच्छ्रपूर्वकमेव॥ गौतमवाक्याविरोधात्॥ पुनःसंस्कारश्च पुनरुपन
यनं॥ तच्चाश्वलायनाद्युक्तक्रमेण कर्तव्यं यथोक्तं॥ अथोपेतपूर्वस्य कृताकृतं केशवपनं मेधाजननं राम०
चानिरुक्तं परिदानं कालश्च तत्सवितुर्वृणीमह इति सावित्रीमिति मतिपूर्वमद्यपाने वसिष्ठोक्तं द्रष्टव्यं १२०

मत्या मद्यपाने तु सुरायाः सुरायाश्चाज्ञाने कृच्छ्रातिकृच्छ्रौ घृतप्राशः पुनःसंस्कारश्चेति चान्द्रायणं वा शंखोक्तं
असुरामद्यपायी चान्द्रायणं चरेदिति॥ मुखमात्रप्रवेशे तु मद्यस्यापस्तंबीयं षड्रात्रं॥ अभक्षणमपेयानामलेह्या
नां च भक्षणे॥ रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत्॥ पद्मोदुंबरबिल्वानां पलाशस्य कुशस्य च॥ एतेषा
८ मुदकं पीत्वा षड्रात्रेण विशुद्ध्यतीति॥ एतच्च तालादिमद्यविषयं गौडीमाध्व्योः पुनरज्ञानतः पाने सुरायाश्चाज्ञा
न इति वसिष्ठोक्तः॥ कृच्छ्रातिकृच्छ्रसहितः पुनःसंस्कारो घृतप्राशश्च द्रष्टव्यः॥ तयोर्मतिपूर्वपाने तु पिण्याकं
वा कणान्वेति त्रैवार्षिकं॥ कामतः कृतस्यानभ्यासे अभ्यासे तु सुराया अग्निवर्णां सुरां पिबेन्मरणात्पूतो भवती
ति वासिष्ठं मरणांतिकं द्रष्टव्यं॥ नात्र सुराशब्दः पैष्ट्यभिप्रायः॥ तस्याः सकृत्पानेपि मरणांतिकस्य दर्शितत्वा
त्॥ मद्यवासितशुष्कभांडस्थोदकस्याज्ञानतः पाने त्र्यहं यमेनोक्तं॥ मद्यभांडस्थितं तोयं यदि कश्चित्पिबेत् द्वि
जः॥ कुशमूलविपक्वेन त्र्यहं क्षीरेण वर्तयेदिति॥ अज्ञानतोऽभ्यासे तु वसिष्ठेनोक्तं॥ मद्यभांडस्थितं तोयं य

Dr. BHAU DAJI MEMORIAL

दिकंश्चित्पिवेद्द्विजः॥पद्मोदुंबरबिल्वानांपलाशस्यकुशस्यच॥एतेषामुदकंपीत्वात्रिरात्रेणविशुध्यतीति
॥ज्ञानतःपानेतुविष्णूक्तं॥मद्यभांडस्थितंतोयंपीत्वापंचरात्रंशंखपुष्पीशृतंपयःपिबेदितिज्ञानतोऽभ्यासे
तुशंखोक्तं॥मद्यभांडस्थितंतोयंपीत्वासप्तरात्रंगोमूत्रयावकंपिबेदिति॥अत्यंताभ्यासेतुहारीतोक्तं॥मद्यभांड
स्थितंतोयंयदिकश्चित्पिबेद्द्विजः॥द्वादशाहंतुपयसापिबेद्ब्राह्मीसुवर्चलामिति॥एषुचवाक्येषुद्विजग्रहणं
ब्राह्मणाभिप्रायं॥क्षत्रियवैश्ययोरप्रतिषेधादितिदर्शितंप्राक्॥इदंचगौडीमाध्वीभांडस्थजलपानविषयं
॥गुरुत्वात्प्रायश्चित्तस्य॥तालादिमद्यभांडोदकपानेतुकल्प्यं॥द्विजातिभार्याप्रत्याह॥पतिलोकंनसायाति
ब्राह्मणीयासुरांपिबेत्॥इहैवसाशुनीगृध्रीसूकरीचोपजायते॥याद्विजातिभार्यासुरांपिबंतिसाकृतपुण्या
पिसतीपतिलोकंनयाति॥किंत्विहैवलोकेश्वगृध्रसूकरलक्षितंतिर्यग्योनिंक्रमेणप्राप्नोति॥ब्राह्मणीग्रह
णंचात्रतिस्रोभार्यानुपूर्व्येणेतिन्यायेनयस्यद्विजातेर्यावंत्योभार्यास्तासामुपलक्षणं॥अतएवमनुः॥पत

त्यर्द्धशरीरस्ययस्यभार्यासुरांपिबेत्॥पतितार्द्धशरीरस्यनिःकृतिर्नविधीयतइति॥धर्मार्थकामेषुसहाधिका
रइदंपत्योरेकशरीरत्वमेवातोयस्यद्विजातेर्भार्यासुरांपिबतितस्यभार्यारूपमर्द्धशरीरस्यपतति॥पतितस्य
चभार्यारूपस्यार्द्धशरीरस्यनिःकृतिर्नविधीयते॥तस्मात्द्विजातिभार्ययासुरानपातव्या॥तस्माद्ब्राह्मण
राजन्यौवैश्यश्चनसुरांपिबेदितिनिषेधविधौलिंगस्याविवक्षितत्वेनवर्णत्रयभार्याणामपिप्रतिषेधेसि
द्धेपुनर्वचनंद्विजातिभार्यायाःशूद्रायाअपिसुराप्रतिषेधप्राप्त्यर्थं॥अतोद्विजातिभार्याभिःसुरापानप्रा
यश्चित्तस्यार्द्धंकार्यं शूद्रभार्यायास्तुशूद्रायाःशूद्रवदेवप्रतिषेधः॥सुरापानसमेषुतुनिषिद्धभक्षणा
दिषुसुरापानप्रायश्चित्तार्द्धमित्युक्तंप्राक्॥ ॥इतिसुरापानप्रायश्चित्तप्रकरणं॥ ॥अथप्राप्तंसुव
र्णस्तेयप्रायश्चित्तमाह॥ ॥ब्राह्मणस्वर्णहारीतुराज्ञेमुसलमर्पयेत्॥स्वकर्मख्यापयन्स्तेनहतोमुक्तोपि
वाशुचिः॥ब्राह्मणस्वामिकंसुवर्णंयोऽपहरत्ससोसुवर्णस्तेयंमयाकृतमित्येवंस्वकर्मख्यापयन्राज्ञेमुस

१२२ लसमर्पयेत्॥मुसलमर्पणस्यदृष्टार्थत्वात्तेनमुसलेनराजातंहन्यात्तेनराज्ञाहतोमुक्तोवाशुद्धोभवति
श्री ॥अपहरणंस्तेनंचसमक्षंपरोक्षंवाबलाच्चौर्येणवाक्रयादिस्वत्वहेतुंविनापहरणमुच्यते॥मुसलमर्पये
दितियद्यपिसामान्येनोक्तंतथापितस्यहननार्थत्वात्समर्थस्यायोमयादेर्ग्रहणं॥अतएवमनुनोक्तं॥स्कं
धेनादायमुसलंलकुटंवापिखादिरं॥असिंचोभयतस्तीक्ष्णमायसंदंडमेववेति॥शंखेनात्रविशेषउ
क्तः॥सुवर्णस्तेनःप्रकीर्णकेशआर्द्रवासआयसंमुसलमादायराजानमुपतिष्ठेदिदंमयापापंकृतमनेन
मुसलेनाघातयस्वेतिसराज्ञाशिष्टःसनपूतोभवतीति॥हननंचात्रत्रिविधानाभावात्सकृदेवकार्यं॥अ
तएवमनुनोक्तंततोमुसलमादायसकृद्धन्यात्तुतंस्वयमिति॥एवमुक्तेनराज्ञाहतोमृतःशुध्येत्॥
मुक्तोवामरणंजीवन्नपिविशुध्येदितियावत्॥तथाचसंवर्तेनोक्तं॥ततोमुसलमादायसकृद्धन्यात्तुतं राम०
स्वयम्॥यदिजीवतिसस्तेनस्ततःस्तेयाद्विमुच्यतइति॥यथोक्तंब्रह्मवधे॥मृतकल्पःप्रहारार्तोजीवन्नपि १२२

विशुध्यतीति॥नन्वताडितएवराज्ञामुक्तःशुध्येदित्ययमर्थःकस्मान्नेष्यते॥उच्यते॥अघ्नन्नेनस्वीराजे
तिगौतमीयेताडनमकुर्वतोदोषाभिधानात्॥भवतुराज्ञोदोषस्तथाप्यतिक्रांतनिषेधेनराज्ञास्तेनोहादिना
मुक्तःस्तेनःकथंनशुध्येदितिचेत्॥एवंचसस्यकारणिकाशुद्धिरापतेत्॥अथोच्यते॥मोक्षोत्तरकालंद्वाद
शवार्षिकाद्यनुष्ठानेनशुध्यंगीकरणान्नाकारणिकेति॥तदप्यसुंदरं॥मुक्तःशुचिरितिमोक्षस्यैवशुद्धिहे
तुत्वाभिधानात्॥अतःप्राच्यैवव्याख्याज्यायसी॥इदंचमरणांतिकंसार्ववर्णिकस्यापहर्तुर्नब्राह्मणस्यैव॥
ब्राह्मणस्वर्णहारीतिनैमित्तिकवाक्येविशेषानुपादानात्॥क्षत्रियादीनांचमहापातकित्वाविशेषात्प्रायश्चि
त्तांतरस्यानाम्नानाच्च॥यत्तुमानवे॥सुवर्णस्तेयकृद्विप्रइतिविप्रग्रहणंतन्नरमात्रोपलक्षणं॥प्रायश्चि
त्तीयतेनरइतितस्यैवप्रकृतत्वात्॥ब्रह्महासुरापस्तेयीगुर्वंगनागमइतिनिमित्तवाक्येविशेषानुपादा
नाच्चतन्मात्रापेक्षनैमित्तिकवाक्येसुवर्णस्तेयकृद्विप्रइत्यत्रश्रूयमाणमप्युपलक्षणमेवयुक्तं॥यथाभ्युदिते

ष्टांपस्यहविरितिवाक्येनंतंदुलग्रहणंहविर्मात्रस्य॥इहचराज्ञाहननंब्राह्मणस्यव्यतिरिक्तस्य॥नजातुब्राह्मणं
१२३ हन्यात्सर्वपापेष्वपिस्थितमितिमानवेब्राह्मणवधस्यनिषिद्धत्वात्॥यदिकथंचिदतिक्रांतनिषेधेनराज्ञाह
न्यतेतथापिविशुद्धोभवतिवधेनशुध्यतिस्तेनोब्राह्मणस्तपसैववेतिब्राह्मणस्यापिवधेनशुद्ध्यभिधा
नात्।नचतपसैववेत्येवकारेणवधनिषेधः॥तस्यकेवलतपसापिशुद्ध्यभिधानपरत्वात्॥यदिवधनि
षेधस्तर्हितपसवेतिविकल्पाभिधानमनुपपन्नं॥नचदंडाभिप्रायंविकल्पाभिधानं॥तस्यानिर्दिष्ट
त्वात्॥किंच॥एकार्थास्तुविकल्पेरन्नितिन्यायेनैकार्थानामेवविकल्पाद्व्रीहियवयोरिवनचदंडतपसोरेका
र्थतादंडस्यदमनार्थत्वात्तपश्चपापक्षयहेतुत्वात्॥नचवधेनशुध्यतिस्तेनइतिसामान्यविषयेणवधेन
ब्राह्मणस्तपसैववेतिविशिष्टविषयस्यतपसोविकल्पोपपत्तिः॥नहिभवतिब्राह्मणेभ्योदधिदीयतांतत राम०
क्रंकौंडिन्यायवेतिविकल्पस्तस्मात्द्वयोरपिसामान्यविषयत्वमेव॥यद्याक्षत्रियस्यापिननिषेधःमनुना॥ १२३

सुवर्णस्तेयकृद्विप्रइत्यभिधायगृहीत्वामुसलंराजानंसकृतहन्यात्तुतंस्वयमितिसर्वानाम्नाभकृतब्रह्मणपरा
मर्थेनैवहननविधानात्॥नजातुब्राह्मणंहन्यादित्यस्यप्रायश्चित्तव्यतिरिक्तदंडरूपहननविषयत्वेनाप्यु
पपत्तेः॥एतच्चमरणांतिकंमतिपूर्वसुवर्णस्तेयविषयं॥मरणांतंहियत्प्रोक्तंप्रायश्चित्तमनीषिभिः॥तत्तुका
मकृतेपापेविज्ञेयंनात्रसंशयइतिमध्यमांगिरःस्मरणात्॥अत्रचसुवर्णशब्दःपरिमाणविशिष्टहेमद्र
व्यवचनोनजातिमात्रवचनः॥जालसूर्यमरीचिस्थंत्रसरेणुरजःस्मृतं॥तेष्टौलिक्षानुतास्तिस्रोराजसर्ष
पउच्यतेगौरसस्तेत्रयः॥षट्तेयवोमध्यमस्तेत्रयः॥कृष्णलः॥पंचतेमाषस्तेसुवर्णस्तुषोडशेतिषोडशमाष
परिमितेहेम्निसुवर्णशब्दस्यपरिभाषितत्वात्॥अतोब्राह्मणसुवर्णापहरणंपातकमित्यादिप्रयोगेषुकृत
परिमाणस्यैवसुवर्णस्यैहग्रहणंपरिमाणकरणस्यदृष्टार्थत्वायनत्वदृष्टार्थपरिमाणस्मरणं॥नापिलोकव्य
वहारार्थाअतत्परत्वात्स्मृतिकारप्रवृत्तेः॥अतएवोक्तंन्यायविद्भिः॥कार्यकालेसंज्ञापरिभाषयोरुपस्थान

मिति॥तथानामापिशुनफलोपबंधेपवधेनार्थवदित्युक्तंपंचदशान्याप्यानीसत्रनचदंडमात्रोपयोगि
१२४ परिमाणस्मरणमितियुक्तं॥नानार्थत्वेप्रमाणाभावात्॥अतोऽविशेषात्सर्वशेषत्वमेवयुक्तं॥किंच॥दंड
स्यदमनार्थत्वाद्दमनस्यचपरिमाणशेषांतरेणापिसिद्धेनातीवपरिमाणमुपयुज्यते॥शब्दैकसमधिग
म्येतुमहापातकित्वादावेकांततस्तत्स्मारणमुपयुज्यते॥अतःषोडशमाषात्मकसुवर्णमितहेममहापात
कित्वतन्निमित्तान्निमरणांतिकादिप्रायश्चित्तविधानंनच॥द्वित्र्यादिमाषात्मकहेमहरणंतुक्षत्रियादि
हेमहरणवदुपपातकमेवेतियुक्तं॥किंच॥सुवर्णातन्यूनपरिमाणहेमहरणेप्रायश्चित्तांतरोपदेशात्त
त्परिमाणस्यैवहेम्नोहरणेमरणांतिकादिप्रायश्चित्तमितियुक्तं॥तथाचोक्तंषट्त्रिंशन्मते॥ऽपहृतेप्राणाया
मंसमाचरेत्॥लिक्षामात्रेपिचतथाप्राणायामत्रयंबुधः॥राजसर्षपमात्रेचप्राणायामचतुष्टयं॥गाय राम०
त्र्यष्टसहस्रंचजपेत्पापविशुद्धये॥गौरसर्षपमात्रेतुसावित्रींवेदिनंजपेत्॥यवमात्रेसुवर्णस्यप्रायश्चि १२४

त्तंदिनद्वय॥सुवर्णकृष्णलंचैवमपहृत्यद्विजोत्तमः॥कृच्छ्रंसांतपनंकुर्यात्तत्पापस्यविशुद्धये॥अपहृत्यसुवर्ण
स्यमाषमात्रंद्विजाधमः॥गोमूत्रद्विर्यावकाहारस्त्रिभिर्मासैर्विशुध्यति॥सुवर्णस्यापहरणेवत्सरंयावकीभवे
त्॥ऊर्ध्वंप्राणांतिकंज्ञेयमथवाब्रह्महव्रतं॥इदंचवत्सरयावकाशनंकिंचिन्न्यूनसुवर्णापहारविषयं॥सु
वर्णापहारेमन्वादिमहास्मृतिषुद्वादशवार्षिकविधानात्॥बलाद्येकामकारेणगृह्णंतिस्वंनराधमाः॥तेषांतुव
लहर्तॄणांप्राणांतिकमिहोच्यते॥सुवर्णपरिमाणाद्वीनेऽपीत्यभिप्रेत्यं॥इदंचस्तेयप्रायश्चित्तमपहृतधनंतत्स्वा
मिनेदत्त्वैवकार्यं॥स्तेयेचस्वस्वभूतस्यसुवर्णादेःकृतेपुनः॥स्वामिनोपहृतंदेयंहर्त्राद्वैकादशाधिकमिति
स्मरणात्॥तथाचरेत्सांतपनंकृच्छ्रंतन्निर्यात्यात्मशुद्धयइतिमनुस्मरणाच्च॥दंडप्रकरणेप्युक्तं॥शेषश्चैका
दशगुणोदाप्यस्तस्यचतद्धनमिति॥यदात्वशक्त्याराजाहर्तुमसमर्थस्तदावसिष्ठोक्तंद्रष्टव्यं॥स्तेनःप्रकीर्ण
केशोराजानमभियाचेत्तत्तस्मैराजौदुंबरंशस्त्रंदद्यात्तेनात्मानंप्रमापयेन्मरणात्पूतोभवतीतिविज्ञायतइति

१२५ औदुंबरंताम्रमयं॥यदपिद्वितीयंप्रायश्चित्तंतेनोक्तं॥निष्कालकोघृताक्तोगोमयाग्निनापादप्रभृत्यात्मानं
प्रमापयेन्मरणात्पूतोभवतीतितदपिगुरुश्रोत्रिययागस्थादिविप्रद्रव्यापहारविषयंक्षत्रियाद्यपहर्तृवि
षयंवा॥तत्रनिष्कालइतिनिर्गलितकेशश्मश्रुलोमाभिधीयते॥तथाश्वमेधाद्यनुष्ठानेनवा॥यथाप्रचेत
सामरणांतिकमभिधायोक्तं॥इष्ट्वावाश्वमेधेनगोसवेनवाशुध्येतिदि॥एतच्चविट्क्षत्रियाद्यपहर्तृवि
षयं॥प्रायश्चित्तांतरमाह॥ ॥अनिवेद्यनृपेशुध्येत्सुरापव्रतमाचरन्॥आत्मतुल्यंसुवर्णंवादद्याद्वावि
प्रतुष्टिकृत्॥स्वीयंस्तेयंराजन्यनिवेद्यसुरापव्रतंद्वादशवार्षिकमाचरन्शुध्येत्॥शवशिरोध्वजत्वक
पालधारणनिराकरणार्थंसुरापव्रतमित्युक्तं॥एतच्चाकामकारविषयं॥इयंविशुद्धिरुदिताप्रमाप्या
कामतोद्विजमित्यकामतोविहितस्यैवद्वादशवार्षिकस्यातिदेशात्॥नन्वकामतोपहारएवनसंभवतीति राम०
कथंतद्विषयत्वं॥उच्यते॥पाद्यवस्त्रप्रांतग्रथितसुवर्णादिकमज्ञानादपहरतिरजतादिद्रव्यांतरबुद्ध्यावा १२५

हृत्वावानंतरमेवान्यस्मैदत्तंनाशितंवापुनःस्वामिनेप्रत्यर्पितंनतदासंभवत्येवाकामतोपहारः॥यत्तुताम्र
दिकस्यरसवेधाद्यापादितसुवर्णरूपस्यापहारोनतत्रेदंप्रायश्चित्तंमुख्यजातिसमवायाभावात्॥नचमु
ख्यसादृश्यमात्रेणगौणेमुख्यधर्माभवंति॥यद्यपीदृशमेवासुवर्णंसुवर्णभ्रांत्यापहरंति॥तथापिनेदंप्रा
यश्चित्तं॥असुवर्णापहारित्वादेवनचस्तेयश्चेद्ब्राह्मणवधेअहत्वापीतिवदत्रापिदोषइतिवाच्यं॥असुवर्णेसु
वर्णभ्रांत्याअपहरतितथापिनेदंप्रायश्चित्तंअप्रवृत्तत्वादेव॥नह्यब्राह्मणस्तेयश्चेद्बुद्ध्यस्यविषयः॥यच्चेदं
नसापापंध्यात्वाप्रणवपूर्वकंव्याहृतीर्मनसाजपेत्॥व्याहृतप्राणायामंत्रिरात्रंचरेत्॥प्रवृत्तोत्कृष्टंद्वादशरा
त्रंचरेदिति॥तदपिसम्यगार्थंप्रवृत्तिविषयं॥अतोनेदृशमज्ञानतःस्वर्णापहारप्रायश्चित्तस्यनिमित्तं॥किंतु
रजतादिबुद्ध्यापूर्वोक्तएवस्वर्णापहारः॥अस्मिन्नविषयेयदापहर्तासंतमहाधनस्तदात्मतुलितंसुवर्णंदद्या
त्॥अथतावद्धनंनास्तितपश्चर्यायांचाशक्तस्तदाविप्रतुष्टिकृद्विप्रस्ययावज्जीवंकुटुंबभरणपर्याप्तंयातुष्टि

करं धनं घ्नात॥ यदा तु निर्गुणस्वामिकं द्रव्यमपहरति॥ तदा एतदेव व्रतं स्तेनः पादन्यूनं समाचरेदिति व्या
१२६ सेनोक्तं नववार्षिकं द्रष्टव्यं॥ यदा पुनरीदृक्षमेव स्वकुटुंबपरिरक्षणार्थमपहरति॥ तदा अत्रिप्रा
तिपादितषड्वार्षिकं॥ स्वर्जित्यादिकं वा कर्तुं कुर्यात्तीर्थयात्रां वा॥ षडब्दं वा चरेत्कृच्छ्रं यजेद्वा क्रतुना द्विजः॥
तीर्थानि वाऽथ विद्वांस्ततः स्तेयाद्विमुच्यत इति यदा त्वपहारसमनन्तरमेव हा हा कष्टं मया कृतमिति जातानु
तापः प्रत्यर्पयति स जनिर्वा तदा यत्संवीयच॰तुर्थकालमिताशनेन त्रिवर्षमवस्थानमांगिरसं वा व्रताख्यं
त्रैवार्षिकं द्रव्यं॥ ननु प्रत्यर्पणे स्वाम्ये वापहारधनस्वार्थस्य निष्पन्नत्वात्कथं प्रायश्चित्ताल्पत्वं॥ अथानिष्पन्नस
दा प्रायश्चित्ताभाव एव स्यान्न तु प्रायश्चित्ताल्पत्वं॥ मैवं॥ अपहारस्योपभोगादिफलपर्यन्तत्वादुपभोगात्
प्राग्निवृत्तौ च पुष्कलस्यापहारार्थस्याभावात् युक्तमेव प्रायश्चित्ताल्पत्वं॥ पीतवांतद्रवापेये द्रव्ये॥ पीतवां राम॰
तद्रवापेये द्रव्ये॥ नन्वेवं सति चोरहस्ताद्बलाद्राज्ञा द्रव्यग्रहणे पितस्योपभोगलक्षणफलाभावात्प्रायश्चित्त १२६

DR. BHAU DAJI MEMORIAL

त्वात्तत्स्त्वप्रसंगः मैवं॥ तस्य स्वागे स्वतः प्रवृत्त्यभावात्॥ फलपर्यन्ते अपहारे स्वतः प्रवृत्तत्वाच्च॥ यत्कृ रजत
ताम्रादिसंसृष्टसुवर्णापहारेण तत्रैवं लघु प्रायश्चित्तं॥ यतः संसर्गेपि सुवर्णत्वं नापैति॥ आज्यत्वमिव वृष
दाज्ये॥ अतस्तत्र द्वादशवार्षिकमेवेति युक्तं॥ अथ स्वर्णसदृशे द्रव्यान्तरमेवेति लघुप्रायश्चित्तमुच्यते॥ तर्हि न
तरां त्रैवार्षिकादिलघुप्रायश्चित्तादिविषयता॥ असुवर्णत्वादेव किंतु उपपातकप्रायश्चित्तमेव॥ यद्यप्यप
रमायस्कं वोक्तं॥ स्तेयं कृत्वा सुरां पीत्वा कृच्छ्रं संवत्सरं चरेदिति तत्सुवर्णपरिमाणार्वाक्माषाच्चाधिकपरिमा
णद्रव्यविषयं॥ यत्तूक्तं सुमन्तुना॥ सुवर्णस्तेयी मासांस विध्यष्टसहस्रमाज्याहुतीर्जुहुयात्स्वसहं त्रिरात्रमुपवा
सस्ततः कृच्छ्रेण च पूतो भवतीति॥ तत्सर्वोक्तमाषपरिमासुवर्णापहारप्रायश्चित्तेन सह विकल्प्यते॥ यद्यप्यपरं
तेनैवोक्तं॥ सुवर्णस्तेयी द्वादशरात्रं वायुभक्षः पूतो भवतीति तन्मनसापहारे प्रवृत्तस्य स्वत एवोपरतापजि
हीर्षस्य वेदितव्यं॥ अत्रापि स्त्रीबालवृद्धादिष्वर्द्धमेव प्रायश्चित्तं वेदितव्यं॥ यानि वा स्वरत्नमनुष्यस्त्रीभूधेनु

१२७ हरणं तथेत्यादिना सुवर्णस्तेयसमत्वेन प्रतिपादितानि तेष्वप्यर्द्धमेव कार्यं ॥ यत्पुनश्चतुर्विंशतिमतवचनं ॥
रूप्यं हृत्वा द्विजो लोभाद्वत्सरं त्वांद्रायणव्रतं ॥ गवां च दशकादूर्द्ध्वमाशतात्तद्विगुणं चरेत् ॥ आसहस्रात्तु त्रिगु
णमूर्द्ध्वं हेमविधिः स्मृतः ॥ सर्वेषां धातुलोहानां हरणे कृच्छ्रमाचरेत् ॥ धान्यानां हरणे कृच्छ्रं तिलानामैंदवं स्मृ
तं ॥ रत्नानां हरणे विप्रश्चरेच्चांद्रायणव्रतमिति ॥ तदपि गवां सहस्रादधिकरजतहरणे सुवर्णस्तेयस
मप्रायश्चित्तप्रतिपादनार्थं ॥ न पुनस्तन्निवृत्त्यर्थं ॥ यदपि रत्नापहारे चांद्रायणमुक्तं ॥ तदपि गवां सहस्रा
दीनमूल्यरत्नापहारे द्रष्टव्यं ॥ ऊर्द्ध्वं पुनः सुवर्णस्तेयसमं ॥ इति सुवर्णस्तेयप्रायश्चित्तप्रकरणं ॥ उद्देशक्रमप्रा
प्तं गुरुतल्पगप्रायश्चित्तमाह ॥ तप्तेऽयः शयने सार्द्धमायस्या योषिता स्वपेत् ॥ गृहीत्वोत्कृत्य वृषणौ नैर्ऋत्यां
वोत्सृजेत्तनुं ॥ समा वा गुरुतल्पग इति वक्ष्यमाणश्लोकगतं गुरुतल्पगपदमत्र संबध्यते ॥ तप्तेऽयःशयने यथा ग म०
मरणक्षमं भवति ॥ तथा संतप्तेऽग्निवर्णीकृते कार्ष्णायसे शयने अयोमय्या स्त्रीप्रतिकृत्या तया सह गुरुतल्प १२७

गः स्वाप्यात् ॥ एवं सुस्वात्तनुं देहमुत्सृजेत् म्रियेतेति यावत् ॥ शयनं च गुर्वंगनागमनं मया कृतमित्येवं स्वक
र्म विख्याप्य कुर्यात् ॥ गुरुतल्प्यभिभाष्यैनः इति मनुस्मरणात् ॥ तथा स्त्रियमालिंग्य कार्यं ॥ गुरुतल्पगो ऽन्म
यीमायसीं वा स्त्रियाः प्रतिकृतिमग्निवर्णीकृत्वा कार्ष्णायसशयने तामालिंग्य मृतो भवतीति बृहद्धारीतस्मरणा
त् ॥ तथा मुंडितलोमकेशेन घृताभ्यक्तेन च कर्त्तव्यं ॥ निष्कालको घृताभ्यक्तस्तप्तां सूर्मीं परिष्वज्य मरणात्पू
तो भवतीति विज्ञायत इति वसिष्ठस्मरणात् ॥ न च गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयोमये ॥ सूर्मीं ज्वलंतीं
वाश्लिष्येन्मृत्युना स विशुध्यतीति मनुवाक्या ॥ नुरोधेन तप्तलोहशयनं तप्तलोहयोषिदालिंगनं च निरपेक्षं
प्रायश्चित्तद्वयमिति नाशंकनीयं ॥ आयस्या योषिता स्वपेत् ॥ कुत्रेत्याकांक्षायां तप्तेऽयःशयन इति परस्पर
सापेक्षतयैकत्वावगमादेककल्पत्वमेव युक्तं ॥ अथवा वृषणौ सलिंगौ स्वयमुत्कृत्य छित्वांजलिना गृहीत्वा
नैर्ऋत्यां दक्षिणप्रतीच्यां दिशि देहपातात्पर्यंतं कुटिलगतिर्गत्वा तनुमुत्सृजेत् ॥ यथाह मनुः ॥ स्वयं वा शि

श्नवृषणावुत्कृत्याधायचांजलौ।नैर्ऋतंदिशमातिष्ठेदानिपातादजिह्मगइति॥गमनवच्छेदनोऽनोक्षमा
१२८ लेनकर्त्तव्यं॥कृष्णेरेणशिश्नंवृषणावुत्कृत्यानवेक्षमाणोव्रजेदितिशंखलिखितस्मरणात्॥एवंगच्छतस्तत्रकु
ड्यादिनाप्रतिबद्धेनतत्रैवमरणांतंतिष्ठेत्॥सवृषणंशिश्नमुत्कृत्यांजलावाधायदक्षिणाभिमुखोगच्छेद्यत्रै
वप्रतिहतस्तत्रैवतिष्ठेदाप्रलयादितिष्ठेदाप्रलयादितिवशिष्ठस्मरणात्॥दंडोप्ययमेवयथाहनारदः
आसामन्यतमांगच्छन्गुरुतल्पगउच्यते॥शिश्नस्योत्कर्त्तनात्तत्रनान्योदंडोविधीयतइति॥एवंचदंडार्थमपि
लिंगाद्युत्कर्त्तनंपापक्षयार्थमपिभवति॥इयमेवचमरणांतिकंदंडमभिप्रेत्योक्तंमनुनाराजभिर्धृतदंडा
स्तुकृत्वापापानिमानवाः॥निर्मलाःस्वर्गमायांतिसंतःसुकृतिनोयथेति॥धनदंडेपुनप्रायश्चित्तंभवत्ये
व॥प्रायश्चित्तंतुकुर्वाणाःसर्वेवर्णायथोदितं॥अंक्याराज्ञाललाटेस्युर्दाप्यास्तूत्तमसाहसमितितेनैवोक्तत्वात् गम०
अनयोश्चमरणांतिकयोरन्यतरानुष्ठानेनगुरुतल्पगःशुध्येत्॥गुरुशब्दश्चात्रमुख्ययावृत्त्यापितरिव १२८

र्त्तते॥निषेकादीनिकर्माणियःकरोतियथाविधि॥संभावयतिचान्नेनसविप्रोगुरुरुच्यतइतिमनुनागुरुत्व
प्रतिपादनपरेवाक्येनिषेकादिकर्तुर्जनकस्यैवगुरुत्वाभिधानात्॥योगीश्वरेणचनिषेकादिकर्माभिप्राये
णोक्तं॥सगुरुर्यःक्रियाःकृत्वावेदमस्मैप्रयच्छतीति॥ननुगुरुशब्दस्यान्यत्रापिप्रयोगोदृश्यते॥उपनीयगुरु
ःशिष्यमित्यादिनाचार्ये॥स्वल्पंवाबहुवायस्यश्रुतस्योपकरोतियः॥तमपीहगुरुंविद्यादित्युपाध्याये॥
आसेनाप्यन्यत्रप्रयोगोदर्शितः॥गुरवोमातृपितृपत्न्याचार्यविद्यादातृज्येष्ठभ्रातरऋत्विजोभयत्रातान्न
दाताचेति॥नचानेकार्थकस्यनादोषः॥गुरुशब्दस्यप्रवृत्तिनिमित्तंमहत्तायाःप्रजाहतापाःसर्वत्रानुस्यूतः
दर्शितंचतस्याःप्रवृत्तिनिमित्तत्वंयोगीश्वरेणएतेमान्यायथापूर्वमेभ्योमातागरीयसीतिमान्याइत्युपक्रम
गरीयसीत्युपसंहारंकुर्वतानचोपाध्यायाद्दशाचार्यआचार्याच्छतंपितेत्युपाध्यायादधिकाचार्यात्पितुरति
शयितत्ववचनात्तएवमुख्याइतिवाच्यं॥आचार्याद्येष्वप्यतिशयितत्वस्याविशिष्टत्वात्॥उत्पादकब्रह्मदात्रोर्ग

१२९ रीयान्ब्रह्मदः पितेति॥ गौतमेनाप्युक्तं॥ आचार्यः श्रेष्ठो गुरूणामिति॥ किंच॥ यदि अतिशयितत्वमात्रेण
मुख्यत्वमुच्यते॥ तर्हि सहस्रमिति वचनान्मातुरेव गुरुत्वं स्यात्॥ तस्मात्सर्वे गुरवः॥ तत्पत्नीगमनं गुर्वंग
नागमनमिति युक्तं॥ उच्यते॥ निषेकादीनीति मनुवचनं निषेकादिकर्तुर्जनकस्य गुरुत्वप्रतिपादनमनप
रं॥ अनन्यपरत्वात्॥ यत्पुनर्व्यासगौतमवचनं॥ तत्परिचर्यापूजादिविधिशेषतयास्तुत्यर्थत्वेनान्यप
रं॥ अतो गुरुत्वप्रतिपादनपरान्निषेकादीनीति मनुवचनात्पितुरेव मुख्यं गुरुत्वमिति स्थितं॥ अतएव
वशिष्ठेनाचार्यपुत्रशिष्यभार्यासु चैवमित्याचार्यदारेष्वातिदेशिकं गुरुतल्पप्रायश्चित्तमुक्तं॥ तथाजा
तूकर्ण्यादिभिरप्युक्तं॥ आचार्यादेस्तु भार्यासु गुरुतल्पव्रतं चरेदित्यादि॥ आचार्यादेर्मुख्यगुरुत्वे तु परे
शएव व्रतआसेरतिदेशोऽनर्थकएव स्यात्॥ किंच॥ संवर्त्तेन स्पष्टमेव पितृदारग्रहणं कृतं पितृदारान् रा०म०
समारुह्य मातृवर्जं नराधम इति॥ षट्त्रिंशन्मतेपि॥ पितृभार्यां तु विज्ञाय सवर्णां योऽधिगच्छतीति॥ अतो १२९

पि निषेकादिकर्त्ता पितैव मुख्यो गुरुः॥ तच्च गुरुत्वं वर्णचतुष्टयेप्यविशिष्टं निषेकादिकर्तृत्वस्याविशेषात्॥
अतः स विप्रो गुरुरुच्यत इति विप्रग्रहणमुपलक्षणं॥ अतः पितृपत्नीगमनमेव महापातकं॥ गमनं च
चरमधातुविसर्गपर्यंतं कथ्यते॥ अतस्ततोर्वाग्निवृत्तौ न महापातकित्वं॥ तच्च वेदं तप्तेऽयःशयने सार्द्धमि
साद्युक्तं मरणांतिकं प्रायश्चित्तं द्रष्टव्यं॥ तच्च जनन्यामकामकृते॥ तत्सपत्न्यां तु वर्णायां उत्तमवर्णायां च काम
कृते द्रष्टव्यं॥ पितृभार्यां तु विज्ञाय सवर्णां योधिगच्छति॥ जननीं चाप्यविज्ञाय नामृतः शुद्धिमाप्नुयादिति षट्
त्रिंशन्मतेभिधानात्॥ जनन्यां तु कामतो वसिष्ठोक्तं निष्कालको घृताक्तो गोमयाग्निना पादप्रभृत्यात्मान
मेव दहेदिति द्रष्टव्यं॥ अकामतोभ्यासेप्येतदेव॥ ननु च मातुः सपत्नीं भगिनीमाचार्यातनयां तथा॥ आचार्य
पत्नीं स्वसुतां गच्छंस्तु गुरुतल्पग इति अतिदेशाभिधानान्मातृसपत्नीगमने त्वौपदेशिकं प्रायश्चित्तमयुक्तं
॥ उच्यते॥ पितृभार्यां सवर्णामित्यस्मादेव सवर्णग्रहणाद्धीनवर्णसपत्नीविषयमिदमातिदेशिकमिति न

१३० विरोधः॥इदं च मुख्यस्यैव पुत्रस्य इतरेषां पुनः पुत्रकार्यकरत्वमेव॥न पुत्रत्वं॥यथाह मनुः॥क्षेत्रजादी
न्सुतानेकादशयथोदितान्॥पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणइति तत्रोभयेछातः प्रवृत्तौ त
स्य ः शयनइति प्रथमं प्रायश्चित्तं॥स्वेन प्रोक्ता हनेतु गृहीत्वोकृत्सवृषणाविति द्वितीयं॥अनुबंधातिश
येन प्रायश्चित्तगुरुत्वस्येष्टत्वात्॥तथा प्रोक्तादितस्यतु मानवं तल्पोहशयनद्वाल्लमुर्म्यो लिंगनयोरन्यत
रस्मतरनद्रष्टव्यं यत्तु शंखेन द्वादशवार्षिकमुक्तं॥अधःशायीजटाधारीपर्णमूलफलाशनः॥एक
कालसमश्नन्वै वर्षे तद्वादशे गते। रुक्मस्तेयीसुरापश्चब्रह्महागुरुतल्पगः॥व्रतेनैतेन शुध्यंति महापात
किनस्त्विमइति॥तत्सवर्णोत्तमवर्णपित्न्दारगमने अकामकृते द्रष्टव्यं॥तत्रैव कामतः प्रवृत्तस्य रेतः से
कात्प्रागेव निवृत्तौ षड्वार्षिकं॥अकामतस्त्रिवार्षिकं जनन्यां तु कामतः प्रवृत्तस्य रेतः सेकात्प्राग्निवृत्तौ राम०
द्वादशवार्षिकं अकामतस्तु षड्वार्षिकमितिकल्प्यं॥यत्तु संवर्तेन॥गुरुदारान्समारुह्यमात्सवर्जं नराधम १३०

इत्यादिना समांरोहमाणं त्रैत सकृच्छ्र उक्तः सहीनवर्णगुरुदारेषु रेतः सेकादर्वाक् द्रष्टव्यः॥प्रायश्चित्तांतर
माह॥प्राजापत्यं चरेत्कृच्छ्रं समा वा गुरुतल्पगः॥चांद्रायणं वा त्रीन्मासानभ्यस्यन्वेदसंहितां॥अथवा प्राजाप
त्यं कृच्छ्रं वक्ष्यमाणलक्षणं समाः वर्षाणि पंच चरेत्॥एतच्च ब्राह्मणीपुत्रस्य शूद्रजातीयगुरुभार्यागमने मतिपू
र्वे द्रष्टव्यं॥यदानुगुरुपत्नी सवर्णा व्यभिचारिणी मवृद्धि पूर्वे गच्छति॥तदा वेदजपसहितं चांद्रायणं त्रयं कुर्या
त्त्रैव कामतः प्रवृत्तावेशनसं॥गुरुतल्पाभिगामी संवत्सरं ब्रह्महव्रतं षण्मासान्वा तप्तकृच्छ्रं चरेदिति॥
क्षत्रियागमने अनुमतिपूर्वं याज्ञवल्कीयं॥मातुः सपत्नीं भगिनीमाचार्यतनयां तथेति गुरुतल्पव्रतातिदेशा
त्त्रैवार्षिकं॥इदं चातिदेशिकं सवर्णगुरुभार्यागमनविषयं न भवति॥तत्र कामतो मरणांतिकस्याकामत
श्च द्वादशवार्षिकस्य विहितत्वात्॥अतः क्षत्रियादिविषयमेवेति युक्तं॥तत्रैव कामतोभ्यासे मरणांतिकं॥म
सागत्वा पुनर्भार्यां गुरोः क्षत्रसुतं द्विजः॥आंडाभ्यां सहितं लिंगमुत्कृत्य समरतः शुचिरिति कात्यवस्मरणात्॥अ

१३१ त्रैववर्णविषयेप्रायश्चित्तंप्रदानविकीर्षति॥तद्यच्छित्वाष्लिंगंवधस्तस्यसकामायाःस्त्रियास्तथेतियाज्ञवल्कीयो
वधदंडःप्रायश्चित्तस्थानेद्रष्टव्यः॥वैश्यायांतुगुरुभार्यायांकामतोगमनेषड्वार्षिकं॥अतएवब्रह्मसंतरं॥
ब्राह्मणीपुत्रस्यक्षत्रियायांमातरिगमनेपादहान्याद्वादशवार्षिकसेवमन्यवर्णास्विति॥अयमर्थः॥ब्रह्म
णीपुत्रस्यक्षत्रियायांमातुःसपत्न्यागमनेपादन्यूनंद्वादशवार्षिकं॥नववार्षिकमितियावत्॥तस्यैवतथा
भूतायांवैश्यायांषड्वार्षिकं॥शूद्रायांतुत्रिवार्षिकंप्रायश्चित्तमिति॥एवंक्षत्रियापुत्रस्यवैश्यायांमातरिन
ववार्षिकं॥शूद्रायांतुषड्वार्षिकं॥एवमेववैश्यापुत्रस्यापीतिवैश्यायांतुकामतोभ्यासेमर˜दांतिकमे
व॥गुरोर्भार्यांतुयोवैश्यांगत्वागच्छेत्पुनःपुनः॥लिंगाग्रंछेदयित्वातुततःशुद्ध्येत्तुकिल्बिषात्इतिलौ
गाक्षिस्मरणात्॥शूद्रायांतुकामतोभ्यासेद्वादशवार्षिकं॥पुनःशूद्रांगुरोर्गत्वाबुद्ध्याविप्रःसमाहितः राम० १३१
॥ब्रह्मचर्यामदुष्टात्मासचरेत्द्वादशाब्दिकमितिउपमन्युस्मरणात्॥क्षत्रियायांतुगुरुभार्यायामबुद्धिपूर्वग

मनेयमेनोक्तंत्रैवर्षमष्टमकालाशनंद्रष्टव्यं॥कालेऽष्टमेवाभुंजानोब्रह्मचारीसदाव्रती॥स्थानासना
भ्यांविहरंस्त्रिरह्नोभ्युपयन्नपः॥अधःशायीत्रिभिर्वर्षैस्तदपोहतिपातकमिति॥अत्रैवाभ्यासेजातूकर्ण्यो
क्तं॥गुरोःक्षत्रसुतांभार्यांपुनर्गत्वाचकामतः॥अंडमात्रंसमुत्कृत्यशुध्येज्जीवन्मृतोपिवेति॥वैश्यायांत्वका
मतोगमनेप्राजापत्यंचरेत्कृच्छ्रमित्येतदेवयाज्ञवल्कीयं॥तथाचवृद्धमनुःगमनेगुरुभार्यायांपितृभार्याग
मेतथा॥अब्दत्रयमकामात्तुकृच्छ्रंनित्यंसमाचरेदिति॥तत्रैवाभ्यासेहारीतोक्तंमरणांतिकंब्रह्मचर्यं॥अ
भ्यस्यविप्रोवैश्यायांगुरोरज्ञानमोहितः॥षडंगंब्रह्मचर्यंचसंचरेद्यावदायुषमिति॥गुरुभार्यायांशूद्रायांत्व
मतिपूर्वंमानवं॥खट्वांगीचीरवासावाश्मश्रुलोविजनेवने॥प्राजापत्यंचरेत्कृच्छ्रमब्दमेकंसमाहितइति॥अथवा
गुरुदाराभिगामीसंवत्सरंकंटकिनींशाखांपरिष्वज्याधःशायीत्रिषवणीभैक्षाहारःपूतोभवतीतिसुमंतूक्तंक
र्यात्॥तत्रैवाभ्यासेमानवं॥चांद्रायणंवात्रीन्मासानभ्यसेन्नियतेंद्रियइति क्षत्रियायांकामतःप्रवृत्तस्यरेतः

१३२ सेकात्सर्वोग्निवृत्तौ व्याघ्रोक्तं॥ कृच्छ्रं चैवातिकृच्छ्रं वा तथा कृच्छ्रातिकृच्छ्रकं चरेन्मासत्रयं विप्रः क्षत्रियागमने
गुरोरिति॥ अत्रेयं व्यवस्था॥ तथा प्रोत्साहितस्य त्रैमासिकं प्राजापत्यचरणं उभयेच्छातः प्रवृत्तस्यातिकृच्छ्र
चरणं तावदेव॥ स्वेन प्रोत्साहितायां पुनः कृच्छ्रातिकृच्छ्रानुष्ठानं च तावदेवेति॥ तत्रैव कामतः प्रवृत्तस्य रे
तः सेकात्सर्वं करावोक्तं द्रष्टव्यं॥ चान्द्रायणं तप्तकृच्छ्रमतिकृच्छ्रं तथैव च॥ सकृद्गत्वा गुरोर्भार्यामज्ञानात्क्ष
त्रियां द्विज इति॥ तथा प्रोत्साहितस्यातिकृच्छ्रः उभयेच्छातः प्रवृत्तस्य तप्तकृच्छ्रः स्वेन प्रोत्साहितायां तु चान्द्रा
यणम्॥ वैश्यायां कामतः प्रवृत्तस्य रेतःसेकात्सर्वे निवृत्तौ करावोक्तं द्रष्टव्यम्॥ तप्तकृच्छ्रं पराकं च तथा
सांतपनं गुरोः॥ भार्यां वैश्यां सकृद्गत्वा कुर्यान्मासं चरेद्द्विज इति॥ अत्रोभयोरिच्छातः प्रवृत्तौ तप्तकृच्छ्रः॥
स्वेन प्रोत्साहितायां पराकः॥ तथा प्रोत्साहितस्य सांतपनं॥ अत्रैवाकामतः प्रवृत्तस्य प्रजापतिराह॥ पं राम०
चरात्रं तु नाश्नीयात्सप्ताहं वा तथैव च॥ वैश्यां भार्यां गुरोर्गत्वा सकृदज्ञानतो द्विज इति॥ तथा प्रोत्साहित १३२

DR. BHAU DAJI MEMORIAL

स्य तु पंचरात्रं॥ उभयेच्छातः प्रवृत्तौ सप्तरात्रं॥ स्वेन प्रोत्साहितायामष्टरात्रं॥ शूद्रायां कामतः प्रवृत्तस्य रेतः
सेकात्सर्वे निवृत्तौ जाबालिराह॥ अतिकृच्छ्रं तप्तकृच्छ्रं पराकं च तथैव च॥ गुरोः शूद्रां सकृद्गत्वा कुर्याद्वि
प्रः समाचरेदिति॥ तथा प्रोत्साहितस्यातिकृच्छ्रः॥ उभयेच्छातः प्रवृत्तौ तप्तकृच्छ्रः॥ स्वेन प्रोत्साहितायां प
राकः॥ तत्रैवाकामतः प्रवृत्तस्यैव दीर्घतमसां प्राजापत्यं सांतपनं सप्तरात्रोपवासिकं॥ गुरोः शूद्रां सकृद्ग
त्वाचरेद्विप्रः समाहित इति॥ तथा प्रोत्साहितस्य प्राजापत्यं॥ उभयोरिच्छातः प्रवृत्तौ सान्तपनं॥ स्वेन प्रो
त्साहितायां सप्तरात्रोपवास इति॥ अनयैव दिशान्येषामपि स्मृतिवचसां विषयव्यवस्थोहनीया॥ पुरुष
वच्च स्त्रीणामप्यत्र महापातकित्वमविशिष्टं॥ तथाहि कात्यायनः॥ एष दोषश्च श्वश्रूद्विश्वपतिनानामुदा
हृता॥ स्त्रीणामपि प्रसक्तानामेष एव विधिः स्मृतः इति॥ आततस्स्या अपि कामतः प्रवृत्तौ मरणांतिक
मविशिष्टं॥ अत एव पुरुषस्य मरणांतिकमुक्त्वा स्त्रिया अपि योगीश्वरेण मरणांतिकं दर्शितं॥ छित्वा लिंगं

१३३ वधस्तपस्यसकामायाःस्त्रियास्तथेति॥अकामतस्तुमनुनोक्तं॥एतदेवव्रतंकार्यंयोषित्सुपतितास्वपीति
द्वादशवार्षिकमेवाद्दकल्पनयाकार्यायातिपुनर्गुरुतल्पसमानि॥सखिभार्याकुमारीषुस्वयोनिष्वंत्य
जासुच॥सगोत्रासुसुतस्त्रीषुगुरुतल्पसमंस्मृतमितिप्रतिपादितानि॥यानिचातिदेशविषयभूता
नि॥पितुःस्वसारंमातुश्चमातुलानींस्नुषामपि॥मातुःसपत्नीभगिनींआचार्यतनयांतथा॥आचा
र्यपत्नींस्वसुतांगच्छंस्तुगुरुतल्पगइतिप्रतिपादितानि॥तेष्वेकरात्रादूर्ध्वमकामतोऽभ्यस्तेषुयथाक्र
मेणषड्वार्षिकंनववार्षिकंचप्रायश्चित्तंविज्ञेयं॥अस्मिन्नेवविषयेकामतोसंताभ्यासेमरणांतिकं॥त
थाचवृहद्यमः॥रेतःसिक्त्वाकुमारीषुस्वयोनिष्वंत्यजासुच॥सपिंडापत्यदारेषुप्राणत्यागोविधीयत
इति॥अंत्यजाश्चात्र॥चंडालःश्वपचःक्षत्तासूतोवैदेहकस्तथा॥मागधायोगवौचैवसप्तैतेंऽत्याव राम०
सायिनःइतिमध्यमांगिरोदर्शिताद्रष्टव्याः॥नतुरजकश्चर्मकारश्चेत्यादिप्रतिपादिताः॥तेषुसप्तसुप्रा १३३

यश्चित्तस्योक्तत्वात्॥तथाचांडालांत्यस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यच॥पतत्यज्ञानतोविप्रोज्ञानात्साम्यंतु
गच्छतीतिचंडालादिसाम्यंप्रतिपादयतामनुनापिकामतोऽसंताभ्यासेमरणांतिकंदर्शितं॥तथाप्यज्ञानत
श्चंडालीगमनाभ्यासेपततस्ततःपतितप्रायश्चित्तंद्वादशवार्षिकंकुर्यात्॥कामतोसंताभ्यासेचांडालैःसा
म्यंगच्छति॥अतोद्वादशवार्षिकानधिकारान्मरणांतिकंकुर्यात्॥एतच्चबहुकालाभ्यासविषयं॥एकरा
त्राभ्यासेतुवर्षत्रयं॥यथाहमनुः॥यत्करोत्येकरात्रेणवृषलीसेवनाद्द्विजः॥तद्भैक्ष्यभुग्जपन्नित्यंत्रि
भिर्वर्षैर्व्यपोहतीति॥अत्रवृषलीशब्देनचंडाल्यभिधीयते॥चंडालीबंधकीवेश्यारजःस्थाचाचकन्य
का॥ऊढयाचसगोत्रास्याद्वृषल्यःपंचकीर्तिताइतिस्मृत्यंतरेचांडाल्यांवृषलीशब्दप्रयोगदर्शनात्॥बंध
कीस्वैरिणी॥कथंपुनरत्राभ्यासावगमः॥उच्यते॥यत्करोत्येकरात्रेणेत्यसंततसंयोगापवर्गवाचिन्यात्त
तीयायाद्दर्शनात्॥एकरात्रेणत्वासंततसंयोगेगमनाभ्यासंविनाअनुपपन्नइतिगमनाभ्यासोवगम्यते॥

१३४ अतएवैकरात्राद्बहुलाभ्यासविषयंप्रागुक्तंद्वादशवार्षिकादिगुरुतल्पव्रतातिदेशिकंमरणांतिकंच॥यदा
पुनर्ज्ञानतोऽज्ञानतोवाचंडाल्याद्याःसकृद्गच्छति॥तदा॥चंडालपुल्कसानांतुभुक्त्वागत्वाचयोषितं॥कृ
च्छ्राब्दमाचरेत्ज्ञानात्अज्ञानादैंदवद्वयमितियमोक्तंसंवत्सरकृच्छ्रानुष्ठानंचांद्रायणद्वयंयथाक्रम
णद्रष्टव्यं॥स्वयोनिष्वंत्यजासुचैसैकवाक्यसमभिव्याहाराद्भगिन्यादिष्वपीयसेवव्यवस्थावेदितव्या॥
मरणांतिकंचात्राग्निप्रवेशनं॥जनन्यांचभगिन्यांचस्वसुतायांतथैवच॥स्नुषायांगमनेचैवविज्ञेयम
तिपातकं॥अतिपातकिनस्तेतेप्रविशेयुर्हुताशनमितिकात्यायनस्मरणात्॥जनन्यांसकृद्गमनेभगि
न्यादिषुवासकृद्गमनेअग्निप्रवेशइतिद्रष्टव्यं॥महापातकस्यजननीगमनस्यतदतिदेशविषयभूताति
पातकस्यभगिन्यादिषुवासकृद्गमनेअग्निप्रवेशइतिद्रष्टव्यं॥महापातकस्यजननीगमनस्यतदति राम०
देशविषयभूतातिपातकस्यभगिन्यादिगमनस्यचतुल्यत्वायोगात्॥यत्तुबृहद्यमेनोक्तं॥चांडालीपुल्क १३४

सीम्लेच्छीस्नुषांचभगिनीसखीमातापित्रोःस्वसारंचनिक्षिप्तांशरणागतां॥मातुलानींप्रव्रजितांसगोत्रांन
पयोषितं॥शिष्यभार्यांगुरोर्भार्यांगत्वाचांद्रायणंचरेदिति॥यच्चांगिरोवचनंपतितांसत्त्रियोगत्वाभुक्त्वाच
प्रतिगृह्यच॥मासोपवासंकुर्वीतचांद्रायणमथापिवेति॥तदुभयमपिगुरुतल्पातिदेशविषयेष्वकामतःप्र
वृत्तस्यरेतःसेकादर्वाग्निवृत्तौद्रष्टव्यं॥यदपिसंवर्त्तवचनं॥भगिनींमातुराप्तांचस्वसारंचान्यमातृजां॥एता
यत्तास्त्रियोमोहात्सकृद्गत्वासमाचरेदिति॥तदनंतरोक्तएवविषयेअकामतःप्रवृत्तस्यरेतःसेकादर्वाग्द्र
ष्टव्यं॥यदापुनरेताएवास्वंतव्यभिचारिणीर्गच्छति॥तदापीदमेवप्रायश्चित्तयुगलंचांद्रायणतप्तकृच्छ्रा
त्मकंक्रमेणकामतोऽकामतश्चप्रवृत्तेद्रष्टव्यं साधारणस्त्रीषुगुरुणोपभुक्तास्वपिगमनेगुरुतल्पदोषो
नास्ति॥जातूकर्ण्यःपारदार्यंचकान्यांदूषणमेवच॥साधारणस्त्रियोनास्तिगुरुतल्पत्वमेवचेतिव्यासस्म
रणात्एवमन्यान्यपिस्मृतिवचनान्युच्चावचप्रायश्चित्तप्रतिपत्तिपराण्यविषयव्यवस्थोहनीयानि

१३५ थगौरवभयान्नलिख्यते॥ ॥इतिगुरुतल्पप्रायश्चित्तप्रकरणं॥ ॥एवंब्रह्महत्यादिमहापातकिप्राय
श्चित्तमभिधायावसरप्राप्तंतत्संसर्गिप्रायश्चित्तमाह॥एभिस्तुसंवसेद्योवैवत्सरंसोपितत्समः॥एभिः
पूर्वोक्तैर्ब्रह्महादिभिरेकंसंवत्सरंयोऽसंतंसंवसतिसहाचरतिसोपितत्समः॥योयेनसहाचरतिसोपि
तदीयमेवप्रायश्चित्तंकुर्यादितितदीयप्रायश्चित्तातिदेशार्थंतत्समग्रहणं॥नपुनःपातकित्वातिदेशा
र्थं॥तस्यपश्चात्तैःसहसंवसेदित्यपदेशतएवसिद्धत्वात्॥अत्रचसमत्वातिदेशत्वेकृत्स्नमेवद्वादश
वार्षिककार्यं॥साक्षान्महापातकित्वात्संसर्गिणः॥अविशेषात्तत्रकेवलंमहापातकिसंयोगीतत्समःकिं
वातिपातकानुपपातक्यादीनांमध्येयोयेनसहसंसर्गंकरोतिसोपितत्समइतितदीयमेवप्रायश्चित्तंकुर्या
दितिदर्शयति॥अतएवमनुनासकलंप्रायश्चित्तजातमभिधायान्तेऽभिहितं योयेनपतितेनैषांसंसर्गं राम०
यातिमानवः॥सतस्यैवव्रतंकुर्यात्तत्संसर्गविशुद्धयइति॥विष्णुनापिसामान्येनोपपातक्याधनस्विमात्र १३५

संसर्गेतत्प्रायश्चित्तभाक्त्वंदर्शितं॥पापात्मनायेनसहयःसंसृज्येतसतस्यैवव्रतंकुर्यादिति॥अतएवम
नुनासामान्येनैवस्विमात्राप्रतिषेधःकृतः॥एरनस्विभिरनिर्णिक्तैर्नार्थंकंचित्समाचरेदिति॥तथानसं
सर्गंभजेत्सद्भिःप्रायश्चित्तेऽकृतेसतीतिच॥एतच्चद्वादशवार्षिकादिपतितप्रायश्चित्तंबुद्धिपूर्वसंस
र्गविषयं॥पतितेनसहोषित्वाज्ञानात्संवत्सरंनरः॥मिश्रितस्तेनसोऽब्दान्तेस्वयंचपतितोभवेदितिदेव
लस्मरणात्॥अज्ञानतःसंसर्गेपुनर्वसिष्ठोक्तं॥पतितसंप्रयोगेनब्राह्मणवायौनेनवायास्तेभ्यःसकाशा
न्मात्राउपलब्धास्तासांपरित्यागस्तैश्चनसंवसेदुदीचींदिशंगत्वाऽनश्नत्संहिताध्ययनमधीयानःपूतोभ
वतीतिविज्ञायतइति॥तथा॥ब्रह्महामद्यपःस्तेनस्तथैवगुरुतल्पगः॥एतेमहापातकिनोयश्चतैःसह
संवसेदितितेष्वितिसर्वनामपरामृष्टप्रकृतब्रह्महादिचतुष्टयसंसर्गिणएवमहापातकित्ववचनात्तत्संस
र्गिणोनमहापातकित्वं॥ननुमहापातकिसंसर्गएवमहापातकत्वेहेतुर्नब्रह्महादिविशेषसंसर्गः॥न

१३६ स्यव्यभिचारात्॥ अतो ब्रह्महादिसंसर्गिसंसर्गिणोपि महापातकिसंसर्गोपि विद्यत इति तस्यापि महापात
कित्वं स्यान्न च प्रतिषेधः श्रूयते॥ स्यादेयवदिप्रमाणांतरगम्यं महापातकित्वं स्यात्॥ शब्दैकसमधिगम्य
न्तु तस्मिन्नेवं भवितुमर्हतीति तैरिति प्रकृतविशेषपरामर्शिना सर्वनाम्ना ब्रह्महादिविशेषसंसर्गस्यैव
महापातकित्वस्यावगमितत्वात्॥ एवं सत्यसति प्रतिषेधाभावो हेतुप्रासभावादेव॥ अतः संसर्गिणां
द्विजातिकर्मभ्यो हानिर्न भवति॥ प्रायश्चित्तं तु भवत्येव॥ न च संसर्गिसंसर्गिणः पातित्याभावे कथं प्रा
यश्चित्तमिति वाच्यं॥ एनस्विभिरनिर्णिक्तैर्नार्थं कंचित्समाचरेदिति सामान्येनैनस्विमात्रसंसर्गप्रतिषे
धेन महापातकिसंसर्गिसंसर्गस्यापि प्रतिषिद्धत्वात्पातित्याभावेपि युक्तमेव प्रायश्चित्तं॥ तच्च पादहीनं॥
यो येन संवसेद्वर्षं सोपि तत्समतामियात्॥ पादहीनं चरेत्सोपि तस्य तस्य व्रतं द्विज इति व्यासोक्तेः द्रष्टव्यं रा०प्र०
॥ एवं चतुर्थपंचमयोरपि कामतः संसर्गिणोर्द्धहीनं त्रिपादोनं च द्रष्टव्यं॥ अतः साक्षाद्ब्रह्महादिसंस १३६

र्गिण एव तदीयप्रायश्चित्ताधिकारो न संसर्गिण इति सिद्धं॥ अत्र ब्रह्महादिषु यद्यपि कामतो मरणांतिक
मुपदिष्टं तथापि संसर्गिणस्तन्नातिदिश्यते॥ स तस्यैव व्रतं कुर्यादिति व्रतस्यैवातिदेशात्॥ मरणस्य च व्रत
शब्दवाच्यत्वाभावात्॥ अतोत्र कामकृतेपि संसर्गे द्वादशवार्षिकमकामतस्तदर्द्धं संसर्गश्च स्वनिबंधन
कर्मभेदादनेकधाभिधीयते॥ यथाह बृहस्पतिः एकशय्यासनं पंक्तिर्भांडपंक्त्यन्नमिश्रणं॥ याजनाध्या
पने योनिस्तथा च सहभोजनं॥ नवधा संकरः प्रोक्तो न कर्त्तव्योऽधमैः सहेति॥ देवलोपि॥ संलापस्पर्शनि
श्वाससहयानासनाशनात्॥ याजनाध्यापनाद्यौनात्पापं संक्रमते नृणामिति॥ एकशय्यासनमेकख
ट्वाशयनमेकपंक्तिभोजनं॥ एकभांडपचनमन्नेनमिश्रणं संसर्गस्तदीयान्नभोजनमिति यावत्॥ याजनं प
तितस्य स्वस्य वा तेन अध्यापनं तस्य स्वस्य वा तेन॥ यौनं तस्मै कन्यादानं तत्सकाशाद्वा कन्यायाः प्रतिग्रहः
॥ संभाषणं॥ स्पर्शो गात्रसंमर्द्दः निःश्वासः पतितमुखवायुसंपर्कः॥ सहयानमेकतुरगाद्यारोहणं॥ ए

१३७ पांमध्येकेनकर्मणाकियताकालेनपातित्यमपेक्षायामाहबृहद्विष्णुनोक्तं॥ संवत्सरेणपततितेनसहाचरन्नेक
पानभोजनासनशयनैर्यौनस्रौवमुख्यैस्तुसंबंधैः सद्यएवेति॥ अत्रैकभोजनमेकपंक्तिभोजनं॥ एकाम
त्रभोजनेतुसद्यःपातित्यं॥ याजनंयोनिसंबंधंस्वाध्यायंसहभोजनंकृत्वासद्यःपतत्येवपतितेनसंश
यइतिदेवलस्मरणात्॥ स्रौवशब्देनयाजनमभिधीयते॥ मुख्यशब्देनमुखभवत्वेनाध्यापनं॥ यौनस्रौ
वमुख्यैरितिसमस्तपदनिर्देशप्रत्येकमेवतेषांसद्यःपतनहेतुत्वं॥ यःपतितैःसहयौनंमुख्यस्रौवा
णांसंबंधानामन्यतमंसंबंधंकुर्यात्तस्याप्येतदेवप्रायश्चित्तमितिसुमंतुस्मरणात्॥ एकपानादिचतुष्ट
यस्यतुसमुदितस्यैवपतनहेतुत्वं॥ एकयानभोजनासनशयनैरितिइतरेतरयुक्तानांनिर्देशात्॥ प्रत्ये
कानुष्ठानस्यतुपतनहेतुत्वाभावेपिदोषहेतुत्वमस्त्येव॥ आसनाच्छयनाद्यानात्संभाषात्सहभोजना रा म०
त्संक्रमंतिहिपापानितैलबिंदुरिवांभसीतिपराशरवचनेननिरपेक्षाणामपिपापहेतुत्वावगमात् १३७

MEMORIAL

संलापस्पर्शनिःश्वासानांतुयानादिचतुष्टयेनानुषंगिकतयासमुच्चितानामेवपतनहेतुत्वंनपृथगप्र
सक्तानामसत्वात्॥ पापहेतुत्वंपुनरस्त्येव॥ ॥संलापस्पर्शनिःश्वासेतिदेवलवचनस्यदर्शितत्वात्॥ अ
तःसंलापादिरहितेसहयानादिचतुष्टयेकृतेपंचमभागोनंद्वादशवार्षिकंप्रायश्चित्तंकुर्यात्तत्सहितेतु
पूर्वोक्तं॥ एवंचसंसर्गेभिरूक्तसंवसेद्योवैवत्सरंसोपितत्समइतियोगीश्वरवचनमपिसहयानादिचतुष्टय
परमेवयुक्तं॥ यतःसंलापादीनांपृथक्पातित्यहेतुत्वंनास्त्यतएवमनुना॥ संवत्सरेणपततिपतितेन
सहाचरन्॥ याजनाध्यापनाद्यौनान्नतुयानासनाशनादिति॥ यानादिचतुष्टयस्यैवसंवत्सरेणपातित्यहेतुतो
क्ता॥ अत्रासनग्रहणंशयनस्योपलक्षणं॥ अत्रचसंवत्सरेणपततितेनसहाचरन्यानासनाशनादि
तिव्यवहितेनसंबंधः॥ प्राक्दर्शितविष्णुवचनानुरोधात्॥ संवत्सरेणपततिपतितेनसहाचरन्॥ भो
जनासनशय्यादिकुर्वाणःसार्वकालिकमितिदेवलवचनाच्च॥ नचानन्वयदोषः॥ यानासनाशनादिहि

१३८ तोराचरन्नाचारंकुर्वन्निति भेदविवक्षयासंबंधोपपत्तेः॥ यथैतया पुनराधेयसंमितयेष्टेति॥ यद्वा
आचरन्निति शत्राहेत्वर्थस्यगमितत्वात्॥ यानाशनासनादिति द्वितीयार्थे पंचमी॥ याजनाध्यायनयौ
नात्वनुसंवत्सरेणपततीति॥ किंतुसद्य एव॥ प्राचीनवचननिचयानुरोधादेव॥ अतो योनादिचतुष्टयेन
संसृष्टः सद्यपतति॥ यानादिचतुष्टयेनतुसंवत्सरेतिरंतराभ्यासेनेतियुक्तं॥ वत्सरंसोपितत्समइति
असंतसंयोगवाचिन्याद्वितीयायाःदर्शनात् अंतरितदिवसगणनाकार्यायथाषष्ठ्यधिकशतत्रय
दिवसव्यापित्वंसंसर्गस्यभवति॥ ततोन्यूनेनतुनपततिनप्रायश्चित्तं॥ किंत्वन्यदेव॥ यथाहपराशरः॥
संसर्गमाचरन्विप्रः पतितादिष्वकामतः॥ पंचाहंवादशाहंवाद्वादशाहमथापिवा॥ मासार्द्धंमासमेकं
वामासत्रयमथापिवा॥ अब्दार्द्धमब्दमेकंवाभवेदूर्ध्वंतुतत्समः॥ त्रिरात्रंप्रथमेपक्षेद्वितीयेकृच्छ्रमाच राम०
रेत्॥ चरेत्सांतपनंकृच्छ्रंतृतीयेपक्षएवतु॥ चतुर्थेदशरात्रंस्यात्पराकःपंचमेमतः॥ षष्ठेचांद्रायणं १३८

कुर्यात्सप्तमेत्वैंदवद्वयं॥ अष्टमेवातथापक्षेषण्मासान्कृच्छ्रमाचरेदिति॥ कामतःसंसर्गेपुनर्विशेषः
स्मृत्यंतरेभिहितः पंचाहेतुचरेत्कृच्छ्रंदशाहेतप्तकृच्छ्रकं॥ पराकस्त्वर्द्धमासेस्यान्मासेचांद्रायणंचरेदि
ति॥ मासत्रयेतुकुर्वीतकृच्छ्रंचांद्रायणोत्तरं॥ षाण्मासिकेतुसंसर्गेकृच्छ्रंत्वब्दार्द्धमाचरेत्॥ संसर्गेत्वा
ब्दिकेकुर्याद्द्वयंचांद्रायणंनरः॥ अत्रवाब्दिकेसंसर्गइतिकिंचित्न्यूनइतिद्रष्टव्यं॥ पूर्णेतुवत्सरेमन्वा
दिभिर्द्वादशवार्षिकस्मरणात्॥ यत्तुबार्हस्पत्यवचनं॥ षाण्मासिकेतुसंसर्गेयाजनाध्यापनादिना॥ ए
कत्राशनशय्याभिः प्रायश्चित्तार्द्धमाचरेदिति॥ याजनाध्यापनयौनैकपात्रभोजनानांषाण्मासास्या
तिसवचनमेतदकामतोसंतापदिपंचमहायज्ञादिप्रायेयाजनेअंगाध्यापनेदुहितृभगिनीव्यतिरिक्ते
चयोनिसंबंधेद्रष्टव्यं॥ प्रकृष्टयाजनादिभिःसद्यःपातित्यस्योक्तत्वात्॥ एतद्विगवलंबनेनैवदुहितृभ
गिनीस्नुषागाम्यतिपातकिसंसर्गिणांकामतोनववार्षिकं॥ अकामतःसार्द्धचतुर्वार्षिकंकल्पनीयं॥ स

१३९ स्त्रियपितृव्यघातादिपातकिसंसर्गिणां कामतः षड्वार्षिकमकामतस्त्रिवार्षिकं॥तथोपपातक्यादिसंसर्गि
णामपिकामतस्तदीयमेवत्रैवार्षिकमकामतोऽर्द्धमित्यूहनीयं॥पुरुषवत्स्त्रीणामपिह्रापातक्यादि
संसर्गात्प्रातिसमविशिष्टं॥यथाहशौनकः॥पुरुषस्ययानियतनमित्तानिस्त्रीणामपितान्येव॥ब्रा
ह्मणीहीनवर्णासेवायामधिकंपततीति॥अतस्तासामपिमहापातकिप्रभृतीनांमध्येयेनसहसंस
र्गस्तदीयमेवप्रायश्चित्तमर्द्धंहसायोजनीयं॥एवंबालवृद्धातुराणामपिकामतोऽर्द्धमकामतःपादः
॥तथाअनुपनीतस्यापिबालस्यकामतःपादोऽकामतस्तदर्द्धमित्येषादिक्॥पतितसंसर्गप्रतिषेधेनप्र
तिषिद्धस्ययौनसंबंधस्यचित्प्रतिप्रसवमाह॥कन्यांसमुद्वहेदेषांसोपवासामकिंचनां॥एषांपतिता
नांकन्यांपतितावस्थायामुत्पन्नांसोपवासांकृततत्संसर्गकालोचितप्रायश्चित्तामकिंचनामगृहीतव ग्रम० १३९
स्त्रालंकारादिपितृधनामुद्वहेत्॥कन्यांसमुद्वहेदितिवदनस्वयमेवकन्यांस्वकृतपतितसंसर्गासमुद्वहे

यथोक्ताचरितप्रायश्चित्तांस्वतएवप्राप्तांतस्यास्तुकिमपिनगृह्णन्त्वित्यर्थः।

न्नपुनःपतितस्तास्यतिगृह्णीयादितिदर्शयति॥एवंचसतिपतितयौनसंसर्गप्रतिषेधविरोधोपिपरि
हृतोभवति॥अयंचार्थोवृहद्धारीतेनस्पष्टीकृतः॥पतितस्यतुकुमारीविवस्त्रामहोरात्रमुपोषितांप्रातःशु
क्लेनाहतेनवाससाच्छादितांनाहमेतेषांनममैतइतित्रिरुच्चैरभिदधानांतीर्थेस्वगृहेवोद्वहेदिति॥तथा॥
एषांकन्यांसमुद्वहेदितिवचनात्स्त्रीव्यतिरिक्ततदीयापत्यस्यसंसर्गोनहेतोदर्शयति॥अतएववसिष्ठः
पतितेनोत्पन्नःपतितोभवत्यन्यत्रस्त्रियाःसाहिपरगामिनीतामरिक्थामुपेयादिति॥इतिसंसर्गिप्रायश्चि
त्तप्रकरणं॥निषिद्धसंसर्गप्रायश्चित्तप्रसंगान्निषिद्धसंसर्गोत्पन्नप्रतिलोमवधेप्रायश्चित्तमाह॥चांद्राय
णंचरेत्सर्वानवकृष्टान्निहत्यतु॥अवकृष्टाःसूतमागधादयः॥प्रतिलोमोत्पन्नास्तेषांप्रत्येकंहननेचांद्रायणं
॥तथाचशंखः॥सर्वेषामवशिष्टानांवधेप्रत्येकंचांद्रायणमिति॥यत्त्वांगिरसोक्तंसर्वासजातानांगमनेभोजनेसं
प्रमापणे॥पराकेणविशुद्धिःस्यादित्यांगिरसभाषितमितिपराकंकुर्यात्॥तत्रकामतःसूतादिवधेचांद्रायणं

१४० अकामतस्सूतादिवधे पराकः॥वैदेहकवधे पादोनः॥चंडालवधे द्विपादः॥मागधे पादोनः पराकः॥क्ष
त्तरि द्विपादः॥आयोगवे च पादद्वयं॥अनयैव दिशा चांद्रायणस्यापि तारतम्यं कल्प्यं॥यत्तु ब्रह्मगर्भवच
न॥प्रतिलोमप्रसूतानां स्त्रीणां मासावधिः स्मृतः॥अंतरप्रभवाणां च सूतादीनां चतुर्द्विषडिति तदावृत्ति
विषयं॥तत्र सूतवधे षण्मासाः॥वैदेहकवधे चत्वारश्चांडालवधे द्वाविति योग्यतमान्वयः॥तथा मागध
वधे चत्वारः॥क्षत्तरि द्विमासिकमायोगवे चैकमासिकमिति व्यवस्था॥नैमित्तिकव्रतानां जपादिसाध्यत्वा
द्विधाविरहिणां च शूद्रादीनां तदनुपपत्ते राज्यावेक्षणादिसाध्येष्टिवांधानानमधिकारशमांक्याह॥शूद्रो
धिकारहीनोपि कालेनानेन शुध्यति यद्यपि शूद्रो जपाद्यधिकाररहितस्तथाप्यनेन द्वादशवार्षिकादिकाल
संपाद्यतेन व्रतेन शुध्यति॥शूद्रग्रहणं स्त्रीणां प्रतिलोमजानां चोपलक्षणं॥यद्यपि तस्य गायत्र्यादिजपासं राम०
भवस्तथापि नमस्कारमंत्रजपो भवति॥अतएव स्मृत्यंतरे विहितं॥उच्छिष्टं चास्य भोजनमनुज्ञातोस्य नमस्का १४०

रो मंत्र इति॥यद्वा वचनबलाज्जपादिवर्जितमेव व्रतं कुर्वीत॥तस्मात् शूद्रं समासाद्य सदा धर्मपथे स्थितं॥
प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितम्॥अंगिरःस्मरणात्॥तथापरमपि तेनैवोक्तं॥शूद्रः कालेन शुध्ये
त् गोब्राह्मणहिते रतः॥दानैर्वाप्युपवासैर्वा द्विजशुश्रूषया तथेति॥यत्तु मानवं॥न चास्योपदिशेद्धर्मं न चा
स्य व्रतमादिशेदिति शूद्रस्य व्रतोपदेशनिषेधपरं वचनं तदनुपसन्नशूद्राभिप्रायं॥यदपि स्मृत्यंतरवच
नं॥कृच्छ्राण्येतानि कार्याणि सदा वर्णत्रयेण तु॥कृच्छ्रेष्वेतेषु शूद्रस्य नाधिकारो विधीयत इति॥तत्काम्यकृ
च्छ्राभिप्रायं॥अतः स्त्रीशूद्रयोः प्रतिलोमजानां च त्रैवर्णिकवद्व्रताधिकार इति सिद्धं॥यत्तु गौतमवचनं॥प्र
तिलोमा धर्महीना इति तदुपनयनादिविशिष्टधर्माभिप्रायं॥इति महापातकप्रायश्चित्तप्रकरणं॥महापात
कादिषु चक्रमध्ये महापातकातिपातकानुपातकप्रायश्चित्तान्युक्त्वा पुनरुपपातकप्रायश्चित्तानि व्याच
क्षाणः पाठक्रमप्राप्तं गोवधप्रायश्चित्तं तावदाह॥पंचगव्यं पिबेद्गोघ्नो मासमासीत संयतः॥गोष्ठेशयो गो

१४१ नुगामीगोप्रदानेनशुध्यति॥कृच्छ्रंचैवातिकृच्छ्रंचचरेद्वापिसमाहितः॥दद्यात्त्रिरात्रंचोपोष्यवृषभैका
दशास्तुगाः॥गांहंतीतिगोघ्नः॥मूलविभुजादित्वात्कप्रत्ययः॥असौमासंसमाहितःआसीत॥किंकुर्व
न्॥पंचगव्यंपिबन्॥पंचसंख्यानिगव्यानि॥गोमूत्रगोमयक्षीरदधिघृतानियथाविधिमिश्रितानिपि
बन्आहारांतरपरित्यागेनभोजनकार्येतस्यविधानात्॥तथागोष्ठेशयः॥प्रासशयनानुवादेनगोष्ठविधा
नाद्दिवास्वापप्रतिषेधाद्रात्रौगोशालायांशयानः॥गाअनुगच्छतितदस्यव्रतमितिगोनुगामीतिव्र
तेणिनिः॥अतश्चयांसागोष्ठेशेतेःसन्निधांताएवगाः॥प्रातर्वनंप्रतिचरंतीरनुगच्छेत्॥अनुगच्छेदिति
वचनात्प्रदातागच्छंतीतंदेवस्वयमनुगच्छेत्प्रदातुतिष्ठंत्यासतेवातदापश्चाद्गमनस्याशक्यकरणत्वात्स्व
यमपितिष्ठेदासीतवेतिगम्यते॥अनुगमनविधानादेवताभिःसार्धंगोष्ठंव्रजंतीभिःसहगोष्ठंव्रजंती एम०
भिःसहगोष्ठप्रवेशोप्यर्थसिद्धः॥एवंकुर्वन्मासांतेगोप्रदानेनएकांगांदत्वातावताशास्त्रार्थस्यसंपत्तेर्गो १४१

हत्यायाःशुध्यतीत्येकंव्रतं॥मासंगोष्ठेशयोगोनुगामीतिचानुवर्तते॥पंचगव्याहारस्यतुनिवृत्तिः॥कृच्छ्रवि
धानादेव॥अतश्चमासंनिरंतरंकृच्छ्रंसमाहितश्चरेदित्यपरं॥अतएवजाबालेनमासप्राजापत्यस्यस्पष्टंपृथ
क्प्रायश्चित्तत्वमुक्तं॥प्राजापत्यंचरेन्मासंगोहंताचेदकामतः॥गोहितोगोनुगामीस्याद्गोप्रदानेनशुध्य
तीति॥अतिकृच्छ्रंवासमाहितश्चरेदित्यन्यदेतत्॥कृच्छ्रातिकृच्छ्रयोर्लक्षणमुत्तरत्रवक्ष्यते॥अथवात्रिरात्र
मुपवासंकृत्वावृषभएकादशोयासांगवांतादृशीर्दद्यादितिव्रतचतुष्टयं॥तत्राकामकृतेजातिमात्रब्राह्मणस्व
मिकगोमात्रवधेवृषभैकादशगोदानसहितत्रिरात्रोपवासोद्रष्टव्यः॥विशिष्टस्वामिकायाविशिष्टगुण
वत्याश्चवधेगुरुप्रायश्चित्तस्यवक्ष्यमाणत्वात्॥क्षत्रियसंबंधिन्यास्तुत्याद्वधेआपादनेमासंपंचगव्याशि
त्वंप्रथमंप्रायश्चित्तं॥अत्रमासपंचगव्याशनस्यातिस्वल्पत्वात्मासोपवासतुल्यत्वं॥ततश्चषड्भिःषड्भिरु
पवासैरेकैकप्राजापत्यकल्पनयापंचकृच्छ्राणांप्रत्याम्नायेनपंचधेन्वोमासांतेचदीयमानागोरेकेतिषड्धे

१४२ नवोभवंतीतिवृषभैकादशगोदानसहितत्रिरात्रव्रतात्लघीयस्त्वं।कथंपुनःब्राह्मणगवीणांगुरुत्वेदेव
ब्राह्मणराज्ञांतुवित्तेयंइत्यमुत्तममितिनारदेनद्रव्यस्योत्तमत्वाभित्वाभिधानात्॥गोषुब्राह्मणसंस्थांस्वि
तिदंडभ्रूयस्त्वदर्शनाच्च॥वैश्यसंबंधिस्यास्तुतादृग्विधव्यापाद्यमेमासमतिकृ॥छ्रंकुर्यात्॥अतिकृच्छ्रेत्वाद्ये
त्रिरात्रत्रयेपाणिपूरात्रभोजनमुक्तं॥अंत्येत्रिरात्रेनशनं॥अतोतिकृच्छ्रधर्मेणमासंव्रतेक्रियमाणेषडा
त्रमुपवासोभवति॥चरंतुविंशसहेचपाणिपूरान्नभोजनं॥ततश्चकृच्छ्रप्रत्याम्नायकल्पनयाकिंचिन्म
नंधेनुपंचकंभवतीतिपूर्वस्माद्व्रतद्वयाल्लघिष्ठत्वेनवैश्यस्वामिकगोवधविषयतायुक्ता॥तादृशएववि
षयेशूद्रस्वामिकगोहत्यायांमासंप्राजापत्यंव्रतंद्वितीयं॥तत्रसार्धप्राजापत्यद्वयात्मकेनप्रत्याम्नायेन
किंचिदधिकंधेनुद्वयंभवतीतिपूर्वेभ्योलघुतमत्वाच्छूद्रविषयतायुक्ता॥अथचैतत्प्रायश्चित्तचतुष्टयंसा राम०
क्षात्कर्तृत्वानुग्राहकप्रयोजकानुमंतृषुगुरुलघुभावातारतम्यापेक्षयापूर्वोक्तएवविषयेयोजनीयं॥यत्तुवै १४२

DR. BHAU DAJI MEMORIAL
डाक्तर भाऊदाजीस्मारकम्

श्यवंव्रतत्रयं॥गोघ्नस्यपंचगव्येनमासमेकंपलत्रयं॥प्रसहंस्यात्सराकोवाचांद्रायणमथापिबेत्॥यच्चकाश्य
पीयं॥गांहत्वातच्चर्मणाप्रावृतमासंगोष्ठेशयस्त्रिषवणस्नायीनित्यंपंचगव्याहारइति॥यच्चशातातपीयं॥
मासंपंचगव्याहारइति॥तस्यचकमपियाज्ञवल्क्यीयपंचगव्याहारसमानविषयं॥यच्चशंखलिखिताभ्यामुक्तं
॥गोघ्नःपंचगव्याहारःपंचविंशतिरात्रमुपवसेत्सशिखवपनंकृत्वागोचर्मणावृतोगाश्चानुगच्छन्गोष्ठेशयो
गांचदद्यादिति॥एतच्चयाज्ञवल्क्यीयमासानविषयं॥दद्यात्रिरात्रंवोपोष्येतेतद्विषयेवासंतगुणिनोहंगुतु
वेदितव्यं॥अत्रैवविषयेपंचगव्याशक्तस्यतुद्वितीयंकाश्यपीयं॥मासंपंचगव्येनेतिमतिपाद्यषष्ठेकाले
पयोभक्षोवागच्छतीसनुगच्छेत्तासुसुखायविष्टासूपविशेत्जातिप्लवंगच्छेत्जातिविषमेणावतारयेत्जात्स्वार्द
केपाययेव्रतांतेब्राह्मणान्भोजयित्वातिलधेनुंदद्यादितिइष्टव्यं॥अत्राप्यशक्तस्यगोघ्नोमासंयवाग्रंप्रसृ
तितंदुलघृतांभुंजानोगोभ्यःप्रियंकुर्वञ्छुध्यतीतिपैठीनसिनोक्तंवेदितव्यं॥यत्तुसुमंतुरुक्तवान्॥गोघ्नस्य

१४३ गोप्रदानेगोष्ठेशयनं द्वादशरात्रं पंचगव्यप्राशनं चगवामनुगमनं चेति॥ यच्च संवर्त्तेनोक्तं॥ सकृत्पावकभे
क्षाशीपयोदधि घृतं शकृत्॥ एतानि क्रमशोश्नीयान्मासार्द्धं सुसमाहितः॥ ब्राह्मणान्भोजयित्वातु गां दद्या
दात्मशुद्धयइति॥ यच्च बार्हस्पत्यं॥ द्वादशरात्रं पंचगव्याहारइति॥ तत्त्रितयमपियाज्ञवल्कीयमासप्रा
जापत्येन समानविषयं॥ मृतकल्पगोहत्याविषयं वा॥ विषमप्रदेशत्रासतजनितव्याधितोमरणविषयं
वा वेदितव्यं॥ तदिदं सर्वं प्रागुक्तमकामविषयं॥ यदा पुनरीदृग्विधामेवविशिष्टविप्रस्वामिकाम विशिष्टां
कामतः प्रमापयति॥ तदा मनुनामासं यवाग्वपानां मासद्वयं हविष्येण चतुर्थकालभोजनं मासत्रयं वृषभैका
दशगोदानसंयुक्तं शणकादिनावर्त्तनमिति व्रतत्रितयमाम्नातं॥ यथाह॥ उपपातकसंयुक्तोगोघ्नोमासं य
वान्पिबेत्॥ कृतवासोवसेद्गोष्ठे चर्मणाईण संवृतः॥ चतुर्थकालमश्नीयादक्षारलवणं मितं॥ गोमूत्रेण चर राम०
स्नानं द्वौमासौ नियतेंद्रियः॥ दिवानुगच्छेत्तागास्तुतिष्ठन्नूर्ध्वरजः पिबेत्॥ शुश्रूषित्वा नमस्कृत्य रात्रौवीरासनं १४३

वसेत्॥ तिष्ठंतीषु चतिष्ठेत्तु व्रजंतीष्वप्यनुव्रजेत्॥ आसीनासु तथासीत नियतोवीतमत्सरः॥ आतुरामभि
भ्रंयैषि क्तांवा चोरव्याघ्रादिभिर्भयैः॥ पतितां पंकमग्नां वा सर्वप्राणैर्विमोक्षयेत्॥ उष्णे वर्षति शीते वा मारुते
वाति वा भृशं॥ न कुर्वीतात्मनस्त्राणं गोरकृत्वानुशक्तितः॥ आत्मनोयदि वान्येषां गृहेक्षेत्रेथवा खले॥ भक्षयंती
न कथयेत्पिबंतं चैव वत्सकं॥ अनेन विधिना यस्तु गोघ्नो गा अनुगच्छति॥ सगोहत्याकृतं पापं त्रिभिर्मासैर्व्यपो
हति॥ वृषभैकादशागाश्च दद्यात्सुचरितव्रतः॥ अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेदिति॥ एतत्त्रितयं या
ज्ञवल्कीयमासप्राजापत्यमासपंचगव्याशनवृषभैकादशगोदानसंयुक्तत्रिरात्रोपवासरूपव्रतत्रितयविषयं य
थाक्रमेण द्रष्टव्यं यत्त्वंगिरसामानवेतिकर्त्तव्यतायुक्तं त्रैमासिकमभिधायाधिकमभिहितं॥ अक्षारलवणं रूक्षं
षष्ठेकालेस्य भोजनं॥ योमंत्री वा जपेद्विद्वान् ॐकारं वेदमेव वा॥ व्रतवद्धारयेद्दंडं समंत्राश्चैव मेखलामिति॥ त
न्मानवविषय एवमुष्मिन्नारुणपादि किंचिद्गुणातिशययोगित्वाद्द्रष्टव्यं॥ अतिबालामतिकृशामतिवृद्धांचरोगि

१५४ ली॥हत्वाप्येवं विधानेन चरेदधव्रतं द्विज इति पुष्यताडणादिरहितायां गवि स्वल्पप्रायश्चित्तदर्शनात् यत्तु
याज्ञवल्क्यः। षण्मासातिकृच्छ्रव्रतनिमित्तभूतां गामविशिष्टस्वामिकां जातिमात्रयोगिनीं कामतो व्यापादयति
तदा विहितं यत्कामाकामाद्द्विगुणं चरेदिति न्यायेन पूर्वोक्तमेवाकामविहितमासातिकृच्छ्रं तद्द्विगुणं कु
र्यात् यत्तु हारीतेन गोघ्नस्तच्चर्ममूर्ध्ववालं परिधायेत्यादिना मानवीमितिकर्तव्यतामभिधायोक्तं॥वृषभैका
दशगाश्च दत्त्वा त्रयोदशमासैः पूतो भवतीति॥तत्सवनस्थश्रोत्रियगोमात्रवधे कामकृते द्रष्टव्यं॥यत्तु वशिष्ठे
न॥गां चेद्धन्यात्तस्याश्चर्मणार्द्रेण परिवेष्टितः॥षण्मासान्कृच्छ्रतप्तकृच्छ्रानातिष्ठेतां वृषभावहतो दद्यादि
ति षाण्मासिकं कृच्छ्रतप्तकृच्छ्रानुष्ठानमुक्तं॥यदपि देवलेन॥गोघ्नः षण्मासांस्तच्चर्मणा परिवृतो गोग्रासाहा
रो गोव्रजनिवासी गाभिरेव सह चरन्मुच्यत इति॥तद्वर्षमपि हारीतीयेन समानविषयं॥तत्रैव कामकारकृते का रा०म०
सापनीयं त्रैवार्षिकं॥गोघ्नस्तच्चर्मसंवीतो वसेद्गोष्ठेष्वथवा पुरनुगच्छन्सततं मौनी वीरासनादिभिः॥वर्षशी १५४

तातपक्लेशवह्निपंकभयार्दिताः॥मोक्षयेत्सर्वयत्नेन प्रयतेत वस्त्रैस्त्रिभिरिति द्रष्टव्यं॥यत्तु शंखेन त्रैवार्षिकं॥
पादं तु शूद्रहत्यायामुदक्यागमने तथा॥गोवधे च तथा कुर्यात्परस्त्रीगमने तथेति॥तदपि कासायनीय
व्रतसमानविषयं॥यत्तु यमेनांगिरसीमितिकर्तव्यतामभिधायाभिहितं॥गोसहस्रं शतं वापि दद्यात्सुचरित
व्रतः॥अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेदिति गोसहस्रयुक्तं गोशतयुक्तं च द्वैमासिकव्रतद्वयमभिहितं
॥तत्र यत्सवनस्थश्रोत्रियातिदुर्गतबहुकुटुंबिब्राह्मणसंबंधिनीं कपिलां कर्मांगभूतां गार्भिणीं॥बहुक्षीरतो
रूपादिगुणशालिनीं निर्गुणो धनवान्प्रतिग्रहेषां ज्ञानादिना व्यापादयति तदा गोसहस्रयुक्तं द्वैमासिकं कुर्यात्॥
गर्भिणीं कपिलां दोग्ध्रीं होमधेनुं च सुव्रतां॥स्वप्रादिना घातयित्वा द्विगुणं व्रतमाचरेदिति विशिष्टायां गवि वा
हस्यन्यप्रायश्चित्तविशेषदर्शनात्॥अत एव प्रचेतसा स्त्रीगर्भिणीगोगर्भिणीबालवृद्धवधेषु भ्रूणहा भवती
तीदृग्विधमेव गोवधमभिसंधाय ब्रह्महत्याव्रतमतिदिष्टं॥द्वितीयं तु षाण्मासं गोशतदानयुक्तं द्वैमासिकव्र

तकात्यायनीयव्रतविषयेधनवतोद्रष्टव्यं॥यत्तुगौतमेनऋषभैकशतगोदानसमुचितंत्रैवार्षिकंप्राकृतंब्रह्म
चर्येवैश्यवधेभिप्रायगोवधत्तितिष्टं॥गांचहत्वावैश्यवदिति॥एतच्चत्रिवार्षिकव्रतप्रसाम्नायप्रकृतनवति
धेनुभिःसार्धंऋषभैकशतागावोनन्यूनद्विशतंभवतीतिगोसहस्रयुक्तेद्वैमासिकव्रतान्न्यूनत्वात्सर्वोक्तवि
षयेवाकामतोवधे॥यद्धातत्रैवविषयेगर्भरहितायास्त्वकामतोहननेपिकात्यायनीयमेवत्रैवार्षिकंकल्प्यं॥
यत्तुयमेनोक्तंः काष्ठलोष्टाश्मभिर्गोवःशस्त्रैर्वानिहितायदि॥प्रायश्चित्तंकथंतत्रशस्त्रेशस्त्रविधीयते॥
काष्ठेसांतपनंकुर्यात्प्राजापत्यंतुलोष्टके॥तप्तकृच्छ्रंतुछेतुपाषाणेशस्त्रेचाप्यतिकृच्छ्रकं॥प्रायश्चित्तेतत
श्चान्तेकुर्याद्ब्राह्मणभोजनं॥त्रिंशद्गाऋषभंचैकंदद्यात्तेभ्यश्चदक्षिणामिति॥तत्पूर्वोक्तगोसहस्रशतादिदान
वार्षिकादिव्रतविषयेष्वेवकाष्ठादिसाधनविशेषजनितवधनिमित्तसांतपनादिपूर्वकत्वप्रतिपादनपरं॥न राम०
तुनिरपेक्षं॥लघुत्वाद्दतस्य॥तथावयोविशेषादपिप्रायश्चित्तविशेषउक्तः॥अतिवृद्धामतिकृशामतिबालांचरो १४५

गिणीं॥हत्वापूर्वविधानेनचरेदर्धव्रतंद्विजः॥ब्राह्मणान्भोजयेच्छक्त्यादद्याद्धेमतिलांस्तथेति॥नारोगादिवधेय
द्विहितंतस्यार्द्धं॥वृहस्पतेचेतसाप्यत्रविशेषउक्तः॥एकवर्षेहतेवत्सेकृच्छ्रपादोविधीयते॥अबुद्धिपूर्वंपुंसःस्या
द्विपादस्तुद्विहायसे॥त्रिहायनेत्रिपादःस्यात्प्राजापत्यमतःपरमिति॥तथागर्भिणीवधेयद्गर्भोपिनिहतोभ
वतितदाप्रतिनिमित्तंनैमित्तिकमावर्ततइतिन्यायेनाविशेषेणद्विगुणव्रतप्राप्तौषट्त्रिंशन्मतेविशेषउक्तः॥पा
दउत्पन्नमात्रेतुद्वौपादौदृढतागते॥पादोनंव्रतमुद्दिष्टंहत्वागर्भमचेतनं॥अंगप्रत्यंगसंपूर्णेगर्भेचेतःसमन्विते
॥द्विगुणंगोव्रतंकुर्यादेषागोघ्नस्यनिष्कृतिरिति॥वहुकर्तृकेतुहननेसंवर्तापस्तंबौविशेषमाहतुः॥एकाचेद्वहु
भिःकाचिद्दैवाद्व्यापादिताक्वचित्॥पादंपादंतुहत्यायाश्चरेयुस्तेपृथक्पृथक्॥इतियादृग्विधगोहत्यायांयद्व्रत
मुपदिष्टंतस्यादंपादंप्रत्येकंकुर्युः।वचनात्॥एकावेदिष्टफललक्षणअतोवहुभिर्दंयोवहुनांचव्यापारेनेप्रतिपु
रुषपादद्वयंपादोनंवाकल्पनीयं॥एतच्चाकामतोवधेद्रष्टव्यंदैवादितिविशेषणोपादानात्॥कामकारेत्ववहुना

ममपिप्रत्येकंहन्तृत्वदोषसंबंधाद्धन्तृत्वावत्संबंधोयुक्तः॥सत्रिणामिवप्रतिपुरुषंहन्तृव्यापारसमवायात्॥ए
१४६ कंप्रतांबहूनांतुयथोक्ताद्द्विगुणोदमः॥इतिप्रत्येकंदंडद्वैगुण्यप्रदर्शनाच्च॥यदात्वेकेनैवरोधनादिव्यापारेण
बहवोगावोव्यापादितास्तत्रसंवर्त्तापस्तंबौविशेषमाहतुः॥व्यापन्नानांबहूनांतुरोधनेबंधनेपिवा॥भिषङ्मि
थ्योपचारेचद्विगुणंगोव्रतंचरेदितिबहुष्वपिव्यापन्नेषुनप्रतिनिमित्तंनैमित्तिकानुष्ठानमापितंत्रेण॥किं
तुवचनबलाद्द्विगुणमेव॥तथाभिषगपिविरुद्धौषधदानेनैकैकस्याप्यकामतोव्यापादनेद्विगुणंगोव्रतं
कुर्यात्॥भिषग्व्यतिरिक्तस्यकेवलोपकारार्थंप्रवृत्तस्याप्यकामतःप्रतिकूलौषधदानेव्यासआह॥औ
षधंलवणंचैवपुण्यार्थमपिभोजनं॥अतिरिक्तंनदातव्यंकालेस्वल्पंतुदापयेत्॥अतिरिक्तेविपत्तिश्चेत्कृ
च्छ्रपादोविधीयतइति॥यदापस्तंबेनोक्तं॥पादमेकंचरेद्रोधेद्वौपादौबंधनेचरेत्॥योजनेपादहीनंस्याच्च राम०
रेत्सर्वंनिपातनेइति॥तद्व्यवहितव्यापादनेनिमित्तकर्तृविज्ञेयं॥नसाक्षात्कर्तुः॥साक्षात्कर्तुनिमित्तिनश्चभेद १४६

स्तेनैवदर्शितः॥पाषाणैर्लगुडैर्वापिशस्त्रेणान्येनवाबलात्॥निपातयंतियेगास्तुतस्तंकुर्युर्व्रतंहिते॥त
थवबाहुजंघोरुपार्श्वग्रीवादिमोटनैरिति॥एतदुक्तंभवति॥पाषाणखड्गादिभिर्ग्रीवामोटनादिनावायेगां
निपातयंतितेसाक्षाद्धंतारस्तेष्वेवहंतृत्वंप्रायश्चित्तं॥एतुव्यवहितरोधनादिव्यापारयोगिनस्तेनिमित्तिनस्तेषां
नहंतृत्वंतसंबंधः॥किंतुतदवयवैरेवपादद्विपादादिभिरिति॥तत्रचरोधादीनांव्यवहितव्यापारत्वाविशेषेपि
वचनात्क्वचित्पादःक्वचिद्द्विपादःक्वचित्त्रिपादइतियुक्तं॥अत्राहपराशरः॥गवांबंधनयोक्त्रैस्तुभवेन्मृत्यु
रकामतः॥अकामकृतपापस्यप्राजापत्यंविनिर्दिशेत्॥प्रायश्चित्तेततश्चीर्णेकुर्याद्ब्राह्मणभोजनं॥अनडु
त्सहितांधेनुंदद्याद्विप्रायदक्षिणामिति॥अयंचप्राजापत्योयद्रोधादिकंकृत्वातज्जन्यप्रमादपरिजिहीर्षया
प्रत्यवेक्षमाणआस्तेतदाद्रष्टव्यः॥अकामकृतपापस्येतिविशेषणोपादानात्॥यदातुनप्रमादसंरक्षणं
करोतितदापादमेकंचरेद्रोधेद्वौपादौबंधनेचरेत्॥योजनेपादहीनंस्याच्चरेत्सर्वंनिपातनइत्यंगिरोदृष्टं

१४७ मासिकपादंकिंचिदधिकंद्याद्विशस्यहर्गोवधबंधंनकुर्यात्॥आपस्तंबोनापिविशेषउक्तः॥अदितिदोहातिवा
हाभ्यांनासिकाछेदनेतथानदीपर्वतसंरोधान्मृतेपादोनमाचरेदिति॥लक्षमात्रोपयोगिनितुदाहेनदो
षः॥अतिदोहातिवाहातिवाहाभ्यांन्यंत्रांकनलक्षाभ्यांवाहनमोचनेपिवा॥सायंसंगोपनार्थंचनदुष्येद्रोध
बंधनइतिपराशरस्मरणात्॥अंकनंस्थिरविकृकरणं॥लक्षणंसाधनतोपलक्षणं॥वाहलेशास्त्रोक्तमार्गे
ण॥रक्षणार्थमपिनालिकेरादिभिर्बंधनेभवत्येवदोषः॥ननारिकेलेननशणवालेनचापिमौंजेनननश्वब
लेन॥एतैस्तुगावोननिबंधनीयाः॥बद्धातुतिष्ठेत्परशुंगृहीत्वा॥कुशैःकाशैश्चबध्नीयात्स्थानेदोषविवर्जि
तेइतिव्यासस्मरणात्॥तथान्यादिविशेषस्तेनैवोक्तः॥घंटाभरणदोषेणविपत्तिर्यत्रगोभवेत्॥घातार्थं
नभवेत्तत्रभूषणार्थंतुतन्मतं॥अतिदोहातिदमनेसंघातेचैवयोजने॥बध्वाश्रृंखलपाशैश्चमृतेपादो ग्राम०
नमाचरेत्॥पालनाऽकारणादिनोपेक्षायांक्वचित्प्रायश्चित्तविशेषस्तेनैवोक्तः॥जलौघपल्वलेमग्नामेघ १४७

Dr. BHAU DAJI MEMORIAL

विद्युद्धतापिवा॥श्वभ्रेवापतिताकस्माच्छ्वापदेनापिभक्षिता॥प्राजापत्यंचरेत्कृच्छ्रंगोस्वामीव्रतमुत्तमं॥शीत
वात्याद्युद्धनमृतापिवा॥शून्यागारउपेक्षायांप्राजापत्यंविनिर्दिशेदिति॥इदंतुकार्यांतरविरहेप्युपेक्षां
यांवेदितव्यं॥कार्यांतरव्यग्रतयोपेक्षायांतुदंपल्वलौघमग्नव्याघ्रश्वापदादिनिपातने॥श्वभ्रप्रपातस
र्पाधैर्मृतेकृच्छ्रार्धमाचरेत्॥अपालनात्तुकृच्छ्रंस्याच्छून्यागारउपप्लवइतिविष्णुस्मरणात्॥तथासत्यपि
व्यापादनेक्वचिदुपकारार्थप्रवृत्तौवचनाद्दोषाभावः॥यथाहसंवर्तः॥यंत्रणेगोचिकित्सार्थेमूढगर्भविमोच
ने॥यत्नेकृतेविपत्तिःस्यान्नसपापेनलिप्यतइति॥यंत्रणंव्याध्यादिनिर्यातनार्थंसंदंशांकुशादिप्रवेशनं॥
तथा॥औषधंस्नेहमाहारंदद्याद्गोब्राह्मणेषुच॥यदिमानेविपत्तिश्चेन्नसपापेनलिप्यते॥तथा॥दाहच्छेदशिरा
भेदप्रयोगैरुपकुर्वतां॥द्विजानांगोहितार्थंचप्रायश्चित्तंनविद्यते॥अत्रपराशरोप्याह॥ग्रामघातेशरौ
घेणवेश्मभंगान्निपातने॥अतिवृष्टिहतानांचप्रायश्चित्तंनविद्यते॥कूपखातेचधर्मार्थेगृहदाहेचयामृता॥

१४८ ग्रामदाहेतथाघोरेप्रायश्चित्तंनविद्यतइति॥इदंतद्बंधनरहितस्यैवपशोःकथंविग्रहादिदाहेनमृतविषयं
॥इतरत्रत्वापस्तंबोक्तं॥कांतारेष्वथदुर्गेषुगृहदाहेखलेषुवायदितत्रविपत्तिःस्यात्सांदराकोविधीयते
॥तथास्थ्यादिभंगेमरणाभावेपिक्वचित्प्रायश्चित्तमुक्तं॥अस्थिभंगंगवांकृत्वालांगूलच्छेदनंतथा॥पातनं
दंतशृंगाणांमासार्धंतुयवान्पिबेदिति॥यत्त्वंगिरसोक्तं॥शृंगभंगेस्थिभंगेवाचर्मनिर्मोचनेपिवा॥दश
रात्रंपिबेद्वज्रंस्वल्पापियदिगोर्भवेत्॥इति॥वज्रशब्दवाच्यक्षीरादिव्रतेनमुक्तं॥इदंचप्रायश्चित्तंगोस्वा
मिनेव्यापन्नगोसदृशींगांदत्त्वैवकार्यंयथाहपराशरः॥प्रमापणेप्राणभृतांदद्यात्तत्प्रतिरूपकं॥तस्यानु
रूपंमूल्यंवाददयादित्यब्रवीन्मनुरिति॥मनुरपि॥योयस्यहिंस्याद्द्रव्याणिज्ञानतोज्ञानतोपिवा॥सतस्योत्पा
दयेत्तुष्टिंराज्ञेदद्याच्चतत्सममिति॥एतच्चपूर्वोक्तप्रायश्चित्तजातंब्राह्मणस्यैवहंतुर्वेदितव्यं॥क्षत्रियादे राम० १४८
स्तुसंहंतुर्हविस्तुनाविशेषोभिहितः॥विप्रेतुसकलंदेयंपादोनंक्षत्रियेस्मृतं॥वैश्येर्धंपादएकस्तुशूद्रजा

तिषुशस्यतइति॥यत्त्वंगिरोवचनं॥पर्षद्याब्राह्मणानांतुसाराज्ञांद्विगुणोमता॥वैश्यानांत्रिगुणाप्रोक्तापर्ष
द्वद्व्रतंस्मृतमितितत्प्रातिलोम्येनवाग्दंडपारुष्यादिविषयं॥तथास्त्रीबालवृद्धानांवधे॥अनुपनीतस्यतुब्रा
ह्मणस्यपादइतिचप्रागुक्तमनुसंधेयं॥स्त्रीणांपाराशरेणविशेषोभिहितः॥वपनंनैवनारीणांनानुव्रज्याज
पादिकं॥नगोष्ठेशयनंतासांनवसीरन्गवाजिनं॥सर्वान्केशान्समुद्धृत्यच्छेदयेदंगुलद्वयं॥सर्वत्रैवहिनारीणां
शिरसोमुंडनंस्मृतं॥पुंस्त्वेषुचविशेषःसंवर्तेनदर्शितः॥पादेंगरोमवपनंद्विपादेश्मश्रूणामपित्रिपादेतु
शिखावर्जंसशिखंतुनिपातनइतिपादप्रायश्चित्तार्हस्यकंठादधस्तनांगरोम्णामेववपनं॥अर्द्धप्रायश्चित्तार्हस्य
तुश्मश्रूणामपि॥पादोनप्रायश्चित्तार्हस्यपुनःशिरोगतानामपिशिखावर्जितानां॥पादचतुष्टयार्हस्यसक
लकेशजातस्येति॥एवमेतद्दिगवलंबनेनान्येषामपिस्मृतिवचसांविषयोनिरूपणीयः॥इतिगोवधप्रायश्चि
त्तप्रकरणं॥अधुनान्येषामुपपातकानांप्रायश्चित्तमाह॥उपपातकशुद्धिःस्यादेवंचांद्रायणेनवा॥पयसावापि

१४९ मासेनपराकेणापिवापुनः॥एवमुक्तेनगोवधव्रतेनमासपंचगव्याशनादिनान्येषांव्रात्यतादीनामुपपातकानां
शुद्धिर्भवेत्॥चांद्रायणेनवक्ष्यमाणलक्षणेनवामासंपयोव्रतेनवा॥पराकेणवाशुद्धिर्भवेत॥अत्रातिदेशसा
मर्थ्यादेवसोमवसनगोपरिचर्यादिभिःगोवधसाधारणैःकतिपयैर्न्यूनत्वमवगम्यते॥एतच्चव्रतचतुष्टय
मकामकारेशक्त्यपेक्षयाविकल्पितंद्रष्टव्यं॥कामकारेतुएतदेवव्रतंकुर्युरुपपातकिनोद्विजाः॥अवकीर्णिव
र्जंशुध्यर्थंचांद्रायणमथापिवेतिमनूक्तंत्रैमासिकंद्रष्टव्यं॥अतएवमनुवचनादयंप्रायश्चित्तातिदेशःसर्वेषा
मुपपातकगणपठितानामुक्तप्रायश्चित्तानांअनुक्तप्रायश्चित्तानांचावकीर्णिवर्जितानांअविशेषेणवेदितव्य
ः॥अवकीर्णिभस्तुप्रतिपदोक्तमेव॥नन्वनुक्तप्रायश्चित्तविषयत्वेनातिदेशस्ययुक्ता॥इतरथाप्रतिपदोक्तप्रा
यश्चित्तबाधसापेक्षत्वप्रसंगः॥मैवं॥तथासत्युक्तनिःकृतीनामुपपातकगणपाठोनर्थकःस्यात्॥यदिप राम०
रमुपपातकमध्येसामान्यतःपठितस्यान्यत्रविशेषतःप्रायश्चित्तांतरमुच्यते॥यथा॥अपांक्त्यानांचयाजनं १४९

त्रीन्कृच्छ्रानाचरेद्व्रात्ययाजकोभिचरन्नयीतिसएवविषयःकेवलंपरिशिष्यतेनपुनर्विशेषतःपठितस्यैवं॥अ
न्यत्रापिविशेषतएवयत्रप्रायश्चित्तमुच्यतेसोपियथा॥इंधनार्थंद्रुमच्छेदः॥वृक्षगुल्मलतावीरुच्छेदनेजप्य
मृक्शतमिति॥अतोव्रात्यतादिष्वस्मिंछास्त्रेशास्त्रांतरेवादृष्टैःप्रायश्चित्तैःसहोपपातकशुद्धिःस्यादेवमदि
नाप्रतिपादितव्रतचतुष्टयस्यसमविषयेवाकल्पनेनविकल्पोविषयविभागोवाआश्रयणीयः॥तानिचस्मृ
त्यंतरदृष्टप्रायश्चित्तानिपाठक्रमेणव्रात्यतादिषुयोजयिष्यामः॥तत्रव्रात्यतायांमनुनेदमुक्तं॥येषांद्विजा
नांसावित्रीनानूच्येतयथाविधि॥तांश्चारयित्वात्रीन्कृच्छ्रान्यथाविध्युपनाययेत्इति॥यच्चयमेनोक्तं॥सावि
त्रीपतितायस्यादशवर्षाणिपंचच शशिखंवपनंकृत्वाव्रतंकुर्यात्समाहितः॥एकविंशतिरात्रंचपिबेत्प्रस
तियावकं॥हविषाभोजयेच्चैवब्राह्मणान्सप्तपंचवा॥ततोयावकाच्छुद्धस्यतस्योपनयनंस्मृतमिति॥तदुभयम
पियाज्ञवल्क्यीयमासपयोव्रतविषयंयत्तुवसिष्ठेनोक्तं॥पतितसावित्रीकउद्दालकव्रतंचरेत्॥द्वौमासौयाव

१५० केनवर्त्तयेन्मासंपयसापक्षमामिक्षया॥अष्टरात्रंघृतेन॥षड्रात्रमयाचितेनत्रिरात्रमब्भक्षोहोरात्रमुपवासो
ऽश्वमेधावभृथंगच्छेद्व्रात्यस्तोमेनवायजेतेति॥अत्रेयंव्यवस्था॥यस्योपनेत्राद्यभावेनतत्कालातिक्रमस्तस्य
याज्ञवल्कीयव्रतानामन्यतमत्शक्त्यपेक्षयाभवति॥अनापद्यतिक्रमेतुमानवंत्रैमासिकं॥तत्रैवपंचदश
वर्षादूर्ध्वमपिक्रियत्कालातिक्रमेतद्बालकव्रतंव्रात्यस्तोमोवेति॥येषांतुपित्रादयोप्यनुपनीतास्तेषामापस्तं
बोक्तं॥यस्यपितृपितामहावनुपनीतौस्यातांतस्यसंवत्सरंत्रैविद्यकंब्रह्मचर्यं॥यस्यप्रपितामहादेर्नानुस्मर्यं
तउपनयनंतस्यद्वादशवर्षाणित्रैविद्यकंब्रह्मचर्यमिति॥इतिव्रात्यतांप्रायश्चित्तप्रकरणम्॥तथास्तेयोप
पातकसाधारणप्राप्तव्रतचतुष्टयापवादकंप्रायश्चित्तंमनुनोक्तं॥धान्यान्नधनचौर्याणिकृत्वाकामाद्द्वि
जोत्तमः॥सजातीयगृहादेवकृच्छ्राब्देनविशुध्यतीति॥द्विजोत्तमस्यसजातीयोब्राह्मणएवातोविप्रपरिग्र राम०
हेब्राह्मणस्यहर्तुरिदं॥क्षत्रियादेस्त्वल्पंकल्प्यं॥अष्टापद्यंस्तेयकिल्बिषंशूद्रस्यद्विगुणोत्तराणीतरेषांप्र १५०

तिवर्णंप्रतिषेधातिक्रमेदंडभूयस्त्वमितिक्षत्रियादेरपहर्तुर्दंडाल्पत्वदर्शनात्॥तथा॥विप्रेतुसकलंदेयंपादोनं
क्षत्रियेस्मृतमिति॥पादपादहान्याप्रायश्चित्तदर्शनात्॥तथाक्षत्रियादिपरिग्रहेणापिदंडानुसारेणप्रायश्चित्ता
ल्पत्वंकल्प्यं॥अतःक्षत्रियःपरिग्रहेचौर्येषाण्मासिकं॰वैश्यपरिग्रहेत्रैमासिकंगोवधव्रतंशूद्रपरिग्रहेचांद्रा
यणंकल्प्यं॥एवमुत्तरत्राप्यूहनीयं॥इदंचदशकुंभधान्यापहारविषयं॥अधिकेतुवधः॥धान्यंदशभ्यः
कुंभेभ्योहरतोप्यधिकेवधइतिदर्शनात्॥कुंभश्चपंचसहस्रपलपरिमाणः॥धान्यसाहचर्यादन्नधनेवैताव
द्धान्यपरिमितेवेदितव्यं॥अन्नशब्देनतंडुलादिकमभिधीयते॥धनशब्देनचताम्ररजतादिकं॥इदंचप्रायश्चि
त्तंकामकारविषयं॥अकामतस्तुत्रैमासिकंगोवधव्रतं॥तथामनुष्याणांचहरणेस्त्रीणांक्षेत्रगृहस्यच॥कूप
वापीजलानांचशुद्धिश्चांद्रायणेनत्विति॥सार्धशतद्वयपललभ्यजलापहारेइदंचांद्रायणंप्राप्तमपिइतरगो
वधव्रतनिवृत्त्यर्थंविधीयते॥तावन्मूल्यजलापहारेपानीयस्यतृणस्यचतन्मूल्याद्द्विगुणोदंडइतिपंचशतदं

१५१ डइतिपंचशतदंडविधानात्तावत्परिमाणदंडश्चांद्रायणयोर्गोवधादौसहचरितत्वात्कृच्छ्रातिकृच्छ्रं हि तयोः पलंपंच
शतंतथेति॥चांद्रायणविषयेपंचशतपणदंडविधानाच्च॥एतच्चक्षत्रियादिद्रव्यापहारविषयंद्रष्टव्यं॥ब्राह्म
णसंबंधिद्रव्यापहारेतु॥निक्षेपस्यापहरणेनराश्वरजतस्यच॥भूमिवज्रमणीनांचरुक्मस्तेयसमंस्मृत
मितिद्रष्टव्यं॥तथा॥धान्यानामल्पसाराणांस्तेयंकृत्वान्यवेश्मतः॥चरेत्सांतपनंकृच्छ्रंतन्निर्यात्यात्मशुद्धय इ
ति॥अनेनाल्पप्रयोजनत्रपुसीसादिद्रव्यापहारविशेषेणस्तेयसामान्येनोपपातकप्रायश्चित्तापवादः॥
इदंचचांद्रायणनिमित्तभूतार्धतृतीयशतमूल्यस्यपंचदशांशार्धत्रपुसीसाद्यपहारेप्रायश्चित्तं॥चांद्राय
णपंचदशांशत्वात्तस्य॥तथाद्रव्यविशेषेणोपपातकसामान्यप्राप्तव्रताऽपवादः॥भक्ष्यभोज्यापहरणे
यानशय्यासनस्यच॥पुष्पमूलफलानांचपंचगव्यंविशोधनमिति॥एकवारभोजनपर्याप्तभक्ष्यभोज्याप राम०
हारेइदं॥द्वित्रिवारभोजनपर्याप्तापहारेतुत्रिरात्रं॥यथाहपैठीनसिः॥भक्ष्यभोज्यान्नस्योदरपूरणमात्राप १५१

हरणेत्रिरात्रमेकरात्रंवापंचगव्याहारतेति॥यानादीनामप्येतत्साहचर्यादेतावन्मूल्यापहरणएतत्प्रा
यश्चित्तंसर्वत्रापह्रियमाणद्रव्यन्यूनाधिकभावेनप्रायश्चित्तस्यापिगुरुलघुभावःकल्पनीयः॥तथातृ
णकाष्ठद्रुमाणांचशुष्कान्नस्यगुडस्यच॥चैलचर्मामिषाणांचत्रिरात्रंस्यादभोजनमिति॥एषांचतृणा
दीनांभक्ष्यादित्रिगुणत्रिरात्रप्रायश्चित्तदर्शनात्त्रिगुणमूल्यापहरणमेतत्प्रायश्चित्तं॥तथामणिमुक्ताप्र
वालानांताम्रस्यरजतस्यच॥अयस्कांतोपलानांचद्वादशाहंकणान्नतेति॥अत्राभक्ष्यादिद्वादशगुणप्रायश्चि
त्तदर्शनात्तन्मूल्याद्द्वादशगुणमूल्यमणिमुक्ताद्यपहारेद्रष्टव्यमिदं॥तथाकर्पासकीटजोर्णानांद्विखुरैकश
फस्यच॥पक्षिगंधौषधीनांचरज्वाश्चैवत्र्यहंपयइति॥अत्रापिभक्ष्यादित्रिगुणप्रायश्चित्तदर्शनात्त्रिगु
णमूल्यानामपहारेएवैतत्प्रायश्चित्तं॥ह्रियमाणद्रव्यन्यूनाधिकभावेनप्रायश्चित्तात्यल्पत्वमहत्त्वंकल्प्यमेव॥
इदंचस्तेयप्रायश्चित्तंअपहृतद्रव्यदानोत्तरकालएवद्रष्टव्यं॥यथाहविष्णुः॥हृत्वैवापहृतंद्रव्यंस्वामिनेव्रत

१५२ माचरेदिति॥इतिस्तेयप्रायश्चित्तप्रकरणं॥ ॥ऋणापाकरणंचपुत्रपौत्रैर्ऋणंदेयमितिविहितंतस्यानपा
करणेतथावैदिकस्यच॥जायमानोवैब्राह्मणइत्येतद्वाक्योक्तर्णसंस्कृतयज्ञादेरकरणेचउपपातकतशुद्धिः
स्यादेवमित्यादिनोक्तोपपातकसामान्यंविहितंव्रतचतुष्टयंशक्त्यपेक्षयायोज्यं॥प्रायश्चित्तांतरमप्याम
नुनोक्तं॥इष्टिंवैश्वानरींचैवनिर्वपेदब्दपर्यये॥कॢप्तानांपशुसोमानांनिष्कृत्यर्थमसंभवइति॥अब्दप
र्ययइतिसंवत्सरांते॥इतिऋणापाकरणं॥तथाधिकृतस्यानाहिताग्नित्वेप्येतदेवव्रतचतुष्टयंवत्स
रादूर्ध्वमापदिशक्त्यपेक्षयायोज्यं॥अनापदितुमानवंत्रैमासिकं॥अर्वाक्पुनर्वत्सरात्कार्ष्णाजिनिर्विशेष
माह॥कालेविधेयकर्माणिकुर्याद्विप्रोविधानतः॥तदकुर्वंस्त्रिरात्रेणमासिमासिविशुध्यति॥अनाहि
ताग्नेरपिचाहोयक्ष्यमाणःसुतोयदि॥सद्विमासेनपशुनापेज्ञात्रिभिकृच्छ्रायलिति एकाग्नेरपिविशेषस्ते रा म०
नैवोक्तः॥कृतदारोगृहेश्रेष्ठोयोनादध्यादुपासनं॥चांद्रायणंचरेद्वर्षंप्रतिमासमहोपिवाइत्यनाहिताग्निः १५२

MEMORIAL

प्रायश्चित्तं॥विक्रयेयद्दत्तंप्रोक्तंहरणेतथाअपण्यानांविक्रयेचस्मृत्यंतरेप्रायश्चित्तविशेषउक्तः॥यथाहहा
रीतः॥गुडतिलपुष्पमूलफलपक्वान्नविक्रयेसोमायनं॥सोमायनंसौम्यकृच्छ्रः॥लाक्षालवणमधुमांसतैलक्षी
रदधिघृततक्रगंधचर्मवासस्सामान्यतमविक्रयेचांद्रायणं॥तथोर्णाविकेसरिभ्रूधेनुवेश्माश्मशस्त्रविक्र
येच॥भक्ष्यमांसस्वाद्यस्थिशंखनखशुक्तिविक्रयेतप्तकृच्छ्रः॥हिंगुलगुग्गुलहरितालमनःशिलांजनगैरिक
क्षारलवणमणिमुक्ताप्रवालवेणचवेणुमृण्मयेषुच॥आरामतडागोदयानपुष्करिणीसुकृतविक्रये॥त्रि
षवणस्नाय्यधःशायीचतुर्थकालाहारोद्वादशसहस्रंजपन्संवत्सरेणपूतोभवतीति॥हीनमानोन्मानसंकरसं
कीर्णविक्रयेचेति॥एवमन्यैरपिशंखविष्णुप्रभृतिवचनैर्यत्रप्रायश्चित्तेविशेषोनोक्तःतत्रानापदिमानवमुप
पातकसाधारणःप्रासत्रैमासिकं॥आपदितुयाज्ञवल्कीयंव्रतचतुष्टयंशक्त्यपेक्षयायोज्यं॥इतिअ
पण्यविक्रयःप्रायश्चित्तं॥तथापरिवेत्तृपरिविशिष्टेनप्रायश्चित्तविशेषउक्तः॥परिविदान्नकृच्छ्रातिकृच्छ्रौचरि

त्वास्मै दत्त्वा पुनर्निविशेत्॥ तां चोवोपयच्छेदिति॥ परिविविदानः परिवेत्तोच्यते॥ तत्स्वरूपं च प्राग्व्याख्यातं
१५३ ॥ असौ कृच्छ्रातिकृच्छ्रौ चरित्वा अस्मै ज्येष्ठाय तां सोढां दत्त्वा ब्रह्मचार्यादृतभैक्ष्यवद्गुरुपरिभवपरिहारार्थं निवि
श्य पुनरुद्वहेत्॥ अत्र कामित्वापेक्षायामुक्तं तामेवोपयच्छेतेति॥ तामेव स्वोढां ज्येष्ठाय निवेदितां तेन चानु
ज्ञातामुद्वहेत्॥ यत्तु हारीतेनोक्तं॥ ज्येष्ठेऽनिविष्टे कनीयान्निविशमानः परिवेत्ता भवति परिवित्तो ज्ये
ष्ठः॥ परिवेदिनी कन्या॥ परिदायी दाता परियष्टा याजकस्ते सर्वे पतिताः॥ संवत्सरं प्राजापत्येन कृच्छ्रेण
पावयेयुरिति॥ यदपि शङ्खेनोक्तं परिवित्तिः परिवेत्ता च संवत्सरं ब्राह्मणगृहेषु भैक्षं चरेयातामिति॥
तदुभयमपि कामकारेण कन्यापित्राद्यनुज्ञातोद्वाहविषयं॥ प्रायश्चित्तस्य गुरुत्वात्॥ यदा पुनः अका
मतः कन्यापित्रादिदत्तामेव परिणयति तदा मानवं त्रैमासिकं॥ पूर्वोक्तो कृच्छ्रातिकृच्छ्रौ याज्ञवल्क्यीयं व्रतच राम०
तुष्टयं चाज्ञानविषयं॥ यमेनाप्यत्र विशेष उक्तः॥ कृच्छ्रो द्वयोः परिवेदे कन्यायाः कृच्छ्र एव च॥ अतिकृच्छ्रं १५३

चरेद्दाता होता चान्द्रायणं चरेदिति॥ एतच्च पर्याहिताद्दीनामपि समानं॥ एकयोगनिर्देशात्॥ यथाह गौतमः
॥ परिवित्तिपरिवेत्तृपर्याहितपर्याधात्रग्रेदिधिषूपतीनां संवत्सरं प्राकृतं ब्रह्मचर्यमिति॥ अत एव वशिष्ठे
नाग्रेदिधिषूपत्याद्दाविदमेव प्रायश्चित्तमुक्तं॥ अग्रेदिधिषूपतिः॥ कृच्छ्रं द्वादशरात्रं चरित्वा निविशेत्तां
चैवोपयच्छेत् दिधीषूपतिः॥ कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्त्वा पुनर्निविशेतेति॥ अग्रेदिधिष्वादेर्लक्षणं स्मृ
त्यन्तरेऽभिहितं॥ ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा॥ या साग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृतेति त
त्राग्रेदिधिषूपतिः प्राजापत्यं कृत्वा तामेव ज्येष्ठां पश्चादन्येनोढामुद्वहेत्॥ दिधिषूपतिः कृच्छ्रातिकृच्छ्रौ कृत्वा
स्वोढां ज्येष्ठां कनीयस्याः पूर्वविवाहे दत्त्वाऽन्यामुद्वहेत्॥ इति परिवेदनप्रायश्चित्तं॥ तथा भृतकाध्यापकभृतका
ध्यापितयोश्च पयसा ब्राह्मीसुवर्चलां पिबेदित्यधिकृत्य विष्णुनोक्तं॥ भृतकाध्यापनं कृत्वा भृतकाध्यापितस्त
था॥ अनुयोगप्रदानेन त्रीन्पक्षान्नियतः पिबेदिति॥ उत्कर्षहेतोरधीयानस्य किंपदसिनाशितं त्यजेतिएवं पर्यु

१५४ नुयोगोनुयोगप्रदानं॥अतएवसंवत्सरेरद्यानुयोगानध्येतुःपतितोमनुरब्रवीदित्युक्तं॥अत्रापिपूर्वोक्त
व्रतैःसहास्यशक्त्यपेक्षयाविकल्पः॥इतिभृतकाध्यापकभृतकाध्यापितप्रायश्चित्तप्रकरणं॥पारदार्ये
ष्वपपातकसामान्यप्राप्तमानवत्रैमासिकस्यायाज्ञवल्कीयव्रतचतुष्टयस्यापिगुरुदारादावपवादउक्तः
॥तथान्यत्रापिगोतमादिभिश्चपारदार्येविशेषेणापवादउक्तः॥यथाहगोतमः॥द्वेपारदार्येत्रीणिश्रो
त्रियस्येति॥तथावार्षिकंप्राकृतंब्रह्मचर्यंप्रस्तुत्यतेनैवेदमभिहितं॥उपपातकेषुचैवमिति॥तेनेत्थंव्य
वस्था॥ऋतुकालेकामतोजातिमात्रब्राह्मणीगमनेवार्षिकंप्राकृतंब्रह्मचर्यं॥तस्मिन्नेवकालेकर्मसाध
नत्वादिगुणशालिन्यांब्राह्मण्यागमनेद्वैवर्षंप्राकृतंब्रह्मचर्यं॥तादृश्याएवश्रोत्रियभार्यागमनेत्रीणिव
र्षाणिप्राकृतंब्रह्मचर्यं॥यद्वाश्रोत्रियपत्न्यांगुणवत्यांब्राह्मण्यांचैवार्षिकं॥तादृग्विधायामेवक्षत्रियायां राम०
द्विवार्षिकं॥तादृश्यामेववैश्यायांवार्षिकमितिव्यवस्था॥एतत्समानदृष्ट्याशूद्रायांषाण्मासिकंब्रह्मचर्यं १५४

कल्पनीयं॥अतएवशंखेनवैश्यायामवकीर्णीसंवत्सरं।ब्रह्मचर्यंत्रिषवणंचानुतिष्ठेत्क्षत्रियायांद्वेवर्षेत्रीणि
ब्राह्मण्यांवैश्यावच्चशूद्रायांब्राह्मणपरिणीतायामितिवर्णक्रमेणह्रासोदर्शितः॥एवंक्षत्रियस्यापिक्षत्रिया
दिस्त्रीषुक्रमेणद्वैवार्षिकवार्षिकषाण्मासिकानिपूर्वोक्तएवविषयेयोजनीयानि॥वैश्यस्यवैश्याशूद्रयोर्वार्षि
कषाण्मासिके॥शूद्रस्यशूद्रांपरपत्नींषाण्मासिकमेव॥यत्तापस्तंबीयवचनं॥सवर्णायामन्यपूर्वायांस
कृत्सन्निपातेपादःपतत्येवमाभ्यासेपादपादश्चतुर्थेसर्वमिति॥तद्गौतमीयत्रिवार्षिकेणसमानविषयं॥अन
न्यपूर्विकायांचतुरभ्यासेद्वादशवार्षिकप्रायश्चित्तविधानादेकस्यामेवगमनाभ्यासेनेदंप्रायश्चित्तंकिंतुप्रति
गमनेपादपादन्यूनंप्रायश्चित्तंकल्प्यं॥एतत्सर्वंकामकारविषयं॥अकामतकारविषयं॥अकामतःपुनरेता
वदेवार्द्धंतत्पूर्वोक्तविषयेयोजनीयं॥अनृतुकालेतुजातिमात्रब्राह्मण्यांकामतोगमनेमानवंत्रैमासिकं॥
जातिमात्रक्षत्रियादिस्त्रीपुतस्मिन्नेवविषयेतदीयान्येवद्वैमासिकचांद्रायणमासिकानियोजनीयानि॥क्षत्रिया

१५५ दीनां वा क्षत्रियादिस्त्रीषु द्वैमासिकादीन्येव॥ अकामतः पुनरेतासु त्रैवार्षिकाणां याज्ञवल्क्यीयमध्यमैकाद
शाहोहीनं मासं पंचगव्याहारो मासं प्राजापत्यसत्वरणं चान्द्रायणं च क्रमेण द्रष्टव्यं॥ शूद्रागमने तु कामतो विहि
तं मासव्रतमेवार्धोत्कृच्छ्रसा योजनीयं॥ अत एव संवर्तः॥ शूद्रां तु ब्राह्मणो गत्वा मासं मासार्द्धमेव वा॥ गोमू
त्रयावकाहारस्तिष्ठेत्तस्यापमोक्षकृत्॥ इत्यकामतोर्धमासिकमभिप्रेतं॥ ब्राह्मणश्चेदप्रेक्षापूर्वकं ब्राह्मणदा
रानभिगच्छेन्निवृत्तिधर्मकर्मणः कृच्छ्रोऽनिवृत्तधर्मकर्मणोऽतिकृच्छ्र इति ब्राह्मणभार्यायां शूद्रायां द्रष्टव्यं
॥ द्विजातेः स्त्रीषु वा विप्रोढासु द्विस्त्रिर्व्यभिचारितासु बुद्धिपूर्वगमने च॥ तथा संवर्तः॥ विप्रामस्वजनां गत्वा
प्राजापत्यं समाचरेदिति॥ कामतस्तु राज्ञां प्रव्रजितां धात्रीं साध्वीं वर्णोत्तमामपि॥ कृच्छ्रद्वयं प्रकुर्वीत सगोत्रा
मभिगम्य चेति यमोक्तद्वयं द्रष्टव्यं॥ चतुराद्यभ्यासे तु व्यभिचारस्य स्वैरिण्यां वृषल्यामवकीर्णः सचैलस्नात राम०
उदकुंभं दद्याद्ब्राह्मणाय॥ वैश्यायां चतुर्थकालाहारो ब्राह्मणान्भोजयेत्॥ क्षत्रियायां त्रिरात्रोपोषितो य १५५

वाढकं दद्यात्॥ ब्राह्मण्यास्त्र्यहमुपोष्य घृतपात्रं दद्यादिति शंखोक्तं द्रष्टव्यं॥ चतुराद्यभ्यासविषयत्वं चास्य॥ चतु
र्थे स्वैरिणी प्रोक्ता पंचमे बंधकी मतेति स्मृत्यंतरादवगम्यते॥ अत्रैव विषये षट्त्रिंशन्मतेऽप्युक्तं॥ ब्राह्मणीं बंधकीं
गत्वा किंचिद्दद्याद्द्विजातये॥ राजन्यां च धनुर्दद्याद्वैश्यां गत्वा तु चैलकं॥ शूद्रां गत्वा तु वै विप्र उदकुंभं द्विजातये
॥ दिवसोपोषितो वा स्याद्दद्याद्विप्राय भोजनमिति॥ इदं च प्रायश्चित्तजातं गर्भानुत्पत्तिविषयं॥ तदुत्पत्तौ यद्वि
शेषेण प्रायश्चित्तमुक्तं तदेव तत्र द्विगुणं कुर्यात्॥ गमने तु व्रतं यस्याद्गर्भे तद्द्विगुणं चरेदिति उशनसः स्म
रणात्॥ शूद्रायां गर्भमादधतश्चतुर्विंशतिमते विशेष उक्तः॥ वृषल्यामभिजातस्तु त्रीणि वर्षाणि चतुर्थका
लसमये सक्तुं भुंजीतेति॥ यत्तु मनुवचनं॥ शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिं॥ जनयित्वा सुतं त
स्यां ब्राह्मण्यादेव हीयते॥ इति॥ तत्पापगौरवख्यापनपरं॥ प्रातिलोम्यव्यवाये तु सर्वत्र पुरुषस्य वध ए
व॥ प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनमिति वचनात्॥ यत्तु प्रचेतोवचनं॥ शूद्रस्य ब्राह्मणीमोहा

१५६ ऽच्छतः॥ वर्णमेतद्दत्तं हेयं माता यस्माद्धितस्य सा॥ पादहान्यान्यवर्णास्तु गच्छतः सार्द्धवर्णिकमिति द्वादशवार्षि
कातिदेशिकं तत्स्त्राभार्याभ्यां स्यागच्छतो वेदितव्यं॥ मोहादिति विशेषणोपादानात्॥ यत्तु संवर्त्तवचनं॥ कथंचिद्ब्रा
ह्मणीं गच्छेत्क्षत्रियो वैश्य एव वा कृच्छ्रं सांतपनं वास्यात्प्रायश्चित्तं विशुद्धये॥ शूद्रस्तु ब्राह्मणीं गच्छेत्कथंचि
त्काममोहितः गोमूत्रयावकाहारो मासेनैकेन शुध्यतीति॥ तदसंतत्यभिचरितब्राह्मणीविषयं॥ अंत्यजाग
मनेपि प्रायश्चित्तं च हस्संवर्तेनोक्तं॥ रजकव्याधशैलूषवेणुचर्मोपजीविनोः एतास्तु ब्राह्मणो गत्वा चरेच्चांद्रा
यणद्वयमिति॥ इदं च ब्राह्मणस्याकामतः सकृद्गमनविषयं॥ क्षत्रियादीनां तु पादपाददानं कल्पनीयं॥ अत्रे
वायस्तंवेनाप्युक्तं॥ म्लेच्छी नटी चर्मकारी रजकी बुरडी तथा॥ एता सुगमनं कृत्वा चरेच्चांद्रायणद्वयमिति॥ अंत्य
जाश्चतेनैव दर्शिताः॥ रजकश्चर्मकारश्च नटो बुरुड एव च॥ कैवर्त्तमेदभिल्लाश्च सप्तैते अंत्यजाः स्मृता इति राम०
ये तु चांडालादयो सावसायिनस्तत्स्त्रीगमने गुरुतरं प्रायश्चित्तं गुरुतल्पप्रायश्चित्तप्रकरणे दर्शितं॥ एतासां १५६

चांत्यजस्त्रीणां मध्ये परस्परेकस्याप्यवाये प्रायश्चित्तमभिहितं तत्सर्वास्तु भवति॥ सर्वासां सदृशत्वात्॥ यथाहोश
नाः॥ बहूनामेकधर्माणामेकस्यापि यदुच्यते॥ सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृता इति॥ अकामतस्तु ग
मने॥ चंडालमेदश्वपचकपालव्रतधारिणां॥ अकामतः स्त्रियो गत्वा पराकव्रतमाचरेदिसापस्तंबोक्तं द्रष्ट
व्यं॥ यच्च संवर्तः॥ रजकव्याधशैलूषवेणचर्मोपजिविनां॥ स्त्रियो विप्रो यदा गच्छेत्कृच्छ्रं चांद्रायणं चरेदिति
तदप्यकामविषयं॥ यत्तु शातातपेनोक्तं॥ कैवर्त्तीरजकीचववेणुचर्मोपजीविनी॥ प्राजापत्यविधानेन कृच्छ्रे
णैकेन शुध्यतीति॥ तद्रेतःसेकात्प्राङ्निवृत्तिविषयं॥ यत्तूशनसोक्तं॥ कापालिकान्नभोक्तॄणां तन्नारीगा
मिनां तथा॥ ज्ञानात्कृच्छ्रादमुद्दिष्टमज्ञानादैंदवद्वयमिति तदभ्यासविषयं॥ यदा तु चांडाल्यादिषु गर्भो भव
ति॥ तदा॥ चांडाल्यां गर्भमारोप्य गुरुतल्पव्रतं चरेदित्युशनसोक्तं द्वादशवार्षिकं द्रष्टव्यं॥ यत्तु अंत्यजायां
प्रसूतस्य निष्कृतिर्न विधीयते॥ निर्वासनं कृतांकस्य तस्य कार्यमसंशयमित्यापस्तंबवचनं तत्कामकारवि

१५८ षयं॥ स्त्रीणामपि सर्वानुलोमव्यवाये यत्पुरुषस्योक्तं द्विवार्षिकादि॥ तदेव भवति॥ यत्पुंसः परदारेषु तच्चैनां
चारयेद्व्रतमिति मनुस्मरणात्॥ प्रातिलोम्येन व्यवाये स्त्रीपुंसयोः प्रायश्चित्तभेदः॥ यथाह वशिष्ठः॥ शूद्रश्चे
द्ब्राह्मणीमभिगच्छेद्वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येद्ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां ख
रमारोप्य महापथं संव्राजयेत्पूता भवतीति विज्ञायत इति तथा वैश्यश्चेद्ब्राह्मणीमभिगच्छेल्लोहितदर्भैर्वेष्ट
यित्वा वैश्यमग्नौ प्रास्येद्ब्राह्मण्याः शिरसि वापनं कारयित्वा सर्पिषाभ्यज्य नग्नां गौरं खरमारोप्य महाप
थमनुसंव्राजयेत्पूता भवतीति विज्ञायत इति॥ तथा राजन्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा राज
न्यमग्नौ प्रास्येद्ब्राह्मण्याः शिरसि वापनं कारयित्वा सर्पिषाभ्यज्य नग्नां गौरं खरमारोप्य महापथमनुसंव्राज
येत्पूता भवतीति विज्ञायत इति॥ पूता भवतीति वचनाद्राजवीथीपरिव्राजनमेव दंडरूपं प्रायश्चित्तान्तर राम०
निरपेक्षं शुद्धिसाधनमिति दर्शयति॥ ब्राह्मण्याः प्रातिलोम्येन द्विजानिव्यवाये प्रायश्चित्तान्तरमुक्तं संवर्तेन १५८

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्यस्य स्मारकम्

ब्राह्मणप्रकामा गच्छेच्चेत्क्षत्रियं वैश्यमेव वा॥ गोमूत्रयावकैर्मासान्नर्द्धांशुविशुध्यतीति॥ कामतद्विगुणं भवेदि
ति वचनात्॥ कामतस्तु द्विगुणं कर्त्तव्यं॥ षट्त्रिंशन्मतेपि॥ ब्राह्मणी क्षत्रियवैश्यसेवायां अतिकृच्छ्रातिकृच्छ्रौ चरेत्क्ष
त्रिययोषिद्ब्राह्मणराजन्यवैश्यसेवायां कृच्छ्रं दं प्राजापत्यसमतिकृच्छ्रं॥ वैश्ययोषिद्ब्राह्मणराजन्यवैश्यासेवायां कृच्छ्र
च्छ्रपादं कृच्छ्रार्द्धं प्राजापत्यं॥ शूद्रायाः शूद्रसेवने प्राजापत्यं॥ ब्राह्मणराजन्यवैश्यसेवायां त्वहोरात्रं त्रिरात्रं कृच्छ्रा
र्द्धमिति॥ शूद्रसेवायां तु विशेषो रहस्यं चेतसोक्तः॥ विप्रा शूद्रेण संपृक्ता न चेत्तस्मात्प्रसूयते॥ प्रायश्चित्तं स्मृ
तं तस्याः कृच्छ्रं चांद्रायणं त्रयं॥ एतद्विनिष्ठं स्वास्वपतिभ्यां सा वावेदितव्यं॥ चांद्रायणे द्वे कृच्छ्रश्च विप्राया वैश्यसं
गमे॥ कृच्छ्रचांद्रायणे स्यातां तस्याः क्षत्रियसंगमे॥ क्षत्रियाशूद्रसंपर्के कृच्छ्रं चांद्रायणद्वयं॥ चांद्रायणं सकृच्छ्रं
तु चरेद्वैश्यं न संगता॥ शूद्रं गत्वा चरेद्वैश्या कृच्छ्रचांद्रायणोत्तरं॥ आनुलोम्येन कुर्वीत कृच्छ्रपादावरोपितमिति
॥ प्राजापत्यासु चतुर्विंशतिमते विशेष उक्तः॥ विप्रगर्भे पराकः स्यात्क्षत्रियस्य तथैन्दवं॥ ऐन्दवं च पराकश्च वैश्य

१५८ स्याकामकारतः॥ शूद्रगर्भेभवेत्साग श्चंडालोजायतेयतः॥गर्भस्रावेधातुदोषै श्चरेच्चांद्रायणत्रयं॥अका
मकारतइतिविशेषणोपादानात्॥कामकारेपुनःपराकादिकंद्विगुणंकार्यं॥यदातत्वनिःसृतगर्भेवदशमा
संस्थित्वाप्रजायतेतदाप्रायश्चित्ताभावः॥ब्राह्मणक्षत्रियविशांभार्याःशूद्रेणसंगताः॥अप्रजाताविशुध्यं
तिप्रायश्चित्तेननेतराइतिवृद्धहारीतस्मरणात्॥यदत्वाहितगर्भैवपश्चाछूद्रादिभिश्चरतितदागर्भपातशंक
याप्रसवोत्तरकालमेवप्रायश्चित्तंकुर्यात्॥अंतर्वत्नीतुयानारीसमेताऽकामकामिना॥प्रायश्चित्तंनकुर्यात्सा
यावद्गर्भोननिःसृतः॥जातेगर्भेव्रतंपश्चात्कुर्यान्मासंतुयावकं॥नगर्भेदोषस्तत्रास्तिसंस्कार्यःसयथाविधि
॥इतिस्मृत्यंतरदर्शनात्॥यदातोदस्यात्प्रायश्चित्तंनकुर्वंतितदानार्याःकर्णादिकर्त्तनमितिद्रष्टव्यं॥अंत्यज
गमनेपिस्त्रीणांस्मृत्यंतरेप्रायश्चित्तंदर्शितं॥रजकश्चर्मकारश्चनटोबुरुडएवच॥कैवर्तमेदभिल्लाश्चसप्तैतेचांत्यजाःस्मृताः॥
छेदकामोहेदवत्रयं॥तथाचांडालाद्यंत्यावसायिगमनेपि॥चंडालंपुल्कसंम्लेछंश्वपाकंपतितंतथा॥ब्राह्म राम० १५८

रापकामतोगत्वांद्रायणचतुष्टयमिति॥अकामतइतिवचनात्कामतोद्विगुणंकल्प्यं॥तथाचंडालेनतुसंपर्कंय
दिगछेत्कथंचन॥सशिखंवपनंकृत्वांभुंजीयाद्यावकौदनं॥त्रिरात्रमुपवासःस्यादेकरात्रंजलेवसेत्॥आत्म
नासंमितेकूपेगोमयोदककर्दमे॥तत्रस्थित्वानिराहारासात्रिरात्रंततःक्षिपेत्॥शंखपुष्पीलतामूलंपत्रंवा
कुसुमंफलं॥क्षीरेसुवर्णसंमिश्रंक्काथयित्वाततःपिबेत्॥एवभक्तंचरेत्सत्वाघावात्पुष्पवतीभवेत्॥बहिस्ता
वच्चनिवसेद्यावच्चरतितद्व्रतं॥प्रायश्चित्तेततश्चीर्णेकुर्याद्ब्राह्मणभोजनं गोद्वयंदक्षिणांदद्याच्छुध्येत्स्वायंभु
वोब्रवीत्॥एतदप्यकामविषयमेव॥यदिगछेत्कथंचनेतिवचनात्॥अप्यशृंगेणाप्यंत्यजव्यवायेप्राय
श्चित्तांतरमुक्तंसंयुक्तास्यांदस्थांसैर्यासाकृछ्रार्द्धंसमाचरेदितिकामतःसकृद्गमनइदं॥यदात्वाहितगर्भाया
एवपश्चाच्चंडालादिव्यवायःतदातेनैवविशेषउक्तः॥अंतर्वत्नीतुयुवतीसंस्पृष्टावान्ययोनिना॥प्रायश्चित्तंन
साकुर्याद्यावद्गर्भोननिःसृतः॥नप्रचारगृहेकुर्यान्नचांगेषुप्रसाधनं॥नशयीतसमंभर्त्रानवापुंजीतवांधवैः॥

१५१ प्रायश्चित्तं गते गर्भे विधिं कृच्छ्रादिकं चरेत्॥ हिरण्यमथवा धेनुं दद्याद्विप्राय दक्षिणामिति॥ यदा तु कामतोऽसंत
संपर्कं करोति तदा॥ अंत्यजेन तु संपर्के भोजने मैथुने कृते॥ प्रविशेत्संप्रदीप्तेऽग्नौ मृत्युना सा विशुध्यतीत्युश
नसोक्तं द्रष्टव्यं॥ यदा तदुक्तं प्रायश्चित्तं न करोति तदा पुंल्लिंगेनोक्तं पतितावध्या वा भवेत्॥ हीनवर्णोपभुक्ता या
सा त्यक्तव्या वध्याथवा भवेत्॥ इति पराशरस्मरणात्॥ इति पारदार्यप्रायश्चित्तप्रकरणं॥ तथा परिवित्ति प्रायश्चि
त्तानामपि परिवेत्तृप्रायश्चित्तवद्व्यवस्था विज्ञेया॥ इयांस्तु विशेषः॥ परिवेत्तुर्यस्मिन्विषये कृच्छ्रातिकृच्छ्रौ त
त्र परिवित्तेः प्राजापत्यं इति॥ परिवित्तिः कृच्छ्रं द्वादशरात्रं चरित्वा पुनर्निर्विशेत्॥ तां चोपयच्छेदिति वसि
ष्ठस्मरणात्॥ वार्द्धुष्यलवणक्रययोस्तु मनुयोगीश्वरोक्तसामान्योपपातकप्रायश्चित्तानि जातिशक्तिगु
णाद्यपेक्षया योज्यानि॥ वार्धुष्यलवणयानंतरं स्त्रीशूद्रविट्क्षत्रवधश्चोपपातकमध्ये पठितं तत्र प्राय रा.म०
श्चित्तांतरमाह॥ ऋषभैकसहस्रा गा दद्यात्क्षत्रवधे पुमान्॥ ब्रह्महत्याव्रतं वापि वत्सरत्रितयं चरेत्॥ वैश्यहा १५१

ब्दं चरेदेतद्दद्याद्वैकशतं गवां॥ षण्मासं शूद्रहाप्येतद्धेनुर्दद्याद्दशाथवा॥ एकमधिकं यस्मिन्सहस्रे तदेकसह
स्रं तस्य पूरणं एकसहस्रं॥ ऋषभ एकः सह स्त्रियः यासां ता ऋषभैकसहस्रा गाः॥ ताः क्षत्रवधे दद्यात्॥ अथवा ब्र
ह्महत्याव्रतं वर्षत्रयं कुर्यात्॥ वैश्यघाती पुनरेतद्ब्रह्महत्याव्रतमेकवर्षं चरेत् गवामृषभैकशतं वा दद्यात्॥ शू
द्रघाती ब्रह्महत्याव्रतं षण्मासांश्चरेत्॥ यद्वा दश धेनूः श्वेताः सवत्सा दद्यात्॥ इदमकामतो जातिमात्रक्ष
त्रादिवधविषयं॥ अकामतस्तु राजन्यं विनिपात्य इति प्रक्रम्य तेषामेव प्रायश्चित्तानां मानवेऽभिधानात्॥ ज्ञानत
पसोश्च शक्त्यपेक्षया व्यवस्था॥ ईषद्वृत्तस्थयोस्तु विट्शूद्रयोः तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः
वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडश इति मनूक्तं द्रष्टव्यं॥ वृत्तस्थे क्षत्रिये तु सार्धं चतुर्वार्षिकं कल्प्यं॥ वृ
त्तशब्देन चात्मगुणादिकमुच्यते॥ गुरुपूजा घृणा शौचं सत्यमिंद्रियनिग्रहः॥ प्रवर्त्तनं हितानां च तत्सर्वं वृत्त
मुच्यते॥ इति मनुस्मरणात्॥ यत्तु हारीतवचनं॥ ब्राह्मणः क्षत्रियं हत्वा षड्वर्षाणि व्रतं चरेत्॥ वैश्यं हत्वा च

१६० रेदेवं व्रतं चैवार्षिकं द्विजः॥ शूद्रं हत्वाचरेद्वर्षं वृषभैकादशाश्च गा इति॥ तत्कामकारविषयं॥ श्रोत्रियक्षत्रिया
दिवधे तु तुरीयो नं क्षत्रियस्य वधे ब्रह्महत्याव्रतं॥ अर्धं वैश्यवधे कुर्यात्तुरीयं वृषलस्य त्विति॥ वृद्धहारीतोक्तं
द्रष्टव्यं॥ यत्तु वशिष्ठवचनं ब्राह्मणो राजन्यं हत्वाष्टौ वर्षाणि व्रतं चरेत् षड्वैश्यं त्रीणि शूद्रमिति तदपि हारीती
येन समानसमानविषयं॥ क्षत्रिये त्वीषड्गुणस्सूनइत्येन समानविषयं॥ क्षत्रिये त्वीषड्गुणस्सूनइत्येतावानि
शेषः॥ यदा तु श्रोत्रियो वृत्तस्थश्च भवति पूर्वयोर्वर्णयोर्वेदाध्यायिनं हत्वा सायस्तं वा क्तं द्रष्टव्यं द्वादशवा
र्षिकं मारब्धयागे त्वश्रोत्रियक्षत्रियादौ व्यापादिते यागस्थक्षत्रविड्घाती चरेद्ब्रह्महघात॥ इदमकामतो ज्ञा
तिमात्रस्याद्विवधविषयं॥ अकामहनने व्रतमिति द्रष्टव्यं॥ श्रोत्रिये पुनर्योगस्थक्षत्रियादौ ब्राह्मणस्य राज
न्यवधे षड्वार्षिकं प्राकृतं ब्रह्मचर्यमृषभैकसहस्राश्च गा दद्यात् वैश्यवधे द्विवार्षिकमृषभैकशताश्च गा राम०
दद्यात् शूद्रवधे सांवत्सरिकमृषभैकादशाश्च गा दद्यादिति गौतमोक्तो दानतपसोः समुच्चयो द्रष्टव्यः॥ एतत्वः १६०

मति पूर्वविषयं॥ पूर्ववद्रमति पूर्वं चतुर्ष्वपि वर्णेषु प्रमाप्य द्वादश षड्त्रीन् संवत्सरं च व्रतान्यादिश्य तेषां गोसहस्रं
तदर्धं तस्यार्धमर्धं च दद्यात् सर्वेषामानुपूर्व्येणेति शंखस्मरणात्॥ इदं द्वादशवार्षिकं च गौतमीयविषय एव कि
चित्स्यूनगुणे क्षत्रिये गुणाधिके वैश्यशूद्रयोश्च द्रष्टव्यं स्त्रीशूद्रविट्क्षत्रवध इत्युपपातकमध्ये विशेषत
एव पठितत्वेनोत्सर्गापवादन्यायगोचरत्वाभावादुपपातकसामान्यप्राप्तान्यपि प्रायश्चित्तान्यत्र योजनीया
नि॥ तत्र दुर्वृत्तक्षत्रियादौ कामतो व्यापादिते पानवत्त्रैमासिकं चान्द्रायणं च वर्णक्रमेण योज्यं॥ अकामतस्तु यो
गीश्वरेणोक्तं त्रिरात्रोपवाससहितं ऋषभैकादशगोदानं मासे पंचगव्याशनं मासे पयोव्रतं यथाक्रमेण योज्यं
एतच्च प्रागुक्तं व्रतं ब्राह्मणकर्तृके क्षत्रादिवधे द्रष्टव्यं॥ अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः। तथा ब्राह्म
णराजन्यवधे षड्वार्षिकं॥ ब्राह्मणः क्षत्रियं हत्वेत्यादिषु मनुगौतमहारीतवाक्येषु ब्राह्मणग्रहणात्॥ क्ष
त्रियादिकर्तृके तु क्षत्रियादिवधे पादन्यूनं द्रष्टव्यं॥ विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतं॥ वैश्येऽर्धं पादश

१६१ कृच्छ्रः शूद्रजातिषु शस्यत इति वृद्धहारीतस्मरणात्॥ यत्तु पर्षद्याब्राह्मणानांतुसाराज्ञांद्विगुणमतोवैश्यानां
त्रिगुणंप्रोक्तापर्षद्वच्चव्रतंस्मृतमिति अंगिरोवचनंतत्प्रातिलोम्येनवाग्दंडपारुष्यविषयमुक्तंगोवधप्र
करणे॥ मूर्धावसिक्तादीनांवधेयेतत्प्रायश्चित्तजातंनभवति॥ तेषांक्षत्रियादित्वाभावात्॥ अतोदंडानु
सारेणोणतद्वधेपूर्वोक्तव्रतकल्पनस्यवृद्धिह्रासौकल्पनीयौ॥ दंडस्यचवृद्धिह्रासौदर्शितौ॥ दंडप्रणयनं
कार्यंवर्णजात्युत्तराधरैरिति॥ इतिक्षत्रियादिवधप्रायश्चित्तप्रकरणं॥ ॥स्त्रीवधप्रायश्चित्तमाहप्रा
रणं॥ ॥स्त्रीवधप्रायश्चित्तं॥ दुर्वृत्तब्रह्मक्षत्रविट्शूद्रयोषाः प्रमाप्यतु॥ दृतिंधनुर्बस्तमविंक्रमाद्द्या
द्विशुद्धये॥ ब्राह्मण्यादिभार्याः स्वैरिणीः प्रमाप्य क्रमेण दृतिं जलाधारं चर्मकोशं धनुः कार्मुकं॥ बस्तंछागं॥
अविमेषंचविशुद्धयेदद्यात्॥ इदंचप्रातिलोम्येनासजातिप्रसूतानांब्राह्मण्यादीनामकामतोवधविषयं राम०
॥कामतस्तुब्रह्मगर्भआह॥ प्रतिलोमप्रसूतानांस्त्रीणांमासावधिःस्मृतः अंतरप्रभावानांचसूतादीनां १६१

चतुर्द्विषट्॥ ब्राह्मण्यावधेषण्मासाः क्षत्रियायाश्चत्वारोवैश्यायाद्वावित्येवंयथार्हतयान्वयः यदातुवेश
कर्म्मणाजीवंतींव्यापादयतितदाकिंचिद्देयं॥ वैशिकेनकिंचिदितिगौतमस्मरणात्॥ वैशिकेनवेशकर्मणा
जीवंतींव्यापादितायांकिंचिदेवदेयं॥ तच्चजलंकोशकूपेष्वविमेवाब्राह्मणाः प्रतिपादयेत्॥ वधेधनुःक्ष
त्रियायाः॥ बस्तोवैश्यावधेस्मृतः शूद्रायामविकंवश्यांहत्वादद्याज्जलंनरइत्यंगिरःस्मरणात्॥ यदापुनः
क्षत्रियादिभिः प्रातिलोम्येनव्यभिचरिताब्राह्मण्यादीर्व्यापादयति॥ तदागोवधप्रायश्चित्तानियथार्हंयो
ज्यानि॥ ईषद्व्यभिचरितब्राह्मण्यादिवधेविशेषमाह॥ अप्रदुष्टांस्त्रियंहत्वाशूद्रहत्याव्रतंचरेत्॥ यदात्व
प्रकर्षेणदुष्टामीषद्व्यभिचारिणींब्राह्मण्यादिकांव्यापादयतितदाशूद्रहत्याव्रतंषाण्मासिकंकुर्यात्॥ द
शवाधेनूर्दद्यात्॥ इदंचषाण्मासिकमकामतोब्राह्मण्याव्यापादनेक्षत्रियावधेचकामकृतेद्रष्टव्यं॥ काम
तोवैश्यावधेदशधेनूर्दद्यात्॥ कामतःशूद्रावधेतुप्रकरणतःसाधारणप्राप्तंमासंपंचगव्याशनं॥ यदा

१६२ तुकामतो ब्राह्मणीं व्यापादयति तदा द्वादशमासिकं ॥ क्षत्रियादीनां त्वकामतो वधे त्रैमासिकं सार्धमासं सार्द्ध
द्वाविंशत्यहः ॥ यथाह प्रचेताः । अन्त्यतुमतीं ब्राह्मणीं हत्वा कृच्छ्राब्दं षण्मासान्वेति ॥ क्षत्रियां हत्वा षण्मा
सान्मासत्रयं वेति वैश्यां हत्वा मासत्रयं सार्द्धमासं वेति शूद्रां हत्वा सार्द्धमासं सार्द्धद्वाविंशत्यहानि वेति ॥
यत्तु हारीतेन षड्वर्षाणि राजन्यप्रकृतं ब्रह्मचर्यं त्रीणि वैश्ये सार्द्धं शूद्र इति प्रतिपादितोक्तं ॥ क्षत्रियव
द्ब्राह्मणीषु वैश्यच क्षत्रियायां शूद्रवच्च वैश्यायां शूद्रां हत्वा नवमासिकमित्युक्तं ॥ तदपि कर्मसाधन
त्वादिगुणयोगित्वाकामतो व्यापादने द्रष्टव्यं अकामतस्तु सर्वत्रार्धं कल्प्यं ॥ आत्रेय्यास्तु प्रागुक्तं ॥ इ
ति स्त्रीवधप्रायश्चित्तप्रकरणं ॥ हिंसाप्रायश्चित्तप्रसंगात्प्रकीर्णकपदाभिधेयानुपपातकप्रायश्चि
त्तमाह ॥ अस्थिमतां सहस्रं तु तथानस्थिमतामनः ॥ अस्थिमतां प्राणिनां कृकलासप्रभृतीनामनुक्तनि
ष्कृतीनां सहस्रं हत्वा ॥ अनस्थिमतां मत्कुणदंशमशकप्रभृतीनां अनः शकटं तत्परिपूर्णमात्रं हत्वा शू रा.म. १६२

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

द्रहत्याव्रतं षाण्मासिकं प्राकृतं ब्रह्मचर्यं चरेत् दश धेनूर्वा दद्यात् ॥ सहस्रमिति परिमाणनियमात्ततोधिकव
धे तिरिक्तं कल्प्यं ॥ अर्वाक्तु नः प्रत्येकं वधे तु ॥ किंचित्सास्थिवधे देयं प्राणायामस्त्वनस्थिक इति वक्ष्यति ॥ त
थानस्थिमतामनइ सेन घट्टकादिजंतुविषयं ॥ स्तुविहानस्थिघुणादिजंतुवधे तु कृमिकीटवयो हत्येत्यादि
नामलिनीकरणीयानभिधाय मलिनीकरणीयेषु तमः स्याद्धावकस्त्र्यहमिति मनूक्तं द्रष्टव्यं ॥ किंच ॥ मार्जा
रगोधानकुलमंडूकश्वपतत्रिणः ॥ हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं वा पा[illegible]ं चरेत् ॥ मार्जारादयः प्रसिद्धाः ॥ पत ऽर्कं
त्रिणश्चाषकाकोलूकादयस्तान्हत्वा त्रिरात्रं पयः पिबेत् ॥ पादकृच्छ्रं वा कुर्यात् ॥ वात्स्यात्स्रवंतीस्नानं यो
जनगमनादिकं वा कुर्यात् ॥ यथाह मनुः ॥ पयः पिबेत्त्रिरात्रं वा योजनं वाध्वनो व्रजेत् ॥ उपस्पृशेत्स्रवंत्यां
वा सूक्तं वाब्दैवतं जपेत् ॥ इति ॥ इदं च प्रत्येकवधविषयं ॥ समुदितवधे तु ॥ मार्जारनकुलौ हित्वा चाषमंडू
कमेव च ॥ श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् इति मनूक्तं षाण्मासिकं द्रष्टव्यं यत्तु नवशिष्टेनोक्तं

श्वमार्जारमंडूकनकुलसर्पडुंडुभमूषिकान्हत्वाकृच्छ्रंद्वादशरात्रंचरेत्॥ किंचिद्दद्यादिति॥ तत्कामतोभ्या
१६३ सविषयेवेदितव्यं॥ डुंडुभोल्पसर्पकः डुंडुभरीवा॥ किंच॥ गजेनीलवृषाः पंचशुकेवत्सोद्विहायनः॥ ख
राजमेषेषुवृषोदेयः क्रौंचेत्रिहायनः॥ इतिनिव्यापादितेपंचनीलवर्णावृषादेयाः॥ शुकेपक्षिणिद्विव
र्षोवत्सः॥ खरभजमेषेडकेव्यापादितेषुप्रत्येकमेकोवृषः॥ क्रौंचपक्षिणित्रिहायनोवत्सः॥ देयइतिस
र्वत्रानुषंगः॥ मनुनाप्यत्रविशेषउक्तः॥ वासोदद्यात्सर्पंहत्वापंचनीलान्वृषान्गजं॥ अजमेषावनडाहं
खरंहत्वैकहायनमिति॥ किंच॥ हंसश्येनकपिक्रव्याज्जलस्थलशिखंडिनः॥ भासंचहत्वादद्याद्गामक्रव्या
दस्तुवत्सिकां॥ क्रव्यंअपक्वमांसंतदत्तीतिक्रव्यात्व्याघ्रश्वगालादिमृगविशेषः॥ वानरसाहचर्यात्॥ त
थाहंसश्येनसमभिव्याहारात्कंकगृध्रादिविशेषश्चगृह्यते॥ जलशब्देनजलचराबकादयोगृह्यंते॥ स्थलश राम०
ब्देनस्थलचराबकादयः॥ शिखंडीमयूरः॥ भासःपक्षिविशेषःप्रसिद्धः एतेषांप्रत्येकवधेगामेकांदद्यात्॥ १६३

अक्रव्यादस्तुहरिणादिमृगाश्वंजरीटादिपक्षिविशेषान्वाहत्वावत्सतरींदद्यात्॥ तथाचमनुः॥ हत्वाहंसंब
लाकांचबकंबर्हिणमेवच॥ वानरंश्येनभासौचस्पर्शयेद्ब्राह्मणायगां॥ क्रव्यादस्तुमृगान्हत्वाधेनुंदद्यात्पयस्वि
नीं॥ अक्रव्यादोवत्सतरीमुष्ट्रंहत्वातुकृष्णलमिति॥ किंच॥ [illegible]रगेष्वायसोदंडः पंडकेत्रपुसीसकं॥ कोलेघृतघटो घुंसभाषा
देयउष्ट्रेगुंजाहयेऽशुकं॥ सरीसृपेषुव्यापादितेषुअयोमयोदंडस्तीक्ष्णाग्रांतोदेयः पंडकेत्रपुसीसकं॥ कोले
घृतघटोदेयउष्ट्रेगुंजानपुंसकेव्यापादितेत्रपुसीसकंचमाषपरिमितंदद्यात्पलालभारंवा॥ षंढकंहत्वापला
लभारंवात्रपुसीसकंदद्यादितिस्मृत्यंतरदर्शनात्॥ यद्यपि॥ पंडकोलिंगहीनःस्यात्संस्कारार्हश्चनैवसइतिदे
वलवचनेनसामान्येनस्त्रीपुल्लिंगरहितोनिर्दिष्टः॥ तथापिनगोब्राह्मणरूपस्येहविवक्षा॥ गोब्राह्मणवधनि
षेधस्यजातस्यवच्छेदेनप्रवृत्तेः॥ लिंगविरहिणिचपिंडेसमवायाविशेषात्तन्निमित्तमेवलघुप्रायश्चित्तमुक्तं॥ त
स्मान्मृगपक्षिणत्वपरंविवक्षिता॥ मृगपक्षिसमभिव्याहाराच्चकोलेसूकरेव्यापादितेघृतकुंभोदेयः॥ उष्ट्रेगुं

जाद्देया॥ वाजिनिविनिपातितेमत्स्यंश्चुकंवस्त्रंदेयं॥ तथा च मनुः॥ अभ्रिंकार्ष्णायसींदद्यात्सर्पंहत्वाद्विजो
१६४ त्तमः॥ पलालभारकंषंढेसैसकंचैवमाषकमिति॥ किंच॥ त्रित्रिंशेतुतिलद्रोणंगजादीनामशक्नुवन्॥
दानंदातुंचरेत्कृच्छ्रमेकैकस्यविशुद्धये॥ त्रित्रिंशेपतत्रिणिआपादितेतिलद्रोणंदद्यात्॥ द्रोणशब्दश्चप
रिमाणविशेषवचनः॥ अष्टमुष्टिभवेत्किंचित्किंचिदष्टौतुपुष्कलं॥ पुष्कलानितुचत्वारिआढकःपरिकी
र्तितः॥ चतुराढकोभवेद्द्रोणइत्येतन्मानलक्षणं॥ इतिवशिष्ठस्मरणात्॥ पूर्वोक्तानांगजादीनांव्यापाद
नेनिर्धनत्वेनतीलद्रव्यंपंचकादिदानंकर्तुमशक्नुवन्प्रत्येकंकृच्छ्रंचरेद्विशुध्यर्थं॥ कृच्छ्रशब्दश्चात्रलक्षणया
क्लेशसाध्यतपोमात्रेद्रष्टव्यः॥ तपांसिचगौतमेनदर्शितानि॥ संवत्सरःषण्मासांश्चत्वारःत्रयोद्वावेकश्च
तुर्विंशत्यहोद्वादशाहषडहस्त्र्यहोहोरात्रइतिकालः॥ एतान्येवानादेशेविकल्पेनक्रियेरन्नेनसिगुरूणिगु राम०
रूणिलघुनिलघूनीतियदिकृच्छ्रशब्देनमुख्यार्थोगृह्यतेतर्हिगजेश्चुकेवाविशेषेणप्राजापत्यएवस्यात्॥ १६४

नचतद्युक्तं॥ तपोमात्रपरत्वेतुदानगुरुलघुभावाकल्पनंयातपसोपिगुरुलघुभावोयुज्यते॥ ततश्चगजे
द्वैमासिकंयावकाशनंश्चुकेत्र्युपवासइति॥ एवमन्यत्रापिदानानुसारेणप्रायश्चित्तंकल्प्यं॥ किंच॥ फलद्या
न्नरसजसत्वघातेघृताशनं॥ औदुंबरादौफलेमधुकादौचकुसुमेचिरस्थितभक्तसक्तादौरसेचगुडेच
यानिसत्वानिप्राणिनोजायंतेतेषांघातनेघृताशनंशुद्धिसाधनं॥ इदंचघृताशनंभोजनकार्यएवविधीय
ते॥ प्रायश्चित्तानांतपोरूपत्वात्॥ दर्शितंचतपोरूपत्वमांगिरसेनप्रायश्चित्तपदनिर्वचनव्याजेन॥
प्रयोनामतपःप्रोक्तंचित्तंनिश्चयउच्यते॥ तपोनिश्चयसंयुक्तंप्रायश्चित्तंतदुच्यतइति॥ ॥ प्रतिप्राणिप्रा
यश्चित्तस्यानंत्यात्स्वष्टाकोटेनवक्तुमशक्यत्वात्सामान्येनप्रायश्चित्तमाह॥ किंचित्सास्थिवधेदेयप्राणायाम
स्त्वनस्थिके॥ अस्थिमतांतुकलासारिप्राणिनांसहस्रसंख्यानांप्रत्येकंवधेकिंचित्स्वल्पंधान्यहिरण्या
दिदेयं॥ अनस्थिकेत्वेकःप्राणायामः तत्रकिंचिदितिपदाहिरण्यादीयतेतत्रदायणमात्रं॥ अस्थिमतांवधेदे

१६५ यमितिसुमंतुस्मरणात्॥यदातुधान्यंतदाअष्टमुष्टिर्देयं॥अष्टमुष्टिर्भवेत्किंचिदितिस्मरणात्॥एतच्चानु
क्तनिष्कृतिप्राणवधविषयं॥यत्रतुप्रायश्चित्तविशेषःश्रूयतेतत्रसएवभवति॥यथाहपराशरः॥हंस
सारसचक्राह्वक्रौंचकुक्कुटघातकः॥मयूरमेषौहत्वाचएकभक्तेनशुध्यति॥मद्गुंचटिट्टिभंचैवशुकंपा
रावतंतथा॥आरिकांचबकंहत्वाशुध्येद्दैनक्तभोजनात्॥चाषकाककपोतानांसारीतित्तिरघातकः॥अं
तर्जलेउभेसंध्येप्राणायामेनशुध्यति॥गृध्रश्येनविहंगानामुलूकस्यचघातकः॥अपक्वाशीदिनंति
ष्ठेद्वौकालौमारुताशनः॥हत्वामूषिकमार्जाररसर्पाजगरडुंडुभान्॥प्रत्येकंभोजयेद्विप्रांल्लोहदंडश्चदक्षि
णा॥सेधाकच्छपगोधानांतथाशल्लककघातकः॥वृंताकफलंगुंजाशीअहोरात्रेणशुध्यति॥मृगरोहितवराह
णामविकावस्तघातने॥वृकजंतुकऋक्षाणांतरक्षूणांचघातकः॥प्रस्थंतिलसौदद्याद्वायुभक्षोदिनत्रयं॥ग रा.म०
जमेषतुरंगोष्ट्रगवयानांनिपातने॥प्रायश्चित्तमहोरात्रंत्रिसंध्यंचावगाहनं॥खरश्वानरसिंहालांचित्रक १६५

व्याघ्रघातकः॥शुद्धिमेतित्रिरात्रेणब्राह्मणानांचभोजनेनेति॥एवमन्येषामपिस्मृतिवचसांदेशकाला
द्यपेक्षविषयव्यवस्थाकल्पनीया॥इतिहिंसाप्रायश्चित्तप्रकरणं॥इंधनार्थंद्रुमच्छेदउपपातकोद्देशेप
ठितंहिंसाप्रसंगलोभेनव्युत्क्रमपठितमप्याकृष्यतत्रप्रायश्चित्तमाह॥वृक्षगुल्मलतावीरुच्छेदनेजप्यमृक्शतं॥
ॐषधीनांवृथाच्छेदेक्षीराशीगोनुगोदिनं॥फलदानामाम्रपनसादिवृक्षाणांगुल्मादीनांचयज्ञाद्यदृष्टार्थंवि
नाच्छेदनेऋचांगायत्र्यादीनांशतंजप्यं॥ॐषधीनांतुग्राम्यारण्यानांवृथैवच्छेदनेदिनंकृत्स्नमहर्गवांपरि
चर्यार्थमनुगम्यांतेक्षीरंपिबेत्॥आहारांतरपरित्यागेन॥पंचयज्ञाद्यर्थत्वेनदोषः॥एतच्चफलादिद्वारेणोपयो
गिषुद्रष्टव्यं॥फलदानांतुवृक्षाणांछेदनेजप्यमृक्शतं॥गुल्मवल्लीलतानांचपुष्पितानांचवीरुधामिति॥मनु
स्मरणात्॥दृष्टार्थत्वेपिकर्षणांगभूतहलाद्यर्थत्वेनदोषः॥फलपुष्पोपभोगान्यादृशान्नहिंस्यात्कर्षणकर
णार्थंतूपहन्यादितिवसिष्ठस्मरणात्॥यत्रतुस्थानविशेषादिनाधिक्यंतत्रप्रायश्चित्ताधिक्यमपिकल्पनीयं॥

१६६ यथोक्तं॥यच्चैवस्मशानसीमासुपुण्यस्थानसुरालये॥जातद्रुमाणांद्विगुणोदमोवृक्षेथविश्रुतइति॥अयं
चर्क्शतजपोद्विजातिविषयोनपुनःशूद्रादिविषयः॥तेषांजपेनधिकारात्‌अतस्तेषांदंडानुसाराद्दिरात्रा
दिकंकल्पनीयं॥उपपातकमध्येविशेषतःपादस्यानर्थकपरिहारार्थमुपपातकसाधारणप्राप्तंप्रायश्चि
त्तमप्यत्रभवति तच्चगुरुत्वादभ्यासविषयंकल्प्यं॥इतिद्रुमछेदःप्रायश्चित्तप्रकरणम्॥पुंश्चलीवानरादि
वधप्रायश्चित्तप्रसंगात्तद्दंशनिमित्तंप्रायश्चित्तमाह॥पुंश्चलीवानरखरैर्दष्टश्चोष्ट्रादिवायसैः॥प्राणायामं
जलेकृत्वाघृतंप्राश्यविशुध्यति॥पुंश्चल्यादयःप्रसिद्धा॥एतैर्दष्टःपुमाञ्जलेप्राणायामंकृत्वाघृतंप्राश्य
विशुध्यति॥आदिग्रहणाच्छृगालादीनांग्रहणं॥यथाहमनुः॥श्वशृगालखरैर्दष्टोग्राम्यैःक्रव्याद्भिरेववा॥
नराश्वोष्ट्रवराहैश्चप्राणायामेनशुध्यतीति॥अयंचघृतप्राशोभोजनप्रत्याम्नायोद्रष्टव्यः॥प्रायश्चित्तानांत रा.म.
पोरूपत्वेनशरीरसंतापनार्थत्वात्॥एतदशक्तविषयं॥श्वशृगालसृगमहिषाजाविकखरकरभनकुलमार्जार १६६

मूषिकप्लवकाकदष्टपुरुषाणामापोहिष्ठीयादिभिःस्नानंप्राणायामत्रयंचेतियत्तुमनुवचनंतन्नाभेरूर्ध्वविष
य॥यत्त्वंगिरोवचनं॥ब्रह्मचारीशुनादष्टस्त्र्यहंसायंपयःपिबेत्॥गृहस्थश्चेद्द्विरात्रंतुएकाहंयोग्निहोत्रवान्
नाभेरूर्ध्वंतुदष्टस्यतदेवद्विगुणंभवेत्॥स्यादेतत्त्रिगुणंवक्रेमस्तकेतुचतुर्गुणं॥इति॥तन्नाभ्यग्रदष्टविषयं॥
क्षत्रियवैश्ययोस्तुपादपादन्यूनंकल्पनीयं॥शूद्रस्यतुशूद्राणांचोपवासेनशुद्धिर्दानेनवापुनःगांवादत्वा
वृषंचैकंब्राह्मणायविशुध्यतीतिबृहदंगिरसोक्तंद्रष्टव्यं॥यत्तुवसिष्ठवचनं॥ब्राह्मणस्तुशुनादष्टोनदींगत्वा
समुद्रगां॥प्राणायामशतंकृत्वाघृतंप्राश्यविशुध्यतीतितदुत्तमांगदंशविषयं॥स्त्रीणांतु॥ब्राह्मणीतुशुना
दष्टाजंबुकेनवृकेणवा॥उदितंग्रहनक्षत्रंदृष्ट्वासद्यःशुचिर्भवेत्॥इतिपराशरोक्तंद्रष्टव्यं॥कृच्छ्रादिव्रतस्थायाः
पुनस्तेनैवविशेषोदर्शितः त्रिरात्रमेवोपवसेच्छुनादष्टातुसव्रता॥सघृतंयावकंभुक्त्वाव्रतशेषसमापयेदिति॥
रजस्वलायामपिविशेषःपुलस्त्येनदर्शितः॥रजस्वलायदादष्टाशुनाजंबुकरासभैः॥पंचरात्रंनिराहारापंच

गव्येनशुध्यति॥ऊर्ध्वंतुद्विगुणंनाभेर्वक्रेतुत्रिगुणंतथा॥चतुर्गुणंस्मृतंमूर्ध्निदृष्टेन्यत्राप्लुतिर्भवेदिति॥अ
१६७ न्यत्रारजस्वलावस्थायां॥यस्तुशुनाघ्राणादिनोपहन्यतेतस्यशातातपेनविशेषउक्तः॥शुनाघ्रातावलीढस्य
नखैर्विलिखितस्यच॥अद्भिःप्रक्षालनंशौचमग्निनाचोपचूलनं॥यदातुश्वादिदंशशस्त्रघातादिजनि
तव्रणेकृमयउत्पद्यंतेतदायमनुनाविशेषउक्तः॥ब्राह्मणस्यव्रणद्वारेपूयशोणितसंभवे॥कृमिरुत्पद्यतेय
स्यप्रायश्चित्तंकथंभवेत्॥गवांमूत्रपुरीषेणत्रिसंध्यंस्नानमाचरेत्॥त्रिरात्रंपंचगव्याशीत्वधोनाभ्यावि
शुध्यति॥नाभिकंठांतरोद्भूतेव्रणेचोत्पद्यतेकृमिः॥षड्रात्रंतुतदाप्रोक्तंप्राजापत्यंशिरोव्रणइति॥तत्रश्वा
दिदंशव्रणेतद्दंशप्रायश्चित्तानंतरंमिदंकर्तव्यं॥शस्त्रादिजनितव्रणत्वेतेदेवत्र्यहंपंचगव्याशनादिकमि
तिविशेषः॥क्षत्रियादिषुतुप्रतिवर्णंपादपादह्रासःकल्पनीयः॥शरीरत्वग्धातुविच्छेदकदंशप्रायश्चित्तप्र रा.प्र०
संगाच्छारीरचरमधातुविच्छेदकंस्कंदनेप्रायश्चित्तमाह॥यन्मेघरेतइत्याभ्यांस्कन्नंरेतोभिमंत्रयेत॥स्तनां १६७

तरंभ्रुवोर्मध्यंतेनानामिकयास्पृशेत॥यदिकथंचित्स्त्रीसंयोगमंतरेणापिहठाच्चरमधातुर्विसृष्टःतदात
त्स्कन्नरेतोयन्मेघरेतः॥पृथिवीपुनर्मामैत्विंद्रियमित्याभ्यांमंत्राभ्यामभिमंत्रयेत॥तेनचाभिमंत्रितेनरेत
सास्तनयोर्भ्रुवोश्चमध्यमुपकनिष्ठिकयास्पृशेत॥अन्येतुस्कन्नस्यरेतसोशुचित्वेनस्पर्शकर्मायोग्यत्वात्त
नेत्यनामिकाशब्दवर्याबुद्धिस्थांगुष्ठपरत्वेनव्याचक्षतेतेनांगुष्ठेनानामिकयाचेति॥अंगुष्ठपदग्रहणेकृतभं
गप्रसंगात्तेनेतिनिर्दिष्टमिति॥तदसत॥अंगुष्ठस्याबुद्धिस्थत्वात॥नचशब्दवत्सन्निहितपरित्यागेनार्था
तबुद्धिस्थस्यान्वयोयुक्तः॥तदुक्तं॥गम्यमानस्यचार्थस्यनैवदृष्टंविशेषणं॥शब्दांतरैर्विभक्त्यावाधूमोयं
ज्वलतीतिवत॥इति॥नचरेतसोशुचित्वेनस्पर्शायोग्यत्वं॥विधानादेवप्रायश्चित्तार्थरूपस्पर्शयोग्यत्वमवग
म्यतां॥प्रायश्चित्तंस्वपानदृष्टवसुशयाः॥इदंप्रायश्चित्तंगृहस्थस्यैवकामतस्कन्नविषयं॥ब्रह्मचारिणःस्व
प्नेजागरणावस्थायांचगुरुप्रायश्चित्तस्यवक्ष्यमाणत्वात॥मनुयमवचनं॥गृहस्थःकामतःकुर्याद्रेतसःस्कं

दंतं भुवि॥ सहस्रं तु जपेद्देव्याः प्राणायामैः स्त्रिभिः सहेति॥ तत्कामकारविषयं॥ किंच॥ मयि तेज इति च्छा
१६८ यां स्वां दृष्ट्वांबुगतां जपेत्॥ सावित्रीमशुचौ दृष्टे चापल्ये चानृतेपि वा॥ स्वीयप्रतिबिंबं अंबुगतं चेद्दृष्टं तर्हि मयि
पि तेज इति यमितीमं मंत्रं जपेत्॥ अशुचिद्रव्यदर्शने पुनः सावित्रीं सवितृदेवत्यां तत्सवितुरित्यादिकामृचं
जपेत्॥ तथा बाक्यालिपादादिचापल्यकरणे तामेव जपेत्॥ अनृतवचने च॥ एतत्कामकारे द्रष्टव्यं॥ अका
मकृते तु॥ सुप्त्वा भुक्त्वा च क्षुत्वा च निष्ठीव्योक्तान्यनृतानि च॥ पीत्वापोध्येष्यमाणश्च आचामेत्प्रयतोपि सन्निति म
न्वुक्तं आचमनं द्रष्टव्यं यत्तु संवर्त्तवचनं क्षुते निष्ठीविते चैव दंतश्लिष्टे तथानृते॥ पतितानां च संभाषे दक्षिणं
श्रवणं स्पृशेत् इति तदल्पप्रयोजने जलाभावे वा द्रष्टव्यं॥ स्त्रीशूद्रविट्क्षत्रवधानांतरं निंदितार्थोपजीवनं
पठितं तत्र मनुयोगीश्वरोक्तान्युपपातकप्रायश्चित्तानि जातिशक्तिगुणाद्यपेक्षया वेदितव्यानि॥ नास्तिक्येपि रा.म.
तानि प्रायश्चित्तानि तथैव योज्यानि॥ नास्तिक्यशब्देन च वेदनिंदनं तेन च जीवनमुच्यते॥ तत्रोभयत्रापि वसि १६८

DR. BHAU DAJI MEMORIAL

ष्ठेन प्रायश्चित्तांतरमप्युक्तं॥ नास्तिकः कृच्छ्रं द्वादशरात्रं चरित्वा विरमेन्नास्तिक्यात्॥ नास्तिकवृत्तिस्त्वतिकृच्छ्र
मिति॥ एतच्च सकृत्करणकामकारविषयं॥ उपपातकप्रायश्चित्तान्यभ्यासविषयाणि॥ तच्च शंखेनोक्तं॥ ना
स्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी मिथ्याभिशंसी त्येते पंच संवत्सरं ब्राह्मणगृहे भैक्ष्यं चरेयुरिति॥
यच्च हारीतेन॥ नास्तिको नास्तिकवृत्तिरिस्फपकस्यंपचतयोः अवकाशजलशयनान्यनुतिष्ठेयुर्ग्रीष्मावर्षा
हेमंतेष्विति॥ तदुभयमप्यसंताभिनिवेशेन बहुकालाभ्यासविषयं॥ इति नास्तिक्यप्रायश्चित्तप्रकरणम्
॥ नास्तिक्यानंतरं व्रतलोपश्चोक्तं तत्रावकीर्णिनोऽप्रसिद्धत्वेन तल्लक्षणकथनपूर्वकं प्रायश्चित्तमाह॥
अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितं॥ गर्दभं पशुमालभ्य नैर्ऋतं स विशुध्यति॥ ब्रह्मचारी उपकुर्वाणको
नैष्ठिकश्चासौ योषितं गत्वावकीर्णी भवति॥ चरमधातोर्विसर्गोवकीर्णं तद्यस्यास्ति सोवकीर्णी स निर्ऋतिदे
वसेन गर्दभपशुना यागं कृत्वा शुध्यति॥ गर्दभस्य पशुत्वसिद्धेपि पुनः पशुग्रहणमथापशुकल्प इत्या

२६९ श्वलायनादिगृह्योक्तपशुधर्मप्राप्त्यर्थं ॥ एतच्चारण्ये च तुष्पथे लौकिकेऽग्नौ कार्यं ॥ ब्रह्मचारी चेत्स्त्रियमुपे-
यादारण्ये चतुष्पथे लौकिकेऽग्नौ रक्षोदैवतं गर्दभं पशुमालभेतेति वशिष्ठस्मरणात् ॥ तथा रात्रावेकाक्षि-
विकेलेन गर्दभेन यष्टव्यं ॥ तथा च मनुः ॥ अवकीर्णी तु काणेन गर्दभेन चतुःपथे ॥ पाकयज्ञविधा-
नेन यजेत निर्ऋतिं निशीति ॥ पशोरभावे चरुणा यष्टव्यं ॥ नैर्ऋतं चरुं वा निर्वपेत्तस्य जुहुयात्कामाय स्वा-
हा कामकामाय स्वाहा निर्ऋत्यै स्वाहा रक्षोदेवताभ्यः स्वाहेति वशिष्ठस्मरणात् ॥ एतच्चाशक्तविषयं ॥ शक्त-
स्य पुनः गर्दभेनावकीर्णी निर्ऋतिं चतुष्पथे यजेत्तस्याजिनमूर्ध्ववालं परिधाय लोहितपात्रः सप्तगृहा-
न्भैक्ष्यं चरेत्कर्माचक्षाणः ॥ संवत्सरेण शुध्येदिति गौतमोक्तवार्षिकतपः समुच्चितः पशुयागश्चरुर्वा द्र-
ष्टव्यः ॥ तथा त्रिषवणं स्नानमेककालभोजनं च द्रष्टव्यं ॥ एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनं ॥ सप्ता- रा.म०
गारं चरेद्भैक्ष्यं स्वकर्म परिकीर्तयन् ॥ तेभ्यो लब्धेन भैक्ष्येण वर्त्तयेदेककालिकं ॥ उपस्पृशंस्त्रिषवणमब्दे- २६९

न स विशुध्यतीति मनुस्मरणात् ॥ इदं च वार्षिकमश्रोत्रियब्राह्मणपत्न्यां वैश्यायां च श्रोत्रियपत्न्यां द्रष्टव्यं ॥ प-
यदा तु गुणवतो ब्राह्मणी क्षत्रिययोः श्रोत्रियभार्ययोरवकिरति तदा च त्रिवार्षिकं द्विवार्षिकं च क्रमेण यो-
ज्यं ॥ यथाहतुः शंखलिखितौ ॥ गुप्तायां वैश्यायामवकीर्य्य संवत्सरं त्रिषवणमनुतिष्ठेत् क्षत्रियायां द्वे वर्षे
ब्राह्मण्यां त्रीणि वर्षाणीति ॥ यत्त्वंगिरोवचनं ॥ अवकीर्णिनिमित्तं तु ब्रह्महत्याव्रतं चरेत् ॥ चीरवासास्तु षण्मा-
सांस्तथा मुच्येत किल्बिषादिति ॥ तदकामतो मानवाह्निकविषयमीषद्व्यभिचारिणीविषयं वा ॥ असंतत्य-
भिचरितासु पुनः स्वैरिण्यां वृषल्यामवकीर्णः सचैलस्नात उदकुंभं दद्याद्ब्राह्मणाय ॥ वैश्यायां चतुर्थकाला-
हारो ब्राह्मणान्भोजयेद्यवसभारं च गोभ्यो दद्यात् ॥ क्षत्रियायां त्रिरात्रमुपोषितो घृतपात्रं दद्यात् ॥ ब्राह्मण्यां षड्रा-
त्रमुपोषितो गां दद्यात् ॥ गोष्ववकीर्णः प्राजापत्यं चरेत् ॥ षंढ्यामवकीर्णः पलालभारं सीसमाषकं च दद्यादि-
ति शंखलिखितोदितं वेदितव्यं ॥ एतच्चावकीर्णिप्रायश्चित्तं त्रैवर्णिकस्यापि ब्रह्मचारिणः समानं ॥ अवकी-

१७० लिद्विजो राजा वैश्यश्चापि खरेण तु ॥ इष्ट्राभेस्याशिनो निःसंमुच्यते श्रमसमाहिताद् इति शांडिलस्मरणात् ॥ यदा
तु स्त्रीसंभोगमंतरेण कामतश्चरमधातुं विसृजति दिवास्वप्ने वा विसृजति तदानेकैस्य यागमात्रं द्रष्टव्यं ॥ एत
देव रेतसः प्रयत्नोत्सर्गे दिवास्वप्ने वेति विशिष्टेन यागमात्रस्यातिदिष्टत्वात् ॥ व्रतांतरेषु च कृच्छ्रचांद्रायणाद्य
तिदिष्टब्रह्मचर्येषु चस्कंदने स सेतद्देवयागमात्रं ॥ व्रतांतरेषु चैवमिति तेनैवातिदिष्टत्वात् ॥ स्वप्नस्कंदने
तु मन्त्रोक्तं द्रष्टव्यं ॥ स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपे
दिति ॥ वानप्रस्थादीनामिदमेव ब्रह्मचर्यखंडने वकीर्णिव्रतं कृच्छ्रत्रयाधिकं भवति वानप्रस्थोयतिश्चैव खं
डने सति कामतः पराकत्रयसंयुक्तमवकीर्णिव्रतं चरेदिति शांडिलस्मरणात् ॥ यदा तु गार्हस्थ्यपरिग्रहे
ण सन्यासात्प्रच्युतो भवति तदा सर्ववर्णोक्तं द्रष्टव्यं ॥ संन्यस्य दुर्मतिः कश्चित्प्रत्यापत्तिं व्रजेद्यदि ॥ स कुर्यात्कृ राम०
च्छ्रमश्रांतः षण्मासात्प्रत्यनंतरमिति ॥ प्रत्यापत्तिर्गार्हस्थ्यपरिग्रहः ॥ अत एव ब्रह्महत्वशिष्टः ॥ यस्तु प्रव्रजि १७०

अवगीतत्रिरात्रा... तृतीयाध्यायस्य चतुर्थपादे ५५पत्रे

आरूढपतितो यः नहि यज्ञाध्ययनविवाहादीनि तैः सह आचरंति शिष्टाः ॥ शारीरभाष्ये । आरूढपतितत्वात् । अतः संन्याससंस्कारः
किंच । धर्मलोपप्रयुक्तानुतापस्य तस्य प्रायश्चित्तत्वेन संन्यास संभवति । तथाच स्मृतिः ॥ येन संतानमारोपयेच्च स्युः कर्मसंभवाः ॥ संन्यासस्तान् ५५

तो भूत्वा पुनः सेवेत मैथुनं ॥ षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिरिति ॥ यथा च पराशरः ॥ यः प्रत्यवसि प्राय॰ मयू॰ पंन
तो विप्रः प्रव्रज्यातो विप्रः प्रव्रज्यातो विनिर्गतः ॥ अनाशकनिवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति ॥ स चरेत्त्रीणि
कृच्छ्राणि त्रीणि चांद्रायणानि च ॥ जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयादिति ॥ तत्र ब्राह्मणस्य पाण्मा
सिकः कृच्छ्रः पुनः संन्याससंस्कारश्च ॥ क्षत्रियस्य चांद्रायणत्रयं वैश्यस्य कृच्छ्रत्रयमिति व्यवस्था ॥ अथवा ब्रा
ह्मणस्यैव शक्तिसकृदभ्यासाद्यपेक्षया व्यवस्थितं प्रायश्चित्तत्रयं द्रष्टव्यं ॥ तथा मरणसंन्यासिनामपि यमेन
प्रायश्चित्तमुक्तं ॥ जलाग्न्युद्बंधनभ्रष्टाः प्रव्रज्यानाशकच्युताः विषप्रपतनप्रायशस्त्रघातच्युताश्च ये ॥ नवै
ते प्रत्यवसिताः सर्वलोकबहिष्कृताः ॥ चांद्रायणेन शुध्यंति तप्तकृच्छ्रद्वयेन वेति ॥ इदं च चांद्रायणतप्तकृ
च्छ्रद्वयात्मकं प्रायश्चित्तद्वयं शक्त्याद्यपेक्षया व्यवस्थितं विज्ञेयं ॥ यदा तु शास्त्रयातदृताश्चेति पाठस्तदा संन्यासा
गाद्यशास्त्रीयमरणनिमित्तस्तत्सु आद्देरूपदेशो द्रष्टव्यः ॥ यत्तु नवशिष्टवचनं जीवन्नात्मत्यागी कृच्छ्रं द्वादशरा
दरेत्सर्वान्स्तुषाग्निरिव कांचनं ॥ मनुरपि । मृतो यैः शुध्यते कांस्यं नदी वेगेन शुध्यति ॥ रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तम ॥

१७१ यंचरेत्त्रिरात्रंवोपवसेदितितदध्यवसितानांस्त्रीयमरणस्यैवकथंचिज्जीवनेशक्त्यपेक्षयाद्रष्टव्यं॥अ
थवा॥अध्यवसायमात्रेत्रिरात्रंशस्त्रादिहतस्यद्वादशरात्रमितिवाव्यवस्था॥इदंचावकीर्णप्रायश्चित्तंगुरुदार
तत्समव्यतिरिक्तागम्यागमनविषयं॥तत्रगुरुतरप्रायश्चित्तस्यदर्शितत्वात्॥नचलघुनावकीर्णिव्रतेन
द्वादशवर्षापनोद्यमहापातकदोषनिर्हरणमुचितं॥नचब्रह्मचारित्वोपाधिकंलघुप्रायश्चित्तविधान
मितियुक्तं॥आश्रमांतरगाणांहिंगणपदित्वदेवब्रह्महत्यादिप्रकरणेदर्शितत्वात्॥नचात्रागम्यागमनप्राय
श्चित्तंपृथक्कार्तव्यं॥ब्रह्मचारिणोयोषितिब्रह्मचर्यस्खलनस्यागम्यागमनंनांतरीयकत्वात्॥अतोऽन्यत्रा
पिनिमित्तांतरंसमंस्तत्रंवाःवश्यंभाविनतत्पृथग्दिमित्तंप्रयुक्ते॥यथा॥अवगूर्यचरेत्कृच्छ्रमतिकृच्छ्रंनिपा
तने॥कृच्छ्रोतिकृच्छ्रोऽस्यपतेकृच्छ्रोभ्यंतरशोणिते॥इत्यत्रशोणितोत्पादनेनिमित्तेवगोरणनिपातनलक्षणं रा.म.
निमित्तद्वयमवश्यंभावित्वनैमित्तिकंकृच्छ्रमतिकृच्छ्रंचनप्रयुक्ते॥एवमन्यत्राप्यूहनीयं॥यत्रपुनर्निमित्ता १७१

नांअंतर्भावनियमोनास्तितत्पृथङ्नैमित्तिकानिप्रयुंजतेनिमित्तानि॥यथायद्यपर्वणिपरभार्यारजस्वलां
तैलाभ्यक्तोदिवाजलेगच्छतीति॥ननुब्रह्मचारिणोयोषितिब्रह्मचर्यस्खलनस्यागम्यागमननांतरीयकत्वं
नास्त्येव॥पुत्रिकागमनेऽगम्यागमनदोषाभावात्॥तथाहि॥नतावत्पुत्रिकाकन्याक्षतयोनित्वात्॥नापि
परभार्या।प्रदानाभावात्।नापिविधवाभर्तृमरणाभावात्।नापिवेश्याअनद्वित्रित्वात्॥अतःपुत्रिकायाः
काम्यनंतर्भावादप्रतिषिद्धेतितत्रैवविप्लुतस्यकेवलमवकीर्णव्रतंअन्यत्रविप्लुतस्यतुनिमित्तांतरसन्निपा
तादवकीर्णिव्रतंनमित्त्रिकांतरमपिप्रयोक्तव्यमिति।तदसत्॥पुत्रिकाया अपिपरभार्यात्वंतर्भावात्॥प्र
दानाभावेपिविवाहसंस्कारेणसंस्कृतत्वात्॥गांधर्वादिविवाहपरिणीतवत्॥नचयस्यास्तुनभवेद्भ्रातानं
विज्ञायेतवापिता॥नोपयच्छेततांप्राज्ञःपुत्रिकाधर्मशंकयेतिप्रतिषेधात्संगोत्वास्त्विवभार्यात्वंनोपपद्य
तइतिवाच्यं॥दृष्टार्थत्वात्प्रतिषेधस्याव्यंगादिप्रतिषेधवत्।दृष्टार्थत्वंचपुत्रिकाधर्मशंकयेतिहेतूपादा

जात्॥नचपुत्रार्थमेवपरिणयनं॥अपितुधर्मार्थमपि॥अतश्चोत्पादितपुत्रस्यमृतभार्यस्यधर्मार्थंपुनि
१७२ कापरिणयनेकोविरोधः॥प्रपंचितंचैतत्पुरस्तादितिसलंप्रसंगेन॥तस्माद्ब्रह्मचारिणोयोषितिब्रह्मचर्यस्ख
लनस्यागम्यागमननांतरीयकत्वान्नपृथङ्निमित्तिकंप्रयोक्तव्यमितिसुष्ठूक्तं॥ब्रह्मचारिप्रायश्चित्तप्रसं
गादन्यदप्युपपातकप्रायश्चित्तमाह॥भैक्षाग्निकार्ये त्यक्त्वासप्तरात्रमनातुरः॥कामावकीर्णइत्या
भ्यांजुहुयादाहुतिद्वयं॥उपस्थानंततःकुर्यात्समासिंचत्वनेनतु॥यस्त्वनातुरएवब्रह्मचारीनिरंतरंस
प्तरात्रंभैक्षमग्निकार्यंवात्यजतिअसौकामावकीर्णोस्म्यवकीर्णोस्मिकामकामायस्वाहा॥कामावप
न्नोस्म्यवपन्नोस्मिकामकामायस्वाहा२इत्येताभ्यांमंत्राभ्यामाहुतिर्हुत्वासमासिंचंतुमरुतःसमि
द्रःसंबृहस्पतिः॥समायमग्निःसिंचतांयशसाब्रह्मवर्चसेनेत्यनेनमंत्रेणाग्निमुपतिष्ठेत॥एतच्चगुरुप गम०
स्थित्यादिगुरुतरकार्यव्यग्रतयाअकरणेद्रष्टव्यं॥यदात्वव्यग्रएवभैक्ष्याग्निकार्येत्यजतितदा॥अकृत्वा १७२

भैक्ष्यचरणमसमिध्यचपावकं अनातुरःसप्तरात्रमवकीर्णिव्रतंचरेदितिमानवंद्रष्टव्यं यज्ञोपवीतादिनाशे
तुहारीतेनप्रायश्चित्तमुक्तं॥मनोव्रतपतीभिश्चतस्रआज्याहुतीर्हुत्वापुनर्यथार्थंप्रतीयादभक्ष्यभोजने
भक्ष्यादिनेभिर्निर्मुक्तेवांतेदिवास्वप्नेनग्नस्त्रीदर्शनेनग्नस्नानेश्मशानमाक्रम्यहयादींश्चारुह्यपूज्यातिक्रमे
चैताभिरेवजुहुयादश्वासमिंधनेस्थावरशरीरपादीनांवधेयद्देवादेवहेडनमितिकूष्मांडीभिराज्यंजुहु
यान्मलिवाससोगवादीनांप्रतिग्रहेसावित्र्यष्टसहस्रंजपेदिति॥मनोव्रतपतीभिरित्यादिमनोलिंगाभिः
त्वमग्नेव्रतपाअसिइत्यादिभिर्व्रतलिंगाभिरित्यर्थः॥यथार्थंप्रतीयादितिउपनयनोक्तमार्गेणसमंत्रकं
गृह्णीयादित्यर्थः॥यज्ञोपवीतंविनाभोजनादिकरणेतु॥ब्रह्मसूत्रंविनाभुंक्तेविण्मूत्रंकुरुतेथवा॥गा
यत्र्यष्टसहस्रेणप्राणायामेनशुध्यतीतिमनूक्तंद्रष्टव्यं॥किंचामधुमांसाशनेकार्यःकृच्छ्रःशेषव्रता
नित्र॥प्रतिकूलंगुरोःकृत्वाप्रसाद्यैवविशुध्यतिब्रह्मचारिणअमत्यामधुमांसभक्षणेकृच्छ्रःकार्यः॥अनं

१७३ तरमवशिष्टव्रतानि समापयेत्॥ एतच्च विशिष्टभोजनार्हश्राद्धादिमांसभक्षणविषयं॥ ब्रह्मचारी चे॥
न्मांसमश्नीयाच्छिष्टभोजनीयं कृच्छ्रं द्वादशरात्रं चरित्वा व्रतशेषं समापयेदिति वसिष्ठस्मरणात्॥ द्वादशरा
त्रग्रहणममतिपूर्वाभ्यासापेक्षयातिकृच्छ्रपराकादेरपि प्रासस्यर्थं॥ यदा मांसैकापनोद्यव्याध्यभिभूतस्तदा
मांसं गुरूच्छिष्टं कृत्वा भक्षणीयं॥ स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भैषज्यार्थं सर्वं प्राश्नीयादिति तेनैवोक्त
त्वात्॥ सर्वग्रहणं मांसलशुनाद्यभक्ष्यमात्रसंग्रहार्थं॥ तद्भक्षणेन चापगतव्याधिरादित्यमुपतिष्ठे
त॥ तथा च बौधायनः॥ येनेच्छेच्चिकित्सितं स यदा ऽगदो भवति तदोत्थायादित्यमुपतिष्ठेत हंसः
शुचिषदिति॥ मधुनोप्याज्ञानतः प्राशनोपपत्तौ न दोषः॥ अकामोपनतं मधुवासनेयकेन दुष्य
तीति वसिष्ठस्मरणात्॥ अन्यत्तत्कान्नादिभक्षणप्रायश्चित्तमभक्ष्यप्रायश्चित्तप्रकरणे वक्ष्यामः॥ आ
ज्ञाप्रतिघातादिना गुरोः प्रतिकूलमाचरन्याद्रप्रणिपातादिना गुरुं प्रसाद्य विशुध्यति॥ ब्रह्मचारिप्रायश्चि स्म० १७३

DR BHAU DAJI MEMORIAL

त्तप्रसंगाद्गुरोरपि प्रायश्चित्तमाह॥ कृच्छ्रत्रयं गुरुः कुर्यान्म्रियते प्रहितो यदि॥ यश्च गुरुश्चोरोरगव्याघ्रभयाकु
लदेशे सांद्रतरांधकाराकुलितनिशीथावसरे कार्यार्थं शिष्यं प्रेरयति स च गुरुणा प्रेरितो दैवान्म्रतस्तदा स गुरुः
कृच्छ्राणां प्राजापत्यादीनां त्रयं कुर्यात्॥ न पुनस्त्रिः प्राजापत्यं॥ तथा सति पृथक्त्वनिवेशिनी संख्यानुपपन्ना स्यात्
॥ नचैकादशप्रयाजान्यजतीतिवदावृत्त्यपेक्षा संख्येति चतुरस्रं॥ स्वरूपपृथक्त्वे संभवत्यावृत्त्यपेक्षाया अन्याय्यत्वा
त्॥ यदीयमुत्सन्नगता संख्या स्यात्तदा स्यादपि कथंचिदावृत्त्यपेक्षा किंतु सति गतेयं॥ अतस्तिस्र आज्याहुतीर्जुहो
तीतिवत्स्वरूपपृथक्त्वापेक्ष्यैव त्रित्वसंख्याघटना युक्ता॥ सकलहिंसाप्रायश्चित्तापवादमाह॥ ॥ क्रियमाणोपका
रे तु मृते विप्रे न पातकं॥ आयुर्वेदोपदेशानुसारेणौषधपथ्यान्नदानादिभिश्चिकित्सादिना क्रियमाणोपकारे॥
ब्राह्मणे दैवात्कथंचिन्मृते पि नैव पातकं भवति॥ विप्रग्रहणं प्राणिमात्रोपलक्षणं॥ अत एव यंत्रणे गोश्चिकित्सार्थे
गूढगर्भविमोचने॥ यत्ने कृते विपत्तिः स्यान्न स पापेन लिप्यत इत्यादि संवर्तोक्तेरुक्तं॥ एतच्च प्रपंचितं प्राक्॥ मि

१७४ थ्याभिशंसिनां प्रायश्चित्तं विवक्षुस्तदुपयोग्यर्थवादं तमाह ॥ मिथ्याभिशंसिनो दोषो द्विः समो भूतवादिनः ॥ मि
थ्याभिशस्तदोषं च समादत्ते मृषा वदन् ॥ यस्तु परोत्कर्षेर्ष्याजनितदोषेण कलुषितांतःकरणो जनसमक्षं मिथ्यै
वाभिशापं ब्रह्महत्यादिकमनेन कृतमित्यारोपयति तस्य तदेव द्विगुणं भवति ॥ यस्तु विद्यमानमेव दोषमलोक
विदितं जनसमक्षं प्रकाशयति तस्य तस्मात्किंसमदोषश्चोक्तः ॥ तथा चापस्तंबः ॥ दोषं बु[illegible]न पूर्वं परेभ्यः प
नि तितस्य समाख्याने स्यात् परिहरेत्त्वेनं धर्मेष्विति ॥ न केवलं मिथ्याभिशंसी द्विगुणदोषभाक् ॥ अपितु मिथ्या
भिशस्तस्य यदन्यद्दुष्कृतं तदपि समादत्ते इति वक्ष्यमाणप्रायश्चित्तेऽर्थवादः ॥ न पुनः पापद्वैगुण्यापादिप्रतिपाद
नमत्र विवक्षितं ॥ निमित्तस्य लघुत्वाल्लघु प्रायश्चित्तं ॥ तस्योपदेक्ष्यमाणत्वात्कृतनाशाकृताभ्यागमप्रसंगाच्च
॥ तत्र प्रायश्चित्तमाह ॥ ॥ महापापोपपापाभ्यां योभिशंसेन्मृषा परं ॥ अब्भक्षो मासमासीत स जापी नियतें रा म०
द्रियः ॥ यस्तु महापापेन ब्रह्महत्यादिना गोवधाद्युपपापेन वा मृषैव परमभिशंसति समासं यावज्जलभक्षो नियं १७४

तेंद्रियः शुद्धवतीजपशीलश्चासीत ब्राह्मणमिथ्याभिशंसी पतनीयेनोपपतनीयेन वा मासमब्भक्षः शुद्धवतीराव
र्तयेदश्वमेधावभृथं वा गच्छेदिति वशिष्ठस्मरणात् ॥ महापापोपपापग्रहणमन्येषामप्यतिपातकादीनामुपल
क्षणं ॥ एतच्च ब्राह्मणस्यैव ब्राह्मणेनाभिशंसने कृते द्रष्टव्यं ॥ यदा तु ब्राह्मणः क्षत्रियादेरभिशंसनं करोति क्षत्रि
यादिर्वा ब्राह्मणस्य तदा प्रतिलोमापवादेषु द्विगुणत्रिगुणादयः ॥ वर्णानामानुलोम्येन तस्मादर्धार्धहानितः इति
दंडानुसारेण प्रायश्चित्तवृद्धिह्रासौ कल्पनीयौ भूताभिशंसिनस्तु पूर्वोक्तार्थवादानुसारेण दंडानुसारेण च तदर्धं क
ल्पनीयं ॥ तथातिपातकाभिशंसिन एतदेव व्रतं पादोनं ॥ पातकाभिशंसिनस्त्वर्द्धं ॥ उपपातकाभिशंसिनस्तु पादः
॥ तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः ॥ इत्युपपातकभूतक्षत्रियादिवधे महापातकप्रायश्चित्ततुरीयां
शस्य दर्शनात् ॥ एवं प्रकीर्णाभिशंसिनोऽप्युपपातकात्स्वल्पं कल्पनीयं ॥ शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्र
कल्पयेदिति मनुस्मरणात् ॥ यत्तु शंखलिखिताभ्यां ॥ नास्तिकः कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नो मिथ्याभिशंसी

१७५ चेसेयद्वार्षिकालिब्राह्मणगृहेषभैक्षंचरेयुः॥संवत्सरंधौतभैक्ष्यमश्नीयुःषण्मासान्वागाअनुगच्छेयुरितिगुरु
प्रायश्चित्तमुक्तं॥तदभ्यासतारतम्यापेक्षयायोजनीयं॥अभिशंसिप्रायश्चित्तप्रसंगादभिशस्तप्रायश्चित्तमा
ह॥अभिशस्तोमृषाकृच्छ्रंचरेदाग्नेयमेववा॥निर्वपेत्पुरोडाशंवायव्यंपशुमेववा॥यःपुनर्मिथ्याभिशस्त
:सकृच्छ्रंप्राजापत्यंचरेत्॥अग्निदैवत्येनवापुरोडाशेनयजेत॥वायुदैवत्येनवापशुना॥एषांचपक्षाणांश
क्तिसंभवापेक्षयाव्यवस्था॥यत्तुवसिष्ठेनमासमब्भक्षत्वमुक्तमितिएतेनैवाभिशस्तोव्याख्यातइति॥तदभि
शस्तस्यैवकंचित्कालमकृतप्रायश्चित्तस्यसतोद्रष्टव्यं॥संवत्सराभिशस्तस्यदुष्टःस्याद्द्विगुणोदम॥इतिदं
डातिरेकदर्शनात् यत्तुपैठीनसिनोक्तं॥अन्तेनाभिशस्यमानःकृच्छ्रंचरेन्मासंपातकेषुमहापातकेषुद्विमा
सिकमितितदपिवाशिष्ठेनसमानविषयं॥यत्तुबौधायनेनोक्तं॥पातकाभिशंसनेकृच्छ्रस्तदब्दमभिशस्तस्ये राम०
तितदुपपातकादिविषयमशक्तविषयंवा॥एवमन्येषामप्युक्तावत्प्रायश्चित्तानामभिशस्तविषयाणांकाल १७५

शक्त्याद्यपेक्षयाव्यवस्थाज्ञेयाः॥यथाहमनुः॥षष्ठान्नकालतामासंसंहिताजपएववा॥होमाश्चशाकलानित्य
मपांक्त्यानांविशोधनमिति॥अपांक्त्यानांमध्येअभिशस्तादयःपठिताः॥यद्यप्यत्राभिशस्तस्यनिषिद्धाचरणानो
पपद्यते॥तथापिमिथ्याभिशस्तत्वालिंगानुमितप्राग्भवीयनिषिद्धापूर्वनिबंधनमिदकृमिदष्टानामिवेतिनवि
रोधः॥किंच॥अनियुक्तोभ्रातृजायांगच्छंश्चांद्रायणंचरेत्॥यस्तुनियोगंविनाज्येष्ठस्यभ्रातुःकनिष्ठस्यवा
भार्यांगच्छतिसचांद्रायणंचरेत्॥एतच्चसकृदमतिपूर्वविषयंद्रष्टव्यं यत्तुशंखवचनं॥परिवित्तिःपरिवेत्ताच
संवत्सरंब्राह्मणगृहेषुभैक्षंचरेत॥ज्येष्ठभार्यामनियुक्तोगच्छंस्तदेवकनिष्ठभार्यांचेतितत्कामकारविषयं॥किं
च॥त्रिरात्रांतेघृतंप्राश्यगत्वोदक्यांविशुध्यति॥यःपुनरुदक्यांरजस्वलांस्वभार्यामपिगच्छतिसत्रिरात्रमुपोष्या
तेघृतंप्राश्यविशुध्यति॥इदंचकामतःसकृद्गमनेप्येतदेव॥यत्तुबृहत्संवर्तेनोक्तं॥रजस्वलांतुयोगच्छेद्गर्भि
णींपतितांतथा॥तस्यपापविशुध्यर्थमतिकृच्छ्रंविशोधनंइतितत्कामतोभ्यासविषयं॥यत्तुनःशंखेनत्रैवार्षि

१७६ कमुक्तं॥पादस्तु शूद्रहत्यायाउदक्यागमे तथेति तत्कामतोऽसंतानवच्छिन्नाभ्यासविषयं॥रजस्वलायास्तु
रजस्वलादिस्पर्शे प्रायश्चित्तं स्मृत्यंतरोक्तं द्रष्टव्यं॥तथाच बृहद्वसिष्ठः॥स्पृष्टे रजस्वलेन्योन्यं सगोत्रे त्वेक
भर्तृके॥कामादकामतो वापि सद्यः स्नानेन शुध्यत इति॥असपत्न्योस्तु सवर्णयोरकामतः स्नानमात्रं॥
उदक्यां तु सवर्णा या स्पृष्टा चेत्स्यादुदक्यया॥तस्मिन्नेवाहनि स्नाता शुद्धिमाप्नोत्यसंशयमिति मार्कंडेय
स्मरणात्॥यत्तु कश्यपवचनं रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि॥एकरात्रं निराहारा पंचग
व्येन शुध्यतीति तत्कामकारविषयं॥असवर्णास्पर्शे तु बृहद्वसिष्ठेन विशेषो दर्शितः॥स्पृष्ट्वा रजस्वला
न्योन्यं ब्राह्मणी शूद्रजापि वा॥कृच्छ्रेण शुध्यते पूर्वा शूद्री दानेन शुध्यति॥दानेनेति पादकृच्छ्रप्रत्याम्नाय
भूतनिष्कचतुर्थांशदानेन शुध्यति स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी वैश्यजापि च॥पादहीनं चरेत्पूर्वा कृच्छ्रं रा०म०
पादं तथोत्तरा॥स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी क्षत्रिया तथा॥कृच्छ्रार्धाच्छुध्यते पूर्वा ह्युत्तरा च तदर्धतः॥स्पृ १७६

ष्टा रजस्वलान्योन्यं क्षत्रिया शूद्रजापि च॥उपवासैस्त्रिभिः पूर्वा त्वहोरात्रेण चोत्तरा॥स्पृष्टा रजस्वलान्योन्यं क्ष
त्रिया वैश्यजापि च॥त्रिरात्राच्छुध्यते पूर्वा त्वहोरात्रेण चोत्तरा॥स्पृष्टा रजस्वलान्योन्यं वैश्या शूद्री तथैव च॥
त्रिरात्राच्छुध्यते पूर्वा ह्युत्तरा च दिनद्वयात्॥वर्णानां कामतः स्पर्शे शुद्धिरेषा सनातनीति॥अकामतस्तु बृह
द्विष्णुनोक्तं स्नानमात्रं॥रजस्वला हीनवर्णा रजस्वलां स्पृष्ट्वा न तावदश्नीयाद्यावन्न शुद्धा स्यात्सवर्णामधिकवर्णां
वा स्पृष्ट्वा सद्यः स्नात्वा शुध्यतीति॥चंडालादिस्पर्शे तु बृहद्वसिष्ठेन वचनविशेष उक्तः॥पतितांत्यश्वपाकेन
संस्पृष्टा चेद्रजस्वला॥तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्॥प्रथमेह्नि त्रिरात्रं स्याद्द्वितीये त्र्यहमेव तु॥
अहोरात्रं तृतीयेह्नि परतो नक्तमाचरेत्॥श्वदंष्ट्रोच्छिष्टयास्पृष्टा शुना च त्र्यहमाचरेत्॥इति॥तान्यहानि व्यति
क्रम्य अनाशकेन नीत्वेति यावत्॥एतत्कामतः॥स्पर्शविषयं॥अकामतस्तु संस्पृष्टा चंडालांत्यश्ववायसैः॥
तावत्तिष्ठेन्निराहारा यावत्कालेन शुध्यति॥इति बौधायनोक्तं द्रष्टव्यं॥यत्तु नस्तेनैवोक्तं॥रजस्वला तु संस्पृष्टा

१७७ ग्राम्यकुक्कुटसूकरैः॥श्वभिःस्नात्वाक्षयेत्तावद्यावच्चंद्रस्यदर्शनमितितद्दशाकृविषयं॥यदातुभुंजानायाःश्वा
दिस्पर्शोनभवतितदास्यसंतरेविशेषउक्तः॥रजस्वलातुभुंजानाश्वांत्यजादीन्स्पृशेद्यदि॥गोमूत्रयावका
हाराषड्रात्रेणशुध्यतीति॥अशक्तौकांचनंदद्याद्विप्रेभ्योवापिभोजनं॥इति॥यदात्त्वुच्छिष्टयोःपरस्परं
स्पर्शोनभवतितदा॥उच्छिष्टोच्छिष्टसंस्पृष्टाकदाचित्स्त्रीरजस्वला॥कृच्छ्रेणशुध्यतेपूर्वाशूद्रादानैरुपोषिते
सचैलोक्तंद्रष्टव्यं॥यदातूच्छिष्टान्द्विजातिरजस्वलास्पृशति॥तदाद्विजान्कथंचिदुच्छिष्टान्रजःस्त्रीय
दिसंस्पृशेत्॥अधोच्छिष्टेत्वहोरात्रमूर्ध्वोच्छिष्टेत्र्यहंक्षिपेदितिमार्कंडेयोक्तंद्रष्टव्यं॥एवमकामिप्राय
श्चित्तप्रसंगात्कृतिविदनुपपातकभूतप्रायश्चित्तान्यपिव्याख्यायप्रकृतमनुसरामः॥तत्रावकीर्णानंतरं
सुतानांचैवविक्रयःइत्युक्तंतत्रमनुयोगीश्वरोक्तानित्रैमासिकादीनिकामाकामज्ञातिशक्त्याद्यपेक्षया राम० १७७
पूर्ववद्व्यवस्थापनीयानियत्तुशंखवचनं॥देवगृहप्रतिश्रयोद्यानारामसभाप्रपातडागपुरापसेतुसु

तविक्रयंकृत्वातप्तकृच्छ्रंचरेदिति॥यच्चपाराशरेणोक्तं॥विक्रीयंकन्यकांगांचकृच्छ्रंसांतपनंचरेदिति॥तदु
भयमप्युपपद्यकामतोद्रष्टव्यं कामतस्तु॥नारीणांविक्रयंकृत्वाचरेच्चांद्रायणव्रतं॥द्विगुणंपुरुषस्यैवव्रत
माहुर्मनीषिणइतिचतुर्विंशतिमतोक्तंद्रष्टव्यंयत्तुपैठीनसिनोक्तं॥आरामतडागोदपानपुष्करिणीसु
तविक्रयेत्रिषवणस्नाय्यधःशायीचतुर्थकालाहारःसंवत्सरेणपूतोभवतीति॥तदेकपुत्रविषयं॥
तदनंतरंधान्यकुप्यपशुस्तेयमित्युक्तंतत्प्रायश्चित्तानिस्तेयप्रकरणेप्रपंचितानि॥अनंतरमयाज्यानां
चयाजनमित्युक्तंतत्रप्रायश्चित्तमाह॥त्रीन्कृच्छ्रानाचरेद्व्रात्ययाजकोभिचरन्नपि॥वेदप्लावीयवाश्यब्दंस
कांचशरणागतं॥यस्तुसावित्रीपतितानांयाजनंकरोतिसप्राजापत्यप्रभृतीस्त्रीन्कृच्छ्रानाचरेत्॥तेषांचगु
रुलघुभूतानांकृच्छ्राणांत्रित्वंनिमित्तगुरुलघुभावेनकल्पनीयं॥तथाऽभिचरन्नपीदमेवप्रायश्चित्तंकुर्या
त्॥एतच्चाग्निदाहादातताथिव्यतिरेकेणषड्भिचरन्नपततीतिवशिष्ठस्मरणात्॥अपिश्राद्धेहीनयाजकांसेष्टि

१७८ याजकयोःसंग्रहार्थः॥अतएवोक्तंमनुना॥व्रात्यानांयाजनंकृत्वापरेषामंत्यकर्मच॥अभिचारमहीनंचत्रिभिः
कृच्छ्रैर्व्यपोहती॥ति॥परेषामंत्यकर्मेत्यस्यतदभ्यासविषयं॥शूद्रांत्यकर्मविषयंच॥प्रायश्चित्तस्यगुरुत्वा
त्॥अहीनोद्विरात्रादिद्वादशाहपर्यंतोहर्गणयागः॥यत्तुशातातपोक्तंपतितसावित्रीकान्नोपनयेन्नाध्या
पयेद्यजेत्तानुपनयेद्याजयेद्वाप्युद्दालकव्रतंचारेदितितत्कामकारविषयं॥उद्दालकव्रतंचाग्रदर्शितं॥
एतच्चकृच्छ्रत्रयंसाधारणोपपातकप्रायश्चित्तस्यापवादकं॥अतउपपातकसाधारणप्रायश्चित्तंशूद्रा
द्यधमयाजनेव्यवतिष्ठते॥तत्रकामतस्त्रैमासिकमकामतस्तुयोगीश्वरोक्तंमासव्रतादियच्चप्रचेतसा
शूद्रयाजकादीन्यधिकृत्योक्तं॥एतेपंचतपोऽभ्रावकाशजलशयनान्यनुतिष्ठेयुः॥क्रमेणग्रीष्मवर्षाहे
मंतेषुमासंगोमूत्रयावकमश्नीयुरिति॥तत्कामतोऽभ्यासविषयंयत्तुयमेनोक्तं॥पुरोधाःशूद्रवर्णस्यब्रा राम० १७८
ह्मणोयःप्रवर्तते॥स्नेहादर्थप्रसंगाद्वातस्यकृच्छ्रोविशोधनमिति॥तदशक्तविषयं॥यच्चपैठीनसिनोक्तंशू

द्रयाजकःसर्वद्रव्यपरित्यागात्पूतोभवतिप्राणायामसहस्रेषुद्वादशकृत्वोऽभ्यस्येद्धितितदप्यकामतोऽभ्यासवि
षयं॥यत्तुगौतमेनोक्तं॥निषिद्धमंत्रप्रयोगेसहस्रवाक्पुपयमश्चेति॥निषिद्धानांपतितादीनांयाजनाध्या
पनात्मकेमंत्रप्रयोगेवरुणोऽभ्यस्येत्प्राकृतंब्रह्मचर्यमुपदिष्टंतत्कामतोऽभ्यासविषयं॥अश्ववेदंविप्लावय
तियश्चरक्षणक्षमोपितस्करस्यातिरिक्तंशरणागतमुपेक्षतेसोपिसंवत्सरंयवौदनंभुंजानःशुध्यति॥त
त्रविप्लवोनामपर्वेचंडालश्रोत्रावकाशघनध्यायेष्वध्ययनं॥उत्कर्षतोरधीयानस्यकिंपठसिनाशितं
त्वयेतिएवंपर्यनुयोगदानंवाविप्लवनमुच्यते॥अतएवोक्तंस्मृत्यंतरे॥रहस्यानुयोगानध्येतुःपतितान्म
नुरब्रवीदिति॥यत्तुवसिष्ठेनोक्तं॥पतितचंडालशवश्रवणेत्रिरात्रंवाग्यताअनश्नंतआसीरन्सहस्रपरं
महावाग्भ्यस्यंतःपूताभवंतीतिविज्ञायतइसेतेनैवंगर्हिताध्यापकयाजकाध्याप्यास्याताः॥हृत्स्थितासा
गाश्चपूताभवंतीतिविज्ञायतइति॥तद्बुद्धिविषयं॥यत्तुषट्त्रिंशन्मतेऽभिहितंचंडालश्रोत्राजीवकाश्रोश्रुति

DR. BHAU DAJI MEMORIAL

१७१ स्मृतिपाठे एकरात्रमभोजनमिति तद्बुद्धिपूर्वविषयं॥ यदा सर्पाद्यंतरागमनमात्रं भवति पुनस्तत्राधीते तदा
पि प्रायश्चित्तं यमेनोक्तं॥ सर्पस्य नकुलस्याथ अजमार्जारयोस्तथा॥ मूषकस्य तथोष्ट्रस्य मंडूकस्य च योषि
तः॥ पुरुषस्यैडकस्यापि शुनो श्वस्य खरस्य च॥ अंतरागमने सद्यः प्रायश्चित्तमिदं शृणु॥ त्रिरात्रमुपवा
सश्च त्रिरह्नश्चाभिषेचनं। ग्रामांतरं वा गंतव्यं ज्ञानुभ्यां नात्र संशयः॥ पितृमातृसुतत्यागतडागारामविक्र
येषु मनुयोगीश्वरोक्तोपपातकसाधारणप्रायश्चित्तानि पूर्ववज्जातिशक्तिगुणाद्यपेक्षया योज्यानि॥ तत्र
पितृमात्रादित्यागस्य॥ अकारणपरित्यागी मातापित्रोर्गुरोस्तथेति॥ अपांक्तेयमध्यपाठात्तन्निमित्तमपि प्रा
यश्चित्तं भवति॥ यथाह मनुः॥ षष्ठान्नकालता मासं संहिताजप एव वा। होमाश्च साकला नित्यमपांक्त्यानां वि
शोधनं इति॥ अपांक्त्याः श्राद्धकांडे ये स्तेनपतितक्लीबा इत्यादिना वो दर्शिताः तडागारामादिविक्रयेषु च क राम०
श्चिद्विशेषप्रायश्चित्तानि सविषयाणि सुतविक्रयप्रायश्चित्तकथनावसरे कथितानि॥ अनंतरं कन्याद् १७१

षणमित्युक्तं॥ तच्चैमासिकद्वैमासिकचांद्रायणानि सवर्णविषये योज्यानि॥ आनुलोम्ये पुनर्मासिकं ययोशनं
प्राजापत्यं वा॥ सकामास्वनुलोमासु न दोषस्त्वन्यथा दम इति॥ दंडाल्पत्वदर्शनात्॥ यत्तु शंखेनोक्तं॥ कन्यादूषी सो
मविक्रयी च कृच्छ्रमब्दं चरेतामिति॥ यच्च हारीतवचनं॥ कन्यादूषी सोमविक्रयी वृषलीपतिः कौमारदारत्यागी पासु
रमद्यपः शूद्रयाजको गुरुः प्रतिहंता नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटसाक्ष्यव्यवहारी ब्राह्मणवृत्तिघ्नो मिथ्या
भिशंसी पतितसंव्यवहारी मित्रध्रुक् शरणागतघाति प्रतिरूपकावृत्तिरित्येते पंचतपोऽभ्रावकाशजलशयनान्य
नुतिष्ठेयुर्ग्रीष्मवर्षाहेमंतेषु मासं गोमूत्रयावकामश्नीयुरिति॥ तदुभयमपि क्षत्रियवैश्ययोः प्रातिलोम्येन दू
षणे योज्यं॥ शूद्रस्य तु वध एव॥ दूषणे तु करच्छेद उत्तमायां वधस्तथेति दर्शनात्॥ परिविंदकस्य याजनकन्याप्रदा
नयोः कौटिल्ये ऽशिष्टप्रतिषिद्धवृत्तलोपे आत्मार्थपाकक्रियारंभे मद्यपस्त्रीनिषेवणे च साधारणोपपातकप्राय
श्चित्तं प्राग्वद्व्यवस्थापनीयं॥ आद्ययोस्तु विशेषप्रायश्चित्तानि परिवेदनायाज्ययाजनप्रायश्चित्तकथनावसरे दर्शिता

नि॥ अनंतरं स्वाध्यायत्यागइत्युक्तं॥ तत्र यमनासक्त्यात्यागे अधीतस्य च नाशनमिति वसिष्ठस्य समप्रायश्चि
१८० तमुक्तं॥ शास्त्राश्रवणाद्याकुलतया त्यागे तु त्रैमासिकाद्युपपातकप्रायश्चित्तानि ज्ञातिशक्त्याद्यपेक्षया व्यवस्था
पनीयानि॥ यत्तु वशिष्ठेनोक्तं॥ ब्रह्मोज्झः कृच्छ्रं द्वादशरात्रं चरित्वा पुनरुपयुंजीत वेदमाचार्यादिति॥ तदसंताप
द्विषं॥ अग्निसंत्यागपि तेनैव विशेषो दर्शितः॥ योऽग्नीनपविध्येत्स कृच्छ्रं द्वादशरात्रं चरित्वा पुनराधेयं कारये
दिति॥ द्वादशरात्रग्रहणमुत्सन्नकालापेक्षया प्राजापत्यादिगुरुलघुकृच्छ्राणां मासस्यार्थं तत्र मासद्वये प्राजापत्यं
॥ मासचतुष्टये तिकृच्छ्रः॥ षण्मासोच्छिन्ने पराकः॥ षण्मासादूर्ध्वं योगीश्वरोक्तान्युपपातकप्रायश्चित्तानि का
लाद्यपेक्षया योज्यानि॥ संवत्सरादूर्ध्वमानवं त्रैमासिकं द्वैमासिकमिति व्यवस्था एतच्चान्याग्निविषयेन त्यागविष
यं॥ तथा च व्याघ्रः॥ योऽग्निं समुत्सृजति नास्तिक्यात्प्राजापत्यं चरेद्द्विज इति॥ यदा तु प्रमादात्सृजति तदा भारद्वाजगृह्ये १८०
विशेष उक्तः॥ मासामामशतमात्रिरात्रानुपवासः स्याद्द्वाविंशतिरात्रादूर्ध्वमाषष्टिरात्रात्तिस्रोरा

त्रीरुपवासादूर्ध्वं मासं संवत्सरात्प्राजापत्यं चरेत्॥ अत ऊर्ध्वं कालबहुत्वे दोषगुरुत्वमिति॥ यदा त्वालस्यादि
नासृजति तदापि तेनैव विशेष उक्तः॥ द्वादशाहातिक्रमे त्र्यहमुपवासो मासातिक्रमे द्वादशाहमुपवासः॥ संव
त्सरातिक्रमे मासोपवासः पयोभक्षणं चेति॥ संवत्सरादूर्ध्वं तु हारीतेन विशेष उक्तः॥ संवत्सरोत्सन्नेऽग्निहो
त्रे चान्द्रायणं कृत्वा पुनराधानात् द्विवर्षोत्सन्ने चान्द्रायणं सोमपानं च कुर्यात्॥ त्रिवर्षोत्सन्ने संवत्सरं कृच्छ्रमे
भ्यस्य पुनराधानादिति॥ सोमापनं कृच्छ्रकांडे वक्ष्यते॥ शंखेनापि विशेष उक्तः॥ अग्न्युत्सादी संवत्सरं प्राजापत्यं
चरेद्गोश्च दद्यादिति॥ सुतत्यागे बंधुत्यागे त्रैमासिकादिकं गोवधव्रतं कमतः॥ अकामतस्तु योगीश्वरोक्तं व्रत
चतुष्टयं शक्त्याद्यपेक्षया योज्यं॥ द्रुमच्छेदप्रायश्चित्तं प्रागुक्तं॥ स्त्रीमालिवशीकरणादिति॥ औषधिकरणादि
जीवनेतिलेक्षूपत्रयप्रवर्त्तनेन चतोंस्यप्रायश्चित्तानि तथैव योजनीयानि॥ व्यसने पुत्र घृतमृगयादिषु तान्ये
व व्रतानि तथैव योजनीयानि॥ यत्तु बौधायनेन॥ अथाशुचिकरणानि घृतमभिचारो नाहिताग्निरुत्सन्नाग्नि

न्नवृत्तिःसमावृत्तस्यभैक्ष्यचर्यातस्यचगुरुकुलेवासादूर्ध्वंचतुर्भ्योमासेभ्योयश्चतमध्यायपतितनक्षत्रनिर्देशानं
१८१ चेतिद्वादशमासाद्वादशार्द्धमासाद्वादशद्वादशषडाहाद्याशत्र्यहात्र्यहमेकाहमित्यशुचिकरनिर्देशइति
घृतेवार्षिकव्रतमुक्तं॥तदभ्यासविषयं॥यत्तुप्रचेतसोक्तं॥अमृतवाक्तस्करोवंदीराजभृत्योवृक्षारोपकवृ
त्तिर्गरदोग्निदोश्वरथगजारोहणवृत्तीरंगोपजीवीश्वागणिकःशूद्रोपाध्यायोवृषलीपतिर्माहिषिकोनक्षत्रोप
जीवीश्ववृत्तिर्ब्रह्मजीवीचिकित्सकोदेवलकःपुरोहितःकितवोमद्यपःकूटकारकोऽपसवविक्रयीमनुष्यंप
शुविक्रेताचेतितानुद्धरेत्समेसन्यायतोब्राह्मणःअवस्थायांसर्वद्रव्यत्यागेचतुर्थकालाहारःसंवत्सरंत्रिष
वणमुपस्पृशेपुत्रसत्यांतेदेवपितृतर्पणंगवाह्निकंचसेवयवहार्यइतितदपिबोधायनीयेनसमानविषयं
॥श्वागणिकोयःश्वगणेनजीवति॥माहिषिकोवदियतिरिक्तोरांज्ञात्कर्पादिसेवनैःप्रदोधपितांयदिनःपृथ या०म०
गुपादानात्॥श्ववृत्तिःसेवकः॥ब्रह्मजीवीद्विजकार्यंपुमर्थ्येनपरिचारकः॥मन्त्रास्त्वान्यप्यपंतयाप्रायश्चित्ता १८१

निषण्णस्तकालतामासमभिसारी॥निज्ञासाधपेत्सयायोज्यानि॥तदुक्तापंत्यमध्येपिकितवादिव्यसनिनांपठि
तत्वात्॥आत्मविक्रयेप्यद्रुसेवायांचसामान्यप्रायश्चित्तानिभार्गवहेवयोज्यानि॥यत्तुबोधायनेनोक्तं॥समुद्रया
नंब्राह्मणस्यन्यासापहरणंसर्वापण्यैर्व्यवहरणं॥भूम्यनृतंशूद्रसेवायाश्चशूद्रायामभिजायतेतदपत्यंच
भवति॥तेषांचनिर्देशश्चतुर्थकालमितभोजनाःस्युरपोभ्युपेयुःसवनानुकल्पंस्थानासनाभ्यांविहरंतःए
तेत्रिभिवर्षैस्तदपघ्नंतिपापमिति॥तद्बहुकालसेवाविषयं॥हीनजातिसख्येतूपपातकसामान्यप्रायश्चि
त्तान्येव॥यत्तुप्रचेतसोक्तं॥मित्रभेदकरणादहोरात्रमनश्नन्नुत्वापयःपिबदितितद्धीनसख्यभेदनविष
यं॥हीनयोनिनिषेवणेप्युपपातकसामान्यप्रायश्चित्तानियोज्यानि॥यत्तुशातातपेनोक्तं॥ब्राह्मणोराजन्य
पूर्वांकृच्छ्रंद्वादशरात्रंचरित्वानिविशेत्तांचैवोपयच्छेत्तुशूद्रपूर्वांत्वतिकृच्छ्रंवैश्यांचेच्छूद्रपूर्वांकृच्छ्रंद्वादशरात्रंच
रित्वानिविशेत्तांचोपयच्छेदिति॥कृच्छ्रानुष्ठानोत्तरकालंसवर्णापरिणयनादूर्ध्वंतांचराजन्यादिकामुपयच्छेदित्यर्थः

१८२ इदंचाज्ञानविषयं॥ज्ञानतस्तूपपातकसामान्यप्रायश्चित्तंव्यवस्थितमेवद्रष्टव्यंसाधारणस्त्रीसंभोगश्चही
नयोनिनिषेवणमित्युक्तंतत्रापि॥पशुवेश्याभिगमनेप्राजापत्यंविधीयतइतिसंवर्त्तोक्तमकामतोद्रष्टव्यं॥
कामतस्तूपमोक्तंद्रष्टव्यं॥वेश्यागमनेजपापंव्यपोहंतिद्विजातयः॥पीत्वासकृत्सुतप्तंसंसपरात्रंकुशोद
कमिति॥उपपातकसामान्यप्रायश्चित्तानिचकामकारतोभ्यासापेक्षयायोज्यानि॥तत्रमत्याभ्यासेतुप्र
त्तिनिमित्तंनैमित्तिकमावर्त्ततइतिन्यायात्प्रतिनिमित्तंनैमित्तिकावृत्तौप्रसक्तायांलौगाक्षिणाविशेषउ
क्तः॥अभ्यासेहर्गुणावृद्धिर्मासादर्वाग्विधीयते॥ततोमासगुणावृद्धिर्यावत्संवत्सरंभवेत् ततःसंवत्सरगु
णायावत्साध्यंसमाचरेत्॥इति॥अत्रसाऽवृत्तौतुचतुर्विंशतिमतेविशेषउक्तः॥सकृत्कृतेतुपत्योक्तंत्रिगु
णंतत्रिभिर्दिनैः॥मासासेवगुणंप्रोक्तंषण्मासादशधाभवेत्॥संवत्सरासेवनेत्वद्वादशगुणंभवेत्॥त राम०
तोप्येवंप्रकल्प्यंस्याज्ज्ञानतपवचोपयेति॥यस्तुनर्विधेःप्राथमिकादस्माद्द्वितीयेद्विगुणंचरेत्॥इतिमति १८२

निमित्तमावृत्तिविधायकंतन्महापातकविषयमित्युक्तंप्राक्॥यत्तुयमेनसाधारणस्त्रीगमनमधिकृत्यसगुरु
तल्पव्रतमतिदिष्टं॥गुरुतल्पव्रतंकेचित्केचिच्चांद्रायणव्रतं॥गोभ्रुस्येछंतिकेचिच्चकेचिदेवावकीर्णिनइति॥
एतच्चजन्मप्रभृतिसानुबंधानवच्छिन्नाभ्यासविषयं॥अनंतरंतथैवानाश्रमेवासइत्युक्तंतत्रहारीतेनविशेष
उक्तः॥अनाश्रमीसंवत्सरंप्राजापत्यंकृच्छ्रंचरित्वाआश्रममुपेयात्॥द्वितीयेतिकृच्छ्रं॥तृतीयेकृच्छ्रातिकृच्छ्रंअत
ऊर्ध्वंचांद्रायणमिति॥एतदसंभवविषयं॥संभवेतुसामान्योपपातकप्रायश्चित्तानिकामतोव्यवस्थापनीया
नि॥परपाकरुचित्वासच्छास्त्राधिगमानाकराधिकारभार्याविक्रयेषुमनुयोगीश्वरप्रतियादितोपपातकसामा
न्यप्रायश्चित्तानिज्ञातिशक्तिगुणाद्यपेक्षयाव्यवस्थापनीयानि॥भार्यायाविक्रयश्चैषामिन्दुत्वसचराज्ञोमन्वाद्यु
क्तात्यतिप्रहनिंदितान्नादनादीनामुपलक्षणार्थमित्युक्तं॥तत्रासत्प्रतिग्रहेप्रायश्चित्तविशेषमाह॥गोष्ठे
वसन्ब्रह्मचारीमासमेकंपयोव्रतः॥गायत्रीजाप्यनिरतःशुध्यतेऽसत्प्रतिग्रहात्॥यस्त्वसत्प्रतिग्रहलोनि

१८३ षिद्धप्रतिग्रहणं करोति स ब्रह्मचर्ययुक्तो गोष्ठे वसन्गायत्रीजपशीलो मासं पयोव्रतेन शुध्यति॥ प्रतिग्रहस्य चा
सत्वं दातृजातिकर्मनिबंधनं॥ यथा चंडालादेः पतितादेश्च॥ तथा देशकालनिबंधनं॥ यथा कुरुक्षेत्रोप
रागादौ॥ तथाऽप्रतिग्राह्यद्रव्यनिबंधनं च॥ यथा सुरामेषीमृतशय्योभयमुख्यादेः॥ यदा तु पतितादेर्मेधा
दिकं गृह्णाति तदेदं गुरुप्रायश्चित्तं द्रष्टव्यं॥ अतिक्रमद्वयदर्शनेन निमित्तस्य गुरुत्वात्॥ तत्र जपे मनुना
संख्याविशेष उक्तः॥ जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः॥ मासं गोष्ठे पयः पीत्वा मुच्यते सत्प्रति
ग्रहादिति प्रत्यहं त्रिसहस्रजपो द्रष्टव्यः॥ मासमिति द्वितीया पात्रिसहस्रसंख्याकस्य जपस्य प्रतिदिवसा
व्यापित्वावगमात्॥ यदा तु न्यायवृत्तिब्राह्मणादेः सकाशान्निषिद्धं मेध्यादिकं गृह्णाति पतितादेर्वा भ
क्ष्यादिकमनिषिद्धं तदा षड्त्रिंशन्मतोक्तं द्रष्टव्यं॥ यदि गर्ह्याद्विशुध्यंति सर्वे घोरात्प्रतिग्रहात्॥ तं दद्वेनम्र राम०
गारेद्याकदाचिन्मित्रविंदया॥ दैव्यालक्षजपेनैव शुध्यंते दुःप्रतिग्रहादिति॥ यत्तु वृद्धहारीतवचनं राज्ञः १८३

प्रतिग्रहं कृत्वा मासमप्सु संवसेत्॥ षष्ठे काले पयोभक्षः पूर्णे मासे प्रमुच्यते॥ तर्पयित्वा द्विजान्कामैः सत
तं नियतः व्रतः॥ इति तत्सर्वोक्तविषयेऽभ्यासे द्रष्टव्यं॥ अथवा पतितादेः कुरुक्षेत्रोपरागादौ कृष्णाजिनादि
प्रतिग्रहविषये॥ तथा प्रतिग्राह्यद्रव्यास्य तथा प्रायश्चित्तमाम्नातं॥ यथाह हारीतः॥ मणिवासोगवादीनां प्र
तिग्रहे सावित्र्यष्टसहस्रं जपेदिति॥ तथा षड्त्रिंशन्मतेऽपि॥ भक्ष्यमात्रे गृहीते तु पुण्यं मंत्रमुदीरयेत्॥ प्रति
ग्रहेषु सर्वेषु षष्टमंशं प्रकल्पयेदिति॥ इदं च प्रायश्चित्तजातं द्रव्यस्यागोत्तरकालं द्रष्टव्यं॥ यद्गर्हितेनार्जे
यंति कर्मणा ब्राह्मणा धनं॥ तस्योत्सर्गेण शुध्यंति जप्येन तपसैव चेति मनुस्मरणात्॥ एवमन्यान्यपि स्मृ
तिवाक्यानि द्रव्यसाराल्पत्वमहत्त्वाभ्यां विषयेषु व्यवस्थापनीयानि॥ इत्युपपातकप्रायश्चित्तप्रकरणम्
॥ जात्याश्रमादिदोषेण निंद्यान्नादेः चशब्दतः॥ योगीश्वरोक्तं व्रतमात्रं संप्रतं तु प्रतन्यते॥ तत्र जातिदु
ष्टपलांड्वादिभक्षणे कामतः सकृत्कृते पलांडुविड्वराहं चेसादिनां चान्द्रायणमुक्तं॥ कामतोऽभ्यासे तु निषि

१८४ द्भक्षणं जैह्ममित्यादिनोक्तं सुरापानसमं प्रायश्चित्तं॥ अकामतः सकृद्भक्षणे सांतपनं॥ तत्रैवाभ्या
सेयतिचांद्रायणं॥ अमेधितानिषक्रगध्राहृद्धं सांतपनं चरेत्॥ यतिचांद्रायणं वापि शेषेषूपवसे
दहरिति मनुस्मरणात्॥ यत्तु वृद्धयमेनोक्तं॥ खट्टावार्ताककुंभीकव्रश्चनप्रभवानि च॥ भूस्तृणं
शिग्रुकं चैव खुखुंडं कवकानि च॥ एतेषां भक्षणं कृत्वा प्राजापत्यं चरेद्द्विज इति॥ तत्कामतोभ्यासविष
यं॥ मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं क्षिपेदिति योगीश्वरेणकामतः सकृद्भक्षणे त्र्यहस्यो
क्तत्वात्॥ खट्टाख्यः पक्षी॥ कुंभकमित्यन्ये। कवकं कृष्णसर्षपाख्यशाकं। खुखुंडं तद्विशेषो गोवलीवर्द
न्यायेन निर्दिष्ट॥ यत्तु यमेनोक्तं। तंडुलीयककुंभीकव्रश्चनप्रभवांस्तथा। नालिकांनालिकेरीं च श्लेष्मा
तकफलानि च॥ भूस्तृणं शिग्रुकं चैव खट्टाख्यकवकं तथा॥ एतेषां भक्षणं कृत्वा प्राजापत्यं चरेदिति॥ राम०
तदपि मतिपूर्वाभ्यासविषयं॥ नालिका नालिकेरी च शाकविशेषो। खट्टाख्यं च। अकामतः सकृद्भ १८४

Dr. BHAU DAJI MEMORIAL

क्षणे तु शेषेषूपवसेदहरिति मनूक्तं द्रष्टव्यं॥ तत्रैवाभ्यासे त्वावृत्तिः कल्पनीया॥ असंताभ्यासे तु॥ संसर्ग
दुष्टं यच्चान्नं क्रियादुष्टमकामतः॥ भुक्त्वास्य भावदुष्टं च तप्तकृच्छ्रं समाचरेदिति प्रचेतोभिहितं द्रष्टव्यं॥
नील्यास्त्वकामतः सकृद्भक्षणे चांद्रायणं॥ भक्षयेद्यदि नीलीं तु प्रमादाद्ब्राह्मणः क्वचित्॥ चांद्रायणे
न शुद्धिः स्यादापस्तंबोब्रवीन्मुनिरित्यापस्तंबस्मरणात्॥ कामतोभ्यासे चावृत्तिः कल्प्या॥ यद्यपि षट्त्रिंश
न्मतेभिहितं॥ शणपुष्पं शाल्मलं च करानर्मथितं दधि॥ वर्हिर्वेदिपुरोडाशं जग्ध्वा नाद्यादहर्निशमिति
तदप्यकामविषयं॥ यत्तु सुमंतुनोक्तं॥ लशुनपलांडुगृंजनभक्षणे सावित्र्यष्टसहस्रेण मूर्ध्नि संपातान्न
येदिति तद्बलात्कारेणानिच्छतो भक्षणविषयं॥ तदेकसाध्याव्याध्युपशमार्थे वा भक्षणे द्रष्टव्यं॥ अत ए
वानंतरं तेनोक्तं॥ एतान्येव व्याधितस्य भिषक्क्रियायामप्रतिषिद्धानि भवंति॥ यानि चैवंप्रकाराणि ते
ष्वपि न दोष इति॥ संपातान्नयेदुदबिंदून्प्रक्षिपेत्॥ अथ जातिदुष्टसंधिन्यादिक्षीरपाने प्रायश्चित्तं॥ त

१८५ त्र चाकामतः सकृत्पाने ॥ अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा ॥ आविकं संधिनीक्षीरं विवत्सायाश्च
गोः पयः ॥ आरण्यानां च सर्वेषां मृगाणां महिषीं विना ॥ स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि ॥ दधिभक्ष्यं
च शुक्तेषु सर्वं च यद्दधिसंभवं ॥ मिस्कलाशेषेष्वप्येवमेव द्दरिति मन्वुक्त उपवासो द्रष्टव्यः ॥ कामतस्तु योगीश्वरो
क्तः त्रिरात्रोपवासो द्रष्टव्यः ॥ यत्तु पैठीनसिनोक्तं ॥ अविखरोष्ट्रमानुषीक्षीरप्राशने तप्तकृच्छ्रः पुनरुपनय
नं च अनिर्दशाहगोमहिषीक्षीरप्राशने षड्रात्रमभोजनं सर्वासां द्विस्तनीनां क्षीरपाने जावर्जमेतदेवेति ॥ यच्च
शंखेन ॥ क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ॥ सप्तरात्रं व्रतं कुर्यात्प्रयत्नेन समाहित इति यावकव्रत
मुक्तं तदुभयमपि कामतोऽभ्यासविषयं त्वमेध्यभक्षायाः क्षीरप्राशने शंखेन पक्षव्रतमुक्तं ॥ संधिन्यमेध्यभ
क्षायाः भुक्त्वा पक्षव्रतं चरेदिति ॥ तदप्यभ्यासविषयं ॥ सकृत्पाने गोजामहिषीवर्जं सर्वपयांसि प्राश्योपवसेद् रा०म०
निर्दशाहं नान्यपि ॥ संधिनी यमसूः स्यंदिनी विवत्सा क्षीरं चामेध्यभुजश्चेति विष्णुनोपवासस्योक्तत्वात् ॥ तथा १८५

वर्णनिबंधनश्च प्रतिषेधः ॥ क्षत्रियश्चापि वृत्तस्थो वैश्यः शूद्रोथवा पुनः ॥ यः पिबेत्कपिलाक्षीरं न ततोन्यो
स्ति पुण्यकृदिति एवमादेश्च प्रतिप्रतिपदोक्तं प्रायश्चित्तं न दृश्यते तत्र शेषेषूपवसेदहरिति मनूक्तं साधार
णप्रायश्चित्तं द्रष्टव्यं ॥ अथ स्वभावदुष्टमांसादिभक्षणे प्रायश्चित्तं ॥ तत्राकामतः सकृद्भक्षणे शेषेषूपवसेदह
रिति मनूक्तं साधारणप्रायश्चित्तं द्रष्टव्यं ॥ कामतस्तु ॥ चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च ॥ मत्स्यांश्च काम
तो जग्ध्वा सोपवासस्त्र्यहं क्षिपेदिति योगेश्वरोक्तं द्रष्टव्यं ॥ कामतोऽभ्यासे तु जग्ध्वा मांसममेध्यं तु सप्तरात्रं यवान्पि
बेदिति मनूक्तं द्रष्टव्यं ॥ इदं च विड्वराहादिमांसव्यतिरिक्तविषयं ॥ क्रव्यादसूकरोष्ट्राणां कुक्कुटानां च भक्ष
णे नरकाकखराश्वानां तप्तकृच्छ्रं विशोधनमिति मनुना जातिविशेषेण प्रायश्चित्तस्योक्तत्वात् एतन्मूत्रपुरीषप्रा
शनेष्वेतदेव ॥ वाराहैकशफानां च काकुकुक्कुटयोस्तथा ॥ क्रव्यादानां च सर्वेषामभक्ष्या ये च कीर्तिताः ॥ मांसमूत्र
पुरीषाणि प्राणि प्राश्य गोमांसमेव च ॥ श्वगोमायुकपीनां च तप्तकृच्छ्रो विधीयते ॥ उपोष्य वा द्वादशाहं कूष्मांडैर्जु

१८६ हृयाद्धुतमिति॥ बृहद्यमेनोक्तत्वात्॥ तच्चकामतस्तप्तकृच्छ्रः॥ अभ्यासेतुकूष्मांडसहितःपराक इतिव्यवस्थात
था प्रचेतसाप्युक्तं॥ श्वसृगालकाककुक्कुटयाश्चैतवानरक्रव्यादखरोष्ट्रगजवाजिविड्वराहगोमानुषमांसभक्षणे
तप्तकृच्छ्रमादिशेत्॥ शेषाणां मूत्रपुरीषभक्षणेत्वतिकृच्छ्रमिति॥ इदं चकामकारविषयं॥ यत्तूशनसो वचनं॥ न
रमांसं खरोष्ट्रमांसं चाश्वमेव च भुक्त्वा पंचनखानां च महासांतपनं चरेदिति तन्नरकामविषयं॥ यत्त्वंगिरोवचनं
॥ बलाकमांसगृध्रास्तु खरवानरसूकरान्॥ दष्ट्वा चैषाममेध्यानि सदृष्ट्वा चाप्यविशुध्यति॥ इच्छयैषाममेध्यानि
भक्षयित्वा द्विजातयः कुर्युः सांतपनं कृच्छ्रं प्राजापत्यमनिच्छयेति॥ तद्भक्षितोद्गिरितविषयं॥ सांतपनशब्देन
चात्र महासांतपनमुच्यते॥ अकामतस्तु प्राजापत्यविधानात्॥ यत्पुनरंगिरोवचनं॥ नरकाकखराश्वानां
जग्ध्वा मांसं सगजस्य च॥ एषां मूत्रपुरीषाणि द्विजश्चांद्रायणं चरेदिति॥ यच्च बृहद्यमेनोक्तं॥ शुष्कमांसाशनेवि राम०
प्रो व्रतं चांद्रायणं चरेदिति॥ तदुभयमपि कामतोभ्यासविषयं॥ यत्पुनः शंखेनोक्तं॥ जग्ध्वाभयतोदंतांस्तथा १८६

चैकशफानपि॥ औष्ट्रं गव्यं तथा भुक्त्वा षण्मासं व्रतमाचरेदिति तत्कामतोत्यंताभ्यासविषयं॥ यत्तु स्मृत्यंत
रोक्तं॥ जग्ध्वा मांसं नराणां च विड्वराहं खरं तथा॥ गवाश्वकुंजरोष्ट्राणां सर्वं पंचनखं तथा॥ क्रव्यादं कुक्कुटं ग्राम्यं
कुर्यात्संवत्सरं व्रतमिति तदसंतानवच्छिन्नाभ्यासविषयं॥ अत्र च प्रकरणे मूत्रपुरीषग्रहणं वसाशुक्रासृग्म
ज्जानामुपलक्षणं॥ कर्णघ्राणभ्रूप्रभृतिमलषट्केत्वर्धं कल्पनीयं केशादिषु पुनः षट्त्रिंशन्मते विशेष उक्तः
॥ अजाविकमहिषमृगाणामाममांसभक्षणे केशनखरुधिरप्राशने बुद्धिपूर्वे त्रिरात्रमज्ञानादुपवास इति॥ त
दप्यकामतः सकृत्प्राशनविषयं॥ यत्तु प्रचेतसोक्तं॥ नखकेशमसृग्भक्षणे होरात्रमभोजनाच्छुद्धिरिति तद
धकामतः सकृत्प्राशनविषयं॥ यत्तु स्मृत्यंतरवचनं केशकीटनखं प्राश्य मत्स्यां कंटकमेव च॥ हेमतप्तं घृतं पी
त्वा तत्क्षणादेव शुध्यतीति तन्मुखमात्रप्रवेशविषयं॥ यदा तु भाजनस्थमन्नं केशादिदूषितं भवति तदा॥ अन्ने
भोजनकाले तु मक्षिकाकेशदूषिते॥ अनंतरस्पृशेदापस्तच्चान्नं भस्मना स्पृशेदिति प्रचेतोभिहितं द्रष्टव्यं॥ प्रा

१८७ शंसितोयमश्लोकः॥सूक्ष्मतरकृमिकीयस्थिभक्षणेपुनर्हारीतेनविशेषउक्तः॥कृमिकीटपिपीलिकाजलौकः
पतंगगास्थिप्राशनेगोमयाहारस्त्रिरात्रेणविशुध्यतीति॥जलौकमत्स्यादिः॥एवंचपशुपतत्रिजलचरनर
मांसादिप्राशनेसंक्षेपःप्रायश्चित्तानिप्रदर्शितानि॥ग्रंथगौरवभयात्सर्वतिव्यक्तिनलिख्यंते॥अथाशुचि
संसृष्टभक्षणेप्रायश्चित्तं॥तत्रतावदुच्छिष्टभक्षणेवक्ष्यते॥तत्रमनुः॥विडालकाकाखूच्छिष्टंजग्ध्वाश्वन
कुलस्यच॥केशकीटावपन्नंचपिबेद्ब्राह्मीसुवर्चलां॥मिति॥कालविशेषानुपादानादेकरात्रं॥इदंत्वकाम
तोद्रष्टव्यं॥यत्तुविष्णुनोक्तं॥पक्षिश्वापदजग्धस्यरसस्यान्नस्यभक्ष्यसः॥संस्काररहितस्यापिभोजनेकृच्छ्
पादकमिति॥तत्कामकारविषयं॥संस्कारश्चदेवब्राह्मणामिसादिनाइमाशुद्धिप्रकरणेक्तोद्रष्टव्यः॥यत्तु
शातातपेनोक्तं॥श्वाकाकाधवलीढशूद्रोच्छिष्टभोजनेस्वतिकृच्छ्र इति॥तदकामकोतोभ्यासोयत्तुशंखेन॥ राम०
शुनामुच्छिष्टकंभुक्त्वामासमेकंव्रतीभवेत्॥काकोच्छिष्टंगवाघ्रातंभुक्त्वापक्षंव्रतीभवेदितियावकव्रतमुक्तं १८७

तत्कामतोभ्यासविषयंब्राह्मणाद्युच्छिष्टभोजनेतुबृहद्विष्णुनोक्तं॥ब्राह्मणःशूद्रोच्छिष्टाशनेसप्तरात्रंपंचगव्यं
पिबेद्वैश्योच्छिष्टाशनेपंचरात्रंराजन्योच्छिष्टाशनेत्रिरात्रंब्राह्मणोच्छिष्टाशनेत्वेकरात्रमितितत्कामकारविषयं॥
यत्तुमनुवचनं॥भुक्त्वासहब्राह्मणेनप्राजापत्येनशुध्यति॥भूभुजासहभुक्त्वान्नतप्तकृच्छ्रेणशुध्यति॥वैश्येनसम
हभुक्त्वान्नंअतिकृच्छ्रेणशुध्यति॥शूद्रेणसहभुक्त्वान्नंचांद्रायणमथाचरेदितितत्कामतोभ्यासविषयं॥यत्तु
नशंखवचनं॥ब्राह्मणोच्छिष्टाशनेनमहाव्याहृतिभिर्मंत्र्यापःपिबेत्।क्षत्रियोच्छिष्टाशनेब्राह्मीरसविपक्वेनअह
क्षीरेणत्र्यहंयेतंवैश्योच्छिष्टाशनेत्रिरात्रोपोषितोब्राह्मीसुवर्चलांपिबेच्छूद्रोच्छिष्टभोजनेषड्रात्रमभोजनमिति॥तदका
मविषयं॥तत्राभ्यासेद्विगुणपरिकल्प्यं॥एतच्चपित्रादिव्यतिरेकेणपितुर्ज्येष्ठस्यचभ्रातुरुच्छिष्टंभोज्यमित्या
पस्तंबस्मरणात्॥यत्तुबृहद्व्यासवचनं॥मातावाभगिनीवापिभार्यावान्याश्चयोषितः॥ताभिःसहनभोक्तव्यंभु
क्त्वाचांद्रायणंचरेदिति॥तत्सहभोजनविषयं॥उच्छिष्टमात्रभोजनेतुशूद्रोच्छिष्टभोजनेसप्तरात्रमभोजनंक्षीर

१८८ णांचेसापसंतवोक्तंद्रष्टव्यं॥यत्तुंगिरोवचनं॥ब्राह्मणान्नसहयोश्नीयादुच्छिष्टंवाकदाचनं॥नतत्रदोषंमन्यंतेस
र्वएवमनीषिणइति॥तद्द्विजाहविषयमापद्विषयंवा॥असतोच्छिष्टभोजनेतु॥असतांभुक्तशेषंतुभक्षयि
त्वाद्विजातयः॥चांडालोच्छिष्टंदधिचब्रह्मक्षत्रविशांविधिरिसापसंतवोक्तंविज्ञेयं॥अत्रचांद्रायणं॥अस्मा
वसाप्युच्छिष्टभक्षणेतु॥चंडालपतितादीनामुच्छिष्टान्नस्यभक्षणे॥चांद्रायणंचरेद्विप्रःक्षत्रःसांतपनंच
रेत्॥षड्रात्रंचत्रिरात्रंचवर्णयोरनुपूर्वशः॥इत्यंगिरोभिहितं॥सांतपनमत्रमहासांतपनंद्रष्टव्यं॥आपदि
तु॥आपत्कालेतुविप्रेणभुक्तंशूद्रगृहेयदि॥मनसोस्यविशुध्यर्थंद्रुपदानांशतंजपेत्॥इतिपराशरोक्तंवे
दितव्यं॥दीपोच्छिष्टंतु॥दीपोच्छिष्टंतुयत्तैलंगात्रोरथ्याहृतंचयत्॥अभ्यंगाच्चैवयच्छिष्टंभुक्त्वानक्तेनशुध्यति
॥इतिषट्त्रिंशन्मतोक्तंविज्ञेयं॥यत्तुवृद्धशातातपेनोक्तं॥पीतशेषंतुयत्किंचिद्भाजनेमुखनिःसृतं॥अभोज्यं राम
तद्द्विजस्याहुर्भुक्त्वाचांद्रायणंचरेदितितदभ्यासविषयंनिमित्तस्यातिलघुत्वात्॥पीतोच्छिष्टंतुपानीयंपीत्वातु १८८

ब्राह्मणःक्वचित्त्रिरात्रंतुव्रतंकुर्याद्वामहस्तेनवापुनरितितद्बुद्धिपूर्वविषयं॥अकामस्तुतदर्धकल्प्यं॥अथाशु
चिद्रव्यसंसृष्टभक्षणेप्रायश्चित्तं॥तत्राहसंवर्तः॥केशकीटावपन्नंचनीलीलाक्षोपघातितं॥स्नाय्वस्थिच
र्मसंसृष्टंभुक्त्वातूपवसेदहरिति॥शातातपेनाप्युक्तं॥केशकीटावपन्नरुधिरमांसास्यस्पृष्टाभक्षणघ्रातेक्षि
तपतत्रवलीढश्वशूकरगवाघ्रातशुक्तपर्युषितवृथापक्वदेवान्नहविषाभोजनेउपवासः॥पंचगव्याशनंचे
ति॥तदुभयमप्यकामविषयं॥कामतस्तु॥मह्यादिकुसुमादींश्चफलकंदेक्षुमूलकान्॥विण्मूत्रदूषितान्प्रा
श्यकृच्छ्रपादंसमाचरेत्॥संनिकृष्टेर्धमेवस्यात्कृच्छ्रस्याशुचिरोदनमितिविप्रोक्तंविज्ञेयं॥अत्यंतसंसर्गेपादो॥
मोहात्संसर्गेर्धकृच्छ्रइतिव्यवस्थायत्तुव्यासोक्तं॥ससंगेदुष्टंयच्चान्नंक्रियादुष्टंचकामतः॥भुक्त्वास्वभावदुष्टंच
तप्तकृच्छ्रंसमाचरेदिति॥तत्त्वास्पृश्यसंस्पर्शामेध्यादिरसोपलक्षणंवेदितव्यं॥रजस्वलादिसंस्पर्शेतुयमेनो
क्तं॥अमेध्यपतितचंडालपुल्कसरजस्वलावधूतकुणिकुष्ठिकुनखिसंस्पृष्टानिभुक्त्वाकृच्छ्रंचरेदिति॥कुणि

१८९ हस्तविकल्पः ॥ एतत्कामकारविषयं ॥ अकामतोर्धं ॥ भुक्त्वा स्पृश्ये तथाशौचिकेशकीटैश्च दूषितं ॥ कुशोदुंबर
बिल्वाद्यैः पनसांबुजपत्रकैः ॥ शंखपुष्पीसुवर्चादिक्वाथं पीत्वा विशुध्यतीति यद्विष्णुनोक्तं तद्दशाहविषयं ॥ र
जकादिस्पृष्टविषयं वा ॥ श्वकाकोपहते हारीतोक्तं विज्ञेयं ॥ श्वद्रोणोपहतभोज्यं कीटैर्वा दूषितममेध्यसेवितं भु
ञ्जानेषु वा यत्र श्वशूद्र उपस्पृशेत् अनर्हत्वात् समर्चनपंक्त्या भुंजानेषु वा यत्र छायोच्छिष्टं प्रयच्छेत आचामेद्वा कुत्सि
तो वा पत्राणि रध्यस्तत्र प्रायश्चित्तमहोरात्रमिति ॥ उच्छिष्टपंक्तिभोजनेप्येतदेव ॥ यस्तु भुंक्ते द्विजः पंक्त्यामुच्छि
ष्टायां कदाचन ॥ अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यतीति क्रतुस्मरणात् ॥ वामकरेन मुक्तपात्रभोजने तु
॥ समुच्छिन्नस्तु यो भुंक्ते यो भुंक्ते भुक्तभाजने ॥ एवं वैवस्वतः प्राह भुक्त्वा सांतपनं चरेदिति षट्त्रिंशन्मतोक्तं विज्ञे
यं ॥ तथा पाराशरेणाप्युक्तं ॥ एकपंक्त्युपविष्टानां विप्राणां सहभोजने यद्येकोपि त्यजेत्पात्रं शेषमन्नं न भोज रा.म०
येत् ॥ मोहाद्भुंजीत यस्तत्र पंक्त्यामुच्छिष्टभोजनः ॥ प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं सांतपनं तथेति ॥ शवादिसंसृष्टकू १८९

पोदकपाने तु विष्णुः ॥ मृतपंचनखात्कूपादत्यंतोपहताद्वोदकं पीत्वा ब्राह्मणस्त्रिरात्रमुपवसेद्द्व्यहं राजन्य एकाहं वै
श्यः शूद्रो नक्तं सर्वे चांते पंचगव्यं पिबेयुरिति ॥ अत्यंतोपहतादिति एतत्पुरीषादिभिर्वैरूप्ये प्राप्ते तत्तु तत्रैव श
मुच्छूनतया उच्छिन्नं भवति तदाहारीतो विशेषमाह ॥ क्लिन्नं भिन्नं शवं चैव कूपस्थं यदि तत्पिबेत् ॥ शूद्रो चांडालकु
पोत्थमन्नमकृच्छमथापि वा ॥ यदि कश्चिन्नतः स्नायत्समाहेन द्विजोत्तम ॥ जपं त्रिषवणस्नायी अहोरात्रेण शुध्यति ॥
इदं चंडालयंमकामतो मानुषशवोपहतकूपजलपानविषयमकामतस्तु षड्रात्रं भिन्नं शवं चैव कूपस्थं यदि
दृश्यते ॥ पयः पिबेत्त्रिरात्रेण मानुषे द्विगुणं स्मृतमिति देवलस्मरणात् ॥ यदा तु चंडालकूपादिगतं पिबति तदा
पस्तंबोक्तं द्रष्टव्यं ॥ चांडालकूपभांडस्थं नरः कामाज्जलं पिबेत् ॥ प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दिशेत् ॥ चरे
त्सांतपनं विप्रः प्राजापत्यं तु भूमिपः ॥ तदर्धं तु चरेद्वैश्यः शूद्रे पादं विनिर्दिशेदिति ॥ अकामतस्तु ॥ यस्तु चां
डालभांडस्थमज्ञानादुदकं पिबेत् ॥ स तु त्र्यहेण शुध्येत् शूद्रस्त्वेकेन शुध्यतीति ॥ देवलोक्तं द्रष्टव्यं ॥ चंडालादि

संवद्याल्पजलाशयेष्वपिकूपवच्छुद्धिः॥जलाशयोप्यथाल्पेषस्थावरेषुमहीतले॥कूपवत्कथिताशुद्धिर्महत्सु
तुनदूषणमितिविष्णुस्मरणात्॥पुष्करिण्यादिषुपुनःम्लेच्छादीनांजलंपीत्वापुष्करिण्यांह्रदेपिच॥जानु
दघ्नंशुचिविज्ञेयमधस्तादशुचिस्मृतं॥तत्रोपंचःपिबेद्धिमःकामतोकामतोपिवा॥अकामात्राक्तभोजीस्याद
होरात्रंतुकामतइत्यापस्तंबोक्तंविज्ञेयं॥रजकादिभांडगतंतोयेतु॥भांडस्थमंत्यजानांतुजलंदधिपयःपि
वेत्॥ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चैवप्रमादतः॥ब्रह्मकूर्चोपवासेनद्विजातीनांतुनिष्कृतिः॥शूद्रस्यवो
पवासेनतथादानेनशक्तितइतिपराशरोक्तंवेदितव्यं॥कामतस्तुद्विगुणंअंत्यजैःखानिताःकूपास्तडागं
वाप्यएवच॥एषुस्नात्वाचपीत्वाचप्राजापत्येनशुध्यतीत्यापस्तंबोदितमभ्यासविषयंवेदितव्यं॥पत्वाषस्तं
वेन॥चंडालादिकूपादिजलपानेपंचगव्यमात्रमुक्तं॥प्रपास्वरण्येघटकेचमोरेद्रोण्यांजलंकोशविनिः राम०
सृतंच॥श्वपाकचांडालपरिग्रहेषुपीत्वाजलंपंचगव्येनशुध्येदिति॥तदशक्तविषयं॥अथभावदुष्टभक्ष ११०

णेप्रायश्चित्तं॥भावदुष्टंचयद्दत्तंआकारतोवाविसदृशतयाजुगुप्सितशरीरमलादिवासनांजनयतितद्दुष्य
ते॥अरिभयुक्तगरादिशंकोवा॥तत्रपराशरः॥वोदुष्टंभावदुष्टंचभोजनेभावदूषिते॥भुक्त्वान्नंब्राह्मणपश्चा
त्त्रिरात्रेणविशुध्यतीति॥एतत्कामकारविषयं॥यमुगौतमेन॥भावदुष्टंकेवलेसादिभास्यंचनखेभ्यःपठित्वा
प्रायश्चित्तमुक्तंप्राक्पंचनखेभ्यःपठित्वाप्रायश्चित्तमुक्तंप्राक्पंचनखेभ्यःछर्दनंघृतप्राशनंचेतितदकायविष
यं शंकायांतु॥शंकास्थानेसमुत्पन्नेअभोज्याभक्ष्यसंहिते॥अहोशुद्धिंप्रवक्ष्यामितांमेनिगदतःशृणु॥अक्षार
लवणांरूक्षांपिबेद्ब्राह्मीसुवर्चलां॥त्रिरात्रंशंखपुष्पीवाब्राह्मणःपयसासह॥पलाशविल्वपत्राणिकुशान्प
द्ममुदुंबरं॥अपःपिबेत्क्वाथयित्वात्रिरात्रेणविशुध्यतीतिवसिष्ठोक्तंद्रष्टव्यं॥मनुनाप्यभोज्यभोजनशंका
ष्टभक्षणेप्रायश्चित्तं॥कालादुष्टंचपर्युषितानिर्दशागोक्षीरादि॥तत्रचाकामतःशेषेपूर्ववसेदहरितिय

Dr. BHAU DAJI MEMORIAL

च्छ्रं वेदितव्यो कामतस्तु ॥ केवलानि च शुक्तानि तथा पर्युषितं च यत् ॥ गांजरीसपक्वं भुक्त्वा तु त्रिरात्रं तु व्रती भ
वेत् ॥ इति शंखोक्तं विज्ञेयं केवलान्यस्नेहाक्तानि ॥ अनिर्दशगोक्षीरादिषु प्रायश्चित्तं प्रागदर्शितं ॥ नवोदकपा
ने तु पंचगव्यप्राशनं ॥ शृंगास्थिदंतजैः पात्रैः शंखशुक्तिकपर्दकैः ॥ पीत्वा नवोदकं चैव पंचगव्येन शुध्यती
ति वृद्धयाज्ञवल्क्यस्मरणात् ॥ कामतस्त्वेतदभ्यासः कर्त्तव्यः ॥ काले नवोदकं शुद्धं न पिबेत्त्र्यहमेव तु ॥ अकाले
तु दशाहं स्यात्पीत्वा नाद्याद्दहर्निशमिति ॥ स्मृत्यंतरदर्शनात् ॥ ग्रहणकालभोजने तु चांद्रायणं ॥ नवश्रा
द्धे ग्रामयाजकान्ने सग्रहाभोजने ॥ नारीणां प्रथमे गर्भे भुक्त्वा चांद्रायणं चरेदिति शातातपस्मरणात् ॥ यस्तु
ग्रहादन्यत्र निषिद्धकाले भुंक्ते ॥ यथाह मार्कंडेयः ॥ चंद्रस्य यदि वा भानोर्यस्मिन्नहनि भार्गव ॥ ग्रहणं तु भ
वेत्तस्मिन्न पूर्वं भोजनक्रिया ॥ नाचरेत्सग्रहे चैव तथैवास्तमुपागते ॥ यावत्स्यान्नोदयस्तस्य नाश्नीयात्ता
वदेव तु ॥ तथा ग्रहणं तु भवेदिंदोः प्रथमादधि यामतः ॥ भुंजीतावर्त्तमानात्पूर्वं प्रथमे प्रथमादधः ॥ तथा

अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे ॥ भुंजीत संगवे चेत्स्यान्न पूर्वं भोजनक्रियेति ॥ यच्च मनुनोक्तं ॥ नाश्नीया
त्संधिवेलायां नातिप्रगे नातिसायमिसेवमादि ॥ यच्च वृद्धशातातपोक्तं ॥ धाना दधि च सक्तूंश्च श्रीकामो वर्जयेन्
निशि ॥ भोजनं तिलसंबद्धं स्नानं चैव विचक्षण इति ॥ एवमादिष्वनादिष्टप्रायश्चित्तेषु ॥ प्राणायामशतं का
र्यं सर्वपापापनुत्तये ॥ उपपातकजातानामनादिष्टस्य चैव हि ॥ इति योगीश्वरोक्तं प्राणायामशतं द्रष्टव्यं ॥ अका
मतस्तु शेषेषूपवसेदहरिति मनूक्त उपवासो द्रष्टव्यः अथ गुलदुष्टशुक्तादिभक्षणे प्रायश्चित्तं तत्र मनुः ॥
शुक्तानि च कषायांश्च पीत्वामेध्यान्यपि द्विजः ॥ तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः इति ॥ अत्राकामतः शे
षेषूपवसेदहरिति उपवासो द्रष्टव्यः ॥ कामतस्तु केवलानि च शुक्तानि तथा पर्युषितं च यत् ॥ त्रवीषपक्वं भुक्त्वा
च त्रिरात्रं तु व्रती भवेदिति शंखोक्तं द्रष्टव्यं ॥ एतच्चामलकादिफलयुक्तकांजिकादिव्यतिरेकेण द्रष्टव्यं ॥ कुंडिकासक
लायत्रगर्हेषु स्थापिता भवेत् ॥ तस्यास्तु कांजिकं ग्राह्यं नेतरस्याः कदाचनेति स्मरणात् ॥ उद्धृतस्नेहादिषु तु उद्

१९२ तस्नेहं विलयनपिण्याकमथितप्रभृतीनि चात्तवीर्याणि नाश्नीयादित्युक्त्वा शाकं चनखेभ्यः छर्दनं घृतप्राशनं
चेति गौतमोक्तं द्रष्टव्यं॥ विलयनं घृतमलं॥ अनुत्ताघन्नभोजने तु लिखित आह॥ यस्य चाग्नौ न क्रियते यस्या
चाग्रं न दीयते॥ न तद्भोज्यं द्विजातीनां भुक्त्वा तूपवसेदहः॥ वृथा कृशरसंयावपायसापूपशष्कुलीः॥ आहिता
ग्निर्द्विजो भुक्त्वा प्राजापत्यं समाचरेदिति॥ अनाहिताग्नेस्तु शेषेषूपवसेदहरिति॥ उपवासो द्रष्टव्यः॥ भि
न्नभाजनादिषु तु भोजने संवर्तेनोक्तं॥ शूद्राणां भाजने भुक्त्वा भुक्त्वा वा भिन्नभाजने॥ अहोरात्रोषितो भूत्वा
पंचगव्येन शुध्यतीति॥ तथाश्वसंवर्तेऽप्युक्तं वटकोश्वत्थपत्रेषु कुंभीतिंदुकपत्रयोः॥ कोविदारकदंबेषु भु
क्त्वा चांद्रायणं चरेत्॥ इति॥ तथा॥ पलाशपद्मपत्रेषु गृही भुक्त्वैंदवं चरेत्॥ वानप्रस्थो यतिश्चैव लभते चांद्रा
यणं फलमिति॥ ॥अथ हस्तदत्तानादिक्रियादुष्टभोज्यभोजने प्रायश्चित्तं। तत्र पराशरः। माक्षिकं फाणितं शा रा०म०
कं गोरसं लवणं घृतं हस्तदत्तानि भुक्त्वा तु दिनमेकमभोजनमिति॥ कामतस्तु हस्तदत्तभोजने शाल्मलीसमीप १९२

भोजने दुष्टपंक्तिभोजने पंक्त्युपहतभोजने भ्युक्तमत्रपुरीषकरलोमतस्तकश्वशूद्रान्नभोजने शूद्रैः सह स्वापे
त्रिरात्रमभोजनमिति हारीतोक्तं विज्ञेयम्॥ पर्यायान्नदानदुष्टे तु॥ ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्
॥ द्वयमेतदभोज्यं स्याद्भुक्त्वा तूपवसेदहरिति बृहद्याज्ञवल्क्योक्तमवगंतव्यं॥ शूद्रहस्ते भोजने तु॥ शूद्रह
स्तेन यो भुंक्ते पानीयं वापि वेत्क्वचित्॥ अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यतीति क्रतूक्तं विज्ञेयम्॥ धमनदु
ष्टे तु॥ आसनारूढपादो वा वस्त्रार्धप्रावृतोपि वा॥ मुखेन धमितं भुक्त्वा कृच्छ्रं सांतपनं चरेत्॥ इति तेनैवोक्तं॥ वि
त्राकदेशेनस्पृष्टान्नभोजने तु॥ भुंक्ते चेत्सावर्णश्चाद्द्वे प्राणायामान्षडाचरेत्॥ उपवासस्त्रिमासादिवत्सरांतं प्र
कीर्तितः॥ प्राणायामत्रयं त्र्यहादहोरात्रं सपिंडने॥ असरूपेस्पृतं तन्नक्तं नक्तं पारणके तथा॥ द्विगुणं क्षत्रियस्यै
तत्त्रिगुणं वैश्यभोजने॥ ऐपुष्मिके तदर्धं तु पंचगव्यं द्विमासिके॥ इदं चापद्विषयं॥ अनापदि तु। चांद्रायणं
न वश्वादे प्राजापत्यं तु मिश्रमे द्विगुणं क्षत्रियस्यै तत्त्रिगुणं वैश्यभोजने॥ साक्षाच्चतुर्गुणं प्रोक्तं तस्मात्तं शूद्रस्य भो

१९३ जनेअतिथौनिष्ठतिहारिप्रपः प्राश्नंतियेद्विजाः॥रुधिरंतद्भवेद्वारिभुक्त्वाचांद्रायणंचरेदितिभरद्वाजोक्तमवगं
तव्यं॥हारीतेनाप्युक्तं॥एकादशाहेचश्राद्धंभुक्त्वासंचयनेतथा॥उपोष्यविधिवत्कर्तुंवाकूष्मांडैर्जुहुयाद्घृतमि
ति॥विष्णुनाप्युक्तं॥प्राजापत्यंनवश्राद्धेपादोनंचाद्यमासिके॥त्रैपक्षिकेतदर्धंतुत्र्यंशंचगव्यंद्विमासिकेइति
इदंचापद्विषयं॥अनापदितु॥चांद्रायणंनवश्राद्धेप्राजापत्यंतुमिश्रके॥एकाहंतुपुराणेषुप्रायश्चित्तंवि
धीयतइतिहारीतोक्तंद्रष्टव्यं॥प्राजापत्यंतुमिश्रकइत्येतदाद्यमासिकविषयं॥तृतीयादिषुतुप्राजापत्यं
नवश्राद्धेपादोनंचाद्यमासिके॥त्रैपक्षिकेतदर्धंस्यात्सार्धंद्वैमासिकेतथा॥पादोनंकृच्छ्रमुद्दिष्टंषण्मासेच
तथाब्दिके॥त्रिरात्रंचान्यमासेषुप्रत्यब्दंचैकमहर्निशमितिषट्त्रिंशन्मतोक्तंद्रष्टव्यं॥श्रोत्रियादिश्राद्धभोजनेत्व
नापदितत्रैवविशेषउक्तः॥चांद्रायणंनवश्राद्धेपराकोमासिकेस्मृतः॥त्रैपक्षिकेसांतपनं॥कृच्छ्रंमासद्वये राम०
स्मृतं॥क्षत्रियस्यनवश्राद्धेव्रतमेतदुदाहृतं॥वैश्यस्यार्धार्धिकंप्रोक्तंक्षत्रियात्तुमनीषिभिः॥शूद्रस्यतुनव १९३

श्राद्धेचरेच्चांद्रायणद्वयं॥सार्धंचांद्रायणंमासेत्रैपक्षेत्वैन्दवंस्मृतम्॥मासद्वयेपराकःस्यादूर्ध्वंसांतपनंस्मृत
मिति॥यत्तुशंखवचनं॥चांद्रायणंनवश्राद्धेपराकोमासिकेस्मृतः॥पक्षत्रयेतिकृच्छ्रंस्यात्षण्मासेकृच्छ्रएवतु
॥आब्दिकेपादकृच्छ्रःस्यादेकाहःपुनराब्दिके॥अतऊर्ध्वंनदोषःस्यात्शंखस्यवचनंयथेतितत्समर्थादिहतवि
षये॥येस्तेनपतितक्लीबाद्यस्याघपांक्तेयविषयंवा॥चंडालादुदकात्सर्पात्ब्राह्मणाद्वैद्युतादिति॥दंष्ट्रिभ्यश्चप
शुभ्यश्चमरणंपापकर्मणांपतनानाशकैश्चैवविषोद्बंधादिभिस्तथा॥भुंक्तेयोयोऽत्रश्राद्धेकुर्यादिंदुव्रतंद्विज
इति॥तथा॥अपांक्तेयान्समुद्दिश्यश्राद्धमेकादशेहनि॥ब्राह्मणस्तत्रभुक्त्वान्नंशिश्चांद्रायणंचरेत्॥आम
श्राद्धेतथाभुक्त्वानसकृच्छ्रेणशुध्यति॥संकल्पितेतथाभुक्त्वात्रिरात्रावमसनंभवेदितिभरद्वाजेनगुरुप्रायश्चि
त्तविधानात्॥अत्रचसर्वप्रायश्चित्तेनसहमुच्यतइतिस्मृत्यर्थसारेभिधानात्॥ब्रह्मचारिणस्तुबृहद्यमोविशेष
माह॥मासिकादिषुयोश्नीयादसमावृत्तोद्विजः॥त्रिरात्रमुपवासोस्यप्रायश्चित्तंविधीयते॥प्राणायामत्रयंकृ

१९४ त्वाघृतंप्राश्यशुध्यतीति।इदमज्ञानविषयं।कामतोपिसएवाह॥मधुमांसंचयोश्नीयाच्छ्राद्धंसूतकमेववा
॥प्राजापत्यंचरेत्कृछ्रंव्रतशेषंसमापयेदिति॥आमश्राद्धेतुभवेदर्धप्राजापत्यंतुसर्वदेतिषड्त्रिंशन्मतेवि
धानात्॥यत्तूशनसोक्तं॥दशकृत्वःपिबेच्चापोगायत्र्याःश्राद्धभुग्द्विजः॥ततःसंध्यामुपासीतशुध्येत्तु
तदनंतरमिति॥तदनुकल्पप्रायश्चित्तंश्राद्धविषयं॥संस्कारांगभूतश्राद्धभोजनेतुआसेनविशेषउक्तः॥नि
र्वृत्तेचूडहोमेतुप्राङ्नामकरणात्तथा॥चरेत्सांतपनंभुक्त्वाजातकर्मणिचैवहि।अतोन्येषुतुभुक्त्वान्नसं
स्कारेषुद्विजोत्तम॥नियोगादुपवासेनशुध्यतेनिंद्यभोजनइति॥सीमंतोन्नयनादिषुपुनर्धौम्योविशे
षमाह।ब्रह्मौदनेचसोमेचसीमंतोन्नयनेतथा॥जातश्राद्धेनवश्राद्धेद्विजश्चांद्रायणंचरेदिति।अत्रब्र
ह्मौदनाख्यंकर्माधानांगभूतंसोमसाहचर्यात्॥अथपरिग्रहभोजनेप्रायश्चित्तं॥यत्स्वरूपतोनिषिद्धम राम०
पिअविशिष्टपुरुषस्वामिकतयाभोज्यंभवतितत्परिग्रहाशुचि॥तत्रयोगीश्वरेण॥अदत्तान्यग्निहीनस्य १९४

नान्नमद्यादनापदीतिआरभ्यसार्द्धपंचकैःश्लोकैरभोज्यान्नःप्रतिपादिता॥मनुनापितेएवकतिचिद
धिकाःप्रतिपादिताःनाश्रोत्रियहुतेयज्ञेग्रामयाजहुतेतथा॥स्त्रियाक्लीवेनचहुतेभुंजीतब्राह्मणःक्वचि
त्॥मत्तक्रुद्धातुराणांचनभुंजीतकदाचन।गणान्नंगणिकान्नंचविदुषाचजुगुप्सितं॥स्तेयगायनयोश्चा
न्नंतक्ष्णोवार्धुषिकस्यच॥दीक्षितस्यकदर्यस्यबद्धस्यनिगडस्यच॥अभिशस्तस्यषंढस्यपुंश्चल्यादांभिक
स्यच॥चिकित्सकस्यमृगयोःक्रूरस्योच्छिष्टभोजिनः॥उग्रान्नंसूतिकान्नंचपर्याचांतमनिर्दशं॥अनर्चि
तंवृथामांसमवीरायाश्चयोषितः॥द्विषदन्नंनगर्यन्नंपतितान्नमवक्षुतं॥पिशुनानृतिनोश्चैवक्रतुवि
क्रयिकस्यच॥शैलूषतंतुवायान्नंकृतघ्नस्यान्नमेवच॥कर्मारस्यनिषादस्यरंगावतरणस्यच॥सुवर्णक
र्तुर्वेणस्यशस्त्रविक्रयिणस्तथा॥श्ववतांशौंडिकानांचचैलनिर्णेजकस्यच॥रजकस्यनृशंसस्ययस्यचोप
पतिर्गृहे॥मृष्यंतियेचोपपतिंस्त्रीजितानांचसर्वशः॥अनिर्दशंचप्रेतान्नमतुष्टिकरमेवचेति॥अथचप

१९५ रार्थाः अभक्ष्यकांडेश्राद्धकांडेचव्याख्यातः॥तत्रप्रायश्चित्तमनुमाह॥भुक्त्वातोऽन्यतमस्यान्नममत्याक्षप
णंत्र्यहं॥मत्याभुक्त्वाचरेत्कृच्छ्रंरेतोविण्मूत्रमेवच॥पैठीनसिनाप्यकामतस्त्रिरात्रमेवोक्तं॥कुनखीश्याव
दंतःपित्रा विवदमानःस्त्रीजितःकुष्ठीपिशुनःसोमविक्रयीवाणिजकोग्रामयाजकोऽभिशस्तो॥वृ
षल्यामभिजातःपरिविंदानोदिधिषूपतिःपुनर्भूपुत्रश्चोरःकांडपृष्ठःसेवकश्चेत्यभोज्यान्नाअपं क्तेयाश्च
श्राद्धे॥एषांभुक्त्वादत्वाचविज्ञानात्त्रिरात्रमितिशंखवचनेतानेवकिंचिदधिकान्पठित्वाचांद्रायणमुक्तंतद
भ्यासविषयंगौतमेनपुनरुच्छिष्टपुंश्चल्यभिशस्तत्यादिनाअभोज्यान्नान्पठित्वाप्रावृंचनाखभ्यःछर्दनं
घृतप्राशनंचेतिप्रायश्चित्तमुक्तंतदप्यविषयं॥यस्तुबलात्कारेणभोज्यतेतस्यायस्तंबेनविशेषउक्तः॥ब
लाद्दासीकृतायेतुम्लेच्छचांडालदस्युभिः॥अशुभंकारिताःकर्मगवादिप्राणिहिंसनं॥उच्छिष्टमार्जनंचै राम०
वतथातस्यैवभोजनं॥खरोष्ट्रविड्वराहाणामामिषस्यचभक्षणं॥तत्स्त्रीणांचतथासंगंताभिश्चसहभोजनं॥ १९५

मासोषितेद्विजातौतुप्राजापत्यंविशोधनं॥चांद्रायणंत्वाहिताग्नेःपराकस्त्वथवाभवेत्॥चांद्रायणंपराकं
चचरेत्संवत्सरोषितःसंवत्सरोषितःशूद्रोमासार्धंपावकंपिबेत्॥मासमात्रोषितःशूद्रःकृच्छ्रपादेनशुध्यति
॥ऊर्ध्वंसंवत्सरात्कल्प्यंप्रायश्चित्तंद्विजोत्तमैः संवत्सरैस्त्रिभिश्चैवतद्भावमोपिगच्छतीति॥अशौचिपरिग
हीताचभोजनेतुछागलेयआह॥अज्ञानाद्भुंजतेविप्राःसूतकेमृतकेतथा॥प्राणायामशतंकृत्वाशुध्यं
तेशूद्रसूतके॥वैश्यषष्टिर्भवेद्राज्ञिविंशतिर्ब्राह्मणेदश॥एकाहंचत्र्यहंपंचसप्तरात्रमभोजनं॥ततःशुचि
र्भवेद्विप्रःपंचगव्यंपिबेत्ततइति॥ब्राह्मणादिषुक्रमेणैकाहत्र्यहादयोयोज्याः॥इदमकामकारविषयं
॥कामतस्तुमार्कंडेयआह॥भुक्त्वातुब्राह्मणाशौचेचरेत्सांतपनंद्विजः॥भुक्त्वातुक्षत्रियाशौचेतथाकृच्छ्रो
विधीयते॥वैश्याशौचेतथाभुक्त्वामहासांतपनंचरेत्॥शूद्रस्यैवतथाभुक्त्वाद्विजश्चांद्रायणंचरेदिति॥
पट्त्रिंशन्मतेनोक्तं॥शूद्रस्यसूतकेभुक्त्वाषण्मासान्व्रतमाचरेत्॥वैश्यस्यतुतथाभुक्त्वात्रीन्मासान्व्रतमाचरे

Dr. BHAU DAJI MEMORIAL

१९६ त॥क्षत्रियस्यतथाभुक्त्वाद्वौमासौव्रतमाचरेत्॥वैश्यस्यतुतथाभुक्त्वात्रीन्मासान्व्रतमाचरेत्॥क्षत्रियस्य
तथाभुक्त्वाद्वौमासौव्रतमाचरेत्॥ब्राह्मणस्यतथाशौचेभुक्त्वामासंव्रतीभवेत्इति॥इदमभ्यासविषयं
॥एतच्चप्रायश्चित्तमाशौचानंतरंवेदितव्यं॥ब्राह्मणादीनामाशौचेयःसकृदेवान्नमश्नातितस्यतावद
शौचंयावत्तेषामाशौचं॥अपगतेप्रायश्चित्तंकुर्यादितिविष्णुस्मरणात्॥अपुत्राद्यन्नभोजनेतुलिखित
आह॥भुक्त्वावार्धुषिकस्यान्नमव्रतस्यासुतस्यच॥शूद्रस्यचतथाभुक्त्वात्रिरात्रंस्यादभोजनं॥तथा॥
पञ्चपाकनिवृत्तस्यपरपाकरतस्यच॥अपचस्यचभुक्त्वान्नंद्विजश्चान्द्रायणंचरेदिति॥एतच्चाभ्यासविष
यं पञ्चपाकनिवृत्तादिलक्षणंचतेनैवोक्तं॥गृहीताग्निंसमारोप्यपंचयज्ञान्ननिर्वपेत्॥परपाकनिवृत्तोसौ
मुनिभिःपरिकीर्तितः॥पंचयज्ञान्स्वयंकृत्वापरान्नमुपजीवति॥सततंप्रातरुत्थायपरपाकरतस्तुसः रा॰म॰
॥गृहस्थधर्मप्रवृत्तोयोदद्यातिपरिवर्जितः॥ऋषिभिर्धर्मतत्त्वज्ञैरपचःसप्रकीर्तितइति॥यस्तुब्रह्मचार्या १९६

घन्नभोजनेवृद्धयाज्ञवल्क्यआह॥यतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभौ॥तयोरन्नंनभोक्तव्यंभुक्त्वा
चान्द्रायणंचरेदिति॥यज्ञपार्वणश्राद्धाद्यकर्तुरन्नभोजनेभरद्वाजआह॥पक्षेवायदिवामासेनयस्याश्नंति
देवताः॥भुक्त्वादुरात्मनस्तस्यद्विजश्चान्द्रायणंचरेदिति॥तदुभयमप्यभ्यासविषयं॥पूर्वंपरिगणितानिरि
क्तायेनिषिद्धाचरणशीलास्तदन्नभोजनेतु॥निराचारस्यविप्रस्यनिषिद्धाचरणस्यच॥अन्नंभुक्त्वाद्विजःकु
र्याद्दिनमेकमभोजनमितिषट्त्रिंशन्मतोक्तंद्रष्टव्यं॥अत्रैवसंवत्सराभ्यासेषट्त्रिंशन्मतएवोक्तं॥उपपातकयुक्त
:स्यादब्दमेकंनिरंतरं॥अन्नंभुक्त्वाद्विजःकुर्यात्पराकंतुविशोधनमिति॥इदंचाभक्ष्यभक्षणप्रायश्चित्त
कांडगतमविशेषादितिवर्तकंद्वेकंद्विजाग्र्यस्यैव॥क्षत्रियादीनांतुपादपादह्रास्याभवंति॥विप्रेतुसकलं
देयंपादोनंक्षत्रियेस्मृतं॥वैश्येर्धंप्रदातव्यंशूद्रेपादःप्रशस्यतइतिविष्णुस्मरणात्॥इत्यभक्ष्यभक्षण
प्रायश्चित्तं॥निमित्तपरिगणनवेलायामुपपातकानंतरंजातिभ्रंशकरादीनिपरिगणितानि॥तत्रप्राप्त

१८७ श्चित्तान्युच्यंते॥ तत्र मनुः॥ जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया॥ चरेत्सांतपनं कृच्छ्रं या॥ संकरीयात्र कृत्वा
सुमासं शोधनमैन्दवं॥ मलिनीकरणीयेषु तप्तः स्याद्यावकं त्र्यहमिति॥ अन्यतमो मतिसर्वत्र संबध्यते यमे
नाप्यत्र विशेष उक्तः॥ संकरीकरणं कृत्वा मासमश्नीत यावकं॥ कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं समाचरेत्॥
अपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुध्यति॥ शीतकृच्छ्रेण वा शुद्धिर्महासांतपनेन वा॥ मलिनीकरणीयेषु त
प्तकृच्छ्रं विशोधनमिति॥ बृहस्पतिनापि जातिभ्रंशकरे विशेष उक्तः॥ ब्राह्मणस्य रुजः कृत्वा शसभादिप्रा
मापणं॥ निदिवेभ्यो धनादानं कृच्छ्रार्द्धव्रतमाचरेदिति॥ एतेषां च जातिभ्रंशकरादिप्रायश्चित्तानां मत्वाघ
कानां जातिशक्त्याद्यपेक्षया विषमो विभजनीयः॥ एवं योगीश्वरोक्तमभक्ष्यभक्षणादिप्रायश्चित्तं संक्षेपतो द
र्शितमधुना प्रकृतमनुसरामः॥ महापातकमतिपातकमनुपातकमुपपातकं प्रकीर्णकमिति पंचविधं राम०
पापजातमुक्तं तत्र चतुर्विधे प्रायश्चित्तमभिधाय क्रममाप्तं प्रकीर्णकप्रायश्चित्तमाह॥ प्राणायामी जले स्नात्वा १८७

खरयानोष्ट्रयानगः॥ नग्नः स्नात्वा च भुक्त्वा च गत्वा चैव दिवा स्त्रियं॥ खरयुक्तं यानं खरयानं॥ उष्ट्रयुक्तयान
मुष्ट्रयानं तैरथगं आदित्तेनाध्वागमनं कृत्वा दिगंबरः स्नात्वाभ्यवहृत्य वा वासरे च निजांगनासंभोगं कृत्वा॥ वा
तडागतरंगिण्यादावबगाह्य कृतप्राणायामः शुध्यति॥ इदं च कामकारविषयं॥ उष्ट्रयानं समारुह्य खरया
नं च कामतः॥ सवासजलमाप्लुत्य प्राणायामेन शुध्यतीति मनुस्मरणात्॥ अकामतः स्नानमात्रं कल्प्यं॥ आ
क्षात्खरोष्ट्रे रोहणे तु द्विगुणा वृत्तिः कल्पनीया॥ तस्य गुरुत्वात्॥ अनड्वाहं समारुह्य प्राजापत्यत्रयं चरेत्॥ अ
ज्ञानात्तु तदर्द्धं स्यात्पुनः संस्कार एव च॥ किंच॥ गुरुं त्वं कृत्य हुंकृत्य विप्रं निर्जित्य वादतः॥ बध्वा वा वाससा क्षिप्रं
प्रसाद्योपवसेद्दिनं॥ गुरुं जनकादिकं त्वं कृत्य त्वमेवं माकृथा त्वयेदं कृतमित्येवमेकवचनात्तनुत्काश्रोच्चार
णेन निर्भर्त्स्य विप्रं वा ज्यायांसमसमं कनीयांसं वा सक्रोधहुंकृत्य मा मैवं मा कृथा इत्येवमाक्षिप्य जल्पवि
तंडाभ्यां जयफलाभ्यां विप्रं निर्जित्य कंठे वा वाससा मदुस्पर्शेनापि बध्वा क्षिप्रं प्रपादप्रणिपातादिना प्रसाद्य क्षो

धस्यात्रपित्वादिनमुपवसेदनश्नन्कृत्स्नंवासरंवसेत्॥यत्तुयमेनोक्तं॥दारेनब्राह्मणंजित्वाप्रायश्चित्तविधि
त्समा॥त्रिरात्रोपोषितःस्नात्वाप्रणिपत्यप्रसादयेदितितदभ्यासविषयं॥किंच॥विप्रदंडोद्यमेकृच्छ्रस्तुति।
कृच्छ्रोनिपातने॥कृच्छ्रातिकृच्छ्रोसृक्पातेकृच्छ्रोभ्यंतरशोणिते॥विप्रजिघांसयादंडोद्यमेकृच्छ्रःश्रुदिहेतुः॥
निपातनेताडनेअतिकृच्छ्रः॥असृक्पातेरुधिरस्रावेतुपुनःकृच्छ्रातिकृच्छ्रः॥अभ्यंतरशोणितेपिकृच्छ्रः॥
बृहस्पतिनाप्यत्रविशेषउक्तः॥काष्ठादिनाताडयित्वात्वग्भेदेकृच्छ्रमाचरेत्॥अस्थिभेदेतिकृच्छ्रःस्यात्स
र्वस्वंगकर्त्तनइति॥पादप्रहारेतुयमआह॥पादेनब्राह्मणंहत्वाप्रायश्चित्तविधित्सयाद्दिवसोपोषि
तःस्नात्वाप्रणिपत्यप्रसादयेदिति॥मनुनात्वन्यानिप्रकीर्णकप्रायश्चित्तानिप्रदर्शितानि॥विनाद्भिरप्सुवा
प्यार्तःशारीरंसन्निषेव्यतु॥सचैलोबहिराप्लुत्यगामालभ्यविशुध्यतीति॥विनाद्भिरिसमेननिहितास्वप्सि राम०
सर्वः॥शारीरंमूत्रपुरीषादि॥इदमकामविषयं॥कामतस्तु॥आपद्गतोविनातोयंशरीरंयोनिषेवते॥त १९८

काहंक्षपणंकृत्वासचैलंस्नानमाचरेदितियमोक्तंवेदितव्यं॥यत्तुसुमंतुनोक्तं॥अप्सुगोवामेहतस्त्रप्रकृच्छ्र
तिमितितदनार्त्तविषयमभ्यासविषयंवा॥नित्यश्रौतादिकर्मलोपेतुमनुराह॥वेदोदितानांनित्यानांक
र्मणांसमतिक्रमे॥स्नातकव्रतलोपेचप्रायश्चित्तमभोजनमिति॥श्रौतेषुदर्शपौर्णमासादिकर्मसुस्मा
र्त्तेषुचनित्यहोमादिषुःप्रतिपदोक्तंप्रायश्चित्तैरुपवासस्यसमुच्चयः॥स्नातकव्रतानिनग्नोलंमल
वद्वासोभवेच्चविभवेसतीतिएवमादीनिप्रागुक्तानि॥स्नातकव्रतमधिकृत्यकतुनाप्युक्तं॥सतेषामाचार
णामेकैकस्यव्यतिक्रमेगायत्र्यष्टशतंजप्यंकृत्वापूतोभवेदिति॥पंचमहायज्ञाकरणेतुबृहस्पतिराह॥
अनिर्वर्त्यमहायज्ञान्योभुंक्तेप्रसहंगृही॥अनातुरःसतिधनेकृच्छ्रार्धेनसशुध्यति॥आहिताग्निरुपस्थानं
नकुर्याद्यस्तुकर्मणि॥ऋतौतुनगच्छेद्भार्यांवासोपिकृच्छ्रार्धमाचरेदिति॥द्वितीयादिभार्यापरमंतुदेवलआ
ह॥सतांद्वितीयांयोभार्यांदहेद्वैतानिकाग्निभिः॥जीवंत्यांप्रथमायांतुसुरापानसमंहितदिति॥स्वभार्यां

१९९ भिशंसेनतुयमआह॥स्वभार्यांतुयदाक्रोधादगम्येतिनरोवदेत्॥प्राजापत्यंचरेद्विप्रःक्षत्रियोदिवसा
न्नव॥षड्रात्रंतुचरेद्वैश्यस्त्रिरात्रंशूद्रआचरेदिति॥अस्नानभोजनादौहारीतआह॥वहनकमंडलुं
रिक्तयस्नातोश्वभोश्वजनं॥अहोरात्रेणशुद्धिस्यादिनजप्येनचैवहीति॥एकपंक्त्युपविष्टानांस्नेहादि
नांवैषम्येनदौयमआह॥नपंक्त्यांविषमंदद्यान्नयाचेन्नदापयेत्॥प्राजापत्येनकृच्छ्रेणमुच्यतेकर्म
णस्ततः॥नदीसंक्रमहंतुश्चकन्याविघ्नकरस्यच॥समेविषमकर्तुश्चनिष्कृतिर्नविधीयते॥त्रयाणा
मपिचैतेषांप्रत्यापत्तिंतुमार्गतांभैक्ष्यलब्धेनचान्नेनद्विजश्चान्द्रायणंचरेदिति॥संक्रमणउदकावत
रणमार्गः॥समोविषमकर्त्तादत्तांशे॥इंद्रधनुर्दर्शनादौऋष्यशृंगआह॥इंद्रचापंपलाशाग्निंयद्य
न्यस्यप्रदर्शयेत्॥प्रायश्चित्तमहोरात्रंधनुर्दंडश्चदक्षिणेति॥पतितादिसंभाषणेतुगौतमआह॥ राम॰
नम्लेच्छाशुच्यधार्मिकैःसहसंभाषेतसंभाष्यपुण्यकृतोमनसाध्यायेद्ब्राह्मणेनसहवासंभाषेतातस्मा १९९

न्नधनलाभबाधेदृष्टयग्वर्योलीति॥भार्यान्नधनानांलाभस्यबाधेविघ्नकरणेप्रत्येकंसंवत्सरंप्राकृतंब्रह्म
चर्यं॥तथाब्रह्मसूत्रंविनामूत्रोत्सर्गादौस्मृत्यंतरेप्रायश्चित्तमुक्तं॥विनायज्ञोपवीतेनयदुच्छिष्टोभवेद्दि
जः॥प्रायश्चित्तमहोरात्रंगायत्र्यष्टशतंतुवा॥तत्रऊर्ध्वोच्छिष्टेउपवासःअधरोच्छिष्टेभक्ष्योदकपानेषु
गायत्रीजपइतिव्यवस्था॥अकामतस्तुपिबतोमेहतश्चैवभुंजतोऽनुपवीतिनः॥प्राणायामत्रिकंष
ड्नक्तंचचितयंक्रमादितिस्मृत्यंतरोक्तंद्रष्टव्यं॥भुक्त्वाशौचार्थमाचमनमकृत्वोत्थानेतु॥यद्युच्छिष्टस
नाचांतोभुक्तवानासनात्ततः॥सद्यःस्नानंप्रकुर्वीतनान्यथाप्रयतोभवेदितिस्मृत्यंतरोक्तंद्रष्टव्यं॥
चौरोत्सर्गादौवसिष्ठआह॥ ॥दंडोत्सर्गेराजैकरात्रमुपवसेत्त्रिरात्रंपुरोहितः॥कृच्छ्रमदंड्यदंडनेपु
रोहितस्त्रिरात्रंराजा॥कुनखीश्यावदंतश्चकृच्छ्रंद्वादशरात्रंचरित्वोद्धरेयातामिति॥दंतान्नखांश्चस्वभि
प्रेतं॥ ॥स्तेनंपतितादिपंक्तिभोजनेतुमार्कंडेयआह॥अपांक्तेयस्यपःपंक्तौकश्चिद्भुंक्तेद्विजोत्तमः॥अहो

२०० रात्रोषितोभुक्त्वापंचगव्येनशुध्यतीति।नीलीविषयेत्वापस्तंबआह॥नीलीरक्तंयदावस्त्रंब्राह्मणोंगे
षुधारयेत्॥अहोरात्रोषितोभुक्त्वापंचगव्येनशुध्यति॥रोमकूपैर्यदागच्छेद्रसोनील्यास्तुकस्यचित्
त्रिवर्णेषुचसामान्यंतप्तकृच्छ्रंविशोधनं॥पालनंविक्रयश्चैवतद्वृत्त्यातूपजीवनं॥पतनंतुभवेद्विप्र
त्रिभिःकृच्छ्रैर्व्यपोहतीति॥नीलीदारुयदाभिंद्याद्ब्राह्मणस्यशरीरतः।शोणितंदृश्यतेयत्रद्विज
श्चांद्रायणंचरेत्॥स्त्रीणांक्रीडार्थसंभोगेशयनीयेनदुष्यतीति॥भृगुणाप्युक्तं॥स्त्रीधृताशनेनी
लीब्राह्मणस्यनदुष्यतीति॥नृपस्यहर्षेवेश्यपर्ववर्जेविधारणमिति॥तथावस्त्रविशेषेप्रति
प्रसवः॥कंबलपट्टसूत्रेचनीलीरागोनदुष्यतीतिमनुस्मरणात्॥ब्रह्मतरुनिर्मितखट्वारोहणे
तुशंखआह॥अभ्यासेशयनंपानमासनंपादुकेतथाद्विजःपलाशवृक्षस्यत्रिरात्रंतुव्रतीभवेत्॥ गम०
क्षत्रियस्तुरणेदृष्ट्वाप्राणपरायणः॥संवत्सरंव्रतंकुर्याच्छित्वावृक्षंफलप्रदं॥द्वौविप्रौब्राह्म २००

णश्चाग्नीवादंपतीगोद्विजोत्तमौ॥अंतरेणयदागच्छेत्कृच्छ्रंसांतपनंचरेत्॥होमकालेतथादोहेस्वाध्या
येदारसंग्रहे॥अंतरेणयदागच्छेद्द्विजश्चांद्रायणंचरेत्॥इति॥दोहेसाग्न्याप्यागमस्ते॥एतच्चाभ्या
सविषयं॥मद्धिंद्रादिस्वाध्यायिरिष्टदर्शनादौशंखआह॥दुःस्वप्नाद्यरिष्टदर्शनादौघृतंहिरण्यंचदद्या
दिति॥ ॥क्वचिद्देशविशेषगमनेपिदेवलआह॥ ॥सिंधुसौवीरसौराष्ट्रांस्तथाप्रत्यंतवासिनः॥
अंगवंगकलिंगांश्चगत्वासंस्कारमर्हतीति॥एतच्चतीर्थयात्राव्यतिरेकेणद्रष्टव्यं॥यमेनाप्यु
क्तं॥प्रस्यादित्यंनमेदेहंनपश्येदात्मनःशकृत्॥दृष्ट्वासूर्यंनिरीक्षेतवाब्राह्मणंगामथापिवेति॥शं
खआह॥पादप्रतापनंकृत्वाकृत्वावह्निमधस्तथा॥कुशैःप्रमृज्यपादौतुदिनमेकंव्रतीभवेदिति॥
क्षत्रियाद्युपसंग्रहणेहारीतआह॥क्षत्रियाद्यभिवादनेहोरात्रमुपवासोवैश्याभिवादनेद्विरात्रंशू
द्राभिवादनेत्रिरात्रमुपवासइति॥तथाशय्यारूढपादुकोपानद्दारोहितयाच्छिष्टांधकारस्थश्चा

२०१ दूक्तजपदेवपूजादिरताद्यभिवादने त्रिरात्रमुपवासः स्यादस्यत्र निमंत्रितेनान्यत्र त्रिरात्रमिति॥ समित्पु
ष्पादिहस्तस्याभिवादने प्येतदेव॥ समित्पुष्पकुशोदाज्यमृदन्नाक्षतपाणिकं॥ जपं होमं च कुर्वाणं
नाभिवादयेत वै द्विजमित्यापस्तंबेपि जपादिभिः समभिव्याहारात्॥ अभिवादकस्यापिदमेव प्रायश्चित्तं
॥ नोदकुंभहस्तोभिवादयेत न भैक्ष्यं चरन्न पुष्पान्यहस्तो नाशुचिर्न जपन्न देवपितृकार्यं कुर्वन्न
शयान इति॥ तस्यापि शंखे प्रतिषेधात् एवमन्यान्यपि वचांसि स्मृत्यंतरस्थान्वेष्याणि ग्रंथगौरवभ
यान्नालिख्यंते॥ इति प्रकीर्णकप्रायश्चित्तप्रकरणं॥ निमित्तानामानंत्यात्प्रत्येकं प्रायश्चित्तस्य
वक्तुमशक्यत्वात्सामान्यतउपदिष्टानुपदिष्टविषये प्रायश्चित्तजातं वक्ष्यमाणं वा तद्देशविशेषज्ञा
नार्थमाह॥ देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः॥ प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः॥ राम०
यदुक्तं प्रायश्चित्तजातं वक्ष्यमाणं वा तद्देशादिकमपेक्ष्य यथा कर्तुः प्राणविच्छित्तिर्न भवति तथा वि २०१

षयविशेषः॥ इतरथा प्रधाननिवृत्तिप्रसंगात्॥ यथा वक्ष्यति वायुभक्षो दिवा तिष्ठन् रात्रिं नीत्वाप्सु सूर्यद
क् इति॥ तत्र यदि हिमवद्गिरिनिकटवर्तिनामुदवास उपदिश्यते तथा तेनाकुलितेन शिशिरादिकाले त
दा प्राणवियोगो भवेदिति तद्देशकालपरिहारेणोदवासः कल्पनीयः॥ तथा वयोविशेषादपि यदा नव
तिवार्षिकादेरपूर्णद्वादशवार्षिकस्य वा द्वादशवार्षिकं प्रायश्चित्तमुपदिश्यते तदा प्राणविपद्येत त्रि
ति ततोल्पवयस्केन प्रायश्चित्तं कल्प्यं॥ अत एव स्मृत्यंतरे क्वचिदर्द्धं क्वचित्पाद इति वृद्धादिषु प्रायश्चि
त्तस्य ह्रासो विहितः॥ तस्य प्राक्प्रपंचितं॥ तथा धनदानतपश्चरणादिशक्त्यपेक्षया च॥ न हि निर्ध
नस्य पात्रे धनं वा पर्याप्तमित्याद्युपपद्यते॥ तथा द्विजः पित्रादिवोपराकादिकं॥ नापि स्त्रीशूद्रादेर्ज
पादिकं॥ अत एव गजादीनां दानं दातुमशक्नुवता दानं दातुं चरेत्कृच्छ्रमेकैकस्य विशुद्धय इत्युक्तं॥
तथा प्रायश्चित्तार्हमहंतिस्त्रियो रोगिणश्चेति तपस्यशक्तस्य स्मृत्यंतरे प्रायश्चित्तह्रासोभिहितः॥

DR. BHAU DAJI MEMORIAL

२०२ तथापंचमहापातकादिरूपेणसमस्तपापस्यप्रत्ययशहृदभ्यासादिरूपेणवावेक्ष्यपलत:कालधर्मेणलयपर्यालो
चनयाप्रायश्चित्तंकल्पनीयं॥तत्रकामतोयद्विहितंतदेवकामकृतेद्विगुणं॥कामतोभ्यासेचतुर्गुणमित्ये
वंस्मृत्यंतरानुसारेणकल्पनीयं॥तथा॥महापापोपपापाभ्यांयोभिशंसेन्मृषापरं॥अब्भक्षोमासमासी
तैस्मृक्तंतत्रमहापापोपपापयोस्तुल्यप्रायश्चित्तस्यायुक्तत्वात्पापापेक्षयोपपातकेमासिकव्रतस्यह्रासः
कल्पनीयः॥यत्रचहसितंजंभितास्फारनादि॥नाकस्मात्कुर्यात्तथानोदन्वतोभसिस्नायान्नचरमश्वादिकर्त्रेये
त॥अंतर्वत्न्याः पतिः कुर्वन्नप्रजाभवतिध्रुवमित्यादौप्रायश्चित्तंनोपदिष्टंतत्रापिदेशाद्यपेक्षयाप्रायश्चि
त्तंकल्प्यं॥ननुनकिंचिदपिनिमित्तजातमनुक्तनिष्कृतिकमुपलभ्यते॥प्राणायामशतंकार्यंसर्वपापापनुत्त
ये॥उपपातकजातानामनादिष्टस्यचैवही॥तिअनुक्तनिष्कृतिष्वपिप्रायश्चित्तस्यवक्ष्यमाणत्वात्॥गौतमेना रा०म०
प्येतान्योवनादेशेविकल्पेनक्रियेरन्नित्येकादशद्यः प्रतिपादिताः॥उच्यते॥सत्यमस्त्येवसामान्यतःप्रायश्चि २०२

त्तोपदेशस्तथापिसर्वत्रदेशकालादीनामपेक्षित्वादस्त्येवकल्पनावसरः॥नचहसितादिषुसर्वत्रप्राणायाम
शतंयुक्तंनिमित्तस्यालघुत्वात्॥अतःपापापेक्षयाह्रासःकल्पनीयःप्रायश्चित्तांतरंवा॥ननुकथंपापस्यल
घुत्वं।येनप्रायश्चित्तस्यह्रासकल्पनास्यात्॥नचप्रायश्चित्ताल्पत्वादितिवाच्यं॥अनुक्तनिष्कृतित्वादेव॥स
त्यं॥किंत्वर्थवादसंकीर्तनादद्बुद्धिपूर्वाबुद्धिपूर्वानुबंधाद्यपेक्षयाचसुबोधएवदोषस्यगुरुलघुभावः॥तथादं
डह्रासवृद्ध्याद्यपेक्षयाचप्रायश्चित्तगुरुलघुभावः॥यथाब्राह्मणावगोरणेहोमजातिविषयेप्राजापत्या
दिकमुक्तं॥तत्रयदानुलोम्येनप्रातिलोम्येनप्रातिलोम्येनाऽवगोरणादिक्रियतेयदाचमूर्धावसिक्तादिभिःत
दाउंदस्यतारतम्यदर्शनाद्दोषाल्पत्वमहत्वावगमात्प्रायश्चित्तस्यापिगुरुलघुभावःकल्पनीयःदर्शितश्चदंड
स्यगुरुलघुभावः॥प्रतिलोमापवादेषुद्विगुणारमाइत्यादिना॥ ॥एवंमहापातकादिभिःपतितस्यप्रायश्चि
त्तमुक्तं॥यस्त्वोद्धत्यादेतन्नचिकीर्षतितस्यकिंकार्यमित्यतआह॥दासीकुंभंवहिर्ग्रामान्निनयेरन्स्वबांधवाः॥

पतितस्यबहिःकुर्युःसर्वकार्येषुचैवतं॥जीवतएवपतितायस्वज्ञातयोबांधवाःपितृमातृपक्षास्तेसर्वेसन्नि
पत्यदासीप्रेष्यातयासपिंडादिप्रेषितयानीतमपांपूर्णंघटंग्रामाद्बहिर्निनयेयुः॥एतच्चतुर्थ्यादिरिक्ता
तिथिष्वह्नःपंचमेभागेगुर्वादिसन्निधौकार्यं॥पतितस्योदककार्यंसपिंडैर्बांधवैःसह॥निंदितेहनि
निसायाह्नेज्ञात्यृत्विग्गुरुसन्निधावितिमनुस्मरणात्॥अथवादास्येवसपिंडादिप्रयुक्तानिनयेत्॥य
थाहमनुः॥दासीघटमपांपूर्णंपर्यस्येत्प्रेतवत्पदा॥अहोरात्रमुपासीरन्नाशौचंबांधवैःसहेति॥प्रेत
वदितिदक्षिणामुखापसव्ययोःप्रास्यर्थं॥एतच्चनिनयनमुदकपिंडदानादिप्रेतक्रियोत्तरकालंद्रष्टव्यं॥त
स्यविद्यागुरुयोनिसंबद्धात्सन्निपात्यसर्वाण्युदकादीनिप्रेतकर्माणिकुर्युः॥पात्रंचास्यविपर्यस्येत्॥दासः
कर्मकरोथवावकारात्पात्रमानीयदासीघटात्पूरयित्वादक्षिणामुखःपदाविपर्यस्येत्॥उदकेनमुदकंकरोमी
तिनामग्राहंतेसर्वेत्वालभेरन्प्राचीनावीतिनोमुक्तशिखाविद्यागुरवोयोनिसंबंधाश्चवीक्षेरन्नपउपस्पृश्य

ग्रामंप्रविशेयुरितिगौतमस्मरणात्॥अयंचसागोयदिबंधुभिःप्रेर्यमाणोपिप्रायश्चित्तंनकरोतितदाद्रष्टव्यः
तस्यगुरोर्बांधवानांराज्ञश्चसमक्षंदोषानभिभाष्यपुनःपुनराचारंलभस्वेति॥सयद्येवमप्यनवस्थितमतिः
स्यात्ततोस्यपात्रंविपर्यस्येदितिशंखस्मरणात्॥ततस्तल्लब्धोदकंपतितं॥सर्वकार्येषुसंभाषणसहासना
दिषुबहिःकुर्युःवर्जयेयुः॥तथाचमनुः॥निवर्तेरंश्चतस्मात्तुसंभाषणसहासने॥दायाद्यस्यप्रदानंचयात्रा
मेवचलौकिकीमिति यदिस्नेहादिनासंभाषणंकरोतितदाप्रायश्चित्तंकार्यं॥अतऊर्ध्वंतेनसंभाष्यतिष्ठेदे
करात्रंजपन्सावित्रीमज्ञानपूर्वंचत्रिरात्रमिति॥यदातुबंधुत्यागादन्यथावाजातवैराग्यःप्रायश्चित्तंकृतं
तदाकिंकार्यमित्यतआह॥चरितव्रतआयातेनिनयेरन्नवंघटं॥जुगुप्सेरन्नवाप्येनंसंवसेयुश्चसर्वशः॥कृ
तप्रायश्चित्तेबंधुसमीपंपुनरायातेतत्सपिंडादयस्तेनसहितानवमनुपहतंघटमुदकपूर्णंनिनयेयुः॥एत
च्चनिनयनंपुण्यह्रदादिस्नानोत्तरकालंद्रष्टव्यं॥प्रायश्चित्तेतुचरितेपूर्णकुंभमपांनवं॥तेनैवसार्धंप्रास्य

येयुः॥स्नात्वापुण्यंजलाशयइति॥गौतमेनतुविशेषउक्तः॥यस्तुप्रायश्चित्तेनशुध्येत्तस्मिन्शुद्धेशातकुंभम
यंपात्रंपुण्यतमाद्ध्रदात्पूरयित्वास्रवंतीभ्योवाततएनमपउपस्पर्शयेयुरथास्मैतत्पात्रंदद्युस्तत्प्रतिगृह्यजपे
च्छांताद्यौः॥शांतापृथिवीशांतंशिवमंतरिक्षंयोरोचनस्तमिहगृह्णामीत्येतैर्यजुर्भिः।पावमानीभिस्तरत्समंदीभिः
कूष्मांडैश्चाज्यंजुहुयाद्धिरण्यंब्राह्मणायदद्याद्गांवाचार्यायांयस्यतुप्राणांतिकंप्रायश्चित्तंसमृतःशुध्येत्॥ए
तदेवंशांत्युदकंसर्वेषूपपातकेष्वितिततएनंकृतप्रायश्चित्तंनैवकुत्सयेयुः॥तथासर्वकार्येषुक्रयविक्रया
दिषुतेनसहसंव्यवहरेयुः॥ ॥पूर्वोक्तस्यपतितपरित्यागादिविधेरतिदेशमाह॥पतितानानामेषएव
विधिःस्त्रीणांप्रकीर्तितः॥वासोगृहांतिकेदेयमन्नंवासःसरक्षणं॥यएवपुरुषाणांपरित्यागेपिंडोदकदा
नादिविधिःकृतप्रायश्चित्तानांचपरिग्रहविधिःसएवस्त्रीणामपिपतितानांवेदितव्यः॥इयांस्तुविशेषः ग्रम०
॥पतिताभ्योपिताभ्यःकृतोदकादिकर्मभ्योवासस्तृणपर्णमयंकुटीगृहकंप्रधानगृहसमीपेदेयं तथाप्रा २०४

णधारणमात्रमन्नंमलिनंचवस्त्रंपुनःपुरुषांतरोपभोगनिवारणसहितंसम्यक्क्षारंदेयं॥ननुकाःपतिताः २०४
यासामयंपरित्यागविधिरित्यतआह॥नीचाभिगमनंगर्भपातनंभर्तृहिंसनं॥विशेषपतनीयानिस्त्री
णामेतान्यपिध्रुवं॥हीनवर्णगमनंगर्भपातनंब्राह्मणाअपिभर्तुर्ब्राह्मणस्यापिहिंसनमित्येतानिस्त्री
णामसाधारणानिपतननिमित्तानि॥अपिशब्दात्पुरुषस्ययानिपतननिमित्तानिमहापातकानिपातका
नुपातकान्यपातकानिचोपपातकानितान्यपिस्त्रीणांध्रुवंनिश्चितंपतनकारणानिभवंति॥अतएव
शौनकः॥पुरुषस्ययानिपतननिमित्तानिस्त्रीणामपितान्येव॥ब्राह्मणीहीनवर्णसेवायामधिकंपततीं
ति॥यत्तुवसिष्ठेन॥त्रीणिस्त्रियाःपातकानिलोकेधर्मविदोविदुः॥भर्तृवधोभ्रूणहत्यास्वस्यगर्भस्यपातन
मिति॥भ्रूणहत्याग्रहणंकृतंतद्दृष्टांतार्थं॥नपुनरितरेषांमहापातकादीनांपतनहेतुत्वनिरासार्थं॥यदपि
तेनैव॥चतस्रस्तुपरित्याज्याःशिष्यगागुरुगाचया॥पतिघ्नीचविशेषेणजुंगितोपगताचयेति॥चतस्र

णामेवपरित्यागइत्युक्तं॥तस्यापितासांप्रायश्चित्तमचिकीर्षन्तीनांमध्येचतसृणामेवशिष्यगादीनांचैला
न्नगृहवासादिजीवनहेतुत्वाद्युद्देशेनत्यागंकुर्यान्नान्यासामित्यभिप्रायः॥अतश्चान्यासांपतितानांप्रायश्चि
त्तमकुर्वतीनामपिवासोगृहान्तिकेदेयमित्यादिकर्त्तव्यमित्यवगम्यते॥जुगुप्सेरन्नचाप्येनांसंवसेयुरित्यस्या
पवादमाह॥शरणागतबालस्त्रीहिंसकान्संविशेन्नतु॥चीर्णव्रतानपिसदाकृतघ्नसहितानिमान्॥शरणा
दिगतादिव्यापादकारिणःकृतघ्नसहितान्प्रायश्चित्तेनक्षीणदोषानपिनसंव्यवहरेदितिवाचनिकोयंप्र
तिषेधः॥किमितिवचनंनकुर्यान्नवचनस्यातिभारोस्ति॥अतश्चयद्यपिव्यभिचारिस्त्रीवधेअल्पीयएवप्राय
श्चित्तंतथापिवाचनिकोयंसंव्यवहारनिषेधः॥ ॥एवंप्रसंगेनस्त्रीषुविशेषमभिधायप्रकृतएवचरित
व्रतविधौविशेषमाह॥यद्देपवर्जितेजातिमध्यस्थोयवसंगवां॥प्रदद्यात्प्रथमंगोभिःसत्कृतस्यहिसत्क्रियांघ राम०
देपवर्जितेकृद्राद्रुद्रसपर्णेकुंभेऽवनिनीतेसोचरितःव्रतसपिंडादिमध्यस्थोगोभ्योयवसंप्रदद्यात्॥ता २०५

भिःप्रथमंसत्कृतस्यपूजितस्यपश्चात्ज्ञात्यादिभिःपूजाकार्या॥गोभिश्चतस्यसत्कारस्तद्दत्तंयवसनंग्र
हीपुःनर्हिपुनःप्रायश्चित्तंसमनुभिष्टेत॥यथाहहारीतः॥स्वशिरसायवसमादायगोभ्योदद्याद्यदिताः
प्रतिगृह्णीयुरथैनंप्रवर्त्तयेयुरितरथानेत्यभिप्रेतं॥महापातकादिपंचविधेपिदोषगणेप्रातिस्विकव्र
तसंदोहमभिधायाधुनासकलव्रतसाधारणधर्मानाह॥विख्यातदोषःकुर्वीतपर्षदोनुमतंव्रतं॥य
द्दोषोयावत्कर्तृसंपाद्यस्ततोन्यैर्विख्यातोदोषोयस्यासौपर्षदुपदिष्टंव्रतंकुर्यात्॥यद्यपिस्वयंसकल
शास्त्रार्थविचारचतुरस्तथापिपर्षत्समीपमुपगम्यतयासहविचार्यतदनुमतंवकुर्यात्॥तदुपगमेचां
गिरसाविशेषउक्तः॥कृतेनिःसंशयेपापेनभुंजीतानुपस्थितः॥भुंजानोवर्द्धयेत्पापंयावन्नाख्यातिप
र्षदि॥सचैलंवाग्यतःस्नात्वाक्लिन्नवासाःसमाहितः॥पर्षदानुमतस्तत्त्वंसर्वंविख्यापयेन्नरः॥व्रतयादा
यभ्युयोऽपितथास्नात्वाव्रतंचरेदिति॥विख्यापनंचपर्षद्दक्षिणादानानंतरंकार्यं॥यथाहपराशरः॥पा

यंप्रख्यापयेन्नरः॥व्रतमादायभूयोऽपितथास्नात्वाव्रतंचरेदिति॥सापीदत्वाधेनुंतथावृषमिति॥एतच्चो
पपातकविषयं॥महापातकादिष्वधिकंकल्प्यं॥यत्तूक्तं॥तस्माद्द्विजःप्राप्तपापःसकृदाप्लुत्यवारिणिवि
ख्याप्यपापंवक्तव्यःकिंचिद्दत्वाव्रतंचरेदिति॥तत्स्वकीलैकविषयं॥पर्षत्स्वरूपंचमनुनादर्शितं त्रैविद्यो
हैतुकस्तर्कीनैरुक्तोधर्मपाठकः॥त्रयश्चाश्रमिणःपूर्वेपर्षदेषादशावरा॥हैतुकोमीमांसार्थतत्त्वज्ञः
तर्कीन्यायशास्त्रकुशलः॥तथान्यदपिपर्षद्द्वयंतेनैवदर्शितं॥ऋग्वेदीचयजुर्वेदीसामवेदविदेवच॥त्र्य
वरापर्षद्विज्ञेयाधर्मसंशयनिर्णये॥तथा॥एकोपिवेदविद्धर्मंयंव्यवस्येत्समाहितः॥सज्ञेयःपरमो
धर्मोनाज्ञानामुदितोयुतैः॥आसांचपर्षदांसंभवापेक्षयाव्यवस्था महापातकाद्यपेक्षयावा॥यत्तुस्व
संतरेभिहितं॥पातकेषुशतंपर्षत्स्यात्सहस्रंमहदादिषुउपपातकेषुपंचाशत्स्वल्पेस्वल्पातथाभवेदिति॥त राम०
दपिमहापातकादिदोषानुसारेणपर्षदोगुरुलघुभावप्रतिपादनपरंनपुनःसंख्यानियमार्थं॥प्रवादि २०५

DR. BHAU DAJI MEMORIAL

महास्मृतिविरोधप्रसंगात्॥तथादेवलेनचात्रविशेषोदर्शितः॥स्वयंतुब्राह्मणाकुर्युरल्पदोषेषुनिष्कृतिं॥
राज्ञाचब्राह्मणैश्चैवमहत्सुसुपरिक्षितामिति॥तथाचपर्षदाअवश्यंव्रतमुपदेष्टव्यं॥आर्त्तानांमार्गमाणा
नांप्रायश्चित्तानियेद्विजाः॥जानंतोनप्रयच्छंतितेयांतिसमतांतुतैरित्यंगिरःस्मरणात्॥तथाचपर्षदाज्ञात्वा
व्रतमुपदेष्टव्यं॥अज्ञात्वाधर्मशास्त्राणिप्रायश्चित्तंददातियः॥प्रायश्चित्तीभवेत्पूतःकिल्बिषंपर्षदंव्रजेदि
तिबृहद्वशिष्ठस्मरणात्॥क्षत्रियादीनांतुकृतैनसांधर्मोपदेशेविशेषोगिरसादर्शितः॥न्यायतोब्राह्मणः
क्षिप्रंक्षत्रियादेःकृतैनसः॥अंतराब्राह्मणंकृत्वाव्रतंसर्वंसमादिशेत्॥तथाशूद्रंसमासाद्यसदाधर्मपुरः
सरं प्रायश्चित्तंप्रदातव्यंजपहोमविवर्जितमिति॥तत्रचयागाद्यनुष्ठानशीलानांजपादिकंवाच्यमितरेषांतु
नयः॥कर्मनिष्ठास्तपोनिष्ठाकदाचित्पापमागताः॥जपहोमादिकंतेभ्योविशेषेणप्रदीयते॥येनामधारका
द्विप्रामूर्खाधनविवर्जिताः॥कृच्छ्रचांद्रायणादीनितेभ्योदद्याद्विशेषतइति॥इतिप्रकाशप्रायश्चित्तप्रकरणं॥ चतुर्विंशतिमतात्॥
२धनिनादक्षिणादेयायथाचद्विहितातुया॥एवंनरस्त्रियोघ्येयाप्रायश्चित्तानिदापयेत्॥

व्याख्यामाख्यातदुरितशातनींव्रतसंततिं॥रहःकृताघसंदोहहारिणींव्याहरन्मुनिः॥तत्रप्रथमंसकल
रहस्यव्रतसाधारणंधर्ममाह॥अनभिख्यातदोषस्तुरहस्यंव्रतमाचरेत्॥कर्त्तव्यतिरिक्तैरनभिख्यातोदोषो
यस्यासौरहस्यमप्रकाशंप्रायश्चित्तमनुतिष्ठेत॥अतश्चस्त्रीसंभोगादौतस्याअपिकारकत्वात्तद्दितरैरवि
ज्ञातदोषस्यरहस्यंव्रतमितिमंतव्यं॥तत्रयदिकश्चित्स्वयंधर्मशास्त्रकुशलस्तदापरस्मिन्नविभाव्यस्वनिमि
त्तोचितंप्रायश्चित्तमनुतिष्ठेत्॥यस्तुस्वयमनभिज्ञोसौकेनचिद्द्विजोब्रह्महत्यादिकंकृतंतत्रकिंरहस्यप्रा
यश्चित्तमितिअन्यव्याजेनावगम्यरहोव्रतमनुतिष्ठेत्॥अतएवचस्त्रीशूद्रयोरप्यनेनैवमार्गेणरहस्यव्रत
ज्ञानसिद्धेरधिकारसिद्धिः॥नचवाच्यं॥रहस्यव्रतानांजपादिप्रधानत्वाद्वेदयोःस्त्रीशूद्रयोस्तदनुप
पत्तेरनधिकारइति॥यतोनैकांततोरहस्यव्रतानांजपादिप्रधानत्वं॥दानादेरप्युपदेशात्॥गौतमोक्त राम०
प्राणायामादिसंभवाच्च॥इतरेषामपिमंत्रदैवतर्षिछंदःपरिज्ञानमात्रमेवाधिकारोपयोगित्वंनान्यविष २०७

४

यं॥नहितत्रागनिर्माणदोज्योतिष्टोमादिविषयिणीप्रतिपत्तिरुपयुज्यते॥दैवतादिपरिज्ञानंत्ववश्यमपे
क्षणीयं॥अविदित्वाऋषिंछंदोदैवतंयोगमेवच॥योध्यापयेज्जपेद्वापिपापीयाञ्जायतेतुसइतिव्यास
स्मरणात्॥अत्राप्याहारविशेषानुक्तौपयःप्रभृतयः॥कालविशेषानुक्तौसंवत्सरादयोदेशविशे
षानुक्तौशिलोच्चयादयोगौतमाद्यभिहितप्रकाशप्रायश्चित्तव्रतेष्वन्वेषणीयाः॥ ॥एवंसकलरहस्य
साधारणंधर्ममभिधायप्रायश्चित्तंचब्रह्महत्यादिक्रमेणैवरहस्यप्रायश्चित्तान्याह॥त्रिरात्रोपोषितो
जप्त्वाब्रह्महात्वघमर्षणं॥अंतर्जलेविशुध्येतगांदत्त्वाचपयस्विनीं॥त्रिरात्रमुपोषितोषितोंतर्जलेअ
घमर्षणेनर्षिणोदृष्टंसूक्तमघमर्षणमृतंचसत्यंचेतित्र्यृचमानुष्टुभंभाववृत्तदेवताकंजप्त्वात्रिरात्रांते
पयस्विनींगांदत्त्वाब्रह्महाशुध्यति॥जपश्चांतर्जलेमग्नेनत्रिरावर्त्तनीयः॥यथाहसुमंतुः॥देवद्विजगुरु
हंताप्सुनिमग्नोघमर्षणसूक्तंत्रिरावर्त्तयेन्मातरंभगिनींचगत्वामातृष्वसारंपितृष्वसारंस्नुषांसर्

यंप्रख्यापयेन्नरः॥व्रतमादायभूयोऽपितथास्नात्वाव्रतंचरेदिति॥सापीदत्वाधेनुंतथावृषमिति॥एतच्चो
पपातकविषयं॥महापातकादिष्वधिकंकल्प्यं॥यत्तूक्तं॥तस्माद्द्विजःप्राप्तपापःसकृदाप्लुत्यवारिणिवि
ख्याप्यपापंवक्तव्यःकिंचिद्दत्वाव्रतंचरेदिति॥तत्प्रकीर्णकविषयं॥पर्षत्स्वरूपंचमनुनादर्शितं त्रैविद्यो
हैतुकस्तर्कीनैरुक्तोधर्मपाठकः॥त्रयश्चाश्रमिणःपूर्वेपर्षदेषादशावरा॥हैतुकोमीमांसार्थतत्त्वज्ञः
तर्कीन्यायशास्त्रकुशलः॥तथान्यदपिपर्षद्द्वयंतेनैवदर्शितं॥ऋगवेदीचयजुर्वेदीसामवेदविदेवच॥त्र्य
वरापर्षद्विज्ञेयाधर्मसंशयनिर्णये॥तथा॥एकोपिवेदविद्धर्मंयंव्यवस्येत्समाहितः॥सज्ञेयःपरमो
धर्मोनाज्ञानामुदितोयुतैः॥आसांचपर्षदांसंभवापेक्षयाव्यवस्था महापातकाद्यपेक्षयावा॥यत्तुस्मृ
त्यंतरेभिहितं॥पातकेषुशतंपर्षत्सहस्रंमहदादिषु॥उपपापेषुपंचाशत्स्वल्पेस्वल्पातथाभवेदिति॥त रा.म.
दपिमहापातकादिदोषानुसारेणपर्षदोगुरुलघुभावप्रतिपादनपरंनपुनःसंख्यानियमार्थं॥प्रवादि २०५

DR. BHAU DAJI MEMORIAL

महास्मृतिविरोधप्रसंगात्॥तथादेवलेनचात्रविशेषोदर्शितः॥स्वयंतुब्राह्मणाकुर्युरल्पदोषेषुनिष्कृतिं॥
राजाचब्राह्मणाश्चैवमहत्सुसुपरीक्षितामिति॥तथाचपर्षदाप्रवश्यंव्रतमुपदेष्टव्यं॥आर्त्तानांमार्गमाणा
नांप्रायश्चित्तानियेद्विजाः॥जानंतोनप्रयच्छंतितेयांतिसमतांतुतैरित्यंगिरःस्मरणात्॥तथाचपर्षदाज्ञात्वा
व्रतमुपदेष्टव्यं॥अज्ञात्वाधर्मशास्त्राणिप्रायश्चित्तंददातियः॥प्रायश्चित्तीभवेत्पूतःकिल्बिषंपर्षदंव्रजेदि
तिवृद्धशिष्टस्मरणात्॥क्षत्रियादीनांतुकृतैनसांधर्मोपदेशेविशेषोंगिरसादर्शितः॥न्यायतोब्राह्मणः
क्षिप्रंक्षत्रियादेःकृतैनसः॥अंतराब्राह्मणंकृत्वाव्रतंसर्वंसमादिशेत्॥तथाशूद्रंसमासाद्यसदाधर्मपुरः
सरं॥प्रायश्चित्तंप्रदातव्यंजपहोमविवर्जितमिति॥तत्रचयागाद्यनुष्ठानशीलानांजपादिकंवाच्यमितरेषांतु
नयः॥कर्मनिष्ठास्तपोनिष्ठाकदाचित्पापमागताः॥जपहोमादिकंतेभ्योविशेषेणप्रदीयते॥येनामधारका
द्विप्रामूर्खाधनविवर्जिताः॥कृच्छ्रचांद्रायणादीनितेभ्योदद्याद्विशेषतइति॥इतिप्रकाशप्रायश्चित्तप्रकरणं॥ चतुर्विंशतिमतात्॥
२धनिनादक्षिणादेयायथावद्विहितातुया॥एवंनरविशेषेणप्रायश्चित्तानिदापयेत्॥

व्याख्याप्याख्यातदुरितशातनीं व्रतसंततिं॥रहःकृताघसंदोहहारिणीं व्याहरन्मुनिः॥तत्रप्रथमंसकल
रहस्यव्रतसाधारणंधर्म्ममाह॥अनभिख्यातदोषस्तुरहस्यंव्रतमाचरेत्॥कर्त्तव्यतिरिक्तैरनभिख्यातोदोषो
यस्यासौरहस्यमप्रकाशंप्रायश्चित्तमनुतिष्ठेत्॥अतश्चरस्त्रीसंभोगादौतस्याअपिकारकत्वात्तदितरैरवि
ज्ञानदोषस्यरहस्यंव्रतमितिमंतव्यं॥तत्रयदिकश्चित्स्वयंधर्म्मशास्त्रकुशलस्तदापरस्मिन्नविभाव्यस्वनिमि
त्तोचितंप्रायश्चित्तमनुतिष्ठेत्॥यस्तुस्वयमनभिज्ञोसौकेनचिद्दोब्रह्महत्यादिकंकृतंतत्रकिंरहस्यप्रा
यश्चित्तमितिसन्यव्याजेनावगम्यरहोव्रतमनुतिष्ठेत्॥अतएवचस्त्रीशूद्रयोरथमुनैवमार्गेणरहस्यव्रत
ज्ञानसिद्धेरधिकारसिद्धिः॥नचवाच्यं॥रहस्यव्रतानांजयादिप्रधानत्वाद्वेदयोग्यस्त्रीशूद्रयोस्तदनुप
पपत्तेरनधिकारइति॥यतोनैकांततोरहस्यव्रतानांजयादिप्रधानत्वं॥दानादेरप्युपदेशात्॥गौतमोक्त रा०म०
प्राणायामादिसंभवाच्च॥इतरेषामपिमंत्रदैवतर्षिछंदःपरिज्ञानमात्रमेवाधिकारोपयोगित्वेनान्यविष २०७

४

यं॥नहितडागनिर्माणेज्योतिष्टोमादिविषयिणीप्रतिपत्तिरुपयुज्यते॥देवतादिपरिज्ञानंतत्त्वरूपमपे
क्षणीयं॥अविदित्वाऋषिंछंदोदैवतंयोगमेवच॥योध्यापयेज्जपेद्वापिपापीयाञ्जायतेतुसइतिव्यास
स्मरणात्॥अत्राप्याहारविशेषानुक्तौपयःप्रभृतयः॥कालविशेषानुक्तौसंवत्सरादयोदेशविशे
षानुक्तौशिलोच्चयादयोगौतमाद्यभिहितप्रकाशप्रायश्चित्तव्रतेष्वन्वेषणीयाः॥ ॥एवंसकलरहस्य
साधारणंधर्ममभिधायप्रायश्चित्तंचब्रह्महत्यादिक्रमेणैवरहस्यप्रायश्चित्तान्याह॥त्रिरात्रोपोषितो
जप्त्वाब्रह्महात्वघमर्षणं॥अंतर्जलेविशुध्येतगांदत्वाचपयस्विनीं॥त्रिरात्रमुपोषितोषितोंतर्जलेअ
घमर्षणेनर्षिणोदृष्टंसूक्तमघमर्षणमृतंचसत्यंचेतित्र्यृचमानुष्टुभंभाववृत्तदेवताकंजप्त्वात्रिरात्रांते
पयस्विनींगांदत्वाब्रह्महाशुध्यति॥जपश्चांतर्जलेमग्नेनत्रिरावर्त्तनीयः॥यथाहसुमंतुः॥देवद्विजगुरु
हंताप्सुनिमग्नोघमर्षणंसकृत्त्रिरावर्त्तयेन्मातरंभगिनींचगत्वामातृष्वसारंपितृष्वसारंस्नुषांसखीं

चअन्यद्वाऽगम्यागमनं कृत्वाघमर्षणमेवांतर्जले त्रिरावर्त्य तद्देवं तस्मात्पूतो भवतीति॥ एतच्चाकामका-
रविषयं॥ यत्तु मनुनोक्तं॥ सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश॥ अपि भ्रूणहणं मासात्पुनंत्यहरहः
कृताः॥ इति॥ तदप्यस्मिन्नेव गोदानाशक्तस्यावेदितव्यं॥ यत्तु गौतमेन त्रिंशद्रात्रं व्रतमुक्तं॥ यदेतद
ब्रह्महत्यासुरापानसुवर्णस्तेयगुरुतल्पेषु प्राणायामैः श्रांतोऽघमर्षणं जपेदिति तदकामतः सकृद्धर्म
विषयं॥ यत्तु बौधायनेनोक्तं॥ ग्रामात्प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य स्नातः शुचिवासा उदकांते स्थं-
डिलमुपलिप्य सकृत्क्लिन्नवासाः सकृत्पूतेन पाणिनादित्याभिमुखोऽघमर्षणं स्वाध्यायमधीयीत प्रातः शतं
मध्याह्ने शतं अपराह्णे शतमपरिमितं वोदितेषु नक्षत्रेषु प्रसृतियावकं प्राश्नीयात्। ज्ञानकृतेभ्योऽज्ञान
कृतेभ्यश्चोपपातकेभ्यः सप्तरात्रात्प्रमुच्यते द्वादशरात्रान्महापातकेभ्यो ब्रह्महत्यां सुवर्णस्तेयं सुरा राम०
पानमिति वर्जयित्वैकविंशतिरात्रेण तान्यपि तरतीति तत्कामकामकारविषयं॥ अकामतः श्रोत्रिया- २०८

चार्यसवनस्थवधविषयं वा॥ यत्तु मनुनोक्तं॥ अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहितां॥ मुच्यते पातकैः
सर्वैः पराकैः शोधितस्त्रिभिरिति॥ तत्कामतः श्रोत्रियादिवधविषयं॥ मितरत्र कामतोऽभ्यासविषयं वा
यत्तु वृद्धविष्णुनोक्तं॥ ब्रह्महत्यां कृत्वा ग्रामात्प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य प्रभूतेंधनेनाग्निं प्रज्वाल्य
अघमर्षणेनाष्टसहस्रमाहुतीर्जुहुयात्तत्रेतस्मात्पूतो भवतीति॥ तन्निर्गुणवधविषयं॥ अनुग्रहकविष-
यं वा॥ यत्तु मनुनोक्तं॥ त्र्यहं तूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः मुच्यते पातकैः सर्वैस्त्रिर्जप्त्वाघम-
र्षणमिति॥ तद्गुणवतो हंतुर्निर्गुणवधविषयं॥ प्रयोजकानुमंतृवधविषयं वा॥ यत्तु हारीतेनोक्तं॥
महापातकातिपातकपातकोपपातकानामेकतमे संनिपाते वाघमर्षणमेव त्रिर्जपेदिति तन्निमित्त
कर्तृविषयं॥ एवमन्यान्यपि स्मृतिवाक्यान्यन्विष्यैवमेव विषयेषु विभजनीयानि॥ ग्रंथगौरवभयान्न
लिख्यंते एतदेव व्रतजातं यागस्थक्षत्रियविट्घाते आत्रेय्यामाहिताग्निपत्न्यां गर्भे शापामविज्ञाते च ग

र्भेव्यापातिते तुर्योशान्सनमनुष्ठेयं॥प्रायश्चित्तान्तरमाह॥लोमभ्यः स्वाहेत्यथवा दिवसं मारुताशनः
॥जले स्थित्वाभिजुहुयाच्चत्वारिंशद्घृताहुतीः॥अथवोहोरात्रमुपोषितोरात्रावुदकावासं कृत्वा प्रातर्ज
लादुत्तीर्य लोमभ्यः स्वाहेत्यग्नो अष्टभिर्मंत्रैरेकैकेन पंच पंचाहुतय इत्येवं चत्वारिंशद्घृताहुतीर्जुहुया
त्॥इदं पूर्वोक्तसमानविषयं॥उद्दवा मत्कृशवा हत्यात्॥क्रमप्राप्तं सुरापानप्रायश्चित्तमाह॥ ॥
त्रिरात्रोपोषितो हुत्वा कूष्मांडीभिर्घृतं शुचिः॥सुरापः चत्वारिंशद्घृताहुतीरित्यनुवर्त्तते॥त्रिरात्रमुपो
षितः कूष्मांडीभिर्यद्देवा देवहेडनमित्यादिभिः कूष्मांडदृष्टाभिरष्टभिर्मंत्रलिंगदेवताभिश्चत्वारिंश
द्घृताहुतीर्हुत्वा शुचिर्भवेत्॥तथा बौधायनेनाप्युक्तं॥अथ कूष्मांडीर्जुहुयाद्यो पूत इव मन्येत यद्वार्ची
नमेनो भ्रूणहत्यायास्तस्मान्मुच्यते॥अयोनौ वा रेतः सिक्त्वान्यत्र स्वप्नादिति॥यत्तु मनुना॥मांसजयि
त्वा अपनः वाशिष्टंप्रतिमाहित्वं शुद्धवसश्च सुरापोपि विशुध्यतीति प अश्वत्थ हं षोडशाहुत्व अपनः

राम०
२०१

शोध्युचरद्घं॥प्रतिस्तोमेभिरुषसं वशिष्ठामहीत्रीलामवोस्त्विति॥तोनिंद्रं स्तरामेत्येतेषामन्यतमस्य ज
पउक्तः॥सत्त्रिरात्रोपवासकूष्मांडीहोमाशक्तस्य वेदितव्यः॥एतच्चाकामतः पैष्ट्याः सकृत्पाने गौडी
मोध्व्योः पानाद्वृत्तौ द्रष्टव्यं॥यस्तु मनुना॥मंत्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः॥सुगुर्व्वप्यप
हंत्येनो जप्त्वा वा नम इत्यृचमिति॥संवत्सरं प्रत्यहं देवकृतस्यैनम इत्यादिभिरष्टभिर्मंत्रैर्होमो नम इद्
ग्रंनम आविवासइत्यस्या ऋचो वा जप उक्तः॥सकामाकारविषयः॥यत्तु मनुः॥महापातकसंयु
क्तोनुगच्छेद्गाः समाहितः॥अभ्यस्याब्दं पावमानीर्भिक्षाहारो विशुध्यतीति तदभ्यासविषयं समुच्चित
महापातकविषयं वा॥सुवर्णस्तेयप्रायश्चित्तमाह॥ब्राह्मणः स्वर्णहारी तु रुद्रजापी जले स्थितः॥ब्राह्म
र्णस्वर्णहारी पुनस्त्रिरात्रोपोषितो जलमध्यस्थो नमस्ते रुद्र मन्यव इति शतरुद्रियजपयुक्तः शुध्य
ति॥शातातपेनाप्यत्र विशेष उक्तः॥मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा॥भस्मा च्छ

न्तो काश्यपशय्याशनस्थो रुद्राध्यायी मुच्यते सर्वपापैरिति ॥ जपश्चैकादशकृत्वः कार्यः ॥ एकादशगुणान्वा
पि रुद्रानावर्त्य धर्मवित् ॥ महापापैरपि स्पृष्टो मुच्यते नात्र संशय । इत्यत्रिस्मरणात् ॥ यत्तु मनुना ॥ सकृज्ज
प्त्वास्य वामीयं शिवसंकल्पमेव च ॥ सुवर्णमपहृत्यापि क्षणाद्भवति निर्मल इति द्विपंचाशदृकसंख्याकस्या
स्य वामस्य पलितस्य होतुरिति सूक्तस्य ॥ तथा ॥ यज्जाग्रतो दूरमुदैति दैवमिति शिवसंकल्पदृष्टस्य षड
चस्य वा सकृज्जप उक्तः ॥ सोऽसंततनिर्गुणस्वामिकस्वर्णहरणे गुणवतोपहर्तुर्द्रष्टव्यः ॥ सुवर्णन्यूनपरि
माणविषयो नुग्राहकविषयो वा प्रयोजकविषयो वा ॥ आवृत्तौ तु महापातकसंयुक्तोऽनुगच्छेदित्यादि
कं मनुनोक्तं द्रष्टव्यं ॥ क्रमप्राप्तं गुरुतल्पप्रायश्चित्तमाह ॥ सहस्रशीर्षजापी तु मुच्यते गुरुतल्पगः ॥ गौ
र्देया कर्मणोऽस्यांते पृथगेभिः पयस्विनी ॥ गुरुतल्पगः सहस्रशीर्षेति षोडशर्चं सूक्तं नारायणदृष्टं राम०
पुरुषदैवसमानुष्टुभत्रिष्टुबंतं तज्जपंस्तस्मात्पापान्मुच्यते ॥ सहस्रशीर्षजापीति ताच्छील्यप्रत्ययादा २१

वृत्तिर्गम्यते ॥ अत एव यमेनोक्तं ॥ पौरुषं सूक्तमावर्त्य मुच्यते सर्वकिल्बिषैरिति ॥ आवृत्तौ च संख्यापेक्षा
यामध्यस्तनश्लोकगताचत्वारिंशत्संख्या सन्निधीयते ॥ अत्रापि प्रागुक्तश्लोकगतं त्रिरात्रोपोषित
इति संबध्यते ॥ अत एव वृद्धविष्णुः ॥ त्रिरात्रोपोषितः पुरुषसूक्तजपहोमाभ्यां गुरुतल्पः शुध्येदि
ति ॥ एभिश्च सुरापसुवर्णस्तेयगुरुतल्पगैस्त्रिभिः पृथक्पृथगस्य त्रिरात्रव्रतस्यांते बहुक्षीरा गौर्देया
॥ इदमकामविषयं यत्तु मनुना ॥ हविष्यांतीयमभ्यस्य न तमंह इतीति च ॥ जप्त्वा च पौरुषं सूक्तं मु
च्यते गुरुतल्पग इति ॥ हविष्यांतमजरं स्वर्विदि ॥ न तमंहो दुरितं ॥ इति वा इति मे मनः सहस्रशीर्षेत्येते
षामन्यतमस्य मासं प्रसंह षोडशकृत्वो जप उक्तः ॥ सोऽप्यकामविषय एव ॥ कामतस्तु मंत्रैः शाकलहोमी
येरिति मनूक्तं द्रष्टव्यं ॥ यत्तु षट्त्रिंशन्मतेऽभिहितं ॥ महाव्याहृतिभिर्होमस्तिलैः कार्यो द्विजन्मना ॥ उप
पातकशुध्यर्थं सहस्रपरिसंख्यया ॥ महापातकसंयुक्तो लक्षहोमेन शुध्यतीति ॥ तदावृत्तिविषयं ॥

पनुयमेनोक्तं॥ जपेद्वाप्यमस्यवामीयंयावमानीरथापिवा॥ कुंतापंवालखिल्यांश्चनीवित्प्रैषान्वृषा
कपिं॥ होतॄन्नुध्यानसकृज्जप्त्वामुच्यतेसर्वपातकैरिति॥ तच्चाभिलाषिणीगमनविषयं॥ यानिपु
नर्गुरुतल्पादिरहस्यविषयाणितत्समानिवातिपातकानुपपातकपदाभिधेयानितेषुतुर्यांशतस्त्वनम
र्घानंचक्रमेणवेदितव्यं॥ पातकातिपातकोपपातकमहापातकानामेकतमसन्निपातेवाअघ
मर्षणमेवत्रिर्जपेदितिहारीतोक्तंवाद्रष्टव्यं॥ महापातकसंसर्गिणश्चसततस्यैवव्रतंकुर्यादितिव
चनाद्येनसंसर्गस्तदीयमेवप्रायश्चित्तंवेदितव्यं॥ नववाच्यं॥ अध्यापनादिसंसर्गस्यानेककर्तृसं
पाद्यत्वाद्रहस्यत्वानुपपत्तिरिति॥ यतः॥ संसर्गस्यानेककर्तृत्वेंव्यतिरिक्तस्तदीयपापपरिज्ञानमात्रे
णैवरहस्यत्वं मनोभवस्यैवरहस्यप्रायश्चित्तं॥ एवमतिपातकादिसंसर्गिणातदीयमेवप्राय राम०
श्चित्तंवेदितव्यं॥ इतिमहापातकरहस्यप्रायश्चित्तप्रकरणं॥ ॥ क्रमप्राप्तमुपपातकप्रायश्चि २११

त्तमाह॥ प्राणायामशतं कार्यंसर्वपापानुत्तये॥ उपपातकजातानामनादिष्टस्यचैवहि॥ गोवधा
दिपंचाशदुपपातकजातानामनादिष्टरहस्यव्रतानांचजातिभ्रंशकरादीनांअनुत्तये प्राणायाम
शतंकार्यं॥ तथासर्वेषांमहापातकादीनांप्रकीर्णकांतानामथमनुत्तयेप्राणायामाःकार्याः॥ त
त्रमहापातकेषुचतुःशतमतिपातकेषुत्रिशतमनुपातकेषुद्विशतमितिसंख्यावृद्धिःक
ल्पनीया॥ प्रकाशप्रायश्चित्तेषुमहापातकतुरीयांशस्योपपातकेषुविधानदर्शनात्॥ प्रकीर्ण
केषुह्रासःकल्प्यः॥ अतएवोक्तंयमेन॥ दशप्रणवसंयुक्तैःप्राणायामैश्चतुःशतैः॥ मुच्यतेब्रह्मह
त्यायाः किंपुनःशेषपातकैरिति॥ बोधायनेनचात्रविशेषउक्तः॥ अपिवाकृचक्षुःश्रोत्रत्वक्घ्रा
णमनोव्यतिक्रमेषुत्रिभिःप्राणायामैःशुध्यति॥ शूद्रस्त्रीगमनान्नभोजनेपृथक्पृथक्सप्ताहंस
प्तसप्तप्राणायामान्धारयेत्॥ अभक्ष्याभोज्यामेध्यप्राशनेतथाचापण्यविक्रयेषुमधुमांसघृततैल

लाक्षालवणरसान्नवर्जेषुयज्ञान्यद्रव्येष्वेवंयुक्तस्याद्दशप्राणायामान्धारयेत्॥अथपातकोपपातकव
र्जेयज्ञान्यद्रव्येष्वेवमुक्तंस्यादर्धमासंद्वादशप्राणायामानधारयेत्॥द्रथपातकपतनीयवर्जे॥यज्ञान्यद्र
व्येष्वेवमुक्तस्यात्मासंद्वादशप्राणायामान्धारयेत्॥अथपातकवर्ज्जेयज्ञान्यद्रव्येष्वेवमुक्तंस्याद्द्वैमासं
द्वादशप्राणायामान्धारयेत्॥अथपातकेषुसंवत्सरंद्वादशप्राणायामान्धारयेदिति॥तत्रवाक्चक्षु
रित्यादिप्राणायामत्रयंप्रकीर्णकाभिप्रायं॥शूद्रस्त्रीगमनान्नभोजनेत्यादिनोक्ताएकोनंपञ्चाशत्
प्राणायामाउपपातकविशेषाभिप्रायेण॥तथाअभक्ष्याभोज्येत्यादिनोक्ताश्चतुश्चत्वारिंशदधिकश
तप्राणायामाअप्युपपातकविशेषाभिप्रायाएव॥अथपातकोपपातकवर्जमित्यादिनोक्ताःसाशीति
शतप्राणायामाजातिभ्रंशकरणाभिप्रायाः॥अथपातकपतनीयवर्ज्जमित्यादिनोक्ताःषष्ट्याधिक रा.म०
शतत्रयंप्राणायामागोवधाद्युपपातकाभिप्रायाः॥अथपातकवर्जमित्यादिनोक्ताःषष्ट्यधिक २१२

DR. BHAU DAJI MEMORIAL
डाक्टरभाऊदाजीइत्यस्यस्मारकम्

शतसहितद्विसहस्रसंख्याकाःप्राणायामाअतिपामाअतिपातकानुपातकाभिप्रायाः॥अथपातके
ष्वित्यादिनोक्ताविंशत्यधिकशतत्रययुक्ताश्चतुःसहस्रप्राणायामाःमहापातकविषयाः॥इदंचाभ
क्ष्याभोज्येत्यादिनोक्तंप्रायश्चित्तपंचकमसंताभ्यासविषयं॥समुच्चितविषयंवा॥यत्तुमनुनोक्तं॥एन
सांस्थूलसूक्ष्माणांचिकीर्षन्नपनोदनं अवेत्यृचंजपेदब्दंयत्किंचिदमितीतीचेत्यब्दंयावत्समसहमर्थात
राविरुद्धेषुकालेषुअवतेहेलोवरुणेत्यस्यात्रचोयत्किंचेदमित्यस्याश्चजपउक्तःसोप्यभ्यासविषयः
॥ ॥उपपातकसामान्यप्राप्तस्यप्राणायामशतस्यापवादमाह॥ ॥ओंकाराभिष्टुतंसोमसलिलंपाव
नंपिबेत्॥कृत्वातुरेतोविण्मूत्रप्राशनंहिद्विजोत्तमः॥द्विजोविण्मूत्ररेतःप्राशनंकृत्वासोमलतारसमों
कारेणाभिमंत्रितंशुद्धिसाधनंपिबेत्॥एतच्चाकामकारविषयं॥कामतस्तुसुमंतूक्तं॥रेतोविण्मूत्रप्राश
नंकृत्वालशुनपलाण्डुगृंजनकुंभीकादीनामन्येषांचाभक्ष्याणांभक्षणंकृत्वाहंसग्रामकुक्कुटश्च॥सृगाला

दिमांसभक्षणंकृत्वाततःकंठमात्रमुदकमवतीर्यशुद्धवतीभिःप्राणायामत्रयंकृत्वामहाव्याहृतिभिरुरोगमु
दकपीत्वानदोषतस्मात्सूतामवतीति॥मनुनापिसमसविधाभक्ष्यभक्षणेप्रायश्चित्तांतरमुक्तं॥प्रतिगृह्याप्रति
ग्राह्यंभुक्त्वाचान्नविगर्हितं॥जपंस्तरत्समंदीयंपूयतेमानवस्त्र्यहादिति॥अप्रतिग्राह्यंविषशस्त्रसुरादिप
तितादिद्रव्यंच॥यदित्वप्सुरेतोमूत्रादिशारीरंमलंविसृजतितदापितेनैवोक्तं॥अप्रशस्तंतुकृत्वाप्सुमास
मासीतभैक्ष्यभुगिति॥ ॥अज्ञानकृतेप्रकीर्णकेमानसेचोपपातकेप्रायश्चित्तमाह॥ ॥निशायांवादि
वावापियदज्ञानकृतंभवेत॥त्रैकाल्यसंध्याकरणात्तत्सर्वंविप्रणश्यति॥७॥रजन्यांवासरेवायत्प्रमा
दात्कृतंप्रकीर्णकंमानसंवाचिकंचोपपातकंतत्सर्वंसायंप्रातर्मध्याह्नादिकालत्रयविहितंनित्यसंध्योपा
सनयाप्रणश्यति॥तथाचमनुः॥यदुह्नाकुरुतेपापंकर्मणामनसागिरा॥आसीनःपश्चिमांसंध्यांप्राणा राम०
यामैर्निहंतितदितिशातातपेनाप्युक्तं॥अनृतंमद्यगंधंचदिवामैथुनमेवच॥पुनातिवृषलान्नंचव ३१७

हिःसंध्याउपासिताइति॥ ॥सकलमहापातकादिसाधारणान्यपवित्रमंत्रानाह॥शुक्रियारण्यकजपो
गायत्र्याश्चविशेषतः॥सर्वपापहराह्येतेरुद्रैकादशिनीतथा॥८॥शुक्रियंनामारण्यकविशेषोविश्वा
निदेवसवितरित्यादिवाजसनेयकेपठ्यते॥आरण्यकंच॥अचंवाचंप्रपद्येमनोयजुःप्रजपइत्यादित
त्रैवपठ्यते॥तयोर्जपःसकलमहापातकादिहरः॥तथागायत्र्याश्चमहापातकेषुलक्ष मतिपातका
नुपातकयोर्दशसहस्र मुपपातकेषुसहस्रं॥प्रकीर्णकेषुशतमित्येवंविशेषतोजपःसर्वपापहरः॥त
थाचगायत्रीमधिकृत्यश्लोकाःशंखेनोक्ताः॥शतजप्तातुसावित्रीसर्वपापप्रणाशिनी॥सहस्रजप्ताचम
हापातकेभ्यश्चमोचनी॥दशसाहस्रजापेनसर्वकल्मषनाशिनी॥लक्षंजप्तातुसादेवीमहापातकनाशि
नी॥सुवर्णस्तेयकृद्विप्रोब्रह्महागुरुतल्पगः॥सुरापश्चविशुध्यंतिलक्षजप्यान्नसंशयइति॥यत्तु॥च
तुर्विंशतिमतेप्युक्तं॥गायत्र्यास्तुजपन्कोटिंब्रह्महत्यांव्यपोहति॥लक्षाशीतिंजपेद्यस्तुसुरापानाद्विमुच्य

ते।।पुनातिहेमहर्त्तारंगायत्र्यालक्षसंमितिः।।गायत्र्यालक्षषष्टिंतुमुच्यतेगुरुतल्पगइति।।तत्रतुतद्गुरुत्वा
त्मकाशविषयं।।तथारुद्रैकादशिनी।।एकादशानांरुद्रानुवाकानांसमाहारःरुद्रैकादशिनी।।साच
विशेषतोजप्तासर्वपापहरा।।एकादशगुणान्वापिरुद्रानावर्त्यधर्मवित्।।महद्भ्यःसहपापेभ्योमुच्यते
नात्रसंशयइतिमहापातकेषुएकादशगुणावृत्तिदर्शनादुपपातकादिषुचचतुर्भागादिह्रासक
ल्पना।।चशब्दोघमर्षणादिसमुच्चयार्थः।।यथाहवशिष्ठः।।सर्ववेदपवित्राणिवक्ष्याम्यहमतःपरं
।।येषांजपैश्चहोमैश्चपूयंतेनात्रसंशयः।।आघमर्षणंदेवकृतंशुद्धवत्यस्तरत्समाः।।कूष्मांडःपा
वमान्यश्चदुर्गासावित्र्यतथैवच।।अभिषंगाःपदस्तोभाःसामानिव्याहृतीस्तथा।।भारुंडानिचसामा
निगायत्रंरैवतंतथा।।पुरुषव्रतंचभासंचतथादेवव्रतानिच।।अब्लिंगंबार्हस्पत्यंवाक्सूक्तंसमध्वृच राम०
स्तथा।।शतरुद्रियाथर्वशिरस्त्रिसुपर्णंमहाव्रतं।।गोसूक्तंचाश्वसूक्तंचइंद्रशुद्धेचसामनी।।त्रीण्याज्य २१४

दोहानिरथंतरंच।।अग्नेर्व्रतंवामदेव्यंबृहच्च।।एतानिगीतानिपुनंतिजंतून्जातिस्मरत्वंलभतेयदीच्छेदि
ति।।किंच।।यत्रयत्रचसंकीर्णमात्मानंमन्यतेद्विजः।।तत्रतत्रतिलैर्होमोगायत्र्यावाचनंतथा।।यत्रय
त्रब्रह्मवधादेस्तज्जन्यकल्मषजोतेनात्मानंसंकीर्णमभिभूतंद्विजोमन्यते।।तत्रतत्रगायत्र्यातिलैर्हो
मःकार्यः।।तत्रमहापातकेषुलक्षसंख्ययाहोमःकार्यः।।गायत्र्यालक्षहोमेनमुच्यतेसर्वपातकैरि
तियमस्मरणात्।।अतिपातकादिषुपादह्रासःकल्पनीयः।।तथातिलैर्वाहनंकार्यं।।तथाचरहस्याधि
कारेवसिष्ठआह।।वैशाख्यांपौर्णमास्यांतुब्राह्मणान्सप्तपंचवा।।क्षौद्रयुक्तैस्तिलैःकृष्णैर्वाचयेदथवे
तरैः।।प्रीयतांधर्मराजेतियद्वामनसिवर्त्तते।।यावज्जन्मकृतंपापंतत्क्षणादेवनश्यति।।तथाअनिय
तकालमपिदानंतेनैवोक्तं।।कृष्णाजिनेतिलान्कृत्वाहिरण्यंमधुसर्पिषा।।ददातियस्तुविप्रायसर्वंतर
तिदुष्कृतंइति।।तथाम्भासेनाप्युक्तं।।तिलधेनुंतुयोदद्यात्संयतात्माद्विजन्मने।।ब्रह्महत्यादिभिःपापै

मुच्यतेनात्रसंशयइति॥एवमादिदानतातंरहस्यकांडोक्तमविदुषाजातीनांस्त्रीशूद्रयोश्चवेदितव्यं॥यत्तु
यमेनोक्तं॥तिलान्ददातियःप्रातस्तिलान्स्पृशतिखादति॥तिलैःस्नातितिलाञ्जुहोत्ससर्वंतरतिदुष्कृतं
॥तथाद्वेचाष्टम्यौतुमासस्यचतुर्दश्यौतथैवच॥अमावास्यापौर्णमासीसप्तमीद्वादशीद्वयं॥संवत्सरमभु
ञ्जानःसततंविजितेन्द्रियःमुच्यतेपातकैःसर्वैःस्वर्गलोकंचगच्छतीति॥यच्चत्रिणोक्तं॥सीरघोरेष
पर्यंकेस्वाषास्पसंविशोद्धतिरिः॥निशास्वजतिकार्त्तिक्यांतपोसंपूजयेद्धरिं॥ब्रह्महत्यादिकंपापंक्षिप्रमो
वव्यपोहतीत्येवमादितत्सर्वंविरहितंकामाकामसकृदभ्यासदिषयतयाव्यवस्थापनीयं॥किंच॥वेदाभ्या
सरतंक्षांतंमहायज्ञक्रियापरं॥नस्पृशंतीहपापानिमहापातकजान्यपि॥वेदस्वीकरणंपूर्वंविचारोभ्यस २९५
नंजपः॥तद्दानंचैवशिष्येभ्योवेदाभ्यासोहिपंचधेति॥उक्तक्रमेणैववेदाभ्यासेनिरतंतितिक्षुयुक्तंमहायज्ञा राम०
नुष्ठाननिरतंमहापातकजान्यपिपापानिनस्पृशंति॥किमुतप्रकीर्णकजानिवाध्यानसजन्योपपातकानिवे

१२

सत्रतात्पर्यमपिशब्दाल्लक्ष्यते॥एतच्चाकामकारविषयं॥अतएववसिष्ठेनोक्तं॥यद्यकार्यशतंसाग्रंकृ
तंवेदश्चधार्यते॥सर्वंतत्तस्यवेदाग्निर्दहत्यग्निरिवेंधनमिति॥प्रकीर्णकाद्यभिप्रायेणाभिधायाभिहि
तं॥नवेदबलमाश्रित्यपापकर्मरतिर्भवेत्॥अज्ञानाच्चप्रमादाच्चदह्यतेकर्मनेतरदितिस्मरणात्॥किं
च॥वायुभक्षोदिवातिष्ठन्शर्वरींनीत्वाप्सुसूर्यदृक्॥जप्त्वासहस्रंगायत्र्याःशुद्धेद्ब्रह्मवधादृते॥सोपवासो
वासरमनुप्रविशन्नुषित्वासलिलेचसन्निशांनीत्वादिसोदयनंतरंसावित्र्याःसहस्रंजपित्वाब्रह्महत्याव्य
तिरिक्तसकलमहापातकादिपापजातान्मुच्यते॥अतश्चोपपातकादिष्वभ्यासेऽनेकदोषसमुच्चयेवा
वेदितव्यं॥विषमविषयसमीकरणस्यान्याय्यत्वात्॥अतएववृद्धवसिष्ठेनमहापातकोपपातकयोःकाल
विशेषेणव्रतविशेषउक्तः॥यथाह॥यवानांप्रसृतिमंजलिंवाश्रप्यमाणेषुतेषुवाऽभिमंत्रयेत्॥यवोसि
धान्यराजस्त्वंवारुणोमधुसंयुतः॥निर्णोदःसर्वपापानांपवित्रमृषिभिःस्मृतइति॥अनेनघृतयवाम

॥ माध० नारदः॥ प्रकाशाउक्तं यत्किंचिद्विंशोभागोरहस्यके॥ त्रिंशद्भागः षष्टिभागः कल्प्योजात्याद्यपेक्षया॥

धुयवाः पवित्रममृतं यवाः॥ सर्वं पुनंतु मे पापं वाङ्मनःकायसंभवमित्येनेन॥ अग्निकार्यं न कुर्वीत न तेन
भूतबलिं तथा॥ नार्घं न भिक्षां नातिथ्यं न चोच्छिष्टं परिसर्जेत् ये देवा मनोजाता मनोयुजः सुदक्षपितरस्तेन
ः पांतु ते नोवंतु तेभ्यो नमस्तेभ्यः स्वाहेत्यात्मनि जुहुयात्त्रिरात्रं॥ मेधाभिवृद्धये पापक्षयाय त्रिरात्रं ब्र
ह्महत्यादिषु द्वादशरात्रं पवित्रोसन्न श्वसेत् तद्दिग्वलंबनेनान्यान्यपि स्मृतिवचनानि विवेचनीयानि
॥ इति रहस्यपापप्रायश्चित्तप्रकरणं॥ विनिर्मुक्तं व्रतव्रातरूपभेदैर्भुक्तिमेते॥ कीदृशमिति संक्षेपाल्लक्ष
णं वक्ष्यते धुना॥ तत्र तावत्सकलप्रकारस्य व्रतांगभूतांश्च यमानाह॥ ब्रह्मचर्यं दया क्षांतिर्दानं सत्यम
कल्कता॥ अहिंसास्तेयमाधुर्ये दमश्चेति यमा दश॥ १॥ स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहात्
॥ नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमादताः॥ २॥ ब्रह्मचर्यं सकलेंद्रियसंयमः॥ उपस्थनिग्रहो लिंगनि राम०
ग्रहो गोवलीवर्दन्यायेन निर्दिष्टः॥ अकल्कता अकुटिलता॥ शेषाः प्रसिद्धाः॥ यस्तु नर्मनुनोक्तं॥ अहिं ११८

१३

सासत्यमक्रोधमार्जवं च समाचरेदिति॥ तद्व्येतेषामुपलक्षणं न परिगणनाय॥ अत्र चरयादीनां पुरु
षार्थतया प्राप्तानामपि पुनर्विधानं प्रायश्चित्तांगत्वार्थं कश्चिद्विशेषोप्यस्ति। यथाभिवाहादिष्वभ्यनुज्ञात
स्यायनृतवचनस्य निवृत्त्यर्थं सत्यविधानं॥ पुत्रशिष्यादिकमपि न ताडनीयमित्येवमर्थमहिंसाविधा
नमित्येवमादि॥ तत्र सांतपनाख्यं व्रतं॥ तावदाह गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं॥ जग्ध्वा परे
ह्युरुपवसेत्कृच्छ्रं सांतपनं चरन्॥ एवं प्रत्याहारांतरपरित्यागेन गोमूत्रादीनि गव्यानि पंच द्रव्याणि कुशो
दकसहितानि संयुज्य पीत्वा परेद्युरुपवसेदिति द्विरात्रिकः सांतपनः॥ कृच्छ्रः संपदनं चोत्तरश्लोके द्
यत्कविधानादवगम्यते॥ कृच्छ्र इति चान्वर्थसंज्ञेयं॥ तयोरुपत्वेन क्लेशसाध्यत्वात्॥ गोमूत्रादीनां परि
माणं वक्ष्यति॥ यदा पुनः एवं प्रत्युपोष्यापरेद्युः समंत्रकं संयुज्य समं चकमेव पंचगव्यं पीयते तदा ब्रह्म
कूर्च इत्याख्यायते॥ यथाह पराशरः॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं॥ निर्दिष्टं पंचगव्यं तु पवि

त्र्यंकायशोधनं॥गोमूत्रं तु सुवर्णाया: श्वेतायाश्चापि गोमयं॥पय: कांचनवर्णाया नीलायाश्च तथा दधि
॥घृतं च कृष्णवर्णाया: सर्वं कापिलमेव वा॥अलाभे सर्ववर्णानां पंचगव्येष्वयं विधि:॥गोमूत्रे माष
कास्त्वष्टौ गोमयस्य तु षोडश॥क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्तिता॥गोमूत्रवद्घृतस्योक्तं तद
र्धं तु कुशोदकं॥गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं॥आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि
तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकं॥पंचगव्यमृचा पूतं होमयेदग्निसन्निधौ॥सप्तपत्रास्तु
ये दर्भा अच्छिन्नाग्रा: शुचित्विष:॥एतैरुद्धृत्य होतव्यं पंचगव्यं यथाविधि॥इरावती॥इदं विष्णुर्मा
नस्तोके वशंवती॥एताभिश्चैव होतव्यं हुतशेषं पिबेद्द्विज:॥प्रणवेन समालोड्य प्रणवेनाभि
मंत्र्य च॥प्रणवेन समुद्धृत्य पिबेत्तु प्रणवेन तु॥मध्यमेन पलाशस्य पद्मपत्रेण वा पिबेत्॥स्वर्णपा राम०
त्रेण ताम्रेण ब्रह्मतीर्थेन वा पुन:॥यत्त्वगस्थिगतं पापं देहे तिष्ठति मानवे॥ब्रह्मकूर्चोपवासस्तु दह २७१

त्यग्निरिवेंधनमिति॥यच्चैतदेवमिश्रितं पंचगव्यं त्रिरात्रमभ्यस्यते॥तदा॥यतिसांतपनसंज्ञां ल
भते॥तदेव त्र्याहमभ्यस्तं यतिसांतपनं स्मृतमिति शंखस्मरणात्॥जाबालेन तु सप्ताहसाध्यं सां
तपनमुक्तं॥गोमूत्रं गोमयं क्षीरं दधि सर्पि: कुशोदकं॥एकैकं प्रत्यहं पीत्वा अहोरात्रमभोजनं॥कृ
च्छ्र: सांतपनो नाम सर्वपापप्रणाशन इति॥एतेषां गुरुलघुकृच्छ्राणां शक्त्याद्यपेक्षया व्यवस्था विज्ञे
या॥एवमुत्तरत्रापि व्यवस्था विज्ञेया॥महासांतपनाख्यं व्रतमाह॥पृथक्सांतपनद्रव्यै: षडह:
सोपवासक:॥सप्ताहेन तु कृच्छ्रोयं महासांतपन: स्मृत:॥सप्ताहेनावसितो महासांतपनाख्य: कृच्छ्रो
ज्ञेय:। कथमित्यपेक्षायामुक्तं॥पृथग्भूतै: षड्भिर्गोमूत्रादिभिरेकैकेनैकैकमहरतिवाहयेत्सप्तमं चो
पवासेनेति॥यमेन तु पंचदशाहसाध्यो महासांतपनोभिहित:। अहं पिबेत्तु गोमूत्रं त्र्यहं तु गोमयं
पिबेत्॥त्र्यहं दधि त्र्यहं क्षीरं त्र्यहं सर्पिस्तत: शुचि:॥महासांतपनं ह्येतत्सर्वपापप्रणाशनमिति॥जा

वालेनत्वेनत्वेकविंशतिरात्रनिर्वर्त्योमहासांतपनउक्तः॥षण्णामेकैकमेतेषांत्रिरात्रमुपयोजयेत्
॥ऋंहत्पवसेद्त्यंमहासांतपनंविदुरिति॥यदातुषण्णांसांतपनद्रव्याणामेकैकस्यत्र्यहमुपयोग
स्तदातिसांतपनं॥यथाहमनुः॥एतान्येवतथायेपान्येकैकंतुत्र्यहं॥अतिसांतपनंनामश्वपाकम
पिशोधयेदिति॥श्वपाकमपिशोधयेदित्यर्थवादः॥पर्णकृच्छ्रास्यंव्रतमाह॥ ॥पर्णोदुंवरराजीव
विल्वपत्रकुशोदकैः॥प्रत्येकंप्रत्यहंपीतैःपर्णकृच्छ्रउदाहृतः॥पलाशोदुंबरारविंदश्रीवृक्षपर्णाना
मेकैकनक्कथितमुदकंप्रत्यहंपिबेत्॥कुशोदकंचैकस्मिन्निति पंचाहसाध्यःपर्णकृच्छ्रःयदातुपर्णादी
नामेकोकृतानांक्वाथस्त्रिरात्रंतेपीयते॥तदापर्णकूर्चः॥यथाहयमः॥एतान्येवसमस्तानित्रिरात्रोपो
षितःशुचिः॥क्वाथयित्वापिबेदद्भिःपर्णकूर्चोभिधीयतइति॥यदातुविल्वादिफलादीनिप्रत्येकंक्वथिता रामo
निमासंपीयते॥तदाफलकृच्छ्रादिव्यपदेशलभते॥यथाहमार्कंडेयः॥फलैर्मासेनकथितःफलकृच्छ्रोम २७८

नीषिभिः॥श्रीकृच्छ्रःश्रीफलैःप्रोक्तःपद्माक्षैरपरःस्मृतः॥मासेनामलकैरेवंश्रीकृच्छ्रपरमंस्मृतं॥प
त्रैर्मतःपत्रकृच्छ्रःपुष्पैस्तत्कृच्छ्रउच्यते॥मूलकृच्छ्रःस्मृतोमूलैस्तोयकृच्छ्रोजलेनत्विति॥ ॥तप्तकृच्छ्र
व्रतमाह॥ ॥तप्तक्षीरघृतांबूनामेकैकंप्रत्यहंपिबेत्॥एकरात्रोपवासश्चतप्तकृच्छ्रउदाहृतः॥दुग्ध
सर्पिरुदकानांतप्तानामेकैकंप्रतिदिवसंप्राश्यपरेद्युरुपवसेत्॥एषदिवसचतुष्टयसंपाद्योमहात
प्तकृच्छ्रः॥एभिरेवसमस्तैःसोपवासद्विरात्रंसंपाद्यःसांतपनवत्तप्तकृच्छ्रः॥मनुनातुद्वादशरात्रंनि
र्वर्त्यमभिहितं॥तप्तकृच्छ्रंचरन्विप्रोजलक्षीरघृतानिलान्॥प्रतित्र्यहंपिबेदुष्णान्सकृत्स्नायीसमा
हितः॥क्षीरादिपरिमाणंतुपराशरेणोक्तंद्रष्टव्यं॥अपांपिबेत्तुत्रिपलंद्विपलंतुपयःपिबेत्॥पलमे
कंपिबेत्सर्पिस्त्रिरात्रंचोष्णमारुतमिति॥त्रिरात्रंचोष्णमारुपतमितित्रिरात्रस्यपूरणमुष्णोदकवाष्प
पिबेदित्यर्थः॥यदातुशीतंक्षीरादिपीयतेतदाशीतकृच्छ्रः॥त्र्यहंशीतंपिबेत्तोयंत्र्यहंशीतंपयःपिबेत्

॥अहंशीतंघृतंपीत्वावायुभक्षश्चरेत्त्र्यहमितियमस्मरणात्॥पादकृच्छ्रमाह॥एकभक्तेननक्तेनत
थैवायाचितेनच॥उपवासेनचैवायंपादकृच्छ्रःप्रकीर्तितः॥एकभक्तेनसकृद्भोजनेनदिवैव॥
नक्तेनेतिपृथगुपादानात्॥अतश्चदिवैवैकवारभोजनेनैवैकमहोरात्रमतिवाहयेदिति॥त
त्रदिवैवेतिरात्रिपर्युदासः॥एकवारमेवेतिद्विवारादिपर्युदासः॥भोजनेनैवेत्यभोजनपर्युदा
सः॥एतच्चकृच्छ्रादीनांव्रतरूपत्वात्पुरुषार्थभोजनपर्युदासेनकृच्छ्रांगभूतभोजनंविधीयते॥त
थाचापस्तंबः॥अहमनक्ताशीदिवाशीततस्त्र्यहंदिवानाशी॥नक्ताशीत्र्यहं॥त्र्यहमयाचितव्र
तइति॥अत्रचअनक्ताशीत्यनेनव्रतेविहितणिनिप्रत्ययेनक्तपर्युदासेनदिवाभोजननियमं
दर्शयति॥गौतमेनाप्येवमेवस्पष्टीकृतं॥हविष्यान्प्रातराशान्भुक्त्वातिस्रोरात्रीर्नाश्नीयादि रम॰
ति॥एवंनक्तभोजनविधावपि॥नविद्यतेयाचितंयस्मिन्भोजनेतदयाचितं॥तेनकालविशेषानु २९९

पादानात्दिवारात्रौवासकृदित्येवंतपोरूपत्वात्कृच्छ्राणांद्वितीयभोजनेनतदनुपपन्नं॥अयाचितमि
तिनकेवलंपरकीयान्नयाचननिषेधःअपितुस्वकीयमपिपरिचारकभार्यादिभ्योनयाचितव्यं॥प्रे
षणाध्येषणयोःसाधारणत्वात्याच्ञायाः॥अतःस्वगृहेपिभृत्यभार्यादयोनाज्ञप्ताएवयदिभोज
नमुपहरंति॥तर्हिभोक्तव्यंनान्यथा॥अमुनैवाभिप्रायेणोक्तंगौतमेन॥अथापरंत्र्यहंनकंचनया
चेतेति॥अत्रग्रासग्राससंख्यानियमःपराशरेणदर्शितः॥सायंतुद्वादशग्रासाःप्रातःपंचदश
स्मृताः॥चतुर्विंशतिरायाच्याःपरेनिरशनंस्मृतमिति॥आपस्तंबेनत्वन्यथोक्तं॥सायंद्वाविंशतिर्ग्रा
साःप्रातःषड्विंशतिःस्मृताः॥चतुर्विंशतिरयाच्याःपरेनिरशनास्त्रयः॥कुक्कुटांडप्रमाणस्तुयथावा
ऽस्यंविशेन्मुखमिति॥अनयोश्चपक्षयोःशक्त्यपेक्षयाविकल्पः॥आपस्तंबेनतुप्राजापत्यंचतुर्धावि
भज्यचतुरःपादकृच्छ्रान्कृत्वावर्णानुरूपेणव्यवस्थाकृता॥त्र्यहंनिरशनंपादःपादश्चायाचितंत्र्यहं॥सा

पंच्यहं तथा पादः पादः प्रातस्तथा पादः पादः प्रातस्तथा त्र्यहं ॥ प्रातः पादं चरेच्छूद्रः सायं वैश्यस्य दाप
येत् ॥ अयाचितं तु राजन्ये त्रिरात्रं ब्राह्मणे स्मृतमिति ॥ यद्वायाचितोपवासात्मकअहद्वयानुष्ठान
तद्वार्द्धकृच्छ्रः ॥ सायंप्रातिरिक्तापरत्र्यहत्रयानुष्ठानं पादोनमिति विज्ञेयं ॥ सायंप्रातर्विनार्द्धस्यासादि
नं नक्तवर्जितमिति तेनैवोक्तत्वात् ॥ अर्धकृच्छ्रस्य प्रकारांतरमपि तेनैव दर्शितं ॥ सायंप्रातरथैकै
कं दिनद्वयमयाचितम् ॥ दिनद्वयं वनाश्नीयात्कृच्छ्रार्धं तद्विधीयत इति ॥ ॥ प्राजेयसकृच्छ्रमाह ॥ ॥
यथाकथंचित्त्रिगुणः प्राजापत्योयमुच्यते ॥ अयमेव पादकृच्छ्रः यथाकथंचिद्दंडकलितवदावृत्तास्वस्था
नविवृद्ध्यावा तत्राप्यानुलोम्येन प्रातिलोम्येन वा तथा वक्ष्यमाणजपादियुक्तस्तद्रहितो वा त्रिरभ्यस्तः
प्राजापत्य इत्यभिधीयते ॥ तत्र दंडकलितवदावृत्तिपक्षो वसिष्ठेन दर्शितः ॥ अहः प्रातरहर्नक्तमहरे राम०
कमयाचितं ॥ अहः परकं तत्रैकमेवं चतुरहो ॥ अनुग्रहार्थं विप्राणां मनुर्धर्मभृतां वरः ॥ बालवृद्धा २२०

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

१८

तुरेष्वेवं शिशुकृच्छ्रमुवाच हेति ॥ आनुलोम्येन स्थानविवृद्धिपक्षस्तमनुना दर्शितः ॥ त्र्यहं प्रातस्त्र्यहं सायं
त्र्यहमद्यादयाचितं ॥ त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन् द्विज इति ॥ (प्रातिलोम्यावृत्तिपक्षस्तु वशिष्ठे
न दर्शितः ॥ त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितं ॥ अहे परं च नाश्नीयात्प्राजापत्यं चरन् द्विज इ
ति ॥) प्रातिलोम्यावृत्तिपक्षस्तु वशिष्ठेन दर्शितः प्रतिलोमं चरेयुस्ते कृच्छ्रं चांद्रायणोत्तरमिति ॥ जपा
दिरहितपक्षस्तु स्त्रीशूद्रविषयोंगिरसा दर्शितस्तस्माच्छूद्रः समासाद्य सदा धर्मपथे स्थितं ॥ प्रायश्चि
त्तं प्रदातव्यं जपहोमविवर्जितमिति ॥ जपादियुक्तपक्षस्तु परिशेष्याद्योग्यतया च त्रैवर्णिकविष
यः ॥ स च गौतमेन दर्शितः ॥ अथातः कृच्छ्रान्व्याख्यास्यामो हविष्यान्प्रातराशान्भुक्त्वा तिस्रो रात्रीना
श्नीयात् ॥ अथापरं त्र्यहं नक्तं भुंजीतानुसवनमुदकोपस्पर्शनमाथापरं त्र्यहं न कंचन याचेताथाप
रं त्र्यहमुपवसेत्तिष्ठेदहनि रात्रावासीत क्षिप्रकामः सत्यं वदेदनार्यैर्न संभाष्येत रौरवयौधाजये

भिसंप्रयुंजीतानुसवनमुदकोपस्पर्शनमापोहिष्ठेति तिसृभिः पवित्रवतीभिर्मार्जयीत हिरण्यवर्णा
ःशुचयः पावका इति अष्टाभिरथोदकतर्पणं नमोहमाय मोहमाय मंहमाय धन्वते तापसाय ॥ पुन
र्वसवे नमो मौञ्ज्यायोर्म्याय वसुविदाय ॥ सर्वविदाय ॥ नमः ॥ पाराय सुपाराय महापाराय पारदाय
पारविष्णवे ॥ नमो रुद्राय पशुपतये महादेवाय त्र्यंबकायैकचरायाधिपतये हराय शर्वायेशाना
योग्राय वज्रिणे घृणिने कपर्दिने नमः ॥ सूर्यादित्याय नमो नीलग्रीवाय शितिकंठाय नमः क
पिंजलाय नमो ज्येष्ठाय श्रेष्ठाय वृद्धायेंद्राय हरिकेशायोर्ध्वरेतसे नमः सत्याय पावकाय पावकव
र्णाय कामरूपिणे नमो दीप्ताय दीप्तरूपिणे नमस्तीक्ष्णाय तीक्ष्णरूपिणे नमः सौम्याय सुपुरुषाय
मध्यमपुरुषायोत्तमपुरुषाय ब्रह्मचारिणे नमश्चंद्रललाटाय कृत्तिवाससे नम इत्येतावद्देवादित्यो राम०
पस्थानमेतस्य एवाज्याहुतयो द्वादशरात्रस्यांते चरुं श्रपयित्वा एताभ्यो देवताभ्यो जुहुयादग्नये स्वा २३१

१८

हा सोमाय ः ॥ अग्नीषोमाभ्यामिंद्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे प्रजापतये अग्नये स्विष्टकृत इत्यंते
ब्राह्मणभोजनमिति तत्र तिष्ठेदहनि रात्रावासीतेति क्षिप्रकाम इत्यस्यायमर्थः ॥ यस्तु महतोप्येनसः
क्षिप्रमेकेनैव कृच्छ्रेण मुच्येयमित्येवं कामयते ॥ असावहनि कर्माविरुद्धेषु कालेषु तिष्ठेद्रात्रावा
सीत ॥ एवं रौरवयौधाजयसामजपो नमो हमायेत्यादिभिस्तर्पणमादित्योपस्थानादिकं चरुश्रवणा
दिकं च योगीश्वराद्यनुक्तं क्षिप्रकामः कुर्वीत ॥ अतश्च योगीश्वराद्युक्तप्राजापत्यसदृपस्थाने गौतमी
यमनकेति कर्तव्यतासहितं द्रष्टव्यं ॥ एवमन्यान्यपि स्मृत्यंतरोक्तविशेषवचनान्यन्वेषणीयानि ॥ अति
कृच्छ्रमाह ॥ ॥ अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः ॥ एतद्धर्मक एव एकभक्तादिप्राजापत्य
धर्मयुक्तोतिकृच्छ्रः स्यात् ॥ इयांस्तु विशेषः ॥ आद्युत्र्यहत्रये पाणिपूरणमात्रमन्नं भुंजीत न पुनर्द्वाविं
शत्यादिग्रासान् त्रप्रातर्भोजनानुवादेन पाणिपूरान्नविधानादंतत्र्यहे तिदेशप्राप्त उपवासो प्रतिय

श एव॥ अत्रापि पादशो व्यवस्था पूर्ववदेव द्रष्टव्या॥ यमुमनुनोक्तं॥ एकैकं ग्रासमश्नीयाअहानि त्रीणि
पूर्ववत्॥ अहंचोपवसेदन्यमतिकृच्छ्रंचरेद्द्विजइतितत्पाणिपूरपरिमितात्मत्वाधकृत्तविषयं॥ ॥कृ
च्छातिकृच्छ्रमाह॥ ॥कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिं॥ एकविंशतिरात्रंपयसावर्त्तनंकृच्छ्रा
तिकृच्छ्राख्यंव्रतंजपे॥ गौतमेनतुद्वादशरात्रमुदकेनवर्त्तनंकृच्छ्रातिकृच्छ्राख्यंव्रतंविज्ञेयमित्युक्तं॥ अ
ब्भक्षस्तृतीयः कृच्छ्रातिकृच्छ्र इति॥ अतश्चशक्त्यपेक्षयानयोर्व्यवस्था॥ पाराकमाह॥ ॥द्वादशाहोप
वासेनपराकः परिकीर्त्तितः॥ ऋज्वर्थोयमर्धश्लोकः॥ सौम्यकृच्छ्रमाह॥ ॥पिण्याकाचामतक्राम्बुस
क्तूनांप्रतिवासरं॥ एकरात्रोपवासश्चसौम्यकृच्छ्रोयमुच्यते॥ पिण्याकोदननिस्रावोदश्विदुदकसक्तू
नांपंचानामेकैकंप्रतिदिवसंउपयुज्यषष्ठेत्युपवसेत्॥ एकसौमाख्यः कृच्छ्रोभिधीयते॥ द्रव्यपरिमा राम०
णंतुप्राणयात्रामात्रनिबंधनमधिगंतव्यं॥ जाबालेनतुचतुरहव्यापीसौम्यकृच्छ्र उक्तः॥ पिण्याकसक्त २२२

वस्तक्रंचतुर्थेहन्यभोजनं॥ वासोवैदक्षिणांदद्यात्सौम्योयंकृच्छ्रउच्यतइति॥ ॥तुलापुरुषाख्यंकृच्छ्रमा
ह॥ ॥एषांत्रिरात्रमभ्यासादेकैकस्ययथाक्रमं॥ तुलापुरुषइत्येषज्ञेयः पंचदशाहिकः॥ एषां
पिण्याकादीनांपंचानांक्रमेणैकैकस्यत्रिरात्राभ्यासेनपंचदशाहव्यापीतुलापुरुषाख्यः कृच्छ्रोवे
दितव्यः॥ अत्रचपंचदशाहात्मिकत्वविधानादुपवासास्यनिवृत्तिः॥ यमेनत्वेकविंशतिरात्रिकस्तु
लापुरुषउक्तः॥ आचाममथपिण्याकंतक्रंचोदकसक्तुकान्॥ त्र्यहंत्र्यहंप्रयुंजानोवायुभक्षस्त्र्यहं
त्र्यहं॥ एकविंशतिरात्रस्तुतुलापुरुषउच्यतइति॥ ॥अत्रहारीताद्युक्तेतिकर्त्तव्यताग्रंथगौरवभया
न्नलिख्यंते॥ ॥चांद्रायणमाह॥ ॥तिथिवृद्ध्याचरेत्पिंडान्शुक्लेशि॰डसम्मितान्॥ एकैकंह्रास ख्यं
येत्कृष्णेपिंडंचांद्रायणंचरन्॥ चांद्रायणाख्यंकर्मकुर्वन्मयूराण्डपरिमितान्पिंडान्भुंक्तेआपूर्यमाण
पक्षेतिथिवृद्ध्याचरेद्ध्रासयेत्॥ यथाप्रतिपत्प्रभृतिषुतिथिषुचंद्रकलानामेकैकशोवृद्धिरर्द्धमासे

तास्पिंडानामपिप्रतिपद्येकोद्वितीयायांद्वाइत्येवमेकैकशोवर्धयन्नश्नयेत्॥यावत्पौर्णमासीततःपंचदश्यां
पंचदशग्रासान्भुक्त्वाततःकृष्णपक्षेचतुर्दशप्रतिपदिद्वितीयायांत्रयोदशेत्येवंएकैकशोग्रासान्ह्रास
यन्नश्नीयात्यावच्चतुर्दशीततश्चतुर्दश्यामेकंग्रासमित्वाइंदुक्षयेथोदुपवसेत्॥तथाचवसिष्ठः॥ए
कैकंवर्द्धयेत्पिंडंशुक्लेकृष्णेचह्रासयेत्॥इंदुक्षयेनभुंजीतएषचांद्रायणेविधिरिति॥चंद्रस्यायनमि
वायनंचरणंयस्मिन्कर्मणिह्रासवृद्धिभ्यांतच्चांद्रायणंसंज्ञायांदीर्घः॥इदंचयववत्स्यांतयोरल्पीयोमध्ये
स्थवीयइतियवमध्यमितिकथ्यते॥एतदेवव्रतंयदाकृष्णपक्षप्रतिपदिप्रक्रम्यपूर्वोक्तक्रमेणानुष्ठी
यते॥तदापिपीलिकावन्मध्येकृशिष्ठंभवतीतिपिपीलिकामध्यमितिकथ्यते॥तथाहिपूर्वोक्तक्रमेण
कृष्णप्रतिपदिचतुर्दशग्रासान्भुक्त्वाएकैकग्रासापचयेनचतुर्दशीयावद्भुंजीततश्चतुर्दश्यामेक राम०
ग्रासंग्रसित्वाअमावास्यायामुपोष्यशुक्लप्रतिपद्येकमेवग्रासमश्नीयात्ततएकोपचयेनभोजनेनपक्ष २२७

शेषेनिर्वर्त्यमानेपौर्णमास्यांपंचदशग्रासाःसंपद्यंतइतिपुंक्तेवपिपीलिकामध्यता॥तथाचवसिष्ठः॥
मासस्यकृष्णपक्षादौग्रासानद्याच्चतुर्दश॥ग्रासापचयभोजीसन्पक्षशेषंसमापयेत्॥तथैवशुक्लप
क्षादौग्रासंभुंजीतचापरं॥ग्रासोपचयभोजीसन्पक्षशेषंसमापयेदिति॥यदात्वेकस्मिन्पक्षेतिथिवृद्धि
ह्रासवशात्षोडशादिनानिभवंतीचतुर्दशवातादाग्रासानामपिवृद्धिह्रासौवेदितव्यौ॥तिथिवृद्ध्यापिंडा
श्चरेदितिनियमात्॥गौतमेनतत्रविशेषोदर्शितः॥अथातश्चांद्रायणंतस्योक्तोविधिःकृच्छ्रेवपरव
तंचरेत्स्वाभ्रुत्वापौर्णमासीमुपवसेत्॥आप्यायस्वसंतेमपांसिनवोनवइतिचैताभिस्तर्पणमाज्य
होमोहविषश्चानुमंत्रणमुपस्थानंचंद्रमसःयद्देवादेवहेलनमितिचतसृभिराज्यंजुहुयाद्देवकृतस्ये
तिचांतेसमिद्भिःॐभूःभुवःस्वःमहःजनःतपःसत्यंयशःश्रीःऊर्क्इडओजःतेजःपुरुषःधर्मःशि
वःइत्येतैर्ग्रासानुमंत्रणं॥प्रतिमंत्रंमानसानमःस्वाहेतिवासर्वान्एतैरेवग्रासान्भुंजीत॥ग्रासप्रमा

णमास्याविकारेणचरुभैक्ष्यसक्तुकणयावकपयोदधिघृतमूलफलोदकानिहवींष्युत्तरोत्तरप्रशस्तानि
पौर्णमास्यांपंचदशग्रासान्भुक्त्वैकैकापचयेनापरपक्षमश्नीयात्॥अमावास्यामुपोष्यएकैकोपचयेन
पूर्वपक्षंविपरीतमेके॥यामेषचांद्रायणोमासविधिरिति॥अत्रमासप्रमाणमास्यादिकारेणेतियदुक्तं
तत्तद्वेलाभिप्रायं॥तेषांशिखंडपरिमितपंचदशग्रासभोजनाशक्तेःक्षीरादिद्रवहविष्यशिखंडप
रिमितंस्वपर्णपुटिकादिनाशंपादनीयंतथाकुक्कुटांडार्द्धमलकादीनितुग्रासपरिमाणानिस्मसंत
रोक्तानितानिशक्तविषयाणिशिखंडपरिमाणंलघुत्वात्तेषां॥यत्पुनरत्रश्वोभूतांपौर्णमासीमुपवसे
दितिचतुर्दश्यामुपवासमभिधायपौर्णमास्यांपंचदशग्रासान्भुक्त्वेत्यादिनाद्वात्रिंशदहोरात्रात्म
कत्वंचांद्रायणस्योक्तं॥तत्पक्षांतरप्रदर्शनार्थंनत्सार्वत्रिकं।योगीश्वरादिवचनानुरोधेनत्रिंशदहो रा.म०
रात्रात्मकस्यदर्शितत्वात्॥यद्येतत्सार्वत्रिकंस्यात्तदानेरंतर्येणसंवत्सरचांद्रायणानुपपत्तिःस्यात्॥ २२८

चंद्रगत्यनुवर्तनानुपपत्तिश्च॥ ॥चांद्रायणांतरमाह॥ ॥यथाकथंचित्पिंडानांचत्वारिंशच्छतद्वयं
॥मासेनैवोपभुंजीतचांद्रायणमथापरं॥पिंडानांचत्वारिंशदधिकशतद्वयंमासेनभुंजीतयथाकथं
चित्प्रतिदिनं॥मध्याह्नेष्टौग्रासांस्तथानक्तदिवसयोश्चतुरोवा॥अथवैकस्मिंश्चतुरःपरस्मिन्द्वादश
तथैकरात्रमुपोष्यापरस्मिन्षोडशेत्यादिप्रकाराणामन्यतमेनशक्त्यपेक्षयाभुंजीतेति॥एतच्चपू
र्वोक्ताच्चांद्रायणद्वयादपरंचांद्रायणंअतस्तयोर्नायंग्रासनियमः॥किंतुपंचविंशत्यधिकशतद्वयसं
ख्येवमनुनाऽनेनप्रकारादर्शिता॥अष्टावष्टौसमश्नीयात्पिंडान्मध्यंदिनेस्थिते॥नियतात्माहविष्यस्य
यतिश्चांद्रायणंचरन्॥चतुरःप्रातरश्नीयात्पिंडान्विप्रःसमाहितः॥चतुरोस्तमितेसूर्येशिशुचांद्रायणं
चरन्यथाकथंचित्पिंडानांतिस्रोशीतिःसमाहितः॥मासेनाश्नन्हविष्यस्यचंद्रस्येतिसलोकताम्॥त
थाचत्वारिंशदधिकंशतद्वयान्न्यूनसंख्याग्राससंपाद्यस्यापिसंग्रहार्थमपरग्रहणं॥यथाहयमः॥त्रीस्त्री

न्पिंडान्समश्नीयान्नियतात्मा दृढव्रतः हविष्यान्नस्यावै मासमृषिचांद्रायणस्मृतमिति॥ एषु यतिचां
द्रायणप्रभृतिषु नंवद्गस्यनुसरणमपेक्षितं आतस्त्रिंशद्दिनात्मकसावनमासेमनैरंतर्येण चंद्रा
यणानुष्ठानेयदिकथंचित्तिथिवृद्धिह्रासवशेन पंचम्यादिष्वारंभोभवति॥ तथापिनदोषः॥ यदपिसो
मापनाख्यमासव्रतं मार्कंडेयेनोक्तं॥ गोक्षीरं सप्तरात्रं तु पिबेत्स्तनचतुष्टयात्। स्तनत्रयात्सप्तरात्रं स
सप्तरात्रं स्तनद्वयात्॥ स्तनेनैकेन षड्रात्रं त्रिरात्रं वायुभुग्भवेत्॥ एतत्सोमायनंनाम व्रतकल्मषनाशन
मिति॥ तदपिचांद्रायणधर्मकमेव। हारीतेनाथातश्चांद्रायणमनुक्रमिष्याम इत्यादिनासेतिकर्तव्यता
कंचांद्रायणव्रतमभिधायैवमेव सोमायनमित्यतिदेशाभिधानात्। यत्तुनस्तेनकृष्णचतुर्थीमारभ्य
शुक्लद्वादशीपर्यंतंसोमायनमुक्तं॥ चतुर्थीप्रभृतिचतुःस्तनेनत्रिरात्रंत्रिस्तनेनत्रिरात्रं॥ द्विस्तनेन रामo
त्रिरात्रमेकस्तनेनत्रिरात्रंएवमेकस्तनप्रभृतिपुनश्चतुःस्तनांतं॥ यानिसोमचतुर्थीतन्वस्तयानः २८५

पाहितस्यैस्वाहा॥ यांतेसोमपंचमीषष्ठीसेवंयथार्थोस्तितिथिहोमाः एकतमंकृत्वाप्येनोभ्यः पूतश्चंद्र
मसासाम्यंसमानलोकतांसायुज्यंचगच्छतीति चतुर्विंशतिदिनात्मकंसोमायनमुक्तंतदशक्तविषयं
॥अथकृच्छ्रचांद्रायणसाधारणीमितिकर्तव्यतामाह॥ ॥कुर्यात्त्रिषवणस्नायी कृच्छ्रंचांद्रायणंतथा॥
पवित्राणिजपेत्पिंडान्गायत्र्याचाभिमंत्रयेत्॥ कृच्छ्रंप्राजापत्यादिकंचांद्रायणंवात्रिषवणस्नानयु
क्तः कुर्यात्॥ एतच्चव्रतसत्कृच्छ्रव्यतिरेकेण॥ तत्रतुसकृत्स्नायीसमाहितइतिमनुनाविशेषाभिधाना
त्॥ यत्तुनस्तेनकृच्छ्रेषुषट्सवनस्नानमभिहितं॥ त्रिरह्नित्रिर्निशायांतुसवासाजलमाविशेदिति
तच्छक्तविषयं॥ यत्तुनवेशंपापनेनद्वैकालिकंस्नानमुक्तं॥ स्नानेद्विकालमेवस्यात्त्रिकालंवाद्विजन्म
नइति॥ तत्त्रिषवणस्नानाशक्तविषयंवेदितव्यं॥ यत्तुनर्गार्ग्येणोक्तं॥ एकवासोश्वरेद्भैक्षंस्नात्वावासो
नपीडयेत्इतितदपिशक्तस्यैव॥ एकवासाद्विवासावालघ्वाशीस्थंडिलेशयइति॥ एकषस्त्रतायाअपि

शंखेनपाक्षिकत्वेनाभिधानात्॥स्नानेचहारीतेनविशेषोदर्शितः॥अंबरंशुद्धवतीभिःस्नात्वाघमर्षण
मंतर्जलेजापित्वाधौतमहतंवासःपरिधायसाम्नासौम्येनादित्यमुपतिष्ठेतेति॥स्नानानंतरंचपवित्राणि
जपेत्॥पवित्राणिचाघमर्षणं॥देवकृतः॥शुद्धवत्यः॥तरत्समा॥इत्यादिवसिष्ठादिप्रतिपादितानां
मन्यतमार्थाविरुद्धेषुकालेषुजपेत्सावित्रींवा॥सावित्रींवाजपेन्नित्यंपवित्राणिचशक्तितइतिमनुस्मर
णात्॥यत्तुगौतमेनोक्तं॥रौरवयौधाजपेनित्यंप्रयुंजीतेतितदपिपवित्रत्वादेवोक्तं॥नपुनर्नियमाय
।तथासतिश्रुत्यंतरमूलकत्वकल्पनाप्रसंगात्॥अतोनधीतसामवेदेनगायत्र्यादिकमेवजप्तव्यं॥यद
पिनमोहमायमोहमायेत्यादिपठित्वाएताएवान्याहुतयइत्युक्तंतदपिननैयमिकं॥महाव्याहृतिभिर्हो
मःकर्तव्यःस्वयमनदहमितिमनुनाव्याहृतिभिर्होमविधानात्॥तथाषट्त्रिंशन्मतेनोक्तं॥जपहोमा राम
द्ययत्किंचित्कृच्छ्रोक्तंसंभवेन्नतु॥सर्वेव्याहृतिभिःकुर्याद्गायत्र्याप्रणवेनचेति॥आदित्यग्रहणादुदकतर्पण २२५

दित्योपस्थानादेर्ग्रहणं॥अतएववैशंपायनः॥स्नात्वोपतिष्ठेदादित्यंसौरीभिस्तुकृतांजलिरिति॥
एवमन्येष्वपिविरोधिपदार्थेषुविकल्पःआश्वयणीय॥अविरोधिषुतुसमुच्चयः॥शाखांतराधिक
रणन्यायेनसर्वस्मृतिप्रत्ययत्वात्कर्मणः॥जपसंख्यायांचविशेषस्तेनैवदर्शितः॥ऋषभंविर
जंचैवाघमर्षणं॥गायत्रींवाजपेद्देवींपवित्रांवेदमातरं॥शतमष्टशतंवापिसहस्रमथवापरं॥उ
पांशुमनसावापितर्पयेत्पितृदेवताः॥मनुष्यांश्चैवभूतानिप्रणम्याशिरसाततइति॥तथापिं
डाश्चप्रसेकंगायत्र्याभिमंत्रयेत्॥तथायमेनापिविशेषउक्तः॥अंगुल्यग्रेस्थितंपीडंगायत्र्याचाभि
मंत्रितं॥प्राश्याचम्यपुनःकुर्यादन्यस्याप्यभिमंत्रणमिति॥अतश्च॥भूर्भुवःस्वइत्यादिगौतमोक्ते
रनुमंत्रणमंत्रैःसहास्यविकल्पः॥यत्तुनराध्यायस्वसंतेययासीत्यादिभिःपिंडकरणस्पूर्वह
विष्यानुमंत्रणमुक्तं॥तद्भिन्नकामेत्वान्नमुञ्चीयते॥एतानिकृच्छ्रादीनिव्रतानियदीप्रायश्चित्तार्थम

तुरीयं तेन तदा केशादिवपनपूर्वकं परिगृहीतव्यामिव यनं व्रतं चेदिति गौतमस्मरणात्॥ अभ्युदयार्थं
त्वेनैव वपनं॥ वसीष्टेनाप्यत्र विशेष उक्तः॥ कृछ्राणां व्रतरूपाणि स्मश्रुलोमादि वापयेत्॥ कुक्षिरोमशि
खावर्ज्यं इत्यादि कृछ्राणि व्रतरूपाणि वपनादीन्यंगानि वक्ष्यंत इति शेषः॥ परिषदुपदिष्टव्रतग्रहणं
च व्रतानुष्टानदिवसात्पूर्वेद्युः सायाह्ने कार्यं॥ यथाह विष्णुः॥ सर्वपापेषु सर्वेषां व्रतानां विधिपूर्व
कं॥ ग्रहणं संप्रवक्ष्यामि प्रायश्चित्ते चिकीर्षिते॥ दिनांते नखरोमादीन्प्रवाप्य स्नानमाचरेत्॥ भस्म
गोमयमृद्वारि पंचगव्यादिकल्पितैः॥ मलापकर्षणं कार्यं बाह्यशौचोपसिद्धये॥ दंतधावनपूर्वेण
पंचगव्येन संयुतं॥ व्रतं निशामुखे ग्राह्यं बहिस्तारकदर्शने॥ आचम्यातः परं मौनी ध्यायन्दुष्कृतमा
त्मनः॥ मनः संतापयंस्तीव्रमुद्वहेच्छोकमंततः॥ इति॥ बहिरिति ग्रामान्निष्क्रम्य॥ स्त्रिया अप्येवं व्रतप राम०
रिग्रहः कार्यः केशवपनवर्ज्यं केशश्मश्रुलोमनखवपनं चांद्रायणादिषु एतदेव स्त्रियाः केशवपनवर्ज्य २२१

मिति बौधायनस्मरणात्॥ वपनानिष्ठोक्तहारीतेन विशेष उक्तः॥ राजा वा राजपुत्रो वा ब्राह्मणो वा बहु
श्रुतः॥ केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत्॥ केशानां रक्षणार्थं तु द्विगुणं व्रतमाचरेत्॥ द्विगु
णं व्रत आचीर्णे दक्षिणा द्विगुणा भवेदिति॥ एतच्च महापातकादिदोषविशेषाभिप्रायेण द्रष्टव्यं॥ वि
द्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनं॥ ऋते महापातकिनो गोहंतुश्चावकीर्णिन इति स्मरणात्॥ जाबा
लेनाप्यत्र विशेष उक्तः॥ आरंभे सर्वकृछ्राणां समाप्तौ च विशेषतः॥ आज्येनैव हिरण्याग्नौ जुहुयाद्व्याहृ
तीः पृथक्॥ श्राद्धं कुर्यात्ततोंते तु गोहिरण्यादिदक्षिणेति॥ यमेनाप्यत्र विशेष उक्तः॥ पश्चात्तापो निवृत्ति
श्च स्नानं चांगतया स्मृतं॥ नैमित्तिकानां सर्वेषां तथा चैवानुकीर्तनमिति॥ तथा॥ गात्राभ्यंगं शिरोभ्यंगं तां
बूलमनुलेपनं॥ व्रतस्थो वर्जयेत्सर्वं यच्चान्यद्बलरागकृदिति॥ एवमादीनि कर्तव्यता जातं स्मृत्यंतराद्द्रष्टव्यं
॥ एवमनेन विधिना व्रतं गृहीत्वावश्यं परिसमापनीयं॥ अन्यथा प्रत्यवायः॥ पूर्वं व्रतं गृहीत्वैव नाचरे

त्काममोहितः॥जीवन्भवतिचांडालोमृतःश्वाचैवजायतेइतिछागलेयस्मरणादिस्यलमतिप्र
संगेन॥ ॥इत्थमुक्तविनियोगस्यचांद्रायणादेःस्वरूपमभिधायलब्धप्रसंगःकार्यांतरेपिविनियो
पापेषु गमाह॥ ॥अनादिष्टेषुशुद्धिश्चांद्रायणेनच॥धर्मार्थंयश्चरेदेतंचंद्रस्यैतिसलोकतां॥आदिष्टप्रत
स्यादिप्रायश्चित्तंनविधीयते आदिष्टंयेषुपापेषुचांद्रायणेनशुद्धिःचशब्दात्प्राजापत्यादिभिः॥कृच्छ्
रैरेवसहितैस्तन्निरपेक्षैर्वाशुद्धिः॥तथाषट्त्रिंशन्मतेभिहितं॥यानिकानिचपापानिगुरोर्गुरुतराणि
च॥कृच्छ्रातिकृच्छ्रचांद्रैस्तुशोध्यंतेमनुरब्रवीत्इतित्रयाणांसमुच्चयःप्रतिपादितः॥उशनसातुद्वयोः
समुच्चयउक्तः॥दुरितानांदुरिष्टानांपापानांमहतामपि॥कृच्छ्रंचांद्रायणंचैवसर्वपापप्रणाशनमिति
॥दुरितमुपपातकं॥गौतमेनतुकृच्छ्रातिकृच्छ्रौचांद्रायणमितिसर्वप्रायश्चित्तमितिसमासकरणे
नैवनिरपेक्षताकृच्छ्रातिकृच्छ्रयोःसूचिता॥चांद्रायणस्यचतन्निरपेक्षताइतिशब्देनचात्रपापानांस २२८

Dr. BHAU DAJI MEMORIAL

मुच्चयः॥केवलंप्राजापत्यस्यतुनैरपेक्ष्यंचतुर्विंशतिमतेभिहितं॥लघुदोषेत्वनादिष्टेप्राजापत्यं
समाचरेदिति॥गौतमेनापिप्राजापत्यादेर्नैरपेक्ष्यमुक्तं॥प्रथमंचरित्वाशुचिःपूतःकर्मण्योभव
ति॥द्वितीयंचरित्वायदन्यन्महापातकेभ्यःपापंकुरुतेतस्मात्पापात्प्रमुच्यते॥तृतीयंचरित्वास
र्वस्मादेनसोमुच्यतइतिमहापातकादपीत्यभिप्रेतंमनुनाप्युक्तं॥पराकोनामकृच्छ्रोयंसर्वपाप
पनोदनइति॥हारीतेनाप्युक्तं॥चांद्रायणंपराकंचतुलापुरुषएवच॥गवांचैवानुगमनंसर्वपा
पप्रणाशनमिति॥तथागोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं॥एकरात्रोपवासश्चश्वपाकमपि
शोधयेत्॥तथा॥तप्तकृच्छ्रमधिकृत्यापितेनैवोक्तं॥एककृच्छ्रोद्विरभ्यस्तःपातकेभ्यःप्रमोचयेत्
त्रिरभ्यस्तोयथान्यायंस्वदहत्याद्यपोहतीति॥उशनसाचोक्तं॥यत्रोक्तंयत्रवानोक्तमिहपातकनाश
नं॥प्राजापत्येनकृच्छ्रेणशोधयेन्नात्रसंशयइति॥एतानिप्राजापत्यादीन्यनादिष्टेषूपपातकादिषुस

Dr. BHAU DAJI MEMORIAL

हृदभ्यासाद्यपेक्षयासमस्तानिव्यस्तानिवायोजनीयानितथा॥आदिष्टव्रतेष्वपिमहापातकादिष्वभ्यासापे
क्षयायोजनीयानी॥अतएवोक्तंयमेन॥यत्रोक्तंयत्रापानोक्तइत्यादि॥गौतमेनाप्युक्तनिःकृतीनां
संग्राहार्थंसर्वप्रायश्चित्तग्रहणंकृतं॥तथाचद्यपितेनैवोक्तंद्वितीयंचरित्वायदन्यन्महापातकेभ्यः
पापंकुरुतेतस्मात्पापात्प्रमुच्यतेइत्युक्तात्तृतीयंचरित्वासर्वस्मादेनसोमुच्यतइतितदपिमहापात
काभिप्रायं॥नचमहापातकानुक्तनिष्कृतिकंसंभवति॥तस्मादुक्तनिष्कृतिकेष्वपिप्राजापत्यादयोयो
जनीयाः॥यत्रद्वादशवार्षिकव्रतेद्वादशादिनान्येकैकंप्राजापत्यंपरिकल्प्यगण्यमानेप्राजापत्यानां
षष्ट्यधिकंशतत्रयंद्वादशवार्षिकवैकल्पिकमनुष्ठेयंभवति॥तदशक्तौतत्रवत्सोवाधेनवोदातव्याः॥त
दभावेनिष्काणांषष्ट्यधिकंशतत्रयंदातव्यं॥तथाचस्मृत्यंतरं॥प्राजापत्यक्रियाशक्तौधेनुंदद्याद्वि राम०
जोत्तमे॥धेनोरभावेदातव्यंमूल्यंतुल्यंनसंशयः॥इतिमूल्यार्थमपिनिष्कांतदर्धंतदर्धंवाशक्त्यपे २२९

माध·प्रात्मात

क्षयाद्देयं॥गवामभावेनिष्कंस्यात्तदर्धंपादमेवचेतिस्मरणात्॥मूल्यदानस्याप्यशक्तौतावंतउपवा
साःकर्त्तव्याः॥तत्राप्यशक्तौगायत्रीजपःषट्त्रिंशल्लक्षसंख्यःकार्यः॥कृच्छ्रोऽयुतंतुगायत्र्याउपवास
स्तथैवच॥धेनुप्रदानंविप्रायसममेतच्चतुष्टयमितिपराशरस्मरणात्॥यत्तुचतुर्विंशतिमतेऽभि
हितं॥गायत्र्यास्तुजपन्कोटिंब्रह्महत्यांव्यपोहति॥लक्षाशीतिंजपेद्यस्तुसुरापानाद्विमुच्यतेपुना
तिहेमहर्त्तारंगायत्र्यालक्षसप्ततिः॥गायत्र्याःषष्टिभिर्लक्षैर्मुच्यतेगुरुतल्पगइतितुद्वादशवार्षिक
तुल्यतयोक्तं॥नपुनरशक्तविषयमितिनविरोधः॥एवमन्येपि॥कृच्छ्रोदेव्ययुतंचैवप्राणायामशतद्व
यं॥तिलाहोमसहस्रंतुवेदपारायणंतथेत्यादयःप्रत्याम्नायाश्चतुर्विंशतिमतादिग्रंथेष्वभिहिताः॥ष
ष्ट्यधिकशतत्रयगणितानांमहापातकेषुबोद्धव्याः॥अतिपातकेतुसप्तत्यधिकशतद्वयंप्राजापत्यानां
कर्त्तव्यंतावत्योधेन्वादयःप्रत्याम्नायाः॥पातकेषुतुसाशीतिशतंप्राजापत्यानांप्रत्याम्नायाश्चधेन्वादयस्तो

वत्सएव॥ तथाचतुर्विंशतिमतेभिहितं॥ जन्मप्रभृतिपापानिबहूनिविविधानिच॥ कृत्वावीग्ब्रह्महत्यायाः
षडब्दंव्रतमाचरेत्॥ प्रत्याम्नायेगवांदेयंसार्धा।तिधेनिनाशतं॥ तथाष्टादशलक्षाणिगायत्र्याश्चाजपेद्बुध इति
॥इदमेवचद्वादशवार्षिकव्रतेद्वादशदिनैरेकैकप्राजापत्यकल्पनायालिंगं॥ एवमुपपातकेपुत्रैवार्षिकप्राय
श्चित्तविषयभूतेपुनरतिप्राजापत्यास्तावंतोवाप्रत्याम्नायाः॥ त्रैमासिकविषयेपुनःसार्द्धसप्तप्राजाप
त्याः॥ प्रत्याम्नायाश्चधेन्वादयस्तावंतएव॥ मासिकव्रतविषयेतुसार्द्धप्राजापत्यद्वयंतावानेवप्रत्याम्नायः
॥ चांद्रायणविषयेपुनरुपपातकेप्राजापत्यत्रयंतदृशस्तस्यप्रत्याम्नायस्तावंतएव॥ मासिकव्रतविषयेतु
सार्द्धप्राजापत्यस्यप्रत्याम्नायस्तावानेव॥ यत्पुनश्चतुर्विंशतिमतेभिहितं॥ अष्टौचांद्रायणेदेयाः प्रत्याम्ना
यविधौसदेतितदतिधनिनः पिपीलिकामध्यचांद्रायणप्रतम्नायविषयं॥ मासातिकृच्छ्रविषयभूतेपुनरु राम०
पपातकेसार्द्धसप्तप्राजापत्याः प्रत्याम्नायाश्चधेन्वादयस्तावंतएव॥ प्राजापत्यादिप्रत्याम्नायानाह॥ प्राजापत्ये २३०

गामेकांदद्यात्सांतपनेनद्वयं॥ पराकतप्तातिकृच्छ्रेतिस्रस्तुगास्तथेतिचतुर्विंशतिमतेभिधानात्॥ एतच्चैकैके
कंग्रासमश्नीयादित्याद्यामलकपरिमितेकैकग्रासपक्षेवेदितव्यं॥ पाणिपूरान्नभोजनपक्षेपुनर्द्वेनुद्वयमे
वप्राजापत्यस्यषडुपवासतुल्यत्वात्तद्द्विगुणत्वाच्चातिकृच्छ्रस्य॥ यद्यपिनवसुदिनेषुपाणिपूरान्नभोजनप
क्षेपुतथापिनैरंतर्येणद्वादशदिनवशानुष्ठानेक्लेशातिशयात्सद्वहोपवाससमानप्राजापत्यद्वयतुल्यत्वमे
वप्राजापत्यस्यचषडुपवासतुल्यत्वंयुक्तमेव॥ तथाहि॥ प्रथमेत्र्यहेसायंतनभोजनत्रयनिह्नवाद्वेकोप
वाससंपत्तिर्द्वितीयेत्र्यहेप्रातःकालभोजनत्रयवर्जनेपरस्यतथाऽयाचितत्र्यहेसायंतनभोजनत्रयवर्ज
नेऽपरस्यैवंनवभिर्दिनैरुपवासत्रयंततश्चांत्यत्र्यहेचोपवासत्रयमित्युक्तंषडुपवासतुल्यत्वं॥ अत्रभै
कादशेगोदानसहितत्रिरात्रोपवासात्मकगोवधव्रतेतुसार्द्धैकादशप्राजापत्यास्तावत्संख्याश्चधेन्वादयः
प्रत्याम्नायाः॥ मासंपयोव्रतेतुसार्द्धप्राजापत्यद्वयं॥ पराकात्माकेत्रूपपातकव्रतेप्राजापत्यत्रयंपराकतप्ता

तिकृच्छ्रत्रयं चरेत्॥ सांतपनस्य वा घर्धमशक्तो व्रतमाचरेदिति षट्त्रिंशन्मतेभिधानात्॥ चांद्रायणपराककृच्छ्रा
स्तु प्राजापत्यत्रयात्मका द्वादशवार्षिकस्थाने विंशत्युत्तरशतसंख्या अनुष्ठेयाः॥ तत्समत्रापास्तु धेन्वाद
यस्त्रिगुणाः अतिपातकेषु नवतिसंख्याश्चांद्रायणादयः॥ तत्समेषु पुनः पातकपदाभिधेयेषु षष्टिसंख्याः
॥ उपपातकेषु त्रैवार्षिकविषयेषु त्रिंशत्संख्याः॥ त्रैमासिके तु गोवधव्रतस्थाने गोमूत्रस्नानादीति कर्तव्य
ता वा हुल्याच्चांद्रायणत्रयं॥ मासिकव्रते तु योगीश्वरोक्तं एकमेव चांद्रायणादिकं॥ धेन्वादयः सादिम साम्ना
याः सर्वत्र त्रिगुणा एव॥ प्रकीर्णकेषु तु पुनः प्रतियदोक्तप्रायश्चित्तानुसारेण प्राजापत्यपादादिकृच्छ्रसा
योर्जनियं॥ आवृत्तौ पुनश्चांद्रायणादिकमित्येतद्दिगवलंबनेनान्यत्रापि कल्पना कार्या॥ यत्तु नर्दहस्य
तिनोक्तं॥ जन्मप्रभृति यत्किंचित्पातकं॥ चोपपातकम्॥ तावदावर्तयेत्कृच्छ्रं यावत्सष्टिगुणं भवेदिति तं द्वा रा.म.
दशार्यइति गोतमोक्तं द्वैवार्षिकसमानविषयं॥ तथा त्रैमासिकादिविषयभूतोपपातकावृत्तिविषयं च पातक २३१

पदाभिधेय चंडालादिदिवा स्त्रीगमनद्विरभ्यासविषयं॥ तावत्तत्र ज्ञानात्कृच्छ्रमुद्दिष्टमज्ञानादेव द्वयमि
ति सकृद्बुद्धिपूर्वगमने कृच्छ्रविधानात्तदभ्यासे द्विवर्षं तु स्यष्षष्टिकृच्छ्रविधानं युक्तमेव॥ यत्तु सुमंतुनोक्तं
॥ परस्य सकृदभ्यस्तं बुद्धिपूर्वकमघं महत्॥ तच्छुध्यस्य कृच्छ्रेण महतः पातकादृत इति॥ तदप्युपपातका
घात्रिविषयं॥ तथा अज्ञानादेव द्वयमिति यमोक्तं द्वयविषयभूतपातकावृत्तिविषयं च॥ यस्तु तय
स्य समर्थो धान्यसमृद्धश्च सकृच्छ्रादिव्रतानि द्विजाग्र्यभोजनदानेन संपादयेत्॥ तथा हि स्मृत्यंतरे॥ कृच्छ्रं पंचा
ति कृच्छ्रे त्रिगुणमहरहस्त्रिंशदेवं तृतीये॥ चत्वारिंशच्च तप्ते त्रिगुणनगुणिता विंशतिः स्यात्पराके॥ कृच्छ्रे
सांतपनाख्ये भवंति षडधिका विंशतिः॥ सैव हीनाद्वाभ्यां चांद्रायणे स्यात्तयसिकृशवलो भोजयेद्विप्रमुख्या
न्॥ अहरहरिति सर्वत्र संबंधनीयं॥ तृतीयः कृच्छ्रातिकृच्छ्रः॥ अत्र च प्राजापत्यदिवसादिकलात्पनया विद
द्विप्राणां षष्टिर्भोजनं भवति॥ यत्तु चतुर्विंशतिमते भिहितं॥ विप्रा द्वादश वा भोज्याः पावके ष्टिस्तथैव च॥

अन्यावापावनी काचित्समान्या हृन्मनीषिण इति प्राजापत्यस्थाने द्वादशब्राह्मणानां भोजनमुक्तं ॥ तन्निर्धन
विषयं ॥ यस्तु चांद्रायणस्यापि तत्रैव प्रत्याम्नाय उक्तः ॥ चांद्रायणं मृगारेष्टिः पवित्रेष्टिस्तथैव च ॥ मि
त्रविंदा पशुश्चैव कृच्छ्रं मासत्रयं तथा ॥ नित्यनैमित्तिकाम्यानां चैव कर्मणां ॥ इष्टीनां पशुबंधानामभावे चर
वः स्मृता इति तदपि चांद्रायणाशक्तस्याप्यत्र कृच्छ्रं मासत्रयं तथेति कृच्छ्राष्टकप्रत्याम्नातं ॥ तदपि सर्ववि
षयमवादं ॥ चांद्रायणं त्रिभिः कृच्छ्रैरिति दर्शितत्वादिसलमतिप्रसंगेन प्रकृतमनुसरामः यस्त्वभ्युदयकामो
धर्मार्थकाम्यनियोगनिष्पत्त्यर्थमेतच्चांद्रायणमनुतिष्ठति न पुनः प्रायश्चित्तार्थं स सोचांद्रसालोक्यं स
गेहिशेषं प्राप्नोति एतच्च संवत्सराद्यभिप्रायेण एकमासस्त्वापायो विपाप्मा सर्वमेनो हंति द्वितीयमास्वा
दश पूर्वान्दशावरानात्मानं चैकविंशं पंक्तिं च पुनाति संवत्सरं चाप्त्वा चंद्रमसः सलोकतामाप्नोतीति गौत एम०
मस्मरणात् किंच कृच्छ्रकृद्धर्मकामस्तु महतीं श्रियमाप्नुयात् तथा गुरुक्रतुफलं प्राप्नोति सुसमाहितः यस्त्व २३२

भ्युदयकामः प्राजापत्यादिकृच्छ्राननुतिष्ठति स महतीं राज्यादिलक्षणां श्रियं विभूतिमनुभवंति यथा गुरु
क्रतूनां राजसूयादीनां कर्त्ता तत्फलं स्वाराज्यादिलक्षणं महत्फलं लभते तथायमपि सुसमाहितः सक
लांगकलापमविकलमनुतिष्ठति फलमहिमप्रकाशनार्थं क्रतुदृष्टांतकीर्तनं सुसमाहित इत्यनेनाविक
लस्वार्थानुष्ठानं वदन्काम्यकर्मतदंगवैकल्ये फलासिद्धिं द्योतयति अतो नात्र प्रायश्चित्तेष्विव यावत्सं
भवांगानुष्ठानमंगीकरणीयमिति दूरोत्सारितं प्रत्याम्नायोपादानं कृच्छ्राद्यनुष्ठानावृत्तौ त्वधिकारिणः क
लावृत्तिः कर्मण्यारंभाभ्यासादिति न्यायलभ्या स्थितैवेति नेदमत्र विवक्षितं ॥ ॥ प्रागुदिताखिलार्थोपसं
हारव्याजेन धर्मशास्त्रधारणादिविधीन्सार्थवादान्प्रार्थनावरदानरूपेण प्रतिपादयितुमाह ॥ ॥ श्रुत्वैता
न्ऋषयो धर्मान्याज्ञवल्क्येन भाषितान् इदमूचुर्महात्मानं योगींद्रममितौजसं ॥ अत्र हि वर्णाश्रमादिव्यावृत्ताः
षट्प्रकारा धर्माः प्रतिपादितास्तानखिलान्योगीश्वरभाषितान्ऋषयः श्रुत्वा प्रहर्षोत्फुल्ललोचनास्तं महिम

नात्रसंशया॥

गुणशालिनमर्चितंनीयशक्तिविभवमभिधास्यमानमृचिवांस॥ ॥यइदंधारयिष्यंतिधर्मशास्त्रमंतद्
ताः इहलोकेयशःप्राप्यंतेयास्यंतित्रिविष्टपं विद्यार्थीप्राप्नुयाद्विद्यांधनकामीधनंतथा आयुष्कामस्त
थैवायुःश्रीकामोमहतींश्रियं श्लोकत्रयमपिह्यस्मायःश्राद्धेश्रावयिष्यति पितॄणांतस्यतृप्तिःस्याद
क्षयामुक्तिसंजमाःब्राह्मणःपात्रतांयातिक्षत्रियोविजयीभवेत् वैश्यश्चधान्यधनवान्स्यशास्त्रस्यधा
रणात्इत्थंमहर्षैःश्लोकैःसामश्रवःप्रभृतयोनेकमार्थयंतेस्म॥ ॥अपरामपिप्रार्थनामाह॥
॥वरदानयइदंश्रावयेत्सम्यक्द्विजान्पर्वसुपर्वसु अश्वमेधफलंतस्यतद्भवाननुमन्यतांयस्त्विदंधर्म
शास्त्रंप्रतिपर्वद्विजान्श्रावयेत्तस्याश्वमेधफलंभवेदितिश्रावणविध्यर्थवादःतदेतदस्यप्रार्थितम
र्थमत्रभवाननुमन्यतां॥ ॥वरदानमाह॥ ॥श्रुत्वैतद्याज्ञवल्क्योपिप्री तात्मामुनिभाषितं एवमस्त्वि रामं०
तिहोवाचनमस्कृत्यस्वयंभुवे एतदृषिभिर्भाषितंश्रुत्वायोगींद्रोपिनिर्णीतधर्मशास्त्रधारणादिफलप्रा २३३

र्थनोन्मीलितमुखपंकजःस्वयंभुवेब्रह्मणेनमस्कृत्यप्रणम्यभवत्प्रार्थितंसकलमिष्यंभवत्विसेवंकि
लभगवानभाषे॥ छ ः॥ इतिश्रीभरद्वाजपद्मनाभसद्गोपाध्यायात्मजपरमहंसपरिव्राजकाचार्य
विज्ञानेश्वरकृतौऋजुमिताक्षरायांयाज्ञवल्क्यधर्मशास्त्रविवृतौतृतीयोध्यायः समाप्तः॥ ३ः
ः॥ ॥शुभंभवतु॥ ॥ग्रंथसंख्याः ५७०० श्रीगुरुभ्योयनमः॥ ४ ॥छ छः

अध्यायेप्रकरणानुक्रमणिकाख्यायते॥सूतकप्रकरणं॥आपद्धृतिःप्रकरणं।वानप्रस्थधर्मकांडप्रकरणं॥यतिधर्मकेप्रेरणं।ततःप्रायश्चितप्रकरणं।तत्रादौकर्मविपाकः।महापातकाप्रायश्चितानि।प्रकीर्णकप्रायश्चितप्रकरणं।पतितत्यागविधिर्व्रतग्रहणविधिः।रहस्यप्रायश्चिताधिकारः।कृच्छ्रादिलक्षणमिति।

उत्तमोपपदस्येयंशिष्यस्यकृतिरात्मनः॥ धर्मशास्त्रस्यविवृत्तिर्विज्ञानेश्वरयोगिनः॥ विज्ञाननाथर रामं०
चिताविवृत्तिर्यामिताक्षरा॥सेयंद्वादशसाहस्रीसंख्यातांग्रंथसंख्यया॥नासीदस्ति भविष्यतिक्षिति २३४
तलेकल्याणकल्पंपुरंनोदृष्टःश्रुतएववाक्षितिपतिःश्रीविक्रमार्कोपमः॥ विज्ञानेश्वरपंडितेनभजते
कोवाम।नीषीतुलांमाकल्पंस्थिरमस्तुकल्पलतिकाकल्पंतदेतत्त्रयं॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

MEMORIAL